Digitized by Madhuban Trust, Delhi

CC-0. Siri Vidhi Gurmat Gyan Pratishthan Trust. In Public Domain.

Digitized by Madhuban Trust, Delhi

हिन्दी-शिक्षा

वि. ग. पर्वणिकर
श्री. ल. नाबदेकर

हिन्दी-शिक्षण-मण्डल
पुणे नं. २

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

₹1 2 5 =

CC-0. Shri Vipin Kumar Col, Deoband. In Public D

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिलक-महाराष्ट्र-विद्यापीठ-शाखाभूत—

वैदिक-संशोधन-मण्डलेन

प्रकाशिता

कृष्णयजुर्वेदीया

तैत्तिरीय-संहिता

पदपाठ-युता

भट्टभास्कर-सायणाचार्य-विरचित-भाष्याभ्यां समेता

द्वितीयखण्डस्य प्रथमो भागः

[द्वितीयं काण्डम्]



संपादकः

धर्माधिकारी नारायणसूनुः त्रिविक्रमशर्मा

सहायकः

आठलेकरः लक्ष्मणसूनुः श्रीपादशर्मा

शके १९०३

81 25

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Printed by :

T. N. Dharmadhikari
Vaidika Saṁśodhana Mudraṇālaya
Poona 37.

Price. Rs. ₹ 1 2 5 = =

Published by :

T. N. Dharmadhikari and H. N. Joshi
Secretaries, Vaidika Saṁśodhana Maṇḍala
Poona 37.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Tilaka Mahārāṣṭra Vidyāpīṭha

VAIDIKA SAMŚODHANA MANDALA
POONA

TAITTIRĪYA SAṂHITĀ

WITH THE PADAPĀṬHA
AND THE COMMENTARIES OF
BHAṬṬA BHĀSKARA MIŚRA AND SĀYAṆĀCĀRYA

Vol. II, part I
(Kāṇḍa II)

Published with the financial Assistance from the Ministry of Education and Culture, Government of India

Edited by
T. N. Dharmadhikari

Assisted by
S. L. Athlekar

1981

Rs 125-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सादरं समर्पणम्

प्रजातो गोखलेवंशे धीर-वीर-परिष्कृते ।
बल्लाळनन्दनो विश्वनाथो विधिविशारदः ॥

गीर्वाणवाणी-प्रणयी वेदविद्यानुरागवान् ।
कोल्हापुरं महालक्ष्मीमहापीठमधिष्ठितः ॥

प्रयुक्तः प्रमुखत्वेन न्यायनिर्णयकर्मणि ।
देवभूयं गतस्यास्य सर्वथा पुण्यकर्मणः ॥

स्मृतिं चिरस्य निर्मातुं श्रुत्यध्ययनलक्षणाम् ।
महादेवाभिधानेन गुणैः पितृसमेन च ॥

तदात्मजन्मना पादलक्षसंख्यान्वितं धनम् ।
वितीर्णम् ऋणमुक्त्यर्थं केनाप्यंशेन सादरम् ॥

मण्डले वेदविद्यायाः संशोधन-परायणे ।
प्रकाशनदशां प्राप्तस्तेन दानेन तत्त्वतः ॥

अयमध्वर्युवेदस्य तैत्तिरीयानुबन्धनः ।
खण्डो द्वितीयो द्वितीय-काण्ड-रूपोऽत्र संप्रति ॥

स्वर्गं गते च पितरि पितृसंदेशकारिणा ।
विधिनिष्णातमतिना स्वयं केशवशर्मणा ॥

अक्षीणं खलु दाक्षिण्यमत्र वस्तुनि दर्शितम् ।
सा चेयं वेदपुरुषसेवा सर्वातिशायिनी ॥

विहिता गोखलेवंश-संभवैः पुण्यपूरुषैः ।
सुप्रीणितस्तया कामं विद्यातीर्थमहेश्वरः ॥

वितीर्यादन्वये तस्मिन् आयुरारोग्यसंपदा ।
समं ज्ञानेन विज्ञानं चान्ततो ब्रह्मवर्चसम् ॥
वेदसंशोधनपरं मण्डलं काङ्क्षते मुदा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Dedicated to the Sacred Memory

of

The Late Shri. Vishvanath Ballal Gokhale



Eminent Sanskrit Scholar

and

Ex. Chief Justice of the former Kolhapur State

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

INTRODUCTION

We present with great pleasure, this first part of the second volume of the Kṛṣṇa Yajurveda Taittirīya-Saṁhitā comprising the second Kāṇḍa, with the Pada-pāṭha and the critically edited texts of the commentaries of Bhaṭṭa-Bhākaramiśra and Sāyaṇācārya; to the scholars and admirers of Oriental Learning.

We have collated for this volume also, a number of manuscripts on the commentaries of Bhaṭṭa-Bhāskarmiśra and Sāyaṇācārya; not utilised by the previous editions–viz. (1) Bibliotheca Sanskrita–Mysore (1904); (1) Ānandāśram, Poona (1901), (3) Biliotheca Indica–Calcutta (1886); with a view to make this edition as critically thorough as possible. Following is the description of the Critical apperatus :—

Sāyaṇa's Commentary–

PRINTED TEXTS

आ– Ānandāśram Edition–Ānandāśram Sanskrit Series No. 42, Printed in 1901, Poona. Edited by Pt. Kāśīnātha Śāstrī Āgāśe.

क– Calcutta Edition–Bibliotheca Indica, Asiatic Society of Bengal. No. 193 Vol. II–Printed in 1866 Edited by E. B. Cowell.

MANUSCRIPTS :

Adyar Library and Research Centre, Adyar, Madras.

ड– MS No. 75649–Palm leaf. Folios 142. Telugu script. Worm-eaten at places. End–भाव संवत्सरे मार्गशिर शुक्ल दशमी गु. सर्वतन्त्रस्वतन्त्र रामन्ना कंचि भोलं चन्ना गारकि विद्यारण्यं न्नाशयन्तु।

ड१– MS No. 74047 Palm Leaf. Kāṇḍa II only. Folios 137-269, Grantha script.

Bhārata Itihāsa Saṁśodhaka Maṇḍala, Poona.

इ– MS–No. 217. Paper manuscript. Devanāgarī script. Saṁvat 1810.

Archaeological Department, Jodhpur.

जो– Kāṇḍa 2 and 3–Incomplete. Folios 248+96=342. Paper manuscript. Devanāgarī script.

V. V. R. Institute, Hoshiarpur.

हो१– MS No. 6103. Kāṇḍa II only. *Palm leaf.* Telugu script. Folios 103. Neatly written.

End–पराभव नाम संवत्सर श्रावण बहुल तृतीया शुक्रवार मुद्दप्पु वेंकय्यगारिकि चरुकुपल्लि यज्ञा-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रगड वेंकटाचलम् संहिता द्वितीयकाण्डं भाष्यं व्राशिनदि. मुद्दपप्पु उपनामधेयाय वेंकय्यशर्मणे चरुकुपल्लि यल्लाप्रगड उपनामकेन वेंकटाचलशर्मणा संहिताद्वितीयकाण्डभाष्यं लिखित्वा समर्पितम् ।

Scindia Oriental Institute, Ujjain.

उ– MS No. 1409–Kāṇḍas II and VII. Incomplete. Paper manuscript. Devanāgarī script.

Manuscripts from Private Collections.

अ– Belonging to late Mahāmahopādhyāya Shri Kāśīnāthaśāstrī Abhyankar. Kāṇḍa II complete. Paper manuscript. Devanāgarī script.

ना– Belonging to Vedamūrti Nīlakaṇṭha Viṣṇu alias Aṇṇambhaṭṭa Sathe of Nasik. (Procured through Shri Balakṛṣna Appāji Lele).

ने– Belonging to Vedamūrti Viśvanātha Śrautī. Nellore Kāṇḍa II (beginning from Prapāṭhaka I anuvāka 5). Palm leaf. Grantha script. End : अरिवित्तुरै रामस्वामि सोमयाजी इत्येतैः लिखितः । अङ्गिरस नाम संवत्सरे पुण्यबहुल द्वादशी स्थिरवासरः । आङ्गिरसाब्दे मकरे मासि कृष्णे हरेर्दिने । रामेण लिखितं विद्यारण्यभाष्यं समूलकम् ।

पा– Belonging to late Śrautācārya Dhuṇḍirāja Śāstrī Bapat, Pāncwad. Complete MS of Sāyaṇabhāṣya on TS. Paper manuscript. Devanāgarī script.

शृं– Procured from Śṛngeri Muṭh, through Vedamūrti Viśvanātha Śrautī of Nellore.

हा– Belonging to Vedamūrti Girish Dixit, Hangal. Procured through Vedamūrti Bishtesh Dixit, Hangal. Complete MS of Sāyaṇabhāṣya on TS. Paper manuscript. Devanāgarī script.

Bhaṭṭa-Bhāskara's Commentary.

PRINTED TEXT.

मै– Bibliotheca Sanskrita Series–Vol. III, IV (Kāṇḍa II). Printed in 1895-6.

MANUSCRIPTS.

Adyar Library and Research centre, Adyar, Madras

अ– MS No. 70039; Palm leaf manuscript. Grantha script. Folios 209. Identical with मै४ and लं.

TMS Sarasvatī Mahal Library, Tanjore.

तं१– MS No. D 667. Burnell's Cat. No. 9047, Palm leaf. Grantha script. Kāṇḍa II–Complete. Identical with लं.

तं२– MS No. D. 665 Burnell's Cat. No. 9035. Palm leaf. Grantha script. Kāṇḍa II complete. Identical with लं.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तं३– MS No. D 666. Burnell's Cat No. 9045. Palm leaf. Granth script. Kāṇḍa II Incomplete.

Travancore University Library, Trivandrum.

त्रि– MS No. 3094. Palm leaf. Grantha script. Old. Damaged.

Punjab University Library.

पं– MS No. 6359. Palm leaf. Grantha script.

Mysore University, Oriental Research Institute, Mysore.

मै४– MS No. 1013 Palm leaf manuscript. Grantha script. Kaṇḍa I and II. Identical with तं.

India Office Library–London.

लं– MS. No. 4401. Kāṇḍas II and III. Palm leaf. Grantha script.

V. V. R. Institute, Hoshiarpur.

हो– MS No. 6055. Palm leaf. Grantha script. Kāṇḍa II, incomplete. Identical with त्रि.

In presenting the text of the Saṁhitā and Padapāṭha, we have mainly relied upon the tradition of oral recitation, so well preserved by the Vaidikas in Maharashtra. However we have utilised a number of manuscripts of the Taittirīya Saṁhitā and its Padapāṭha, besides their printed editions. Thus we have used the edition of Bibliotheca Sanskrita of Mysore (along with Bhaṭṭa-Bhāskara's Bhāṣya), that of Weber which appeared in Indische Studien (1871); the Kumbhakoṇam Edition of Taittirīya Padapāṭha, (1914), etc.

In accepting the readings in the commentaries, we have accorded importance to the grammatical accuracy and contextual propriety and have also considered the authenticity of the manuscripts. Some times however we had to correct and emend the readings (–especially those in Bhaṭṭa Bhāskara's Bhāṣya) out of incorrect material, but we have clearly pointed out such cases and have presented the incorrect material in foot-notes. It is gratifying to note that the manuscript-material first time utilised for this edition has presented many better readings.

From the cryptic character of the available text of Bhaṭṭa-Bhāskara's bhāṣya and from the lacunas frequently appearing in one or other manuscript of this bhāṣya, it seems that the original text of this bhāṣya may have been abridged to certain extent, and that too very abruptly, probably due to repetitions of grammatical explanations. Some manuscripts, in their colophons have

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

pointed out the abridged nature of this bhāṣya by referring to it as '*bhāṣya saṁkoca.*'[1] Under such circumstances, it was necessary to carefully collate and examine the heitherto unused manuscript-material and we are glad to note that our efforts in this direction have proved fruitful. We have been able to fill up, on the support of authentic manuscripts, many a lacuna appearing in the text of Bhaṭṭa Bhāskara's commentary as presented by the previous edition of Mysore.

We have tried our best to find out the sources of citations appearing in the commentaries. Despite our efforts, we could not trace the sources of some citations quoted under the caption of 'Kalpa' or 'Baudhāyana'. In this respect, we have also consulted some Śrautīs, but they also could not help us. Such citations may form the part of lost portions of Kalpas.

At the end of this Kāṇḍa and also at the beginning of the next, appears the colophonic matter which refers to the date of Bhaṭṭa Bhāskaramiśra. The verse runs as follow :—

एष निष्पाप(व)के शाके कुशिकान्वयजन्मना ।
भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रकीर्तितः ॥

The reading निष्पापके is found in the manuscript of Bhaṭṭa Bhāskara's bhāṣya on Kāṇḍa 3–No. D 670 borrowed from TMSM Library, and also in the MS of Bhaṭṭa Bhāskara's bhāṣya on Taittirīya Brāhmaṇa 1st Aṣṭaka, borrowed from Punjab University Library, MS No. 4401. If it is desirable to apply the [2]कटपयादिपरिभाषा, the reading निष्पापके शाके would mean 'in Śaka' 1110 (i.e. 1188 AD), while निष्पावके would mean 'in Śaka 1410' (i.e. 1488 AD). Sāyaṇācārya[3] has referred to Bhaṭṭa Bhāskaramiśra. It is again well known

1. Vide Page 91, Line 24 of our Edition of K. Y. T. S, Vol. I, Pt. 1.

2. कटपयादि परिभाषा as explained traditionally is न ञा वचश्च शून्यानि संख्या कटपयादयः । मिश्रे तूपान्त्यहल्संख्या न च चिन्त्यो हलस्वरः ॥ Thus the values of syllables are as follows :—

क	ख	ग	घ	ङ	च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण	त	थ	द	ध	न
प	फ	ब	भ	म					
य	र	ल	व	श	ष	स	ह	[ळ]	[क्ष]
|	|	|	|	|	|	|	|	|	|
1	2	3	4	5	6	7	8	9	0

The maxim अङ्कानां वामसो गतिः be followed while indicating the numbers.

3. Vide – वैदिक वाङ्मयका इतिहास– दूसरा भाग, वेदोंके भाष्यकार– by पं. भगवदत्त / सत्यश्रवा 1976. pp 122 ff.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

that Sāyaṇācārya flourished in the 14th century AD. It will, therefore, be not inconsistent, to accept, 'निष्पापके शाके' as the correct reading.

The second part of this edition appeared nine years ago, in 1972. We are quite aware that the publication of this part is inadequately delayed; and we beg apologies for the delay. However we must hasten to add that the press copy of this part was ready in 1974 and was awaiting printing. But no Printing Press in Poona dared to undertake the intricate printing of this volume which involves the difficult composing of Vedic *svaras* in degree type. In such adverse circumstances, our esteemed well-wisher Shriman M. S. Parkhe, the well known industrialist, helped us in establishing our own composing unit and rescued us from the catastrophe. He also made available an adequate quantity of a specially manufactured quality paper for this volume. We feel highly obliged to him for his meritorious and timely help.

The first impetus to this project was given by the late Shri M. V. Gokhale, Solicitor, in sacred memory of his revered father, the lale Shri Vishwanath Ballal Gokhale, who being a well known Sanskrit Scholar encouraged Vedic and Sanskrit studies during his life time and who was also Ex-Chief Justice of the former Kolhapur State. Shri M. V. Gokhale also gave a munificient donation of Rs, 25,000/- towards the publication of this Volume in the year 1973. In appreciation of this generority, we have with a sense of deep gratitude dedicated this Volume to the late Shri Vishwanath Ballal Gokhale. Our heartfelt thanks are due to the late Shri M. V. Gokhale and also to his son Solicitor K. M. Gokhale for the co-operation given by him in bringing out this volume.

It is gratifying to note that the Poona Municipal Corporation has recently sanctioned an initial grant of Rs. 19000/- only, towards the foundation of our Printing Press. The Maṇḍala is very much indebted and thankful to all authorities of Poona Municipal Corporation.

This critical edition is based on many manuscripts procured from various Institutes and private sources that are noted elsewhere in this introduction. We record our sincere thanks to all of them.

Vedamūrti Vasudevarao Gokhale Guruji Poona, has rendered valuable assistance in going through the proofs of the Saṁhitā and the Padapāṭha, and has enabled us to present the same as accurate as possible. We feel obliged to him for his help in editing the text of Saṁhitā and Padapāṭha presented in this volume. However despite our sincere efforts, few misprints persisted to our great chagrin and they have been set right in corrigenda.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

My Colleague Dr. S. L. Athalekar a traditional Vaiyākaraṇa has also rendered a great help in editing the text of the Bhaṭṭa-Bhāskara's commentary, which is replete with grammatical explanations and exegesis. I am very much obliged to him also.

The Vaidika Saṁśodhana Mandala is deeply indebted to the Ministry of Education, Government of India, for approving the project of the Critical Edition of the Kṛṣṇa Yajurveda Taittirīya Saṁhitā with Padapāṭha and two commentaries, and for according sanction to suitable financial help for its implementation. The Maṇḍala is very much grateful towards the Government of Maharashtra also for their recurring maintenance grants towards the cause of the Maṇḍala.

Our sincere thanks are due to Shri Pathak Brothers of Suhas Printers, Poona, who with their usual patience and care carried out the printing of this volume, very neatly.

We hope this volume will meet with the approval of Scholars.

PUNE : 15th August 1981.
Śravaṇa Pūrṇimā, Śake 1903.

T. N. DHARMADHIKARI

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रास्ताविकम्

अथेमं कृष्णयजुर्वेदीयतैत्तिरीयसंहितायाः द्वितीयकाण्डात्मकं पदपाठयुतं श्रीमद्भट्टभास्करमिश्र-सायणाचार्यविरचितभाष्यद्वयालंकृतं द्वितीयखण्डस्य प्रथमभागं निरवद्यवेदवेदाङ्गविद्याचणेभ्यः प्राच्यविद्या-पारदृश्वभ्यः सादरमुपहृतवतां नोऽन्तरङ्गमतितरां खलु प्रमोमुद्यते।

खण्डस्यास्य निपुणमन्वेषणे शरणीकृतानाम् इतः पूर्वं मुद्रितानां भाष्यपुस्तकानाम्, अतिमात्र-प्रयत्नसमासादितानां च प्रत्नानां भाष्यलिखितपुस्तकानां संज्ञादिवर्णनमधः प्रस्तूयते–

सायणीयं भाष्यम्

मुद्रितपुस्तकसामग्री

आ– आनन्दाश्रमसंस्कृतग्रन्थमाला–पुण्यपत्तनम्, ग्रन्थाकः ४२, चतुर्थो भागः पं. काशीनाथशास्त्री आगाशे इत्येतैः संपाद्य १९०१ खिस्ताब्दे प्रकाशितः।

क– बिब्लिऑथेका इंडिका–वङ्गीय एशिआटिक सोसायटी–कलकत्ता, अनुक्रमः १९३, ई बी कॉवेल महाशयेन संपाद्य १८६६ खिस्ताब्दे प्रकाशितः।

लिखितपुस्तकसामग्री

अड्यार ग्रन्थालयः, संशोधनकेन्द्रम् – अड्यार – मद्रास

ड– क्र. ७५६४९; तालपत्राणि, तेलुगु-लिपिः, किंचिदिव कृमिभक्षितम्, अन्ते–भावसंवत्सर मार्गशिर शु १० गु सर्वतन्त्रस्वतन्त्र रामन्ना कंचि भोलं गारकि विद्यारण्यं व्राशयन्तु।

ड१– क्र. ७४०४७, तालपत्राणि, द्वितीयं काण्डम्, ग्रन्थलिपिः।

भारत इतिहास संशोधक मण्डलम्, पुणे

इ– क्र. २१७, देवनागरी लिपिः, संवत् १८१०.

आर्क्यालॅजिकल विभागः, जोधपूर

जो– द्वितीयं तृतीयं च काण्डम्, अपूर्णम्, देवनागरी लिपिः।

विश्वेश्वरानन्द वैदिकशोधसंस्थानम्, होशियारपूर

हो१– क्र. ६१०३, द्वितीयं काण्डम्, तालपत्राणि, तेलुगु-लिपिः, अन्ते– पराभव नाम संवत्सर श्रावणबहुल तृतीया शुक्रवार मुद्दपप्पु वेंकयागारिकि चरुकुपल्लि यल्लाप्रगड वेंकटाचलम्, संहिता-द्वितीयकाण्डं भाष्यं व्राशिनदि. मुद्दपप्पु उपनामधेयाय वेंकटशर्मणे चरुकुपल्लि यल्लाप्रगड-उपनामकेन वेंकटाचलशर्मणा संहिता द्वितीयकाण्डभाष्यं लिखित्वा समर्पितम्।

सिंदिया ओरिएंटल इन्स्टिटयूट, उज्जैन

उ– क्र. १४०९, द्वितीयं सप्तमं च काण्डम्, अपूर्णम्, देवनागरी लिपिः।

अधोनिर्दिष्टानि लिखितपुस्तकानि कुलपरंपराप्राप्तवेदादिविद्याविभूषितेभ्यः विपश्चिद्भ्यः उपलब्धानि

अ– पुण्यपत्तननिवासिभिः कै. म. म. काशीनाथशास्त्री–अभ्यंकर–महाशयैः प्रदत्तम्, द्वितीयं काण्डम्, देवनागरी लिपिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ना– नासिकक्षेत्रस्थैः वेदमूर्तिभिः नीलकण्ठ विष्णु (अण्णंभट्ट) साठे महाशयैः प्रदत्तम्। देवनागरी लिपिः।

ने– नेल्लोरनगरभूषणैः वेदमूर्तिभिः विश्वनाथशास्त्री श्रौती महाशयैः प्रदत्तम्; तालपत्राणि, ग्रन्थलिपिः। अन्ते–अरिवित्तुरै रामस्वामि सोमयाजी इत्येतैः लिखितः। अङ्गिरस नाम संवत्सरे पुण्यबहुल द्वादशी स्थिरवासरः। आङ्गिरसाब्दे मकरे मासि कृष्णे हरेर्दिने। रामेण लिखितं विद्यारण्यभाष्यं समूलकम्।

पा– पांचवडग्रामस्थैः श्रौताचार्य–धुंडिराज शास्त्री–बापट महाशयैः प्रदत्तम्। तैत्तिरीयसंहिता-सायण-भाष्यस्य संपूर्णं लिखितपुस्तकम्, देवनागरी लिपिः।

शृं– वेदमूर्ति–विश्वनाथश्रौतीमहाशयानां माध्यस्थ्येन शृङ्गेरीमठतः उपलब्धम्। तालपत्राणि, ग्रन्थलिपिः।

हा– हानगलस्थैः वेदमूर्ति–गिरीशदीक्षितैः प्रदत्तम्। तैत्तिरीयसंहिताया समग्रं सायणीयं भाष्यम्। देवनागरी लिपिः।

भट्टभास्करविरचितं भाष्यम्

मुद्रितपुस्तकसामग्री

मै– बिब्लिऑथेका संस्कृत–सिरीज़्, तृतीयचतुर्थखण्डौ, पं. महादेवशास्त्रिभिः तथा के. रंगाचार्य-महाशयैः संपादितौ।

लिखितपुस्तकसामग्री

सरस्वतीमहल-संस्कृतग्रन्थालयः, तंजौर

तं१– क्र. डी ६६७; बर्नेलसूची क्र. ९०४७, तालपत्राणि, ग्रन्थलिपिः। लं–संज्ञेन पुस्तकेन सादृश्यं बिभर्ति।

तं२– क्र. डी ६६५, बर्नेलसूची क्र. ९०३५, तालपत्राणि, ग्रन्थलिपिः, लं–संज्ञेन पुस्तकेन सादृश्यं बिभर्ति।

तं३– क्र. ६६६, बर्नेलसूची क्र. ९०४५, तालपत्राणि, ग्रन्थलिपिः।

त्रावणकोर-विद्यापीठ-ग्रन्थालयः, त्रिवन्द्रम्

त्रि– क्र. ३०९४, तालपत्राणि, ग्रन्थलिपिः, जीर्णम्।

पंजाब विद्यापीठ – ग्रन्थालयः

पं२– क्र. ६३५९, तालपत्राणि, ग्रन्थलिपिः।

मैसूर विद्यापीठ, ओरिएंटल रीचर्स इंस्टिटयूट, मैसूर

मै४– क्र. १०१३, तालपत्राणि, ग्रन्थलिपिः, तं२–संज्ञेन पुस्तकेन सादृश्यं बिभर्ति।

इंडिया ऑफिस ग्रन्थालयः, लंडन

लं– क्र. ४४०१, तालपत्राणि, ग्रन्थलिपिः।

विश्वेश्वरानन्द वैदिकशोधसंस्थानम्, होशियारपूर

हो– क्र. ६०५५, तालपत्राणि, ग्रन्थलिपिः द्वितीयं काण्डम् अपूर्णम्, त्रि-संज्ञेन लिखितपुस्तकेन सादृश्यं बिभर्ति।

खण्डस्यास्य संशोधने मुद्रणे च पूर्वतनखण्डार्थमादृतैव सरणिरङ्गीकृताऽस्माभिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संहितापदपाठयोः शुद्ध्यर्थं यद्यप्यस्माभिरनादिपरम्परापूता वैदिकानां मौखिकी परिपाट्येव प्राधान्येन प्रमाणत्वेनाङ्गीकृता तथापि नैकानि लिखितपुस्तकानि मुद्रितपुस्तकानि चाप्यस्माभिः गवेषितानि। तथा हि–भट्टभास्करभाष्यस्य मैसूरावृत्तिः, इन्डिशे स्टूडीन् (१८७१) इत्यस्मिन् कालिके प्रा. वेबर–संपादिता रोमनलिप्यङ्किता संहिताऽऽवृत्तिः, कुम्भकोणमित्यत्र (१९१४) पं. मु. अ. वैद्यनाथशास्त्रिभिः सा. नारायणशास्त्रिभिश्च परिशोधिता पदपाठावृत्तिश्च नः बहूपकृतवत्यः।

भाष्यद्वयस्थाः पाठाश्च व्याकरणशुद्धतां संदर्भापेक्षतां चाकलय्य, लिखितपुस्तकानि च प्रमाणीकृत्यैव निर्धारिताः। यत्र च क्वचन पाठः संभावितः शुद्धतां वाऽऽपादितः तत्र तत्र तन्निर्देशपुरःसरं लिखितपुस्तक-पाठाः टिप्पण्यामन्तर्भाविताः। महदिदं संतोषस्थानं यत् पाठावधारणे इदंप्रथमतया अस्माभिरुपयुक्ता लिखितपुस्तकसामग्री शुद्धानाम् अर्थानुसंधानपराणां च पाठानामवधारणे महान्तमुपकारमतनोदिति।

संक्षेपतः विवेचनं हि भट्टभास्करभाष्यस्य अनितरसाधारणा परिपाटी दृश्यते। विशेषतश्च भाष्यस्यास्य क्वचिदेकस्मिन् लिखितपुस्तके अन्यदा चान्यस्मिन् त्रुटय आलोक्यन्ते। क्वचिदनुवाकान्ते अनुवाकभाष्यसमापनावसरे 'अनुवाकभाष्यसंकोचः' (द्र. अस्मदावृत्तौ पृ. ९१ पङ्क्तिः २४–खण्डः १, भागः १) इत्यनेन अनुवाकभाष्यस्योपसंहारः कृतो लक्ष्यते। एतेन प्रायशः व्याकरणविवरणपुनरुक्तिवशात् केनापि भट्टभास्करभाष्यस्य क्वचन स्थलेषु संकोचः कृतः स्यात् इत्यप्यनुमातुं शक्यम्। एतादृश्याम् अवस्थायां विशिष्य भट्टभास्करभाष्यस्य संशोधने इतःपूर्वम् अनुपयुक्तायाः लिखितपुस्तकसामग्र्याः सूक्ष्मेक्षिकया गवेषणमपरिहार्यमभूत्। इदं चापरं प्रमोदस्थानं विद्यावतां यत् लिखितपुस्तकसामग्रीयं समग्रा महते फलाय अकल्पतेति। मैसूरमुद्रितभट्टभास्करभाष्यत्रुटयः अस्मदुपयुक्तलिखितपुस्तकसामग्री-माश्रित्य अनल्पया मात्रयाऽस्माभिः दूरीकृताः इति सानन्देनापि प्रह्वेन भावेन निवेदयितुमुत्सहामहे।

भाष्यद्वयस्थानि उद्धरणानि, उद्धरणसादृश्यं वा बिभ्रन्ति वचनानि क्षनल्पायासगवेषिततन्मूलानि प्रायशोऽस्माभिर्निर्दिष्टानि। अथापि आस्माकीनं विविधदिक्कं विमर्शमननुरुध्य कानिचन कल्पत उद्धृतानि वचनानि अनासादिततन्मूलान्येव सन्तीति भृशं विषीदामः खलु। वचनानीमानि अद्यत्वे लुप्तानां कल्पानाम् अंशभाजवन्ति स्युरित्यपि संभाव्यते।

अस्य काण्डस्यावसाने, अथ च तृतीयस्यारम्भे भट्टभास्करमिश्रीये भाष्ये–

'एष निष्पाप(व)के शाके कुशिकान्वयजन्मना। भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रकीर्तितः'॥

इत्ययं श्लोक उपलभ्यते– यः किल भट्टभास्करस्य कालं निर्दिशति। 'तत्र निष्पापके' इत्ययं क्वचित् पाठः 'निष्पावके' इत्यन्यत्र। 'कादि नव, टादि नव, पादि पञ्च, यादि अष्ट' इतीमां प्रसिद्धां कटपयादि-परिभाषामाश्रित्य 'निष्पापके' इत्ययं पाठः १११० तमं शकाब्दं (११८८ तमं खिस्ताब्दं) निर्दिशेत्, 'निष्पावके' इति च १४१० तमं शकाब्दम् (१४८८ तमं खिस्ताब्दम्)। खिस्ताब्दस्य चतुर्दशे शतके जनिं लब्धवता सायणार्येण भट्टभास्करमिश्र उदलेखीति (द्र. भगवदत्त–वेदोंके भाष्यकार– पृ. १२२ प्रभृति) प्रसिद्धम्। अतः 'निष्पापके' इति पाठं निर्धार्य भट्टभास्करः द्वादशे खिस्ताब्दे भाष्यं ज्ञानयज्ञाख्यं लिखितवान् इति संसूच्यतेऽस्माभिः इत्यवधेयम्।

अस्मदुपक्रान्ताया भाष्यद्वययुताया तैत्तिरीय-संहितायाः प्रथमखण्डस्य द्वितीयो भागः १९७२ तमे खिस्ताब्दे प्राकाश्यं नीतः, तदनन्तरमस्य द्वितीयखण्ड-प्रथमभागस्य प्रसिद्धौ अतितरां विलम्बोऽभूदिति क्षन्तव्योऽयं अपहस्तितमुद्रणसामग्रीको जनः अकारणकरुणैः प्रतीक्षातत्परैः प्रतीक्ष्यैः प्रेक्षावद्भिः। चिरस्य खलु कालस्य संमुद्रणावस्थायां स्थितोऽयं ग्रन्थ इत्यत्र इदमेकमद्वितीयं कारणं यन्न कोऽपि पुण्यपत्तनस्थः सुसमृद्धोऽपि मुद्रणालयः सस्वरवेदमुद्रापणसाहसमङ्गीकर्तुमचेष्टतेति। एवं महीयसा प्रयत्नेन संशोधितोऽप्ययं ग्रन्थः मुद्रितः स्यान्नवेति सूचैः संदेहदोलामधिरोहत्स्वस्मासु, किंकर्तव्यतामूढत्वमुपदिशन्त्यां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विमनायमानायां नोऽवस्थायां श्रुतिमार्गजुषां समाश्रयाः महामहनीया श्रीमन्तो **म. स. पारखे**–महाशयाः स्वीयं मुद्रणसिद्धिविभागं निर्मातुं नो निरदिक्षन्, तदर्थं सर्वविधं साहाय्यं च व्यदधुरिति तेषामुपकृतिभरान् स्मारं स्मारं सकृतज्ञं निर्दिशामः।

पुण्यपत्तनस्थैः उदारचरितैः श्रीमद्भिः कै. सॉलिसिटर **म. वि.** तथा **बलवन्तराय गोखले** महाशयैः स्वपितुः श्री. **विश्वनाथराय गोखले** महाशयानां तादानिके कोल्हापूरसंस्थाने प्रधान-प्राड्विवाकपदमलकुर्वतां संस्कृतज्ञानां पवित्रां स्मृतिमनुलक्ष्य ग्रन्थस्यास्य प्रकाशने पञ्चविंशतिसहस्र-रूप्यकात्मकः धनराशिः वितीर्ण इति महदिदम् आनन्दस्य स्थानम्। श्रीमत्सु **म. वि. गोखले** महाशयेषु नूनं महीयसी वदान्यता, लोकातिशायिनी पितृप्रणयिता, विद्वज्जनपरिश्रमपक्षपातित्वं, श्रुतिषु चाश्रुतपूर्वा निष्ठा चेत्येतेषां हृदयंगमः संगम समवर्तिष्टेति निर्विचिकित्सं प्रतीमः। ग्रन्थमिमं च कै. **विश्वनाथराय गोखले** महाशयानां पुण्यस्मृतिमनुरुध्य सश्रद्धं सकृतज्ञं च समर्प्य वदान्यतमस्यास्य **गोखले**कुलस्य लोकोत्तरः यशःपरिमलः सर्वासु दिक्षु विसृमरो भवत्विति स्वस्तिमता चेतसाऽऽशास्महे। पुनरपि श्री. **म. वि. गोखले** महाशयेभ्यः तथा च तदीयतनूजुषेभ्यः सॉलिसिटर श्री. के. **म. गोखले** महाशयेभ्यः हार्दं कार्तज्ञभावं निवेदयामः।

ग्रन्थस्यास्य शोधनार्थमनेकैः लिखितपुस्तकालयैः, स्वस्वकुलागतानवद्यहृद्यवेदादिविद्यावित्तैः सज्जनैः लिखितपुस्तकप्रदानेन साहाय्यमनर्घमकारीति तेभ्यः सकृतज्ञं साधुवादानुद्घोषयामः।

वेदमूर्तिभिः **वासुदेवभट्ट गोखले** महाशयैः संहितायाः पदपाठस्य च शुद्धमुद्रणविधौ मनः एकान्ततो व्यापारितमिति तेभ्यः कृतज्ञतां निवेदयामः।

अस्मत्सहकारिभिः वैयाकरणमूर्धन्यैः शब्दशास्त्रपारदृश्वभिः **डॉ. श्री. ल. आठलेकरमहाशयैः** व्याकरणविवरणभूयिष्ठस्य भट्टभास्करभाष्यस्य संपादने अतितरां साहाय्यं व्यधायीति तेऽपि अस्मत्तो प्रभूतान् धन्यवादानर्हन्ति।

ग्रन्थस्यास्य संपादनमुद्रणविधौ भारतशासनेन महाराष्ट्रशासनेन च विशिष्टं तथा सांवत्सरीणं वित्तसाहाय्यं नः वितीर्णमिति शासनद्वयाय कृतज्ञतामाशंसामः।

पुणे महानगरपालिकया वैदिक-संशोधन-मण्डलस्य मुद्रणालयार्थं १९८० तमे खिस्ताब्दे एकोनविंशतिसहस्रप्रमितः धनराशिः वितीर्णः। तेन ग्रन्थस्यास्य मुद्रणसिद्धिः सुकराऽभूत्। अतः पुणे–महानगर–पालिकायाः सदस्येभ्यः अधिकृतेभ्यश्च धन्यवादाः।

सुश्लिष्टमुद्रणविषये विख्यातैः सुहास-मुद्रणालयाधिकृतैः श्री. **पाठकमहाशयैः** ग्रन्थस्यास्य मुद्रणं समाहितेन चेतसा पारितमिति तेभ्योऽपि धन्यवादाः।

सोऽयं ग्रन्थोऽस्माभिः महताऽयासेन सूक्ष्मेक्षिकया च संशोधित आस्ते। अथापि नेत्ररुजमप्या-वाहयद्भिरस्माभिः संशोधिते मुद्रिते मानुष्यसुलभत्वात् वा मुद्रासंयोजकानां चातुर्याद्वा, मुद्रणयन्त्र-कौशलाद्वा विसृप्ता शुद्धिपत्रनिर्दिष्टेभ्योऽपि भिन्ना नयनगोचरा भवेयुर्दोषा दोषज्ञानां तर्हि क्षन्तव्या वयमिति सप्रश्रयं प्रार्थयामहे।

भाष्यद्वययुतायाः पदपाठसंहितायाः तैत्तिरीयसंहितायाः द्वितीयकाण्डात्मकः द्वितीयखण्डस्य प्रथमो भागः वेदविदुषां श्रुतिशुश्रूषूणां पौर्वात्यविद्याप्रणयिनां च तोषाय स्यादित्याशास्महे।

पुण्यपत्तनम्
श्रावण शु॥ १५॥ शके १९०३
१५ ऑगस्ट १९८१

त्रि. ना. धर्माधिकारी

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पाठभेदविषयकः विचारः

अस्मिन्नावृत्तौ स्वीकृताः भाष्यद्वयस्थाः नैके पाठाः पूर्वप्रकाशितभाष्यावृत्तिस्वीकृतपाठापेक्षया विभिन्नाः सन्ति। सर्वेऽपि भाष्यस्थाः पाठाः लिखितपुस्तकसामग्र्याधारवशादेव संगृहीताः। पूर्वतनावृत्तिपाठानपेक्ष भिन्नानां केषांचन भाष्यस्थानां पाठानां स्वीकृतिविषयकः संक्षेपेणात्र विचारः प्रस्तूयते।

सायणीयं भाष्यम्

२·२/३ **मन्त्रे प्रवचनात् स्वराः भाषिकाः**–हो१। प्रयोगे कर्मणां भवेत्। नात्रापि–आ। अस्मत्स्वीकृतः पाठः मीमांसाभाष्यमनुसरति ॥ ५·१७ **°प्रीत्यभावात्**–पा। °प्रियत्वाभावात्–आ.क.ड.हा ॥ अस्मत्स्वीकृतः पाठः अन्वयं झटिति प्रत्याययति ॥ ८·२१ **अपत्यलाभायानेन**–अ.उ.ड.ड१। अपत्यलाभाभावेन–आ.इ.क.हा. ॥ अस्माभिः स्वीकृतः पाठः समञ्जसमर्थमभिदधाति ॥ १४·१७ **प्रकरणस्यासमर्पकत्वेऽपि**–ड१। प्रकरणस्यासमर्थत्वेऽपि–आ.क. ॥ अस्माभिः स्वीकृतः पाठः जैमिनीय. न्यायमालाविस्तरमनुसरति, उचितं चार्थमभिधत्ते ॥ १९·७ **सुस्थितम्**–ड·ड१·हो१। संस्थितम्–आ.क ॥ समाप्तिपर्यायस्य संतिष्ठतेः प्रयोगः नात्रापेक्षितः ॥ २२·१८ **प्रीत्या वृतवानिति**–इ। प्रत्याहृतवानिति–अ.आ.उ.क.जो.ना.पा.हा.हो१ ॥ एकेनापि लिखितपुस्तकेन समुपबृंहितः अस्मत्स्वीकृतः पाठः समञ्जसं युक्ततरं चार्थं प्रत्याययति ॥ २७·२४ **पश्वन्तरं**–जो.ना.हा। पशुं–आ.उ.क.ड१.पा.हो ॥ अन्यस्य पशोर्विधानात् अस्मत्स्वीकृतः पाठः न्यायतः प्राप्यते ॥ ३०·१९ **सभाचित्तानुरञ्जनरूपां**–ड.ड१.हो१। सभोचितानुरञ्जनरूपां–आ.क ॥ अनुरञ्जनं चित्तस्य संभवतीति आ.क–पुस्तकयोः पाठं परित्यज्य अनुरूपः पाठोऽस्माभिः स्वीकृतः ॥ ४४·२४ **प्राप्स्यमानत्वात्**–इ। प्राप्यमाणत्वात्–आ.क.ड.ड१; प्रोद्यमानत्वात्–अ.उ.जो.ना.पा.हा ॥ अस्मत्स्वीकृतः पाठः भविष्यत्यर्थे धातोः लृट आकाङ्क्षां पूरयति ॥ ४९·१७ **उत्पत्स्यमानः**–इ.ड.ड१.ने.हो१। उत्पद्यमानः–अ.आ.उ.क.जो.ना.पा.हा; उत्पाद्यमानः–ना ॥ भविष्यत्यर्थे अपेक्षितः लृट्; अस्मत्स्वीकृतेन पाठेन सेयमपेक्षा पूर्यते ॥ ८१·१७ **परिगृह्णातीति**–ने। 'परिगृह्णातीति' नास्ति–आ.क.ड.ड१ ॥ अस्मत्स्वीकृतः पाठः त्रुटिमपाकरोति, 'उभयतः सजातान् परि गृह्णाति' इति पूर्वोद्धृतेन ब्राह्मणेन च संवदते ॥ ८१·२१ **विचित्रमित्यर्थः**–ड१। 'विचित्रमित्यर्थः' नास्ति–आ.क. ॥ अस्मत्स्वीकृतः पाठः 'उपधाय्यपूर्वयम्' इत्यस्य अर्थं विशदयति; एतस्याभावे 'चित्रान्तमित्यर्थः' इति सायणाचार्यैः आपस्तम्बश्रौतसूत्रतः (१९·२०·२) उद्धृतोंऽशः व्यर्थः स्यात्। अत एव त्रुट्यपाकरणदक्षोऽयं पाठः ॥ ९३·४ **शीतलज्योत्स्नारूपेणावभासन्ते**–ड.ड१.ने.श्रं.हो१। शीतस्पर्शा अभिभूतोष्णस्पर्शा ज्योत्स्नारूपेणावभासन्ते–आ.क ॥ स्वरसः पाठ इत्यस्माभिः स्वीकृतः ॥ १७६·२७ **बलात् चुश्चुषां**–ड.ड१.ना.ने.श्रं.हो१। बालाश्चुश्चुषां–आ.क.जो.हा ॥ अत्र 'बालाः' इत्यस्य स्वीकारे कारणं न विद्मः ॥ १७८·१५ **न त्वनङ्गं**–क.जो.ना.ने.श्रं.हा.हो१। न त्वङ्गम्–आ.क. ॥ अस्माभिः स्वीकृतः पाठः जैमिनीय-न्यायमालाविस्तरम् अनुसरति ॥ १८४·२२ **कीलनम्**–ड.ने.श्रं.हो१। कीर्तनम्–आ.क ॥ अस्मत्स्वीकृतः पाठः प्रयोगमनुसरति। २४२·२१ **संबन्धिनम्**–ड.श्रं.हो१। संबन्धिना–आ ॥ पदार्थान्वयौ विशदयति अस्मत्स्वीकृतः पाठः ॥ २६४·५ **समानानां**–अ.इ.ड·श्रं.हो१। 'समानानां' नास्ति–आ.उ.क.जो.ना.पा ॥ पूर्वमुद्रित–पुस्तकयोः 'समानानाम्' इत्यस्य शब्दस्याभावे त्रुटिः अलक्ष्यत; सात्र दूरीकृताऽस्ति लिखितपुस्तकान्याश्रित्य ॥ २७७·१९ **यत्र अवसन्**–इ। 'यत्रावसन्' नास्ति–अ.आ.उ.क.जो.ड.ना.पा.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शं.हा.हो१ ॥ अस्माभिः स्वीकृतः पाठः मूलं संहितापाठमनुसरति, पूर्वमुद्रितपुस्तकयोः विद्यमानां च त्रुटिमपाकरोति ॥ ३०५·१९ **सक्तुबन्धनार्थान्**–इ.ड.शं.हो१ । सक्तुबन्धनार्थ–अ.आ.उ.क.जो.ना.पा.हा ॥ अस्माभिः स्वीकृतः पाठः 'मन्त्रान्' इति विशेष्यं विशेषत्वेन अन्वेत्य सार्थकतां भजते ॥ ३०६·२१ **अवरुद्धत्वात्**–ड । लीनत्वात्–आ.क.ना; लीनकत्वात्–अ.उ.जो.पा.हा; आवरकत्वात्–शं.हो ॥ अस्माभिः स्वीकृतः पाठोऽत्र सरसः प्रतीयेत ॥ ३१०·२६–२७ **प्रकृतौ आ जुहोत दुवस्यत इति गायत्री सामिधेनीषु परिधानीया भवति तामत्रापवदितुं**–इ.ड.शं । प्रकृतौ द्वे ऋचावुक्ते आ जुहोत दुवस्यतेति गायत्री सामिधेनी त्वं वरुण इति जगती भवति ते अपवदितुं ॥ अनुपदमेव सायणार्यैः यद्भाष्यं कृतं तदपेक्ष्य अस्मत्स्वीकृतः पाठ एव सायणार्यैरभिमतः स्यादिति अनुमीयते ॥ ३८२·२७ **व्यर्थमेव कुर्यात्**–ड । 'व्यर्थमेव कुर्यात्' नास्ति–आ.क ॥ अस्मत्स्वीकृतः पाठः 'छम्बट्-कुर्यात्' इत्यस्यार्थं विदधाति ॥ ३९२·४–६ **प्रकृतिप्रत्ययौ...युक्तम्**–ड.शं.हो । आ.क. पुस्तकयोः भागोऽयं नास्ति ॥ जैमिनीयन्यायमालाविस्तरमनुरुध्य पाठोऽयमस्माभिः स्वीकृतः; स च पूर्वमुद्रित-पुस्तकयोः स्थितां त्रुटिमपाकरोति ॥ ४२९·२४–२५ **तेन चानूयाजा इज्यन्ते ततः पृषदाज्यपानिति तृतीयः पक्षः । पृषत्वं नाम चित्रता सा च आज्यगतो गुणः । स च दधिमेलनेन**–शं । तदेव हविरिति पृषदाज्यपानिति तृतीयः पक्षः, दधिमेलनादाज्ये पृषत्ता गुणः–आ.क ॥ अस्मत्स्वीकृतः पाठः अर्थस्य स्वच्छतां बिभर्ति ॥ ४३६·२६ **चातुर्मास्येषु**–ड.शं.हो१ । 'चातुर्मास्येषु' नास्ति–आ.क ॥ अस्मदा-वृत्तिपाठः जैमिनीयन्यायमालामनुसरन् त्रुटिमपाकरोति ॥ ४४३·२९ **आर्तिरादरातिशयः**––शं । आर्तिर-तिशयः–आ.क ॥ अस्मदावृत्तिपाठः विशदार्थः ॥ ४४९·२१–२४ **यस्मात् प्रजापतिः.....ब्राह्मणाग्नि-वरणं**–शं । यस्मात् प्रजापतिर्ब्राह्मणाग्निवरणं कृतवांस्तस्माद्देवा उत्कृष्टा अभवन् । पराभूता असुराः । प्रशंसति–आ.क ॥ अस्मदावृत्तिपाठः पूर्ववृत्योः स्थितां महतीं त्रुटिं दूरीकरोति ॥ ४६५·२३ **भक्त्या**–शं । 'भक्त्या' नास्ति–आ.क ॥ 'भक्त्या' इति पाठः सन्दर्भानुकूल अत एव साधीयान् ॥ ४६९·१५ **यष्टुः**–ड.शं.हो१ । 'यष्टुः' नास्ति–आ.क ॥ स्पष्टार्थ इति अस्माभिः स्वीकृतोऽयं पाठः ॥ ४६९·२१ **जुषाणाः**–ड१ । 'जुषाणाः' नास्ति–आ.क ॥ अस्मदावृत्तौ स्वीकृतः पाठः तैत्तिरीयब्राह्मणपाठमनुसरति ॥ ४८५·१७ **त्वं वृत्रहा**–ड.ड१.शं । 'त्वं वृत्रहा' नास्ति ॥ उद्धृतं तैत्तिरीयब्राह्मणभागम् अनुसरतीति पाठः स्वीकृतोऽयम् ॥ ४८८·१६ **कैश्चिदनभिज्ञैः पृष्टाः इतरेऽभिज्ञाः**–ड१.शं । एके विज्ञाः पृष्टाः इतरे विज्ञाः–आ.क ॥ अस्मत्स्वीकृतः पाठः वाक्यार्थमतितरां विशदयति ॥ ५०९·१९–२० **आध्वर्यवे मन्त्रकाण्डे 'आ ददे' इत्येकमेव पदं मन्त्रत्वेन आम्नातम् । तच्च मन्त्रस्वरूपं 'देवस्य त्वा' इत्यादिना शेषेण पूरितम्**–ड१.शं । आध्वर्यवशेषेण पठितम्–आ.क ॥ अस्मदावृत्तौ स्वीकृतः पाठः पूर्ववृत्तिस्थितां त्रुटिं दूरीकरोति ॥ ५२३·१८ **मत्स्यमुखात् विज्ञातवन्तो देवाः तमग्निं प्रति अस्मत्समीपं समागच्छ हव्यं चास्मदीयं वहेत्यब्रुवन् तदा**–ड.ड१.शं.हो१ । मत्स्यमुखेन विज्ञाते वह्नौ देवा(वै)स्तमग्निं प्रति अस्मत्समीपे समागच्छ हव्यं चास्मदीयं वहेत्युक्ते–आ.क ॥ वाक्यार्थमधिकृत्य स्वारसिक इति हेतोः स्वीकृतः पाठ अस्मदावृत्तौ ॥ ५३१·४ **पुरोडाशयोः**–ड.ड१.शं.हो१ । 'पुरोडाशयोः' नास्ति ॥ स्पष्टार्थः अस्मत्स्वीकृतः पाठः ॥ ५४७·१४ **तदन्नदंशनोपघातेन**–ड । तदन्नं दशनेनोपाद्य तेन–आ.क ॥ भाष्याभिप्रेतः निष्कृष्टार्थः अस्मत्स्वीकृतेन पाठेनैव पिण्डीभूय लक्ष्यते ॥ ५६८·२०–२४ **तद्देवता-प्रापणं स्वगाकरणं याचितवान्**–शं । तस्य तस्य देवस्य स्वगतं कुर्वीति बृहस्पतिपुत्रं शंयुनामानं प्रति देवा अब्रुवन् । तदासौ शंयुरप्येवं चिन्तितवान् ॥ अस्मदावृत्तौ स्वीकृतः पाठः विस्तरेणार्थं बोधयति ॥ ५८३·१५ **सिषक्तु**–शं.हो१ । 'सिषक्तु' नास्ति–आ.क ॥ मूलानुसारीति स्वीकृतोऽयं पाठः ॥ ५८४·१९ **देवान् भजते यस्यां क्रियायां**–ड.ड१.शं.हो१ । भजते यस्यां–आ.क ॥ विस्तरेणार्थबोधक इति स्वीकृतोऽयं पाठः ॥ ५९०·२३ **तस्मादिदानीं**–ड.ड१.शं.हो२ । परिस्मरन्तो जन्मानि–आ.क । साधीयानिति अन्तर्भावितः पाठः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१·१·२ 'ईशानः...शिवः–लं। मै–मुद्रितपुस्तके काण्डारम्भे मङ्गलाचरणात्मकः श्लोकः नास्ति। एतच्च शास्त्रप्रथनविरोधी भवति ॥ ६·१०–११ **वायोरश्वा नियुतः तद्वते**–मै ४। अयमंशः तं१.तं२.मै.लं–इत्येतेषु पुस्तकेषु नास्ति; निरुक्तानुसारीत्यस्माभिः संगृहीतः ॥ ९.१४ इति **स्तुतिः**–मै ४। तं१.तं२.मै.लं–पुस्तकेषु अयमंशो नास्ति; अस्यार्थवादपरत्वेन व्याख्यानादपेक्षित अंश इति संगृहीतः पाठः ॥ १२·७ **समुदायस्त्रितं**–मै४। यः स त्रितः–तं२.मै–पुस्तकयोरयं पाठः न समञ्जसमर्थमभिदधाति ॥ २१·१४–**प्रभृति**–अ मै ४। प्रमापितः–तं१.मै ४–पुस्तकयोः पाठः नाभिधेयमर्थमभिधत्ते ॥ २७·१५ **वाग्मित्वम्**–अ। वादित्वं–तं१.तं२.मै। अस्मत्स्वीकृतः पाठः साधुतां भजते ॥ ४४·१७ **अपरागं**–मै४। अपरं–अ.तं१.तं२.मै। मै–मुद्रितपाठः अशुद्धः प्रतिभाति ॥ ६९·१० **आत्मीयैः**–अ.मै४। आर्धीयैः– तं२.मै.लं–पुस्तकेषु स्थितोऽयं पाठः नार्थं साधुतरम् अभिदधाति ॥ ७३·१५–**प्रजामिसमृद्धिम्**–मै ४। प्रजातिं–तं२.मै.लं। अस्मत्स्वीकृतः पाठः सुश्लिष्टमर्थमभिधत्ते ॥ ८०·१२ **युष्माकं यानि...रयिं दत्त**–मै ४। युष्माकं यानि यानि...धत्तेति–अ.तं.मै। अस्मत्स्वीकृतः पाठः विस्तरेण अर्थं विशदयति ॥ ८८·१२–८९·२ **सोस्माकमभिमतं...यमनं**–मै ४। सोऽस्माकमस्य ऋतस्य सत्यस्य रश्मिम्–तं१.तं२.मै.लं–पुस्तकेषु त्रुटितः पाठः अस्मदावृत्तौ विस्तरेण प्रपूरितः ॥ १०९·१६ **रक्षांसि यवयति**–पं २.मै ४। अयमंशो तं.तं२.मै.लं–पुस्तकेषु नास्ति, मूलानुसारी त्वस्तीति संगृहीतः ॥ १२२·१४ **संनाहे यतमानो वर्तमानो जयति संग्रामम्**–पं२। संनाहे वर्तते इति संग्रामम्–तं१.तं२.मै.लं; अस्मत्स्वीकृतः पाठः संहितामन्वयमुखेन व्याख्यातीति साधीयान् ॥ १०२·२५–१०३·१९ **जनता जनसमूहः...अधिकलाभार्थं वा**–मै४। अंशोऽयं तं१.तं२.मै.लं–पुस्तकेषु त्रुटितः, अस्मदावृत्तौ मै४–लिखितपुस्तकमाश्रित्य प्रपूरितः ॥ १४६·१६ **वस्त्रान्तयोः**–पं२.मै४.लं। वस्त्रान्तरयोः–मै; उपधाव्यपूर्वयस्य वाससः अन्तयोरेवापेक्षितत्वात् 'वस्त्रान्तरयोः' इत्यपपाठः ॥ १५३·१० **द्योतनशीलेन**– मै४। अंशोऽयं तं.मै.लं–पुस्तकेषु नास्ति; 'द्युम्नेन' इति संहितापदं व्याख्यातुमावश्यकमिदं पदमिति पाठोऽस्माभिः स्वीकृतः ॥ १६०·११ **उपमानानि**–मै४। अंशोऽयं तं१.मै.लं–पुस्तकेषु नास्ति; व्याख्यानाय चात्यन्तमपेक्षित इति नोपेक्षितोऽस्माभिः ॥ १६१·१४ **जमदग्नितुल्यः**–मै४.पं२। तं.मै–पुस्तकेषु जमदग्निसूल्यर्थ (?) इति अपभ्रष्टः पाठः दृश्यते ॥ १७२·१३ **अस्मद्यज्ञमागन्तुम्**–पं२.लं। अस्मद्द्युम्नमागन्तुम्–तं१.मै–पुस्तकयोः स्थितः अपपाठः लिखितपुस्तकमाश्रित्य शुद्धतां संपादितः ॥ १८८·१३ **अनेन कर्मणा अत्र प्रतिनिबद्धवीर्याः**–मै४। अयमंशः मै–पुस्तके नास्ति; अस्मत्स्वीकृतः पाठोऽत्र त्रुटिं पूरयति ॥ २३४·१२ **निधाय**–तं.१.तं२.लं। मै–पुस्तके 'निधाय' इति नास्ति, त्रुटिपूरकः अस्मत्स्वीकृतः पाठः ॥ २९५·१० **अयं मे प्राणाः इति तद्वचनभेदेऽपि**–मै४। अयने प्राणः इतिवत् वचनविशेषेऽपि–मै.लं; 'अयम्' इत्येकवचनं, 'प्राणाः' इति बहुवचनमिति वचनभेदः अत्र विवक्षितः। मै–स्वीकृतः 'अयने प्राणः' इत्यादिकः पाठस्त्वपपाठ इव प्रतिभाति ॥ २९८·१३ **आदित्याद्वा**–तं१.तं२.पं२.मै४। मै.लं–पुस्तकयोः अयमंशो नास्ति, सा च त्रुटिः अस्मत्संगृहीतेन पाठेन प्रपूर्यते ॥ ३२८·१० **दिवसकरमरीचि°**–मै४। दिवसकररुचि°–मै; अत्र °मरीचि° इत्येव पाठः अपेक्षितः न °रुचि° इति ॥ ५५१·१०–५५८·१७ **समिधमिति...पदान्तोदात्तत्वम्**–मै४। मै–पुस्तके, तं३.हो.लं–इत्यादि पुस्तकेषु च अयमंशो नास्ति। महती भाष्यत्रुटिः मै४–पुस्तकेनात्र अपाकृता भवतीति अस्माभिः स्वीकृतोऽयं पाठः ॥ ६०२·६–७ **एष निष्पाप(व)के...प्रकीर्तितः**–तं३त्रि.लं.हो। मै.मै४–पुस्तकयोः अयं पाठः नोपलभ्यते। भट्टभास्करमिश्रस्य कालम् अवगमयन्नयं पाठ इति अस्माभिः स्वीकृतः। पाठोऽयं तृतीयकाण्डस्यारम्भे मै–पुस्तकेऽप्युपलभ्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संक्षेपविवरणम्

अको	अमरकोशः
आपश्रौ	आपस्तम्बश्रौतसूत्रम्
आभ	आर्यभट्टीयम्
आश्वश्रौ	आश्वलायनश्रौतसूत्रम्
उ	उणादिसूत्राणि
ऋखिल	ऋग्वेदखिलसूक्तम्
ऋ। ऋसं	ऋग्वेदसंहिता
ऐआ	ऐतरेयम् आरण्यकम्
ऐब्रा	ऐतरेयं ब्राह्मणम्
कपिसं	कपिष्ठलसंहिता
का	काशिका
कासं	काठकसंहिता
कौउ	कौषीतक्युपनिषद्
छांउ	छान्दोग्योपनिषद्
जैन्या	जैमिनीयन्यायमालाविस्तरः
तांब्रा	ताण्ड्यब्राह्मणम्
तैआ	तैत्तिरीयम् आरण्यकम्
तैउ	तैत्तिरीयोपनिषद्
तैप्रा	तैत्तिरीयं प्रातिशाख्यम्
तैब्रा	तैत्तिरीयं ब्राह्मणम्
तैसं	तैत्तिरीयसंहिता
द्र	द्रष्टव्यम्
धापा	धातुपाठः
परि	परिभाषेन्दुशेखरः
पा	पाणिनीया अष्टाध्यायी
पाभा	पातञ्जलमहाभाष्यम्
पाशि	पाणिनीयशिक्षा
फि	फिट्सूत्राणि
बृउ	बृहदारण्यकोपनिषद्
बौगृपरि	बौधायनगृह्यपरिशिष्टम्
बौश्रौ	बौधायनश्रौतसूत्रम्
ब्रसू	ब्रह्मसूत्राणि
मनुस्मृ	मनुस्मृतिः
मभा	महाभारतम्
माश्रौ	मानवश्रौतसूत्रम्
मीसू	मीमांसासूत्राणि
मुंउ	मुण्डकोपनिषद्
मैसं	मैत्रायणीसंहिता
याज्ञस्मृ	याज्ञवल्क्यस्मृतिः
वासं	वाजसनेयिसंहिता
शब्रा	शतपथब्राह्मणम्
शाभा	शाबरभाष्यम्
श्वेउ	श्वेताश्वतरोपनिषद्
षब्रा	षड्विंशब्राह्मणम्
सासं	सामवेदसंहिता (कौथुमीया)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विषयानुक्रमणी

प्रपा.	अनु.	विषयः	पृष्ठानि
१.	१-१०	काम्यपशुविधानम् —	१–७८
	१.	भूतिकामस्य, ग्रामकामस्य, प्रजाकामस्य, आमयाविनः, प्रजाकामस्य, पशुकामस्य —	१–२०
	२.	वरुणगृहीतस्य, पशुप्रजाकामस्य, ब्रह्मवर्चसकामस्य, वाचं वक्तुकामस्य, ज्योगामयाविनः, प्रजाकामस्य, यः विद्यामनूच्य न विरोचेत तस्य, पुरोधायां स्पर्धमानस्य —	२१–३१
	३.	स्पर्धमानस्य, संग्रामजयार्थिनः, ग्रामकामस्य, अन्नकामस्य, यं राज्यं नोपनमेत् तस्य, गतश्रियः प्रतिष्ठाकामस्य, पाप्मना गृहीतस्य, यं राज्यं नोपनमेत् तस्य —	३२–३६
	४.	ब्रह्मवर्चसकामस्य, दुश्चर्मणो बिभीयात् तस्य, भ्रातृव्यवतः, पाप्मना गृहीतस्य, ज्योगपरुद्धस्य —	३७–४५
	५.	पशुकामस्य, प्रजां न विन्दते तस्य, भूतिकामस्य, विच्छिन्नसोमपीथस्य, अभिचरतः —	४६–५४
	६.	ग्रामकामः यः कामयेत पृष्ठं समानानां स्यामिति तस्य, अन्नकामस्य, अन्नकामस्य, इन्द्रियकामस्य, सनिकामस्य, अन्नकामस्य, ग्रामकामस्य, यस्यानाज्ञातमिव ज्योगामयेत् तस्य —	५५-५९
	७.	ब्रह्मवर्चसकामस्य, वृष्टिकामस्य, प्रजाकामस्य, अन्नकामस्य, ग्रामकामस्य, ब्रह्मवर्चसकामस्य, अभिचरतः —	६०-६५
	८.	ब्रह्मवर्चसकामस्य, अभिचरतः, यं यज्ञो नोपनमेत् तस्य, पशुकामस्य, संग्रामे संयत्ते समयकामस्य, वृष्टिकामस्य —	६६-७०
	९.	यम् अन्नाद्यं नोपनमेत् तस्य, अन्नकामस्य, ज्योगामयाविनः, पुष्टिकामस्य —	७१-७४
	१०.	सोमं पिपासतः दुर्ब्राह्मणस्य, यमजघ्निवांसमभिशंसन्ति तस्य, यस्याश्विने शस्यमाने सूर्यो नाऽऽविर्भवति तस्य —	७५-७८
१.	११.	काम्येष्टियाज्यापुरोनुवाक्याः —	७९-९९
२.	१-११.	काम्येष्टिविधानम् —	१००-१४८
	१.	प्रजां न विन्दते तस्य, क्षेत्रे वा सजातेषु वा स्पर्धमानस्य, संग्राममुपप्रयास्यतः, संग्रामं जितवतः, जनतामेष्यतः, जनतामागतवतः —	१००-१०३
	२.	यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेत् तस्य, य आहिताग्निः सन्नव्रत्यमिव चरेत् तस्य, यं रक्षांसि सचेरन् तस्य, अभिचरतः, यस्य गावो वा पुरुषा वा प्रमीयेरन् यो वा बिभीयात् तस्य, संग्रामे संयत्ते, येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते, यस्य गृहान् दहति तस्य —	१०४-१०७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रप्रा. अनु.	विषयः	पृष्ठानि
३.	यं कामो नोपनमेत् तस्य, क्षेत्रे वा सजातेषु वा स्पर्धमानस्य, अभिचर्यमाणस्य, यः कामयेत सर्वमायुरियामिति तस्य, भूतिकामस्य, रुक्कामस्य, तेजस्कामस्य, सीक्षमाणस्य —	१०८-११०
४.	यः कामयेतान्नवान् स्यामिति तस्य, यः कामयेतान्नादः स्यामिति तस्य, यः कामयेतान्नपतिः स्यामिति तस्य, ज्योगामयाविनः, चक्षुष्कामस्य वा प्रजाकामस्य, यः कामयेत रसवान् स्यामिति तस्य, यः कामयेत वसुमान् स्यामिति तस्य, संग्रामं जिगीषतः, यस्याज्ञावग्निमभ्युद्धरेयुः तस्य, यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायेत् तस्य —	१११-११६
५.	अभिशस्यमानस्य प्रजाकामस्य च, पुत्रे जाते, यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपादयति तस्य, अग्निमुद्वासयिष्यतः, ग्रामकामस्य —	११७-१२१
६.	संग्राममुपप्रयास्यतः, संग्रामायतनं गतवतः, यः विद्विषाणयोरन्नमत्ति तस्य, समानयोः पूर्वोऽभिद्रुह्यति तस्य, अवीं प्रतिगृह्णानस्य, उभयादतः प्रतिगृह्णानस्य, सनिमेष्यतः, सनिमेत्य पुनरागतवतश्च —	१२२-१२६
७.	पशुकामस्य, पशुकामस्य, ब्रह्मवर्चसकामस्य, अन्नकामस्य, भूतिकामस्य, यः पाप्मना गृहीतः स्यात् तस्य, यं मृधोऽभि प्रवेपेरन् तस्य, बद्धस्य वा परियत्तस्य वा, यं महायज्ञो नोपनमेत् तस्य —	१२७-१३०
८.	ग्रामकामस्य, यस्य सेनाऽसंशितेव स्यात् तस्य, संग्रामे संयत्ते, यः हतमनाः स्वयं पाप इव स्यात् तस्य, यः कामयेत दानाकामा मे प्रजाः स्युः तस्य, यस्मै प्रत्तमिव सन्न प्रदीयेत तस्य, अपरुद्धस्य वा अपरुध्यमानस्य वा, योऽलं श्रियै सन् सदृङ् समानैः स्यात् तस्य —	१३१-१३४
९.	अभिचरतः, प्रत्यभिचरतः, अभिचर्यमाणस्य, यं यज्ञो नापनमेत् तस्य चक्षुष्कामस्य, भ्रातृव्ये यजमाने अध्वरकल्पा —	१३५-१३९
१०.	ब्रह्मवर्चसकामस्य, यदि बिभीयात् दुश्चर्मा भविष्यामीति तस्य, प्रजाकामस्य, अभिचरतः, ज्योगामयाविनः, यः कामयेत स्वेऽस्मा आयतने भ्रातृव्यं जनयेयमिति तस्य —	१४०-१४३
११.	ग्रामकामस्य, यः कामयेत क्षत्राय च विशे च समदं दध्यामिति तस्य, यः कामयेत क्लपेरन्निति तस्य, ग्रामकामस्य, ग्रामकामस्य, यः समानैर्मिथो विप्रियः स्यात् तस्य (संज्ञानी) —	१४४-१४८
२. १२.	काम्येष्टियाज्यापुरोनुवाक्याः —	१४९-१८२
३. १-१३.	काम्येष्टिविधानम् —	१८३-२४६
१.	भूतिकामस्य, अपरुद्धस्य, अपरुध्यमानस्य वा —	१८३-१८८
२.	यः मृत्योः बिभीयात् तस्य, ब्रह्मवर्चसकामस्य, यः कामयेत हिरण्यं विन्देयेति तस्य, हिरण्यं वित्त्वा, यस्य हिरण्यं नश्येत् तस्य, सोमवामिनः, पशुकामस्य —	१८९-१९४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रप्रा.	अनु.	विषयः	पृष्ठानि
	३.	यज्ञविभ्रष्टस्य, यं कामो नोपनमेत् तस्य, ब्रह्मवर्चसकामस्य, यः क्लैब्यात् बिभीयात् तस्य, ग्रामकामस्य, यः कामयेत ब्रह्मन् विशं विनाशयेयमिति तस्य —	१९५-१९९
	४.	सुवर्गकामस्य, यः कामयेत दानकामा मे प्रजाः स्युरिति तस्य, यः कामयेत स्वस्ति जनतामियामिति तस्य, यो राजन्य आनुजावरः स्यात् तस्य —	२००-२०३
	५.	पापयक्ष्मगृहीतस्य —	२०४-२०७
	६.	यं कामयेताज्ञादः स्यादिति तस्य —	२०८-२११
	७.	इन्द्रियकामस्य वीर्यकामस्य (सर्वपृष्ठा), अभिशस्यमानस्य (सर्वपृष्ठा)	२१२-२१६
	८.	चक्षुष्कामस्य —	२१७-२१९
	९.	ग्रामकामस्य (सांग्रहणी) [मन्त्राः, ब्राह्मणं च] —	२२०-२२४
	१०.	आयुष्कामेष्टिः - मन्त्राः —	२२५-२३०
	११.	यो ज्योगामयावी स्यात् यो वा कामयेत सर्वमायुरियामिति तस्य [आयुष्कामेष्टिब्राह्मणम्] —	२३१-२३५
	१२.	योऽश्वं प्रतिगृह्णाति तस्य [वारुणीष्टिः], [यद्यपरं प्रतिग्रही स्यात् तस्यानुनिर्वापश्च] —	२३६-२४०
	१३.	यः पाप्मना गृहीतः स्यात् तस्य —	२४१-२४६
३.	१४.	काम्येष्टियाज्यापुरोनुवाक्याः —	२४७-२६४
४.	१-१३	काम्येष्टिविधानम् —	२६५-३२७
	१.	आतृव्यवतः स्पर्धमानस्य —	२६५-२६८
	२.	आतृव्यवतः स्पर्धमानस्य (विजितीष्टिः) —	२६९-२७२
	३.	आतृव्यवतः स्पर्धमानस्य (संवर्गेष्टिः) —	२७३-२७६
	४.	प्रजाकामस्य, पशुकामस्य —	२७७-२७९
	५.	चित्रेष्टिरुपहोममन्त्राः —	२८०-२८३
	६.	पशुकामस्य (चित्रेष्टिः) —	२८४-२८७
	७.	कारीरीष्टि-मन्त्राः —	२८८-२९३
	८.	(,,) —	२९४-३००
	९.	वृष्टिकामस्य (कारीरीष्टिः) ब्राह्मणम् —	३०१-३०४
	१०.	,, ,, ,, —	३०५-३०८
	११.	त्रैधातवीयेष्टिः सर्वेभ्यः कामेभ्यः, अभिचरतः, अभिचर्यमाणस्य, सहस्रेण यक्ष्यमाणस्य, सहस्रेणेजानस्य, पशुकामस्य, यो यक्ष्य इत्युक्त्वा न यजते तस्य —	३०९-३१६
	१२.	त्रैधातवीयेष्टिः – [आख्यायिका] —	३१७-३२५
	१३.	यं कामयेत राजन्यमनपोऽधो जायेत वृत्रान् घ्नश्चरेदिति तस्य —	३२६-३२७
४.	१४.	काम्येष्टियाज्यापुरोनुवाक्याः —	३२८-३४१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रप्रा.	अनु.	विषयः	पृष्ठानि
५.	१-१०	प्रकृतेष्टौ शेषविधीनामनुब्राह्मणम् —	३४२-४५२
	१.	अग्नीषोमीयपुरोडाशविधानाय उपोद्घातत्वेन आख्यायिका —	३४२-३५०
	२.	पूर्णिमायामग्नीषोमीयपुरोडाशः —	३५१-३६१
	३.	पूर्णिमायां वैमृधपुरोडाशः, अमावास्यायां, सांनाय्ययागः —	३६२-३७०
	४.	आतृन्यवतः पशुकामस्य च पौर्णमास्यामनुनिर्वाप्यौ —	३७१-३७७
	५.	अभ्युदयेष्टिः दाक्षायणयज्ञः —	३७८-३९२
	६.	दर्शपूर्णमासयोः सोमयागेन सह पौर्वापर्यम् —	३९३-३९९
	७.	सामिधेनीमन्त्रव्याख्यानम् —	४००-४०८
	८.	,, ,, —	४०९-४१९
	९.	प्रवरमन्त्रस्य, निगदस्य, स्रुगादाननिगदस्य च व्याख्यानम् —	४२०-४२९
	१०.	नैमित्तिकीनां काम्यानां च सामिधेनीनां विधानम् —	४३०-४३७
	११.	सामिधेनीषु होतुर्नियमविशेषः —	४३८-४५२
५.	१२.	काम्येष्टियाज्यापुरोनुवाक्याः —	४५३-४६८
६.	१-११	प्रकृतेष्टौ शेषविधीनामनुब्राह्मणम् —	४६९-५८८
	१.	प्रयाजविधिः —	४६९-४८४
	२.	आज्यभागौ —	४८५-४९९
	३.	आग्नेयपुरोडाशः —	५००-५०८
	४.	वेदिः —	५०९-५१३
	५.	बर्हिःप्रयोगः —	५१४-५२१
	६.	उपांशुयाजस्विष्टकृतौ —	५२२-५३२
	७.	इडोपाह्वानम् —	५३३-५४१
	८.	इडाप्राशित्रभक्षौ —	५४२-५५०
	९.	अनूयाजाः सूक्तवाकश्च —	५५१-५६७
	१०.	शंयुवाकः पत्नीसंयाजश्च —	५६८-५७५
६.	११.	संवर्गेष्टिहौत्रम् —	५७६-५८८
६.	१२.	पितृयज्ञस्य हौत्रम् —	५८९-६०२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृष्णयजुर्वेदीया

तैत्तिरीय-संहिता

पदपाठ-युता

भट्टभास्कर-सायणाचार्य-विरचित-भाष्याभ्यां समेता

द्वितीयखण्डस्य प्रथमो भागः

[द्वितीयं काण्डम्]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ॐ

कृष्णयजुर्वेदीया

तैत्तिरीय-संहिता

भट्टभास्करभाष्य-सायणभाष्यसमेता

(अथ द्वितीयकाण्डे प्रथमः प्रपाठकः)

॥ श्रीगणेशाय नमः ॥

[१-]ईशानः सर्वविद्यानां भूतानामीश्वरः परः।
पुनातु सर्वदा युष्मान् शब्दब्रह्मतनुः शिवः[-१] ॥

॥ [१]श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्[२] ॥ १ ॥
व्याख्यातं प्रथमं काण्डं मूलप्रकृतिबोधकम्[३]।
विकृतेर्बोधकं काण्डं द्वितीयं व्याकरोम्यथ[४] ॥ २ ॥
वेदैकमेयता धर्मब्रह्मणोर्वेदमानता।
अपौरुषेयता वेदे मन्त्रब्राह्मणरूपिणि ॥ ३ ॥
समाख्यया याज्ञिकानां मन्त्रत्वमवसीयते।
*[-]ऋचः पादयुता मन्त्रा यजुः प्रश्लिष्टपाठकम्[५] ॥ ४ ॥
साम गीत्यात्मका मन्त्राः[-]* प्रयोगे स्वार्थबोधकाः[६]।
[×]लोके पदपदार्थौ यौ वेदे तावेव गोचरौ[७] ॥ ५ ॥

१-१. मै-'ईशानः ... शिवः' नास्ति।

१. इ-श्रीगणपतिनृसिंहाभ्यां नमः; ड-श्रीगणाधिपतये नमः। २. उ.क.ड१.पा.हा-विद्यातीर्थं महेश्वरम्। ३. ड१-°बोधनम्। ४. अ-व्याकरोम्यहम्।*-* (द्र. मीसू-शाभा २·१·३५-३७)। ५. आ.इ-प्रश्लिष्टपादकम्। ६. इ-स्वस्वकर्मणि। ×(द्र. मीसू १·३·३०-३५)। ७. इ.ड-नापरौ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मानं व्याकरणं [८]तेन ह्यर्थधीर्लोकवद्भवेत्[८]।
*[८]अनध्यायेऽपि मन्त्रोक्तिः, [९]मन्त्रे प्रवचनात् स्वराः ॥ ६ ॥
भाषिका[१] ब्राह्मणस्थस्य मन्त्रान्ते कर्मणः कृतिः[*]।
अर्थैकत्वेन वाक्यैक्यं तेन स्याद्यजुरन्तधीः ॥ ७ ॥
संनिधावनुषङ्गः स्यादर्थाहृतिरसंनिधौ[१०]।
मन्त्रादन्यद्ब्राह्मणं स्याद्विधिवादद्वयात्मकम् ॥ ८ ॥
•समभिव्याहृते धर्मे शक्तिज्ञो बोधको विधिः।
+उपवीतादिवल्लोके[११] [१२]ह्यपूर्वार्थो विधीयते[१२] ॥ ९ ॥
×हिशब्दादित्यागतो वै[१३] विधिस्तूपरिधारणे।
न विधिर्मन्त्रगाख्याते[१४] याभिर्यजत† इत्यतः[१५] ॥ १० ॥
§वायुर्वा इति वादोऽयं मानं [१६]धर्मे विधीयतः[१६]।
[१७]ऊर्जोऽवरुद्ध्या इत्येषा स्तुतिः स्यान्न फले विधिः[१७] ॥ ११ ॥
*तेन ह्यन्नमिति प्रोक्ता स्तुतिर्न त्वत्र हेतुगीः[१८]।
सर्वसाधारणा ह्यर्थाः [१९]पूर्वकाण्डे विचारिताः[१९] ॥ १२ ॥
[२०]इष्टिसोमपशुष्वेषां विकृतिष्वपि कासुचित्।
तत्तद्वाक्यान्युदाहृत्य[२१] बहवोऽर्था[२२] विचारिताः ॥ १३ ॥
आद्यकाण्डस्य भाष्येण व्युत्पन्नः पुरुषोऽखिले।
अनायासेन [२३]वेदेऽस्मिन्नर्थं बोद्धुमतिप्रभुः[२३] ॥ १४ ॥

तत्र वेदस्य पूर्वकाण्डे प्रतिपाद्यं कर्म द्विविधम्, प्रकृतिर्विकृतिश्चेति। प्रकृष्टसर्वाङ्गोपदेशो यत्र क्रियते सा प्रकृतिः। विशेषमात्रोपदेशो यत्र क्रियतेऽवशिष्टं तु प्रकृतेरतिदिश्यते सा विकृतिः। यथा शाब्दिका [२४]वृक्षशब्दे एव सर्वां प्रक्रियामुपदिश्य (द्र. काशिका–पा ७.३.१०२-१०५) घटपटादिशब्देषु तामतिदिशन्ति, विशेषमेव सर्वादिषु (द्र. काशिका - पा ७.३.११४) उपदिशन्ति, तद्वत्। [२५]तत्र प्रकृतिर्द्विविधा[२५] मूलप्रकृतिः अवान्तरप्रकृतिश्चेति[२६]। अग्निहोत्रमिष्टिः [२७]सोमश्चेत्येतास्तिस्रो[२७] मूलप्रकृतयः। तासु कस्याप्यङ्गस्यान्यतः

८–८. उ.पा–तत्तदर्थादेर्लौकिकान्न्यवेत्; हा–तत्तदर्थादेर्लौकिके भवेत्; आ–तत्तदर्थादेर्लोकवद्भवेत्। *–* (द्र. मीसू-शाभा १२.३.१८-२५)। ९–९. आ–प्रयोगे कर्मणां भवेत्, नात्रापि; ड.ड१–मन्त्रे.....स्वरः, भाषिको। १०. ड.ड१–स्यादध्याहृति°। • (द्र. जैन्या-मीसू १.१.५)। + (द्र. मीसू ३.४.१२)। ११. इ–°वत् सिद्धम्। १२–१२. इ–यद्विषाधो (?)नुवादतः। × (द्र. मीसू ३.४.१५)। १३. ड.हो१–°ऽपि। १४. ड.ड१.हो–°गाख्यातम्; क.हा–°गाख्यातो। † (द्र. जैन्या २.१.२०-२१)। १५. अ.उ.पा.हा–इत्यदः। § (द्र. मीसू १.२.१-१८)। १६–१६. इ–विध्यन्वयाद्भवेत्; क.पा.हा–धर्मे विधीयते; ड.ड१–धर्मे विधिस्थिते; हो१–धर्मे विधिस्थितम्। १७–१७. इ–वायोः स्तुतिवशेन स्याद्यागस्य सफलो विधिः; हो१–°स्यान्नेष्यते विधिः; अ.उ.पा.हा–°इत्येषा श्रुतिः स्यात्°। * (मीसू १.२.२६-३०) १८. हा–हेतुता। १९–१९. ड.ड१–पूर्वत्रैते विचारिताः; इ–सर्वत्रैवेरिताः पृथक्। २०. अ.आ.उ.पा–°पशुष्वेव; इ–स प्रकृतिष्वथ सर्वासु। २१. अ–तत्तद्व्याख्यामुदा°; हो१–°वाक्याद्युदा°। २२. ड–बहुदोषाः। २३–२३. इ–वेदेऽस्मिन् विहर्तुं भवति क्षमः। २४. अ.आ.उ.पा.हा–वेदशब्दे। २५–२५. अ.पा–प्रकृत्युत्पत्तिर्द्वि°। २६. अ.उ.पा–°रनन्तरप्रकृ°; इ–'इति' नास्ति। २७–२७. आ.इ.क–सोमश्चेति तिस्रो; हा–पशुः सोमश्चेति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

अतिदिष्टस्याभावात्। अग्न्याधानेष्टकोपधानयोरन्यतोऽतिदेशो नास्तीति चेत् तर्हि तादृशं सर्वमग्निहोत्रादिभिः उपलक्षणीयम्। अथवा [२८]वह्निसंस्कारमात्रतया[२९] कर्मत्वानादरेण मूलप्रकृतिष्वनुपन्यासः। अग्निहोत्रं नाम प्रतिदिनं सायं प्रातश्च क्षीराज्यादिद्रव्येण होतव्यं कर्म। तद्विकृतिः [३०]कौण्डपायिनामयनगतं मासाग्निहोत्रम् (द्र. तांब्रा २५.४.१-४)। इष्टिर्नाम पुरोडाशादिद्रव्येण पक्षे पक्षे निष्पाद्यं दर्शपूर्णमासाख्यं कर्म। तद्विकृतिः "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः" (तैसं २.२.१) इत्यादि काम्येष्टयः। सोमो नाम प्रतिवसन्तमनुष्ठेयं [३१]-सोमलतारसद्रव्येण निष्पाद्यमग्निष्टोमाख्यं कर्म-[३१]। तस्य साक्षाद्विकृतिर्विश्वजिदाद्येकाह-परम्परया सहस्रसंवत्सरसत्रपर्यन्तः[३२] कर्मसंघः। यद्यप्यग्नीषोमीयपशुरुक्तेभ्य इष्ट्यग्निहोत्रसोमेभ्यो[३३] विलक्षणस्तथाऽपि नासौ काचिन्मूलप्रकृतिः। अस्मिन्[३४] पशाविष्टिधर्माणां प्रयाजादीनामतिदेशेन तस्येष्टि-विकृतित्वात्। तस्य विकृतिरूपत्वेऽपि तदीयधर्माणामुपाकरणनियोजनादीनां सवनीयादिपशुष्वतिदेशात् प्रकृतित्वमप्यस्ति। ततो द्व्यात्मकत्वादवान्तरप्रकृतिरित्युच्यते। सहस्रसंवत्सरसत्रगतधर्माणामन्यत्रातिदेशाभावेन तस्मिन् सत्रे द्विविधस्यापि प्रकृतित्वस्याभावात् केवलविकृतित्वम्। [३५]-गृहमेधीयेष्टिरुपसद्धोम इत्यादेरप्रकृतिविकृतित्वादपूर्वकर्मत्वम्-[३५]। न ह्यन्यदीयस्य धर्मस्य तस्मिन् वा तदीयस्यान्यस्मिन् वा कश्चिदतिदेशोऽस्ति। तस्मात् प्रकृतिर्विकृतिरुभयात्मकमनुभयात्मकं चेति चतुर्विधं कर्म संपन्नम्। तेषु चतुर्विधेषु कर्मसु संहिताग्रन्थस्य प्रथमकाण्डे प्रपाठकचतुष्टयेन मूलप्रकृतिरूपाविष्टिसोमौ वर्णितौ। सोमस्याङ्गत्वेनावान्तरप्रकृतिरूपोऽग्नीषोमीयोऽपि वर्णितः। प्रकृतिं प्राधान्येन प्रतिपाद्य विकृतिव्युत्पत्तये पुनराधेयवाजपेयादयोऽपि[३६] काश्चिद्विकृतयो वर्णिताः। अथ द्वितीयकाण्डे प्राधान्येन विकृतयो वर्ण्यन्ते। यद्यप्यत्र पञ्चमषष्ठप्रपाठकयोर्दर्शपूर्णमासब्राह्मणमाम्नातं[३७] तथाऽपि प्रपाठकचतुष्टये विकृतीनामेव [३८]ह्यभिधानात् काण्डस्य[३९] विकृतिप्राधान्यमविरुद्धम्। तास्वपि विकृतिषु यद्यप्युक्तरीत्या काम्येष्टीनां मूलप्रकृतिप्रत्यासत्त्या ता [४०]-एव प्रथमं वर्णनीयास्तथाऽपि-[४०] तासु बहुवक्तव्यसद्भावात्[४१] सूचिकटाहन्यायेन प्रथमं ता उपेक्ष्यावान्तरप्रकृतेरग्नीषोमीयपशोर्विकृतयो वायव्यादिकाम्यपशवोऽल्पवक्तव्यतया प्रथमप्रपाठके वर्ण्यन्ते। तेषां च प्रत्येकं स्वतन्त्रत्वेन [४२]दर्शपूर्णमासाङ्गसमूहवदेककर्तृकत्वाभावान्नास्ति क्रमनियमः। [४३]-अतोऽनुवाकार्थानामनुष्ठान-प्रयुक्तस्याऽनुपूर्विनियमस्य-[४३] कस्यचिदभावादध्ययनसंप्रदायेनैव तन्नियम इति [४४]-नात्रानुवाकार्थः पृथगुपन्यस्यते-[४४] ॥

(इति भाष्यकारोपोद्घातः।)

---

२८. हो१—अग्निसंस्कार°। २९. ड.ड१—°मात्रतया करणम्। ३०. ड.हो१—°कुण्डपा°। ३१–३१. आ.क.हा—सोमलतारूपद्र°; इ—सोमलतारसद्रव्यसाध्यं कर्म अग्निष्टोमाख्यम्। ३२. अ.उ.पा—°संवत्सरपर्यन्तः। ३३. ड१—°सोमेभ्योऽपि। ३४. क.ड१. हा.हो१—तस्मिन्। ३५–३५. अ.उ.पा—°पसद्धर्म इत्यादेरप्रकृतितत्वादपूर्व-कर्मत्वम्; इ—°विकृतित्वादपूर्वत्वम्; हो१—°सद्याग इत्यादिरप्रकृतित्वादपूर्वकर्मत्वम्; ड—°सद्याग इत्यादेरप्रकृति-विकल्पितत्वादिपूर्वकर्मत्वम्; ड१—°सद्याग इत्यादिरप्रकृतिविकृतित्वादपूर्वकर्मत्वम्। ३६. आ.क.ड.ड१. हा—'अपि' नास्ति। ३७. अ.उ.ड.ड१.पा.हो१—°दर्शब्राह्मणमाम्नातम्; इ—दर्शपूर्णमासौ ब्रह्मत्वं च समाम्नातम्। ३८. इ—आम्नानात्; ड.ड१—'हि' नास्ति। ३९. इ—'काण्डस्य' नास्ति। ४०–४०. इ—ताः प्रथमं प्रवर्तनीयाः। ४१. इ—बहुलकृत्यसद्भावात्। ४२. अ.उ. पा—दर्शपूर्णमासाङ्गवदेक°। ४३–४३. इ—ततश्च अनुवाकार्थानाम् अनुप्रयुक्तस्यानुपूर्वीनियमस्य; अ.उ.पा—अतो मन्त्रार्थानुष्ठानस्यानुपूर्व्यनियमस्य; क.ड—°ष्ठानप्रयुक्त-स्यानुपूर्विकनियमस्य; हा—ततोऽनुवाकार्थाश्च अनुष्ठानस्यानुपूर्विनियमस्य; आ—°नुष्ठानस्याऽऽनुपूर्विकनियमस्य। ४४–४४. इ—°पृथक् स्तोष्यते; अ.उ.ड.पा—°नुवाकार्थाः पृथगुपन्यस्यन्त इति च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हरिः ॐ ॥

वायव्यꣳ श्वेतमा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता

वायव्यम् । श्वेतम् । एति । लभेत । भूतिकाम इति भूति-कामः ।
वायुः । वै । क्षेपिष्ठा । देवता ।

अतः परं काम्याः पशवो विधीयन्ते काम्यप्रायाः; नैमित्तिकानां च मध्ये विधानात् । तेषां [१]न पर्वादिनियमोऽस्ति[२] । वैश्वदेवकाण्डं 'वायव्यं श्वेतमा लभेत' इत्यादि ॥ तेषां च "पीवोन्नाꣳ रयिवृधः" (तैब्रा २.८.१) इत्यारभ्य षड्चो याज्यानुवाक्याः; वपायाः पुरोडाशस्य हविष इति द्वेद्वे । [३]वायव्यं वायुदेवत्यं [४]श्वेतं श्वेतवर्णं पशुम् [५]आ [६]लभेत [७]भूतिकामः । आलम्भनं नियोजनम् । भूतिः विभूतिः [८]धनवत्ता । भूतिं कामयते इति[९] "शीलिकामि[१०]" (पा ३.२.१ वा ७) इत्यादिना णप्रत्ययः; पूर्वपदप्रकृतिस्वरत्वं च । [११]क्षेपिष्ठा क्षिप्रतमा । "स्थूलदूर[१२]" (पा ६.४.१५६) इति यणादिलोपो गुणश्च । ननु भूतिं कामयमानं प्रति वायोर्भूतिहेतुत्वं [१३]प्रतिपाद्यं, यथा—"ऐन्द्रं चरुं निर्वपेत् पशुकाम ऐन्द्रा वै पशवः" (तैसं २.२.७) इति तत्र । तद्वदस्य क्षेपिष्ठत्वप्रतिपादनेन क्षेपिष्ठत्वमप्ययं कामयत इति चेत् न; 'स एवैनं क्षेपिष्ठत्वं भूतिं च गमयति' इति [१४]निगमनाभावात् । किंच-देवताग्रहणमप्यनर्थकम्, 'वायुर्वै क्षेपिष्ठा' इत्येव वाच्यम् । अत्रोच्यते—[१५]भूतिर्भूष्णुतापटुत्वं [१६]क्षिप्रकारित्वं[१७] कार्याणां [१८]सर्वार्थसाधनभूत आत्मधर्मः । अत एव निगमयति 'भवत्येव'

वायव्यमिति ॥ [१]तत्र च[१] [२]प्रथमानुवाकस्याऽऽदावैश्वर्यकामिनः पशुं विधत्ते– 'वायव्यꣳ श्वेतमा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येव' इति । वायुर्देवता यस्य पशोः सोऽयं वायव्यः । स च श्वेतवर्णः । तम् [३]आ [४]लभेत संस्पृशेत्, बर्हिःप्रक्षशाखाभ्यां यागार्थमुपाकुर्यादित्यर्थः । यद्यप्यत्र [५-]'यजेत' इति[५] न श्रूयते तथाऽपि द्रव्यदेवतात्मकस्य यागरूपस्य श्रूयमाणत्वादन्यथाऽनुपपत्त्या 'वायव्येन यजेत' इत्येवं यागः कल्पनीयः । न च सत्सु सहस्रसंख्याकेषु देवेषु कुतो [६-]वायौ पक्षपातः[६] इति शङ्कनीयम्, वायोरतिशयेन क्षिप्रगामिदेवत्वात् । [७-]श्वेतपशुश्च तत्प्रियत्वात्[७] वायोः स्वकीयो भागः । स्वार्थे धेयप्रत्ययः (पा ५.४.३६ वा २) । यद्वा–वर्ण-

२–२. तं१. तं२. मै–वेद्यादिनियमो नास्ति । ३–३. तं. तं२. पं२. लं–धनवत्ता च कामयते इति; मै४-ताम् । ४. तं१.तं२.मै-वाच्यम् । ५. पं२–निगमाभावात् । ६. मै–'भूतिः' नास्ति । ७. तं१.तं२–°परत्वं । ८. लं–'क्षिप्रकारित्वं' नास्ति । ९. तं१.तं२-सार्थ° ।

१–१. अ.उ.पा–'तत्र च' नास्ति; इ–तत्र तावत्; ड.ड१.हो१–तत्र । २. इ–प्रथमप्रपाटके प्रथमानुवाक ऐश्वर्य° । ३–३. इ–यागे विधिः; क.हा–यागविधिः । ४–४. आ.क–वायुरेवापेक्ष्यते; ड–वायोः पक्षपातः । ५–५. आ–श्वेतपशुष्वतिप्रिय° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

वायुमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येवाऽतिक्षिप्रा देवतेत्याहुः

वायुम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । एनम् । भूतिम् । गमयति । भवति । एव । अतिक्षिप्रेत्यति-क्षिप्रा । देवता । इति । आहुः ।

इति । वायुश्चायं देवतानां मध्ये क्षिप्रकारितमः । [१०]निर्धारणाश्रयणधर्मेण निर्धार्यमाणस्य[१०] [११]अभिधानात् । यथा–" प्राची दिशां वसन्त ऋतूनामग्निर्देवता " (तैसं ४·३·३) इति । तदर्थमेव देवताग्रहणम् । देवतान्तरापेक्षया चातिशायिनिकः प्रयुज्यते । यजमानश्चायं[१२] मनुष्याणां मध्ये क्षिप्रतमत्वलक्षणां भूतिं कामयते [१३]तस्मात् वायव्यमा लभेतेति । यद्वा [१४]भूतिर्विभूतिः, तस्याः यत् क्षिप्रतमत्वं [१५]प्रदाने स देवताभावः[१५] प्रतिपाद्यते वायुरिति । भूतिहेतुत्वं तु वायोरप्रतिपादितमेव [१६]सामर्थ्यसिद्धमिति वेदितव्यम् । भूतिहेतूनां देवतानां मध्ये वायुः क्षिप्रतमां भूतिं ददातीति भावः । स्वेनेति । वायोः स्वभूतेन शुक्लेन पशुना [V]भागधेयेन भागेन[१७] । " भागरूपनामभ्यो धेयः " (पा ५·४·३६ वा २) इति स्वार्थे धेयप्रत्ययः । [V]उप [V]धावति उपगच्छति । सर्तेः पाघ्रादिना (पा ७·३·७८) धावादेशः वेगितायां गतौ । शीघ्रमुपगच्छति, स्वभागधेयलाभात् । स एवेत्यादि गतम् ॥

अतिक्षिप्रेति ॥ प्रथम इतिकरणो हेतौ । यस्मादतिक्षिप्रत्वं[१८] देवतात्वं च वायोः तस्मात् [V]एनं यजमानं [V]सा देवता [V]प्रदहः प्रकर्षेण दग्धुम् [V]ईश्वरा स्यात् । तस्मादत्र प्रतिविधेयमित्याहुः पुराविदः ।

व्यत्ययेन दातव्यत्वमुच्यते । तेन च [V]भागधेयेन असाधारणेन [V]वायुम् [V]एव [V]उप [V]धावति समीपं प्राप्नोति [६]सेवत इत्यर्थः । [७]इतरदेवानाम् अस्मिन् पशावत्यन्तप्रीत्यभावात्[८] ' वायुमेव ' इत्यवधार्यते । यद्वा–यजमानस्यानादरन्यावृत्त्यर्थमुप धावत्येवेति योज्यम् । तेन तुष्टः [V]स वायुः [V]एव [V]एनं यजमानमैश्वर्यं [V]गमयति पूर्ववत् गमयत्येवेति योज्यम् । तदनुग्रहादयं [V]भवति [V]एव ऐश्वर्यं प्राप्नोत्येव ॥

अतिक्षिप्रेति ॥ [९]तस्मिन्नेव कर्मणि देवतां विशेष्टुं[९] विधत्ते– ' अतिक्षिप्रा देवतेत्याहुः सैनमीश्वरा प्रदहे इत्येतमेव सन्तं वायवे नियुत्वत आ लभेत नियुद्वा अस्य धृतिर्धृत एव भूतिमुपैत्यप्रदाहाय भवत्येव ' इति । [१०]अत्राभिज्ञाः पूर्वोक्तविशेषेण[१०] वायुदेवता [११]अत्यन्तक्षिप्रकारिणीत्येवं देवतादोषगूढाभिप्रायाः[११]

१०–१०. मै–°रणश्रवणान्निर्धार्यकरणस्य ; लं–°रणश्रवणात् निर्धार्यकारणस्य; पं२-निर्धारितश्रवणात् निर्धार्यकरणस्य । ११. तं१.मै–अभिधानम् । १२. तं१.तं२–°मानात्मनायम् । १३. तं२–तस्मात् वा यस्मात्°; लं-यस्मात् । १४. तं१.तं२–भूतिष्ठा भूतिः । १५–१५. अ.तं१.तं२.लं–प्रदानेन देवताभावम् । १६. अ-सामर्थ्यम् इति । १७. तं२–' भागेन ' नास्ति । १८. लं–क्षिप्रत्वम् ।

६. अ.इ.उ.पा–रोचते । ७. ड.ड१–इतरदेवतानाम् । ८. आ.क.ड.हा–°न्तप्रियत्वाभावात् । ९–९. आ–विशेषम्; ड१–तस्मिन्नेव कर्मणि देवताविशेषम् । १०–१०. अ.उ.पा–अत्यन्ताभिज्ञाः पूर्वोक्तानि विशेषणानि; ड१–अत्यन्ताभिज्ञाः पूर्वोक्तनिर्विशेषेण । ११–११. अ.क.हा–अत्यन्तं क्षिप्रकारिणीत्येतद्गुणदोषाभिज्ञाः; अ.उ.पा–अत्यन्तक्षिप्रकारिणीत्येव देवतागुणदोषाभिज्ञाः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सैनमीश्वरा प्रदह इत्येतमेव सन्तं वायवे नियुत्वत आ लभेत नियुद्वा अस्य धृतिर्धृत एव भूतिमुपैत्यप्रदाहाय भवत्येव (१)

सा। एनम्। ईश्वरा। प्रदह इति प्र-दहः। इति। एतम्। एव। सन्तम्। वायवे। नियुत्वत इति नि-युत्वते। एति। लभेत। नियुदिति नि-युत्। वै। अस्य। धृतिः। धृतः। एव। भूतिम्। उपेति। एति। अप्रदाहायेत्यप्र-दाहाय। भवति। एव (१)।

"ईश्वरे तोसुन्कसुनौ" (पा ३·४·१३) इति कसुन्। वायोः प्रेरणविशेषादग्निर्जायते इति [१९]दाह-हेतुत्वम्। यथा [२०-]"सहसस्पुत्रो अद्भुतः[-२०]" (ऋसं २.७.६) इति, "वायोरग्निः" (तैउ २·१) इति च श्रुतिः। यद्वा – दाहेन विनाशो लक्ष्यते॥

इदानीं प्रतिविधानमाह–एतमेवेति॥ [२१]सर्वत्रैव गुणविधानमित्येके। कर्मान्तरमित्यन्ये। [V]एतं श्वेतम् [V]एव [V]सन्तम् एतम् [२२]विश्रुतफलं [V]नियुत्वते [V]वायवे [V]आ [V]लभेत। [२३-]वायोरश्वा नियुतः (निघण्टु १·१५·१०), तद्वते[-२३]। "तसौ मत्वर्थे" (पा १·४·१९) इति भत्वम्। नियुद्वा इति। ध्रियतेऽनयेति [V]धृतिः वाहनम्। एवं कृते [V]धृतः अविनष्ट एव [V]भूतिम् [V]उप [V]एति [२४]तच्च [V]अप्रदाहाय संपद्यते, ततो [V]भवति [V]एव यजमानः। समानवाक्ये पदात् परत्वाभावान्निघाता-भावः॥

सन्तः प्रथमम् [V]आहुः। [V]सा चोग्रा देवता [V]एनं यजमानं [V]प्रदहः प्रदग्धुम् [१२-V]ईश्वरा समर्था इति स्वाभिप्रायं[-१२] प्रकटयन्ति। वायौ क्षिप्रं वाति सति जाज्वल्यमानोऽग्निर्गृहान् दहन्लोके दृश्यते[१३]। अतोऽग्निद्वारा वायो-र्दाहकत्वम्। तत्परिहर्तुं [१४]नियुद्विशेषणयुक्ताय [V]वायवे पशुम् [V]आ [V]लभेत। नितरां युता रथे मिश्रिता इति नियुतो वायोरश्वाः (निघण्टु १·१५·१०), तेऽस्य सन्तीति नियुत्वान्। अत एव तदीययाज्यानु-वाक्याप्रतिपादके "पीवोऽन्नाः रयिवृधः" (तैब्रा २·८·१) इत्यस्मिन् [१५]सूक्ते [१६]शतसहस्रसंख्याकाभिरश्वजाति-भिर्वायोर्गमनमाम्नायते–"आ नो नियुद्भिः शतिनीभिरध्वरम्। सहस्रिणीभिरुपयाहि यज्ञम्। वायो अस्मिन् हविषि मादयस्व°" (तैब्रा २·८·१) इति। येयं नियुत्संज्ञकाऽश्वजातिः सैव [V]अस्य वायोः [V]धृतिः धारयित्री। [१७]न हि वाहनेषु [१८]अश्वेषु शनैर्गच्छत्सु वायुः क्षिप्रं [१९]गन्तुं शक्नोति। [२०-]तेन नियुदेवास्य धृतिर्धारणमतो नियुत्वतो[-२०] वायोर्हविष्प्रदानेन यजमानोऽपि [V]धृतः [V]एव अविनष्ट एव सन्नैश्वर्यं प्राप्नोति।

१९. मै.तं१.तं२.लं–हेतुत्वम्। २०–२०. तं२.मै–स हि सर्वत्रोद्भूतः। २१. पं२. मै४–पूर्वत्रैव। २२. तं१.तं२.मै–विभूतिमलम्; पं२–विभूतिफलम्। २३–२३. तं१.तं२.मै.लं–'वायोः...तद्वते' नास्ति। २४. तं१.तं२.मै.लं–'तच्च' नास्ति।

१२–१२. आ.हा–°इति...चाभिप्रायम्;इ–उपयातीति पश्चादूगूढाभिप्रायम्। १३. ड.ड१. हो१–दृष्टः। १४. इ–नियुत्वते। १५. इ–ब्राह्मणे। १६. इ–सहस्र°। १७. ड–सः। १८. अ.उ.पा–शस्तेषु। १९. ड१–वातुम्। २०–२०. अ. उ. पा. हो१–'तेन...धारणमतो' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

वायवै नियुत्वत आ लभेत ग्रामकामो वायुर्वा इमाः प्रजा नस्योता नेनीयते वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्रजा नस्योता नि यच्छति ग्राम्येव भवति नियुत्वते भवति ध्रुवा एवास्मा अनपगाः करोति

वायवै। नियुत्वत इति निं-युत्वते। एति। लभेत। ग्रामकाम इति ग्राम-कामः। वायुः। वै। इमाः। प्रजा इति प्र-जाः। नस्योता इति नसि-ओताः। नेनीयते। वायुम्। एव। नियुत्वन्तमिति नि-युत्वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। प्रजा इति प्र-जाः। नस्योता इति नसि-ओताः। नीति। यच्छति। ग्रामी। एव। भवति। नियुत्वत इति नि-युत्वते। भवति। ध्रुवाः। एव। अस्मै। अनपगा इत्यनप-गाः। करोति।

ग्रामकाम इति ॥ ग्रामो जनसमूहः। स विधेयो मे स्यादिति कामयमानः। यद्वा–केनचिदपहृतं ग्रामं पुनः प्राप्तुकामः। नस्योता इति। नसि नासिकायां रज्ज्वेव ओताः [२५]आबद्धाः। आङ्पूर्वाद्वेञः संप्रसारणम्, "पद्दन्॰" (पा ६·१·६३) इति नसादेशः, "तत्पुरुषे कृति बहुलम्" (पा ६·३·१४) इत्यलुक्, कृदुत्तरपदप्रकृतिस्वरत्वम् (द्र. ६.२.१३९)। [V]नेनीयते पुनः पुनर्नयति। नियच्छतीति, अस्मै यजमानाय नियमयति विधेयीकरोति। [V]ध्रुवाः स्थिराः [V]अनपगाः [२६]अनपरक्ताः ॥

तच्चैश्वर्यम् [V]अप्रदाहाय [V]भवति [V]एव। नियुत्वतो वायोरनुग्रहेण धैर्ययुक्तस्य[२१] यजमानस्य स्वकीयान् पुरुषान्नियन्तुं [२२]स्वकीयद्रव्यमविनाशेन पालयितुं च समर्थत्वात् मनःसंतापरूपः प्रदाहः सर्वथा न भवत्येव ॥

वायव इति ॥ [२३]तमेव पशुं फलान्तराय विधत्ते–'वायवे नियुत्वत आ लभेत ग्रामकामो वायुर्वा इमाः प्रजा नस्योता नेनीयते वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्रजा नस्योता नि यच्छति ग्राम्येव भवति' इति। नासिकायामोता [V]नस्योताः। यथा लोके बलीवर्दा नासिकाछिद्रे रज्जुबन्धने सति [२४]सुखेन नीयन्ते तद्वत् सर्वाः [V]प्रजाः ग्रामवासिनीरधीनाः कृत्वा [V]वायुः तत्र तत्र भृशं नयति। [V]स च वायुः पशुना [२५]तुष्टः [२६]सर्वाः [V]प्रजाः यजमानाधीनाः करोति। स्वाधीनप्रजो यजमानो ग्रामस्वामी [V]भवति एव ॥

नियुत्वत इति ॥ देवतागुणं[२७] प्रशंसति–'नियुत्वते भवति ध्रुवा एवास्मा अनपगाः करोति' इति। नियुत्वद्गुणयुक्ताय पशुः [V]भवति इति [२८]यत्तेन ग्रामस्थाः सर्वाः प्रजा अस्मिन् यजमाने [V]ध्रुवाः अनुरक्ताः [V]करोति, न तु ताः कदाचिदप्यपरक्ता भवन्ति ॥

---

२५. तं१.तं२–'आबद्धाः' नास्ति। २६. लं–अपरक्ताः।

---

२१. इ–भूतिप्रदेन स तु। २२. इ–सहायद्रव्य°। २३. इ–अमुमेव; ड१–'तमेव' नास्ति।
२४. ड. हो१–सुखादा°। २५. इ–'तुष्टः' नास्ति। २६. अ.उ.ड.पा.हो१–'सर्वाः' नास्ति।
२७. इ–देवतागुणान्। २८. अ.उ.पा–यत्र तेन; इ–स च; हा–स च यत्र।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वायवे नियुत्वत आ लभेत प्रजाकामः प्राणो वै वायुरपानो नियुत् प्राणापानौ खलु वा एतस्य प्रजाया (२) अप क्रामतो योऽलं प्रजायै सन् प्रजां न विन्दते वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्राणापानाभ्यां प्रजां प्र जनयति विन्दते प्रजां

---

५ वायवे। नियुत्वत इति नि-युत्वते। एति। लभेत। प्रजाकाम इति प्रजा-कामः। प्राण इति प्र-अनः। वै। वायुः। अपान इत्यप-अनः। नियुदिति नि-युत्। प्राणापानाविति प्राण-अपानौ। खलु। वै। एतस्य। प्रजाया इति प्र-जायाः (२)। अपेति। क्रामतः। यः। अलम्। प्रजाया इति प्र-जायै। सन्। प्रजामिति प्र-जाम्। न। विन्दते। वायुम्। एव। नियुत्वन्तमिति नि-युत्वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। प्राणापानाभ्यामिति
१० प्राण-अपानाभ्याम्। प्रजामिति प्र-जाम्। प्रेति। जनयति। विन्दते। प्रजामिति प्र-जाम्।

प्रजाकाम इति ॥ प्रजां पुत्रादिकां कामयमानः। प्राण इति। उपर्यधोभावाभ्यां प्राणापानत्वमनयोः। प्राणापानौ खल्विति। अनयोरपक्रमणात् प्रजा नोत्पद्यते। [१७]योऽलमिति। [१८]सत्यामेव प्रजननशक्तौ प्रजां न लभते; प्राणापानाननुग्रहात्। स एवेति। नियुत्वान् वायुः प्राणापानरूपत्वेन[१९] [V]प्रजां [V]जनयति ॥

---

१५ **वायव इति ॥ पुनरपि फलान्तराय विधत्ते– 'वायवे नियुत्वत आ लभेत प्रजाकामः प्राणो वै वायुरपानो नियुत् प्राणापानौ खलु वा एतस्य प्रजाया अप क्रामतो योऽलं प्रजायै सन् प्रजां न विन्दते वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्राणापानाभ्यां प्रजां प्र जनयति विन्दते प्रजाम्' इति। प्रकर्षेणानिति मुखबिलाद्बहिश्चेष्टत इति [२९]प्राणवायुश्च तथाविधः। अपकर्षेण मुखादधस्तादुदरस्यान्तरनिति[३०] चेष्टत इति [r]अपानः। [३१]नियुच्छब्दो नितरां यौति मिश्रीभवतीति व्युत्पत्त्या तथाविधमर्थमाचष्टे।**
२० **[r]यः पुरुषः प्रजार्थम् [r]अलम् [r]सन् [३२-]अनुकूलस्त्रीयुक्तः सन्[-३२] युवा च सन् अपत्यं न लभते [r]एतस्य पुरुषस्य [r]प्रजायाः सकाशात् [r]प्राणापानौ अपक्रान्तौ भवतः। अपत्यलाभायानेन[३३] पुरुषेण गर्भाशये निषिक्ते रेतसि नियुत्वतो वायोरनुग्रहाभावात् प्राणापानयुक्तं जीवान्तरं न प्रविशति। एतदेवाभिप्रेत्यैतरेयोपनिषदि श्रूयते– "न ह वा ऋते प्राणाद्रेतः सिच्यते यद्वा ऋते प्राणाद्रेतः सिच्यते भ्रूयेन्न संभवेत्" (ऐआ ३.२.२) इति। नियुत्वान् वायुः [r]भागधेयेन[३४] तुष्टो[३५] यजमानार्थं तदीयरेतसि [r]प्राणापानाभ्यां युक्तं जीवं प्रवेश्य प्रजाः**
२५ **[r]प्र [V]जयनति। ततो यजमानः पुत्रं लभते ॥**

---

२७. तं१–योऽयमिति। २८. तं१.तं२–तस्यामेव। २९. मै४–°रूपद्वयेन।

---

२९. आ.इ.क.ड.ड१.हा.हो१–प्राणः वायुश्च। ३०. अ.उ.पा–°धस्तादनिति। ३१. अ.उ.पा–'नियुच्छब्दो' नास्ति; ड.ड१.हो१–नियुच्छब्दोऽपि। ३२–३२. इ. हा–सानुकूलस्त्रीयुक्तः; अ.उ.पा.–सन्ननुकूलस्त्रीयुक्तः। ३३. इ.क.हा–अपत्यलाभाभावेन। ३४. ड.ड१.हो१–भागेन। ३५. इ–संतुष्टः; हो१–तु दृष्टः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वायवे नियुत्वत आ लभेत ज्योगामयावी प्राणो वै वायुरपानो नियुत् प्राणापानौ खलु वा एतस्मादप क्रामतो यस्य ज्योगामयति वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप (३) धावति स एवास्मिन् प्राणापानौ दधात्युत यदीतासुर्भवति जीवत्येव प्रजापतिर्वा इदमेक आसीत् सोऽकामयत प्रजाः पशून्त्सृजेयेति

वायवे। नियुत्वत इति नि-युत्वते। एति। लभेत। ज्योगामयावीति ज्योक्-आमयावी। प्राण इति प्र-अनः। वै। वायुः। अपान इत्यप-अनः। नियुदिति नि-युत्। प्राणापानाविति प्राण-अपानौ। खलु। वै। एतस्मात्। अपेति। क्रामतः। यस्य। ज्योक्। आमयति। वायुम्। एव। नियुत्वन्तमिति नि-युत्वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति (३)। धावति। सः। एव। अस्मिन्। प्राणापानाविति प्राण-अपानौ। दधाति। उत। यदि। इतासुरितीत-असुः। भवति। जीवति। एव। प्रजापतिरिति प्रजा-पतिः। वै। इदम्। एकः। आसीत्। सः। अकामयत। प्रजा इति प्र-जाः। पशून्। सृजेय। इति।

[V]ज्योगामयावी दीर्घरोगः। प्राणापानाविति गतम्। यस्येति। "रुजार्थानाम्°" (पा २.३.५४) इति षष्ठी। उतेति। [V]यदि अपि [V]इतासुः गतासुः [V]भवति, तथाऽप्यनेन कर्मणा [V]जीवति [V]एव [३०]इति स्तुतिः[-३०]॥

प्रजापतिर्वा इत्यादि। [V]इदं परिदृश्यमानं स्थावरजङ्गमात्मकं सर्वं जगत् [V]प्रजापतिः [V]एक एव प्रत्यस्तमितसमस्तविकार [V]आसीत्। [V]सः प्रजापतिः [V]प्रजाः [V]पशून् च [V]सृजेय [V]इति [V]अकामयत।

वायवे नियुत्वत इति॥ पुनरपि फलान्तराय विधत्ते–' वायवे नियुत्वत आ लभेत ज्योगामयावी प्राणो वै वायुरपानो नियुत् प्राणापानौ खलु वा एतस्मादप क्रामतो यस्य ज्योगामयति वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् प्राणापानौ दधात्युत यदीतासुर्भवति जीवत्येव ' इति। [V]ज्योगामयावी दीर्घरोगयुक्तः। [V]यस्य [V]ज्योक् [V]आमयति यं पुरुषं चिरमामयो बाधत एतस्मात् [३६-V]प्राणापानौ अतिक्रान्तुमुद्यतौ[-३६]। [V]अस्मिन् [V]प्राणापानौ [V]दधाति [३७]चिरं स्थापयति। अपि च [V]यदि कथंचिद्मौ [३८]शयानः [३९]रुग्णो [४०-]मुहूर्तमात्रं याममात्रं वा परेतो[-४०] भवेत्तथाऽपि वायोरनुग्रहादागतप्राणः[४१] [V]जीवति [V]एव[४२]॥

प्रजापतिर्वेति॥ कर्मान्तरं विधातुं प्रस्तौति–' प्रजापतिर्वा इदमेक आसीत् सोऽकामयत प्रजाः पशून्त्सृजेयेति स आत्मनो वपामुदक्खिदत्तामग्नौ प्रागृह्णात्ततोऽजस्तूपरः समभवत्तꣳ स्वायै देवताया आऽलभत

३०–३०. मै४–'इति स्तुतिः' नास्ति।

३६–३६. ड१–प्राणावपक्रान्तु°; हो१–प्राणावतिक्रान्तु°। ३७. ड.ड१.हो१–स्थिरम्। ३८. अ.उ.पा–शयानात्। ३९. अ.उ.पा–प्राणः। ४०–४०. इ. मुहूर्तं गतप्राणः; ड.ड१.हो१–मुहूर्तं याममात्रं गतो। ४१. ड.ड१. हो१–°दागते प्राणे। ४२. इ. क. हा–स जीवति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स आत्मनो वपामुदक्खिदत् तामग्नौ प्रागृह्णात् ततोऽजस्तूपरः समभवत् तꣳ स्वायै देवतायै आऽलभत ततो वै स प्रजाः पशूनसृजत

सः। आत्मनः। वपाम्। उदिति। अक्खिदत्। ताम्। अग्नौ। प्रेति। अगृह्णात्। ततः। अजः। तूपरः। समिति। अभवत्। तम्। स्वायै। देवतायै। एति। अलभत। ततः। वै। सः। प्रजा इति प्र-जाः। पशून्। असृजत।

५

व्यत्ययेनात्मनेपदम् (पा.३·१·८५)। [V]उत् [V]अक्खिदत् उद्धृतवान्। खिद परिघाते, [३१]छान्दसो वर्णोपजनः। व्यञ्जनद्वयादिरित्येके। [V]तां वपामग्नेरुपरि होतुं [V]प्र [V]अगृह्णात् अधारयत्। [V]ततः प्रगृहीताया वपायाः [V]अजः [V]तूपरः [३२]शृङ्गविहीनः [V]समभवत्। [३३]पुच्छविहीन इत्येके। अथ प्रजापतिः [V]तम् अजम् [V]स्वायै [V]देवतायै आत्मानमेव देवतां कृत्वा तस्यै [V]आ [V]अलभत। ततो वा इत्यादि। गतम्॥

१० **ततो वै स प्रजाः पशूनसृजत' इति। यत् [V]इदम् प्रजापशुरूपं जगदिदानीं दृश्यते तदिदं सृष्टेः [४३]पूर्वं [V]प्रजापतिः [V]एकः [V]आसीत् प्रजापतिरेव स्थितो नान्यत् किंचिदित्यर्थः। [V]सः च [४४]प्रजापशुसृष्टिकामस्तत्साधनत्वेन स्वशरीरादुदरमध्यवर्तिनीं पटसदृशीं [V]वपाम् [V]उत् [V]अक्खिदत् [४५]उत्खिद्योद्धृतवान्। [V]तां च वपाम् [V]अग्नौ प्रक्षिप्तवान्। [V]ततः दग्धायाः वपायाः [V]अजः [V]तूपरः शृङ्गरहितः समुत्पन्नः। [V]तं चाजं स्वात्मरूपां देवतामुद्दिश्य [V]आऽलभत[४६]। तत्कर्मसामर्थ्यात् [V]प्रजाः [V]पशून् [V]असृजत। ननु स्वयमेव स्ववपामुत्खिद्याजं तत उत्पाद्य तं च स्वार्थमालभ्य जगत् [४७]सर्वमप्यसृजतेति [४८]महदेवैतदिन्द्रजालम्। बाढमिन्द्रजालमेवैतत्। अत एवान्यत्राऽऽम्नातम्–" इन्द्रो मायाभिः पुरुरूप ईयते " (ऋसं. ६·४७·१८ बृउ. २·५·१९) इति, " मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् " (श्वेउ ४·१०) इति च[४९]। न [५०]खल्विन्द्रजालविषये विस्मेतुं च भवानपीच्छति[-५०]। यदा तु लौकिकेऽपीन्द्रजाले न काऽप्यनुपपत्तिः [५१]तदानीमचिन्त्यमहिम्नि सर्ववेदसिद्धे परमेश्वरे का [५२]नाम तवानुपपत्तिः। अन्यथा क्व वीर्यं क्व वा पुरुषः, क्व बीजं क्व वा [५३]वृक्ष इत्यादिकं [५४]भवानुपपादकंमन्यः कथं [५५]युक्तिभिरुपपादयति। संकल्पसिद्धे जगदीश्वरे को नाम विस्मय इति चेत् [५६]तर्ह्येतत् प्रकृतेऽपि [५७]न विस्मयः[-५७]। संकल्पसिद्धस्य किमेतावता प्रयासेनेति चेत्[५८]। नानाविधभोगैः[५९] तृप्तस्य[६०] राजादेः किं द्यूतमृगयादिप्रयासेनेति त्वया[६१] वक्तव्यम्। लीलेति चेत्। [६२]तदत्राप्यनुसंधेहि। तथा च स्मृतिः[६३]—**

३१. मै४–तौदादिकश्छान्दसः। ३२. तं२–शृङ्गहीनः। ३३. तं२.लं–पुच्छहीनः।

४३. इ–आदौ। ४४. इ. ड. ड१. हो१–'प्रजापशु°' नास्ति। ४५. ड१–छित्त्वोद्धृत°। ४६. इ–
२५ उपालक्षत। ४७. ड. ड१. हो१–ससर्जेति। ४८. ड१–महदेतदि°। ४९. आ–'च' नास्ति। ५०–५०. अ.उ.पा–न खल्विन्द्रजालविषये विस्मितुं च भवानपीच्छति; इ–च लौकिक इन्द्रजाले विस्मातुं च भवानपीच्छति; हा–न खल्विन्द्रजालविषये विस्मातुं च भवानपीच्छति; हो१–न खल्विन्द्रजाले विस्मितुं भवानपि नेच्छति; ड१-न खल्विन्द्रजाले विस्मितुं च भवानपीच्छति। ५१. इ–तदाचिन्त्य°; हो१–°चिन्त्यमहिम्ना। ५२. इ–'नाम' नास्ति। ५३. इ वटवृक्षः। ५४. हो१–तदानुपपादकंमन्यः। ५५. इ–युक्तिमानुप-
३० पश्यति। ५६. ड१–तदेतत्। ५७–५७. इ.हो१–मा विस्मर। ५८. इ. हा–चेत् सत्यम्। ५९. ड.ड१–°विधमार्गैः। ६०. हो–संतृप्तस्य। ६१. अ.उ.पा–'त्वया' नास्ति। ६२. ड.हो१–तामत्रा°। ६३. आ.क–श्रुतिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

यः प्रजाकामः (४) पशुकामः स्यात् स एतं प्राजापत्यमजं तूपरमा लभेत प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजां पशून् प्र जनयति यच्छ्मश्रुणस्तत् पुरुषाणाꣳ रूपं यत् तूपरस्तदश्वानां यदन्यतोदन् तद्गवां यदव्या इव शफास्तदवीनां यदजस्तदजानामेतावन्तो वै ग्राम्याः पशवस्तान् (५) रूपेणैवाव रुन्द्धे

यः। प्रजाकाम इति प्रजा-कामः (४)। पशुकाम इति पशु-कामः। स्यात्। सः। एतम्। ५
प्राजापत्यमिति प्राजा-पत्यम्। अजम्। तूपरम्। एति। लभेत। प्रजापतिमिति प्रजा-पतिम्। एव।
स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। प्रजामिति प्र-जाम्।
पशून्। प्रेति। जनयति। यत्। श्मश्रुणः। तत्। पुरुषाणाम्। रूपम्। यत्। तूपरः। तत्।
अश्वानाम्। यत्। अन्यतोदन्नित्यन्यतः–दन्। तत्। गवाम्। यत्। अव्याः। इव। शफाः।
तत्। अवीनाम्। यत्। अजः। तत्। अजानाम्। एतावन्तः। वै। ग्राम्याः। पशवः। १०
तान् (५)। रूपेण। एव। अवेति। रुन्द्धे।

यदित्यादि ॥ [३४]पशुगणाः स्तूयन्ते[३४]। श्मश्रुणत्वं [३५]श्मश्रुमत्त्वं [V]पुरुषाणां [V]रूपम्। पामादित्वान्नप्रत्ययः (पा ५.२.१००)। तूपरत्वम् [V]अश्वानां रूपम्। अन्यतोदत्त्वम् अन्यतरपार्श्वस्थितदन्तवत्त्वं [V]गवां रूपम्। " छन्दसि च " (पा ५.४.१४२) इति दतृभावः। यतः [V]अव्याः [V]इव अस्य [V]शफाः [३६]सन्ति [V]तत् [V]अवीनां रूपम्। अजत्वमेव [V]अजानां रूपम्। [V]एतावन्तः [V]वै १५
[V]ग्राम्याः [V]पशवः प्रधानाः; उष्ट्रगर्दभयोरसत्प्रायत्वात्। तानिति। [V]तान् सर्वान् पशून् यथोक्तगुणलक्षणं[३७] पशुमालभमानः रूपद्वारेण [V]अव [V]रुन्द्धे ॥

" भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे " (द्र. मांउ ६–गौका ९)। विष्णुपुराणमपि[६४]—" क्रीडतो बालकस्येव चेष्टां तस्य निशामय " इति। व्याससूत्रमपि–" लोकवत्तु लीलाकैवल्यम् " (ब्रसू २.१.३३) इति अलमतिप्रसङ्गेन ॥ २०

यः प्रजाकाम इति ॥ विधत्ते–' यः प्रजाकामः पशुकामः स्यात् स एतं प्राजापत्यमजं तूपरमा लभेत प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजां पशून् प्र जनयति ' इति ॥

यदिति ॥ पशुं प्रशंसति– ' यच्छ्मश्रुणस्तत्पुरुषाणाꣳ रूपं यत्तूपरस्तदश्वानां यदन्यतोदन् तद्गवां यदव्या इव शफास्तदवीनां यदजस्तदजानामेतावन्तो वै ग्राम्याः पशवस्तान् रूपेणैवाव रुन्द्धे ' इति ॥ [६५]पुंस्पशावजे श्मश्रूणि विद्यन्ते। तूपरत्वं सर्वेष्वजेष्वभावेऽपि प्रकृते विद्यते। [६६]अन्यतोऽध एव दन्ता इति २५

३४–३४. मै४–पशुगणः स्तूयते। ३५. मै४–' श्मश्रुमत्त्वं ' नास्ति। ३६. लं–भवन्ति। ३७. तं२.मै–यस्योक्तगुणम्; पं२–यथोक्तगुणम्।

६४. अ.उ.क.पा.हा–°पुराणेऽपि। ६५. इ–पुरुषवदजे। ६६. हो१–अधस्तात्; ड१–अधस्थाः; क. हा–अन्यतोऽधस्ते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमापौष्णं त्रैतमा लभेत पशुकामो द्वौ वा अजायै स्तनौ नानैव द्वावभि जायेते ऊर्ज पुष्टिं तृतीयः सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः

सोमापौष्णमिति सोमा-पौष्णम्। त्रैतम्। एति। लभेत। पशुकाम इति पशु– कामः। द्वौ। वै। अजायै। स्तनौ। नाना। एव। द्वौ। अभीति। जायेते इति। ऊर्जम्। पुष्टिम्। तृतीयः। सोमापूषणाविति सोमा-पूषणौ। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तौ। एव। अस्मै। पशून्। प्रेति। जनयतः।

त्रैतमिति। त्रयाणां वत्सानां युगपज्जातानां [३४]समुदायस्त्रितम्[३५], तत्र भवस्त्रैतः। [३६]मध्यम एवेति केचित्। त्रयोऽप्यालभ्या इत्यपरे। यस्तिस्रः पिबति स त्रैत इति केचित्। इदानीं [४०]त्रैतस्य [४१]सोमापूषसंबन्धं प्रतिपादयति–द्वौ वा इति। [४२V]अजायै [V]द्वौ [V]स्तनौ [४३]क्षीरप्रस्राविणौ। तयोः [४४]द्वयोः [V]ऊर्जं रसं [४५]क्षीरलक्षणम् [V]अभि अभिलक्ष्य [V]द्वौ वत्सौ [V]जायेते [V]नाना [V]एव पृथक्स्वभावावेव[४६] [४७]अनियतस्तनपायिनौ जायेते। [V]तृतीयः तु वत्सः [V]पुष्टिम् अभि जायते पुष्ट्यतिशयनिर्दिष्टत्वात्[४८] तस्य। एवं रसपुष्टिप्रसवत्वात् सोमापूष्णोः [४९]स्वो भागः[४९] त्रैतः। गतमन्यत्॥

[६७–V]अन्यतोदन् अन्यतोदत्त्वम्[६७]। अविखुरसदृशाः [V]शफाः[६८] दृश्यन्त एव। [६९]अजत्वजातिश्चास्ति। [७०]तस्मात् पुरुषादिरूपत्वम् अजत्वम्[७१]। यद्यपि ग्राम्येषु पशुषु गर्दभोष्ट्रावपि सप्तसंख्यासिद्धये[७२] तत्र तत्र (द्र. ब्रौश्रौ २४.५) गृह्येते तथाऽपि पुरुषादयः पञ्चैव प्रशस्ता विप्रराजादिभिरत्यन्तमाद्दतत्वात्। अत एव तदीयेन [V]रूपेण[७३] सर्वरूपसदृशेन [V]तान् पुरुषादीन् सर्वानधीनान् करोति॥

सोमापौष्णमिति॥ पश्चन्तरं विधत्ते–'सोमापौष्णं त्रैतमा लभेत पशुकामो द्वौ वा अजायै स्तनौ नानैव द्वावभिजायेते ऊर्ज पुष्टिं तृतीयः सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून् प्र जनयति' इति। त्रयाणां वत्सानां युगपज्जातानां समुदायस्त्रितं तत्र भवस्त्रैतस्तेषामन्यतम इत्यर्थः। त्रयाणामुत्पत्तौ प्रयोजनमेवमुन्नेयम्, अजायास्तावत् [७४V]द्वौ [V]स्तनौ प्रसिद्धौ, तौ [V]नाना [V]एव पृथगेव पातुं [V]द्वौ वत्सौ [V]जायेते। मातृरूपायामजायां [७५]यच्छरीरसारं [७६–]या च तच्छरीरगता[७६] पुष्टिस्तदुभयं [७७]ख्यापयितुं [V]तृतीयः वत्सः

३८–३८. लं–यस्त्रितः; तं.मै२–यः स त्रितः। ३९. मै४–तेषामन्यतमः मध्यमः। ४०. मै४–तस्य। ४१. लं–सोमपूरकसंबन्धम्। ४२. अ१.तं.२.मै.लं–अजायाः। ४३. तं२.मै.लं–क्षीरस्रवणौ। ४४. मै४–'द्वयोः' नास्ति। ४५. तं२–क्षीरस्रवणम्। ४६. तं२.मै–'एव' नास्ति। ४७. अ१.मै४–नियत°। ४८. मै४–°निमित्तत्वात्। ४९–४९. तं२–'स्वो भागः' नास्ति।

६७–६७. इ.क.ड.ड१.हो१–अन्यतोदत्त्वम्। ६८. ड.ड१. हो१–खुराः। ६९. ड–आप्तजा°। ७०. क–तत्। ७१. अ.इ.उ.क.ड.ड१.पा.हा.हो–'अजत्वम्' नास्ति। ७२. ड. ड१. हो१–सप्तसंख्यायाः सिद्धये। ७३. इ–स्वरूपेण। ७४. हो१–यौ। ७५. आ–येयमूर्ग्यसः सारम्; ड१–यच्च सारम्। ७६–७६. अ. उ. पा–यावच्छरीर°; आ.क.हा– या च शरीर°। ७७. अ.उ.पा.हा–स्थापयितुम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून् प्र जनयत्यौदुम्बरो यूपो (६) भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्द्धे ॥

[एव प्रजाया उप प्रजाकामस्तान् यूपस्त्रयोदश च]

सोमः । वै । रेतोधा इति रेतः–धाः । पूषा । पशूनाम् । प्रजनयितेति प्र-जनयिता । सोमः । एव । अस्मै । रेतः । दधाति । पूषा । पशून् । प्रेति । जनयति । औदुम्बरः । यूपः (६) । भवति । ऊर्क् । वै । उदुम्बरः । ऊर्क् । पशवः । ऊर्जा । एव । अस्मै । ऊर्जम् । पशून् । अवेति । रुन्द्धे ॥ १ ॥

[मैसं २.५.१; कासं १२.१३, १३.१]

किञ्चेत्याह- सोमो वा इति ॥ सिक्तस्य रेतसो धाता ᵛरेतोधाः । " आतो मनिन् " (पा ३.२.७४) इति विच् । ᵛपूषा तु सिक्तस्य रेतसः पशुत्वेन परिणमयिता ॥

औदुम्बर इति "अनुदात्तादेश्च" (पा४.३.१४०) इत्यञ् । ऊर्ग्वा इति । अन्नस्य क्षीरादित्वात् ताच्छब्द्यमुभयत्र । गतमन्यत् ॥

इति द्वितीयकाण्डे प्रथमप्रश्ने प्रथमोऽनुवाकः ॥

उत्पन्नः[७८] । द्वावेव हि[७९] सर्वत्र जायेते, तृतीयस्तु क्वचिदेव । तथा सति यस्यां तृतीयो जातस्तस्याः शरीरे वीर्याधिक्यं [८०]पुष्ट्याधिक्यं चास्तीति लक्षयितुं शक्यते । किं बहुना त्रैतः प्रशस्त इति द्रष्टव्यम् । गर्भाशये ᵛरेतो यथा न स्रवति तथा ᵛसोमः धारयति । ᵛपूषा[८१] भूमिरूपत्वात् स्वकीयौषधिरसेन पोषयित्वा ᵛप्र ᵛजनयति ॥

औदुम्बर इति ॥ चोदकप्राप्तं खादिरं बाधितुं विधत्ते– 'औदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्द्धे' इति ॥ फलानां [८२]यथा [८३]बहुत्वादुदुम्बरस्योर्ग्रूपत्वं क्षीरद्वारेण पशुरपि तथाविधः । अतः ᵛऊर्जा ᵛएव उदुम्बररूपया यजमानार्थम् ऊर्ग्रूपान् [८४ᵛ]पशून् संपादयति ॥

अत्र मीमांसा ॥ [८५]यत् पूर्वमग्निहोत्रादीनां मूलप्रकृतित्वमुक्तं[८६] [८७]तदष्टमाध्यायस्य प्रथमपादे चिन्तितम्—

" इष्टयग्निहोत्रसोमानां मूलप्रकृतिता न हि ।
अस्ति वा नालौकिकत्वादियत्ताऽनवधारणात् ॥
लोकवत् संनिपत्यारादुपकारिद्वयश्रुतेः[८८] ।
इयत्ताया निश्चितत्वान्मूलप्रकृतिता त्रिषु ॥ " (जैन्या ८.१.५-६) ॥

---

७८. ड.हो१–समुत्पन्नः । ७९. ड१–'हि' नास्ति । ८०. इ–'पुष्ट्याधिक्यं' नास्ति । ८१. इ. ड.ड१.हो१–पूषा च । ८२. अ.उ.पा.–च । ८३. अ.उ.पा–सत्त्वादु°; ड.ड१–भक्ष्यत्वादु° । ८४. ड.ड१–'पशून्' नास्ति । ८५. आ–यदत्र; अ.उ.पा.हा–यत्र । ८६. ड.ड१.हो१–'उक्तम्' नास्ति । ८७. ड.हो१–'तत्' नास्ति । ८८. अ.उ.क.ड१.पा.हो१–°द्वयं श्रुतेः; ड–°द्वयं श्रुतिः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अलौकिकत्वेन एतावद्भिरङ्गैः संपूर्ण उपकारः इति निश्चेतुमशक्यत्वादिष्ट्यादीनां नास्ति मूलप्रकृतित्वम् इति चेत्। मैवम्। लौकिकसदृशत्वात्। यथा लोके भुजिक्रियायामोदनः करणं तस्य संनिपत्योपकारिणः शाकसूपादय आरादुपकारिणः पीठप्रदीपादयस्तथा भावनायां यागः करणमवघातादयः संनिपातिनः प्रयाजादय आरादुपकारिणोऽतो नात्यन्तमलौकिकत्वम्। इयत्ता तु लौकिके यथा प्रत्यक्षेण निश्चीयते [८९]तथा श्रौते[८९] श्रुत्या निश्चीयताम्। तस्मादिष्ट्यग्निहोत्रसोमानां मूलप्रकृतित्वमस्ति ॥

[९०]मासाग्निहोत्रस्य नित्याग्निहोत्राङ्गेदो द्वितीयाध्यायस्य तृतीयपादे चिन्तितः —

" मासं जुहोत्यग्निहोत्रं गुणोऽन्यत्कर्म वा गुणः।
अनूद्य [९१]प्राप्तं कर्मात्र मासोऽप्राप्तो[९१] विधीयते ॥
उपसद्भिश्चरित्वेति नित्ये तासामसंभवात्।
अनेकस्याविधेश्चान्यत् कर्म प्रकरणान्तरात् ॥ " (जैन्या २.३.२६-२७) ॥

कुण्डपायिनामयने श्रूयते— " मासमग्निहोत्रं जुह्वति मासं दर्शपूर्णमासाभ्यां यजेत " (द्र. तांब्रा २५.४.१) इति। अत्र प्राप्तं नित्याग्निहोत्रमनूद्य मासलक्षणो गुणोऽप्राप्तत्वाद्विधीयत इति चेत्। मैवम्। किं मास एव विधीयत [९२]उत ' उपसद्भिश्चरित्वा ' इत्युक्तत्वात्[९३] उपसदोऽपि ? नाऽऽद्यः। उपसदामपि नित्याग्निहोत्रे [९४]प्राप्तिरहितानां त्वन्मते[९४] विधातव्यत्वात्। न द्वितीयः। प्राप्ते कर्मण्यनेकगुणविधौ[९५] वाक्यभेदापत्तेः। ननु मा भूत् तर्हि गुणविधिः कर्मान्तरत्वे किं प्रमाणम् इति चेत्। प्रकरणान्तरमिति ब्रूमः[९६]। न ह्येतन्नित्याग्निहोत्रस्य प्रकरणम्, असंनिहितत्वात्। अयनस्य त्वेतत्प्रकरणम्, अयनमारभ्याधीतत्वात्। [९७]का तर्हि नित्याग्निहोत्रे गुणविधिशङ्केति चेत्। प्रकरणस्यासमर्पकत्वेपि[९८] अग्निहोत्रशब्देन [९९]तत्समर्पणादेषा शङ्का भवति। सा च वाक्यभेदापत्त्या निराकृता। तथा सति स्वतःसिद्धं प्रकरणभेदं निराकृत्य प्रकरणैक्यापादनेन[१००] गुणं विधापयितुं प्रवृतस्याग्निहोत्रशब्दस्य[१०१] शक्तौ निरूढायां तदवस्थः प्रकरणभेदो [१०२]नित्याग्निहोत्रादिदं कर्म[१०२] भिनत्ति। अग्निहोत्रशब्दो धर्मातिदेशार्थ इति सप्तमे (जैन्या ७.३.१-३) वक्ष्यते। ननूपसन्मासाभ्यां गुणाभ्यां विशिष्टं कर्म विधीयते, [१०३]ततो वाजिनन्यायेन गुणभेदात् कर्मभेदो न प्रकरणभेदादिति चेत्, न। वैषम्यात्। [१०४]उपादेयतया विधेयो गुणो वाजिनं, मासस्त्वनुपादेय इत्येकं वैषम्यम्; द्रव्यत्वेन [१०५]गुणान्तर्गतं वाजिनं, मासो न तथेत्यपरं वैषम्यम्। परमार्थतस्त्वत्र प्रथमतरप्रतीतेन प्रकरणभेदेन सिद्धं कर्मभेदं गुणभेद उपोद्बलयति[१०६]। ततः[१०७] प्रकरणान्तरमेवात्र भेदहेतुरिति[१०८] ॥

८९–८९. ड.ड१.हो१–तथासौ। ९०. अ.उ.हा–मासस्याग्नि°। ९१–९१. अ.पा–प्राप्तकर्मत्वमत्राप्राप्तः; हो१–नित्यं कर्मात्र मासं प्राप्तः; ड–नित्यं कर्मात्र मासो प्राप्ति°; ड१–कर्माग्निहोत्रं मासाप्राप्तः। ९२. अ.उ. क.पा–उत वा। ९३. ड.ड१–इत्युक्ताः। ९४–९४. ड.ड१.हो.१–°रहितत्वात् न तेषाम्। ९५. अ.उ.पा–°नेन गुणविधौ। ९६. आ.ड.ड१–वदामः। ९७. ड१–न। ९८. ड–°समर्थकत्वेऽपि; ९९. हा–एतत्सम°; अ.उ.पा–°णादेव। १००. अ.उ.पा–°पादने। १०१. अ.उ.पा–°होत्रस्य शब्दस्य। १०२–१०२. अ. उ. पा–नित्यकर्म। १०३. अ. उ.पा–तथा। १०४. अ.उ.पा–उपपादयति। १०५. ड.ड१–रूपान्तर्गतम्। १०६. अ–उपोद्बोधयति; उ– उपोद्बोधयितुम्। १०७. ड.हो१–अतः। १०८. ड१–' इति ' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

ईदृशस्य कर्मणो धर्मापेक्षत्वं [१०९]सप्तमाध्यायस्य चतुर्थपादे चिन्तितम्—

" सौर्ये चरौ[११०] न धर्माः स्युः स्युर्वा मानविवर्जनात् ।
न स्युः, स्युः करणं यागोऽपेक्षते ह्युपकारिणः ॥ " (जैन्या ७·४·१) ॥

" सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः " (द्र. तैसं २·३·२) इत्यत्रावघातादयो धर्मा न प्राप्यन्ते। [१११]कुतः ? प्रापकप्रमाणानां श्रुतिलिङ्गादीनामभावादिति चेत्। मैवम्। [११२-]विमतो याग[-११२] उपकरणापेक्षः करणत्वात्। लौकिकवैदिकभोजनदर्शपूर्णमासादिवत् [११३-]इत्यनुमानेन तत्प्रापणात्[-११३] ॥

तत्रैवान्यच्चिन्तितम्—

" विध्यन्तोऽपेक्षितस्तत्र लौकिको वाऽथ वैदिकः ।
आद्यो निबन्धराहित्यादन्त्यो धीसंनिकर्षतः[११४] ॥ (जैन्या ७·४·२) ॥

तत्र सौर्यचरावपेक्षितः [११५-]प्रधानविधेः शेषाङ्गकलापः[-११५] स्थालीपाकादिगतो लौकिको ग्रहीतव्यः। कुतः ? अनिबद्धत्वात्। वैदिकस्तु प्रकरणेन [११६]कर्मविशेषे निबद्धः सन्न ततो वियोजयितुं [११७]शक्यत इति चेत्। मैवम्। वैदिके करणे वैदिकविध्यन्तस्य[११८] बुद्धिसंनिकर्षात्। यथा प्रकरणेन क्वचिन्निबद्धस्तथा चोदकेनान्यत्रापि निबध्यताम्। किं च " प्रयाजे प्रयाजे कृष्णलं जुहोति" (तैसं २·३·२) इति सौर्ययागविधिशेषे[११९] कृष्णलहोमविधानाय सिद्धवत्प्रयाजोऽनूद्यते। तच्च वैदिकेतिकर्तव्यताया लिङ्गम्। तस्मात् वैदिको ग्राह्यः ॥

स च [१२०-]विध्यन्त ईदृशेषु[-१२०] कर्मसूपदेशतो[१२१] न प्राप्नोतीति सप्तमाध्यायस्य प्रथमपादे चिन्तितम्— १५

" [१२२-]सर्वार्थं प्रकृतार्थं[-१२२] वा प्रयाजाद्युपदेशनम् ।
[१२३-]यज्यन्वयेन सर्वार्थं[-१२३] नातिदेशो विचार्यताम्[१२४] ॥
[१२५]अङ्गप्रधानयोर्मुख्यापूर्वभेदे[१२६] समन्वयात् ।
[१२७]प्रकृतार्थमतः कार्यमतिदेशविचारणम् ॥ " (जैन्या ७·१·२-३) इति ॥

दर्शपूर्णमासप्रकरणे प्रयाजादयः (द्र. तैसं २·६·१) उपदिष्टाः, ज्योतिष्टोमप्रकरणे दीक्षणीयादयः २०
(द्र. तैसं ५·५·१; ६·१·२)। [१२८-]तत्रैते सर्वे धर्माः[-१२८] सर्वयागार्थत्वेनोपदिश्यन्ते। कुतः ? यज्यन्वयात्। यागः करणं, प्रयाजादय [१२९]इतिकर्तव्यतेत्येतावदविवादम्। तत्र यदि प्रयाजादयो यागवदपूर्वेणान्विताः स्युः तदानीमपूर्वनिष्पादकत्वमुभयत्र समानमिति कृत्वा करणोपकरणत्वलक्षणं सर्वसंमतमवान्तरवैषम्यं बाध्येत। किं [१३०]चावघातपेषणादीनां यागनिष्पादकत्वेन यज्यन्वयो दृष्टस्तद्वदङ्गत्वसामान्यात्[१३१] प्रयाजादीनामपि

---

१०९. अ.उ.पा.हा–सप्तमस्य। ११०. अ.उ.पा–पशौ । १११. आ–'कुतः' नास्ति। २५
११२–११२. हो१–विध्यन्तो युगपत्। ११३–११३.ड.ड१.हो१–'इत्यनु...णात्' नास्ति। ११४. अ.उ.पा–°ऽपि संनिकर्षतः; हो–°ऽक्षिसंनिकर्षतः। ११५–११५. आ.क.ड–प्रधानविधिशेषा°; हा–विधानविशेषाङ्ग°;। ११६. ड–शक्तविशेषे। ११७. ड–शक्यः। ११८. अ.उ.पा–°विध्यंशस्य। ११९. अ.उ.क.पा–°विधिविशेषे; हा–°विधिशेषेषु। १२०–१२०. ड–विध्यन्तरवृतेषु; हो१–विध्यन्तरधृतेषु। १२१. ड१–°सूपदेशेन। १२२–१२२. अ.उ.पा–सर्वार्थप्रकरणार्थम्। १२३–१२३. उ.पा–यज्युन्नयन- ३०
सर्वार्था; हा–यज्यन्वयेन सर्वार्था; ड–यज्यन्वयेन सर्वासाम्; ड–यजे(?)न्वयेन सर्वार्थम्। १२४. उ.पा–विचार्यते। १२५. ड.ड१–स च प्रधा°। १२६. अ.उ.ड.पा–°मुख्यात्पूर्वभेदे; ड१–°र्मुख्यात् पूर्वः भेदे। १२७. ड.ड१–प्रकृतार्थं ततः; हा प्रकृतार्थे ततः। १२८–१२८. अ.उ–तत्र ते पर्वधर्माः; पा–तत्र ते सर्वधर्माः; क–तत्र ते सर्वे धर्माः; ड१. हो१–त एते सर्वे धर्माः; ड–तत एते सर्वे धर्माः। १२९. पा–इत्युपकरोत्येतत्तावत्। १३०. ड.हो१–चावघातावेक्षणादीनाम्। १३१. ड.ड१.हो१–°साम्यात्। ३५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यज्यन्वयो युक्तः। यजिधातुश्च दर्शपूर्णमासज्योतिष्टोमसौर्यश्येनादिषु सर्वेषु विशेषेष्वनुगतं यागमात्रं ब्रूते। तथा सति सौर्यश्येनादिष्वप्युपदेशेनैव कृत्स्नधर्मप्राप्तेरतिदेशविचारो न कर्तव्य इति प्राप्ते ब्रूमः-अपूर्वं हि[१३२] मुख्यं फलवत्त्वात्। यजिर्न मुख्यः, फलरहितत्वात्। फलवति मुख्ये प्रयाजादिविधानं[१३३] युक्तम्। अतः करणेतिकर्तव्यतयोरुभयोरपूर्वेण प्रथममन्वयः। पश्चात्तु परस्परं गुणप्रधानभावेनान्वयः। तथा सत्यपूर्वभेदस्य द्वितीयाध्याये (जैन्या ७.२.८-१०) निरूपितत्वादपूर्वविशेषेण तत्करणभूतयजिविशेषेण[१३४] वाऽन्विताः प्रयाजादिधर्मा ये यस्मिन् प्रकरण आम्नातास्ते तत्रैव व्यवतिष्ठन्ते। सत्येवं प्रकरणमर्थवद्भवति। सर्वेषां धर्माणां सर्वत्र प्राप्तौ प्रकरणमनर्थकं स्यात्। तस्मात् सौर्यश्येनादिप्रकरणे धर्मोपदेशाभावाद्धर्माकाङ्क्षां[१३५] पूरयितुमतिदेशविचारः कर्तव्यः॥

प्रत्यक्षवचनेन धर्मातिदेशस्तत्रैव चिन्तितः —

"इषौ[१३६] समानमितरच्छ्येनेनेत्यनुवादकम्।
श्येनवैशेषिकाणां वाऽतिदेशोऽत्रानुवादकम्[१३७]॥
ज्योतिष्टोमविकारत्वात् [१३८]तद्धर्माश्चोदकात् समाः[-१३८]।
[१३९]श्येनेष्वोरितरत्वोक्तिरिषुवैशेषिकं प्रति॥
इषुवैशेषिकादुक्तादितरच्छ्येनगं स्फुरेत्।
वैशेषिकं लोहितोष्णीषादि तेनातिदिश्यते॥" (जैन्या ७.१.४-६) इति॥

इषुनामकः श्येननामकश्च [१४०]द्वावप्येकाहौ ज्योतिष्टोमविकारौ[१४१], [१४२]तयोरुभयोर्ज्योतिष्टोमधर्माः चोदकेन प्राप्ताः। ते चोभयत्र समानाः। तच्च समानत्वम्[१४३] इषुप्रकरणेऽनेन[१४४] वाक्येनानूद्यते- "समानमितरच्छ्येनेन" (षब्रा ४.३.७) इति। नन्वत्र इतरशब्दोक्तिरनुपपन्ना, तत्प्रतियोगिनः कस्यचिदनिर्दिष्टत्वादिति चेत्। न। पूर्ववाक्यविहितस्य विशेषधर्मस्य[१४५] प्रतियोगित्वात्। इषौ यो वैशेषिकधर्मो[१४६] विहितस्तं परित्यज्य इतरच्चोदकप्राप्तं [१४७]सर्वं श्येनेन समानमित्यर्थः। तस्मादनुवादकमिदं वाक्यमिति प्राप्ते ब्रूमः-इतरशब्दः प्रतियोगिसजातीयं ब्रूते। [१४८]तद्यथा-[१४९]एष देवदत्त एक एवाधीते नेतरः कश्चिदित्युक्ते अध्ययनप्रसक्तिमान्[१५०] यज्ञदत्तादिमाणवकः[१५१] प्रतीयते न तु गवाश्वघटपटादिः। एवमत्राऽपि इषुवैशेषिकस्य[१५२] पूर्ववाक्योक्तस्य [१५३]-प्रतियोगित्वात् तत्समानजातीयं-[१५३] श्येनगतं लोहितोष्णीषादिरूपं वैशेषिकं धर्मजातम् इतरशब्देन प्रतिभाति। तच्च प्रकृतावभावान्न चोदकेन प्राप्तम्। तस्मात् [१५४]इषावनुष्टेयत्वेन अतिदिश्यते[१५५]॥

---

१३२. आ-'हि' नास्ति। १३३. ड१.हो-प्रयाजाधानम्; अ.उ.पा-प्रयासवि°। १३४. ड.ड-चान्विताः। १३५. अ.उ.पा.हा-धर्म्याकाङ्क्षाम्। १३६. अ.उ.ड.ड१.पा-इष्टौ। १३७. अ.उ.पा-°नुवादनम्। १३८-१३८. अ.उ.पा-°श्चोदकात्मनः। १३९. अ.उ.ड.पा-श्येनेष्टेरि°। १४०. ड१-द्वावेकाहौ। १४१. ड१.हो१-°विकारयोः। १४२. ड१-'तयोः' नास्ति। १४३. अ.उ.पा-प्रकरणसमानत्वम्। १४४. अ.उ.क.पा-°प्रकरण°। १४५. अ.उ.पा-विशेषस्य धर्मस्य; हो१-विशेषादिधर्मत्व°। १४६. ड.ड१.हा-वैशेषिको धर्मः। १४७. अ.उ.पा-सर्वं प्रति। १४८. अ.उ.पा.हा-अथवा। १४९. अ.आ.उ.क.पा.हा-'एषः' नास्ति। १५०. ड-°यने प्रसक्तिमान्। १५१. ड.ड१-°दत्तादिमाणवकः। १५२. अ.उ.ड१.पा-वैशेषिकस्य। १५३-१५३. अ.उ.पा-प्रतियोगिवत्समान°; क.ड.ड१-प्रतियोगित्वात् तत्सजातीयम्। १५४. अ.उ.पा-असावनु°; ड.हो१-इष्टावनु°। १५५. ड-अनुदिश्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

नाम्ना धर्मातिदेशस्तत्रैव तृतीयपादे चिन्तितः —

" मासं जुहोत्यग्निहोत्रमिति नामाऽग्निहोत्रतः ।
नित्यान्मासाग्निहोत्रेऽस्मिन् धर्माणां नातिदेशकम् ॥
उतातिदेशकं नैव[१५६] द्वयोर्नाम्नः[१५७] समत्वतः ।
अग्नये होत्रमित्यस्य[१५८] नित्ये संपादितत्त्वतः ॥
तत्र मुख्यं ततोऽन्यत्र गौणत्वस्य प्रसिद्धये ।
नित्याग्निहोत्रगान् धर्मांस्तन्नामातिदिशेदिह[१५९] ॥ " (जैन्या ७.३.१-३) इति ॥

कृण्डपायिनामयने श्रूयते–" [१६०]मासमग्निहोत्रं जुह्वति " (तांब्रा २५.४.१) इति । तत्र अग्निहोत्रम् इत्येतन्नाम नित्याग्निहोत्रादन्यस्मिन्[१६१] मासाग्निहोत्रे धर्मानतिदेष्टुं नार्हति । कुतः ? तस्य नाम्न उभयोरग्निहोत्रयोर्मुख्यवृत्त्या [१६२]समानत्वादिति प्राप्ते ब्रूमः–अग्नये होत्रं [१६३]-यस्मिन् कर्मणि तत् अग्निहोत्रम्[-१६३] इत्येतम्[१६४] अवयवार्थं नित्याग्निहोत्रे[१६५] संपाद्य तन्नामधेयत्वं प्रथमाध्याये (जैन्या १.४.८-१२) निर्णीतम् । अतस्तत्रैवायं शब्दो मुख्यः । न चोभयत्र मुख्यत्वं संभवति अनेकार्थत्वस्य[१६६] अन्याय्यत्वात् । मुख्यत्वासंभवेन [१६७]-मासाग्निहोत्रे गुणयोगाद्वर्तितुं नित्याग्निहोत्रगुणानतिदिशति[-१६७] ॥

[१६८]प्रत्यक्षवचने नाम्नोरभावेऽपि[१६९] नियतादेव कर्मणोऽतिदेशोऽष्टमाध्यायस्य प्रथमपादे चिन्तितः –

" [१७०]कस्माच्चिदतिदिश्यन्ते नियतात् कर्मणोऽथ वा ।
[१७१]अविशेषादादिसोऽन्त्यः शास्त्रार्थस्य व्यवस्थितेः ॥ " (जैन्या ८.१.२) इति ॥

विहितेतिकर्तव्यतारहिते सौर्यादौ कर्मणि तद्युक्तात्[१७२] यतः कुतश्चित् कर्मणो धर्मा अतिदिश्यन्ते । कुतः ? नियामकस्य विशेषस्याभावात् । [१७३]-अतो विशेषचिन्ता न[-१७३] कार्येति चेत् । मैवम् । [१७४]शास्त्रार्थव्यवस्थाया नियामकत्वात् । [१७५]तस्मान्नियतादेकस्मात् कर्मणो धर्मातिदेशः । तेन विशेषचिन्ता कर्तव्या ॥

तत्रैव विशेषनियामकं चिन्तितम्—

" तद्धितोक्त्यादिलिङ्गं किं न विशेषनियामकम् ।
भवेद्वा न [१७६]ह्यशब्दत्वाद्भवेच्छब्दे प्रवेशतः[१७७] ॥ " (जैन्या ८.१.३) इति ॥

दर्शपूर्णमासयोः " आग्नेयमष्टाकपालं निर्वपति " (द्र. तैसं १.८.२) इत्यत्र तद्धितोक्त्या देवतानिर्देश एकदेवतायोगित्वम् औषधद्रव्यकत्वं[१७८] निर्वाप [१७९]इत्येतान्याग्नेययागसंबन्धितया श्रूयमाणत्वादाग्नेयलिङ्गानि[१८०] । " सौर्यं चरुं निर्वपेत् " (तैसं २.३.२) इत्यत्रापि तान्युपलभ्यन्ते । न

---

१५६. ड–नैवम् । १५७. हो१–°र्नाम्नोः । १५८. अ.उ.पा–°मित्यत्र । १५९. क–°तन्नाम्नाति दिशेदिह । १६०. अ.उ.पा–मासाग्नि° । १६१. अ.उ.ड.पा.हा–°दस्मिन् । १६२. अ.उ.पा.हा–समानत्वमिति । १६३–१६३. अ.उ.पा–'यस्मिन्कर्मणि तदग्निहोत्रम्' नास्ति । १६४. ड–इत्येतदेवम् । १६५. पा–°ग्निहोत्रम् । १६६. अ.उ.पा–अनेकार्थस्य; हा–अनेकार्थत्वेऽस्य । १६७–१६७. हो१–मासाग्निहोत्रगुणानति° । १६८. आ.क.ड–प्रत्यक्षवचन° । १६९. ड.ड१–'अपि' नास्ति । १७०. ड–किं कस्माच्चाति° । १७१. अ.उ.पा–अवशेषा°; ड–न विशेषा°; ड१–सविशेषा° । १७२. अ.उ.पा–'तद्युक्तात्' नास्ति । १७३–१७३. अ.उ.पा–अविशेषचिन्ता केन; ड–अतो विशेषेण चिन्ता न । १७४. क.हो१–शास्त्रार्थस्य व्यव° । १७५. अ.उ.क.पा–°आग्नेयलिङ्गान्नियता° । १७६. ड.ड१–च शब्द° । १७७. अ.उ.पा.हा–प्रवेशक । १७८. क.ड–ओषधिद्रव्य°; अ.उ.पा–°द्रव्यकम् । १७९. अ.उ.पा–इत्येताभ्यामेव यथासंबन्धि° । १८०. अ.उ.पा–°त्वादग्नेर्लिङ्गानि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तेषामाग्नेयधर्मातिदेशं नियन्तुं सामर्थ्यमस्ति। कुतः? तेषामशब्दरूपत्वेन शब्दैकसमधिगम्येऽर्थे प्रामाण्ययोगादिति प्राप्ते ब्रूमः—लिङ्गस्मारितोपकारसहितमेव सौर्ययागं तच्छब्दो विदधाति। [१८१-तथा सति-१८१] प्रणाड्या लिङ्गस्य शब्दे प्रवेशादाग्नेयवत् सौर्योऽनुष्ठेय इत्येतादृशं चोदकवाक्यमनुमापयता लिङ्गेन [१८२-धर्मविशेषा नियम्यन्ते-१८२] ॥

इष्टिषु सौमिकधर्मनिवारणं तत्रैव चिन्तितम्—

"ऐन्द्राग्नादौ [१८३-सौमिकः स्यादैष्टिको-१८३] वा द्वयोरिह।
[१८४]संभवादैच्छिकोऽन्त्योऽत्र स्यात् कपालादिलिङ्गतः॥" (जैन्या ८.१.७)॥

"ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः" (तैसं २.२.१) इत्यादौ सौमिकैष्टिकयोर्विध्यन्तयोरन्यतर इच्छया ग्राह्यः। कुतः? उभयत्र विध्यन्तसंभवेनातिदेष्टुमर्हत्वादिति चेत्। न। कपालनिर्वापादिभिर्लिङ्गविशेषैरैष्टिकस्यैवात्रोचितत्वात्[१८५] ॥

अग्नीषोमीयपशोरिष्टिविकृतित्वं तत्रैव चिन्तितत्—

"न पशावैष्टिकः स्याद्वा न कपालाद्यभावतः।
स्यात्[१८६] व्यक्तद्रव्यदेवत्वप्रयाजस्रुच्यसाम्यतः॥" (जैन्या ८.१.८)॥

[१८७]अग्नीषोमीयपशावैष्टिकविध्यन्तो नास्ति। कुतः? पूर्ववदत्र निर्वापकपालादिलिङ्गाभावादिति चेत्। मैवम्। "आग्नेयमष्टाकपालम्" (द्र. तैसं १.८.२) इत्यत्रोत्पत्तिवाक्ये यथा द्रव्यदेवते व्यक्ते तथा "अग्नीषोमीयं पशुम्" (ऐब्रा २.३) इत्यत्रापि। न तु "सोमेन यजेत" [१८८]इत्यत्रेव देवताया अव्यक्तत्वम्। [१८९]तदेतत् व्यक्तद्रव्यदेवतात्वमेकं[१९०] लिङ्गम्। "एकादश प्रयाजान् यजति" (तैसं ६.३.७) इति [१९१]प्रयाजबहुत्वं द्वितीयम्। "स्रुच्यमाघार्य जुह्वा पशुं समनक्ति" (द्र. आपश्रौ ७.१४.१) इत्याघाराङ्गने लिङ्गान्तरे[१९२]। आलम्भो लिङ्गान्तरम्, इष्टावपि "ईषामालभेत" (द्र. आपश्रौ १.१७.६) इति दर्शनात्। तस्मादस्ति पशावैष्टिकः॥

तस्यैव पशोः पश्वन्तरप्रकृतित्वेनावान्तरप्रकृतित्वं तत्रैव चिन्तितम्—

"सवनीयादिके दार्शे दैक्षे वा प्रकृतित्वतः।
आद्योऽन्त्यो लिङ्गतोऽन्यत्र विकृतिः प्रकृतिर्भवेत्॥" (जैन्या ८.१.९)॥

१८१-१८१. ड.हो१-'तथा सति' नास्ति।
१८२-१८२. अ.उ.पा-°विशेषो नियम्यते।
१८३-१८३. ड-सौमिकं स्यादैष्टिकम्।
१८४. आ.क.हा-संभवादैष्टिको°।
१८५. अ.उ.पा-स्यैवात्रोक्तत्वात्।
१८६. अ.उ.पा.हा-° देवत्वात् प्रयाज°।
१८७. अ.उ.क.पा.हा-अग्नीषोमीये पशा°।
१८८. अ.उ.पा-इतिवत्; ड.ड१-हा-इत्यत्रैव।
१८९. अ.उ.पा-तदेव।
१९०. आ.क.ड.ड१-° देवत्व°।
१९१. हो१-अप्रयाजवत्वम्।
१९२. अ.उ.क.पा.हा-लिङ्गान्तरम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

[१९३]सवनीयानुबन्ध्यनिरूढादिपशुषु [१९४]दर्शपूर्णमाससंबन्धिविध्यन्तः कार्यः। [१९५]कुतः? दर्शस्य प्रकृतित्वात्। दैक्षोऽग्नीषोमीयपशुविध्यन्तः दीक्षितेनानुष्ठेयेषु [१९६]पशुविध्यन्तेषु प्रथमभावित्वात्। तस्य [१९७]चाग्नीषोमीयेष्टिविकृतित्वाच्च प्रकृतित्वमस्ति। अतो न तस्य विध्यन्तोऽतिदेशार्हः[१९८] इति प्राप्ते ब्रूमः— आलम्भोऽग्नीषोमीयपशौ[१९९] लिङ्गम्। [२००]तच्च सवनीयादिष्वप्यस्ति[२०१]। तथा प्रातःसवनीयादिषु[२०२] वपाप्रचारोऽपरं लिङ्गम्। इष्टिं प्रति विकृतेरप्यन्यत्र सवनीयादौ प्रकृतित्वं न विरुध्यते। तस्मादग्नीषोमीयपशोः ५ विध्यन्तं सवनीयादिपशुष्वतिदिशेत्। [२०३]तदेवम् एतैर्विचारैर्वायव्यादिपशुष्वग्नीषोमीयविध्यन्तातिदेश इति सुस्थितम्[२०४] ॥

"वायव्यश्वेतमा लभेत" (तैसं २.१.१) इत्यत्र यागविधित्वं द्वितीयाध्यायस्य तृतीयपादे चिन्तितम्—

"वायव्यः श्वेत आलभ्यो भूत्यै सौर्यं चरुं तथा। १०
निर्वपेत् ब्रह्मतेजोऽर्थम् ईषामुष्टिनिरुप्तयोः ॥
[२०५]-गुणौ श्वेतचरू-[२०५] किं वा [२०६]यावत्कथितकर्मणी।
[२०७]-फलार्थमथ वा यागौ-[२०७] विशिष्टौ विहिताविह ॥
श्वैत्यं वायुस्पृगीशायामाग्नेये च रविप्रभे।
[२०८]चरुर्गुणः चरुः स्थाली निर्वापस्तु तदाश्रितः ॥ १५
फलहानेर्न तत्किं तु यावच्चोदितकर्म तत्।
द्रव्यादिरूपसंपत्तेरवार्या यागताऽर्थिकी ॥" (जैन्या २.३.१२-१५) ॥

अनारभ्येदमाम्नायते—"वायव्यश्वेतमा लभेत भूतिकामः" (तैसं २.१.१) इति। "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" (तैसं २.३.२) इति च। तथा च दर्शपूर्णमासयोरिदमाम्नातम्[२०९]—"ईषामालभेत" (द्र. आपश्रौ १.१७.६) इति, "चतुरो [२१०]मुष्टीन्निर्वपति" (द्र. आपश्रौ १.१८.२) इति च। ईषा २० शकटगतो लाङ्गलदण्डवद्दीर्घः काष्ठविशेषस्तस्या आलम्भः स्पर्शः। तमेतं दर्शपूर्णमासगतमीषालम्भमनूद्य[२११] तस्यामालभ्यायामीषायां श्वेतगुणो विधीयते। [२१२]तस्य च श्वेतकाष्ठस्य वायुना स्पृश्यमानत्वात् वायव्यत्वं[२१३] संभवति। तथा चतुर्मुष्टिनिर्वापमनूद्य [२१४]चरुर्गुणत्वेन विधीयते। चरुः स्थाली। सा च निर्वापस्याऽऽश्रयः। निरुप्तस्य हविष आग्नेयतया सूर्यवत् प्रभासंबन्धात् सौर्यत्वम्। भूतिब्रह्मवर्चसफले [२१५]सार्वकालिकयोर्दर्श-पूर्णमासयोः पूर्वसिद्धे एवानूद्येते। तस्मात् गुणविधिरित्येकः पूर्वपक्षः। न हि फलप्रदयोर्नित्यवच्छ्रुतयोः २५

---

१९३. अ.उ.पा–तत्राद्यो निरूढपशुबन्धादिषु; हा-°ढादिपशुबन्धादिषु। १९४. ड१–°मासादिसंब°। १९५. अ.उ.पा–'कुतः' नास्ति। १९६. अ.उ.पा–विध्यन्तेषु। १९७. अ.उ.ड.पा.हो१–°षोमीयस्य विकृ°; ड१–°षोमीयस्येष्टी°। १९८. आ–°अतिदेशार्थः। १९९. अ.ड.पा.हो१–°पशोः। २००. क.हा–'तच्च' नास्ति। २०१. ड–°दिष्वस्ति। २०२. क.ड.हा.हो१–°सवनादिषु। २०३. क.ड.ड१.हो१–तथैव। २०४. आ.क.–संस्थितम्। २०५–२०५. अ.उ.पा–गुणैः श्वेतचरुः। २०६. अ.उ.पा–या चतुर्थी ३० न कर्मणा। २०७–२०७. हो१–फलार्थे अथवा योगो (?); ड१–फलार्थे ह्यथवा यागः। २०८. अ.उ.पा–चतुर्गुणः चतुःस्थाली; ड१–चतुर्गुणाः चरुस्थाली। २०९. ड–°योरेवमाम्नातम्। २१०. ड१–मुष्टीर्नि°। २११. ड१–°लम्भनमनूद्य। २१२. अ.उ.पा.हा–कस्यचित्। २१३. ड–वायव्यता। २१४. आ.ड१–चतुर्गुणत्वेन। २१५. ड.हो१–°कालीनयोर्दर्श°; अ.उ.पा–°कालिकविशिष्टकर्मान्तरयोः; हा–सार्वकाग्निकफलविशिष्टकर्मान्तरयोः। ३५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संभवत्प्रयोजनयोश्च [२१६]पाक्षिकानुवादत्वमानर्थक्यं वा युक्तम्। तस्माद्गुणफलविशिष्टकर्मान्तरे विधीयेते। [२१७]तदाऽपि यागस्याश्रवणादालम्भनिर्वापयोरेव श्रवणाद्यावदुक्तकर्मविधिरिति द्वितीयः पूर्वपक्षः[२१८]। श्वेत-पशुचरुद्रव्ययोर्वायुसूर्यदेवतयोश्च स्पष्टं प्रतीयमानतया रूपवतोर्यागयोरार्थिक्योर्वारयितुमशक्यत्वात् [२१९]द्रव्यदेवताविशिष्टयोर्यागयोर्विधिरभ्युपगन्तव्यः। भूतिकामो वायव्येन श्वेतेन[२२०] पशुना यजेत, ब्रह्मवर्चस-
५ कामः सौर्येण चरुणा यजेत, इत्येवंविधोऽर्थसिद्धो विधिः। द्रव्यदेवतासंबन्धकल्पितस्य यागस्य [२२१]-लिङ्गप्रत्ययेन कर्तव्यताविधौ-[२२१] आलम्भनिर्वापयोर्धात्वर्थयोः का गतिरिति चेदनुवाद इति ब्रूमः। तत्प्राप्तिस्त्वार्थिकी, निर्वापालम्भावन्तरेण तत्तद्यागासिद्धेः। तस्माद्यागविधिरिति राद्धान्तः॥

दशमाध्यायस्य द्वितीयपादे चिन्तितम्—

" वायव्यं श्वेतमित्यत्र यः कोऽपि च्छाग एव वा।
१० विशेषानुक्तितः कोऽपि च्छाग एवास्त्वबाधनात् " (जैन्या १०.२.३६)॥

" वायव्यꣳ श्वेतमा लभेत भूतिकामः " (तैसं २.१.१) इत्यत्र श्वेतशब्दस्य धेन्वादिशब्दवज्जाति-विशेषगतगुणवाचित्वाभावात् यं कंचिदपि पशुं श्वेतगुणकं[२२२] समर्पयतीति पूर्वः पक्षः। चोदकप्राप्तस्याजस्य बाधकारणाभावात्तमेव समर्पयतीति राद्धान्तः[२२३]॥

तत्रैव सप्तमपादे चिन्तितम्—

१५ औदुम्बरः खादिरेण[२२४] समुच्चेयोऽथ[२२५] बाधकः।
द्वयोर्नियोजनादाद्यो निरपेक्षत्वतोऽन्तिमः "॥ (जैन्या १०.७.३१) इति॥

पशुकामेनानुष्ठेये सोमापौष्णे पशौ श्रूयते—" औदुम्बरो यूपो भवति " (तैसं २.१.१) इति। तत्र चोदकप्राप्तेन खादिरेण सह श्रूयमाणस्यौदुम्बरस्य समुच्चयः कार्यः। [२२६]कुतः? द्वयोर्यूपयोः पशुनियो-जनसंभवेन चोदकपरित्यागायोगादिति प्राप्ते ब्रूमः—खादिरौदुम्बरौ परस्परनिरपेक्षतया[२२७] पशुनियोजनक्षमौ
२० प्रमाणद्वयेन [२२८]-प्राप्तौ। तयोः-[२२८] समुच्चयाङ्गीकारे नैरपेक्ष्यं[२२९] परित्यज्येत। तस्मादुपदिष्ट औदुम्बरोऽति-दिष्टस्य[२३०] खादिरस्य बाधक इति॥

इति [२३१]श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे [२३२]कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः॥ १॥

---

२१६. अ.उ.पा–पाक्षिकवाद°। २१७. ड१–तथाऽपि। २१८. ड.ड१–पूर्वः पक्षः।
२५ २१९. अ.उ.पा.हा–°देवतयोर्विशिष्ट°। २२०. अ.उ.पा–श्वेत°। २२१–२२१. क.ड–°विधानात्; अ.उ.पा–विधौ। २२२. अ.उ.पा–श्वेतगुणम्। २२३. ड.ड१–सिद्धान्तः। २२४. अ.उ.पा–खादिरेण वा। २२५. ड–समुच्चयो न। २२६. अ.उ.पा–'कुतः' नास्ति। २२७. अ.उ.पा–परपरापेक्षतया। २२८–२२८.अ.उ.पा–प्राप्तयोः। २२९. ड.ड१–निरपेक्षत्वम्। २३०. अ.उ.पा–उदुम्बरो°; हा–°तिदिष्ट°। २३१. अ.उ.क.पा.हा–'श्रीम...चिते' नास्ति। २३२. अ.उ.पा.हा–यजुःसंहितायाम्; क–
३० कृष्णयजुःसंहिताभाष्ये।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टाः पराचीरायन् ता वरुणमगच्छन् ता अन्वैत् ताः पुनरयाचत ता अस्मै न पुनरददात् सोऽब्रवीद्वरं वृणीष्वार्थ मे पुनर्देहीति तासां वरमाऽलभत स कृष्ण एकशितिपादभवद्-

प्रजापतिरिति प्रजा-पतिः। प्रजा इति प्र-जाः। असृजत। ताः। अस्मात्। सृष्टाः। पराचीः। आयन्। ताः। वरुणम्। अगच्छन्। ताः। अन्विति। ऐत्। ताः। पुनः। अयाचत। ताः। अस्मै। न। पुनः। अददात्। सः। अब्रवीत्। वरम्। वृणीष्व। अर्थ। मे। पुनः। देहि। इति। तासाम्। वरम्। एति। अलभत। सः। कृष्णः। एकशितिपादिल्येक-शितिपात्। अभवत्।

प्रजापतिरित्यादि ॥ प्रजापतिना [V]सृष्टाः प्रजाः [V]पराचीः पराच्यः अपरक्तचित्ताः सत्यः [1]अस्मात् प्रजापतेः [V]आयन् अगच्छन्। [V]ताः [V]वरुणम् [V]अगच्छन् अभजन्त। अथ प्रजापतिः [V]ताः प्रजाः पराचीर्यातीः [V]अनु [V]ऐत् अन्वगच्छत्। [V]ताः च वरुणम् [V]अयाचत। वरुणश्च [V]ताः पुनः पुनर्याचितोऽपि [V]न [V]अददात् न दत्तवान्। अथ [V]अब्रवीत् प्रजापतिः। [2V]वरम् अभिमतं मत्तो [V]वृणीष्व। [V]अथ अनन्तरमिमाः प्रजाः वरलाभतुष्टः [V]मे [V]देहि [V]इति। [3V]अथ एवमुक्त्वा [V]तासां प्रजानां मध्ये [V]वरं वरिष्ठं पशुं वरुणाय [V]आ [V]अलभत स्वयमेव वरदानमालम्भनेनाकरोत्। [V]सः च [V]ततः [4]प्रभृति [V]कृष्ण [V]एकशितिपात् [V]अभवत्। एकः शितिः [5]श्वेतः पादो यस्येति त्रिपदो बहुव्रीहिः। यद्वा—शितिः पादो यस्येति शितिपात्। "पादस्य लोपः०" (पा ५.४.१३८) इति समासान्तः। एकेन पादेन शितिपात्। तृतीयापूर्वपदप्रकृतिस्वरत्वम् (पा ६.२.२)॥

भूतिकामो ग्रामकामः प्रजार्थी दीर्घरोगवान्।
प्रजापश्वर्थिनौ चैषां [1]श्वेताद्याः पशवः श्रुताः[2]॥

तानेतान् पशून् प्रथमानुवाके विधाय द्वितीये वरुणगृहीतादीनां पशव उच्यन्ते।

प्रजापतिरिति ॥ तत्र वरुणगृहीतस्य पशुं विधातुं प्रस्तौति—'प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टाः पराचीरायन् ता वरुणमगच्छन् ता अन्वैत् ताः पुनरयाचत ता अस्मै न पुनरददात् सोऽब्रवीद्वरं वृणीष्वाथ मे पुनर्देहीति तासां वरमाऽलभत स कृष्ण एकशितिपादभवत्' इति। प्रजापतिना [V]सृष्टाः प्रजाः [V]पराचीः [3]पराङ्मुख्यः अपरक्ताः[4] सत्योऽस्मात् प्रजापतेः [V]आयन् अगच्छन्। गत्वा च [V]वरुणं प्राप्ताः। स च

१. अ—'अस्मात्' नास्ति। २. तं२—परम्। ३. लं—तथा। ४. तं१.मै—प्रमापितः; लं 'प्रभृति' नास्ति। ५. तं२—'श्वेतः' नास्ति।

१. इ—'श्वेताद्याः' नास्ति। २. अ.उ.जो.ना.पा.हा—स्मृताः; इ—समुदीरिताः। ३. ड१.हो१—अवाङ्मुखाः। ४. ना—अनुपरक्ताः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यो वरुणगृहीतः स्यात् स एतं वारुणं कृष्णमेकशितिपादमा लभेत वरुण(१)मेव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुञ्चति कृष्ण एकशितिपाद्भवति वारुणो ह्येष देवतया समृद्ध्यै

यः । वरुणगृहीत इति वरुण-गृहीतः । स्यात् । सः । एतम् । वारुणम् । कृष्णम् । एकशितिपाद-मित्येक-शितिपादम् । एति । लभेत । वरुणम् (१) । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । एनम् । वरुणपाशादिति वरुण-पाशात् । मुञ्चति । कृष्णः । एक-शितिपादित्येक-शितिपात् । भवति । वारुणः । हि । एषः । देवतया । समृद्ध्या इति सम्-ऋद्ध्यै ।

[6]वरुणगृहीत इति ॥ वरुणो महोदर इति व्याधिरित्येके । अज्ञातरोग इत्यन्ये । " तृतीया-कर्मणि " (पा ६·२·४८) इति पूर्वपदप्रकृतिस्वरत्वम् । गतमन्यत् ॥

१० प्रजापतिः [v]ताः प्रजा अनुगम्य [v]मे[5] मदीयाः प्रजाः [6-v]पुनः अपि मह्यमेव[-6] देहीति वरुणम् [v]अयाचत । वरुणस्तु [v]न ददौ[7] । ततः [v]सः प्रजापतिर्वरुणमिदम्[8] [v]अब्रवीत्, एतासां प्रजानां [9]मध्ये [v]वरं श्रेष्ठं गृहीत्वाऽवशिष्टास्ता मह्यं [v]देहि [v]इति । स च वरुणः [v]तासां प्रजानां मध्ये [10]परीक्ष्य [v]वरं श्रेष्ठं[-10] कंचित् पशुं मदीयोऽयमिति हस्तेनास्पृशत्[11] । [v]सः च [12]परीक्ष्यमाणः कृष्णवर्णः सन्नेकेन [13]श्वेतेन पादेन युक्तोऽभूत् ॥

य इति ॥ [14]विधत्ते– ' यो वरुणगृहीतः स्यात् स एतं वारुणं कृष्णमेकशितिपादमा लभेत १५ वरुणमेव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुञ्चति ' इति । [v]वरुणगृहीतः जलजन्येन महोदरव्याधिना गृहीतः ॥

कृष्ण इति ॥ पशुविशेषणं प्रशंसति – ' कृष्ण एकशितिपाद्भवति वारुणो ह्येष देवतया समृद्ध्यै ' इति ॥ ईदृशं पशुं वरुणः [15]प्रीत्या वृतवानिति[-15] तस्य वरुणदेवताकत्वम्[16] । स च यजमानस्य आरोग्यसमृद्ध्यै संपद्यते ॥

२० ६–६. मै–°गृहीतः स्यात् ।

५. अ.उ.क.जो.ड१.ना.पा.हा.हो१–'मे' नास्ति । ६–६. ड.ड१.हो१–मह्यमेव पुनः । ७. ड.ड१.हो१–अददात् । ८. ड–°मिमम्; इ.उ–'इदम्' नास्ति । ९. अ.उ.पा–'मध्ये' नास्ति । १०–१०. अ.उ.पा–परीक्ष्य; आ–वरं श्रेष्ठम्; ड१.हो–श्रेष्ठं; ड२–परिरक्ष्य वरं श्रेष्ठम् । ११. अ.उ.पा–°नाशंसत् । १२. ड१–परिरक्ष्यमाणः । १३. इ–शितिना । १४. हो१–'विधत्ते' इत्यस्यानन्तरं– २५ 'यो गोश्वेतमित्यत्र यः कोऽपि भाग एव वा विशेषानुक्तितः कोऽपि भाग एव अस्त्वबाधनात् । वायव्यं श्वेतमालभेत भूतिकाम इत्यत्र श्वेतशब्दस्य धेन्वादि धवलश्च अतिविशेषगतगुणवाचित्वाभावात् यं कंचिदपि पशुम्' इति । १५–१५. अ.उ.क.जो.ना.पा.हा.हो१–प्रत्याहृतवानिति । १६. अ.उ.–°देवतात्वम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

सुवर्भानुरासुरः सूर्यं तमसाऽविध्यत् तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्य यत् प्रथमं तमोऽपाघ्नन्त्सा कृष्णाऽविरभवद्यद्द्वितीयꣳ सा फल्गुनी यत् तृतीयꣳ सा बलक्षी यदध्यस्थादपाकृन्तन्त्साऽविर्वशा (२) समभवत्

सुवर्भानुरिति सुवः — भानुः । आसुरः । सूर्यम् । तमसा । अविध्यत् । तस्मै । देवाः । प्रायश्चित्तिम् । ऐच्छन् । तस्य । यत् । प्रथमम् । तमः । अपाघ्नन्नित्यप अघ्नन् । सा । कृष्णा । अविः । अभवत् । यत् । द्वितीयम् । सा । फल्गुनी । यत् । तृतीयम् । सा । बलक्षी । यत् । अध्यस्थादित्यधि-अस्थात् । अपाकृन्तन्नित्यप-अकृन्तन् । सा । अविः । वशा (२) । समिति । अभवत् ।

सुवर्भानुरिति ॥ [V]सुवर्भानुः नाम [V]आसुरः [V]असुरस्यापत्यम् । [७]शिवादित्वादण् (पा ४·१·११२) । [V]तमसा [V]अविध्यत् अबाधत । प्रायश्चित्तिः दोषनिर्घातार्थो यत्नः । अथ [V८]तस्य [V]प्रथमं [V]यत् [V]तमः [V]अप [V]अघ्नन् [V]सा कृष्णवर्णा [V]अविः अजायत । [V]द्वितीयं [V]यत् अपाघ्नन् [V]सा [V]फल्गुनी [९]नीलवर्णा । [V]यत् [V]तृतीयम् अपाघ्नन् [V]सा [V]बलक्षी शुक्लवर्णा । "अन्यतो ङीष्" (पा ४·१·४०) । [१०]बबयोरेकत्वमिच्छन्ति । अथ [V]अध्यस्थात् अस्थिभ्यो यत् तमोऽपाघ्नन्[११] अपाच्छिदन् [V]सा [V]वशा वन्ध्या [V]अविः अजायत । अध्यस्थादिति विभक्त्यर्थेऽव्ययीभावः (पा २·१·६) । "छन्दस्यपि

**सुवर्भानुरिति ॥ पशुप्रतिपादिकामाख्यायिकां[१७] वशां[१८] विधातुं प्रस्तौति — 'सुवर्भानुरासुरः सूर्यं तमसाऽविध्यत् तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्य यत् प्रथमं तमोऽपाघ्नन्त्सा कृष्णाऽविरभवद्यद्द्वितीयꣳ सा फल्गुनी यत्तृतीयꣳ सा बलक्षी यदध्यस्थादपाकृन्तन्त्साऽविर्वशा समभवत् ते देवा अब्रुवन् देवपशुर्वा अयꣳ समभूत् कस्मा इमामा लप्स्यामह इत्यथ वै तर्ह्यलपा पृथिव्यासीदजाता ओषधयस्तामविं वशामादित्येभ्यः कामायाऽलभन्त ततो वा अप्रथत पृथिव्यजायन्तौषधयः' इति ॥ [V]सुवर्भानुः इत्यासुरस्य कस्यचिन्नामधेयं, [११]स्वर्गलोकगतां प्रभां नुदतीति सुवर्भानुः । स च पृथिव्या रूपं धृत्वा [२०]कृष्णवर्णः । [२१]तमःपुञ्जरूपत्वं "[२२-]अत्वा सूर्यं[-२२] स्वर्भानुस्तमसाऽविध्यदासुरः[२३]" (ऋसं ५·४०·५) [२४-]इत्येतस्यामृचि स्पष्टमाम्नातम्[-२४]। पृथिव्याश्च कृष्णरूपत्वं लोके बहुलं दृश्यते । छन्दोगाश्च "यत्कृष्णं तदन्नस्य" (छांउ ६·४·१) इत्यन्नकारणभूतायाः पृथिव्याः[२५] कृष्णरूपत्वमामनन्ति । अतः तमःपुञ्जरूपः[२६] स [V]आसुरः स्वकीयेन [V]तमसा [V]सूर्यम् आच्छाद्य जगदान्ध्यं कृतवान् । [V]तस्मै तस्य सूर्यप्रभाच्छादकस्य[२७] तमसः [V]प्रायश्चित्तिं परिहारं विचार्य नानाविधैः प्रकाशरूपैर्मण्यादिद्रव्यैस्तमः [V]अपाघ्नन् चतुर्भिः पर्यायैरपसारितवन्तः । प्रथमपर्याये अपसृतं[२८] तमः कृष्णवर्णा काचिद् [V]अविः अभूत् । द्वितीयपर्याये [V]फल्गुनी

७. मै४.लं–शिवाद्यणन्तः । ८. मै–'तस्य' नास्ति । ९. मै४–लवणवर्णा । १०. मै.मै४–बबयो° । ११. मै४–°पाकृन्तन् ।

१७. ड.ड१.हो१–पशुप्रजादिकामिनः; इ–पशुप्रथनादिकामिनः । १८. ड.हो१–पशुम् । १९. हो१–स्वर्लोक° । २०. इ–कृष्णरूपः । २१. ड१–तमःस्वरूपत्वम्; क–तमःपुरुषरूपत्वम् २२–२२. अ.इ.उ.ना.पा–इयं वै सूर्यं; ड१–इयं वै सूर्यः; हा–इयं सूर्यं । २३. ड१–°ध्यद् तथाऽसुरः । २४–२४. अ.उ.ना.पा.हा–इत्येतस्यामविस्पष्टमम्नातम् । २५. अ.उ.पा–'पृथिव्याः' नास्ति । २६. ड.ड१–तमःस्वरूपः । २७. ड१–°प्रच्छादकस्य । २८. ड१.हो१–प्रसृतम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते देवा अब्रुवन् देवपशुर्वा अयꣳ समभूत् कस्मा इमा लप्स्यामह इत्यथ वै तर्ह्यल्पा पृथिव्यासीदजाता ओषधयस्तामविं वशामादित्येभ्यः कामायाऽलभन्त ततो वा अप्रथत पृथिव्यजायन्तौषधयो यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेयेति स एतामविं वशामादित्येभ्यः कामाया(३)ऽऽ लभेताऽऽदित्यानेव कामꣳ स्वेन भागधेयेनोप धावति त एवैनं प्रथयन्ति पशुभिः प्र प्रजया

ते। देवाः। अब्रुवन्। देवपशुरिति देव-पशुः। वै। अयम्। समिति। अभूत्। कस्मै। इमम्। एति। लप्स्यामहे। इति। अथ। वै। तर्हि। अल्पा। पृथिवी। आसीत्। अजाताः। ओषधयः। ताम्। अविम्। वशाम्। आदित्येभ्यः। कामाय। एति। अलभन्त। ततः। वै। अप्रथत। पृथिवी। अजायन्त। ओषधयः। यः। कामयेत। प्रथेय। पशुभिरिति पशु-भिः। प्रेति। प्रजयेति प्र-जया। जायेय। इति। सः। एताम्। अविम्। वशाम्। आदित्येभ्यः। कामाय (३)। एति। लभेत। आदित्यान्। एव। कामम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। ते। एव। एनम्। प्रथयन्ति। पशुभिरिति पशु-भिः। प्रेति। प्रजयेति प्र-जया।

दृश्यते" (पा ७·१·७६) इत्यनङादेशः। "नपुंसकादन्यतरस्याम्" (पा ५·४·१०९) इति टच् समासान्तः। अथ [v12]ते [v]देवाः [v]अब्रुवन्। [13]-देवानां पशुः [v]देवपशुः-[13], देवास्थिसंभूतत्वात्। [14]-एवं महानुभावः [v]अयं पशुः वशात्मा तम्-[14] [v]इमम् [v]कस्मै कामाय [v]आ [v]लप्स्यामहे? [v]इति। [15v]अथ [v]तर्हि तस्मिन् काले। "अनद्यतने र्हिलन्यतरस्याम्" (पा ५·३·२१) इति। [v]पृथिवी [v]अल्पा

[29]-लोहितवर्णा काचिदविरभूत्-[29]। तृतीयपर्याये [r]बलक्षी श्वेता काचिदविरभूत्। अस्थ्नोऽध्युपरि वर्तमानः प्रकाशोऽध्यस्थः। कस्यचिन्मृतदेहस्य दीप्यमानमस्थि [30]समादाय तदीयात् प्रकाशाच्चतुर्थपर्याये तमः [r]अपाकृन्तन् अपनीतवन्तः। तच्च तमः [r]वशा वन्ध्या काचित् [r]अविः अभूत्। ततः [r]देवाः विचार्य परस्परमिदम् [r]अब्रुवन्-दैव्यादस्थ्नो जातत्वादयमुत्तमः [r]देवपशुः। तमेतं [r]कस्मै कामायोत्तमप्रयोजनायाऽऽलब्धं करिष्यामः [r]इति। [r]अथ विचारादूर्ध्वं [r]तर्हि तदानीमेव पृथिव्या अल्पत्वमोषधीनाम् [31]-अनुत्पत्तिः इति-[31] दोषद्वयमवेक्ष्य तत्परिहाररूपाय [r]कामाय समर्थेभ्यः [32r]आदित्येभ्यः [r]तां [r]वशाम् आलभ्य पृथिवीविस्तारमोषध्युत्पत्तिं च [33]संपादितवन्तः॥

य इति॥ विधत्ते—'यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेयेति स एतामविं वशामादित्येभ्यः कामायाऽऽ लभेताऽऽदित्यानेव कामꣳ स्वेन भागधेयेनोप धावति त एवैनं प्रथयन्ति पशुभिः प्र

१२. मै४–तम्। १३–१३. अ.मै४–देवमयः पशुः। १४. मै४–महानुभावं पशुं वशात्मानम्। १५. मै४–अथ वै।

२९–२९. ड१.हो१–'लोहित...रभूत' नास्ति। ३०. इ.ड.ड१.हो–समानीय। ३१–३१. आ–अनुत्पत्तिं च। ३२. ड१.हो१–'आदित्येभ्यः' नास्ति। ३३. ड.ड१.हो१–उत्पादितवन्तः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

जनयन्त्यसावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एता मल्हा आऽलभन्ताऽऽग्नेयीं कृष्णग्रीवीꣳ सꣳहितामैन्द्रीꣳ श्वेतां बार्हस्पत्यां ताभिरेवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एता मल्हा आ लभेता(४)–

जनयन्ति । असौ । आदित्यः । न । व्यरोचत । तस्मै । देवाः । प्रायश्चित्तिम् । ऐच्छन् । तस्मै । एताः । मल्हाः । एति । अलभन्त । आग्नेयीम् । कृष्णग्रीवीमिति कृष्ण-ग्रीवीम् । सꣳहितामिति सं-हिताम् । ऐन्द्रीम् । श्वेताम् । बार्हस्पत्याम् । ताभिः । एव । अस्मिन् । रुचम् । अदधुः । यः । ब्रह्मवर्चसकाम इति ब्रह्मवर्चस-कामः । स्यात् । तस्मै । एताः । मल्हाः । एति । लभेत (४) ।

संकुचिता ᵛआसीत्, ओषधयश्च ᵛअजाताः आसन् । अथ देवाः ᵛतां ᵛ¹⁶वशाम् ᵛआदित्येभ्यः ᵛकामाय च ᵛआ ᵛअलभन्त आदित्येभ्यः कामाय त्वा जुष्टमुपाकरोमीति । कस्मै कामाय ? 'प्रथतां पृथिवी, जायन्तामोषधयः' इत्येवंरूपाय कामाय । संपादित्वात्ताच्छब्द्यम्* । ततो वा इत्यादि । गतम् ॥

असावादित्य इत्यादि ॥ ᵛमल्हाः ¹⁷कण्ठावलम्बितस्तनयुग्माः । ¹⁸कृष्णग्रीवी कृष्णबिन्दु-लाञ्छितग्रीवा¹⁹ शुक्ला²⁰ । "स्वाङ्गाच्चोपसर्जनात्" (पा ४·१·५४) इति ङीष् । सतिशिष्टसमासान्तस्वरः²¹ (पा ६·१·२२३) । संहिता कृष्णश्वेतमिश्रदेहा ॥

प्रजया जनयन्ति' इति । ᵛपशुभिः ᵛप्रथेय पशुबाहुल्यलक्षणं विस्तारं प्राप्नुयां ᵛप्रजया पुत्रपौत्रादिरूपया प्रकृष्टः ᵛजायेय भवेयम् । ³⁴ᵛकामाय कामप्रापकेभ्य इत्यर्थः ॥

असाविति ॥ ब्रह्मवर्चसकामस्य पशुविधानाय प्रस्तौति—'असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एता मल्हा आऽलभन्ताऽऽग्नेयीं कृष्णग्रीवीꣳ सꣳहितामैन्द्रीꣳ श्वेतां बार्हस्पत्यां ताभिरेवास्मिन् रुचमदधुः' इति ॥ पूर्ववत्तमोवेधरहितोऽपि ᵛआदित्यः कदाचित् ³⁵प्रकाशमान्द्यात् विशेषेण न दीप्तवान् । ᵛतस्मै ³⁶आदित्यदीप्त्यर्थमेव ᵛएताः वक्ष्यमाणाः ᵛमल्हाः ³⁷-मणिलाः गललम्बित-स्तनान्विताः-³⁷ अजाः ³⁸तिस्रः ᵛआऽलभन्त । कृष्णा ग्रीवा यस्याः सा कृष्णग्रीवी ग्रीवाव्यतिरिक्तप्रदेशेषु वर्णान्तरोपेतेत्यर्थः । कृत्स्नेऽपि शरीरप्रदेशे भेदस्थितैर्लोहितशुक्लकृष्णवर्णैर्युक्ता संहिता ॥

य इति ॥ विधत्ते–'यो ब्रह्मवर्चसकामः स्यात् तस्मा एता मल्हा आ लभेताऽऽग्नेयीं कृष्णग्रीवीꣳ सꣳहितामैन्द्रीꣳ श्वेतां बार्हस्पत्यामेता एव देवताः स्वेन भागधेयेनोप धावति ता एवास्मिन् ब्रह्मवर्चसं दधति ब्रह्मवर्चस्येव भवति' इति । ³⁹श्रुताध्ययनसंपत्तिरूपं तेजः ᵛब्रह्मवर्चसम् ॥ २५

१६. अ.मै४–वशाम् अविम् । *['कामसम्पत्तिहेतुत्वात् कामशब्द आदित्येष्वित्यर्थः' इति मै-मुद्रित-पुस्तक-टिप्पणी]। १७. अ.मै४–मणिला कर्णाव° । १८. मै४–कृष्णग्रीवाः । १९. मै४–°ग्रीवाः । २०. मै४–शुक्लाः । २१. अ.मै४–°समासान्तः स्वरः ।

३४. हा–उभयकामाय । ३५. इ.हा–प्रकाशमान्द्य° । ३६. आ–तदर्थमेव; इ.ड–°दीप्त्यर्थम् । ३७–३७. आ–गललम्बितस्तनान्विताः; इ.ड.ड१.हो–मणिला गलस्तनोपेताः । ३८. आ.क–श्वेतातिस्रः । ३९. अ.जो.ना.पा.हा–वृत्ताध्य° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

-ऽऽग्नेयीं कृष्णग्रीवीꣳ सꣳहितामैन्द्रीꣳ श्वेतां बार्हस्पत्यामेता एव देवताः स्वेन भागधेये-
नोप धावति ता एवास्मिन् ब्रह्मवर्चसं दधति ब्रह्मवर्चस्येव भवति वसन्ता प्रातराग्नेयीं
कृष्णग्रीवीमा लभेत ग्रीष्मे मध्यंदिने सꣳहितामैन्द्रीꣳ शरद्यपराह्णे श्वेतां बार्हस्पत्यां
त्रीणि वा आदित्यस्य तेजाꣳसि वसन्ता प्रातर्ग्रीष्मे मध्यंदिने शरद्यपराह्णे यावन्त्येव
५ तेजाꣳसि तान्येवा (५)ऽव रुन्द्धे

आग्नेयीम्। कृष्णग्रीवीमिति कृष्ण-ग्रीवीम्। सꣳहितामिति सं-हिताम्। ऐन्द्रीम्। श्वेताम्। बार्ह-
स्पत्याम्। एताः। एव। देवताः। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। ताः।
एव। अस्मिन्। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। दधति। ब्रह्मवर्चसीति ब्रह्म-वर्चसी। एव। भवति।
वसन्ता। प्रातः। आग्नेयीम्। कृष्णग्रीवीमिति कृष्ण-ग्रीवीम्। एति। लभेत। ग्रीष्मे।
१० मध्यंदिने। सꣳहितामिति सं-हिताम्। ऐन्द्रीम्। शरदि। अपराह्ण इत्यपर-अह्णे। श्वेताम्। बार्ह-
स्पत्याम्। त्रीणि। वै। आदित्यस्य। तेजाꣳसि। वसन्ता। प्रातः। ग्रीष्मे। मध्यंदिने। शरदि।
अपराह्ण इत्यपर-अह्णे। यावन्ति। एव। तेजाꣳसि। तानि। एव (५)। अवेति। रुन्द्धे।

वसन्तेति॥ "सुपां सुलुक्" (पा ७·१·३९) [२३]इति वसन्तशब्दात् सप्तम्या आकारः। अत्र ब्रह्मचर्यादिकं आरम्भप्रभृति यावत्संवत्सरं यजमानस्य केचित् इच्छन्ति। उपाकरणं वपाहोमो
१५ वा यथा प्रातरादिष्वेव[२३] भवति। सर्वत्र मल्हा एव [२४]गतिकम्*।

वसन्ता इति॥ उक्तस्य पशुत्रयस्य प्रयोगार्थं पशुविशेषं [४०]कालर्तुविशेषं च विधत्ते– 'वसन्ता प्रातराग्नेयीं कृष्णग्रीवीमा लभेत ग्रीष्मे मध्यन्दिने सꣳहितामैन्द्रीꣳ शरद्यपराह्णे श्वेतां बार्हस्पत्यां त्रीणि वा आदित्यस्य तेजाꣳसि वसन्ता प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णे यावन्त्येव तेजाꣳसि तान्येवाव रुन्द्धे' इति॥ प्रातरादिकालेषूपाकरणं वपायागो वा यथा भवति तथा प्रारभेत। वसन्ततौ प्रातःकाले वर्षास्विव [४१]मेघा-
२० वरणाभावात् हेमन्तशिशिरयोरिव नीहारावरणाभावाच्च [४२-]आदित्यस्य तेजः-[४२] स्पष्टं प्रकाशते। ग्रीष्मतौ मध्याह्ने प्रकाशाधिक्यमतिस्पष्टम्। शरदतौ [r]अपराह्णे सूर्यतेजः सेव्यं भवति। [४३]प्रातर्मध्याह्नयोः बालातपस्य तीव्रातपस्य च ज(ज्व)रादिहेतुत्वादसेव्यत्वम्। तान्येतानि यथोक्तानि [r]आदित्यस्य [r]त्रीणि [r]तेजांसि प्रशस्तानि। [४४]अतः [४५]तत्कालानुष्ठानेन प्रशस्ततेजःसंपत्तिर्भवति॥

२२. मै–'इति' नास्ति। २३. तं१.तं२.मै–'एव' नास्ति। २४. लं–गतिक्रम (?)।
२५ *[पाठोऽत्र त्रुटित आभाति। 'त्रीणि वा इति। गतम्' इति मै-मुद्रितपुस्तके संभावितः पाठः]।

४०. अ.आ.क–कालविशेषं; हा–कालः ऋतुविशेषम्। ४१. आ.क–तीव्रमेघा°। ४२–४२.क–आदित्यः। ४३. आ.क– °मध्यंदिनयोः। ४४. ड.ड१.हो१–तस्मात्। ४५. 'अ.पा–°कालानुमानेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संवत्सरं पर्यालभ्यन्ते संवत्सरो वै ब्रह्मवर्चसस्य प्रदाता संवत्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति गर्भिणयो भवन्तीन्द्रियं वै गर्भ इन्द्रियमेवास्मिन् दधति सारस्वतीं मेषीमा लभेत य ईश्वरो वाचो वदितोः सन् वाचं न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन् (६) वाचं दधाति

संवत्सरमिति सं-वत्सरम्। पर्यालभ्यन्त इति परि-आलभ्यन्ते। संवत्सर इति सं-वत्सरः। वै। ब्रह्मवर्चसस्येति ब्रह्म-वर्चसस्य। प्रदातेति प्र-दाता। संवत्सर इति सं-वत्सरः। एव। अस्मै। ब्रह्मवर्चसामिति ब्रह्म-वर्चसम्। प्रेति। यच्छति। ब्रह्मवर्चसीति ब्रह्म-वर्चसी। एव। भवति। गर्भिणयः। भवन्ति। इन्द्रियम्। वै। गर्भः। इन्द्रियम्। एव। अस्मिन्। दधति। सारस्वतीम्। मेषीम्। एति। लभेत। यः। ईश्वरः। वाचः। वदितोः। सन्। वाचम्। न। वदेत्। वाक्। वै। सरस्वती। सरस्वतीम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सा। एव। अस्मिन् (६)। वाचम्। दधाति।

पर्यालभ्यन्त इति। परितः सर्वत्र संवत्सरे। यद्वा–संवत्सरसमाप्तेः प्राक्। गर्भिणयः [२५]इति। वर्णव्यत्ययेन [२६]जसि ह्रस्वत्वम्॥

मेषीमिति॥ "जातेरस्त्रीविषयात्" (पा·४·१·६३) इति ङीष्। य ईश्वर इत्यादि। [V]वाचः [V]वदितोः [२७]तां वाचं वदितुमीश्वरः संपन्नसामग्रीकोऽपि वाचं न [२८]विन्देत् [२९]वाग्मित्वम् न [३०]लभेत। "ईश्वरे तोसुन्कसुनौ" (पा ३·४·१३) इति तोसुन्। [V]प्रवदिता प्रवक्ता। यद्वा–

संवत्सरमिति॥ व्रतोपक्रममारभ्य संवत्सरपर्यन्तं ब्रह्मचर्यादिनियमं विधत्ते—'संवत्सरं पर्यालभ्यन्ते संवत्सरो वै ब्रह्मवर्चसस्य प्रदाता संवत्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति' इति॥ एकस्मिन् संवत्सरे निरन्तरं नियमं परिगृह्य तादृशेन पुरुषेण एताः[४६] स्वस्वकाल आलभ्यन्ते। उपनीतस्य माणवकस्य संध्यावन्दनाद्याचारशिक्षा संवत्सरेण सम्यक् संपद्यत इति संवत्सरस्य ब्रह्मवर्चसप्रदातृत्वम्॥

गर्भिणय इति॥ उक्तपशुषु कंचिद्गुणं विधत्ते—'गर्भिणयो भवन्तीन्द्रियं वै गर्भ इन्द्रियमेवास्मिन् दधति' इति। [V]गर्भिणयः तिस्रोऽपि गर्भयुक्ताः॥

सारस्वतीमिति॥ [४७]-विद्वत्सभादौ वाग्मित्वकामिनः-[४७] पश्चन्तरं[४८] विधत्ते–'सारस्वतीं मेषीमा लभेत य ईश्वरो वाचो वदितोः सन् वाचं न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन् वाचं दधाति प्रवदिता वाचो भवति' इति। वेदशास्त्राद्यभ्यासपाटवेन [V]वाचः वदितुं समर्थोऽपि सभाकम्पादिना [V]यः [V]न [V]वदेत् तस्यायं पशुः॥

२५. मै–'इति' नास्ति। २६. अ–'जसि' नास्ति। २७. अ.लं–'ताम्' नास्ति। २८. मै–वदेत्; लं– लभेत। २९. तं१.तं२–मै–वादित्वम्। ३०. पं२–लभते।

४६. आ–ताः। ४७–४७. आ–विद्वत्सभाजयार्थित्व°। ४८. अ.आ.उ.क.ड१.हो–पशुं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रवदिता वाचो भवत्यपन्नदती भवति तस्मान्मनुष्याः सर्वां वाचं वदन्त्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं ज्योगामयाव्यग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो यस्य ज्योगामयत्यग्नेरेवास्य शरीरं निष्क्रीणाति सोमादꣳसमुत यदीतासुर्भवति जीवत्येव

प्रवदितेति प्र-वदिता । वाचः । भवति । अपन्नदतीत्यपन्न-दती । भवति । तस्मात् । मनुष्याः । सर्वाम् । वाचम् । वदन्ति । आग्नेयम् । कृष्णग्रीवमिति कृष्ण-ग्रीवम् । एति । लभेत । सौम्यम् । बभ्रुम् । ज्योगामयावीति ज्योक्-आमयावी । अग्निम् । वै । एतस्य । शरीरम् । गच्छति । सोमम् । रसः । यस्य । ज्योक् । आमयति । अग्नेः । एव । अस्य । शरीरम् । निष्क्रीणातीति निः–क्रीणाति । सोमात् । रसम् । उत । यदि । इतासुरितीत-असुः । भवति । जीवति । एव ।

---

[३१]वाक्प्रसारणसमर्थोऽपि विरोधाद्वाचं वदितुं बिभेति स यजेत । [V]अपन्नदती [V]अविपन्नदन्ता । "छन्दसि च" (पा ५·४·१४२) इति दद्भावः । तस्मादिति । [३२V]तस्मात् दन्तविपत्तौ सर्वेषां वाचोऽप्रवृत्तेः, दन्तानां वाक्प्रवृत्तिहेतुत्वाच्च ॥

आग्नेयमित्यादि ॥ बभ्रुः [३३]कपिलश्यामः । [V]ज्योगामयावी दीर्घरोगः । यस्येति । "रुजार्थानाम्°" (पा २·३·५४) इति षष्ठी । अग्नेरेवेत्यादि । अग्निना गृहीतमस्य [V]शरीरम् [V]अग्नेः [V]निष्क्रीणाति । [३४]सोमगृहीतरसं [V]सोमात् निष्क्रीणातीत्येव । एवं च कृते [V]यदि अपि गतासुः [V]जीवति [V]एव ।

अपन्नदतीति ॥ तस्मिन् पशौ कंचिद्गुणं विधत्ते— अपन्नदती भवति तस्मान्मनुष्याः सर्वां वाचं वदन्ति ' इति । [V]अपन्नदती [४९]दन्तपातरहिता । लोकेऽपि सदन्ताः पुरुषा वर्णलोपमन्तरेण संपूर्णां [V]वाचं [V]वदन्ति ॥

आग्नेयमिति ॥ तीव्ररोगग्रस्तस्य[५०] पशुद्वयोपेतं कर्म विधत्ते–' आग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं ज्योगामयाव्यग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो यस्य ज्योगामयत्यग्नेरेवास्य शरीरं निष्क्रीणाति सोमादꣳसमुत यदीतासुर्भवति जीवत्येव ' इति । बभ्रुः पिङ्गलः । शरीरे प्राणस्य [५१]बन्धकः सूक्ष्मो [५२]योऽन्नस्य रसः सः [V]सोमं प्राप्नोति । [५३-]भोजनरुचौ व्याधिनाऽभिभूतायां-[५३] भुक्तान्नरसः शरीरे न प्रविशति, किं तु सोमाधिष्ठितौषधिकार्य एवान्नेऽवतिष्ठते । सेयं [५४-]रसस्य सोमप्राप्तिः-[५४] । [५५]ततोऽग्निर्मांसादिकं शोषयति । [५६]सेयं शरीरस्याग्निप्राप्तिः ॥

---

३१. मै–°प्रसरण° । ३२. मै४–अस्याः । ३३. मै४–कपिलः । ३४. लं–सोमगृहीतं रस°; लं–°रसः ।

---

४९. ड१–दन्तपाटवसहिता । ५०. आ–°रोगसहितस्य । ५१. इ–वर्धकः । ५२. ड१–योऽन्न° । ५३–५३. अ.पा–भोजनं तु वातव्याधिनाऽभिभूताय । ५४–५४. अ.उ.पा–तस्य सोमाप्तिः । ५५. ड१–ततोऽग्निमान् रसादिकं । ५६. इ.जो.ना.हा–इयम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

सौम्यं बभ्रुमा लभेताऽऽग्नेयं कृष्णग्रीवं प्रजाकामः सोमो (७) वै रेतोधा अग्निः प्रजानां प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजां प्र जनयति विन्दते प्रजामाग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं यो ब्राह्मणो विद्यामनूच्य न विरोचेत यदाग्नेयो भवति तेज एवास्मिन् तेन दधाति यत् सौम्यो

सौम्यम्। बभ्रुम्। एति। लभेत। आग्नेयम्। कृष्णग्रीवमिति कृष्ण-ग्रीवम्। प्रजाकाम इति प्रजा- ५
काम:। सोमः (७)। वै। रेतोधा इति रेतः-धाः। अग्निः। प्रजानामिति प्र-जानाम्। प्रजनयितेति प्र-जनयिता। सोमः। एव। अस्मै। रेतः। दधाति। अग्निः। प्रजामिति प्र-जाम्। प्रेति। जनयति। विन्दते। प्रजामिति प्र-जाम्। आग्नेयम्। कृष्णग्रीवमिति कृष्ण-ग्रीवम्। एति। लभेत। सौम्यम्। बभ्रुम्। यः। ब्राह्मणः। विद्याम्। अनूच्येत्यनु-उच्य। न। विरोचेतेति वि-रोचेत।
यत्। आग्नेयः। भवति। तेजः। एव। अस्मिन्। तेन। दधाति। यत्। सौम्यः। १०

सौम्यमित्यादि। गतम्॥ विद्यामनूच्येति॥ विद्यामर्जयित्वाऽपि तदनुरूपं न [३५]विरोचते। यद्वा–अनुवचनम् [३६]अध्ययनं, तत्कृत्वाऽपि यो न विरोचेत विद्याऽनुरूपां कीर्तिं [३७]न लभते[३७]। ब्रह्मवर्चसं तेनेति। अस्मिन् दधातीत्येव[३८]। आग्नेयत्वात् तमोपघातहेतुभूतः[३९]। श्वेत इति। [४०]ग्रीवाकाण्यं मुक्त्वा[४०]। ब्रह्मवर्चसं [v]ब्राह्मण्यम्। त्विषिर्दीप्तिः॥

सौम्यमिति॥ प्रजाकामस्य द्विपशुकं कर्म विधत्ते–'सौम्यं बभ्रुमा लभेताऽऽग्नेयं कृष्णग्रीवं प्रजा- १५
कामः सोमो वै रेतोधा अग्निः प्रजानां प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजां प्र जनयति विन्दते प्रजाम्' इति॥

आग्नेयमिति॥ विदुषो [५७]जनानुरागाय द्विपशुकं कर्म विधत्ते–'आग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं यो ब्राह्मणो विद्यामनूच्य न विरोचेत यदाग्नेयो भवति तेज एवास्मिन् तेन दधाति यत् सौम्यो ब्रह्मवर्चसं तेन कृष्णग्रीव आग्नेयो भवति तम एवास्मादप हन्ति श्वेतो भवति रुचमेवास्मिन् दधाति बभ्रुः २०
सौम्यो भवति ब्रह्मवर्चसमेवास्मिन् त्विषिं दधाति' इति॥ पूर्वं सभायां मूकीभूतस्य कर्मोक्तम्। इदानीं प्रवदतोऽपि पारुष्यवचनेनाप्रस्तुतप्रसङ्गेन वा [५८]सभास्थितेभ्यो रुच्यभावे सति रुचिं कामयमानस्येदं कर्मेति विशेषः। [v]तेन आग्नेयत्वेन [v]तेजः प्रतिवादिभिरप्रधृष्यत्वम्[५९] [v]अस्मिन् यजमाने स्थापयति। [v]तेन [६०]सौम्यत्वेन [v]ब्रह्मवर्चसं [६१]प्रसङ्गोचितवेदशास्त्रवचनस्फूर्तिरूपमस्मिन् [v]दधाति। [६२]कृष्णग्रीवत्वगुणकस्य आग्नेयत्वेन बुद्धिमान्द्यरूपं [v]तमः [v]अस्मात् [v]अप [v]हन्ति। [६३]ग्रीवाव्यतिरिक्तप्रदेशे श्वैत्येन [v]रुचम् [v]एव २५

३५. मै४–विरोचेत। ३६. मै४–प्रवचनं; मै.लं–'अध्ययनं' नास्ति। ३७–३७. तं२.मै.लं–आरभेत। ३८. लं–°त्येवम्। ३९. पं२.लं–°हेतुः; मै४–तेजोपघातहेतुः। ४०–४०. मै–°ण्यमुक्त्वा; लं–ग्रीवाकाण्यं इति मुक्त्वा।

५७. हा–अनुरागाय। ५८. उ–सभास्तेभ्यः। ५९. इ–°रप्रतिधृष्यत्वम्। ६०. अ.उ.पा–सौम्येन। ६१. अ–प्रसङ्गेन चोदित°; उ.पा–प्रसङ्गेन वोदितवेद°। ६२. आ.इ.क.जो.ड. हा.हो१–कृष्णग्रीवगुणकस्य। ६३. आ–ग्रीवातिरिक्त°। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मवर्चसं तेन कृष्णग्रीव आग्नेयो भवति तम एवास्मादप हन्ति श्वेतो भवति (८) रुचमेवास्मिन् दधाति बभ्रुः सौम्यो भवति ब्रह्मवर्चसमेवास्मिन् त्विषिं दधात्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं पुरोधायाꣳ स्पर्धमान आग्नेयो वै ब्राह्मणः सौम्यो राजन्योऽभितः सौम्यमाग्नेयौ भवतस्तेजसैव ब्रह्मणोभयतो राष्ट्रं परि गृह्णात्येकधा समावृङ्क्ते पुर एनं दधते ॥ २ ॥

[लभेत वरुणं वशैतामवि वशामादित्येभ्यः कामाय मल्हा आ लभेत तान्येव सैवास्मिन् सोमः श्वेतो भवति त्रिचत्वारिꣳशच्च ।]

ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । तेन । कृष्णग्रीव इति कृष्ण-ग्रीवः । आग्नेयः । भवति । तमः । एव । अस्मात् । अपेति । हन्ति । श्वेतः । भवति (८) । रुचम् । एव । अस्मिन् । दधाति । बभ्रुः । सौम्यः । भवति । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । एव । अस्मिन् । त्विषिम् । दधाति । आग्नेयम् । कृष्णग्रीवमिति कृष्ण-ग्रीवम् । एति । लभेत । सौम्यम् । बभ्रुम् । आग्नेयम् । कृष्णग्रीवमिति कृष्ण-ग्रीवम् । पुरोधायामिति पुरः-धायाम् । स्पर्धमानः । आग्नेयः । वै । ब्राह्मणः । सौम्यः । राजन्यः । अभितः । सौम्यम् । आग्नेयौ । भवतः । तेजसा । एव । ब्रह्मणा । उभयतः । राष्ट्रम् । परीति । गृह्णाति । एकधेत्येक-धा । समावृङ्क्त इति सम्-आवृङ्क्ते । पुरः । एनम् । दधते ॥ २ ॥

[मैसं २·५·२; कासं १२·१३, १३·१-२]

आग्नेयमित्यादि ॥ आग्नेययोर्मध्ये [४१]सौम्यम् । पुरोधायामिति[४१] । पुरोधानं प्राधान्यं पौरोहित्यम् । तत्र स्पर्धमानः 'अहमित्थं [४२]भूयासमन्यो मा भूत्[४२]' इति । अभितः सौम्यमिति । आदावन्ते च । अभितःपरितःसमया[ं]" (पाभा २·३·२ वा १) इति द्वितीया ।

[६४]सभाचित्तानुरञ्जनरूपां प्रभामेव [५]अस्मिन् [५]दधाति । बभ्रुत्वे सति सौम्यत्वेन पूर्वोक्तं ब्रह्मवर्चसं प्राप्तस्य त्विषिर्दीप्तिर्जनानुरागातिशयो भवति ॥

आग्नेयमिति ॥ पौरोहित्यस्पर्धावतस्त्विषुकं कर्म विधत्ते–'आग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं पुरोधायाꣳ स्पर्धमान आग्नेयो वै ब्राह्मणः सौम्यो राजन्योऽभितः सौम्यमाग्नेयौ भवतस्तेजसैव ब्रह्मणोभयतो राष्ट्रं परि गृह्णात्येकधा समावृङ्क्ते पुर एनं दधते' इति ॥ ब्राह्मणस्याग्निना सह मुखजन्यत्वसाम्येनाऽऽग्नेयत्वम् । 'सोम राजन्' (तैसं १·३·१३) [६५]इत्यादिषु मन्त्रेषु[६५] सोमस्य [६६]राजन्यत्वेन व्यवहारात् [५]राजन्यः [५]सौम्यः । सौम्यस्य [५]अभितः पुरस्ताच्चोपरिष्टाच्चाऽऽग्नेयानुष्ठाने सति [५]राष्ट्रम् [५]उभयतः [५]ब्रह्मणा [५]तेजसैव परि [५]गृह्णाति, वेदशास्त्रप्रयुक्तेन पौरोहित्यलक्षणेन ब्राह्मणोचितेन

४१–४१. मै४–सौम्यः । पुरोधाः । ४२–४२. मै४–भूयासं ममायं भूयात् ।

६४. आ–सभोचितानु° । ६५. अ.आ.उ.क. ना.पा.हा–इत्यादिमन्त्रेण; इ.ड.हो१– इत्यादिमन्त्रेषु । ६६. अ.आ.उ.क.ड.ड१पा.हो१–राजत्वेन ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

तेजसेत्यादि। अग्निब्राह्मणाभ्यामुभयतोऽवस्थिताभ्यां[४३] मध्यस्थं [४४-V]राष्ट्रं विषयं[-४४] [V]परि गृह्णाति सर्वतो गृह्णाति। [४५]ततश्चैकधा अद्वितीयं [V]सम् [V]आवृङ्क्ते समावर्जयति। ततश्च [V]एनम् एव [V]पुरः [V]दधते [४६]प्राधान्ये स्थापयन्ति प्रजाः॥

इति द्वितीये प्रथमे द्वितीयोऽनुवाकः॥

तेजसैव सर्वतो राष्ट्रं वशीकरोतीत्यर्थः। तदानीं प्रतिस्पर्धिनम् [V]एकधा क्षणमात्रेण [V]समावृङ्क्ते [६७-]सम्यक् वर्जयति[-६७]। ततो राजामात्यादयः [V]एनं [V]पुरः [V]दधते [६८-]पुरः अग्रे[-६८] पौरोहित्यपदे[६९] स्थापयन्ति॥ ५

अत्र मीमांसा॥ एकादशाध्यायस्य प्रथमपादे चिन्तितम्—

"कृष्णग्रीवद्वये तन्त्रं पृथग्वा, देवतैक्यतः।
तन्त्रं, सौम्यव्यवायेन कालभेदात् पृथक् भवेत्"॥ (जैन्या ११.१.१४) इति॥

काम्यपशुकाण्डे श्रूयते– "आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवꣳ पुरोधायाꣳ स्पर्धमानः" (तैसं २.१.२) इति। अयमर्थः– ममैव पौरोहित्यमस्तु [७०-]नान्यस्यैवेत्येवं स्पर्धोपेतो[-७०] यथोक्तवर्णोपेतं पशुत्रयमालभेतेति। तत्राऽऽद्यन्तयोः कृष्णग्रीवयोः पश्वोर्दैवतैक्यात्[७१] तन्त्रेणानुष्ठानमिति चेत्। मैवम्। सौम्यपशुना व्यवधाने सति कालैक्याभावेन तन्त्रासंभवात्। [७२]तस्मादावापः।

प्रथमाध्यायस्य चतुर्थे पादे चिन्तितम्—

"आग्नेयो ब्राह्मणोऽत्रापि पूर्ववत् सर्वनिर्णयः।
द्वारं तु मुखजन्यत्वमाग्नेयत्वेन संस्तवे[७३]"॥ (जैन्या १.४.३९) इति॥

इदमाम्नायते–"आग्नेयो वै ब्राह्मणः" (तैसं ५.६.४) इति। [७४]अत्राप्यत्यन्तप्रसिद्धार्थभेदादाग्नेयशब्दो न [७५]ब्राह्मणस्य नामधेयं, नाप्यग्निदेवतारूपो गुणो विधीयते। 'आग्नेयं सूक्तम्, आग्नेयं हविः' इत्येवं [७६]देवतातद्धितस्य सूक्तहविर्विषयत्वात्। न हि ब्राह्मणः सूक्तं नापि हविः। [७७]अतः संबन्धवाचितद्धितान्तेनाऽऽग्नेयब्देन ब्राह्मणः स्तूयते। यद्यपि [७८]ब्राह्मणे [७९]नाग्निसंबन्धः [८०]तथाऽप्यग्निसंबद्धो[८१] मुखजन्यत्वगुणो ब्राह्मणे विद्यते। तथा चाग्निब्राह्मणयोर्मुखजन्यत्वं कस्मिंश्चिदर्थवादे समाम्नायते– "प्रजापतिरकामयत प्र जायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवताऽन्वसृज्यत गायत्री छन्दो रथंतरꣳ साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात् ते मुख्या मुखतो ह्यसृज्यन्त" (तैसं ७.१.१) इति। तस्मादाग्नेयशब्दः स्तावकः। एवमैन्द्रो राजन्यो वैश्यो वैश्वदेव इत्यादिषु द्रष्टव्यम्॥ १०

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः॥ २॥

---

४३. तं२.मै.लं–°वसिताभ्याम् ४४–४४. मै४–स राजविषयं। ४५. मै.लं–'ततश्च' नास्ति। ४६. मै४–प्राधान्येन

६७–६७. अ.उ.क.जो.ना.पा.हा–सम्यग्जयति; इ–अभिभवति। ६८–६८. अ.आ.उ.क.ड.ड१. पा.हो१–'पुरः अग्रे' नास्ति। ६९. उ.पा–पौरोहित्यत्वेन; अ–'पौरोहित्यपदे' नास्ति। ७०–७०. अ.उ.पा–राज्यस्येत्येवं प्रार्थयतः; उ–नान्यस्यैवेत्येवं स्पर्धोपेतः। ७१. अ–°दैवतैक्यत्वात्। ७२. जो.ना.हा–तस्मादपवादः। ७३. क–संस्तवः। ७४. अ.उ.जो.ना.पा.हा–°प्रसिद्धार्थशब्दभेदा°। ७५. ड.हो१–ब्राह्मणशब्दस्य। ७६. अ.पा–देवताद्वयस्य; उ–देवताद्वय°। ७७. आ.हा–ततः। ७८. अ.उ.जो.ड.ना.पा.हा.हो१–ब्राह्मणः। ७९. ड–°संबद्धः। ८०. ड१–तदाऽप्य° ८१. आ.ड१–°संबन्धो।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवासुरा एषु लोकेष्वस्पर्धन्त स एतं विष्णुर्वामनमपश्यत् तꣳ स्वायै देवतायै आऽलभत ततो वै स इमाँल्लोकानभ्यजयद्वैष्णवं वामनमा लभेत स्पर्धमानो विष्णुरेव भूत्वेमाँल्लोकानभि जयति विषम आ लभेत विषमा इव हीमे लोकाः समृद्ध्या

देवासुरा इति देव-असुराः । एषु । लोकेषु । अस्पर्धन्त । सः । एतम् । विष्णुः । वामनम् । अपश्यत् । तम् । स्वायै । देवतायै । एति । अलभत । ततः । वै । सः । इमान् । लोकान् । अभीति । अजयत् । वैष्णवम् । वामनम् । एति । लभेत । स्पर्धमानः । विष्णुः । एव । भूत्वा । इमान् । लोकान् । अभीति । जयति । विषम इति वि-समे । एति । लभेत । विषमा इति वि-समाः । इव । हि । इमे । लोकाः । समृद्ध्या इति सम्-ऋद्ध्यै ।

देवासुरा इत्यादि ॥ स्पर्धा लोकविषयं [1]परस्परमैश्वर्यासहनम् । वामनो ह्रस्वाङ्गः । [V]स्वायै [V]देवतायै आत्मानमेव देवतां कृत्वा । तस्यै वामनम् [V]आऽलभत । ततो वा इत्यादि । गतम् । स्पर्धमान इति । स्पर्धाविषयसिद्ध्यै । विषम इति । [2]निम्नोन्नतस्थले [3]देवयजनभूते । विषमा इवेति । भोक्तृभोग्यादिवैलक्षण्याद्वैषम्यं लोकानाम् ॥

[1]जलोदरगृहीतो यो ये [2-]वाञ्छन्ति पशुप्रथाम्[-2] ।
ब्रह्मवर्चसकामो यो यो विद्वान् वक्तुमक्षमः ॥
दीर्घरोगी प्रजाकामः सभारञ्जनवर्जितः ।
पौरोहित्ये स्पर्धमानश्चेतेषां पशवः [3]श्रुताः ॥

देवासुरा इति ॥ तानेतान् पशून् द्वितीयानुवाके विधाय तृतीयानुवाके जयादिहेतून् पशून् विधित्सन्नादौ लोकत्रयजयहेतुं पशुं विधातुं प्रस्तौति– 'देवासुरा एषु लोकेष्वस्पर्धन्त स एतं विष्णुर्वामनमपश्यत् तꣳ स्वायै देवताया आऽलभत ततो वै स इमाँल्लोकानभ्यजयत्' इति ॥ [V]लोकेषु [4]विषयभूतेषु [5-V]वामनं ह्रस्वं पशुं[-5] [V]स्वायै विष्णुरूपायै [V]देवतायै[6] ॥

वैष्णवमिति ॥ अथ विधत्ते–'[V]वैष्णवं वामनमा लभेत स्पर्धमानो विष्णुरेव भूत्वेमाँल्लोकानभिजयति' इति ॥ स्पर्धमानः [7]गृहक्षेत्रादिविषये विवादवान् । विष्णुप्रियहविर्दानादस्योपचरितं[8] विष्णुत्वम् ॥

विषम इति ॥ चोदकपरंपराप्राप्तं समदेशमपवदितुं विधत्ते– 'विषम आ लभेत विषमा इव हीमे लोकाः समृद्ध्यै' इति । पृथिव्यादिलोकानामुत्तरोत्तरं विस्तृततत्वात् [9]भोगाधिक्याद्वा विषमत्वम् । सोऽयं विषमदेशः [V]समृद्ध्यै कल्पते ॥

१. मै४–[°]मैश्वर्यमसहमानाः । २. मै४–निम्नोन्नते स्थले । ३. मै४–देवयजने ।

१. इ.ड.ड१.हो–महोदर[°] । २–२. इ–वाञ्छन्ति प्रथनं पशोः; हो१–यो वाञ्छति पशुप्रजाम् । ड–यो वाञ्छति पशून् प्रजाम्; ड१–यो वाञ्छति पशुप्रदा (जा ?) म् । ३. अ.उ.जो.ना.पा.हा–स्मृताः; ४. अ.उ.पा–विजयभूतेषु । ५–५. अ.उ.ना.पा.हा–वामनं ह्रस्वपशुं; जो–वामनो ह्रस्वः पशुः । ६. इ–'देवतायै' इत्यस्यानन्तरम् 'आऽलभत ततो वै स इमान् लोकानभ्यजयत्' । ७. उ.पा.–गृहक्षेत्रविषये; अ–'गृहक्षेत्रादिविषये' नास्ति । ८. अ.उ.पा–[°]दस्योपचारो विष्णुभावम् । ९. इ–रोगाधिक्याद्वा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्राय मन्युमते मनस्वते ललामं प्राशृङ्गमा लभेत संग्रामे (१) संयत्त इन्द्रियेण वै मन्युना मनसा संग्रामं जयतीन्द्रमेव मन्युमन्तं मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो दधाति जयति तꣳ संग्राममिन्द्राय मरुत्वते पृश्निसक्थमा लभेत ग्रामकाम इन्द्रमेव मरुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव भवति ५

इन्द्राय । मन्युमत इति मन्यु-मते । मनस्वते । ललामम् । प्राशृङ्गम् । एति । लभेत । संग्राम इति सं-ग्रामे (१) । संयत्त इति सं-यत्ते । । इन्द्रियेण । वै । मन्युना । मनसा । संग्राममिति सं-ग्रामम् । जयति । इन्द्रम् । एव । मन्युमन्तमिति मन्यु-मन्तम् । मनस्वन्तम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मिन् । इन्द्रियम् । मन्युम् । मनः । दधाति । जयति । तम् । संग्राममिति सं-ग्रामम् । इन्द्राय । मरुत्वते । पृश्निसक्थमिति पृश्नि-सक्थम् । एति । १० लभेत । ग्रामकाम इति ग्राम-कामः । इन्द्रम् । एव । मरुत्वन्तम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मै । सजातानिति स-जातान् । प्रेति । यच्छति । ग्रामी । एव । भवति ।

इन्द्रायेत्यादि ॥ ललामः श्वेतपुण्ड्रलाञ्छितललाटः । मत्वर्थीयो लुप्यते । प्राशृङ्गो [४]लम्बितशृङ्गः पुंगवः[४] । 'प्राशृङ्गो गौः' इति भरद्वाजवचनात् । इन्द्रियेणेत्यादि । [५]इन्द्रियं वीर्यम् । इन्द्रियादित्रयं [५]संग्रामजयश्रीहेतुः ॥ १५

मरुत्वत इति ॥ "तसौ मत्वर्थे" (पा १.४.१९) इति भत्वम् । पृश्निसक्थः श्वेतजानुः, श्वेतोरुरित्येके, [६]श्वेतकटिप्रदेश इत्यपरे[६] । "बहुव्रीहौ सक्थ्यक्ष्णोः" (पा ५.४.११३) इति षच् ॥

इन्द्रायेति ॥ संग्रामार्थिनः पशुं विधत्ते–'इन्द्राय मन्युमते मनस्वते ललामं प्राशृङ्गमा लभेत संग्रामे संयत्त इन्द्रियेण वै मन्युना मनसा संग्रामं जयतीन्द्रमेव मन्युमन्तं मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो दधाति जयति तꣳ संग्राममम्' इति ॥ [७]मनस्वते धैर्यवते। २० ललामशब्दः [१०]श्वेतपुण्ड्रवालाङ्कितललाटोपेतं ब्रूते । प्राशृङ्गो मुखं प्रत्यासन्नशृङ्गः पुंगवः, 'प्राशृङ्गः [११]गौः' इति भरद्वाजवचनात् । "प्राशृङ्गोऽवाक्शृङ्ग उक्षा वशा वेहद्धेनुर्वत्स ऋषभोऽनड्वान् पुनरुत्सृष्टो गोमृग इति गव्याः" (आपश्रौ १९.१६.१६) इत्यापस्तम्बवचनात् । [७]संयत्ते प्राप्ते सति । इन्द्रियं शारीरं बलम् । मन्युः शत्रुविषयः कोपः । मनः धैर्यम् ॥

इन्द्रायेति ॥ ग्रामार्थिनः पशुं विधते– 'इन्द्राय मरुत्वते पृश्निसक्थमा लभेत ग्रामकाम इन्द्रमेव मरुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव भवति' इति ॥ मरुद्भिर्युक्तो मरुत्वान् । पृश्निसक्थः श्वेतोरुः । [७]सजातान् सहोत्पन्नान् भ्रात्रादीन् सहवासिनो भृत्यादींश्च ॥ २५

४–४. तं२.मै.लं–लम्बितशृङ्गाः पिङ्गलः; मै४–लङ्गित(१)शृङ्गः पुंगवः । ५. मै४–°जयहेतुः । ६–६. लं–'इत्यपरे' नास्ति; तं२.मै–'अपरे' नास्ति; अ.मै४–'श्वेत°' नास्ति ।

१०. पुण्ड्रलाञ्छित° । ११. इ–अनुसंप्रत्याऽऽनतशृङ्गो गौः । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यद्ऋषभस्तेनै(२)न्द्रो यत् पृश्निस्तेन मारुतः समृद्ध्यै पश्चात् पृश्निसक्थो भवति पश्चादन्ववसायिनीमेवास्मै विशं करोति सौम्यं बभ्रुमा लभेतान्नकामः सौम्यं वा अन्नꣳ सोममेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद एव भवति बभ्रुर्भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै

५ यत्। ऋषभः। तेन (२)। ऐन्द्रः। यत्। पृश्निः। तेन। मारुतः। समृद्ध्या इति सम्-ऋद्ध्यै। पश्चात्। पृश्निसक्थ इति पृश्नि-सक्थः। भवति। पश्चादन्ववसायिनीमिति पश्चात्-अन्ववसायिनीम्। एव। अस्मै। विशम्। करोति। सौम्यम्। बभ्रुम्। एति। लभेत। अन्नकाम इत्यन्न-कामः। सौम्यम्। वै। अन्नम्। सोमम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। अन्नम्। प्रेति। यच्छति। अन्नाद इत्यन्न-अदः। एव। भवति। बभ्रुः।
१० भवति। एतत्। वै। अन्नस्य। रूपम्। समृद्ध्या इति सम्-ऋद्ध्यै।

यदृषभ इत्यादि। ऋषभस्य सेक्तृत्वादैन्द्रत्वम्। श्वेतस्य वायव्यत्वात् पृश्नेर्मारुतत्वम्। समृद्ध्या इति। सदृशः संबन्धः समृद्धिः। पश्चादिति। [७]सक्थ्नः पश्चाद्भागे पृश्नित्वं यस्य स तथोक्तः। [८]पश्चादन्ववसायिनीं पश्चादनुसृत्यावस्थानशीलां [८]विशं [८]प्रजां [८]करोति॥

सौम्यमित्यादि॥ बभ्रुः [९]कपिलश्यामः। [८]सौम्यम् अन्नम्, [१०]तस्यौषधीशत्वात्॥

१५ **यदिति॥** पुंगवत्वं सक्थिश्वैत्यं च प्रशंसति– 'यदृषभस्तेनैन्द्रो यत्पृश्निस्तेन मारुतः समृद्ध्यै' इति॥ [१२]सेक्तृत्वसामान्येनेन्द्रसंबन्धित्वं, "वायव्यं श्वेतम्" (तैसं २·१·१) इत्युक्तत्वात् पृश्निवर्णस्य मारुतत्वं तदुभयं समृद्ध्यै भवति॥

पश्चादिति॥ पुरोवर्तिनोरुर्वोः [१३]पृश्निसक्थित्वं वारयितुं विधत्ते– 'पश्चात् पृश्निसक्थो भवति पश्चादन्ववसायिनीमेवास्मै विशं करोति' इति॥ यजमानो ग्रामस्वामी प्रथमं यत्कार्यं यथाऽध्यवस्यति
२० तद्ग्रामनिवासिनी प्रजा पश्चात् यजमानानुसारेणैव तत्कार्यमध्यवस्यति, न तु प्रातिकूल्यं चिन्तयतीति पश्चादन्ववसायिनी॥

सौम्यमिति॥ अन्नार्थिनः पशुं विधत्ते– 'सौम्यं बभ्रुमा लभेतान्नकामः सौम्यं वा अन्नꣳ सोममेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद एव भवति' इति। "सोमो वा ओषधीनाꣳ राजा" (तैब्रा ३·९·१७) इति श्रुतत्वादन्नस्य सौम्यत्वम्। [१४]अन्नादः [१५]व्याधिराहित्येन
२५ दीप्ताग्निः॥

बभ्रुरिति॥ पशुवर्णं प्रशंसति– 'बभ्रुर्भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै' इति। विदलित-चणकाद्यन्नस्य प्रियङ्ग्वादेर्वा [८]रूपं पिङ्गलम्॥

७. [शुद्धीकृतः पाठः।]; मै–सक्थः (?); मै४–सक्थेः (?)। ८. लं–प्रजां बभ्रुम्। ९. अ,मै४–कपिलः श्यामः। १०. मै–तस्योदयशीलत्वात्; पं,२लं–तस्योभयशीलत्वात्।

३० १२. इ–°साम्येनैन्द्र°। १३. इ–पृश्नित्वशङ्काम्। १४. ड१–°राहित्ये।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

सौम्यं बभ्रुमा लभेत यमलꣳ (३) राज्याय सन्तꣳ राज्यं नोपनमेत् सौम्यं वै राज्यꣳ सोममेव स्वेन भागधेयेनोप धावति स एवास्मै राज्यं प्र यच्छत्युपैनꣳ राज्यं नमति बभ्रुर्भवत्येतद्वै सोमस्य रूपꣳ समृद्ध्या इन्द्राय वृत्रतुरे ललामं प्राशृङ्गमा लभेत गतश्रीः प्रतिष्ठाकामः पाप्मानमेव वृत्रं तीर्त्वा प्रतिष्ठां गच्छतीन्द्रायाभिमातिघ्ने ललामं प्राशृङ्गमा (४) लभेत यः पाप्मना गृहीतः स्यात् पाप्मा वा ५

सौम्यम्। बभ्रुम्। एति। लभेत। यम्। अलम् (३)। राज्यायं। सन्तम्। राज्यम्। न। उपनमेदित्युप-नमेत्। सौम्यम्। वै। राज्यम्। सोमम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। राज्यम्। प्रेति। यच्छति। उपेति। एनम्। राज्यम्। नमति। बभ्रुः। भवति। एतत्। वै। सोमस्य। रूपम्। समृद्ध्या इति सम्-ऋद्ध्यै। इन्द्राय। वृत्रतुर इति वृत्र-तुरे। ललामम्। प्राशृङ्गम्। एति। लभेत। गतश्रीरिति गत - श्रीः। प्रतिष्ठाकामम् इति १० प्रतिष्ठा-कामः। पाप्मानम्। एव। वृत्रम्। तीर्त्वा। प्रतिष्ठामिति प्रति-स्थाम्। गच्छति। इन्द्राय। अभिमातिघ्न इत्यभिमाति-घ्ने। ललामम्। प्राशृङ्गम्। एति (४)। लभेत। यः। पाप्मना। गृहीतः। स्यात्। पाप्मा। वै।

यमिति ॥ राज्यं प्राप्तुं योग्यमपि [११-V]राज्यं राजन्यं वा [V]यं [V]न [V]उप नमेत्[-११] नोपगच्छेत्। राज्ञः कर्म राज्यम्। [१२-]पुरोहितादित्वात् (पा ५.१.१२८) यक्[-१२] ॥ १५

वृत्रतुर इति ॥ [१३-]वृत्रस्य वा पापादेर्वा[-१३] हिंसिता वृत्रतूः। तुर्वी हिंसायाम्, क्विप्। ललामं प्राशृङ्गमिति व्याख्यातम्। [V]गतश्रीः। केचिदाहुः -- शुश्रुवान् ग्रामणी राजन्यो वेति (द्र. बौश्रौ १७.४९)। पाप्मानमिति। येन प्रतिष्ठा निरुध्यते। [V]वृत्रं वारकम् ॥

सौम्यमिति ॥ राज्यप्राप्तिकामिनः पशुं विधत्ते– ' सौम्यं बभ्रुमा लभेत यमलꣳ राज्याय सन्तꣳ राज्यं नोपनमेत् सौम्यं वै राज्यꣳ सोममेव स्वेन भागधेयेनोप धावति स एवास्मै राज्यं प्र यच्छत्युपैनꣳ राज्यं २० नमति बभ्रुर्भवत्येतद्वै सोमस्य रूपꣳ समृद्ध्यै ' इति। राज्ञो ज्येष्ठपुत्रत्वाच्छौर्यादिगुणसंपन्नत्वाच्च[१५] [V]राज्याय [V]अलं [V]सन्तं सम्यग्योग्यं[१६] सन्तं[१७] [V]यं पुरुषं प्रति [V]राज्यं [V]न प्राप्नुयात् तस्यायं पशुः। " सोमोऽस्माकं ब्राह्मणानाꣳ राजा " (तैसं १.८.१०, १२) इति श्रुतत्वाद्राज्यं सौम्यम्। चन्द्रमण्डलस्य सुवर्णवर्णत्वात् बभ्रुत्वं सोमस्य रूपम् ॥

इन्द्रायेति ॥ शत्रुबाधेन भ्रष्टश्रियः प्रतिष्ठार्थं पशुं विधते– ' इन्द्राय वृत्रतुरे ललामं प्राशृङ्गमा २५ लभेत गतश्रीः प्रतिष्ठाकामः पाप्मानमेव वृत्रं तीर्त्वा प्रतिष्ठां गच्छति ' इति ॥ वृत्रतूर्वैरिहिंसकः। [V]पाप्मानम् [V]एव नरकप्रदपापवद्बाधकमेव [V]वृत्रं वैरिणम् ॥

११–११. मै४–राष्ट्रमाधिपत्यं वा यं नोपनमेत्। १२–१२. अ.लं–पुरोहितत्वादित्यादिकम्। १३–१३. अ. तं२.मै४–वृत्रस्य पापादेः।

१५. आ–' च ' नास्ति। १६. ड.ड१.हो१–सम्यक् ख्यातं। १७. ड.ड१–' सन्तं ' नास्ति। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभिमातिरिन्द्रमेवाभिमातिहनꣳ स्वेन भागधेयेनोप धावति स एवास्मात् पाप्मानमभिमातिं प्र णुदत इन्द्राय वज्रिणे ललामं प्राशृङ्गमा लभेत यमलꣳ राज्याय सन्तꣳ राज्यं नोपनमेदिन्द्रमेव वज्रिणꣳ स्वेन भागधेयेनोप धावति स एवास्मै वज्रं प्र यच्छति स एनं (५) वज्रो भूत्या इन्द्र उपैनꣳ राज्यं नमति ललामः प्राशृङ्गो भवत्येतद्वै वज्रस्य रूपꣳ समृद्ध्यै ॥ ३ ॥

[संग्रामे तेनालमभिमातिघ्ने ललामं प्राशृङ्गमैनं पञ्चदश च ।]

अभिमातिरित्यभि-मातिः । इन्द्रम् । एव । अभिमातिहनमित्यभिमाति-हनम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मात् । पाप्मानम् । अभिमातिमित्यभि-मातिम् । प्रेति । नुदते । इन्द्राय । वज्रिणे । ललामम् । प्राशृङ्गम् । एति । लभेत । यम् । अलम् । राज्याय । सन्तम् । राज्यम् । न । उपनमेदित्युप-नमेत् । इन्द्रम् । एव । वज्रिणम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मै । वज्रम् । प्रेति । यच्छति । सः । एनम् (५) । वज्रः । भूत्यै । इन्द्रे । उपेति । एनम् । राज्यम् । नमति । ललामः । प्राशृङ्गः । भवति । एतत् । वै । वज्रस्य । रूपम् । समृद्ध्या इति सम्-ऋद्ध्यै ॥ ३ ॥

[मैसं २.५.३, ४, ८, ९ कासं १३.३-४]

अभिमातिघ्न इति ॥ अभिमातिः पाप्मा, [१४]तस्य हन्त्रे । क्विप् (पा ३.२.७६) । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । गतमन्यत् ॥ इन्द्रे इति । राज्यप्राप्तियोग्यां दीप्तिं करोति इति । ञि इन्धी दीप्तौ । " श्नान्नलोपः " (पा ६.४.२३) ॥

इति द्वितीये प्रथमे तृतीयोऽनुवाकः ॥

इन्द्रायेति ॥ पापक्षयार्थिनः पशुं विधत्ते– ' इन्द्रायाभिमातिघ्ने ललामं प्राशृङ्गमा लभेत यः पाप्मना गृहीतः स्यात् पाप्मा वा अभिमातिरिन्द्रमेवाभिमातिहनꣳ स्वेन भागधेयेनोप धावति स एवास्मात् पाप्मानमभिमातिं प्र णुदते ' इति ॥ [र]पाप्मना गोवधाद्युपपातकादिना ॥

इन्द्रायेति ॥ राज्यार्थिनः पश्वन्तरं विधत्ते– ' इन्द्राय वज्रिणे ललामं प्राशृङ्गमा लभेत यमलꣳ राज्याय सन्तꣳ राज्यं नोपनमेदिन्द्रमेव वज्रिणꣳ स्वेन भागधेयेनोप धावति स एवास्मै वज्रं प्र यच्छति स एनं वज्रो भूत्वा इन्द्र उपैनꣳ राज्यं नमति ललामः प्राशृङ्गो भवत्येतद्वै वज्रस्य रूपꣳ समृद्ध्यै ' इति ॥ [र]वज्रं वज्रवत्प्रहरणसमर्थमायुधम् । [र]सः चाऽऽयुधविशेषो वज्रसमः [१८-र]भूत्यै [र]इन्द्रे-[१८] यजमानं वैरिसंतापाय प्रदीप्तं करोति । आनतस्य शृङ्गस्य तीक्ष्णाग्रत्वात् तीक्ष्णधारायुक्तवज्ररूपत्वम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

१४. मै.तं२.लं–तस्याः ।

१८–१८. उ.जो.ड.ड१.ना.पा.हो१–भूत्वा; इ –' इन्धे ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतां दर्शर्षभामाऽलभन्त तयैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतां दर्शर्षभामा लभेतामुमेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति

असौ। आदित्यः। न। वीति। अरोचत। तस्मै। देवाः। प्रायश्चित्तिम्। ऐच्छन्। तस्मै। एताम्। दर्शर्षभामिति दर्श-ऋषभाम्। एति। अलभन्त। तया। एव। अस्मिन्। रुचम्। अदधुः। यः। ब्रह्मवर्चसकाम इति ब्रह्मवर्चस-कामः। स्यात्। तस्मै। एताम्। दर्शर्षभामिति दर्श-ऋषभाम्। एति। लभेत। अमुम्। एव। आदित्यम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मिन्। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। दधाति। ब्रह्मवर्चसीति ब्रह्म-वर्चसी। एव। भवति।

असावादित्य इत्यादि॥ दशानामृषभानां समाहारो दशर्षभा। "[1]अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यते" (द्र. पामा २·४·३० वा २) इति [2]त्रिफलादिवत् (द्र. पा ४.१.६४ वा ३) अजादित्वात्[-2] (पा ४.१.४) "द्विगोः" (पा ४·१·२१) [3]इति ङीबभावः। "इगन्तकाल°" (पा ६·२·२९) इति पूर्वपदप्रकृतिस्वरत्वम् अनिगन्तेऽपि व्यत्ययेन प्रवर्तते। बहुव्रीहिर्वा। समष्टिर्वाच्या। दशर्षभेति कर्मनाम, जातिरिति केचित्॥

[1]स्पर्धाकामो युद्धकामो ग्रामकामोऽन्नकामवान्।
राज्यकामः प्रतिष्ठार्थी यः पापक्षयमिच्छति॥
राज्यार्थी च पुमांसो ये तेषां पशव ईरिताः॥

असाविति॥ [1]तृतीयेऽनुवाके जयकामादीनां पशून् विधाय चतुर्थे [3]ब्रह्मवर्चसकामादीनां [4]पशून् विधित्सुरादौ ब्रह्मवर्चसकामाय विधातुं प्रस्तौति— 'असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतां दर्शर्षभामाऽलभन्त तयैवास्मिन् रुचमदधुः' इति। [5]पूर्वमेवोक्तोऽप्यादित्यस्य दीप्त्यभावः कालविशेषेणात्रापि प्रतीकारान्तरं [6]दर्शयितुं पुनरुच्यते। दशानामृषभाणां [7]समाहारो दशर्षभा। [8]कर्मनामधेयमिति केचित्, तत्तु [9]नात्यन्तयुक्तिसहम्। 'आऽलभन्त' [10]इत्यस्यानन्वयप्रसङ्गात्॥

य इति॥ विधत्ते– 'यो ब्रह्मवर्चसकामः स्यात् तस्मा एतां दर्शर्षभामा लभेतामुमेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति' इति। 'अमुमेवाऽऽदित्यम्' इत्यर्थवादे श्रुतत्वादादित्योऽस्मिन् कर्मणि देवता॥

१. मै–आकारा°।[2-] २–२. मै४–त्रिफलादित्वात्। ३. लं–'इति' नास्ति।

१. क.ड१–स्पर्धमानः। २. आ–तृतीयानु°। ३. ड.हो१–°कामार्थिनां। ४. ड१–'पशून्' नास्ति। ५. हो१–पूर्वमुक्तरीत्याप्या°; ड१–पूर्वमुक्तो°। ६. अ.उ.पा–'दर्शयितुम्' नास्ति। ७. इ.क.जो.ना.हा–समाहारोऽस्यामिति। ८. ड.ड१–कर्मनामेति। ९. ड.ड१–नात्यन्तं युक्ति°। १०. इ.क–इत्यस्यानन्वयात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वसन्ता प्रातस्त्रीन् ललामाना लभेत ग्रीष्मे मध्यंदिने (१) त्रीञ्छितिपृष्ठाञ्छरद्य-
पराह्णे त्रीञ्छितिवारान् त्रीणि वा आदित्यस्य तेजांऽसि वसन्ता प्रातर्ग्रीष्मे मध्यंदिने
शरद्यपराह्णे यावन्त्येव तेजांऽसि तान्येवाव रुन्द्धे त्रयस्त्रय
आ लभ्यन्तेऽभिपूर्वमेवास्मिन् तेजो दधाति

---

५ वसन्ता । प्रातः । त्रीन् । ललामान् । एति । लभेत । ग्रीष्मे । मध्यंदिने (१) । त्रीन् । शितिपृष्ठानिति शिति-पृष्ठान् । शरदि । अपराह्ण इत्यपर-अह्णे । त्रीन् । शितिवारानिति शिति-वारान् । त्रीणि । वै । आदित्यस्य । तेजांऽसि । वसन्ता । प्रातः । ग्रीष्मे । मध्यंदिने । शरदि । अपराह्ण इत्यपर-अह्णे । यावन्ति । एव । तेजांऽसि । तानि । एव । अवेति । रुन्द्धे । त्रयस्त्रय इति त्रयः–त्रयः । एति । लभ्यन्ते । अभिपूर्वमित्यभि-पूर्वम् । एव । अस्मिन् । तेजः । दधाति ।

---

१० वसन्तेति ॥ पूर्ववत् सप्तम्या डादेशः (पा ७.१.३९) । वसन्ते चतुर्दश्यां प्रक्रमः । प्रातःकाले उपाकरणं वपाहोमः इत्युभयं यथा स्यात्तथोपक्रमः । ग्रीष्मशरदोर्मध्याह्नापराह्णयोरेवोपक्रमः । सर्वत्र संवत्सरे ब्रह्मचर्यादि यजमानस्य केचिदिच्छन्ति[४] । ललामा उक्ताः (द्र. तैसं २.१.३) । [५]शितिपृष्ठाः श्वेतपृष्ठाः[५] शितिवाराः श्वेतवालाः । उभयत्रापि " शितेर्नित्याबह्वच् " (पा ६.२.१३८) इत्युत्तरपदप्रकृतिस्वरत्वम् । अभिपूर्वमिति । अनुक्रमेण त्रिभिः पशुभिः त्रीणि तेजांसि [v]अस्मिन्
१५ [v]दधाति ।

वसन्तेति ॥ तत्रैव [११-]कालविशेषसहितं पशुगुणविशेषं[-११] विधत्ते–' वसन्ता प्रातस्त्रीन् ललामाना लभेत ग्रीष्मे मध्यंदिने त्रीञ्छितिपृष्ठाञ्छरद्यपराह्णे त्रीञ्छितिवारान् ' इति । शितिपृष्ठाः श्वेतपृष्ठाः । [१२-]शितिवाराः श्वेतवालाः[-१२] ॥

त्रीणीति ॥ पूर्ववत् कालविशेषं प्रशंसति– ' त्रीणि वा आदित्यस्य तेजांऽसि वसन्ता प्रातर्ग्रीष्मे
२० मध्यंदिने शरद्यपराह्णे यावन्त्येव तेजांऽसि तान्येवाव रुन्द्धे इति ॥

त्रयस्त्रय इति ॥ विहितानेव त्रित्वोपेतान् संघान् प्रशंसति–' त्रयस्त्रय आ लभ्यन्तेऽभिपूर्वमेवाऽस्मिन् तेजो दधाति ' इति । पूर्वं वसन्ते यथा त्रित्वोपेतास्तथा ग्रीष्मशरदोरपि त्रित्वोपेतत्वे सति पूर्वसादृश्यं संपद्यते । [१३-]तद्वदस्मिन् यजमानेऽपि [v]अभिपूर्वं पूर्वपूर्वसादृश्येनैव[-१३] [१४]उत्तरोत्तरकालेऽपि [v]तेजः विधत्ते, न तु कदाचिदपि तेजो हीयत इत्यर्थः ॥

---

२५ ४. लं– ' इच्छन्ति ' नास्ति । ५–५. मै–' श्वेतपृष्ठाः ' नास्ति; लं–' शितिपृष्ठाः ' नास्ति ।

११–११. अ.उ.पा.हा–कालविशेषम् । १२. अ.उ.पा– ' शिति..... वालाः ' नास्ति; इ–श्वेतपुच्छः । १३–१३. ङ–तच्च तस्मिन् यजमानेऽप्यभिपूर्वसादृश्येनैव । १४. अ.उ.पा–उत्तरकाले सति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

संवत्सरं पर्यालभ्यन्ते संवत्सरो वै ब्रह्मवर्चसस्य प्रदाता संवत्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति संवत्सरस्य परस्तात् प्राजापत्यं कद्रु(२)मा लभेत प्रजापतिः सर्वा देवता देवतास्वेव प्रति तिष्ठति यदि बिभीयादुश्चर्मा भविष्यामीति

संवत्सरमिति संवत्सरम्। पर्यालभ्यन्त इति परि-आलभ्यन्ते। संवत्सर इति सं-वत्सरः। वै। ब्रह्मवर्चसस्येति ब्रह्म-वर्चसस्य। प्रदातेति प्र-दाता। संवत्सर इति सं-वत्सरः। एव। अस्मै। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। प्रेति। यच्छति। ब्रह्मवर्चसीति ब्रह्म-वर्चसी। एव। भवति। संवत्सरस्येति सं-वत्सरस्य। परस्तात्। प्राजापत्यमिति प्राजा-पत्यम्। कद्रुम् (२)। एति। लभेत। प्रजापतिरिति प्रजा-पतिः। सर्वाः। देवताः। देवतासु। एव। प्रतीति। तिष्ठति। यदि। बिभीयात्। दुश्चर्मेति दुः-चर्मा। भविष्यामि। इति।

संवत्सरमित्यादि। गतम् (द्र. तैसं २·१·२)॥ १०

संवत्सरस्येति॥ यस्मिन्नारभ्यते पर्वणि दशर्षभा ततः प्रभृति [६]द्वादशसु द्वादशसु[६] पौर्णमासीषु द्वादशामावास्यासु [७]चातीतासु त्रयोदशे पर्वणि संकल्पः। [८-v]कद्रुं पक्वबदरवर्णम्[-८]॥

यदीत्यादि॥ [v]दुश्चर्मा कुष्ठी। "परादिश्छन्दसि°" (पा ६·२·१९९) इत्युत्तरपदाद्युदात्तत्वम्। कुष्ठादित्वग्दोषो मे भविष्यतीति [v]यदि [९]कुतश्चित् लिङ्गात् [v]बिभीयादिति। स्वयेति। [v][१०]स्वया [v]देवतया [v]पशुभिः च सहकारिभिः [v]त्वचं शोभनां [v]करोति॥ १५

संवत्सरमिति॥ आग्नेयकृष्णग्रीवादिष्विव [१५]ब्रह्मचर्यादिनियमकालं विधत्ते – 'संवत्सरं पर्यालभ्यन्ते संवत्सरो वै ब्रह्मवर्चसस्य प्रदाता संवत्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति' इति॥

संवत्सरस्येति॥ दशमस्यर्षभस्य [१६]देवताकालवर्णविशेषान् विधत्ते – 'संवत्सरस्य परस्तात् प्राजापत्यं कद्रुमा लभेत प्रजापतिः सर्वा देवता देवतास्वेव प्रति तिष्ठति' इति। कद्रुः पिङ्गलः। प्रजापतेः उत्पादकत्वेन [१७]सर्वदेवता[त्म]कत्वम्॥ २०

यदीति॥ त्वग्दोषनिवारणाय पशुं विधते– 'यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णꣳ श्याममा लभेत सौम्यो वै देवतया पुरुषः पौष्णाः पशवः स्वयैवास्मै देवतया पशुभिस्त्वचं करोति न

६–६. मै४–दशसु; तं२–द्वादशसु। ७. अ. मै४–च व्यतीतासु। ८–८. अ.पं२.लं–कद्रुः पक्वबदरवर्णः; मै४–कद्रुः बदरवर्णः; तं२–कद्रुं पक्वं बदरवर्णम्। ९. मै–लं–कथंचित्। १०. मै–'स्वया'नास्ति। २५

१५. इ–ब्रह्मचर्यादिकालं। १६. ड.हो१–देवताकर्मनिर्णयवर्ण°। १७. ड.ड१.हो१–सर्वदेवतात्वम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमापौष्णꣳ श्याममा लभेत सौम्यो वै देवतया पुरुषः पौष्णाः पशवः स्वयैवास्मै देवतया पशुभिस्त्वचं करोति न दुश्चर्मा भवति देवाश्च वै यमश्चास्मिँल्लोकेऽस्पर्धन्त स यमो देवानामिन्द्रियं वीर्यमयुवत तद्यमस्य (३) यमत्वं ते देवा अमन्यन्त यमो वा इदमभूद्यदꣳ स्म इति ते प्रजापतिमुपाधावन्त्स एतौ प्रजापतिरात्मन उक्षवशौ निरमिमीत

सोमापौष्णमिति सोमा-पौष्णम्। श्यामम्। एति। लभेत। सौम्यः। वै। देवतया। पुरुषः। पौष्णाः। पशवः। स्वया। एव। अस्मै। देवतया। पशुभिरिति पशु-भिः। त्वचम्। करोति। न। दुश्चर्मेति दुः-चर्मा। भवति। देवाः। च। वै। यमः। च। अस्मिन्। लोके। अस्पर्धन्त। सः। यमः। देवानाम्। इन्द्रियम्। वीर्यम्। अयुवत। तत्। यमस्य (३)। यमत्वमिति यम-त्वम्। ते। देवाः। अमन्यन्त। यमः। वै। इदम्। अभूत्। यत्। वयम्। स्मः। इति। ते। प्रजापतिमिति प्रजा-पतिम्। उपेति। अधावन्। सः। एतौ। प्रजापतिरिति प्रजा-पतिः। आत्मनः। उक्षवशावित्युक्ष-वशौ। निरिति। अमिमीत।

देवाश्चेत्यादि ॥ [V]अस्मिन् [V]लोके [११]एतल्लोकनिमित्तम् [V]अस्पर्धन्त अस्माकमेवायं लोक इति [V]देवाः, ममैवायमिति [V]यमः। [१२]स इत्यादि। देवानाम् [१३V]इन्द्रियं [V]वीर्यं च [V]अयुवत देवेभ्यः पृथक् कृतवान् अपहृतवान्। व्यत्ययेन शप् [पा ३.१.८५], आत्मनेपदं च। तदिति। यवनाद्यमः। यौतेः पचाद्यचि (पा ३.१.१३४) अन्त्यविकारश्छान्दसः। यमो वा इति। [V]यमः [V]वा [V]इदं विश्वम् [V]अभूत् यमेश्वरमभूत् [V]यत् [V]वयं [V]स्मः यदस्मदधीनं पूर्वमासीत्। त इति। तथा मन्यमाना देवाः [V]प्रजापतिम् उपसंप्राप्ताः, इत्थं स्मः अत्र प्रतिकर्तुमर्हसीति [V]सः च [V]आत्मनः शरीरात् [V]उक्षवशौ [V]निः [V]अमिमीत निर्माय दत्तवान्। उक्षा च वशा चोक्षवशौ, व्यत्ययेन पूर्ववल्लिङ्गता। उक्षा सेक्ता, वशा वन्ध्या।

दुश्चर्मा भवति' इति। कण्डूत्यादिविशेषलिङ्गेन [१८-]भाविकुष्ठादिरोगमनुमाय भीतस्यायं[-१८] पशुः। पुरुषस्य सोमदेवताकत्वं पशूनां पौष्णत्वं च[१९] सोमापूषविषययाज्याव्याख्याप्रसङ्गेन दर्शितम्* ॥

देवा इति॥ भ्रातृव्यवतो द्विपशुकं कर्म विधातुं प्रस्तौति- 'देवाश्च वै यमश्चास्मिँल्लोकेऽस्पर्धन्त स यमो देवानामिन्द्रियं वीर्यमयुवत तद्यमस्य यमत्वं ते देवा अमन्यन्त यमो वा इदमभूद्यदꣳ स्म इति ते प्रजापतिमुपाधान्त्स एतौ प्रजापतिरात्मन उक्षवशौ निरमिमीत ते देवा वैष्णावरुणीं वशामाऽलभन्तैन्द्रमुक्षाणं

११. मै४-लोक°। १२. मै४-यमः। १३. लं-इन्द्रियं च।

१८-१८. अ.आ.उ.क.जो.ड.ड१.ना.पा.हा.हो१-भाविकुष्ठरोग°; अ.उ.पा-भाविकुष्ठरोगमनुमापयति तस्यायं। *['सोमापूषणा जनना रयीणां' (तैसं १.८.२२) इत्यत्र सायणीयं भाष्यं द्रष्टव्यम्।]। १९. अ.इ.उ.जो.ना.पा.हा- 'च' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

ते देवा वैष्णावरुणीं वशामाऽलभन्तैन्द्रमुक्षाणं तं वरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राणुदन्तेन्द्रेणैवास्येन्द्रियमवृञ्जत यो भ्रातृव्यवान्त्स्यात् स स्पर्धमानो वैष्णावरुणीं (४) वशामा लभेतैन्द्रमुक्षाणं वरुणेनैव भ्रातृव्यं ग्राहयित्वा विष्णुना यज्ञेन प्र णुदत ऐन्द्रेणैवास्येन्द्रियं वृङ्क्ते भवत्यात्मना परोऽस्य भ्रातृव्यो भवतीन्द्रो वृत्रमहन् तं वृत्रो हतः षोडशभिर्भोगैरसिनात् तस्य वृत्रस्य शीर्षतो गाव उदायन् ता वैदेह्योऽभवन् ५

ते । देवाः । वैष्णावरुणीमिति वैष्णा-वरुणीम् । वशाम् । एति । अलभन्त । ऐन्द्रम् । उक्षाणम् । तम् । वरुणेन । एव । ग्राहयित्वा । विष्णुना । यज्ञेन । प्रेति । अनुदन्त । ऐन्द्रेण । एव । अस्य । इन्द्रियम् । अवृञ्जत । यः । भ्रातृव्यवानिति भ्रातृव्य-वान् । स्यात् । सः । स्पर्धमानः । वैष्णावरुणीमिति वैष्णा-वरुणीम् (४) । वशाम् । एति । लभेत । ऐन्द्रम् । उक्षाणम् । वरुणेन । एव । भ्रातृव्यम् । ग्राहयित्वा । विष्णुना । यज्ञेन । प्रेति । नुदते । ऐन्द्रेण । एव । अस्य । इन्द्रियम् । वृङ्क्ते । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति । इन्द्रः । वृत्रम् । अहन् । तम् । वृत्रः । हतः । षोडशभिरिति षोडश-भिः । भोगैः । असिनात् । तस्य । वृत्रस्य । शीर्षतः । गावः । उदिति । आयन् । ताः । वैदेह्यः । अभवन् ।

ते इत्यादि । गतम् ॥

इन्द्रो वृत्रमहन्नित्यादि ॥ [v]षोडशभिः [v]भोगैः [१४]शरीरदेशैः इन्द्रम् [v]असिनात् अबध्नात् । षिञ् बन्धने । [v]वैदेहयः गोविशेषाः । केचिदाहुः–विदेहा [१५]एव वैदेह्यः अशरीरा गावः [v]अभवन् ।

तं वरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राणुदन्तैन्द्रेणैवास्येन्द्रियमवृञ्जत' इति । [v]अयुवत देवेभ्यः पृथक् कृतवान् । अतो यवनामकोऽयं वर्णव्यत्ययेन यमः संपन्नः । [२०-]इन्द्रियगते वीर्येऽपगते सति[-२०] [v]देवाः परस्परमिदमब्रुवन्–पूर्वं [v]यत् भूलोकाधिपत्यं प्राप्य [v]वयं [v]स्मः तत् [v]इदं प्राप्य [v]यमः एव [v]अभूत् । उक्षा सेचनसमर्थो वत्सोत्पादकः, वशा वन्ध्या, लिङ्गव्यत्ययो द्रष्टव्यः । [v]तं यमं वरुणपाशेन [v]एव [v]ग्राहयित्वा यज्ञरूपेण [v]विष्णुना निष्कासितवन्तः । इन्द्रप्रसादेन [v]अस्य यमस्य वीर्यं नाशितवन्तः ।

य इति ॥ विधत्ते–'यो भ्रातृव्यवान्त्स्यात् स स्पर्धमानो वैष्णावरुणीं वशामा लभेतैन्द्रमुक्षाणं वरुणेनैव भ्रातृव्यं ग्राहयित्वा विष्णुना यज्ञेन प्र णुदत ऐन्द्रेणैवास्येन्द्रियं वृङ्क्ते भवत्यात्मना परोऽस्य भ्रातृव्यो भवति' इति । [v]आत्मना [२१]स्वेन रूपेण यजमानो विजयी [v]भवति । [v]अस्य [v]भ्रातृव्यः [v]परा [v]भवति ॥

इन्द्र इति ॥ [२२]पापविमुक्तिकामस्य द्विपशुकं कर्म विधातुं प्रस्तौति–'इन्द्रो वृत्रमहन् तं वृत्रो हतः षोडशभिर्भोगैरसिनात् तस्य वृत्रस्य शीर्षतो गाव उदायन् ता वैदेह्योऽभवन् तासामृषभो

१४. मै४–शरीरैः । १५. तं२–गावः ।

२०–२०. ना–इन्द्रियवीर्ये एव हृते सति । २१. अ.उ.जो.ना.पा.हा–आत्मत्वेन ।
२२. अ.पा– रतिविमुक्ति°; उ–इति विमुक्ति° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तासामृषभो जघनेऽनूदैत् तमिन्द्रो(५)ऽचायत् सोऽमन्यत यो वा इममालभेत मुच्येतास्मात् पाप्मन इति स आग्नेयं कृष्णग्रीवमाऽलभतैन्द्रमृषभं तस्याग्निरेव स्वेन भागधेयेनोपसृतः षोडशधा वृत्रस्य भोगानप्यदहदैन्द्रेणेन्द्रियमात्मन्नधत्त

तासाम्। ऋषभः। जघने। अनु। उदिति। ऐत्। तम्। इन्द्रः (५)। अचायत्। सः। अमन्यत। यः। वै। इमम्। आलभेतेत्या-लभेत। मुच्येत। अस्मात्। पाप्मनः। इति। सः। आग्नेयम्। कृष्णग्रीवमिति कृष्ण-ग्रीवम्। एति। अलभत। ऐन्द्रम्। ऋषभम्। तस्य। अग्निः। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपसृत इत्युप-सृतः। षोडशधेति षोडश-धा। वृत्रस्य। भोगान्। अपीति। अदहत्। ऐन्द्रेण। इन्द्रियम्। आत्मन्। अधत्त।

"उदात्तस्वरितयोः°" (पा ८·२·४) इति विभक्तिः स्वर्यते। अथ [V]तासां गवां [१६V]जघने पश्चात् [V]ऋषभः [V]अनु [V]उत् [V]ऐत् अनूद्गतः, [V]तम् [V]इन्द्रः श्रुतवान्। अस्मादिति। [१७]सर्वलोकाप्रसिद्धात्, न तु [१८]प्राकृतात्, अत एवान्वादेशाभावान्निघाताभावः। "ऊडिदम्°" (पा ६·१·१७१) इति विभक्तेरुदात्तत्वम्। अथैवं जानन्निन्द्रः स्वयं तावत् [V]आग्नेयं [V]कृष्णग्रीवम् [V]आ [V]अलभत [V]ऐन्द्रम् [V]ऋषभम्। पृथक् [V]स्वेन [V]भागधेयेन [V]उपसृतः [V]अग्निः अस्य इन्द्रस्य बाधकान् वृत्रभोगान् [V]षोडशधा स्थितान् [V]अपि [V]अदहत् यथाकाममदहत्। [१९]यद्वा–षोडशधा स्थितान् सर्वानप्यदहत्। [V]ऐन्द्रेण आत्मनि [V]इन्द्रियम् [V]अधत्त इन्द्रः।

**जघनेऽनूदैत् तमिन्द्रोऽचायत् सोऽमन्यत यो वा इममालभेत मुच्येतास्मात् पाप्मन इति स आग्नेयं कृष्णग्रीवमाऽलभतैन्द्रमृषभं तस्याग्निरेव स्वेन भागधेयेनोपसृतः षोडशधा वृत्रस्य भोगानप्यदहदैन्द्रेणेन्द्रियमात्मन्नधत्त' इति। [V]तम् इन्द्रं [V]भोगैः शरीरैः [V]असिनात् [२३]अबध्नात्, वृत्रादुत्पन्नानि क्रोधाविष्टानि [२४]षोडश शरीराणि परितो वेष्टयित्वा स्थितानि, स च [V]वृत्रः सर्पाकारैः [२५]तैः [२६]शरीरैः तमिन्द्रं रज्जुभिरिव [२७]बबन्ध। ततः [V]तस्य [V]वृत्रस्य [V]शीर्षतः काश्चित् [V]गावः उत्पन्नाः। [V]ताः च गावो विशिष्टदेहसंबन्धिन्यः [V]अभवन्। [V]तासां गवां [V]जघने पृष्ठभागे कश्चित् [V]ऋषभः अनुगम्य उदगच्छत्[२८]। [V]तम् ऋषभमुद्दिश्य [V]इन्द्रः [V]अचायत् [२९]स्वात्मानं पूजितवान्। [३०]अहो मदीयं कार्यं संपन्नमिति। ततः [V]सः इन्द्रो मनसा व्यचारयत्। किमिति? [V]यः कोऽपि [V]इमम् ऋषभम् [V]आलभेत देवतोद्देशेन हिंस्यात् स ईदृशाद्बन्धनादिरूपात् [V]पात्मनः [V]मुच्येत [V]इति। एवं विचार्य द्विपशुकं कर्म कृतवान्। [V]तस्य इन्द्रस्य संबन्धिना स्वभागेन तुष्टः [V]अग्निः सर्पाकाराणि षोडश शरीराणि तं वृत्रम् [V]अपि [V]अदहत्। तत ऐन्द्र्याग्नेण सामर्थ्यमिन्द्रः स्वात्मनि [V]अधत्त॥

१६. अ. मै४–जघनेन। १७. तं१.तं२.मै–°लोकप्रसिद्धात्। १८. अ.तं१.तं२.मै.मै४.लं–प्रकृतात्। *(द्र.पा २·४·३२)। १९. लं–यथा।

२३. अ.इ.जो. ना.हा–अबाबध्नात्; ड.ड१.हो१–अविध्यत्। २४. अ.उ.पा – 'षोडश' नास्ति। २५. ड१– 'तैः' नास्ति। २६. इ.जो.ना.हा–स्वशरीरैः। २७. ड.हो१–आलभन्त। २८. ड–आऽगच्छत्। २९. ड.ड१–स चात्मानम्। ३०. जो.ना.हा–सोऽमन्यत अहो; इ–सोऽमन्यत।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

यः पाप्मना गृहीतः स्यात् स आग्नेयं कृष्णग्रीवमा लभेतैन्द्रमृषभमग्निरेवास्य स्वेन भागधेयेनोपसृतः (६) पाप्मानमपि दहत्यैन्द्रेणेन्द्रियमात्मन् धत्ते मुच्यते पाप्मनो भवत्येव द्यावापृथिव्यां धेनुमा लभेत ज्योगपरुद्धोऽनयोर्हि वा एषोऽप्रतिष्ठितोऽथैष ज्योगपरुद्धो द्यावापृथिवी एव स्वेन भागधेयेनोप धावति ते एवैनं प्रतिष्ठां गमयतः प्रत्येव तिष्ठति पर्यारिणी भवति पर्यारीव ह्येतस्य राष्ट्रं यो ज्योगपरुद्धः समृद्ध्यै ५

यः । पाप्मना । गृहीतः । स्यात् । सः । आग्नेयम् । कृष्णग्रीवमिति कृष्ण-ग्रीवम् । एति । लभेत । ऐन्द्रम् । ऋषभम् । अग्निः । एव । अस्य । स्वेन । भागधेयेनेति भाग-धेयेन । उपसृत इत्युप-सृतः (६) । पाप्मानम् । अपीति । दहति । ऐन्द्रेण । इन्द्रियम् । आत्मन् । धत्ते । मुच्यते । पाप्मनः । भवति । एव । द्यावापृथिव्यामिति द्यावा-पृथिव्याम् । धेनुम् । एति । लभेत । ज्योगपरुद्ध इति ज्योक्-अपरुद्धः । अनयोः । हि । वै । एषः । अप्रतिष्ठित इत्यप्रति-स्थितः । अथ । १०
एषः । ज्योक् । अपरुद्ध इत्यप-रुद्धः । द्यावापृथिवी इति द्यावा-पृथिवी । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । ते इति । एव । एनम् । प्रतिष्ठामिति प्रति-स्थाम् । गमयतः । प्रतीति । एव । तिष्ठति । पर्यारिणी । भवति । पर्यारि । इव । हि । एतस्य ।
राष्ट्रम् । यः । ज्योगपरुद्ध इति ज्योक्-अपरुद्धः । समृद्ध्या इति सम्-ऋद्ध्यै ।

द्यावापृथिव्यामित्यादि[२०] । " द्यावापृथिवीशुनासीर° " (पा ४·२·३२) इति यत् । १५
[v]ज्योगपरुद्धः दीर्घकालं दुर्गतः । [२१]चिरं राष्ट्रात् निर्वासित इत्येके । द्यावापृथिव्योरप्रतिष्ठितत्वात् [v]एषः [v]ज्योक् [v]अपरुद्धः भवति । [v]पर्यारिणी प्रसवकालमतीत्य कृतप्रसवा । केचिदाहुः प्रजननकालमतीत्य

य इति ॥ अथ विधत्ते– ' यः पाप्मना गृहीतः स्यात् स आग्नेयं कृष्णग्रीवमा लभेतैन्द्रमृषभमग्निरेवास्य स्वेन भागधेयेनोपसृतः पाप्मानमपि दहत्यैन्द्रेणेन्द्रियमात्मन् धत्ते मुच्यते पाप्मनो भवत्येव ' इति ॥ २०

द्यावापृथिव्यामिति ॥ चिरं राज्यभ्रष्टस्य पशुं विधत्ते–' द्यावापृथिव्यां धेनुमालभेत ज्योगपरुद्धोऽनयोर्हि वा एषोऽप्रतिष्ठितोऽथैष ज्योगपरुद्धो द्यावापृथिवी एव स्वेन भागधेयेनोप धावति ते एवैनं प्रतिष्ठां गमयतः प्रत्येव तिष्ठति ' इति । [v]ज्योगपरुद्धः चिरं राज्यभ्रष्टः । यस्तु प्रजापालनस्याभावादस्मिँल्लोके न प्रतितिष्ठति, वैदिककर्मानुष्ठानाभावात् स्वर्गेऽपि न प्रतितिष्ठति, तदानीम् [२१v]एषः [v]ज्योक् [v]अपरुद्धः इत्युच्यते । तस्य द्यावापृथिव्योः परितोषादुभयत्र प्रतिष्ठा संपद्यते ॥ २५

पर्यारिणीति ॥ धेनोः कंचिद्गुणं विधत्ते– ' पर्यारिणी भवति पर्यारीव ह्येतस्य राष्ट्रं यो ज्योगपरुद्धः समृद्ध्यै ' इति । या गौर्गर्भिणी सती [२२]प्राप्तं प्रसवकालं परित्यज्य चिरं गर्भं धृत्वा पश्चात्

२०. तं१.तं२.मै.लं–°व्यामिति । २१. अ.तं१.तं२.लं–' चिरं ' नास्ति ।

३१. अ.आ.उ.क.जो.ना.पा–सोऽत्र; ड.हो१–एव । ३२. क.जो.ना.हा–प्राप्त° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वायव्यं (७) वत्समा लभेत वायुर्वा अनयोर्वत्स इमे वा एतस्मै लोका अपशुष्का विडपशुष्काऽथैष ज्योगपरुद्धो वायुमेव स्वेन भागधेयेनोप धावति स एवास्मा इमाँल्लोकान् विशं प्र दापयति प्रास्मा इमे लोकाः स्नुवन्ति भुञ्जत्येनं विडुप तिष्ठते ॥४॥

[मध्यंदिने कद्रुं यमस्य स्पर्धमानो वैष्णावरुणीं तमिन्द्रोऽस्य स्वेन भागधेयेनोपसृतो वायव्यं द्विचत्वारिंशच्च] ॥

५

वायव्यम् (७)। वत्सम्। एति। लभेत। वायुः। वै। अनयोः। वत्सः। इमे। वै। एतस्मै। लोकाः। अपशुष्का इत्यप-शुष्काः। विट्। अपशुष्केत्यप-शुष्का। अथ। एषः। ज्योक्। अपरुद्ध इत्यप-रुद्धः। वायुम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। इमान्। लोकान्। विशम्। प्रेति। दापयति। प्रेति। अस्मै। इमे। लोकाः। स्नुवन्ति। भुञ्जती। एनम्। विट्। उपेति। तिष्ठते ॥ ४ ॥

१० [मैसं २.५.४; कासं १३.७, ४, ५]

[२२]प्रजायते। ज्योगपरुद्धस्य [V]हि [V]राष्ट्रं [V]पर्यारि भवति दीर्घकालातिक्रमेण प्राप्तत्वात्। तस्मात् सदृशयोगः [V]समृद्धयै भवति ॥

अथ वायव्यो वत्सोऽपरुद्धस्यैव[२३] विधीयते—तस्या एव धेनोर्द्यावापृथिव्योः हि [V]वत्सः १५ [V]वायुः। [V]इमे च द्युप्रभृतयः [V]लोकाः [V]एतस्मै पुरुषाय [V]अपशुष्काः अपरक्ता अस्मिन् भवन्ति। [V]विट् च प्रजा च [V]अपशुष्का भवति। [V]अथ [V]एषः [V]ज्योक् [V]अपरुद्धः भवति। प्र दापयतीति। [२४]अपरागं [२५]हिल्वा यथास्मै वसूनि [२६-२६]ददति लोकाः विट् च तथा करोति वायुः। ततश्च [V]अस्मै [V]इमे [V]लोकाः [V]प्र [V]स्नुवन्ति [२७]सस्नेहाः [२८]दुहन्ति वसूनि, [V]विट् च [V]एनम् [V]उप [V]तिष्ठते संगच्छते इति। संगतिकरणे (पा १.३.२५ वा १) आत्मनेपदम् [२९]कीदृशी भूत्वा ? [V]भुञ्जती* सर्वदा एनं २० +परिपालयन्ती। "भुजोऽनवने" (पा १.३.६६) इत्यात्मनेपदाभावात्[३०] "शतुरनुमः०" (पा ६.१.१७३) इति नद्या उदात्तत्वम् ॥

द्वितीये प्रथमे चतुर्थः ॥

प्रसूते सा [V]पर्यारिणी। तथा च सूत्रकारः—"पर्यारिणीति परिहारसूर्भवति" (आपश्रौ १९.१६.११) इति। [V]यः [V]ज्योगपरुद्धः [V]एतस्य [V]राष्ट्रं [V]पर्यारि [V]इव भवति, भोगकालं चिरमतीत्य पश्चात् [३३]प्राप्स्यमानत्वात्। २५ अतः सदृशयोगः [V]समृद्धयै भवति[३४] ॥

---

२२. तं१.तं२—प्रजायतः; अ.मै४—प्रजातेति। २३. लं—स्यैषः। २४. अ.तं१.तं२.मै—अपरम्; पं.लं—अपराम्। २५. लं—भित्त्वा। २६-२६. तं१.तं२.मै—ददाति। २७. पं२. मै.लं—वसस्नेहः(?); तं१.तं२—वसुस्नेहः। २८. मै४—ऊहन्ति। २९. अ.तं१.तं२.मै.लं—कीदृशा। *[शुद्धीकृतः पाठः।] मै—भुञ्जति; तं१.तं२—भुञ्जन्ति। +[शुद्धीकृतः पाठः।] लिखितपुस्तकेषु मै—पुस्तके च 'परिपालयन्ति'। ३०. मै४—°पदाभावः।

३० ३३. आ.क.ड.ड१—प्राप्यमानत्वात्; अ.उ.जो.ना.पा.हा—प्रोद्यमानत्वात्। ३४. ड१—भवतीति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

वायव्यमिति ॥ ज्योगपरुद्धस्यैव धेनुप्रयोगादूर्ध्वं वत्सप्रयोगं विधत्ते – 'वायव्यं वत्समा लभेत वायुर्वा अनयोर्वत्स इमे वा एतस्यै लोका अपशुष्का विडपशुष्काऽथैष ज्योगपरुद्धो वायुमेव स्वेन भागधेयेनोप धावति स एवास्मा इमाँल्लोकान् विशं प्र दापयति प्रास्मा इमे लोकाः स्नुवन्ति भुञ्जत्येनं विडुप तिष्ठते' इति। यथा वत्सो धेनोः समीप एव संचरति तथा वायुरपि द्यावापृथिव्योः प्रचरतीति तद्वत्सत्वम्। अत एव द्यावापृथिव्यधेनुप्रयोगसमीपे[३५] [३६]एव तदीयवत्सप्रयोगो युज्यते। यदा [V]लोकाः प्रजा च [V]एतस्मै राज्ञे [V]अपशुष्का अपरक्ता भवन्ति तदानीमेव [V]एषः [V]ज्योगपरुद्धः भवति। लोकशब्देन तत्र तत्र प्रभुत्वेन स्थिता [३७]ग्रामण्यादयः मुख्यपुरुषा उच्यन्ते, अवशिष्टा सर्वा प्रजा विट्शब्देन। वत्सेन तुष्टो वायुः [V]लोकान् [V]प्रजां च [V]प्र [V]दापयति अनुरक्तान् करोति। ते च [V]लोकाः [V]अस्मै [V]स्नुवन्ति मणिमुक्तादिधनं प्रस्रावयन्ति बाहुल्येन प्रयच्छन्तीत्यर्थः। प्रजा च [V]एनं [V]भुञ्जती पालयन्ती सेवते ॥

अत्र मीमांसा ॥ अष्टमाध्यायस्य प्रथमपादे चिन्तितम् –

"ललामादिगणे दैक्षादैकादशिनतोऽथ वा।

[३८]आद्यो विशेषराहित्यान्न गणत्वविशेषतः" ॥ (जैन्या ८·१·११) इति ॥

काम्यपशुकाण्डे पशुगणः श्रूयते– "वसन्ते ललामांस्त्रीन् वृषभानालभेत" (द्र. कासं १·३·७) इति। तत्र रशनाद्वयादिविशेषलिङ्गाभावात् दैक्षादग्नीषोमीयाद्धर्मातिदेश इति चेत्। न। गणत्वेन विशेषलिङ्गेनैकादशिनेभ्योऽतिदेशात्। ऐकादशिनानां पशुगणप्रकृतित्वं लिङ्गादवगम्यते। तथा हि सौत्रामण्यां पशुगणं प्रकृत्यैवमाम्नायते– "यत् त्रिषु यूपेष्वालभेत। बहिर्धाऽस्मादिन्द्रियं वीर्यं दध्यात्। आतृव्यमस्मै जनयेत्। एकयूप आलभते" (तैब्रा १·८·६)) इति। यद्यत्राग्नीषोमीयः प्रकृतिः स्यात्तदा[३९] चोदकादेकस्यैव यूपस्य प्राप्तत्वेन यूपत्रयप्रसक्त्यभावात् तदुपन्यासेन दोषाभिधानं [४०]पुनरेकयूपविधानं च व्यर्थं स्यात्। ऐकादशिनानां प्रकृतित्वे तु प्रतिपशु पृथग्यूपातिदेशेन प्रसक्तिसद्भावात् तदुपपद्यते। तस्मात् पशुगणेष्वैकादशिनेभ्योऽतिदेशः ॥

दशमाध्यायस्य द्वितीयपादे चिन्तितम् –

"धेनुवत्सर्षभाश्छागे गवि वा गुणकीर्तनात्।

अजेऽतिदिष्टे स्युर्मैवं गोजात्येकगुणोक्ततः" ॥ (जैन्या १०·२·३५) ॥

पशुविकृतिषु श्रूयते– 'द्यावापृथिव्यां धेनुमालभेत मारुतं वत्समैन्द्रमृषभम्' (द्र. कासं १३·५) इति। तत्र धेनुशब्दो नवसूतिकामाचष्टे। वत्सशब्दो बालम्। ऋषभशब्दः पुमांसम्। तथा सति गुणवाचिन एते शब्दा अतिदिष्टमजद्रव्यम्[४१] अबाधित्वा तदेव द्रव्यं यथोक्तगुणविशिष्टं वदन्ति। गौस्तु न प्रत्यक्षमिह श्रूयते नाप्यतिदिश्यते प्रकृतावनुपदिष्टत्वात्। अतो न गां विशिंषन्तीति [४२]पूर्वपक्षः। [४३]–न खल्वेते[४३] यथोक्तगुणसामान्यवाचिनः, किं तर्हि, [४४]तान् गोगतानेव गुणानाहुः। अतस्ते शब्दा अजेऽनुपपन्नाः सन्तोऽनुपदिष्टमनतिदिष्टमपि[४५] गां मुख्यवृत्त्या विशिंषन्तश्छागं बाधन्त इति सिद्धान्तः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

---

३५. इ–°पृथिव्यप्रयोग°। ३६. अ.आ.उ.जो. ड१.ना.हा – 'एव' नास्ति। ३७. इ–मन्वादयः। ३८. अ.उ.पा–अथो। ३९. अ.उ.पा– 'तदा' नास्ति। ४०. अ.उ.पा–°यूपप्रतिविधानम्। ४१. ड–°मजम्। ४२. ड१–पूर्वः पक्षः। ४३–४३. अ.उ.जो.ना.पा.हा–असद्धेतोः। ४४. ड.ड१–'तान्' नास्ति। ४५. ड–°ऽनुपादिष्टमपि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्रो वलस्य बिलमपौर्णोत् स य उत्तमः पशुरासीत् तं पृष्ठं प्रति संगृह्योदक्खिदत् तꣳ सहस्रं पशवोऽनूदायन्त्स उन्नतोऽभवद्यः पशुकामः स्यात् स एतमैन्द्रमुन्नतमा

इन्द्रः। वलस्य। बिलम्। अपेति। और्णोत्। सः। यः। उत्तम इत्युत-तमः। पशुः। आसीत्। तम्। पृष्ठम्। प्रतीति। संगृह्येति सं-गृह्य। उदिति। अक्खिदत्। तम्। सहस्रम्। पशवः। अनु। उदिति। आयन्। सः। उन्नत इत्युत्-नतः। अभवत्। यः। पशुकाम इति पशु-कामः। स्यात्। सः। एतम्। ऐन्द्रम्। उन्नतमित्युत्-नतम्। एति।

इन्द्रो वलस्येत्यादि॥ [v]अप [v]और्णोत् [1]अपावृतद्वारमकरोत्। स इति[2]। "सुपां सुलुक्°" (पा ७·१·३९) इति सप्तम्याः स्वादेशः। तत्र बिले वसतां पशूनां मध्ये [v]यः [v]उत्तमः [v]पशुः [v]आसीत्, [v]तं [v]पृष्ठं [v]प्रति [v]संगृह्य पृष्ठे गृहीत्वा [v]उत् [v]अक्खिदत् उत्क्षिप्तवान्। छान्दसो वर्णोपजनः। [3]उत्तमशब्द उच्छादिषु (पा ६·१·१६०) [4]पठ्यते, तेनान्तोदात्तः। लक्षणे प्रतेः कर्मप्रवचनीयत्वम् (पा १·४·८३, ८४)। [v]तम् [v]अनु [v]सहस्रं [v]पशवः [v]उत् [v]आयन् उदगच्छन्। [v]स उत्तमः पशुः [v]उन्नतः [v]अभवत्। उन्नतं पृष्ठभागेऽस्यास्तीति[5] लक्षणया तद्वानुच्यते। मत्वर्थीयो लुप्यते। यत्र [6-]गृहीतस्य उपयतः ककुदाख्य[-6] उन्नतोऽभवत्॥

ब्रह्मवर्चसकामो यश्चर्मदोषाद्बिभेति यः।
भ्रातृव्यवान् पापभीरुर्भ्रष्टराज्यश्च यो भवेत्॥
अनुवाके चतुर्थेऽस्मिन्नेतेषां पशवः श्रुताः[1]॥

अथ पञ्चमे पशुकामादीनां पशवो वक्तव्याः।

इन्द्र इति॥ [3]तत्रैकं विधातुं प्रस्तौति– 'इन्द्रो वलस्य बिलमपौर्णोत् स य उत्तमः पशुरासीत् तं पृष्ठं प्रति संगृह्योदक्खिदत् तꣳ सहस्रं पशवोऽनूदायन्त्स उन्नतोऽभवत्' इति। वलनामकः कश्चिदसुरस्तस्करो भूत्वा यतस्ततो बहून् पशूनपहृत्य कस्मिंश्चित् भूबिले स्थापयामास। तं च [3]वृत्तान्तमवगत्य [v]इन्द्रः [v]बिलम् [v]अपौर्णोत्, द्वारपिधानाय प्रक्षिप्तं पाषाणमपनीतवान्। तत्र [v]यः [v]उत्तमः [v]पशुः [4v]तं [v]पृष्ठं [v]प्रति पृष्ठदेशे [5]पृष्ठमूलमवलम्ब्य [v]उदक्खिदत् [1]उत्क्षिप्तवान्। तस्य पशोर्यूथपतित्वात् [v]तम् [v]अनु [v]सहस्रं [v]पशवः उद्गतवन्तः। [v]सः च मुख्यः पशुर्यूथपतित्वेन पूर्वमेवोन्नतोऽपि [7]पश्चादिन्द्रोत्क्षेपणेनात्यन्तम् [v]उन्नतः [v]अभवत्॥

१. पं२.लं–अपवृत°। २. मै४–इति स इन्द्रः। ३. लं–उत्तरशब्दः। ४. तं१.तं२.लं–निपात्यते। ५. मै४–°स्तीत्युन्नतः; तं१.तं२–°स्तीत्युन्नतं। ६–६. अ.तं१.तं२.मै.लं–गृहीतपेसवः (?) ककुदाख्यः; पं२–हि तपेसच(?)त्तदाख्यः।

१. अ–स्मृताः। २. अ.आ.उ.क.ने.पा–तत्रैवं। ३. ड.ड१.ने–°मवगम्य। ४. आ–तं पशुं। ५. इ.क.जो.हा–पुच्छमूल°। ६. ड.ड१–क्षिप्तवान्। ७. ड.ड१.ने.हो१–°दिन्द्रक्षे°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

लभेतेन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भवत्युन्नतो (१) भवति साहस्री वा एषा लक्ष्मी यदुन्नतो लक्ष्मियैव पशूनव रुन्द्धे यदा सहस्रं पशून् प्राप्नुयादथ वैष्णवं वामनमा लभेतैतस्मिन् वै तत् सहस्रमध्यतिष्ठत्

लभेत । इन्द्रम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मै । पशून् । प्रेति । यच्छति । पशुमानिति पशु-मान् । एव । भवति । उन्नत इत्युत्-नतः (१) । ५
भवति । साहस्री । वै । एषा । लक्ष्मी । यत् । उन्नत इत्युत्-नतः । लक्ष्मिया । एव । पशून् ।
अवेति । रुन्द्धे । यदा । सहस्रम् । पशून् । प्राप्नुयादिति प्र-आप्नुयात् । अथ । वैष्णवम् । वामनम् ।
एति । लभेत । एतस्मिन् । वै । तत् । सहस्रम् । अधीति । अतिष्ठत् ।

साहस्रीति ॥ सहस्रस्य निमित्तभूता । " [७]शतमानविंशतिक° " (पा ५·१·२७) इत्यण्[७] । [v]लक्ष्मी लक्षणम् । " सुपां सुलुक्° " (पा ७·१·३९) इति सोर्लुक् । यदेत्यादि । गतम् । १०
[८-v]समीषितः सम्यगीषितः[८-]। अहोरात्राण्येवेति । अहोरात्राणां [९]पशूनां च[९] सहस्रत्वात् प्रजाताः पशवः प्रतिष्ठिता भवन्ति । " हेमन्तशिशिरावहोरात्रे च° " (पा २·४·२८) इति पूर्ववल्लिङ्गता । पशुबन्धान्तरमिदम् । पशूनां सहस्रं प्राप्याहोरात्राणां [v]सहस्रं [१०]स्थित्वा [v]अथ [v]वैष्णवं [v]वामनम् [v]आ [v]लभेत ॥

**य इति ॥ विधत्ते–' यः पशुकामः स्यात् स एतमैन्द्रमुन्नतमा लभेतेन्द्रमेव स्वेन भागधेयेनोप १५
धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भवति ' इति ॥**

उन्नत इति ॥ पशोरौन्नत्यं प्रशंसति – ' उन्नतो भवति साहस्री वा एषा लक्ष्मी यदुन्नतो लक्ष्मियैव पशूनव रुन्द्धे ' इति । [r]उन्नतः इति [r]यत्, [r]एषा [r]साहस्री [r]लक्ष्मी सहस्रस्य निमित्तभूता तत एव लक्ष्मी संपद्रूपा । तथा सत्युन्नतालम्भेन पशुसमृद्धिरूपया लक्ष्म्या युक्तस्तान् [r]पशून् [r]अव [r]रुन्द्धे ॥

**यदेति ॥ पूर्वत्र यथा धेनुमालब्धवतः पश्चाद्वत्सालम्भो विहितः, [८]एवमत्राप्युन्नतमालब्धवतो २०
वामनालम्भं विधते– ' यदा सहस्रं पशून् प्राप्नुयादथ वैष्णवं वामनमा लभेतैतस्मिन् वै तत् सहस्रमध्यतिष्ठत् तस्मादेष वामनः समीषितः पशुभ्य एव प्रजातेभ्यः प्रतिष्ठां दधाति ' इति । पशुकाम उन्नतमालभ्य तत्फलभूतान् [९]पशून् [९]प्राप्नुवन् [१०]सहस्रप्राप्तेरूर्ध्वं [r]वामनम् [r]आ [r]लभेत । यस्मात् [r]एतस्मिन् वामने [r]तत् उन्नतं पशुसहस्रम् [११r]अध्यतिष्ठत् आरोहति, [r]तस्मात् सहस्रपशुप्रियत्वात् [r]एषः[१२] [r]वामनः [१३]अपि विष्णोः सम्यगपेक्षितः । [१४]एतस्याऽऽलम्भेन पूर्वमुत्पन्नेभ्यः सहस्रपशुभ्यः [१५]पश्वर्थं [r]प्रतिष्ठां तृणोदकसंपूर्णं २५
निवासस्थानं कृतवान् भवति ॥**

७–७. लं–शतमानविंशतिप्रकृत्यन्नम् (?)। ८–८. म४–समीषितः सम्यगीप्सितः ; अ.लं–समीक्षितः । ९–९. अ.तं२.लं– च पशूनां । १०. लं–' स्थित्वा ' नास्ति ।

८. ड१–एवमत्रोन्नत° । ९. इ.जो.ना–प्राप्नुयात् । १०. ड–प्राप्त्यूर्ध्वम् । ११. आ.ड.ड१–लीलार्थम् । १२. अ.आ.उ.क.जो.ना.पा.हा–एव । १३. आ.क.ड.ड१.हो१– ' अपि ' नास्ति । ३०
१४. ड१–अत एतस्या° । १५. अ.उ.पा–पशु° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मादेष वामनः समीषितः पशुभ्य एव प्रजातेभ्यः प्रतिष्ठां दधाति कोऽर्हति सहस्रं पशून् प्राप्तुमित्याहुरहोरात्राण्येव सहस्रꣳ संपाद्याऽऽ लभेत पशवो (२) वा अहोरात्राणि पशूनेव प्रजातान् प्रतिष्ठां गमयत्योषधीभ्यो वेहतमा लभेत प्रजाकाम ओषधयो वा एतं प्रजायै परि बाधन्ते योऽलं प्रजायै सन् प्रजां न विन्दत औषधयः
५ खलु वा एतस्यै सूतुमपि घ्नन्ति

तस्मात्। एषः। वामनः। समीषित इति सम्-ईषितः। पशुभ्य इति पशु-भ्यः। एव। प्रजातेभ्य इति प्र-जातेभ्यः। प्रतिष्ठामिति प्रति-स्थाम्। दधाति। कः। अर्हति। सहस्रम्। पशून्। प्राप्तुमिति प्र-आप्तुम्। इति। आहुः। अहोरात्राणीत्यहः-रात्राणि। एव। सहस्रम्। संपाद्येति सं-पाद्य। एति। लभेत। पशवः (२)। वै। अहोरात्राणीत्यहः-रात्राणि। पशून्। एव। प्रजातानिति प्र-जातान्।
१० प्रतिष्ठामिति प्रति-स्थाम्। गमयति। ओषधीभ्य इत्योषधि-भ्यः। वेहतम्। एति। लभेत। प्रजाकाम इति प्रजा-कामः। ओषधयः। वै। एतम्। प्रजाया इति प्र-जायै। परीति। बाधन्ते। यः। अलम्। प्रजाया इति प्र-जायै। सन्। प्रजामिति प्र-जाम्। न। विन्दते। ओषधयः। खलु। वै। एतस्यै। सूतुम्। अपीति। घ्नन्ति।

ओषधीभ्यः इत्यादि॥ "ओषधेश्च°" (पा ६.३.१३२) इति दीर्घत्वम्। वेहद्गर्भनाशिनी।
१५ ओषधयः खलु इति। एतस्या वेहतः [v]सूतुं सोतव्यं गर्भम्। औणादिकस्तुन् प्रत्ययः।

क इति॥ एतस्यैव[१६] वामनस्य सहस्रप्राप्तिकालादन्यं कालं विधत्ते – 'कोऽर्हति सहस्रं पशून् प्राप्तुमित्याहुरहोरात्राण्येव सहस्रꣳ संपाद्याऽऽ लभेत पशवो वा अहोरात्राणि पशूनेव प्रजातान् प्रतिष्ठां गमयति' इति। सहस्रप्राप्तिः प्रायेण दुर्लभा, विघ्नानां चोरव्याघ्रादिकृतानां बहुत्वात्। अतः पशुप्राप्तेरूर्ध्वं [१७]सहस्रदिनान्यतिवाह्य [r]आ [r]लभेत। पशवो हि क्षीरादिभोगार्थं [१८]संपाद्यन्ते। तत्रैकैकस्मिन् दिने तद्भोग-
२० प्रदानादेकैकः पशुरिति गणनायां सहस्रसंख्याकान्यहोरात्राण्येव सहस्रं पशवः संपद्यन्ते। ततः सहस्रदिनेभ्य ऊर्ध्वं वामनालम्भेन यावतां [१९-]तावतां वा[१९] विद्यमानानां [२०]पशूनां प्रतिष्ठा [२१]संपादिता भवति॥

ओषधीभ्य इति॥ प्रजाकामस्य पशुं विधते– 'ओषधीभ्यो वेहतमा लभेत प्रजाकाम ओषधयो वा एतं प्रजायै परि बाधन्ते योऽलं प्रजायै सन् प्रजां न विन्दत ओषधयः खलु वा एतस्यै सूतुमपि घ्नन्ति या वेहद्भवत्योषधीरेव स्वेन भागधेयेनोप धावति ता एवास्मै स्वाद्योनेः प्रजां प्र जनयन्ति विन्दते प्रजामापो वा
२५ ओषधयोऽसत् पुरुष आप एवास्मा असतः सद्ददति तस्मादाहुर्यश्चैवं वेद यश्च नाऽऽपस्त्वावासतः सद्ददतीति' इति। [r]वेहतं [२२]गर्भविनाशिनीम्। [r]यः प्रजोत्पादने समर्थोऽपि [r]प्रजां [r]न लभते [r]एतं प्रजार्थमोषधिदेवताः परितः [r]बाधन्ते। अतस्ताभ्यः [२३]देवताभ्यः आलम्भो युक्तः। [r]या गौर्गर्भनाशिनी [r]भवति एतस्याः [r]सूतुं गर्भम् [r]ओषधयः [२४-r]अपि [r]घ्नन्ति[-२४]। अतस्तासां प्रियाया वेहत आलम्भेन तुष्टा ओषधयो यजमानार्थं [r]स्वात्

१६. आ.क.ड.ड१.ने–'एव' नास्ति। १७. ड–°न्यतिसंपाद्य। १८. अ.उ.पा–संपद्यन्ते।
३० १९–१९. ड.ड१.ने.हो१–गवि; क.हा–'वा' नास्ति। २०. ड१–'पशूनां' नास्ति। २१ ड.ड१.ने.हो१–कृता। २२. अ.उ.ड१.ना.पा–गर्भनाशिनीम्। २३. आ.ड.ड१–'देवताभ्यः' नास्ति। २४–२४. ने–निघ्नन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

या वेहद्भवत्योषधीरेव स्वेन भागधेयेनोप धावति ता एवास्मै स्वाद्योनेः प्रजां प्र जनयन्ति विन्दते (३) प्रजामापो वा ओषधयोऽसत् पुरुष आपः एवास्मा असतः सद्ददति तस्मादाहुर्यश्चैवं वेद यश्च नाऽऽपस्त्वावासतः सद्ददती-

---

या। वेहत्। भवंति। ओषधीः। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। ताः। एव। अस्मै। स्वात्। योनेः। प्रजामिति प्र-जाम्। प्रेति। जनयन्ति। विन्दते (३)। प्रजामिति ५
प्र-जाम्। आपः। वै। ओषधयः। असत्। पुरुषः। आपः। एव। अस्मै। असतः। सत्। ददति। तस्मात्। आहुः। यः। च। एवम्। वेद। यः। च। न। आपः। तु। वाव। असतः। सत्। ददति। इति।

---

[v]अपि [v]घ्नन्ति यथेष्टं घ्नन्ति। आपो वा इति। तद्धेतुत्वात्तच्छब्दत्वम्, [११]व्यापित्वाद्वा। असदिति। [१२]अव्यक्तावस्थकारणरूपं [१३v]पुरुषः। तस्मादोषधीनामपि हेतुभूताः [v]आपः [v]एव [v]असतः १०
अव्यक्तात् [v]सत् व्यक्तं प्रजालक्षणं [v]ददति [v]अस्मै यजमानाय ओषधीभ्यो वेहतमालभमानाय। तस्मादाहुरिति। [v]यः [v]च [v]एवम् अपां हेतुत्वं [v]वेद, [१४-]लौकिकः [v]यः [v]च [v]न वेद, ते सर्वेऽपि[-१४]
[v]आपः खलु [v]असतः [v]सत् [v]ददति [v]इति आहुः अप्संसर्गादेव सर्वबीजाङ्कुरोत्पत्तिं पश्यन्तः। "तुनुपूर्व उदात्तयोर्वकारः" (तैप्रा ५.१३) इति वकारो लुप्यते॥

---

[v]योनेः यजमानसंबन्धिवीर्यात् [v]प्रजाम् उत्पादयन्ति [२७]औरसीमेव [२६]प्रयच्छन्ति, न तु क्षेत्रजपुत्रिकासुतादिकम्। १५
ततोऽसावौरसीमेव [v]प्रजां लभते। [२७]ता ओषधयो [२८]लोकप्रसिद्ध्या स्तूयन्ते। तत्र तावत् [v]आपः एव [v]ओषधयः अपामोषधिकारणत्वात्। [v]पुरुषः यजमानस्य [२९]उत्पत्स्यमानः पुत्रः। स चोत्पत्तेः प्राक् [v]असत् इत्युच्यते, स्वकारणभूतरेतोऽवस्थायामनभिव्यक्तत्वात्। तथा सत्यब्रूपेण [३०]स्थिता ओषधय [v]एव यजमानार्थ-मनभिव्यक्तशरीराकाराद्रेतसः [v]सत् अभिव्यक्तशरीरं प्रयच्छन्ति। यस्मादेवं [v]तस्मात् [३१]कारणादीदृश-वृत्तान्ताभिज्ञास्तदनभिज्ञाश्च लौकिका एवम् [v]आहुः—[v]आपः [३२]एवास्मा [v]असतः [v]सत् [v]ददति [v]इति। तत्राभिज्ञा २०
ओषधिदेवताकृतं यथोक्तं पुत्रप्रदानमभिलक्ष्यैवं वदन्ति। अनभिज्ञास्तु क्षेत्रेषु जलसंपत्त्या सस्यनिष्पत्तिम-भिलक्ष्य आपः एव असतः सस्यरहितात् क्षेत्रात् [३३-]सत् विद्यमानत्वेन[-३३] भासमानं सस्यं ददति इत्याहुः। यद्यभिज्ञा ओषधीनां पुत्रप्रदत्वमाहुः, यदि वाऽनभिज्ञा अपां सस्यप्रदत्वमाहुः, सर्वथाऽपि प्रशस्तमेवौषधिविषयं कर्म॥

---

११. अ.तं.१.पं२.मै.लं–व्यापित्वो वा। १२. मै.लं–अव्यक्तावस्थं करणरूपं। १३. अ.मै४–प्रजायाः। १४.अ.तं२.मै.लं–यश्च न वेद लौकिकः ते सर्वे। २१

---

२५. अ.आ.उ.क.जो.ना.पा.हा–स्वरेतसैव। २६. ड–प्रयच्छन्तु। २७. ड.ड१–ताश्च। २८. अ.उ.पा–लोकप्रसिद्धाः। २९. अ.आ.उ.क.जो.पा.हा–उत्पद्यमानः; ना–उत्पाद्यमानः। ३०. क.ने.हो१–स्थित्वा। ३१. ने–'कारणात्' नास्ति। ३२. अ.उ.ड.ड१.ना.ने.पा.हो१ – 'अस्मै' नास्ति। ३३–३३. ड.ड१.ने.हो१ संदिहयमानत्वेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्यैन्द्रीꣳ सूतवशामा लभेत भूतिकामोऽजातो वा एष योऽलं भूत्यै सन् भूतिं न प्राप्नोतीन्द्रं खलु वा एषा सूत्वा वशाऽभव(४)दिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येव यꣳ सूत्वा वशा स्यात् तमैन्द्रमेवाऽऽ लभेतैतद्वाव तदिन्द्रियꣳ साक्षादेवेन्द्रियमव रुन्द्धे

५ ऐन्द्रीम्। सूतवशामिति सूत-वशाम्। एति। लभेत। भूतिकाम इति भूति-कामः। अजातः। वै। एषः। यः। अलम्। भूत्यै। सन्। भूतिम्। न। प्राप्नोतीति प्र-आप्नोति। इन्द्रम्। खलु। वै। एषा। सूत्वा। वशा। अभवत् (४)। इन्द्रम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। भूतिम्। गमयति। भवति। एव। यम्। सूत्वा। वशा। स्यात्। तम्। ऐन्द्रम्। एव। एति। लभेत। एतत्। वाव। तत्। इन्द्रियम्।
१० साक्षादिति स-अक्षात्। एव। इन्द्रियम्। अवेति। रुन्द्धे।

ऐन्द्रीमित्यादि॥ सूतवशा सकृत्प्रसूता वन्ध्या। अजातो वा इति। अजातकल्पत्वात्। इन्द्रं खल्विति। [१५]प्रथमं सूतवशा [V]इन्द्रं [V]सूत्वा जनयित्वा ततः [V]वशा [V]अभवत् तस्मात् [V]ऐन्द्रीम् [V]आ [V]लभेत इति। यमित्यादि। इन्द्रियकामस्य [V]यं [V]सूत्वा [V]वशा स्यात् [१६V]तं प्रथमवत्सम् इन्द्राय [१७-V]आ [V]लभेत इति[-१७]। एतदिति प्रजारूपम्॥

१५ **ऐन्द्रीमिति॥** भूतिकामस्य पशुं विधत्ते– 'ऐन्द्रीꣳ सूतवशामा लभेत भूतिकामोऽजातो वा एष योऽलं भूत्यै सन् भूतिं न प्राप्नोतीन्द्रं खलु वा एषा सूत्वा वशाऽभवदिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येव' इति। सकृद्वत्समुत्पाद्य पश्चाद्वन्ध्या गौः सूतवशा। [V]यः [V]भूत्यै योग्योऽपि [V]भूतिं [V]न [V]प्राप्नोति सोऽयमुत्पन्नोऽप्यनुत्पन्नसम एव। तस्मादयम् [V]आ [V]लभेत। [V]एषा अपि सूतवशा प्रथममिन्द्रसमानं वत्समुत्पाद्य वन्ध्या [V]अभवत्॥

२० **यमिति॥** तस्मात् [३४V]इन्द्रस्य प्रियायाः सूतवशायाः प्रयोगादूर्ध्वं वत्सप्रयोगं विधत्ते– 'यꣳ सूत्वा वशा स्यात् तमैन्द्रमेवाऽऽ लभेतैतद्वाव तदिन्द्रियꣳ साक्षादेवेन्द्रियमव रुन्द्धे' इति। सूतवशाया वत्स इन्द्रसमानः। अत एवेन्द्रमातुः [३५]सूतवशारूपेण निष्पत्तिरेवमाम्नायते– "सोऽमन्यत यो वै मदितोऽपरो जनिष्यते स इदं भविष्यतीति तस्या अनुमृश्य योनिमाऽच्छिनत् सा सूतवशाऽभवत् तत्सूतवशायै जन्म" (तैसं ६.१.३) इति। तथा सति स्वसमानत्वेनेन्द्रप्रियं [३६V]तम् एनं वत्सम् [V]ऐन्द्रम् [V]एव [V]आ [V]लभेत।
२५ [३७]वत्सस्येन्द्रियकार्यत्वादैन्द्रत्वान्मुख्यम् [V]एव [V]इन्द्रियम् [V]अव [V]रुन्द्धे॥

१५. पं२–प्रथमा। १६. तं२.मै.लं–तत्। १७–१७. मै–आलभतेति।

३४. आ.क–'इन्द्रस्य' नास्ति। ३५. अ.उ.पा–सूतवशाया रूपेण। ३६. क.ड.ने.हो१–'तम्' नास्ति। ३७. इ.जो–°कार्यत्वान्मुख्य°; ने–°कार्यादैन्द्रान्मुख्य°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

ऐन्द्राग्नं पुनरुत्सृष्टमा लभेत य आ तृतीयात् पुरुषात् सोमं न पिबेद्विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्ना (५) तृतीयात् पुरुषात् सोमं न पिबतीन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मै सोमपीथं प्र यच्छत उपैनꣳ सोमपीथो नमति यदैन्द्रो भवतीन्द्रियं वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्द्धे

ऐन्द्राग्नमित्यैन्द्र-अग्नम्। पुनरुत्सृष्टमिति पुनः-उत्सृष्टम्। एति। लभेत। यः। एति। तृतीयात्। ५
पुरुषात्। सोमम्। न। पिबेत्। विच्छिन्न इति वि-छिन्नः। वै। एतस्य। सोमपीथ इति
सोम-पीथः। यः। ब्राह्मणः। सन्। एति (५)। तृतीयात्। पुरुषात्। सोमम्। न। पिबति।
इन्द्राग्नी इतीन्द्र-अग्नी। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तौ। एव।
अस्मै। सोमपीथमिति सोम-पीथम्। प्रेति। यच्छतः। उपेति। एनम्। सोमपीथ इति सोम-पीथः।
नमति। यत्। ऐन्द्रः। भवति। इन्द्रियम्। वै। सोमपीथ इति सोम-पीथः। इन्द्रियम्। १०
एव। सोमपीथमिति सोम-पीथम्। अवेति। रुन्द्धे।

[१८-१८]ऐन्द्राग्नमिति॥ पुनरुत्सृष्टः[१८-१९] [१९-१९]जीर्णो गालितवृषणः[१९-२०] [२०-२०]पुंगवः। महर्षभार्थ[२०-२१] गोषु मुक्त इत्येके। 'पुनरुत्सृष्टः छागः' इति भरद्वाजमतम्। आ तृतीयादिति। [२१]अभिविधावाकार इत्येके। तृतीयमपि गृहीत्वा इत्यन्ये। [२२]सोमपीथः सोमपानम्। औणादिकस्थक् प्रत्ययः (उ १६४)। इन्द्रियं [२३]वा इति। तद्धेतुत्वात्तच्छब्दयम्। आग्नेयो वा इति। अग्निर्देवता अस्येति सर्वत्र १५
"°अग्निकलिभ्यां°" (द्र. पाभा ४·२·७ वा १, पा ४·२·३३, ४·२·८) इति ढक्[२३]॥

**ऐन्द्राग्नमिति॥ विच्छिन्नसोमपीथस्य पशुं विधत्ते—'ऐन्द्राग्नं पुनरुत्सृष्टमा लभेत य आ तृतीयात् पुरुषात् सोमं न पिबेद्विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्ना तृतीयात् पुरुषात् सोमं न पिबतीन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मै सोमपीथं प्र यच्छत उपैनꣳ सोमपीथो नमति' इति। गालितवृषणो बलीवर्द उत्सृष्ट इत्युच्यते। स एव [३८-३८]ततो जीर्णः[३८-३९] लाङ्गलवहनादेः[३९] मुक्तः २०
पुनरुत्सृष्टः। स्वात्मानमारभ्य तृतीयः पुरुषः पितामहः पिता स्वयं च यदा [४०]सोमं [४०]न पिबेयुस्तदानीमेतस्य [४०]त्रयस्य [४१-४१]सोमपानं विच्छिन्नं[४१-४१], स एतं[४२] पशुम् [४०]आ लभेत॥**

यदिति॥ इन्द्रमग्निं च क्रमेण प्रशंसति—'यदैन्द्रो भवतीन्द्रियं वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्द्धे यदाग्नेयो भवत्याग्नेयो वै ब्राह्मणः स्वामेव देवतामनु सं तनोति' इति। सोमपानस्येन्द्रियवृद्धिहेतुत्वादिन्द्रियरूपत्वम्॥ २५

१८–१८. अ.मै४–ऐन्द्राग्नं पुनरुत्सृष्टमिति। १९–१९. तं१–जीर्णो गामित°; तं२–जीर्णोद्गालित°।
२०–२०. मै४–ऋषभार्थं। २१. मै४–मर्यादायामाकारः। २२. मै४–वै सोमपीथः। २३. अ–थक्; मै४–ठक्।

३८–३८. ने–जीर्णाङ्गः; अ.आ.उ.क.ड.ड१.जो.ना.पा.हा.हो–'ततो' नास्ति। ३९. ने.हो१–°वहनादिना; ड–°वाहनादिना;ड१–°वहनादि°। ४०. ड१–'त्रयस्य' नास्ति। ४१–४१ हो१–सोमपानविच्छिन्नस्य। ४२. ड१–एवम्। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदाग्नेयो भवत्याग्नेयो वै ब्राह्मणः स्वामेव देवतामनु सं तनोति पुनरुत्सृष्टो भवति पुनरुत्सृष्ट इव ह्येतस्य (६) सोमपीथः समृद्ध्यै ब्राह्मणस्पत्यं तूपरमा लभेताभिचरन् ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्छति

यत्। आग्नेयः। भवति। आग्नेयः। वै। ब्राह्मणः। स्वाम्। एव। देवताम्। अनु। समिति। तनोति। पुनरुत्सृष्ट इति पुनः-उत्सृष्टः। भवति। पुनरुत्सृष्ट इति पुनः-उत्सृष्टः। इव। हि। एतस्य (६)। सोमपीथ इति सोम-पीथः। समृद्ध्या इति सम्-ऋद्ध्यै। ब्राह्मणस्पत्यमिति ब्राह्मणः-पत्यम्। तूपरम्। एति। लभेत। अभिचरन्नित्यभि-चरन्। ब्रह्मणः। पतिम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तस्मै। एव। एनम्। एति। वृश्चति। ताजक्। आर्तिम्। एति। ऋच्छति।

ब्राह्मणस्पत्यमिति॥ ब्रह्म परिबृढं [२४]यज्ञाख्यं कर्म, तस्य पालकोऽग्निः ब्रह्मणस्पतिः। तूपरः शृङ्गहीनः। पुच्छहीन इत्येके। [v]अभिचरन् मारयन् शत्रून्। ब्रह्मणः [२५]षष्ठ्याः छान्दसोऽलुक्। "षष्ठ्याः पतिपुत्र०" (पा ८·३·५३) इति सत्वम्। एनमिति। अभिचर्यमाणं तस्मै ब्रह्मणस्पतये आभिमुख्येन [v]वृश्चति। [v]ताजक् तदानीमेव [v]आर्तिं प्राप्नोति। "उपसर्गादृति धातौ" (पा ६·१·९१) इति वृद्धिः॥

पुनरुत्सृष्ट इति॥ पशुविशेषणं प्रशंसति–'पुनरुत्सृष्टो भवति पुनरुत्सृष्ट इव ह्येतस्य सोमपीथः समृद्ध्यै' इति। प्रथमं पितामहेन सोमपीथ उत्सृष्टः पुनः पित्रा, पुनरपि स्वेन, तत उक्तपशुसादृश्यात् तदालम्भः [v]समृद्ध्यै संपद्यते॥

ब्राह्मणस्पत्यमिति॥ अभिचरतः पशुं विधत्ते – 'ब्राह्मणस्पत्यं तूपरमा लभेताभिचरन् ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छति' इति। स ब्रह्मणस्पतिः [v]तस्मै [v]एव यजमानार्थमेव [v]एनं वैरिणम् [v]आ [v]वृश्चति समन्तात् छिनत्ति, तदानीमेव वैरी मरणं प्राप्नोति॥

२४. पं२–यज्ञार्थं। २५. तं.मै.लं–'षष्ठ्याः' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

तूपरो भवति क्षुरपविर्वा एषा लक्ष्मी यत्तूपरः समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणात्येवैनं

तूपरः । भवति । क्षुरपविरिति क्षुर-पविः । वै । एषा । लक्ष्मी । यत् । तूपरः । समृद्ध्या इति सम्-ऋद्ध्यै । स्फ्यः । यूपः । भवति । वज्रः । वै । स्फ्यः । वज्रम् । एव । अस्मै । प्रेति । हरति । शरमयमिति शर-मयम् । बर्हिः । शृणाति । एव । एनम् । ५

क्षुरपविरिति ॥ क्षुरत्वे छेदनसामर्थ्ये स्थितं पवित्वं वज्रत्वं यस्याः सा तथोक्ता [२६]शीघ्रच्छेदिनी, [V]लक्ष्मी लक्षणम् ॥

[२७-२७]स्फ्य इति ॥ स्फ्याकृतिः [V]यूपः कार्यः, स्फ्य एव वा[२८] यूपः कार्यः । तदानीमन्येन स्फ्यकार्यं कुर्यात् । शरमयमिति । " नित्यं वृद्धशरादिभ्यः " (पा ४·३·१४४) इति विकारे मयट् । [२९-२९]शरोऽपि पङ्क्तृणविशेषः *तत्पर्णमयं भवति । शॄ हिंसायाम् । " पुंसि संज्ञायां घः° " (पा ३·३·११८) ॥ १०

तूपर इति ॥ पशुविशेषणं प्रशंसति – ' तूपरो भवति क्षुरपविर्वा एषा लक्ष्मी यत्तूपरः समृद्ध्यै ' इति ॥ [V]तूपरः इति [V]यत् [V]एषा [V]क्षुरपविः [V]वै, [४३-४३]क्षुर इव तीक्ष्णा धारा वज्रे[४३] यस्याः सा क्षुरपविस्तादृशी [V]लक्ष्मी वैरिमारणार्था [४५]संपद्यते । शृङ्गाभावेऽपि [४५]युध्यन् मेष इव सहसा घातं करोतीति वज्रसाम्यम् ॥

स्फ्य इति ॥ यूपस्य चोदकप्राप्तमष्टाश्रित्वादिरूपमपवदितुं स्फ्यसमानमाकारं विधत्ते– ' स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति ' इति । अत्र सूत्रम्– " स्फ्यो यूप इति स्फ्याकृतिर्यूपः " (आपश्रौ १९·१६·१२) इति ॥ १५

शरमयमिति ॥ कुशमयमपवदितुं विधत्ते– ' शरमयं बर्हिः शृणात्येवैनम् ' इति । शृणन्ति हिंसन्तीति शरास्तृणविशेषाः, येषु तृणेषूत्पन्नैः काष्ठैः [४६]बाणाः क्रियन्ते । तेषां च [४७]तृणानां शीर्षैः[४८] [४९]वज्रावयवैः [५०]उत्पन्नत्वात् हिंसकत्वम् । वज्रावयवैरुत्पत्तिरन्यत्राऽऽम्नायते—" इन्द्रो वृत्राय वज्रं प्राहरत् स त्रेधा व्यभवत् स्फ्यस्तृतीयꣳ रथस्तृतीयꣳ यूपस्तृतीयं येऽन्तःशरा अशीर्यन्त ते शरा अभवन् तच्छराणाꣳ शरत्वम् " (तैसं ६·१·३) इति । तस्माच्छरमयेन बर्हिषा वैरिणं हिनस्त्येव ॥ २०

२६. अ–°च्छेदने । २७–२७. लं–' स्फ्य इति ' नास्ति । २८. अ–' वा ' नास्ति । २९–२९. अ.मै४–शरो वंशविशेषः । *[' तन्मयम् ' इति मै–तलटिपण्यां निर्दिष्टः पाठः ।]।

४३–४३. ड१–क्षुरवत्तीक्ष्णधारो वज्रो । ४४. ने–' संपद्यते ' इत्यस्यानन्तरं ' शृङ्गाभावस्तूपरः ' । ४५. आ.क.जो.ना.हा–युद्धे । ४६. अ.आ.उ.क.जो.ड.पा.हा–ब्राह्मणाः;ड१–तृणी° । ४७. इ.जो.हा–तृणादीनाम् । ४८. आ–शीर्ष्णैर्व° । ४९. अ.उ.पा–ब्रह्मावयवैः; ड१–प्रजावयवैः । ५०. ड.ने.हो१–' उत्पन्नत्वात् ' इत्यस्यानन्तरं ' पशुत्वाच्च ' । २५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैभीदक इध्मो (७) भिनत्त्येवैनम् ॥ ५ ॥

[भवत्युन्नतः पशवो विन्दतेऽभवत् सन्नैतस्येध्मस्त्रीणि च ।]

वैभीदकः । इध्मः (७) । भिनत्ति । एव । एनम् ॥ ५ ॥

[मैसं २.५.३, ४, ८, ९ कासं १३.३-४]

५ वैभीदक इति । "पलाशादिभ्यो वा" (पा ४.३.१४१) इत्यञ् । विभीदकः अक्षद्रुमः । [३०]विभिनत्तीति विभीदः । इगुपधात्कः[-३०] (पा ३-१.१३५), ततः संज्ञायां कन् (पा ५.३.८७) । पृषोदरादित्वात् दीर्घत्वम् (पा ६.३.१०९) ॥

इति द्वितीये प्रथमे पञ्चमोऽनुवाकः ॥

वैभीदक इति ॥ पालाशमिध्मं [५१]बाधितुं विधत्ते[५१]– 'वैभीदक इध्मो भिनत्त्येवैनम्' इति ॥
१० **[५२]अक्षशब्दवाच्याद्वृक्षादुत्पन्नः [r]वैभीदकः । स च विशेषेण [५३]भेत्तुं शक्त इति कृत्वा वैरिणं [r]भिनत्ति [r]एव ॥**

अत्र मीमांसा ॥ दशमाध्यायस्य चतुर्थपादे चिन्तितम्—

"समुच्चेयं शरमयं [५४]कौशेनोतास्य बाधकम् ।
प्राचुर्यस्य विधेराद्यो मैवं प्रतिपदोक्ततः" ॥ (जैन्या १०.४.२) ॥

"सोमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणामभिचरन्" (मैसं २.१.६ ; कासं ११.५) इत्यत्र
१५ **"शरमयं बर्हिर्भवति" (मैसं २.१६; कासं ११.५) इति श्रुतम्, तदिदं प्राकृतेन कुशबर्हिषा सह समुच्चीयते । कुतः ? मयट्शब्देन [५५]प्राचुर्यस्याभिधानात् (द्र. काशिका पा ५.४.२१) [५६]अबाधेनापि तदुपपत्तेरिति पूर्वः पक्षः । "नित्यं वृद्धशरादिभ्यः" (पा ४.३.१४४) इति सूत्रेण शरशब्दात् विकारार्थो मयट्प्रत्ययः प्रतिपदोक्तः । अतस्तं परित्यज्य प्राचुर्यार्थो न ग्रहीतुं शक्यः । किं च प्राचुर्यार्थत्वे कार्यान्तरं [५७]कल्पनीयं स्यात् । तस्मात् कुशबर्हिषो बाधकमिति राद्धान्तः ॥**

२० **इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥**

३०–३०. मै.लं–विभिनत्तीति विभीदः; अ.मै४–भिनत्तीति विविधं भिनत्तीति विभीदकः इगुपधात् कः ।

५१–५१. ने–अपवदितुम् । ५२. इ.ना.जो.हा–अत्र विभीतकशब्द°। ५३. ड१–छेत्तुम् । ५४. अ.उ.पा–कौशं वोतास्य; ने–कुशेनोतास्य । ५५. ड–शरप्राचुर्यविधानात् ; ड१–शरप्राचुर्यस्य
२५ विधानात् । ५६. क.हा–अबाधेऽपि; हो१–अबाध्येऽपि ५७. हा–कल्प्यम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

बार्हस्पत्यꣳ शितिपृष्ठमा लभेत ग्रामकामो यः कामयेत पृष्ठꣳ समानानाꣳ स्यामिति बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनं पृष्ठꣳ समानानां करोति ग्राम्येव भवति शितिपृष्ठो भवति बार्हस्पत्यो ह्येष देवतया समृद्ध्यै पौष्णꣳ श्याममा लभेतान्नकामोऽन्नं वै पूषा पूषणमेव स्वेन भागधेयेनोप धावति स एवास्मा (१) अन्नं प्र यच्छत्यन्नाद एव भवति ५

बार्हस्पत्यम्। शितिपृष्ठमिति शिति-पृष्ठम्। एति। लभेत। ग्रामकाम इति ग्राम-कामः। यः। कामयेत। पृष्ठम्। समानानाम्। स्याम्। इति। बृहस्पतिम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। पृष्ठम्। समानानाम्। करोति। ग्रामी। एव। भवति। शितिपृष्ठ इति शिति-पृष्ठः। भवति। बार्हस्पत्यः। हि। एषः। देवतया। समृद्ध्या इति सम्-ऋद्ध्यै। पौष्णम्। श्यामम्। एति। लभेत। अन्नकाम इत्यन्न-कामः। अन्नम्। वै। पूषा। १० पूषणम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै (१)। अन्नम्। प्रेति। यच्छति। अन्नाद इत्यन्न-अदः। एव। भवति।

बार्हस्पत्यमित्यादि ॥ उक्तः शितिपृष्ठः, [1]स्वरश्च (पा ६·२·१३८)। [V]पृष्ठं प्रधान एकोऽधिकार इति। राद्धान्तकर्मण्यधिकार इति केचित् ॥

पौष्णमित्यादि। गतम् ॥ अन्नं वा [2]इत्यादि। तद्धेतुत्वात्ताच्छब्द्यम् ॥ १५

पशुकामः प्रजाकामो [1]भूत्यर्थी [2]छिन्नसोमकः।
अभिचारी च ये तेषां पञ्चमे पशवः श्रुताः ॥ १ ॥

अथ षष्ठे ग्रामकामादीनां पश्वन्तराणि वक्तव्यानि।

बार्हस्पत्यमिति ॥ तत्रैकं पशुं विधत्ते– 'बार्हस्पत्यꣳ शितिपृष्ठमा लभेत ग्रामकामो यः कामयेत पृष्ठꣳ समानानाꣳ स्यामिति बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनं पृष्ठꣳ समानानां २० करोति ग्राम्येव भवति' इति। ग्रामो मे भूयादन्येषां [3]च ग्रामस्वामिनां [4]मध्ये [5]पृष्ठवदुपरिवर्ती [6]स्याम् [7]इति [7]यः [7]कामयेत तस्यायं पशुः ॥

शितिपृष्ठ इति ॥ पशुविशेषणं प्रशंसति–'शितिपृष्ठो भवति बार्हस्पत्यो ह्येष देवतया समृद्ध्यै' इति। राजसूये "बार्हस्पत्यं चरुं...शितिपृष्ठो दक्षिणा" (तैसं १·८·९) इत्युक्तत्वात् तद्देवताकत्वम् ॥

पौष्णमिति ॥ अन्नकामस्य पशुं विधत्ते– 'पौष्णꣳ श्याममा लभेतान्नकामोऽन्नं वै पूषा पूषणमेव २५ स्वेन भागधेयेनोप धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद एव भवति' इति। अन्नस्य पोषकत्वात् पूषत्वम् ॥

१. अ.मै४–'स्वरश्च' नास्ति। २. लं–इति।

१. अ–भूत्यर्थः। २. अ.उ.जो.ना.पा.हा–छिन्नसोमपः। ३. अ.आ.उ.क.पा–'च' नास्ति। ४. ने–'मध्ये' नास्ति। ५. अ.उ.जो.ना.पा.हा–पृष्ठादु°; हो१–पृष्ठवत् तदु; ने–पृष्ठवत् उन्नतस्थानं(ने)। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्याः पशवः

श्यामो भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै मारुतं पृश्निमा लभेतान्नकामोऽन्नं वै मरुतो मरुत एव स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति पृश्निर्भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्या ऐन्द्रमरुणमा लभेतेन्द्रियकाम इन्द्रमेव (२) स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं दधातीन्द्रियाव्येव भवत्यरुणो भ्रूमान् भवत्येतद्वा इन्द्रस्य रूपꣳ समृद्ध्यै

श्यामः । भवति । एतत् । वै । अन्नस्य । रूपम् । समृद्ध्या इति सम्-ऋद्ध्यै । मारुतम् । पृश्निम् । एति । लभेत । अन्नकाम इत्यन्न-कामः । अन्नम् । वै । मरुतः । मरुतः । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । ते । एव । अस्मै । अन्नम् । प्रेति । यच्छन्ति । अन्नाद इत्यन्न-अदः । एव । भवति । पृश्निः । भवति । एतत् । वै । अन्नस्य । रूपम् । समृद्ध्या इति सम्-ऋद्ध्यै । ऐन्द्रम् । अरुणम् । एति । लभेत । इन्द्रियकाम इतीन्द्रिय-कामः । इन्द्रम् । एव (२) । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मिन् । इन्द्रियम् । दधाति । इन्द्रियावी । एव । भवति । अरुणः । भ्रूमानिति भ्रू-मान् । भवति । एतत् । वै । इन्द्रस्य । रूपम् । समृद्ध्या इति सम्-ऋद्ध्यै ।

अरुण इत्यादि । [v]भ्रूमान् महाभ्रूः ॥

श्याम इति ॥ पशुविशेषणं प्रशंसति– ' श्यामो भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै ' इति पत्रशाकाद्यन्नस्य [v]रूपं श्यामम् ॥

मारुतमिति ॥ अन्नकामस्य पश्वन्तरं विधत्ते– ' मारुतं पृश्निमा लभेतान्नकामोऽन्नं वै मरुतो मरुत एव स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति ' इति । मरुतां [६]वैश्यत्वेनान्नसंपादकत्वादन्नत्वम् ॥

पृश्निरिति ॥ पशुविशेषणं प्रशंसति– ' पृश्निर्भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै ' इति । [r]पृश्निः श्वेतः, शाल्यन्नस्य [r]रूपं श्वेतम् ॥

ऐन्द्रमिति ॥ इन्द्रियकामस्य पशुं विधत्ते– ' ऐन्द्रमरुणमा लभेतेन्द्रियकाम इन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं दधातीन्द्रियाव्येव भवति ' इति ॥

अरुण इति ॥ अरुणस्य पशोर्गुणान्तरं विधत्ते– ' अरुणो भ्रूमान् भवत्येतद्वा इन्द्रस्य रूपꣳ समृद्ध्यै ' इति । महती भ्रूरस्यास्तीति [r]भ्रूमान् । [r]इन्द्रस्य सहस्राक्षत्वेन भ्रूबाहुल्यं स्वरूपम् ॥

६. ने.हो१–वैद्यत्वेन ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

सावित्रमुपध्वस्तमा लभेत सनिकामः सविता वै प्रसवानामीशे सवितारमेव स्वेन भागधेयेनोप धावति स एवास्मै सनिं प्र सुवति दानकामा अस्मै प्रजा भवन्त्युपध्वस्तो भवति सावित्रो ह्येष (३) देवतया समृद्ध्यै वैश्वदेवं बहुरूपमा लभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति ५

सावित्रम् । उपध्वस्तमित्युप-ध्वस्तम् । एति । लभेत । सनिकाम इति सनि-कामः । सविता । वै । प्रसवानामिति प्र-सवानाम् । ईशे । सवितारम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मै । सनिम् । प्रेति । सुवति । दानकामा इति दान-कामाः । अस्मै । प्रजा इति प्र-जाः । भवन्ति । उपध्वस्त इत्युप-ध्वस्तः । भवति । सावित्रः । हि । एषः (३) । देवतया । समृद्ध्या इति सम्-ऋद्ध्यै । वैश्वदेवमिति वैश्व-देवम् । बहुरूपमिति बहु-रूपम् । १०
एति । लभेत । अन्नकाम इत्यन्न-कामः । वैश्वदेवमिति वैश्व-देवम् । वै । अन्नम् । विश्वान् । एव । देवान् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । ते । एव । अस्मै । अन्नम् । प्रेति । यच्छन्ति । अन्नाद इत्यन्न-अदः । एव । भवति ।

उपध्वस्तः विभिन्नवर्णः बहुबिन्दुचितशरीरः । सनिकाम इति । [३]याच्ञया लब्धं धनं सनिः । [५]प्र [५]सुवति अनुजानाति ॥ १५

सावित्रमिति ॥ स्वप्रतिग्रहीतृकदानकामस्य पशुं विधत्ते– ' सावित्रमुपध्वस्तमा लभेत सनिकामः सविता वै प्रसवानामीशे सवितारमेव स्वेन भागधेयेनोप धावति स एवास्मै सनिं प्र सुवति दानकामा अस्मै प्रजा भवन्ति ' इति । उपध्वस्तः संकीर्णवर्णः । [५]सनिकामः परकर्तृकदानकामः । [५]प्रसवानां प्रेरणानाम् । [५]अस्मै [७]यजमानार्थं परकर्तृकं दानं [८-५]प्र [५]सुवति[८] प्रेरयति ॥

उपध्वस्त इति ॥ संकीर्णवर्णं प्रशंसति– ' उपध्वस्तो भवति सावित्रो ह्येष देवतया समृद्ध्यै ' इति । राजसूये " सावित्रं द्वादशकपालं क्षत्तुर्गृह उपध्वस्तो दक्षिणा " (तैसं १.८.९) इत्युक्तत्वात् सवितृदेवताकत्वम् ॥ २०

वैश्वदेवमिति ॥ अन्नकामस्य पश्वन्तरं विधत्ते– ' वैश्वदेवं बहुरूपमा लभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति ' इति । सांकर्यमन्तरेण विस्पष्टा बहवो वर्णा यस्यासौ बहुरूपः ॥ २५

३. लं–याचता; अ.मै४–याच्ञा ।

७. इ–यजमानाय । ८–८. ड१–प्रशंसति ।

तैसं...८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बहुरूपो भवति बहुरूपꣳ ह्यन्नꣳ समृद्ध्यै वैश्वदेवं बहुरूपमा लभेत ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै (४) सजातान् प्र यच्छन्ति ग्राम्येव भवति बहुरूपो भवति बहुदेवत्यो३ ह्येष समृद्ध्यै प्राजापत्यं तूपरमा लभेत यस्यानाज्ञातमिव ज्योगामयेत्

५ बहुरूप इति बहु-रूपः। भवति। बहुरूपमिति बहु-रूपम्। हि। अन्नम्। समृद्ध्या इति सम्-ऋद्ध्यै। वैश्वदेवमिति वैश्व-देवम्। बहुरूपमिति बहु-रूपम्। एति। लभेत। ग्रामकाम इति ग्राम-कामः। वैश्वदेवा इति वैश्व-देवाः। वै। सजाता इति स-जाताः। विश्वान्। एव। देवान्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। ते। एव। अस्मै (४)। सजातानिति स-जातान्। प्रेति। यच्छन्ति। ग्रामी। एव। भवति। बहुरूप इति बहु-रूपः। भवति। १० बहुदेवत्य इति बहु-देवत्यः। हि। एषः। समृद्ध्या इति सम्-ऋद्ध्यै। प्राजापत्यमिति प्राजा-पत्यम्। तूपरम्। एति। लभेत। यस्य। अनाज्ञातमित्यना-ज्ञातम्। इव। ज्योक्। आमयेत्।

बहुरूपः [४]नानारूपः। "बहोर्नञ्वत्०" (पा ६.२.१७५) इति [५]नञ्वद्भावः, "नञ्सुभ्याम्" (पा ६.२.१७२) इत्युत्तरपदान्तोदात्तत्वम्॥

यस्यानाज्ञातमिति। [६-]ज्योगामयेदिति। अज्ञातविशेषं यं ना (षः यमा) मय आमयेत्[-६] १५ दीर्घकालम्। "रुजार्थानां०" (पा २.३-५४) इति षष्ठी। तस्य वेदेति। कर्मणः संप्रदानत्वात्*

बहुरूप इति॥ पशुविशेषणं प्रशंसति-'बहुरूपो भवति बहुरूपꣳ ह्यन्नꣳ समृद्ध्यै' इति। भक्ष्यभोज्यलेह्यचोष्यभेदेनान्नस्य बहुरूपत्वम्॥

वैश्वदेवमिति॥ ग्रामकामस्य [७]पश्चन्तरं विधत्ते-'वैश्वदेवं बहुरूपमा लभेत ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै, सजातान् प्र यच्छन्ति ग्राम्येव २० भवति' इति। [८]सजाताः भ्रातरो[-१०] भृत्यादयश्च[-१०]। ते [११-]च बहुत्वसाम्येन[-११] विश्वेषां देवानां संबन्धिनः॥

बहुरूप इति॥ पशुविशेषणं प्रशंसति-'बहुरूपो भवति बहुदेवत्यो ह्येष समृद्ध्यै' इति। विश्वेषां देवानाम् [१२-]एतत्स्वामित्वात् पशोर्बहुदेवत्यत्वम्[-१२]॥

प्राजापत्यमिति॥ अज्ञातचिररोगग्रस्तस्य पशुं विधत्ते-'प्राजापत्यं तूपरमा लभेत यस्यानाज्ञातमिव ज्योगामयेत् प्राजापत्यो वै पुरुषः प्रजापतिः खलु वै तस्य वेद यस्यानाज्ञातमिव ज्योगामयति

२५ ४. अ.मै४-नानावर्णः। ५. लं-नञ्वत्। ६-६. लं-ज्योगामयतीति अज्ञातविशेषं यं नाम य आमयेत्; मै४-अमुक आमयतीति अज्ञातरोगविशेषं यस्यामयो; तं२-ज्योगामयतीति अज्ञातरोगविशेषः यं नामयक्रमयेत् (?)। *[द्र. पाभा १.४.३२; 'तस्य वित्तात्' (तैसं १.३.६) इत्यत्र भट्टभास्करभाष्यं द्रष्टव्यम्।]।

९. इ-पशुम्। १०-१०.ड१-भ्रातृव्यादयश्च। ११. अ.उ.पा-तद्बहुत्व०; ड.ड१.ने.हो१-
३० बहुत्व०। १२-१२. अ.उ.पा-एतत्स्वामित्वं पशो०; ड१-स्वामित्वात्मको बहुदैवत्यत्वम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

प्राजापत्यो वै पुरुषः प्रजापतिः खलु वै तस्य वेद यस्यानाज्ञातमिव ज्योगामर्यति प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवैनं तस्मात् स्रामान्मुञ्चति तूपरो भवति प्राजापत्यो ह्येष(५)ष देवतया समृद्ध्यै ॥ ६ ॥

[अस्मा इन्द्रमेवैष सजाता विश्वानेव देवान्स्वेन भागधेयेनोप धावति त एवास्मै प्राजापत्यो हि त्रीणि च ।] ५

प्राजापत्य इति प्राजा-पत्यः । वै । पुरुषः । प्रजापतिरिति प्रजा-पतिः । खलु । वै । तस्य । वेद । यस्य । अनाज्ञातमित्यनाज्ञातम् । इव । ज्योक् । आमर्यति । प्रजापतिमिति प्रजा-पतिम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । एनम् । तस्मात् । स्रामात् । मुञ्चति । तूपरः । भवति । प्राजापत्य इति प्राजा-पत्यः । हि (५) । एषः । देवतया । समृद्ध्या इति सम्-ऋद्ध्यै ॥ ६ ॥ १०

[मैसं ... कासं ...]

चतुर्थ्यर्थे षष्ठी (पा २·३-६२) ॥ स्रामादिति । [७-७]स्राम इति[७] रोगनाम । यद्वा –[८-८]स्राम आमन्त्रणे[८], परलोक आह्वानं मरणमेव ॥

इति द्वितीये प्रथमे षष्ठोऽनुवाकः ॥

प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवैनं तस्मात् स्रामान्मुञ्चति' इति । [१३-१३]विस्पष्टानि रोगविशेष- १५
लक्षणानि न दृश्यन्ते[१३] [१४]बलक्षयकार्श्यादिकं च दृश्यते,[१४] [१५]तदिदमज्ञातमिव भवति । 'प्रजापतिः पुरुषमसृजत' इति श्रुतत्वात् [ए]पुरुषः [ए]प्राजापत्यः । चिकित्सकैरज्ञातोऽपि रोगविशेषः प्रजापतिना ज्ञायते । अतः प्रजापतिः [१६ए]एव एनं [ए]तस्मात् [१७-ए]स्रामात् अज्ञातदीर्घरोगात्[१७] मोचयति ॥

तूपर इति ॥ प्रजापतिवपाजन्यत्वेन पशुविशेषणं प्रशंसति– 'तूपरो भवति प्राजापत्यो ह्येष देवतया समृद्ध्यै' इति ॥ २०

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके षष्ठोऽनुवाकः ॥

---

७. तं२.मै.लं–'स्राम इति' नास्ति । ८–८. तं२.मै.लं–स्रामं मन्त्रेण ।

१३–१३. अ.उ.पा–°लक्षणानीव दृश्यन्ते; जो.ना.हा–°लक्षणानि च दृश्यन्ते; ने–स्पष्टचिर-रोगविशेषणं प्रेक्षणे न दृश्यते । १४–१४. अ–न क्षयकार्श्यादिकं च तद्दृश्यते; उ. ना. पा–न क्षयकार्श्या- २५
दिकं च दृश्यते; जो.हा–विलक्षणकरादिकं च दृश्यते; इ–विलक्षणाकारादिकवद्दृश्यते । १५. ड१–तदिदम-विज्ञा° । १६. ने–'एव' नास्ति । १७–१७. अ.उ.पा–स्रामात् अज्ञातादिव रोगात्; हो१–प्रमादज्ञात् दीर्घरोगात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वषट्कारो वै गायत्रियै शिरोऽच्छिनत् तस्यै रसः पराऽपतत् तं बृहस्पतिरुपागृह्णात् सा शितिपृष्ठा वशाऽभवद्यो द्वितीयः परापतत् तं मित्रावरुणावुपागृह्णीतां सा द्विरूपा वशाऽभवद्यस्तृतीयः परापतत् तं विश्वे देवा उपागृह्णन्त्सा

वषट्कार इति वषट्-कारः। वै। गायत्रियै। शिरः। अच्छिनत्। तस्यै। रसः। परेति। अपतत्। तम्। बृहस्पतिः। उपेति। अगृह्णात्। सा। शितिपृष्ठेति शिति-पृष्ठा। वशा। अभवत्। यः। द्वितीयः। परापतदिति परा-अपतत्। तम्। मित्रावरुणाविति मित्रा-वरुणौ। उपेति। अगृह्णीताम्। सा। द्विरूपेति द्वि-रूपा। वशा। अभवत्। यः। तृतीयः। परापतदिति परा-अपतत्। तम्। विश्वे। देवाः। उपेति। अगृह्णन्। सा।

वषट्कार इत्यादि। [V]रसः शरीरस्थं जलम्। [1]शितिपृष्ठादिवशान्तानामुत्पत्तिरुच्यते। [2-V]शितिपृष्ठा। उक्तमुत्तरपदप्रकृतिस्वरत्वम्[2] (पा ६.२.१३८)। [V]यः [V]द्वितीयः [V]परापतत् इति। "[3]यद्वृत्तान्नित्यम्" (पा ८.१.६६) इति निघाते प्रतिषिद्धे 'उदात्तवता तिङा' (द्र. पाभा २.२.१८ वा ४) इति समासः[3]। [4V]द्विरूपा [5]शुक्लकृष्णा वेति[5] केचित्। निरुदकादित्वादुत्तरपदान्तोदात्तत्वम् (पा ६.२.१८४)॥

पृष्टकामोऽन्नकामो द्वाविन्द्रियार्थी सनिं तथा।
अन्नं [1]ग्रामं च [2-]वाञ्छन्तः गूढरोगाश्च[-2] ये स्थिताः॥
षष्ठेऽनुवाके पशवः क्रमेणैषामुदीरिताः॥

वषट्कार इति॥ अथ सप्तमे ब्रह्मवर्चसकामादीनां यथायोगं [3]पश्वन्तराणि विधातुं प्रस्तौति– 'वषट्कारो वै गायत्रियै शिरोऽच्छिनत् तस्यै रसः पराऽपतत् तं बृहस्पतिरुपागृह्णात् सा शितिपृष्ठा वशाऽभवद्यो द्वितीयः परापतत् तं मित्रावरुणावुपागृह्णीतां सा द्विरूपा वशाऽभवद्यस्तृतीयः परापतत् तं विश्वे देवा उपागृह्णन्त्सा बहुरूपा वशाऽभवद्यश्चतुर्थः परापतत् स पृथिवीं प्राविशत् तं बृहस्पतिरभ्यगृह्णादस्त्वेवायं भोगायेति स उक्षवशः समभवद्यल्लोहितं परापतत् तद्रुद्र उपागृह्णात् सा रौद्री रोहिणी वशाऽभवत्' इति। वौषडित्यस्य [4-]मन्त्रस्याभिमानिनी देवता[-4] [V]वषट्कारः। तस्य च[5] गायत्र्या सह विरोधो ब्राह्मणान्तरे (कासं १३.८; तैसं ३.५.७) प्रसिद्ध इति वैशब्देन सूच्यते। छिन्नाद्गायत्रीशिरसो [6]जलं रक्तं च निर्गतं, ताभ्यामुभाभ्यामनेकविधा वशा उत्पन्नाः। ताश्च बृहस्पत्यादीनां परिग्रहेण प्रियाः संपन्नाः। ताभ्यां वर्णाभ्यामुपेता [V]द्विरूपा।

१. अ.तं१.तं२.लं–शितिपृष्ठादीनां वशान्तानाम्; मै४–शितिपृष्ठादीनां वशानाम्। २–२. अ.मै४–शितिपृष्ठाः उक्ताः। ३–३. अ.मै४–'यद्वृत्ता.....समासः' नास्ति। ४. तं१.तं२.पं२–द्विरूपे। ५–५. मै४–शुक्लकृष्णे चेति; लं–शुक्लकृष्णो वेति; तं१.तं२–शुक्लकृष्णे एवेति।

१. हा–ग्राम्यम्। २–२. आ–वाञ्छन्तोऽज्ञातरोगश्च; क.ड.ने.हो१–वाञ्छन्तोऽज्ञातरोगाश्च; हा.जो.ना–गच्छन्तो गुप्तरोगाश्च; अ.उ.पा–गच्छन्तो गुप्तरोगश्च। ३. इ–पशून्। ४–४. अ.आ.उ.जो.ना.पा.हा–°स्याभिमानिदेवो; क.ड.ड१.हो१–°स्याभिमानिदेवता। ५. अ.आ.उ.जो.ना.पा.हा–'च' नास्ति। ६. ड.ड१.ने.हो१–अजस्रम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

बहुरूपा वशाऽभवद्यश्चतुर्थः परापतत् स पृथिवीं प्राविशत् तं बृहस्पतिरभ्य(१)-गृह्णादस्त्वेवायं भोगायेति स उक्षवशः समभवद्यल्लोहितं परापतत् तद्रुद्र उपागृह्णात् सा रौद्री रोहिणी वशाऽभवद्बार्हस्पत्याः शितिपृष्ठामा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति छन्दसां वा एष रसो यद्वशा ५

बहुरूपेति बहु-रूपा । वशा । अभवत् । यः । चतुर्थः । परापतदिति परा-अपतत् । सः । पृथिवीम् । प्रेति । अविशत् । तम् । बृहस्पतिः । अभीति (१) । अगृह्णात् । अस्तु । एव । अयम् । भोगाय । इति । सः । उक्षवश इत्युक्ष-वशः । समिति । अभवत् । यत् । लोहितम् । परापतदिति परा-अपतत् । तत् । रुद्रः । उपेति । अगृह्णात् । सा । रौद्री । रोहिणी । वशा । अभवत् । बार्हस्पत्याम् । शितिपृष्ठामिति शिति-पृष्ठाम् । एति । लभेत । ब्रह्मवर्चसकाम इति १० ब्रह्मवर्चस-कामः । बृहस्पतिम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मिन् । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । दधाति । ब्रह्मवर्चस्येति ब्रह्म-वर्चसी । एव । भवति । छन्दसाम् । वै । एषः । रसः । यत् । वशा ।

[v]बहुरूपा । "बहोर्नञ्वत्°" (पा ६·२·१७५) इत्युत्तरपदान्तोदात्तत्वम् । अभ्यगृह्णादिति । निर्गमनकाल एव ग्रहणमुपग्रहणम् । निर्गत्य भूमौ प्रविष्टस्य उपरिग्रहणमभिग्रहणम् । [6]अस्त्वेवेति । १५ [v]अयं [7]मम [v]भोगाय [v]एव [v]अस्तु [8]वृथा भूमौ स्रंक्रान्तो [9]मा भूदिति । उक्षवश इति । उक्षा चासौ वशश्चेति [v]उक्षवशः । यथेष्टचारी वशः । मोघरेता [10]इत्येके । [11]प्रजननाशक्त इत्यन्ये । या गर्भं ध्वंसयन्ती स्वैरं चरति सा [v]वशा । [v]रोहिणी लोहितवर्णा । "वर्णादनुदात्तात्°" (पा ४·१·३९) इति ङीप् ॥

अथ शितिपृष्ठादीनां [12]विधानं बार्हस्पत्यामिति । गायत्र्याः सर्वच्छन्दोयोनित्वात् [v]छन्दसाम् इत्युक्तम् ॥ २०

बहुभिर्वर्णैरुपेता [v]बहुरूपा । चतुर्थपर्याये [7]भूम्यां [8]परापतितं रसं वृथा विनष्टो मा भूदिति [v]बृहस्पतिः [v]अभ्यगृह्णात् । तस्यायमभिप्रायः—[v]अयं रसः मम [v]भोगाय भवतु [v]एव । [v]उक्षवशः व्यर्थवीर्यो वृषभः ॥

बार्हस्पत्यामिति ॥ तत्राऽद्यं पशुं विधत्ते—'बार्हस्पत्याः शितिपृष्ठामा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति' इति ॥

छन्दसामिति ॥ ब्रह्मवर्चसस्य [9]ऐहिकामुष्मिकपूजाहेतुत्वेन सारत्वात् रससाद्दृश्यम् इत्यभिप्रेत्य २५ तत्साधनभूतां वशां प्रशंसति—'छन्दसां वा एष रसो यद्वशा रस इव खलु वै ब्रह्मवर्चसं छन्दसामेव

६. तं२—अस्त्वेति । ७. मै४—मे । ८. तं२.मै.लं—वृधा । ९. तं१.तं२—'मा' नास्ति । १०. तं२.मै.लं—इत्यन्ये । ११. पं२—प्रजननर्ह (?); लं—प्रजननागत्य (?) । १२. तं१.तं२—'विधानं' नास्ति ।

७. आ.ड१—भूमौ; ने—भुव उपरि । ८. आ.ने—पतितम् । ९. इ—इहामुत्रपूजाहेतुत्वेन; ड.ड१.ने.हो१—इहामुत्र च पूजाहेतुत्वेन ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रसं इव खलु (२) वै ब्रह्मवर्चसं छन्दसामेव रसेन रसं ब्रह्मवर्चसमव रुन्द्धे मैत्रावरुणीं द्विरूपामा लभेत वृष्टिकामो मैत्रं वा अहर्वारुणी रात्रिरहोरात्राभ्यां खलु वै पर्जन्यो वर्षति मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अहोरात्राभ्यां पर्जन्यं वर्षयतश्छन्दसां वा एष रसो यद्वशा रसं इव खलु वै वृष्टिश्छन्दसामेव रसेन रसं (३) वृष्टिमव रुन्द्धे मैत्रावरुणीं द्विरूपामा लभेत प्रजाकामो मैत्रं वा अहर्वारुणी रात्रिरहोरात्राभ्यां खलु वै प्रजाः प्र जायन्ते मित्रावरुणावेव स्वेन भागधेयेनोप

रसः। इव। खलु (२)। वै। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। छन्दसाम्। एव। रसेन। रसम्। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। अवेति। रुन्द्धे। मैत्रावरुणीमिति मैत्रा-वरुणीम्। द्विरूपामिति द्वि-रूपाम्। एति। लभेत। वृष्टिकाम इति वृष्टि-कामः। मैत्रम्। वै। अहः। वारुणी। रात्रिः। अहोरात्राभ्यामित्यहः-रात्राभ्याम्। खलु। वै। पर्जन्यः। वर्षति। मित्रावरुणाविति मित्रा-वरुणौ। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तौ। एव। अस्मै। अहोरात्राभ्यामित्यहः-रात्राभ्याम्। पर्जन्यम्। वर्षयतः। छन्दसाम्। वै। एषः। रसः। यत्। वशा। रसः। इव। खलु। वै। वृष्टिः। छन्दसाम्। एव। रसेन (३)। रसम्। वृष्टिम्। अवेति। रुन्द्धे। मैत्रावरुणीमिति मैत्रा-वरुणीम्। द्विरूपामिति द्वि-रूपाम्। एति। लभेत। प्रजाकाम इति प्रजा-कामः। मैत्रम्। वै। अहः। वारुणी। रात्रिः। अहोरात्राभ्यामित्यहः-रात्राभ्याम्। खलु। वै। प्रजा इति प्र-जाः। प्रेति। जायन्ते। मित्रावरुणाविति मित्रा-वरुणौ। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति।

रस इवेति। आस्वादनहेतुत्वात्। गतमन्यत्॥

रसेन रसं ब्रह्मवर्चसमव रुन्द्धे' इति। वशाया गायत्रीछन्दोरसत्वं व्याख्यातं, गायत्री च [१०]सोमाहरणेन छन्दोन्तरात् प्रशस्ता। तस्मात् [v]वशा सर्वेषां [v]छन्दसां सारः। तेन छन्दोरसेन वशारूपेणैहिकामुष्मिक-पूजाहेतुतया रसरूपं [v]ब्रह्मवर्चसम् [v]अव [v]रुन्द्धे॥

मैत्रावरुणीमिति॥ द्वितीयं पशुं विधत्ते- 'मैत्रावरुणीं द्विरूपामा लभेत वृष्टिकामो मैत्रं वा अहर्वारुणी रात्रिरहोरात्राभ्यां खलु वै पर्जन्यो वर्षति मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अहोरात्राभ्यां पर्जन्यं वर्षयतश्छन्दसां वा एष रसो यद्वशा रस इव खलु वै वृष्टिश्छन्दसामेव रसेन रसं वृष्टिमव रुन्द्धे' इति। मित्रस्य सूर्यत्वादह्नस्तदीयत्वम्। अन्धकारेणाऽवरणहेतुत्वाद्रात्रेर्वारुणत्वम्। [११]वृष्टेर्द्रवत्वात् [१२]ओषध्युत्पादकत्वेन [१३]सारवत्त्वाच्च रसोपमानम्॥

मैत्रावरुणीमिति॥ तमेवं द्वितीयं पशुं फलान्तराय विधत्ते- 'मैत्रावरुणीं द्विरूपामा लभेत प्रजाकामो मैत्रं वा अहर्वारुणी रात्रिरहोरात्राभ्यां खलु वै प्रजाः प्र जायन्ते मित्रावरुणावेव स्वेन भागधेयेनोप

---

१०. इ-सोमहरणेन; ने-सोमापहरणेन। ११. ड-°र्दिव्यत्वात्; हो१-र्देवत्वात्। १२. ड.हो१-°त्पादकेन। १३. आ.ड.ड१.ने. हा.हो१-सारत्वाच्च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

धावति तावेवास्मा अहोरात्राभ्यां प्रजां प्र जनयतश्छन्दसां वा एष रसो यद्वशा रस इव खलु वै प्रजा छन्दसामेव रसेन रसं प्रजामव (४) रुन्द्धे वैश्वदेवीं बहुरूपामा लभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति छन्दसां वा एष रसो यद्वशा रस इव खलु वा अन्नं छन्दसामेव रसेन रसमन्नमव रुन्द्धे वैश्वदेवीं बहुरूपामा लभेत ग्रामकामो ५
वैश्वदेवा वै (५) सजाता विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति

धावति। तौ। एव। अस्मै। अहोरात्राभ्यामित्यहः—रात्राभ्याम्। प्रजामिति प्र-जाम्। प्रेति। जनयतः। छन्दसाम्। वै। एषः। रसः। यत्। वशा। रसः। इव। खलु। वै। प्रजेति प्र-जा। छन्दसाम्। एव। रसेन। रसम्। प्रजामिति प्र-जाम्। अवेति (४)। रुन्द्धे। वैश्वदेवीमिति वैश्व-देवीम्। १०
बहुरूपामिति बहु-रूपाम्। एति। लभेत। अन्नकाम इत्यन्न-कामः। वैश्वदेवमिति वैश्व-देवम्। वै। अन्नम्। विश्वान्। एव। देवान्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। ते। एव। अस्मै। अन्नम्। प्रेति। यच्छन्ति। अन्नाद इत्यन्न-अदः। एव। भवति। छन्दसाम्। वै। एषः। रसः। यत्। वशा। रसः। इव। खलु। वै। अन्नम्। छन्दसाम्। एव। रसेन। रसम्। अन्नम्। अवेति। रुन्द्धे। वैश्वदेवीमिति वैश्व-देवीम्। बहुरूपामिति बहु-रूपाम्। एति। लभेत। ग्रामकाम इति ग्राम-कामः। १५
वैश्वदेवा इति वैश्व-देवाः। वै (५)। सजाता इति स-जाताः। विश्वान्। एव। देवान्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। ते। एव। अस्मै। सजातानिति स-जातान्। प्रेति। यच्छन्ति। ग्रामी। एव। भवति।

धावति तावेवास्मा अहोरात्राभ्यां प्रजां प्र जनयतश्छन्दसां वा एष रसो यद्वशा रस इव खलु वै प्रजा छन्दसामेव रसेन रसं प्रजामव रुन्द्धे' इति। अहोरात्रपरित्यागेन यथा वृष्टिर्न संभवति तथा प्रजोत्पत्तिरपि २०
न संभवति। ततस्तयोर्वृष्टिसाधनत्ववत् प्रजोत्पत्तिसाधनत्वमपि द्रष्टव्यम्॥

वैश्वदेवीमिति॥ तृतीयं पशुं विधत्ते— 'वैश्वदेवीं बहुरूपामा लभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति छन्दसां वा एष रसो यद्वशा रस इव खलु वा अन्नं छन्दसामेव रसेन रसमन्नमव रुन्द्धे' इति। अन्नस्य सर्वदेवभोज्यत्वात् वैश्वदेवत्वं, जीवनहेतुत्वेन सारत्वाद्रससाम्यम्॥ २५

वैश्वदेवीमिति॥ तमेव पशुं फलान्तराय विधते— 'वैश्वदेवीं बहुरूपामा लभेत ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छन्दसां वा एष रसो यद्वशा रस इव खलु वै सजाताश्छन्दसामेव रसेन रसꣳ सजातानव रुन्द्धे बार्हस्पत्यमुक्षवशमा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं (६) दधाति ब्रह्मवर्चस्येव भवति वशं वा एष चरति यदुक्षा वशं इव खलु वै ब्रह्मवर्चसं वशेनैव वशं ब्रह्मवर्चसमव रुन्द्धे

५ छन्दसाम्। वै। एषः। रसः। यत्। वशा। रसः। इव। खलु। वै। सजाता इति स-जाताः। छन्दसाम्। एव। रसेन। रसम्। सजातानिति स-जातान्। अवेति। रुन्द्धे। बार्हस्पत्यम्। उक्षवशमित्युक्ष-वशम्। एति। लभेत। ब्रह्मवर्चसकाम इति ब्रह्मवर्चस-कामः। बृहस्पतिम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मिन्। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् (६)। दधाति। ब्रह्मवर्चसीति ब्रह्म-वर्चसी। एव। भवति। वशम्। वै। एषः। १० चरति। यत्। उक्षा। वशः। इव। खलु। वै। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। वशेन। एव। वशम्। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। अवेति। रुन्द्धे।

[V]वशः इवेति। [V]वशः इन्द्रियसंयमः। तद्धेतुत्वात्तच्छब्दत्वम् ॥

भवति छन्दसां वा एष रसो यद्वशा रस इव खलु वै सजाताश्छन्दसामेव रसेन रसꣳ सजातानव रुन्द्धे' इति। सजातानां भ्रात्रादीनां [१४]भृत्यादीनां च बहुत्वेन देवतासाम्येन वैश्वदेवत्वं, स्वाम्युपकारित्वेन च १५ रससादृश्यम् ॥

बार्हस्पत्यमिति ॥ चतुर्थं पशुं विधत्ते – 'बार्हस्पत्यमुक्षवशमा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति' इति ॥

वशमिति ॥ [१५]वशत्वविशेषणं प्रशंसति–' वशं वा एष चरति यदुक्षा वश इव खलु वै ब्रह्मवर्चसं वशेनैव वशं ब्रह्मवर्चसमव रुन्द्धे' इति। [V]उक्षा इति [V]यत् [V]एषः [V]वशं [V]चरति धेनुभिः [१६]सहै- २० वारण्यं गत्वा पुनस्तासामेव पृष्ठतो [१७]गृहेष्वागच्छतीति तस्य [१८]गोवशवाचित्वम्। [V]ब्रह्मवर्चसम् अपि [१९]इन्द्रियनियमनोपेतत्वात् [V]वश [V]इव स्वाधीनपदार्थ इव भवति ॥

१४. ड१–'भृत्यादीनां' नास्ति। १५. ड.ने.हो१–पशुत्व°। १६. अ.आ.उ.क.ड.पा.हा. हो१–°वाऽरण्ये; ने–सहाऽरण्ये। १७. ने.हो–गृहीत्वाऽऽग°। १८. [ड]१–गोपशुचारित्वम्; ड.ने.हो१–वशचारित्वम्। १९. इ.ड१–°नियमेनोपेत°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

रौद्रीꣳ रोहिणीमा लभेताभिचरन् रुद्रमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्छति रोहिणी भवति रौद्री ह्येषा देवतया समृद्ध्यै स्फ्यो यूपो (७) भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणात्येवैनं वैभीदक इध्मो भिनत्त्येवैनम् ॥ (७) ॥

[अभि खलु रसेनाव ब्रह्मवर्चसं यूप एकान्नविꣳशतिश्च ।] ५

रौद्रीम् । रोहिणीम् । एति । लभेत । अभिचरन्नित्यभि-चरन् । रुद्रम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । तस्मै । एव । एनम् । एति । वृश्चति । ताजक् । आर्तिम् । एति । ऋच्छति । रोहिणी । भवति । रौद्री । हि । एषा । देवतया । समृद्ध्या इति सम्-ऋद्ध्यै । स्फ्यः । यूपः (७) । भवति । वज्रः । वै । स्फ्यः । वज्रम् । एव । अस्मै । प्रेति । हरति । शरमयमिति शर-मयम् । बर्हिः । शृणाति । एव । एनम् । वैभीदकः । इध्मः । भिनत्ति । एव । एनम् ॥ ७ ॥ १०

[मैसं २.५.७; कासं १३.८]

रौद्रीमित्यादि ॥ गतम् ॥

स्फ्य इत्यादि ॥ व्याख्यातम् (तैसं २.१.५) ॥

॥ इति द्वितीये प्रथमे सप्तमोऽनुवाकः ॥

रौद्रीमिति ॥ पञ्चमं पशुं विधत्ते– 'रौद्रीꣳ रोहिणीमा लभेताभिचरन् रुद्रमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्छति रोहिणी भवति रौद्री ह्येषा देवतया समृद्ध्यै' इति । रुद्राध्याये "नीलग्रीवो विलोहितः" (तैसं ४.५.१) इति रुद्रस्य [२०]विशेषेण लोहितत्वं श्रूयतेऽतो रोहिणी रुद्रदेवताका ॥ १५

स्फ्य इति ॥ पूर्ववच्चोदकप्राप्तमपवदितुं विधत्ते– 'स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणात्येवैनं वैभीदक इध्मो भिनत्त्येवैनम्' इति ॥ २०

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

२०. ड.ड१.ने. हो–विशेषणम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एताꣳ सौरीꣳ श्वेतां वशामाऽलभन्त तयैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एताꣳ सौरीꣳ श्वेतां वशामा लभेतामुमेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति बैल्वो यूपो भवत्यसौ (१) वा आदित्यो यतोऽजायत ततो बिल्व उदतिष्ठत् सयोन्येव ब्रह्मवर्चसमव रुन्द्धे

असौ । आदित्यः । न । वीति । अरोचत । तस्मै । देवाः । प्रायश्चित्तिम् । ऐच्छन् । तस्मै । एताम् । सौरीम् । श्वेताम् । वशाम् । एति । अलभन्त । तया । एव । अस्मिन् । रुचम् । अदधुः । यः । ब्रह्मवर्चसकाम इति ब्रह्मवर्चस-कामः । स्यात् । तस्मै । एताम् । सौरीम् । श्वेताम् । वशाम् । एति । लभेत । अमुम् । एव । आदित्यम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मिन् । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । दधाति । ब्रह्मवर्चसीति ब्रह्म-वर्चसी । एव । भवति । बैल्वः । यूपः । भवति । असौ (१) । वै । आदित्यः । यतः । अजायत । ततः । बिल्वः । उदिति । अतिष्ठत् । सयोनीति स-योनि । एव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । अवेति । रुन्द्धे ।

असावादित्य इत्यादि ॥ सौरीमिति । "सूर्यतिष्यागस्त्य°" (पा ६.४.१४९) इति यलोपः ।

ब्रह्मतेजः प्रजां वृष्टिमन्नं ग्रामं तथा पुनः ।
[1]ब्रह्मतेजोऽभिचारं च वाञ्छतां पशवः श्रुताः ॥

असाविति ॥ तानेतान् पशून् सप्तमेऽनुवाके विधायाष्टमे पुनर्ब्रह्मवर्चसकामादीनां पञ्चन्तराणि विधास्यन्नादौ कस्यचित् पशोर्विधानाय प्रस्तौति– 'असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एताꣳ सौरीꣳ श्वेतां वशामाऽलभन्त तयैवास्मिन् रुचमदधुः' इति । आदित्यविषये बहवः प्रायश्चित्तयः कल्पयुगादिभेदेन व्यवस्थापनीयाः ॥

य यति ॥ विधत्ते– 'यो ब्रह्मवर्चसकामः स्यात् तस्मा एताꣳ सौरीꣳ श्वेतां वशामा लभेतामुमेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति' इति ॥

बैल्व इति ॥ खादिरं बाधितुं विधत्ते– 'बैल्वो यूपो भवत्यसौ वा आदित्यो यतोऽजायत ततो बिल्व उदतिष्ठत् सयोन्येव ब्रह्मवर्चसमव रुन्द्धे' इति । [2]श्रीसूक्ते [3]बिल्वोत्पत्तिरेवमाम्नायते–"आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः" (ऋ-खिल २.६.६) इति । अस्यायमर्थः–हे आदित्यवर्णे लक्ष्मि प्रथममुत्पन्नस्याऽऽदित्यस्य तपसः [4]संतारणरूपात् [5]प्रकाशादध्यूर्ध्वं तव प्रियो बिल्ववृक्षो जात इति । ततः सौर्यां वशाया बैल्वे यूपे सति सूर्यबिल्वयोः सहोदरत्वात् सयोनित्वम् । तेन च [6]ब्रह्मवर्चसम् अपि [6]सयोनि [6]एव संपद्यते । स्वपित्रादीनां [6]तु यस्यां वेदशाखायामध्ययनानुष्ठानादिप्रवृत्तिस्तत्रैव स्वस्यापि प्रवृत्तिर्ब्रह्मवर्चसस्य सयोनित्वम् ॥

१. इ–°भिचारित्वम् । २. अ,आ,उ,क,जो,ना,पा,हा–श्रीसूक्तेन । ३. ने–बिल्वोक्तिरेव°; हो–बिल्वोक्तिराम्नां° । ४. आ–संतापरूपात् । ५. ड१–प्रकाशादूर्ध्वम् । ६. ड१–'तु' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

ब्राह्मणस्पत्यां बभ्रुकर्णीमा लभेताभिचरन् वारुणं दशकपालं पुरस्तान्निर्वपेद्वरुणेनैव भ्रातृव्यं ग्राहयित्वा ब्रह्मणा स्तृणुते बभ्रुकर्णी भवत्येतद्वै ब्रह्मणो रूपꣳ समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणात्ये(२)-वैनं वैभीदक इध्मो भिनत्त्येवैनं

ब्राह्मणस्पत्यामिति ब्राह्मणः–पत्याम्। बभ्रुकर्णीमिति बभ्रु-कर्णीम्। एति। लभेत। अभिचरन्नित्यभि-चरन्। वारुणम्। दशकपालमिति दश-कपालम्। पुरस्तात्। निरिति। वपेत्। वरुणेन। एव। भ्रातृव्यम्। ग्राहयित्वा। ब्रह्मणा। स्तृणुते। बभ्रुकर्णीति बभ्रु-कर्णी। भवति। एतत्। वै। ब्रह्मणः। रूपम्। समृद्ध्या इति सम्-ऋद्ध्यै। स्फ्यः। यूपः। भवति। वज्रः। वै। स्फ्यः। वज्रम्। एव। अस्मै। प्रेति। हरति। शरमयमिति शर-मयम्। बर्हिः। शृणाति (२)। एव। एनम्। वैभीदकः। इध्मः। भिनत्ति। एव। एनम्।

[१]बभ्रुकर्णी कपिलश्यामकर्णी[१]। "नासिकोदर°" (पा ४·१·५५) इत्यादिना ङीष्, सतिशिष्टत्वात् [२]तेन बहुव्रीहिस्वरो बाध्यते[२]। [V]ब्रह्मणा कर्मणा [V]स्तृणुते छादयति हिनस्तीत्यर्थः॥

स्फ्य इत्यादि॥ व्याख्यातम्॥

ब्राह्मणस्पत्यामिति॥ अभिचरतः कंचित् पशुं विधत्ते– 'ब्राह्मणस्पत्यां बभ्रुकर्णीमा लभेताभिचरन्' इति। पिङ्गलवर्णकर्णयुक्ता बभ्रुकर्णी॥

वारुणमिति॥ तस्य पशोः प्राच्याङ्ग[७] पुरोडाशं विधत्ते– 'वारुणं दशकपालं पुरस्तान्निर्वपेद्-वरुणेनैव भ्रातृव्यं ग्राहयित्वा ब्रह्मणा स्तृणुते' इति। एतदनुष्ठानेन भ्रातृव्यस्य प्रथमं रोगमुत्पाद्य [८]पश्चात् [V]ब्रह्मणा ब्रह्मणस्पतिदेवताकेन कर्मणा हिनस्ति॥

बभ्रुकर्णीति॥ ब्रह्मणश्चतुर्मुखस्य [९]हेमवर्णत्वात् बभ्रुकर्ण्या ब्रह्मरूपत्वमित्यभिप्रेत्य पशुविशेषणं प्रशंसति – 'बभ्रुकर्णी भवत्येतद्वै ब्रह्मणो रूपꣳ समृद्ध्यै' इति॥

स्फ्य इति॥ पूर्ववच्चोदकप्राप्तं बाधितुं विधत्ते–'स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणात्येवैनं वैभीदक इध्मो भिनत्त्येवैनम्' इति॥

वैष्णवमिति॥ अग्निष्टोमादिमहायज्ञप्राप्तिकामिनः पशुं विधत्ते– 'वैष्णवं वामनमा लभेत यं यज्ञो नोपनमेद्विष्णुर्वै यज्ञो विष्णुमेव स्वेन भागधेयेनोप धावति स एवास्मै यज्ञं प्र यच्छत्युपैनं यज्ञो नमति वामनो भवति वैष्णवो ह्येष देवतया समृद्ध्यै' इति। राजसूये "वैष्णवं त्रिकपालं वामनो दक्षिणा" (तैसं १·८·१७) इत्युक्तत्वाद्वामनस्य [१०]विष्णुदेवत्यत्वम्॥

१. मै४–बभ्रुकर्णीमिति। २–२. मै४.अन्तोदात्तत्वम्।

७. ने.हो१–प्राच्याङ्ग°। ८. ड१–'पश्चात्' नास्ति। ९. ने–पीतवर्णस्य। १०. ड–विष्णुदेवत्वं; ड१–विष्णुदैवत्यत्वम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैष्णवं वामनमा लभेत यं यज्ञो नोपनमेद्विष्णुर्वै यज्ञो विष्णुमेव स्वेन भागधेयेनोप धावति स एवास्मै यज्ञं प्र यच्छत्युपैनं यज्ञो नमति वामनो भवति वैष्णवो ह्येष देवतया समृद्ध्यै त्वाष्ट्रं वडबमा लभेत पशुकामस्त्वष्टा वै पशूनां मिथुनानां (३) प्रजनयिता त्वष्टारमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् मिथुनान् प्र जनयति प्रजा हि वा एतस्मिन् पशवः प्रविष्टा अथैष पुमान्त्सन् वडबः साक्षादेव प्रजां

वैष्णवम् । वामनम् । एति । लभेत । यम् । यज्ञः । न । उपनमेदित्युप-नमत् । विष्णुः । वै । यज्ञः । विष्णुम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मै । यज्ञम् । प्रेति । यच्छति । उपेति । एनम् । यज्ञः । नमति । वामनः । भवति । वैष्णवः । हि । एषः । देवतया । समृद्ध्या इति सम्-ऋद्ध्यै । त्वाष्ट्रम् । वडबम् । एति । लभेत । पशुकामम् इति पशु-कामः । त्वष्टा । वै । पशूनाम् । मिथुनानाम् (३) । प्रजनयितेति प्र-जनयिता । त्वष्टारम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मै । पशून् । मिथुनान् । प्रेति । जनयति । प्रजेति प्र-जा । हि । वै । एतस्मिन् । पशवः । प्रविष्टा इति प्र-विष्टाः । अथ । एषः पुमान् । सन् । वडबः । साक्षादिति स-अक्षात् । एव । प्रजामिति प्र-जाम् ।

[3]वामनो ह्रस्वाङ्गः[-3] । यं यज्ञ इति । अनुष्ठातुं शक्तो न भवतीति । [4]यज्ञो नित्यः[-4] यज्ञफलं वा [5]यत् नोपगच्छति ॥ वडबमिति ॥ यं पुमांसं सन्तम् [6]आरोहन्ति [7]वडबामिव सः अविद्यमानस्त्रीगुणो वडबः[-7] । [v]पशूनां [-8]तन्मिथुनानां च[-8] [v]त्वष्टा [v]प्रजनयिता । प्रजा हीति । [v]प्रजा च [v]पशवः च [v]एतस्मिन् [v]प्रविष्टाः सूक्ष्मरूपेण यदैवम् । [v]अथ एवं सति [v]एषः अश्वः

त्वाष्ट्रमिति ॥ विधत्ते– ' त्वाष्ट्रं वडबमा लभेत पशुकामस्त्वष्टा वै पशूनां मिथुनानां प्रजनयिता त्वष्टारमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् मिथुनान् प्र जनयति ' इति । यथा मनुष्येषु यत्र क्वापि [11]पुंसः [12]स्तनवृद्ध्यां सत्यां श्मश्रुनिर्गमनात् प्राक् योषित्त्वभ्रमो भवति तद्वदश्वेष्वपि [13]केनाप्यवयव-संनिवेशविशेषेण यस्मिन् पुंस्येवाश्वे योषित्त्वबुद्धिरितरेषामश्वानां भवति, अत एव [14]ते ते[-14] अश्वास्तदा तदा तमश्वमारोहन्ति, सोऽयमीदृशोऽश्वो वडबः । स च त्वष्टुः प्रियः । "रेतसः सिक्तस्य त्वष्टा रूपाणि वि करोति" (तैसं १.५.९; द्र. तैसं ६.६.६) इति श्रुतत्वात् मिथुनप्रजनयितृत्वम् ॥

प्रजा इति ॥ पशुविशेषणं प्रशंसति– ' प्रजा हि वा एतस्मिन् पशवः प्रविष्टा अथैष पुमान्त्सन् वडबः साक्षादेव प्रजां पशूनव रुन्द्धे ' इति । [15]यदा [16]स्त्रीलक्षणदर्शनेनास्मिन् पशौ स्त्रीत्वबुद्ध्या [v]प्रजा

३–३. अ.मै४–' वामनो ह्रस्वाङ्गः ' नास्ति । ४–४. मै४–नित्यो यज्ञः । ५. मै४–' यत् ' नास्ति । ६. मै४–अश्वोऽधिरोहति । ७–७. मै४–वडवामित्यविद्यमाने स्त्रीगुणे स बडवः । ८–८. मै४–मिथुनानाम् ।

११. इ–पूर्वं पुंसः । १२. हो–स्ववृत्त्याम् ; ड१–पुनः स्तेनवृत्त्याम् ; ने–स्त्रीवृत्त्याम् । १३. ड. ड१. ने.हो१–°संवेश° । १४–१४. ड.ड१.ने.हो१–इतरे । १५. ड.ड१.ने–यथा । १६. ड.ने.हो१–विलक्षण° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

पशूनव रुन्द्धे मैत्रꣳ श्वेतमा लभेत संग्रामे संयत्ते समयकामो मित्रमेव स्वेन भागधेयेनोप धावति स एवैनं मित्रेण सं नयति (४) विशालो भवति व्यवसाययत्येवैनं प्राजापत्यं कृष्णमा लभेत वृष्टिकामः

पशून्। अवेति। रुन्द्धे। मैत्रम्। श्वेतम्। एति। लभेत। संग्राम इति सं-ग्रामे। संयत्त इति सं-यत्ते। समयकाम इति समय-कामः। मित्रम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। मित्रेण। समिति। नयति (४)। विशाल इति वि-शालः। भवति। व्यवसाययतीति वि-अवसाययति। एव। एनम्। प्राजापत्यमिति प्राजा-पत्यम्। कृष्णम्। एति। लभेत। वृष्टिकाम इति वृष्टि-कामः।

[V]पुमान् [V]सन् [V]वडवः भवति तस्माद्वडवस्यालम्भनेन [V]साक्षात् अव्यवधानेनैव [१]प्रजाः [V]पशून् च [V]अव [V]रुन्धे। समयकाम इति। [१०]आत्मीयैः सुहृद्भिरैकमत्यं समयः। शत्रुभिः सन्धिरित्यन्ये। [V]सं [V]नयति संश्लेषयति। विशाल इति। [११]विकटशृङ्गः। "वेः शालच्छङ्कटचौ" (पा ५.२.२८) इति शालच्। [१२]व्यवसाययत्येवेति। मित्रलाभेन [१३]कृतोद्योगमेनं करोति॥

[V]पशवः च [१७]प्रविशन्ति, तत्र प्रजानां प्रवेशो [१८]नामापत्योत्पत्तये प्रौढं समीचीनमश्वमानीय तत्राऽऽरोहयितृत्वाय प्रवृत्तिः; पशूनां प्रवेशो नाम योषित्त्वभ्रान्त्या [१९]तदारोहणे। [V]अथ तदानीं प्रजापशुप्रवृत्तेः[२०] [V]एषः स्वतः [V]पुमान् अपि [V]सन् स्त्रीनामधारी [V]वडवः भवति। तदालम्भनेन [V]साक्षात् एव शीघ्रमेव [२१V]प्रजां [V]पशून् प्राप्नोति॥

मैत्रमिति॥ परकीयसेनायामीदृशमेव शूरतमं हनिष्यामीति स्वामिनोऽग्रे यः प्रतिज्ञां कर्तुमिच्छति तस्य पशुं विधत्ते। यद्वा—संधिकामिनः पशुं विधत्ते – 'मैत्रꣳ श्वेतमा लभेत संग्रामे संयत्ते समयकामो मित्रमेव स्वेन भागधेयेनोप धावति स एवैनं मित्रेण सं नयति' इति। [V]एनं [२२]प्रतिज्ञावन्तं [V]मित्रेण [२३]कार्यसाधकेन [२४]सहकारिणा [V]सं [V]नयति योजयति। यद्वा - वैरिणो मित्रत्वमापाद्य तेन मित्रेण योजयति॥

विशाल इति॥ "यजमानेन यूपः संमितः" (तैसं ६.३.४) इति प्रकृतौ [२५]यच्छुतं तदपवदितुं परिमाणाधिक्यं विधत्ते – 'विशालो भवति व्यवसाययत्येवैनम्' इति। [२६V]एनं प्रतिज्ञाकारिणं [V]व्यवसाययति [V]एव धैर्यमुत्पाद्य स्वकार्यनिश्चयवन्तमेव करोति। [२७]अथवैनं संधिकामिनं [२८]संधिघटनेन परो राजा [२९]मम मित्रमेवेत्येतादृशं निश्चयवन्तं करोति॥

९. मै४–प्रजां। १०. तं२.मै. लं–आर्थीयैः। ११. लं–विकटशृङ्गाः। १२. मै४–°त्येवैनमिति। १३. मै४–कल्पितो°।

१७. ड–प्रशंसति; ने.हो१–प्रशंसन्ति। १८. इ–नाम प्रजोत्पत्तये। १९. आ.क–तदारोहणम्। २०. अ.उ.पा–प्रजापशुवृत्तेः। २१. ड.ड१. ने.हो१–प्रजाः। २२. ड१–प्रज्ञातवन्तम्; ने.हो१–प्रतिज्ञातवन्तम्। २३. ड१–कार्यसाधनेन। २४. हो१–सहकारिणम्। २५. अ.उ.पा–यत्कृतं। २६. हो१–एकम्। २७. ड१–अथ चैनं। २८. आ.क–°घटकत्वेन। २९. आ.क–'मम' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिर्वै वृष्ट्या ईशे प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यं वर्षयति कृष्णो भवत्येतद्वै वृष्ट्यै रूपꣳ रूपेणैव वृष्टिमव रुन्द्धे शबलो भवति विद्युतमेवास्मै जनयित्वा वर्षयत्यवाशृङ्गो भवति वृष्टिमेवास्मै नि यच्छति (५) ॥ ८ ॥

[असौ शृणाति मिथुनानां नयति यच्छति ।]

५ प्रजापतिरिति प्रजा-पतिः । वै । वृष्ट्याः । ईशे । प्रजापतिमिति प्रजा-पतिम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मै । पर्जन्यम् । वर्षयति । कृष्णः । भवति । एतत् । वै । वृष्ट्यै । रूपम् । रूपेण । एव । वृष्टिम् । अवेति । रुन्द्धे । शबलः । भवति । विद्युतमिति वि-द्युतम् । एव । अस्मै । जनयित्वा । वर्षयति । अवाशृङ्गः । भवति । वृष्टिम् । एव । अस्मै । नीति । यच्छति (५) ॥ ८ ॥

१० [मैसं २.५.३-५, ८, ९; कासं १३.८]

ईशे इति ॥ "लोपस्त आत्मनेपदेषु" (पा ७.१.४१) इति तलोपः ॥ [v]शबलः [१५]मिश्रवर्णः । [१५]कृष्णश्वेतवर्ण [१६]इत्येके । [v]अवाशृङ्गः अवनतशृङ्गः । छान्दसं दीर्घत्वम् । यद्वा-अवाक्छृङ्गः । छान्दसो [१७]वर्णलोपः, निरुदकादिर्द्रष्टव्यः (पा ६.२.१८४) । [v]नि [v]यच्छति न्यक् पातयति ॥

॥ इति द्वितीये प्रथमे अष्टमोऽनुवाकः ॥

१५ **प्राजापत्यामिति** ॥ विधत्ते—'प्राजापत्यं कृष्णमा लभेत वृष्टिकामः प्रजापतिर्वै वृष्ट्या ईशे प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यं वर्षयति' इति । सर्वस्रष्टृत्वेन वृष्टेरपि स्रष्टृत्वात्तदीशितृत्वम् ॥

कृष्ण इति ॥ घनच्छन्ने सवितरि [३०]तीव्रवृष्टिवेलायामन्धकाराभाससादृश्यमभिप्रेत्य[३१] पशु-विशेषणं प्रशंसति—'कृष्णो भवत्येतद्वै वृष्ट्यै रूपꣳ रूपेणैव वृष्टिमव रुन्द्धे' इति ॥

२० **शबल इति** ॥ [३२]कृत्स्नशरीरे [३३]कार्ष्ण्यप्राप्तावुदराद्यधस्तनप्रदेशविशेषेषु श्वैत्यमिश्रणं विधत्ते—'शबलो भवति विद्युतमेवास्मै जनयित्वा वर्षयति' इति । श्वैत्यस्य मालिन्यविरोधित्वाद्विद्युत्साम्यम् ॥

अवाशृङ्ग इति ॥ कर्णसमीप एवावनतशृङ्गत्वं विधत्ते—'अवाशृङ्गो भवति वृष्टिमेवास्मै नि यच्छति' इति ॥ अधोमुखत्वेन [३४]वृष्टिधारासमत्वं द्रष्टव्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
२५ द्वितीयकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

१४. तं२-हरितवर्णः; लं-हिरण्यवर्णः । १५. मै४-कृष्णश्वेतः । १६. मै४-इत्यन्ये । १७. मै४-वर्णादिलोपः ।

३०. ड१-प्रवृष्टि° । ३१. आ.इ.क.जो.ना.हा-°श्यमस्ति तदभिप्रेत्य । ३२. ने-; कृत्स्नशरीरेऽपि । ३३. अ.उ.पा-कार्ष्ण्यप्राप्तेषूदकराज्यधस्तन°; हा-कार्ष्ण्यप्राप्तावुदकराज्यधस्तन°
३० ड१-°विशेषं । ३४. ड.ने.हो१-°धारासाम्यत्वम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

वरुणꣳ सुषुवाणमन्नाद्यं नोपानमत् स एतां वारुणीं कृष्णां वशामपश्यत् ताꣳ स्वायै देवतायै आऽलभत ततो वै तमन्नाद्यमुपानमद्यमलमन्नाद्याय सन्तमन्नाद्यं नोपनमेत् स एतां वारुणीं कृष्णां वशामा लभेत वरुणमेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद (१) एव भवति कृष्णा भवति वारुणी ह्येषा देवतया समृद्ध्यै

वरुणम्। सुषुवाणम्। अन्नाद्यमित्यन्न-अद्यम्। न। उपेति। अनुमत्। सः। एताम्। वारुणीम्। कृष्णाम्। वशाम्। अपश्यत्। ताम्। स्वायै। देवतायै। एति। अलभत। ततः। वै। तम्। अन्नाद्यमित्यन्न-अद्यम्। उपेति। अनमत्। यम्। अलम्। अन्नाद्यायेत्यन्न-अद्याय। सन्तम्। अन्नाद्यमित्यन्न-अद्यम्। न। उपनमेदित्युप-नमेत्। सः। एताम्। वारुणीम्। कृष्णाम्। वशाम्। एति। लभेत। वरुणम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। अन्नम्। प्रेति। यच्छति। अन्नाद इत्यन्न-अदः (१)। एव। भवति। कृष्णा। भवति। वारुणी। हि। एषा। देवतया। समृद्ध्या इति सम्-ऋद्ध्यै।

वरुणं सुषुवाणमित्यादि॥ [v]सुषुवाणं सुतवन्तम्। सुनोतेर्लिटः कानजादेशः (पा ३.२.१०५, १०६)। अन्नस्य अदनम् [v]अन्नाद्यम्। बहुलवचनाद्यत्। स्वाया इति। आत्मने देवताया [1]इति॥

ब्रह्मतेजोऽभिचारं च यज्ञप्राप्तिं तथा पशून्।
समयं च तथा वृष्टिं वाञ्छतां पशवः [1]श्रुताः॥ १॥

वरुणमिति॥ तान् पशूनष्टमेऽनुवाके विधायाथ नवमेऽन्नाद्यकामादीनां पशून् विधित्सुरादौ कंचित् पशुं विधातुं प्रस्तौति–' वरुणꣳ सुषुवाणमन्नाद्यं नोपानमत् स एतां वारुणीं कृष्णां वशामपश्यत् ताꣳ स्वायै देवताया आऽलभत ततो वै तमन्नाद्यमुपानमत् ' इति॥ [v]सुषुवाणं सोमाभिषवं कृतवन्तम्॥

यमिति॥ विधत्ते– ' यमलमन्नाद्याय सन्तमन्नाद्यं नोपनमेत् स एतां वारुणीं कृष्णां वशामा लभेत वरुणमेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद एव भवति कृष्णा भवति वारुणी ह्येषा देवतया समृद्ध्यै ' इति॥ धनिकः पुमानत्तुं [2]योग्याय शाल्यन्नपायसादिभोज्याय समर्थोऽपि [3]संविधातृमनुष्याभावादिना तत् [v]न प्राप्नुयात् तस्यायं पशुः। वरुणः पर्जन्यमुखेन प्रकाशमावृत्य कार्ष्ण्यं संपादयति, [4]अतोऽस्य पशुवर्णस्य वरुणदेवत्यत्वम्॥

१. मै४–'इति' नास्ति।

१. ना–स्मृताः। २. ड–योग्यो यः; ने.हो१–योग्यो नः। ३. अ.उ.जो.ना.पा. हा–संविधातुं मनु°। ४. आ.इ.क.जो.ना.हा–ततोऽस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मैत्रꣳ श्वेतमा लभेत वारुणं कृष्णमपां चौषधीनां च संधावन्नकामो मैत्रीर्वा ओषधयो वारुणीरापोऽपां च खलु वा ओषधीनां च रसमुप जीवामो मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अन्नं प्र यच्छतोऽन्नाद एव भवत्य(२)पां चौषधीनां च संधावा लभत उभयस्यावरुद्ध्यै

मैत्रम्। श्वेतम्। एति। लभेत। वारुणम्। कृष्णम्। अपाम्। च। ओषधीनाम्। च। संधाविति सं-धौ। अन्नकाम इत्यन्न-कामः। मैत्रीः। वै। ओषधयः। वारुणीः। आपः। अपाम्। च। खलु। वै। ओषधीनाम्। च। रसम्। उपेति। जीवामः। मित्रावरुणाविति मित्रा-वरुणौ। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तौ। एव। अस्मै। अन्नम्। प्रेति। यच्छतः। अन्नाद इत्यन्न-अदः। एव। भवति (२)। अपाम्। च। ओषधीनाम्। च। संधाविति सं-धौ। एति। लभते। उभयस्य। अवरुध्या इत्यव-रुध्यै।

---

[2]सन्धाविति॥ प्रावृट्छरदोर्मध्ये। पर्वणीत्येके। नदीकेदारमध्ये इत्यन्ये। मैत्रीर्वा इति। मित्रावरुणसंबन्धिनीनामपामोषधीनां च सन्धौ मैत्रावरुणयोरालम्भात् [v]अपाम् [v]ओषधीनाम् रसस्यान्नलक्षणस्य लाभात् [v]अन्नादः [v]भवति। "वा छन्दसि" (पा ६.१.१०६) इति पूर्वसवर्णदीर्घत्वम्। उभयस्येति। द्विप्रकारस्य [3]रसस्य॥

मैत्रमिति॥ द्विपशुकं कर्म विधत्ते– 'मैत्रꣳ श्वेतमा लभेत वारुणं कृष्णमपां चौषधीनां च संधावन्नकामो मैत्रीर्वा ओषधयो वारुणीरापोऽपां च खलु वा ओषधीनां च रसमुप जीवामो मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अन्नं प्र यच्छतोऽन्नाद एव भवति' इति। संधिशब्दं कालपरत्वेन देशपरत्वेन च [1]द्वेधा सूत्रकारो व्याख्यातवान्– "अपां चौषधीनां च संधाविति प्रावृषि शरत्प्रतिपत्तौ [2]वा। अपि [3]वाऽपां चौषधीनां च संधौ" (आपश्रौ १९.१६.१४) इति। ऋत्वोर्मध्ये नदीक्षेत्रयोर्मध्य इति तस्यार्थः। [4]ओषधीनामुपकारकत्वेन मित्रसंबन्धित्वम्। संधौ [5]प्रयोग [6]उभयो रसोपजीवनेन प्रशस्तः॥

अपामिति॥ एतदेवाभिप्रेत्य संधिं प्रशंसति– 'अपां चौषधीनां च संधावालभत उभयस्यावरुद्ध्यै' इति॥

---

२. पं२–तृतीये सन्धाविति। ३. मै४–'रसस्य' नास्ति।

---

५. अ.उ.पा.–'द्वेधा' नास्ति। ६–६. क–अपि चापां; ने–अपां; हा–वा पां। ७. अ.उ.ना–[7]मुपकारकत्वे; ने.हो१–[7]मुपकारित्वेन। ८. इ.जो.हा–प्रयोगात्। ९. अ.आ.इ.उ.क.जो.ड.ना.पा.हा–उभय[6]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

विशाखो यूपो भवति द्वे ह्येते देवते समृद्ध्यै मैत्रꣳ श्वेतमा लभेत वारुणं कृष्णं ज्योगामयावी यन्मैत्रो भवति मित्रेणैवास्मै वरुणꣳ शमयति यद्वारुणः साक्षादेवैनं वरुणपाशान्मुञ्चत्युत यदीतासुर्भवति जीवत्येव देवा वै पुष्टिं नाविन्दन्(३)तां मिथुनेऽपश्यन्

विशाख इति वि-शाखः । यूपः । भवति । द्वे इति । हि । एते इति । देवते इति । समृध्या इति सम्-ऋद्ध्यै । मैत्रम् । श्वेतम् । एति । लभेत । वारुणम् । कृष्णम् । ज्योगामयावीति ज्योक्-आमयावी । यत् । मैत्रः । भवति । मित्रेण । एव । अस्मै । वरुणम् । शमयति । यत् । वारुणः । साक्षादिति स-अक्षात् । एव । एनम् । वरुणपाशादिति वरुण-पाशात् । मुञ्चति । उत । यदि । इतासुरितीत-असुः । भवति । जीवति । एव । देवाः । वै । पुष्टिम् । न । अविन्दन् (३) । ताम् । मिथुने । अपश्यन् । १०

[V]विशाखः शाखाद्वयात्मा । उक्तमाचार्येण–" यदूर्ध्वं रशनायास्तद्विशाखम् । [V]यद्वोपरात् उभे शाखे अष्टाश्री [5]सचषाले स्याताम् " (आपश्रौ १९·१६·१५) इति ॥ [V]ज्योगामयावी । उक्तः (तैसं २·१·१) । [6]मित्रेणैवेति । [V]मित्रेण मित्रद्वारा वरुणस्य शान्तिः [7]वारुणेन साक्षात् वरुणस्य शान्तिः । ततश्च [V]वरुणपाशात् दीर्घाऽऽमयरूपात् मुक्तः [V]इतासुः अपि गतासुरपि [V]जीवति [V]एव । देवा वा इति । [V]पुष्टिं [8]प्रजाभिसमृद्धिमलभमाना देवा मिथुनीभाव एव [V]ताम् [V]अपश्यन् मिथुनीभाव एव पुष्टिर्भवतीत्यपश्यन् । ततो मिथुनेनापि [V]तस्यां [V]न [V]सम् [V]अराधयन्, १५

विशाख इति ॥ यूपस्य शाखाद्वयं विधत्ते– ' विशाखो यूपो भवति द्वे ह्येते देवते समृद्ध्यै ' इति । विविधे शाखे यस्यासौ [V]विशाखः । तदिदं सूत्रकारो दर्शयति – " विशाखो यूप इति यदूर्ध्वं रशनायास्तद्विशाखम् । [10]यद्वोपरादुभे शाखे अष्टाश्री सचषाले स्याताम् " (आपश्रौ १९·१६·१५) इति ॥

मैत्रमिति ॥ दीर्घरोगिणो [11-]द्विपशुकं कर्म[-11] विधत्ते– ' मैत्रꣳ श्वेतमा लभेत वारुणं कृष्णं ज्योगामयावी यन्मैत्रो भवति मित्रेणैवास्मै वरुणꣳ शमयति यद्वारुणः साक्षादेवैनं वरुणपाशान्मुञ्चत्युत यदीतासुर्भवति जीवत्येव ' इति । मित्रो हि क्रूरं [V]वरुणं शान्तं करोति । स च [12-V]वरुणपाशात् मोचयति । तयोः [13]पृथगुपक्रमः ॥

देवा इति ॥ पुष्टिकामस्य पशुं विधातुं प्रस्तौति– ' देवा वै पुष्टिं नाविन्दन् तां मिथुनेऽपश्यन् तस्यां न समराधयन् तावश्विनावब्रूतामावयोर्वा एषा मैतस्यां वदध्वमिति साऽश्विनोरेवाभवत् ' इति । प्रजापशुसमृद्धिः पुष्टिः । सा च मनुष्यमिथुने पशुमिथुने च संभवतीत्येवं देवा [14]उपायम् [V]अपश्यन् । दृष्ट्वा

---

४. मै४–यद्वा परा । ५. तं२–चषाले । ६. तं२.लं–मैत्रे° । ७. मै–वरुणेन । ८. तं२.मै.लं–प्रजातिं ।

१०. आ.क–यद्वोपर्युभे । ११–११. ने–द्विपशुं; हो१–द्विपशू । १२. ड.ने.हो१–वरुणः पापात् । १३. ड१–पृथगुपयोगः । १४. ड१–उभयम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्यां न समराधयन् तावश्विनावब्रूतामावयोर्वा एषा मैतस्यां वदध्वमिति साऽश्विनोरेवाभवद्यः पुष्टिकामः स्यात् स एतामाश्विनीं यमीं वशामा लभेताश्विनावेव स्वेन भागधेयेनोप धावति तावेवास्मिन् पुष्टिं धत्तः पुष्यति प्रजया पशुभिः ॥ ९ ॥

[अन्नादोऽन्नाद एव भवत्यविन्दन् पञ्चचत्वारिंशच्च ।] ॥

तस्याम् । न । समिति । अराधयन् । तौ । अश्विनौ । अब्रूताम् । आवयोः । वै । एषा । मा । एतस्याम् । वदध्वम् । इति । सा । अश्विनोः । एव । अभवत् । यः । पुष्टिकाम इति पुष्टि-कामः । स्यात् । सः । एताम् । आश्विनीम् । यमीम् । वशाम् । एति । लभेत । । अश्विनौ । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । तौ । एव । अस्मिन् । पुष्टिम् । धत्तः । पुष्यति । प्रजयेति प्र-जया । पशुभिरिति पशु-भिः ॥ ९ ॥

[मैसं ... कासं ...]

---

[9]पुष्टिसंसिद्धिर्नाभिजाता, [10]नावर्धन्तेति यावत् । अथ [v]अश्विनौ देवान् [v]अब्रूताम् [v]आवयोः एव [v]एषा पुष्टिः, आवामेव पुष्टिहेतुः, तस्मादावाभ्यां विना यूयम् [v]एतस्यां [v]मा वदध्वं[11] पुष्टिविषयं किंचिदपि [12]वदितुं नार्हथ । " भासन° " (पा १·३·४७) इत्यादिना भासने आत्मनेपदम् । ततः [v]सा पुष्टिः [v]अश्विनोः [v]एव [v]अभवत् [13]तद्धेतुकैवाभवत् ॥

यमीमिति ॥ सहजातौ यमौ । तयोः स्त्री यमी । गौरादित्वात् (पा ४·१·४१) ङीष् ॥

इति द्वितीये प्रथमे नवमोऽनुवाकः ॥

---

[15]च [v]तस्यां पुष्टौ [16]सम्यक् राधयितुं शक्ता [v]न अभूवन् । तदानीम् [v]अश्विनौ ऊचतुः – [17v]आवयोः एव [18v]एषा [19v]पुष्टिः संबन्धिनी । तस्मात् [v]एतस्यां [20]पुष्टावावाभ्यां [21]विना [v]मा [v]वदध्वं संभाषणमेव मा कुरुत [v]इति । तस्मात् [v]सा पुष्टिः [v]अश्विनोः [22v]एव अधीना [v]अभवत् ॥

य इति ॥ विधत्ते– ' यः पुष्टिकामः स्यात् स एतामाश्विनीं यमीं वशामा लभेताश्विनावेव स्वेन भागधेयेनोप धावति तावेवास्मिन् पुष्टिं धत्तः पुष्यति प्रजया पशुभिः ' इति ॥ एकस्मिन् [23]गर्भे सह जातौ यमौ, तयोर्मध्ये या स्त्री सा यमी ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ॥

---

९. लं–पुष्टिसंसिद्धिं नाभिजाता; मै४–पुष्टौ संसिद्धिं नाभजन्त । १०. तं२–नावर्धत । ११. तं१.तं२. मै–विदध्वं । १२. तं१.तं२.मै.लं–विदितुम् । १३. तं१.तं२–' तद्धेतुकैवाभवत् ' नास्ति ।

१५. अ–तु । १६. इ.क.जो.ड१.ने.हा.हो१–साधयितुम् । १७. ड.ड१.ने.हो१–सा आवयोः । १८. ड१–एषाम् । १९. ड–वृद्धिः । २०. ड–वृष्टा° । २१. ने–' विना ' नास्ति । २२. आ–' एव ' नास्ति । २३. ड.ड१.ने.हो१–' गर्भे ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

आश्विनं धूम्रललाममा लभेत यो दुर्ब्राह्मणः सोमं पिपासेदश्विनौ वै देवानामसोमपावास्तां तौ पश्चा सोमपीथं प्राऽऽप्नुतामश्विनावेतस्य देवता यो दुर्ब्राह्मणः सोमं पिपासत्यश्विनावेव स्वेन भागधेयेनोप धावति तावेवास्मै सोमपीथं प्र यच्छत उपैनꣳ

आश्विनम्। धूम्रललाममिति धूम्र-ललामम्। एति। लभेत। यः। दुर्ब्राह्मण इति दुः-ब्राह्मणः। सोमम्। पिपासेत्। अश्विनौ। वै। देवानाम्। असोमपावित्यसोम-पौ। आस्ताम्। तौ। पश्चा। सोमपीथमिति सोम-पीथम्। प्रेति। आप्नुताम्। अश्विनौ। एतस्य। देवता। यः। दुर्ब्राह्मण इति दुः-ब्राह्मणः। सोमम्। पिपासति। अश्विनौ। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तौ। एव। अस्मै। सोमपीथमिति सोम-पीथम्। प्रेति। यच्छतः। उपेति। एनम्।

आश्विनमित्यादि ॥ धूम्रललामः धूम्रवर्णललामाञ्चितललाटः। दुर्ब्राह्मण इति। त्रिपुरुषं वेदवेदिविच्छेदाद्दुर्ब्राह्मणः। यथा–" यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम्। स वै दुर्ब्राह्मणो [1]नाम यश्चैव वृषलीपतिः " (बौगृपरि १.१०.५) इति। न नियतौपासनिकस्य दौर्ब्राह्मण्यम्

अन्नाद्यमन्नमात्रं च वाञ्छन्तौ दीर्घरोगवान्।
पुष्टिकामश्च नवम एतेषां पशवः श्रुताः ॥

आश्विनमिति ॥ अथ दशमेऽनुवाके नैमित्तिकाः पशवो विधातव्याः। तत्र दुर्ब्राह्मणस्य सोमापानेच्छां निमित्तीकृत्य पशुं विधत्ते– ' आश्विनं धूम्रललाममा लभेत यो दुर्ब्राह्मणः सोमं पिपासेदश्विनौ वै देवानामसोमपावास्तां तौ पश्चा सोमपीथं प्राऽऽप्नुतामश्विनावेतस्य देवता यो दुर्ब्राह्मणः सोमं पिपासत्यश्विनावेव स्वेन भागधेयेनोप धावति तावेवास्मै सोमपीथं प्र यच्छत उपैनꣳ सोमपीथो नमति यद्धूम्रो भवति धूम्रिमाणमेवास्मादप हन्ति ललामो भवति मुखत एवास्मिन् तेजो दधाति ' इति। मलिनश्चैत्यं धूम्रत्वम्। ललाटे शौक्ल्येन लाञ्छितः [1]अवशिष्टे शरीरे धूम्रवर्णः पशुरश्विनोः प्रियः। दुर्ब्राह्मणलक्षणं बौधायन आह– " यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम्। स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिः " (बौगृपरि १.१०.५) इति ॥ [2]पूर्वोक्तपुनरुत्सृष्टपशौ–" यो ब्राह्मणः सन्ना तृतीयात् [3]पुरुषात् " (तैसं २.१.५) इत्युक्तत्वादीदृशो दुर्ब्राह्मणो नाधिकारी। अत्र तु [4]सोमपाने [5]श्रद्धालुत्वेनेच्छावत्त्वे सति दुर्ब्राह्मणोऽधिक्रियते। आश्विनग्रहब्राह्मणे– " तौ देवा अब्रुवन्नपूतौ वा इमौ मनुष्यचरौ भिषजौ " (तैसं ६.४.९) इत्युक्तत्वादपूतयोः [6]तयोरितरदेववत् सोमपातृत्वं नास्ति। पश्चाद्यज्ञस्य [7]-छिन्नं शिरः-[7] [8]प्रतिसंधाय तेन तुष्टेभ्यो [9]देवेभ्यः सोमग्रहं लब्धवन्तौ। तदपि तत्रैवाऽऽम्नातम्– " तौ बहिष्पवमानेन पवयित्वा ताभ्यामेतमाश्विनमगृह्णन् "

१. मै४–ज्ञेयः।

१. ने–अवशिष्ट°। २. क–पूर्वोक्तपुनरुत्सृष्टे पशौ; हा–पूर्वोक्ते पुनरुत्सृष्टे पशौ। ३. आ.क–'पुरुषात्' नास्ति। ४. ड.ड१.ने.हो१–सोमपानत्व°। ५. ने–श्रद्धालुत्वे; ड१–श्रद्धालुत्वे सति; ड–श्रुत्याधायित्वे। ६. अ. आ.उ.क.ड.ने.पा.हा.हो१–'तयोः' नास्ति। ७-७. ड.ड१.ने.हो–छिन्नशिरसः। ८. अ.उ.पा–प्रतिबन्धाय। ९. ड.ड१.ने.हो१–देवेभ्यः पश्चात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमपीथो नमति यद्धूम्रो भवति धूम्रिमाणमेवास्मादप हन्ति ललामो(१)भवति मुखत एवास्मिन् तेजो दधाति वायव्यं गोमृगमा लभेत यमजघ्निवाꣳसमभिशꣳसेयुरपूता वा एतं वागृच्छति

सोमपीथ इति सोम-पीथः। नमति। यत्। धूम्रः। भवति। धूम्रिमाणम्। एव। अस्मात्। अपेति। हन्ति। ललामः (१)। भवति। मुखतः। एव। अस्मिन्। तेजः। दधाति। वायव्यम्। गोमृगमिति गो-मृगम्। एति। लभेत। यम्। अजघ्निवाꣳसम्। अभिशꣳसेयुरित्यभि-शꣳसेयुः। अपूता। वै। एतम्। वाक्। ऋच्छति।

इत्याचार्यः। पश्चेति। "पश्च पश्चा च°" (५.३.३३) इति निपात्यते। पश्चादित्यर्थः। धूम्रिमाणमिति। धूम्रत्वं मलिनत्वम्। "वर्णदृढादिभ्यः°" (पा ५.१.१२३) इतीमनिच्। ललाम इति मत्वर्थीयो लुप्यते।

गोमृगमिति॥ प्राणिनो बाधमानश्चरन् ग्राम्यः पुंगवो गोमृगः। यमिति। गवादिवधमकृतवन्तं [V]यम् [V]अभिशंसेयुः तत्पापं [1]त्वयैव कृतमिति[1]। मिथ्यापापसंयोजनमभिशंसनम्। अपूतेत्यादि।

(तैसं ६.४.९) इति। अतः समानशीलत्वाद्दुर्ब्राह्मणस्य सोमं पिपासोः [V]अश्विनौ [V]देवता। [10]पशोर्धूम्रवर्णेन दौर्ब्राह्मण्यलक्षणं [11V]धूम्रिमाणं मालिन्यम् [V]अस्मात् [V]अप [V]हन्ति। ललाटे शौक्ल्येन [V]अस्मिन् [V]मुखतः [V]एव मुख्यमेव ब्रह्मवर्चसलक्षणं [V]तेजः धत्ते॥

वायव्यमिति॥ मिथ्यापवादं निमित्तीकृत्य कंचित् पशुं विधत्ते– 'वायव्यं गोमृगमा लभेत यमजघ्निवाꣳसमभिशꣳसेयुरपूता वा एतं वागृच्छति यमजघ्निवाꣳसमभिशꣳसन्ति नैष ग्राम्यः पशुर्नाऽऽरण्यो यद्गोमृगो नेवैष ग्रामे नारण्ये यमजघ्निवाꣳसमभिशꣳसन्ति वायुर्वै देवानां पवित्रं वायुमेव स्वेन भागधेयेनोप धावति स एवैनं पवयति' इति। गोभिः सहारण्ये चरितुं गतादृषभात् कस्यांचिन्मृग्यामुत्पन्नो गोमृगः। [12]उभयलक्षणदर्शनात् तथात्वं निश्चेयम्। कश्चित् पुरुषो ब्राह्मणं न हतवांस्तथाऽपि शङ्कया तादृशं [V]यं पुरुषं जना ब्रह्महेत्यपवदेयुस्तस्यायं पशुः। यद्यप्यस्य [13]पुरुषस्य ब्रह्महत्याप्रयुक्तो [14]नरको नास्ति तथापि [V]अपूता [V]वाक् [15-V]ऋच्छति [V]एतं निन्दारूपा वाक्[-15] शङ्कितैर्जनैः क्रियमाणा प्राप्नोत्येव। तामेव

२–२. मै४–कृतवन्तं वदेयुः।

१०. अ.आ.उ.क.जो.ड.ड१.ना.ने.पा.हो१–पशोर्धूम्रत्ववर्णेन। ११. अ.उ.पा–धूम्रभावं। १२. ने–उच्छ्रय°। १३. अ.उ.पा–पुरुषस्यापि। १४. अ.उ.पा–'नरकः' नास्ति। १५–१५. ने–ब्रह्महत्यारूपा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः पशवः]

यमजघ्निवाश्समभिशश्सन्ति नैष ग्राम्यः पशुर्नाऽरण्यो यद्गौर्मृगो नेवैष ग्रामे नारण्ये यमजघ्निवाश्समभिशश्सन्ति वायुर्वै देवानां पवित्रं वायुमेव स्वेन भागधेयेनोप धावति स एवै(२)नं पवयति पराची वा एतस्मै व्युच्छन्ती व्युच्छति तमः पाप्मानं प्र विशति

यम्। अजघ्निवाश्सम्। अभिशश्सन्तीत्यभि-शश्सन्ति। न। एषः। ग्राम्यः। पशुः। न। आरण्यः। यत्। गौर्मृग इति गो-मृगः। न। इव। एषः। ग्रामे। न। अरण्ये। यम्। अजघ्निवाश्सम्। अभिशश्सन्तीत्यभि-शश्सन्ति। वायुः। वै। देवानाम्। पवित्रम्। वायुम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव (२)। एनम्। पवयति। पराची। वै। एतस्मै। व्युच्छन्तीति वि-उच्छन्ती। वीति। उच्छति। तमः। पाप्मानम्। प्रेति। विशति।

गतम्। नैष इति। हिंस्रत्वान्न ग्राम्यत्वं युज्यते, ग्रामचरत्वादारण्यत्वं न घटते। नेवैष इति। अभिशस्तत्वाद्ग्रामे वस्तुं नार्हति, मनुष्यत्वान्नारण्ये। पवयतीति। छान्दसो वृद्ध्यभावः। केचिद्धात्वन्तरं पवयतिं छान्दसमाहुः॥

पराचीत्यादि॥ [३v]पराची पराङ्मुखी [v]व्युच्छन्ती उषा [४]अस्मै [v]व्युच्छति [५]भाति अस्याभ्युदये [६]व्युष्टिः [७]प्रातिकूल्यं प्रतिपद्यते। ततश्च [८]अयं [v]तमः [v]पाप्मानं तमोरूपं [९]महत्पापं [१०]वा [v]प्र [v]विशति।

निन्दां [११]निमित्तीकृत्य [r]एष [१७]विहितः [r]गोमृगः मुख्यः [r]ग्राम्यः [r]न भवति, मृग्यामुत्पन्नत्वात्। [r]न अपि मुख्यः [r]आरण्यः, वृषभादुत्पन्नत्वात्। अभिशस्तस्य [r]ग्रामे [r]न अस्ति वासो बन्धुभिः सह व्यवहाराभावात्, [r]न अपि [१८]वानप्रस्थादिवत् [r]अरण्ये[१८] ग्रामवासित्वात्। [r]देवानां मध्ये वायोः पवित्रत्वं द्रव्यशुद्धिहेतुत्वात् अवगम्यते। [१९]तच्च याज्ञवल्क्येन स्मर्यते—"रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः। मरुतार्केण शुध्यन्ति पङ्केष्टकचितानि च॥" (याज्ञस्मृ १.१९७) इति॥ अनुष्ठितेऽप्यस्मिन् पशौ निन्दां केचिल्लौकिका न परित्यजन्तीति चेत्तर्हि निन्दन्तु नाम ते[२०], तथाऽप्यसावभिज्ञैः [२१]शिष्टैर्व्यवहार्य एव॥

पराचीति॥ सोमयागमध्य आश्विनशस्त्रकाले [२२]सूर्याऽनाविर्भावं निमित्तीकृत्य कंचित् पशुं विधत्ते—'पराची वा एतस्मै व्युच्छन्ती व्युच्छति तमः पाप्मानं प्र विशति यस्याऽऽश्विने शस्यमाने सूर्यो नाऽऽविर्भवति सौर्यं बहुरूपमा लभेतामुमेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मात् तमः

---

३. लं–परा। ४. मै४–'अस्मै' नास्ति। ५. मै४–प्रभाति। ६. मै४.लं–व्युष्टिषु। ७. लं–अप्रातिकूल्यं। ८. मै४–'अयं' नास्ति। ९. पं२– अल्पपापं महत्पापं; मै४–पापं महत्पापं। १०. तं२–'वा' नास्ति।

---

१६. ड१.हो१–प्रवृत्ती°। १७. इ.ड.ने.हो१–विधिः। १८–१८. अ.उ.पा.हा–वानप्रस्थादिवत् सहारण्ये; ड–वानप्रस्थातिपथारण्यः; ड१–वानप्रथादिवदारण्यः। १९. अ.उ.पा–तत्र। २०. ने–'ते' नास्ति। २१. ने–'शिष्टैः' नास्ति। २२. ने–सूर्यो नाऽऽविर्भवतीति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्याः पशवः

यस्याऽऽश्विने शस्यमाने सूर्यो नाऽऽविर्भवति सौर्यं बहुरूपमा लभेतामुमेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मात् तमः पाप्मानमप हन्ति प्रतीच्यस्मै व्युच्छन्ती व्युच्छत्यप तमः पाप्मानꣳ हते ॥ १० ॥

[लुलामुः स एव षट्चत्वारिꣳशच्च ।]

५ यस्य । आश्विने । शस्यमाने । सूर्यः । न । आविः । भवति । सौर्यम् । बहुरूपमिति बहु-रूपम् । एति । लभेत । अमम् । एव । आदित्यम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मात् । तमः । पाप्मानम् । अपेति । हन्ति । प्रतीची । अस्मै । व्युच्छन्तीति वि-उच्छन्ती । वीति । उच्छति । अपेति । तमः । पाप्मानम् । हते ॥ १० ॥

[मैसं २.५.४; कासं १३, ६]

१० क इत्याह– यस्येत्यादि ॥ आश्विनं नाम परःसहस्रं शस्त्रम् (आश्रौ ६.५.६, ९) । सौर्यमित्यादि । गतम् । प्रतीचीति । [V]प्रतीची प्रत्यगञ्चना । एतमेव प्रति एतदभ्युदयाभिमुख्येन [V]व्युच्छन्ती । व्युच्छतीति । ततश्च [V]तमः [V]पाप्मानम् अप [V]हते अपहन्ति । व्यत्ययेनात्मनेपदम् । [११-]उच्छी विवासे[-११] । " छे च " (पा ६.१.७३) इति तुक् ॥

॥ इति द्वितीये प्रथमे दशमोऽनुवाकः ॥

१५ पाप्मानमप हन्ति प्रतीच्यस्मै व्युच्छन्ती व्युच्छत्यप तमः पाप्मानꣳ हते ' इति । " अग्निर्होता गृहपतिः स राजा " (आश्रौ ६.५.६) इत्यादिकं [२३]सहस्रसंख्याकाभिर्ऋग्भिरुपेतं शस्त्रमाश्विनम् । तच्चातिरात्रयागे रात्रिपर्यायनामकेषु शस्त्रेषु पठितेषु [२४-]पश्चात् उषःकालवेलायाम्[-२४] आरब्धव्यम् । तस्मिञ्शस्त्रे [V]शस्यमाने सति [V]सूर्यः उदित्वा मेघाद्यावरणमन्तरेण यदाऽऽविर्भवेत् तदा नायं पशुरपेक्षितः । [V]यस्य यजमानस्य [२५-]तथा सन्[-२५] [V]न आविर्भवेत्, [V]एतस्मै यजमानायेयं रात्रिः [V]व्युच्छन्ती प्रभातं [२६]प्राप्नुवती सती न सम्यक् प्राप्नोति,
२० किंतु [V]पराची व्युच्छन्ती [२७-]पराङ्मुखी तस्मिन्नपरक्ता[-२७] सती प्रभातं प्राप्नोति । तदानीमयं यजमानः प्रकाशविरुद्धं [V]तमः स्वर्गविरोधिनं [V]पाप्मानं च [V]प्र [V]विशति, तादृशस्यायं पशुः । स च बहुरूपश्चित्रवर्णः । [V]प्रतीची [२८]संमुखी तस्मिन्ननुरक्तेत्यर्थः । तेन पशुना [V]तमः [V]पाप्मानं च [V]अप हन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः ॥

२५ ११–११. मै४–उच्छ विवासने ।

२३. ड.ड१.ने.हो१–°संख्याभि°। २४–२४. आ–उषःकालात् प्राग्वेलायाम् ; क–पश्चात् उषःकालात् प्राग्वेलायाम् । २५–२५. आ.क.ड.ड१–तदानीं । २६. अ.उ.क.जो.ड१.ना.ने.पा–प्राप्नुवन्ती । २७–२७. ने–पराङ्मुखत अपरक्ता । २८. अ.उ. ड१.ने.पा.हो१–संमुखा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्रं वो विश्वतस्परीन्द्रं नरो

इन्द्रम्। वः। विश्वतः। परीति॥ इन्द्रम्। नरः॥

अथ याज्याकाण्डं वैश्वदेवम् एव[1]। तत्र "ऐन्द्रमेकादशकपालं निर्वपेन्मारुतं सप्तकपालं ग्रामकामः" (तैसं २·२·११) इत्यस्य द्विहविष इष्टेरैन्द्रस्य एकादशकपालस्य पुरोनुवाक्या 'इन्द्रं वः' इति गायत्री॥ व्याख्याता चेयम् "इन्द्रं वो विश्वतस्परि हवामहे" (तैसं १·६·१२) इत्यत्र। इह त्वस्याः प्रतीकग्रहणम्। हे ऋत्विग्यजमानाः, [V]वः युष्मदर्थं विश्वेभ्यः [V]जनेभ्यः उपरि [V]इन्द्रं [V]हवामहे आह्वयामः। [V]अस्माकम् एव [V]केवलः स्वामी [V]अस्तु इति॥

तत्रैव याज्या॥ 'इन्द्रं नरः' इति त्रिष्टुप्॥ इयमपि तत्रैव व्याख्याता॥ इह तु प्रतीकग्रहणम्। [V]नरः मनुष्याः [V]इन्द्रं हवन्ते आह्वयन्ति। कीदृशम्? [V]नेमधिता अर्धेन धार्यमाणं,

[V]दौर्ब्राह्मण्याभिशापौ च [V]सूर्याऽऽविर्भाववर्जनम्। १०
निमित्तीकृत्य दशमे पशवः समुदीरिताः॥ १॥

तैरेतैर्दशभिरनुवाकैः [3]काम्यपशवः समापिताः। अथैकादशेऽनुवाके काम्येष्टियाज्या [पुरोनुवाक्याः] उच्यन्ते। तस्मिंश्च काम्येष्टिकाण्डे पूर्वोदाहृतात् सोमारौद्रचरोरूर्ध्वं द्विहविष्का काचिदिष्टिरेवमाम्नायते– 'ऐन्द्रमेकादशकपालं निर्वपेन्मारुतꣳ सप्तकपालं ग्रामकाम इन्द्रं चैव मरुतश्च स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति' (तैसं २·२·११) इति॥ प्रकृतौ सह प्रयुज्यमानयोरपि १५
द्वयोः पुरोडाशयोरेकस्मिन्नेवाधिश्रयणम्, इह तु तद्बाधितुं विधत्ते–"आहवनीय ऐन्द्रमधि श्रयति गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै" (तैसं २·२·११) इति॥ [4]पापेन वस्यसं वसुमत्तरं पापवस्यसं पापाधिक्योपेतमित्यर्थः। मरुताम् [5]उग्रदेवत्वात्तदीयं हविः पापवस्यसम्। [6]तस्य ऐन्द्रात् हविषः[6] [7]विभागेनावधारणार्थं [8]भिन्नाम्नावधिश्रयणम्॥ तत्रत्यकपालसंख्यां प्रशंसति– "सप्तकपालो मारुतो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्द्धे" (तैसं २·२·११) इति। "ईदृङ्च" (तैसं १·८·१३; ४·६.५) इत्यादि- २०
नोक्ताः सप्तसंख्याका मरुत एको गणः। तथाविधाश्च गणाः सप्तसंख्याकाः। तेषां हविष्प्रदानेन गणशो बहुविधगणरूपान् भ्रातृमित्रभृत्यादीन् अवरुन्द्धे॥ प्रकृतौ सामिधेनीसंघानुवचनात् प्रागेव हविरासादनं, तदपवदितुं विधत्ते– "अनूच्यमान आ सादयति विशमेवास्मा अनुवर्त्मानं करोति" (तैसं २·२·११) इति। अत्र [9]सूत्रम्–"काल ऐन्द्रमासादयति। सामिधेनीष्वनूच्यमानासु मारुतम्" (आपश्रौ १९·१९·१४) इति। यजमानस्यानुकूलं वर्त्म वर्तनं यस्या विशः सेयमनुवर्त्मा॥ २५

इन्द्रमिति॥ अनयोरुभयोर्हविषोर्याज्यानुवाक्यानां पूर्वकाण्ड एव समाम्नातानां [10]प्रतीकान्युदाहरति– 'इन्द्रं वो विश्वतस्परीन्द्रं नरो मरुतो यद्ध वो दिवो या वः शर्म' इति। [11]–प्रथमं [12]युग्मं

१. पं– 'एव' नास्ति।

१. अ.हा–दौर्ब्राह्मणाभि°; ड.ड१.ने–°भिचारौ। २. ड–°र्भाववर्जिनः। ३. इ–काम्याः पशवः। ४. ड.ने–पापिनः। ५. ड–अग्र°। ६–६. इ–तस्यैव हविःशेषो; आ.क–ऐन्द्रस्य तद्धविषः। ३०
७. ड.ड१.शृं.हो१–विभागेन धारणार्थं। ८. इ–भिन्नाधिश्रयणम्। ९. आ.क.ड१–सूत्रकारः। १०. आ.ड१–प्रतीकानुदा°। ११–११. इ–एतदृक्चतुष्टयं प्रथमकाण्डे व्याख्यातम्। १२. ड–युग्मं प्रथमकाण्डे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

*मरुतो यद्ध वो दिवो *या वः शर्म ॥

मरुतः । यत् । ह । वः । दिवः ॥ या । वः । शर्म ॥

"यत्सर्वेषामर्धमिन्द्रः प्रति" (तैसं ५.४.८) इति। [२]कदा? यदा- [१]पार्याः [३]दुःखपरिहारप्राप्ति-हेतुभूताः [४]धियः कर्माणि प्रज्ञा वा [५]युनजते तदा इन्द्रमाह्वयन्ति । स [५]त्वं [५]शूरः [५]नृषाता नृभिः संभजनीयः [५]शवसः बलाद्धेतोः [५]चकानः [५]तृप्तिर्शालः, ईदृशस्त्वमस्मान् [५]गोमति [५]व्रजे गोष्ठे [५]आ [५]भज स्थापयेति ॥

अथ मारुतस्य सप्तकपालस्य पुरोनुवाक्या-'मरुतो यद्ध वः' इति गायत्री ॥ इयमपि "वैश्वानरो नः" (तैसं १.५.११) इत्यत्र व्याख्याता । इह तु प्रतीकग्रहणम् । हे [५]मरुतः, [५]वः युष्मान् [५]सुम्नायन्तः सुखमिच्छन्तो वयं [५]यत् यस्मात् [५]दिवः द्युलोकात् [५]हवामहे आह्वयामः तस्मादस्मान् शीघ्रम् [५]उप [५]गन्तन उप गच्छतेति ॥

तत्रैव याज्या-'या वः शर्म' इति त्रिष्टुप् ॥ इयमपि तत्रैव व्याख्याता (तैसं १.५.११), प्रतीकग्रहणमिहास्याः। हे मरुतः, [६]युष्माकं यानि सुखानि युष्मान् भजमानाय यजमानाय यानि च त्रिस्थानस्थितानि हवींषि दत्तवते यजमानाय अधिकं [५]यच्छत [५]तानि शर्माणि [५]अस्मभ्यं विशेषेण यच्छत, हे वर्षितारः कामानाम्, अस्माकं शोभनपुत्रादिकं रयिं दत्त[६] ॥

षष्ठप्रपाठकस्यान्त्यानुवाके[१३] (तैसं १.६.१२), द्वितीयं युग्मं तु पञ्चमप्रपाठकस्यान्त्यानुवाके (तैसं १.५.११) पठितम्। तदर्थस्तु तत्रैव द्रष्टव्यः[११] ॥

उक्तामेवेष्टिं फलान्तराय विधत्ते "एतामेव निर्वपेद्यः कामयेत क्षत्राय च विशे च समदं दध्यामित्यैन्द्रस्यावद्यन् ब्रूयादिन्द्रायानु ब्रूहीत्याश्राव्य ब्रूयान्मरुतो यजेति मारुतस्यावद्यन् ब्रूयान्मरुद्भ्योऽनु ब्रूहीत्याश्राव्य ब्रूयादिन्द्रं यजेति स्व एवैभ्यो भागधेये समदं दधाति वितृष्हाणास्तिष्ठन्ति" (तैसं २.२.११) इति। मदेन सह वर्तत इति समदः कलहः। राज्ञः प्रजायाश्च परस्परं कलहं कुर्यामिति [१४]कामयितुरियमिष्टिः। अस्यामिष्टावयं प्रकृतेर्विशेषः— प्रकृतावाग्नेयस्यावदानकाले पुरोनुवाक्याप्रैषमुक्त्वा [१५]तदाश्रावणात् ऊर्ध्वमाग्नेययाज्याया एव प्रैषं वदेत्, न तु [१६]देवतान्तरयाज्यायाः। [१७]अत्र त्वन्यविषयोऽनुवाक्याप्रैषोऽन्यविषयश्च याज्याप्रैष इति [१८]विशेषः। एवं च सति एभ्य इन्द्रमरुद्भ्यः स्वस्वभागे कलहं कृतवान् भवति। तदीयकलहानुसारेण राजा विशश्च वितृंहाणा विशेषेण परस्परं हिंसां कुर्वाणास्तिष्ठन्ति ॥ कलह-समाधानकामस्य तामेवेष्टिं विधत्ते- "एतामेव निर्वपेद्यः कामयेत कल्पेरन्निति यथादेवतमवदाय यथादेवतं

२-२. मै४- 'कदा यदा' नास्ति। ३. अ.तं.तं२.मै-दुःखपारप्राप्ति°; मै४-दुःखवारिप्राप्ति°। ४. लं-धीः। ५. अ. तं१.तं२.पं२.लं-तृप्यति; मै४-तृप्यत्। ६-६. अ.तं२.मै-युष्माकं यानि यानि शर्माणि सुखानि शशमानाय युष्मान् वृषणः वर्षितारः कामानामस्मभ्यं सुवीरं शोभनपुत्रादिकं रयिं धनं धत्तेति।

१३. आ-°नुवाके पठितम्। १४. ने.हो-कामी तदेयमिष्टिः। १५. अ.उ.जो.पा.हा-तदाश्रवणात्; ना-तदाश्रवात्। १६. जो.ना.हा-देवतान्तरस्य याज्यायाः। १७. आ.क.जो.ड.ड.१.ना.हा हो१-इह। १८. आ-'विशेषः' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भरेष्विन्द्रꣳ सुहवꣳ हवामहेऽꣳहोमुचꣳ सुकृतं दैव्यं जनम् ।
अग्निं मित्रं वरुणꣳ सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥

भरेषु । इन्द्रम् । सुहवमिति सु-हवम् । हवामहे ।
अꣳहोमुचमित्यꣳहः—मुचम् । सुकृतमिति सु-कृतम् । दैव्यम् । जनम् ।
अग्निम् । मित्रम् । वरुणम् । सातये । भगम् । द्यावापृथिवी इति द्यावा-पृथिवी । मरुतः । स्वस्तये ॥ ५

"ऐन्द्रमेकादशकपालं निर्वपेद्वैश्वदेवं द्वादशकपालं ग्रामकामः" (तैसं २·२·११) इत्यस्याः पुरोनुवाक्या— 'भरेष्विन्द्रम्' इति जगती ॥ [v]भरेषु संग्रामेषु [v]इन्द्रं [v]सुहवं स्वाह्वानम् आह्वान-प्रयोजनस्य शीघ्रं कर्तारम् । प्रत्ययोत्पत्तेः प्रागेव "बहुलं छन्दसि" (पा ६·१·३४) इति

यजेद्भागधेयेनैवैनान् यथायथं कल्पयति कल्पन्त एव" (तैसं २·२·११) इति । कल्पेरन् परस्परकलहरहिता भवेयुः । एतानिन्द्रमरुतः स्वस्वभागभाजिनः कल्पयति । तथा सति राजा विशश्च कल्पन्त एव कलहरहिताः १० स्निग्धा भवन्त्येव । एतयोः [११]कलहतत्समाधानार्थेष्टयोः [२०-]पूर्वोदाहृता एव याज्यानुवाक्याः[-२०] ॥ इष्टयन्तरं विधत्ते—"ऐन्द्रमेकादशकपालं निर्वपेद्वैश्वदेवं द्वादशकपालं ग्रामकाम इन्द्रं चैव विश्वाꣳश्च देवान्स्वेन भाग-धेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति" (तैसं २·२·११) इति ॥ प्रकृतौ हविर्द्वयस्य [२१]सहावदानं नास्ति । अत्र तु तद्विधत्ते— "ऐन्द्रस्यावदाय वैश्वदेवस्याव द्येदथैन्द्रस्योपरिष्टादिन्द्रियेणैवास्मा उभयतः सजातान् परि गृह्णाति" (तैसं २·२·११) इति । 'द्विर्हविषोऽवद्यति' (द्र. शब्रा १·६·१·२१) इति १५ श्रुतत्वात् एकैकस्य हविषो द्विर्दिरवदानं[२२] कर्तव्यम् । तथा सत्यत्र [२३]सकृदैन्द्रमवदाय ततो वैश्वदेवं द्विरवद्येत् पुनरप्युपरिष्टादैन्द्रमवद्येत् । एवं सति यजमानार्थं सजातान् [२४]परिगृह्णातीति ग्राममनिवासिनः सर्वानुभयोः पार्श्वयोरिन्द्रियसामर्थ्ययुक्तान् करोति । [२५]अत्र दक्षिणाविशेषं विधत्ते—"उपाधाय्यपूर्वयं वासो दक्षिणा सजाता-नामुपहित्यै" (तैसं २·२·११) इति । वस्त्रस्योभयपार्श्वान्तयोरुपानीय[२६] [२७]स्थापनीयं रक्तसूत्रमुपाधाय्यं, तच्च [२८]पूर्वमेवोपानयनकाले वस्त्रं याति प्राप्नोतीति पूर्वयम् । उपाधाय्यं पूर्वयं यस्मिन् वाससि तदुपाधाय्य- २० पूर्वयं [२९]विचित्रमित्यर्थः । अत एव सूत्रकारः— "उपाधाय्यपूर्वयं वासो दक्षिणा । चित्रान्तमित्यर्थः" (आपश्रौ १९·२०·१-२) ॥ तादृशस्य वाससो दानं सजातानामुपहित्यै, यजमानसेवायै संपद्यते ॥

भरेष्विति ॥ अस्यामिष्टौ पुरोनुवाक्यामाह— 'भरेष्विन्द्रꣳ सुहवꣳ हवामहेऽꣳहोमुचꣳ सुकृतं दैव्यं जनम् । अग्निं मित्रं वरुणꣳ सातये भगं द्यावापृथिवी मरुतः स्वस्तये' इति । [r]इन्द्रम् अग्न्यादिदेवांश्च [r]भरेषु भ्रियमाणेषु संपाद्यमानेषु हविःषु [r]हवामहे आह्वयामः । किमर्थम्? [r]सातये देवेभ्यो हविर्दानाय, २५ [r]स्वस्तये यजमानस्य श्रेयसे च । कीदृशमिन्द्रम्? [r]सुहवं सुखेनाऽऽह्वातुं शक्यम् । [r]अꣳहोमुचं पापात् मोच-यितारं [r]सुकृतं शोभनं हितं करोतीति सुकृत् तं सुकृतं, [r]दैव्यं दिवि भवं, [r]जनं जनयितारं [३०]वृष्टिद्वारेण सस्या-द्युत्पादकम् । [३१]अत्र [३२]पूर्वार्धस्येन्द्रविषयत्वादुत्तरार्धस्येतरबहुदेवविषयत्वाच्च हविर्द्वयस्यैकैव पुरोनुवाक्या ॥

१९. ने—°समाधानाख्येष्ट्याम्; ड. ड१.हो१—कलहसमा° । २०—२०. ड—पूर्वोदाहृतावेव याज्यानुवाक्ये । २१. ड१—सवनावदानं । २२. आ.क—°दानं सह । २३. अ.उ.जो.ना.पा.हा ३० —°सकृदिन्द्र° । २४. आ.क.ड.ड.१— 'परिगृह्णातीति' नास्ति । २५. आ.क.ड—अथ । २६. हा—°रुपनीय । २७. ड१— 'स्थापनीयं' नास्ति । २८. इ—पूर्वमेव वायन°; जो.ना.हा—पूर्वमेवाधापन° । २९. आ.क— 'विचित्रमित्यर्थः' नास्ति । ३०. ने—वृष्टिद्वारा । ३१. ने—तत्र । ३२. अ.उ.पा—पूर्वार्धर्चस्ये° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मम॑त्तु नः परि॑ज्मा वस॒र्हा म॒मत्तु॒ वातो॒ अपां॑ वृष॒ण्वान् ।
शि॒शी॒तमि॑न्द्रापर्वता यु॒वं न॒स्तन्नो॒ विश्वे॒ वरि॑वस्यन्तु दे॒वाः ॥

म॒मत्तु॑ । नः॒ । परि॑ज्मेति॒ परि॑-ज्मा । व॒स॒र्हा । म॒मत्तु॑ । वा॒तः॒ । अपा॑म् । वृ॒ष॒ण्वानिति॑ वृषण्-वान् । शि॒शी॒तम् । इ॒न्द्रा॒प॒र्व॒तेती॑न्द्रा-पर्वता । यु॒वम् । नः॒ । तत् । नः॒ । विश्वे॑ । वरि॑वस्यन्तु । दे॒वाः ॥

---

५ संप्रसारणे आकारान्तलक्षणस्याचोऽप्रसङ्गात्* " ईषद्दुःसुषु° " (पा ३·३.१२६) इति खल्, कृदुत्तरपदप्रकृतिस्वरत्वम् , लित्स्वरः । [V]हवामहे आह्वयामः । पूर्ववत् संप्रसारणम् । यद्वा-- सुहवं सुयुद्धं युद्धे जेतृत्वात् । " भावेऽनुपसर्गस्य " (पा ३·३·७५) इति ह्वयतेरप्प्रत्यये संप्रसारणम्, तेनैव बहुव्रीहौ, "आद्युदात्तं द्व्यच् छन्दसि" (पा ६·२·११९) इत्युत्तरपदाद्युदात्तत्वम् । [V]अ॒ꣳहोमुचं पापेभ्यो मोचयितारं [V]सुकृतं सुष्ठु कर्तारम् । " सुकर्मपाप° " (पा ३·२·८९) इति करोतेः क्विप् ।
१० [V]दैव्यं दिवि भवम् । " देवाद्यञञौ " (द्र. पा ४·१·८५ वा ३) इति यञ् । [V]जनम् अन्यमपि द्युलोके जातम् । [७]एकैकत्वेन तमाचष्टे–[V]अग्निं [V]मित्रं [V]वरुणं [८-V]सातये । " ऊतियूति° " (पा ३·३.९७) इत्यादिना सनेः क्तिन्प्रत्ययो निपात्यते[८-] । [V]भगं [V]द्यावापृथिवी [V]मरुतः च एतानप्याह्वयामः । किमर्थम् ? [V]सातये लाभाय [९]अभिमतानि नो [१०]यथा दद्युरिति । किंच–[११]लब्धस्य चाविनाशार्थम् ॥

अथ तत्रैव याज्या ॥ 'ममत्तु नः' इति त्रिष्टुप् ॥ [V]ममत्तु तृप्यतु [V]नः अस्मदर्थम् अस्मान्
१५ वा अभिमतप्रदानेन तर्पयतु । [V]परिज्मा परितः सर्वतः भक्षयिता । " श्वन्नुक्षन्° " (उ १६५)

ममत्त्विति ॥ तत्रैव याज्यामाह– 'ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः' इति । परितः सर्वतो जेमनं भक्षणं यस्याग्नेः सोऽयं [V]परिज्मा । स च [V]नः अस्मान् [V]ममत्तु [३३]हर्षयतु । वासरस्य हन्ता गमयिता सूर्यः, स च नः ममत्तु [V]वातः नः [V]ममत्तु । [V]अपां [V]वृषण्वान् वर्षकः पर्जन्यदेवो नो ममत्तु । पर्वतशब्देन [३४-]कैलासादिपर्वतवासी
२० **देवविशेषो[-३४] हिमवान् वाऽभिधीयते । आश्वमेधिकेषु पशुविधिषु " हिमवतो हस्ती " (तैसं ५·५·११) इति [३५]देवत्वश्रवणात् । हे इन्द्रापर्वतौ युवां [V]नः अस्मान् [V]शिशीतं तनूकुरुतम् । पापबहुलानामस्माकं [३६]पापक्षयस्तनूकरणम् । [V]तत् तेन हविष्प्रदानेन [V]विश्वे [V]देवाः [V]नः अस्मान् [V]वरिवस्यन्तु परिचर्यासमये कृपयाऽवलोकयन्तु ॥**

---

* [लिखितपुस्तकेषु यथावत् स्थितोऽयं पाठः; 'आकारान्तलक्षणस्य युचः प्रसङ्गात्' इति संभाव्यते। अत्र
२५ द्रष्टव्यम् 'आतो युच्' (पा ३·३·१२८); मै-अकारान्त°]। ७. मै४–एकैकस्येनः। ८–८. मै४–'सातये.....निपात्यते' नास्ति। ९. तं१.तं२– अभिमतादि। १०. तं२.मै–'यथा' नास्ति। ११. तं१.तं२.मै–स्वस्तये ग्रामस्य।

---

३३. ने–अर्हयतु । ३४–३४. इ–कैलासादिपर्वतविशेषः; ने–कैलासादिपर्वताधिदेवविशेषः; अ.आ. उ.क.जो.ना.पा.हो१–कैलासादिपर्वतवासिदेवविशेषः । ३५. ने–हविर्देवत्वस्मरणात्; ड१–हविर्देवत्वश्रवणात्।
३० ३६. ने–पापक्षयतस्तनू° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

प्रिया वो नाम (१) हुवे तुराणाम्। आ यत् तृपन्मरुतो वावशानाः ॥

प्रिया । वः । नाम (१)। हुवे । तुराणाम्। एति । यत् । तृपत् । मरुतः । वावशानाः ॥

[12]इत्यादिना जनेः कनिन्प्रत्ययो निपात्यते। अजेर्वा जिनातेर्वा अग्निरुच्यते। [13V]वसर्हा अग्निहोत्र-शरणाभिमुखस्थानार्हा वसनार्हा। नाशब्दो लुप्यते। पृषोदरादिः (पा ६·३·१०९)। "सुपां सुलुक्°" (पा ७.१.३९) इति सोराकारः। यद्वा–वसितॄणां छादयितॄणां काष्ठादीनां हन्ता। छान्दसो रेफोपजनः। वस्तेः पचाद्यचि (पा ३·१-१३४) हन्तेः क्विप् (पा ३·२·७६)। कश्चिदाह–वासरस्य हन्ता गमयिता वसर्हा। वर्णविकारलोपौ छान्दसौ। आदित्य उच्यते। [V]वातः वायुश्च [V]ममत्तु। [V]अपां वृषा वर्षिता पर्जन्यः तद्वान् [14]तत्सहितो वातः। "अनो नुट्" (पा ८·२·१६)। हे [V]इन्द्रापर्वता इन्द्रापर्वतौ। पर्वतः संवत्सर इत्येके। युवामपि [V]नः अस्मान् [V]शिशीतं तनूकुरुतं निर्मलीकुरुतम्। श्यतेः "बहुलं छन्दसि" (पा २·४·७६) इति शपः श्लुः, ईत्वं च। [V]तत् तस्मात् [V]विश्वे अपि [V]देवाः अन्येऽपि जनाः [V]नः अस्मभ्यं [V]वरिवस्यन्तु अन्नं दातुमिच्छन्तु, वरिवोऽन्नम्। "छन्दसि परेच्छायाम्" (द्र. पाभा ३·१·८) इति क्यच्॥

"पृश्नियै दुग्धे प्रैयङ्गवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकामः" (तैसं २·२·११) इत्यस्याः पुरोनुवाक्या–'प्रिया वो नाम' इति द्विपदा त्रिष्टुप्॥ हे [V]मरुतः, [V]वः युष्माकं [V]प्रिया प्रियाणि [V]नाम

इष्टयन्तरं विधत्ते– "पृश्नियै दुग्धे प्रैयङ्गवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकामः पृश्नियै वै पयसो मरुतो जाताः पृश्नियै प्रियङ्गवो मारुताः खलु वै देवतया सजाता मरुत एव स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति" (तैसं २·२·११) इति। "पृश्निः श्वेता गौस्तादृश्या गोर्मरुतां प्रियङ्गूनां(णां) [37]चोत्पत्तिप्रसिद्धिः शाखान्तरीयार्थवादे [38]द्रष्टव्या। 'पृश्नियै प्रियङ्गवः' इत्यत्र 'पयसो [39]जाताः' इत्यनुवर्तते। एकोदरत्वात् प्रियङ्गूनां (णां) मरुद्देवत्यत्वम्॥ विधत्ते–"प्रियवती याज्यानुवाक्ये भवतः प्रियमेवैनꣳ समानानां करोति द्विपदा पुरोऽनुवाक्या भवति द्विपद एवाव रुन्द्धे चतुष्पदा याज्या चतुष्पद एव पशूनव रुन्द्धे" (तैसं २·२·११) इति। प्रियशब्दोऽस्ति ययोस्ते ऋचौ प्रियवत्यौ। ते [40]चात्रोदाहरिष्येते। तत्प्रयोगाद्यजमानस्य समानानां मध्ये प्रियत्वम्। तयोर्ऋचोर्विद्यमानं पाठप्राप्तं [41-]द्विपादत्वं चतुष्पादत्वं[-41] च मनुष्यप्राप्त्या पशुप्राप्त्या च प्रशस्यते॥

प्रिया इति॥ तत्र पुरोनुवाक्यां द्विपदामाह– 'प्रिया वो नाम हुवे तुराणाम्। आ यत् तृपन्मरुतो वावशानाः' इति। हे [V]मरुतः [V]तुराणां हविःस्वीकारं प्रति त्वरमाणानां [V]वः युष्माकं [V]प्रिया [V]नाम प्रियाणि [42]नामानि [V]आ [V]हुवे आह्वयामि। [V]यत् यस्माद्यूयं [V]तृपत् तृप्तिं [V]वावशानाः कामयमानाः स्थ तस्मादाह्वयामि॥

१२. लं–इत्यादौ। १३. लं–'वसर्हा' नास्ति १४. तं२.लं–सहितः।

३७. इ–°प्रसिद्धा। ३८. इ–द्रष्टव्यम्। ३९. हो१–अनुजाताः। ४०. अ.क.ड–चोदाह°। ४१–४१. आ.क.ड.ने.श्रं.हो१–द्विपदत्वं चतुष्पदत्वं च। ४२. हो१–धामानि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥

श्रियसे । कम् । भानुभिरिति भानु-भिः । समिति । मिमिक्षिरे ।
ते । रश्मिभिरिति रश्मि-भिः । ते । ऋक्वभिरित्यृक्व-भिः । सुखादय इति सु-खादयः ।
५ ते । वाशीमन्त इति वाशि-मन्तः । इष्मिणः । अभीरवः । विद्रे । प्रियस्य । मारुतस्य । धाम्नः ॥

नामानि । " सुपां सुलुक् " (पा ७·१·३९) इति लुक् । [v]तुराणां कार्यं प्रति त्वरमाणानां [v]हुवे आह्वयामि । पूर्ववत् संप्रसारणम् (पा ६·१·३२) । आ इति [15]उपसर्गश्रवणाद्योग्यं [16]क्रियापद-मध्याहियते । आगच्छतेत्यर्थः । आगमनं विशिनष्टि–[v]यत् यस्मिन्नागमने [v]वावशानाः ग्रामादिकं कामयमानाः यजमानाः [17v]तृपत् [18]तृपेयुरिति । लेटि वचनव्यत्ययः (पा ३·१·८५) । तृपतिस्तौदा-
१० दिकः । यद्वा–[19]तृप्तिस्तृपत् [20]औणादिकोतिप्रत्ययः (द्र. उ २५१) । यत् यस्माद्यूयं तृप्तिं वावशानाः कामयमानाः स्थ, तस्मादागच्छतेति, यजमानस्य वा तृप्तिं वावशानाः यस्मात्तस्मादागच्छतेति । वशेर्यङ्लुगन्ताद्व्यत्ययेनात्मनेपदम् । " न वशः " (पा ६·१·२०) इति संप्रसारणाभावः ॥

तत्रैव याज्या ॥ श्रियस इति चतुष्पदा जगती । विद्र इति चतुर्थपादादिः ॥ हे मरुतः, [v]श्रियसे सेवितुं [v]कं जलं वृष्टयर्थम् । तुमर्थे (पा ३.४.९) असेप्रत्ययः । [v]भानुभिः भानवद्भिः
१५ [21]भानशीलैर्वा [v]रश्मिभिः सूर्यस्य रश्मिभिः करैः [v]सं [v]मिमिक्षिरे संगच्छन्ते । मिक्षतिर्गतिकर्मा छान्दसः । यद्वा-लोके जलं श्रयितुं रश्मिभिः सह मिमिक्षिरे मेढुमिच्छन्ति वृष्ट्या पृथिवीं

श्रियस इति ॥ तत्रैव चतुष्पदां याज्यामाह– ' श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः । ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ' इति । [43v]ते मरुतः पुरोवातरूपाः सन्तः [v]कं सुखं [v]श्रियसे प्राणिभिराश्रयितुं [v]भानुभिः [44]भासकैः [v]रश्मिभिः सूर्यरश्मिभिः
२० सहिताः [v]सं [v]मिमिक्षिरे [45v]मेढुं वृष्ट्या भूमिं सम्यक् सेक्तुमिच्छन्ति । [v]ते मरुतः [v]ऋक्वभिः याज्यापुरोनु-वाक्यारूपाभिर्ऋग्भिः स्तुताः सन्तः [v]सुखादयः शोभनं हविः खादितवन्तो भक्षितवन्तः । ततः [v]ते मरुतो [v]वाशीमन्तः उत्साहजनितघोषरूपबहुविधशब्दवन्तः [v]इष्मिणः स्वगृहान् प्रति गतिमन्तः [v]अभीरवः स्वकार्यस्य निष्पन्नत्वेन विघ्नकारिभ्योऽसुरेभ्यो भयरहिताः [v]प्रियस्य [v]मारुतस्य [v]धाम्नः मरुतां संबन्धि यत्प्रियं स्थानं तत् [v]विद्रे लब्धवन्तः ॥

२५ १५. तं.तं२.मै–आङ्पदश्रव° । १६. मै–°मध्याहार्यम् । १७. तं१.तं२.मै–तृपन् । १८. अ. मै४–तृप्येयु° ॥ १९. तं१.तं२.मै–°तृपन् । २०. तं२.मै–औणादिको निप्रत्ययः । २१. मै–भानशीतैर्वा ।

४३. ने–हे । ४४. ड१–भासुरैः; ने.हो१–स्वकैः । ४५. हो१–'मेढुं' नास्ति ।

CC-0. Shri Vipin-Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

सेक्तुमिच्छन्ति [V]ते मरुतः [V]सुखादयः सुखादनाः। खादतेरौणादिक [२२]इप्रत्ययः। सुष्ठु हविषां भक्षयितारो भूत्वा ऋत्विग्भिः संगच्छन्ते। ऋक्तन्तो मन्त्रवन्तः ऋत्विज इत्यर्थः। "छन्दसीवनिपौ" (पा ५·२·१०९ वा २) इति वनिप्। अयस्मयादित्वेन (पा १·४·२०) पदत्वात् कुत्वम्, भत्त्वात् जश्त्वाभावः। ऋत्विग्भिः संयुज्य हवींषि भक्षयन्तीत्यर्थः। [V]ते मरुतः [V]वाशीमन्तः शब्दवन्तः [V]इष्मिणः गमनवन्तः [V]अभीरवः भयरहिताः, [V]प्रियस्य सर्वाभिमतस्य [V]मारुतस्य [V]धाम्नः मरुतां संबन्धिनः स्थानविशेषस्य [V]विद्रे लब्धवन्तः सर्वोपकारकत्वात् हविषः संबन्धितया च विशिष्टं पदं प्राप्ताः। पूर्ववत् कर्मणः संप्रदानत्वात् [२३]चतुर्थ्यर्थे षष्ठी[-२३] (द्र. पाभा १·४·३२)। विन्दतेर्लिटि द्विर्वचनाभावश्छान्दसः। "इरयो रे" (पा ६·४·७६) इति रेभावः। यद्वा–लटि वचनव्यत्ययेनैकवचनम्, "बहुलं छन्दसि" (पा २·४·७३) इति विकरणस्य लुक्। "लोपस्त आत्मनेपदेषु" (पा ७·१·४१) इति तलोपः। "बहुलं छन्दसि" (पा ७·१·८) इति रुट्। पादादित्वात् न निहन्यते (पा ८·१·१६-१८)॥

इष्ट्यन्तरं विधातुं प्रस्तौति–"देवासुराः संयत्ता आसन् ते देवा मिथो विप्रिया आसन् तेऽन्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठमानाश्चतुर्धा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैः स इन्द्रः प्रजापतिमुपाधावत्तमेतया संज्ञान्याऽयाजयदग्नये वसुमते पुरोडाशमष्टाकपालं निरवपत् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायाऽऽदित्यवते चरुं ततो वा इन्द्रं देवा ज्यैष्ठ्यायाभि समजानत" (तैसं २·२·११) इति। देवा असुराश्च यदा युद्धार्थमुद्यतास्तदानीमहमेव ज्येष्ठो भविष्यामि नेतर इत्येवं परस्परं ज्यैष्ठ्यमनङ्गीकुर्वाणा देवाः परस्परं प्रियरहिताः सन्तः सेनां [४६]चतुर्धा विभज्य विविधं यथा भवति तथा प्रक्रान्तवन्तः। तत्र वसुभिः सहितोऽग्निरेकः संघः। रुद्रैः सहितः सोमो द्वितीयः संघः। मरुद्भिः सहित इन्द्रस्तृतीयः संघः। आदित्यैः सहितो वरुणश्चतुर्थः संघः। तदानीमिन्द्रः [४७]प्रजापतिमुपसेव्य तदुपदेशेन संज्ञानीनामिकामिष्टिं कृतवान्। तत ऊर्ध्वं [४८]तदिष्टिसामर्थ्यादपगतमत्सरा देवा ज्यैष्ठ्यार्थमिन्द्रं सम्यक् अभ्यनुज्ञातवन्तः। सम्यग्ज्ञायतेऽभ्यनुज्ञायते ययेष्ट्या [४९-]सा संज्ञानी नाम। तानूनप्त्रार्थवादत्वेन[-४९] संज्ञान्या अननुष्ठितत्वान्नास्ति कस्यचित् प्राधान्यं, किंतु स्वकार्यसिद्धिमभिप्रेत्य सर्वे मात्सर्यं जहुः। इह त्विष्टिप्रसादात् इन्द्रस्य प्राधान्यम्। एतच्चोभयं कल्पभेदाद्युगभेदाद्वा द्रष्टव्यम्॥

[५०]अथ विधत्ते–"य समानैर्मिथो विप्रियः स्यात् तमेतया संज्ञान्या याजयेदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेत् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायाऽऽदित्यवते चरुमिन्द्रमेवैनं भूतं ज्यैष्ठ्याय समाना अभि सं जानते वसिष्ठः समानानां भवति" (तैसं २·२·११) इति। इन्द्रमेव भूतं स्वामिनमेव सन्तमेनं यजमानं ज्यैष्ठ्यार्थं [५१]सम्यगभ्यनुजानन्ति। ततोऽयं समानानां वसिष्ठो वासयितृतमः पालको भवति॥

---

२२. लं–प्रत्ययः २३–२३. लं–'चतुर्थ्यर्थे षष्ठी' नास्ति।

४६. ने.हो१–चतुर्विधम्। ४७. इ–प्रजापतिमुपाधावदुपसेव्य। ४८. आ.क.जो.ना.हा–इष्टि°। ४९–४९. आ.क.ड.ड१.शृं.हो१–असौ संज्ञानी। तानू°; जा.ना.हा–असौ संज्ञानी, तानूनप्त्रार्थवादे तेन तेन; ने–सा संज्ञानी नाम। अर्थवादत्वेन। ५०. ने–'अथ' नास्ति। ५१. इ–सम्यगनु°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निः प्रथमो वसुभिर्नो अव्यात् सोमो रुद्रेभिरभि रक्षतु त्मना ।
इन्द्रो मरुद्भिर्ऋतुधा कृणोत्वादित्यैर्नो वरुणः सꣳ शिशातु ॥
सं नो देवो वसुभिरग्निः सꣳ (२) सोमस्तनूभी रुद्रियाभिः ।
समिन्द्रो मरुद्भिर्यज्ञियैः समादित्यैर्नो वरुणो अजिज्ञिपत् ॥

५ अग्निः । प्रथमः । वसुभिरिति वसु-भिः । नः । अव्यात् । सोमः । रुद्रेभिः । अभीति । रक्षतु । त्मना ।
इन्द्रः । मरुद्भिरिति मरुत्-भिः । ऋतुधेत्यृतु-धा । कृणोतु ।
आदित्यैः । नः । वरुणः । समिति । शिशातु ॥
समिति । नः । देवः । वसुभिरिति वसु-भिः । अग्निः । समिति (२) । सोमः । तनूभिः । रुद्रियाभिः ।
समिति । इन्द्रः । मरुद्भिरिति मरुत्-भिः । यज्ञियैः । समिति । आदित्यैः । नः । वरुणः । अजिज्ञिपत् ॥

१० "यः समानैर्मिथो विप्रियः स्यात् तमेतया संज्ञान्या याजयेदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेत् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायाऽऽदित्यवते चरुम्" (तैसं २·२·११) [१]इत्यस्याः पुरोनुवाक्या– 'अग्निः प्रथमः' इति त्रिष्टुप् ॥ [V]अग्निः [V]प्रथमः प्रधानः आद्यो वा [V]वसुभिः सह अस्मान् [V]अव्यात् रक्षतु । [V]रुद्रेभिः रुद्रैः सह [V]सोमः अस्मान् [V]अभि [V]रक्षतु [V]त्मना आत्मना आत्मनैव अन्यनिरपेक्षः । "मन्त्रेष्वाङ्यादेरात्मनः" (पा ६.४.
१५ १४१) इत्याकारलोपः । [V]इन्द्रः [V]मरुद्भिः सह [V]ऋतुधा ऋतावृतौ तद्धर्मान् [V]कृणोतु करोतु तया तया विधया प्रवर्तयतु । धाप्रत्ययश्छान्दसः । [V]आदित्यैः सह [V]वरुणः अस्मान् [V]सं [V]शिशातु संशितव्रतान् करोतु निर्मलीकरोतु । श्यतेर्लोटि शपः श्लुः, "बहुलं छन्दसि" (पा ७·४·७८) इत्यभ्यासस्येत्वम् ॥

अथ याज्या– 'सं नः' इति त्रिष्टुप्, पङ्क्तिप्रकारो वा ॥ [V]नः अस्मान् अग्निः [V]देवः
२० [V]वसुभिः सह [V]सम् [V]अजिज्ञिपत् सम्यक् ज्ञापयतु [२५]अस्मज्ज्येष्ठं [२६]सम्यगभ्युपगच्छतु । ज्ञापयतेः

अग्निरिति ॥ तत्र पुरोनुवाक्यामाह– **'अग्निः प्रथमो वसुभिर्नो अव्यात् सोमो रुद्रेभिरभि रक्षतु त्मना । इन्द्रो मरुद्भिर्ऋतुधा कृणोत्वादित्यैर्नो वरुणः सꣳ शिशातु' इति । [V]वसुभिः सहितः [V]अग्निः [V]प्रथमः संघाधिपतिः [V]नः अस्मान् अवतु । रुद्रैः सहितः [V]सोमः [V]त्मना स्वयमेव प्रीतिपुरःसरम् [V]अभि [V]रक्षतु ।**
[V]मरुद्भिः सहितः [V]इन्द्रः [V]ऋतुधा [५२]तत्तदृतूचितभोगधारिणोऽस्मान् करोतु । [V]आदित्यैः सहितः [V]वरुणः
२५ **[V]नः अस्मान् [V]सं [V]शिशातु संशितव्रतान् सम्यगनुष्ठितव्रतान् [५३][V]कृणोतु ॥**

समिति ॥ तत्रैव याज्यामाह–**'सं नो देवो वसुभिरग्निः सꣳ सोमस्तनूभी रुद्रियाभिः । समिन्द्रो मरुद्भिर्यज्ञियैः समादित्यैर्नो वरुणो अजिज्ञिपत्' इति । [V]वसुभिः सहितः [V]अग्निः [V]देवः [V]नः अस्मान् [V]सम्**

२४. अ–इत्यस्य । २५. तं१.तं२.मै–अस्मज्जेष्ठं' नास्ति । २६. अ.लं–सम्यगस्यप° ।

५२. ड.ने.हो१–°चितभाग° । ५३. आ. ड१.शृं– करोतु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

यथाऽऽदित्या वसुभिः संबभूवुर्मरुद्भी रुद्राः समजानताभि ।
एवा त्रिणामन्नह्णीयमाना विश्वे देवाः समनसो भवन्तु ॥

यथा । आदित्याः । वसुभिरिति वसु-भिः । संबभूवुरिति सं-बभूवुः ।
मरुद्भिरिति मरुत्-भिः । रुद्राः । समजानतेति सम्-अजानत । अभि ।
एवा । त्रिणामन्निति त्रि-नामन् । अह्णीयमानाः । ५
विश्वे । देवाः । समनस इति स-मनसः । भवन्तु ॥

छान्दसो लुङ्, छान्दसो वर्णविकारः । [२७-V]सोमः अपि [२७] [V]रुद्रियाभिः रुद्रार्हाभिः [V]तनूभिः शरीरैः एकादशधा स्थिताभिरस्मान् समजिज्ञिपत् । [V]इन्द्रः च [V]यज्ञियैः यज्ञार्हैः [V]मरुद्भिः सहास्मान् समजिज्ञिपत् । [V]वरुणः च [V]आदित्यैः सह अस्मान् समजिज्ञिपत् ॥

अथ याज्याविकल्पः— 'यथा' इति त्रिष्टुप् ॥ [V]यथा [V]वसुभिः सह [V]आदित्याः १०
[V]संबभूवुः [२८]एकीबभूवुः, यथा वा [V]मरुद्भिः सह [V]रुद्राः [V]अभि [V]समजानत [२९]आभिमुख्येन संगताः [२९] । [V]एवा एवम् । "सुपां सुलुक्°" (पा ७·१·३९) इति [३०]अमो डादेशः । हे [V]त्रिणामन्, त्रीणि नामानि गुह्यप्रकाशसोमनिमित्तानि यस्य स तथोक्तः । "पूर्वपदात् संज्ञायामगः" (पा ८·४·३) इति णत्वम् । अग्नियजमानयोरभेद उपचर्यते । [V]अह्णीयमानाः [३१]अहीयमानाः विभूतयः । [३२]ह्णिः कण्ड्वादिः । ईदृशाः [V]विश्वे [V]देवाः [३३]परस्परमभि [V]समनसः [V]भवन्तु समानमनसो भवन्तु । १५
"समानस्य छन्दसि°" (पा ६·३·८४) इति सभावः ॥

[V]अजिज्ञिपत् सम्यगनुष्ठानं [५४]ज्ञापयतु । रुद्रसंबन्धिनीभिः [V]तनूभिः सहितः [V]सोमः समजिज्ञिपत् । यज्ञयोग्यैः [V]मरुद्भिः सहितः [V]इन्द्रः समजिज्ञिपत् । [V]आदित्यैः सहितः [V]वरुणः समजिज्ञिपत् ॥

यथेति ॥ तत्रैव विकल्पितामन्यां याज्यामाह—'यथाऽऽदित्या वसुभिः संबभूवुर्मरुद्भी रुद्राः समजानताभि । एवा त्रिणामन्नह्णीयमाना विश्वे देवाः समनसो भवन्तु' इति । पूर्वोक्तेषु संघचतुष्टयमध्यवर्तिषु २०
देवेषु [V]यथा वरुणसमीपवर्तिनः [V]आदित्याः अग्निसमीपवर्तिभिः [V]वसुभिः [V]संबभूवुः संगताः प्रीतियुक्ता बभूवुः, यथा चेन्द्रसमीपवर्तिभिः [V]मरुद्भिः सह सोमसमीपवर्तिनः [V]रुद्राः [V]अभि [V]समजानत ज्यैष्ठ्यं सम्यक् अभ्यनुज्ञातवन्तः, त्रीणि नामान्याहवनीयगार्हपत्यदक्षिणाग्निरूपाणि हव्यवाहनकव्यवाहनसहरक्षोरूपाणि वा यस्याग्नेः सोऽग्निस्त्रिणामा, हे [V]त्रिणामन्, [V]एवा एवमेव यथा रुद्रादयः [५५]तद्वत् [V]विश्वे [V]देवाः अन्येऽपि [५५]रुद्रादि-

---

२७–२७. तं१.तं२.–सोमोऽभि । २८. तं२–'एकीबभूवुः' नास्ति । २९–२९. मै४–ऐकमत्यं २५
गताः । ३०. तं.तं२.मै.लं–'अमो' नास्ति । ३१. पं२–अभिक्रीयमाना; मै४–अहीयमान । ३२. मै४–ह्णीङ् । ३३. मै४–परस्परमस्माभिर्वा समनसो ।

---

५४. ने–प्रापयतु । ५५. इ.क.जो.ना.हा– तथा । ५६. ड.ड१.शृं.हो१–रुद्रादिपरिसरवर्तिनः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने । अर्हन्तश्चिद्यमिन्धते संजनयन्ति जन्तवः ॥
सं यदिषो वनामहे सꣳ हव्या मानुषाणाम् ।

कुत्र । चित् । यस्य । समृताविति सम्-ऋतौ । रण्वाः । नरः । नृषदन इति नृ-सदने ।
अर्हन्तः । चित् । यम् । इन्धते । संजनयन्तीति सं-जनयन्ति । जन्तवः ॥
५ समिति । यत् । इषः । वनामहे । समिति । हव्या । मानुषाणाम् ।

अथ 'कुत्रा चित्' इत्यनयोरनुष्टुभोः कुत्रचिद्विनियोगो द्रष्टव्यः । [३४]केचिदाहुः– अत्रैव स्विष्टकृतः पुरोनुवाक्या याज्या [३५]चेति । [V]कुत्रा [V]चित् कुत्रचिदपि सर्वत्रापीति यावत् । [V]यस्य [३६-V]समृतौ संप्राप्तौ[-३६] [३७-V]नरः मनुष्याः [V]रण्वा रमणा[-३७] भवन्ति । [३८]रणनवन्तो वा गतिमन्तो वा । रवि गतौ, इदित्वान्नुम् (पा ७.१.५८), पचाद्यच् (पा ३.१.१३४) । [V]नृषदने नराः सीदन्ति
१० [३९]–यत्र तत्र[-३९] सर्वत्र प्रदेशे । किं च यमेवाग्निम् [V]अर्हन्तः महान्तः पूजयन्तो वा मनुष्याः [V]इन्धते दीपयन्ति । किं च [V]यम् अग्निं [V]जन्तवः मनुष्याः [V]संजनयन्ति आधानादिना सम्यगुत्पादयन्ति । [४०]–सोऽस्माकमभिमतं दातेति शेषः ।

याज्या 'सम्' इति । यस्मात् वयं [V]इषः गतीः संप्रार्थयामहे मनुष्याणां संबन्धिनीः अस्माकमेव स्यादिति । तथा [V]हव्या हव्यं वहन्ति कर्माणि च [V]सं [V]वनामहे वयमेव संपादयितारः

१५ **समीपवर्तिनो देवाः सर्वे [V]अहूणीयमानाः वैरिभिः [५७]अनपह्रियमाणविभूतयः [V]समनसः परस्परं समानमनस्काः [V]भवन्तु । यद्यप्यत्र चत्वारि हवींषि तथाऽपि सहप्रदानेन पुरोनुवाक्याया भेदो नास्ति, तथा याज्याया अपि । यथा पूर्वत्र ग्रामकामं प्रति विहितयोरैन्द्रवैश्वदेवहविषोः सहप्रदानात् पुरोनुवाक्यादिभेदो नास्ति ॥**

कुत्रेति ॥ अत्रैव स्विष्टकृतः पुरोनुवाक्यामाह–'कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने । अर्हन्तश्चिद्यमिन्धते संजनयन्ति जन्तवः' इति । [V]यस्य स्विष्टकृद्देवस्य [V]समृतौ संगतौ सत्यां [V]नृषदने
२० **मनुष्यस्थाने ग्रामगृहादौ [V]कुत्र [V]चित् यत्र कुत्रापि [V]नरः मनुष्याः [V]रण्वा रममाणास्तिष्ठन्ति, किं च [V]यं स्विष्टकृद्देवम् [V]अर्हन्तः [V]चित् [५८]उचितमन्त्रविशेषैः पूजयन्त एव [५९]तदीयाहुत्यर्थम् [V]इन्धते वह्निं प्रज्वलयन्ति, प्रज्वाल्य च [V]जन्तवः यजमानाः [V]संजनयन्ति समीचीनं फलमुत्पादयन्ति, तादृशः स्विष्टकृद्देवः प्रसीदत्विति शेषः ॥**

समिति ॥ तत्रैव याज्यामाह–'सं यदिषो वनामहे सꣳ हव्या मानुषाणाम् । उत द्युम्नस्य शवस
२५ **ऋतस्य रश्मिमा ददे' इति । [V]यत् यस्मात् कारणात् [V]इषः इष्यमाणान्यन्नानि [V]सं [V]वनामहे स्विष्टकृद्देव-**

३४. मै४–'केचिदाहुः' नास्ति । ३५. मै४–चेति केचित् । ३६–३६. मै४–संगमने । ३७–३७. मै४–मनुष्या रममाणाः । ३८. लं–रणवन्तः । ३९–३९. तं१.तं२.लं–यत्र यत्र । ४०–४०. तं१. तं२.मै.लं–सोऽस्माकमस्य ऋतस्य सत्यस्य रश्मिमिमंम् ।

५७. ने.हो१–अपक्रियमाणा विभूतयः; शृं–अनपक्षीयमाणा विभूतयः; हा–अनपह्रियमाणा विश्रुतः ।
३० ५८. अ.क.शृं–मन्त्रविशेषैः । ५९. ने–तदाहुत्यर्थम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

उत द्युम्नस्य शवस (३) ऋतस्य रश्मिमा ददे ॥
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तराऽसत् ॥

उत । द्युम्नस्य । शवसः (३) । ऋतस्य । रश्मिम् । एति । ददे ॥
यज्ञः । देवानाम् । प्रतीति । एति । सुम्नम् । आदित्यासः । भवत । मृडयन्तः । ५
एति । वः । अर्वाची । सुमतिरिति सु-मतिः । ववृत्यात् ।
अꣳहोः । चित् । या । वरिवोवित्तरेति वरिवोवित्-तरा । असत् ॥

स्यामेति । [V]उत अपि चेत्यर्थः । [V]द्युम्नस्य धनस्य धनवतो वा [V]शवसः बलस्य [V]ऋतस्य सत्यस्य [V]रश्मिं यमनम्[४०] अग्निम् [V]आ [V]ददे आददीमहि[४१], वचनव्यत्ययः (पा ३·१·८५), आश्रयामह इत्यर्थः ॥

" आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूतिकामः " (तैसं २·३·१) इत्यस्याः पुरोनुवाक्या– १०
' यज्ञो देवानाम् ' इति त्रिष्टुप् । ग्रहेषु व्याख्याता – " कदा चन " (तैसं १·४·२२) इत्यत्र ।

प्रसादेन सम्यग्भजामः, [V]मानुषाणां यजमानानां [V]हव्या [६०]होमयोग्यानि द्रव्याणि [V]सं वनामहे, [V]उत अपि च [V]द्युम्नस्य धनस्य [V]शवसः बलस्य [V]ऋतस्य यज्ञस्य च [V]रश्मिं रश्मिवत् प्रकाशमुत्कर्षम् [V]आ [V]ददे स्वीकुर्मः । [६१]तस्मात् कारणादेवमनुग्रहीतारं स्विष्टकृद्देवं [६२]भजामहे इति शेषः ॥

इष्टयन्तरं विधत्ते–" आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूतिकाम आदित्या वा एतं भूत्यै प्रति नुदन्ते १५
योऽलं भूत्यै सन् भूतिं न प्राप्नोत्यादित्यानेव भुवद्वतः स्वेन भागधेयेनोप धावति त एवैनं भूतिं गमयन्ति भवत्येव " (तैसं २·३·१) इति । यदीययोर्याज्यापुरोनुवाक्ययोर्भुवच्छब्दः श्रूयते [६३]त एत आदित्या भुवद्वन्तः । यद्यपि पुरोनुवाक्यायां ' भवता मृडयन्तः ' इति भवतेत्ययं शब्दः पठितः, यद्यपि च याज्यायां ' भवति प्रणीतौ ' इति भवतीत्येषशब्दः पठितो न तु भुवच्छब्दः क्वाप्यस्ति, तथाऽपि वर्णविकारमभिप्रेत्य ' भुवद्वद्भ्यः ' इत्युच्यते । एवमन्यत्रापि " वायवे नियुत्वत आ लभेत " (तैसं २·१·१), "अग्नये २०
[६५]पथिकृते " (तैसं २.२.२), इत्यादौ विशेषणैर्याज्यानुवाक्यागताः शब्दाः [६५]स्मार्यन्त इति द्रष्टव्यम् । ते च याज्यादिगताः शब्दास्तत्तत्प्रकृतोचितफलस्य[६६] [६७]सूचकाः । अतोऽत्रापि भूतिसूचकभुवच्छब्दवन्त इत्युक्तं भवति । तथा सति भुवद्वन्तः फलत्वेन दातव्यभूतिमन्त इत्यर्थोऽपि लभ्यते ॥

यज्ञ इति ॥ तत्र पुरोनुवाक्यामाह–' यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तराऽसत् ' इति । अयं [V]यज्ञः [V]देवानां [V]सुम्नं सुखं २५
[V]प्रति [V]एति गच्छति प्रवर्तते । हे [V]आदित्यासः यूयमस्मान् [V]मृडयन्तः सुखयन्तः [V]भवत तिष्ठत । युष्माकं

४१. तं१.तं२.मै.लं–आददीमहे ।

६०. ड.हो१–हवियोंग्यानि; ने–यानि हवींषि योग्यानि । ६१. ड१–अस्मात् । ६२. अ. आ.उ.ड.ड१.ने.पा.हो१–भजामः । ६३. अ.उ.पा–ततः । ६४. अ–स्विष्टकृते । ६५. आ.ड.ड१–स्मर्यन्ते । ६६. अ.उ.पा–°प्रकृतोदितफलस्य । ६७. ड.ड१.ने.हो१–वाचकाः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥

शुचिः । अपः । सूयवसा इति सु-यवसाः । अदब्धः ।
उपेति । क्षेति । वृद्धवया इति वृद्ध-वयाः । सुवीर इति सु-वीरः ।
५ नकिः । तम् । घ्नन्ति । अन्तितः । न । दूरात् । यः । आदित्यानाम् । भवति । प्रणीताविति प्र-नीतौ ॥

अयमस्मदीयः [V]यज्ञः [V]देवानां [V]सुम्नं सुखं [V]प्रति [V]एति गच्छतु । किं च– हे [४२]आदित्याः, यूयमप्यस्मान् [V]मृडयन्तः [V]भवत । किं च–युष्माकं [V]सुमतिः शोभनाऽनुग्रहात्मिका बुद्धिः [V]अर्वाची अस्मदभिमुखी [V]आ [V]ववृत्यात् आवर्तताम् । किं च [४३V]अꣳहोश्चित् [४४]ज्ञातुरिव ज्ञातृष्विव [V]या मतिः [V]वरिवोवित्तरा[४५] धनस्य लम्भयित्री भवेदिति ॥

१० तत्रैव याज्या– 'शुचिः' इति त्रिष्टुप् ॥ [V]शुचिः शुद्धः भूत्वा [V]अपः कर्माणि कर्मफलानि वा [V]उप [V]क्षेति उपगच्छति । क्षि निवासगत्योः । "बहुलं छन्दसि" (पा २·४·७३) इति शपो लुक् । [V]सूयवसाः शोभनयवसाः [४५]शोभनाशनाः वा[४५] । "अन्येषामपि दृश्यते" (पा ६·३·१३७) इति दीर्घत्वम् । "परादिश्छन्दसि०" (पा ६·२·१९९) इत्युत्तरपदाद्युदात्तत्त्वम् । [V]अदब्धः केनचिदप्यहिंसितः [V]वृद्धवयाः [४६]प्रभूतान्नतमः [V]सुवीरः शोभनपुत्रपौत्रादिकः । "वीरवीर्यौ च" १५ (पा ६·२·१२०) इत्युत्तरपदाद्युदात्तत्वम् । किं च– केचिदपि– [V]तं [V]नकिः [V]घ्नन्ति हन्तुं

[V]सुमतिः अनुग्रहबुद्धिरर्वाचीनेष्वस्मासु प्रवृत्ता सती [V]आ [V]ववृत्यात् [६८]आवर्तताम् । [V]या सुमतिः [V]अꣳहोः [V]चित् अस्मदीयपापादपि [६९]आवर्तते पापं विनाशयतीत्यर्थः, सा सुमतिः [V]वरिवोवित्तरा [V]असत् अतिशयेन परिचर्याऽभिज्ञा भवतु ॥

शुचिरिति ॥ तत्रैव याज्यामाह– 'शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः । २० नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ' इति । अयं यजमानः [V]शुचिः सन् [V]अपः अनुष्ठीयमानं कर्म [V]उप [V]क्षेति समीपे प्राप्नोति । कीदृशोऽयम्? [V]सूयवसाः शोभनं यवसं तृणं [७०]तेनोपलक्षितमन्नादिभोग्यं यस्य सोऽयं सूयवसाः, [V]अदब्धः कैरपि शत्रुभिरतिरस्कृतः, वृद्धं दीर्घं वय आयुर्यस्यासौ [V]वृद्धवयाः चिरजीवीत्यर्थः, शोभना वीराः पुत्रा भृत्याश्च यस्यासौ [V]सुवीरः । [७१-V]यः ईदृशो[७१] यजमानः [V]आदित्यानां [V]प्रणीतौ प्रणयने कर्मणि [V]भवति प्रवर्तते [V]तं यजमानं शत्रवः [V]अन्तितः समीपे २५ [V]नकिः [V]घ्नन्ति न विनाशयन्ति । [V]दूरात् अपि [V]न घ्नन्ति । नकिः शब्दो निषेधवाची ॥

४२. मै४–आदित्यासः । ४३. तं१.तं२.मै.मै.४.लं–अंहोः । ४४. मै४–ज्ञातुः अप्रज्ञातुरेव वा सुमतिरतिशयेन । ४५–४५. मै–शोभनांशुकाः; तं२–'शोभनाशनाः' नास्ति । ४६. अ– प्रभूतान्नः ।

६८. ने–अदोऽर्वाची सुमतिर्वर्तताम् । ६९. अ.उ.जो.ना.पा.हा–व्यावर्तताम्; ने.हो१–व्यावर्तते । ७०. ने.हो१–तेनोपहित° । ७१–७१. ने–ईदृशोऽयम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

धारयन्त आदित्यासो जगत् स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा (४) असुर्यमृतावानश्चयमाना ऋणानि ॥

धारयन्तः । आदित्यासः । जगत् । स्थाः । देवाः । विश्वस्य । भुवनस्य । गोपा इति गो-पाः ।
दीर्घाधिय इति दीर्घ-धियः । रक्षमाणाः (४) । असुर्यम् ।
ऋतावान इत्यृत-वानः । चयमानाः । ऋणानि ॥ ५

समर्था भवन्ति । " युष्मत्तत्ततक्षुःपु° " (पा ८·३·१०३) इति षत्वम् । [v]अन्तितः अन्तिकेऽपि स्थिताः [v]न च [v]दूरात् दूरेऽपि स्थिताः । " कादिलोपो बहुलम् " (द्र. पा ६·४·१४९ वा ८) इत्यन्तिकस्य लोपः । कस्यैतदेवं भवतीत्याह— [v]यः [v]आदित्यानाम् आदित्यार्थं [v]प्रणीतौ परिचरणे [v]भवति वर्तते ॥

" आदित्येभ्यो धारयद्वद्व्यश्चरुं निर्वपेदपरुद्धो वाऽपरुध्यमानो वा " (तैसं २·३·१) १०
इत्यस्याः पुरोनुवाक्या— ' धारयन्तः ' इति त्रिष्टुप् ॥ [v]जगत् [v]धारयन्तः स्थापयन्तः [v]आदित्यासः आदित्याः [v]स्थाः स्थास्नवः । " क्विप् च " (पा ३·२·७६) इति क्विप् । [v]देवाः देवनशीलाः

इष्टयन्तरं विधत्ते— " आदित्येभ्यो धारयद्वद्भ्यश्चरुं निर्वपेदपरुद्धो वाऽपरुध्यमानो वाऽऽदित्या वा अपरोद्धार आदित्या अवगमयितार आदित्यानेव धारयद्वतः स्वेन भागधेयेनोप धावति त एवैनं विशि दाध्रत्यनपरुध्यो भवति " (तैसं २·३·१) इति । धारयच्छब्दो यदीययोर्याज्यानुवाक्ययोर्वर्तते त इमे १५
धारयद्वन्तः । स्थानभ्रष्टं स्वस्थाने धारयितुं क्षमा इति तस्य पदस्य पर्यवसितार्थः । यो राजा पूर्वं स्वराष्ट्राद्वैरिणा निःसारितः सोऽपरुद्धः, यस्त्विदानीं निःसार्यते सोऽपरुद्ध्यमानः, तयोरन्यतरस्येयमिष्टिः । अपरोद्धारः पूर्वं निःसारयितारः । अवगमयितार इदानीं निःसारयितुमुद्यताः । अथ वा पुनः स्वराष्ट्रं प्रापयितारः । विशि स्वराष्ट्रगतप्रजायां दाध्रति धारयन्ति स्थापयन्तीत्यर्थः । ततोऽयं वैरिभिरपरोद्धुमशक्यो भवति ॥

धारयन्त इति ॥ तत्र पुरोनुवाक्यामाह— ' धारयन्त आदित्यासो जगत् स्था देवा विश्वस्य २०
भुवनस्य गोपाः । दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ' इति ॥ [७२]एते आदित्याः, अस्मदभिमतं कुर्वन्त्विति वाक्यशेषः । कीदृशाः ? [v]धारयन्तः अपरुद्धं यजमानं स्वराष्ट्रे स्थापयन्तः, [v]जगत् [v]स्थाः कृत्स्नं जगदनुग्रहीतुं तत्र तत्र तिष्ठन्ति, यद्वा जगत् धारयन्तः [७३]इत्यन्वयः । स्थाः [७४]स्थिताः [v]देवाः दीव्यन्तः । [v]विश्वस्य [v]भुवनस्य [७५-v]गोपाः पालयितारः-[७५] जगद्धारयितुं [७६]दीर्घीभूता धीर्येषां ते [v]दीर्घाधियः, असवः प्राणास्ते यस्य सन्ति सोऽयं यजमानोऽसुरस्तस्मै हितमिदं कर्म असुर्यं; यद्वा—राक्षसवत् २५
बाधको राजाऽसुरः, तन्निवारणायोपयुक्तमिदं [७७]कर्म असुर्यं, तत् [v]रक्षमाणाः, ऋतं सत्यं स्वराष्ट्रे यजमानं स्थापयास इत्येतादृशवचनं तद्युक्ताः [v]ऋतावानः, [v]ऋणानि [v]चयमानाः अपरोद्धुर्वैरिणो दारिद्र्यसंपादनेन बहून्यृणानि [७८]संपादयन्तः ॥

७२. आ.श्रं— ' एते ' नास्ति; ड१—एतं; ड.ने.हो१—एवं । ७३. आ.क— इत्यत्रान्वयः । ७४. ड१. ने.हो१—स्थिराः । ७५. अ.इ.उ.जो.ड१.ने.पा.श्रं.हा.हो१—गोपायितारः । ७६. आ.क.ड१— दीर्घभूता; श्रं ३०
दीर्घाभूता । ७७. आ.क.ड.श्रं—कर्मासुरवदिति । ७८. ड.ड१.ने.हो१—संपादयन्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

तिस्रो भूमीर्धारयन् त्रीरुत द्यून् त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनाऽऽदित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु ॥

तिस्रः । भूमीः । धारयन् । त्रीन् । उत । द्यून् । त्रीणि । व्रता । विदथे । अन्तः । एषाम् । ऋतेन । आदित्याः । महि । वः । महित्वमिति महि-त्वम् । तत् । अर्यमन् । वरुण । मित्र । चारु ॥

५ [V]विश्वस्य [V]भुवनस्य भूतजातस्य [४७V]गोपाः पोषकाः [V]दीर्घाधियः दीर्घाण्यविच्छिन्नानि धियः कर्माणि [४८]उदयास्तमयलक्षणाः बुद्धयो वा येषां ते [४९]दीर्घाधियः । छान्दसं पूर्वपदस्य दीर्घत्वम् । [V]असुर्यम् असुरमर्हति [५०]इति । " छन्दसि च " (पा ५·१·६७) इति यः । असुस्थानीयमुदकं ददातीत्यसुरो मेघः । तेन धार्यमुदकं [V]रक्षमाणाः रक्षन्तः [V]ऋतावानः सत्यवन्तः यज्ञवन्तो वा । पूर्ववद्वनिप् (पा ५·२·१०९ वा २) दीर्घत्वं च । [V]चयमानाः चाययन्तः गमयन्तः । चय गतौ, अनुदात्तेत्,
१० भौवादिकः । [V]ऋणानि दिव्यानि मानुषाणि, वृष्ट्या हि सस्योत्पत्तौ यजमानस्य सर्वाणि ऋणानि अपाक्रियन्ते इति । क्रियापदाभावाद्योग्यं [५१]क्रियापदमध्याहियते । ईदृशा आदित्याः [५२]इममस्मदीयं यजमानमनपरुद्धं कुर्वन्त्विति ॥

तत्रैव याज्या– ' तिस्रः ' इति त्रिष्टुप् ॥ [V]तिस्रः [V]भूमीः [५३]पृथिवीपातालनाकलोकान् पृथिव्यन्तरिक्षद्युलोकान् वा । ये इत्यध्याहियते । ये [V]धारयन् धारयन्ति । धारयतेश्छान्दसो लङ् ।
१५ " बहुलं छन्दस्यमाङ्योगेऽपि "(पा ६·४·७५) इत्यडभावः । [V]उत अपि च [V]त्रीन् [V]द्यून् दिवः परान् द्युतिमतो लोकान् । रुत्वानुनासिकौ पूर्ववत् (पा ८·३·१, २, ९) किं च– [V]त्रीणि व्रतानि कर्माणि लोकत्रयगोचराणि [५४]त्रीणि व्रतानि । [V]एषां लोकानाम् [V]अन्तः मध्ये सर्वलोकधारणार्थानि रसादानधारणमध्यस्थानायनलक्षणानि च कर्माणि ये धारयन्ति आदित्याः [V]विदथे यज्ञे यज्ञार्थं, उपलक्षणत्वात् सर्वव्यापारार्थम् [५५]इत्थं [५६]कुर्वन्त्येते आदित्याः । यद्वा–धारयन्तीति वचन-
२० व्यत्ययेनैकवचनम् । हे धारयन्तः [V]आदित्याः, किं तिस्रो भूमीः त्रींश्च द्यून् येषां च मध्ये त्रीणि व्रतानि यज्ञार्थं धारयन्तः हे आदित्याः, [V]वः युष्माकं [V]महित्वं महत्त्वं माहात्म्यं [V]महि महत् [V]तत् तादृशं यथोक्तलक्षणं [V]चारु शोभनं चायनीयं वा [V]ऋतेन सत्येन नात्र कार्या विचारणेति । इदानीम् आदित्यानेकैकत्वेनामन्त्रयते – [V]अर्यमन् [V]वरुण [V]मित्र इति । प्रदर्शनं चैतदन्येषामपि ॥

तिस्र इति ॥ तत्रैव याज्यामाह–' तिस्रो भूमीर्धारयन् त्रीरुत द्यून् त्रीणि व्रता विदथे अन्त-
२५ **रेषाम् । ऋतेनाऽऽदित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु ' इति । हे [V]अर्यमन् [V]वरुण [V]मित्र, एतैस्त्रिभिर्नामभिरुपलक्षिताः सर्वेऽपि द्वादश [V]आदित्याः [V]वः युष्माकं [V]तत् [V]महित्वं माहात्म्यं [V]चारु

४७. तं१.तं२.पं२–गोपाः गोपकाः । ४८. तं१.तं२.मै.लं–°लक्षणानि । ४९. तं१.तं२–दीर्घधियः । ५०. तं१.तं२–' इति ' नास्ति । ५१. तं१.तं२.मै.लं–पदम° । ५२. तं१.तं२.मै–' अस्मदीयं ' नास्ति । ५३. तं१. तं२.मै–°नागलोकान् । ५४. अ.मै४–यद्वा त्रीणि । ५५. लं–' इत्थं ' नास्ति । ५६. तं१.तं२–कुर्वन्ति ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रमणीयं [r]महि महदधिकं च। कथं [७९]माहात्म्यमधिकं तदुच्यते– [r]तिस्रः [r]भूमीः [८०]स्वर्गमर्त्यपातालरूपाः [r]धारयन् धारितवन्तः। अपि च [८१-r]त्रीन् [r]द्यून्[-८१] सूर्यचन्द्रवह्निगतान् प्रकाशान् धारितवन्तः। [८२]तत्र सूर्यरश्मिरूपस्य प्रकाशस्य [८३]धारयितृत्वं स्पष्टम्। सूर्यरश्मय एव जलमयेन चन्द्रमण्डलेन व्यवहिताः [८४]शीतलज्योत्स्नारूपेणावभासन्ते इति केषांचिन्मतम्। एतदेवाभिप्रेत्य श्रूयते– "सुषुम्नः सूर्यरश्मि-श्चन्द्रमा गन्धर्वः" (तैसं ३.४.७) इति। [८५-]अग्निदीप्तिरेवादित्यसंबन्धीति विस्पष्टमेवमाम्नायते[-८५]– "उद्यन्तं वावाऽऽदित्यमग्निरनुसमारोहति" (तैब्रा २.१.२) इति। तस्मात् [८६]प्रकाशत्रयधारकत्वं युक्तम्। किं च [r]एषां यजमानानां [r]विदथे यज्ञे यानि [r]त्रीणि व्रतानि [r]अन्तः स्थितानि मनोवाक्कायकर्म-निष्पाद्यानि वा नित्यनैमित्तिककाम्यरूपाणि वा तानि सर्वाणि [r]ऋतेन पालयिष्याम इत्येतादृशेन सत्यवचनेन धारितवन्तः॥ अत्र पूर्वमपरुद्धस्य नास्ति [८७]विशेषप्रयोगोपदेशः। अपरुध्यमानस्य तु [८८]प्रयोगोऽस्ति। तत्र कंचिन्मन्त्रमुत्पाद्य विनियुङ्क्ते – "अदितेऽनु मन्यस्वेत्यपरुध्यमानोऽस्य पदमा ददीतेयं वा अदितिरिय-मेवास्मै राज्यमनु मन्यते" (तैसं २.३.१) इति।

हेऽदिते भूमे, [८९]स्वराष्ट्रप्रवेशार्थं मामनुमन्यस्वेत्येतं [९०]मन्त्रमुच्चारयन्नस्य शत्रोः पदाङ्कितभूरज आददीत। इयं पृथिव्येवादितिशब्दवाच्या, सैवास्मा अपरुध्यमानार्थं राज्यमङ्गीकरोति॥ मन्त्रान्तरमुत्पाद्य व्याचष्टे– "सत्याशीरित्याह सत्यामेवाऽऽशिषं कुरुते" (तैसं २.३.१) इति। आशीरस्मदपेक्षितं फलं सत्यमस्त्विति शेषः॥ अन्यं मन्त्रमुत्पाद्य व्याचष्टे– "इह मन इत्याह प्रजा एवास्मै समनसः करोति" (तैसं २.३.१) इति। इह मदीये [९१]राष्ट्रप्रवेशे प्रजानां मनोऽनुकूलं भवत्विति शेषः॥ पुनरपि मन्त्रान्तरमुत्पाद्य व्याचष्टे– "उप प्रेत मरुतः सुदानव एना विश्पतिनाऽभ्यमुं[९५] राजानमित्याह मारुती वै विड्ज्येष्ठो विश्पति-र्विशैवैनं[९५] राष्ट्रेण समर्धयति" (तैसं २.३.१) इति। हे सुदानवः सुष्ठु राष्ट्रप्रवेशदातारो मरुतः, यूयमेना विश्पतिनैतेन [९२]विरोधिना राष्ट्रपतिना [९३-]सह योद्धुम्[-९३] अमुं [९४]वीरसिंहवर्माणं [९५]संजिहीर्षमाणमपरुध्यमानं राजानमभिमुखीकृत्योप प्रेत समीपे गच्छत। अन्मिन् मन्त्रे 'विश्पतिना' इति यदुक्तं तत्र या विट् प्रजा सा मरुतामधीनत्वात् मारुती, तस्या विशः पतिर्ज्येष्ठोऽपरोद्धा, तेन ज्येष्ठेन विश्पतिना सह योद्धुमित्येवं [९६]ब्राह्मणोक्तस्य व्याख्यानस्य शेषः पूरणीयः। [९७]एतस्य ब्राह्मणव्याख्यातमन्त्रस्य पाठे सति प्रजया देशेन चैनं यजमानं समृद्धं करोति। एतेषां[९८] मन्त्राणां विनियोगमापस्तम्बो दर्शयति– "हविष्कृता वाचं विसृज्योप प्रेत मरुतः सुदानव इति यजमानमभ्यैति। सत्याशीरिति यजमानस्योत्तरे वाससि पदैकदेशं निवपति। इह मन इत्युरसि शेषं [९९]निनयति" (आपश्रौ १९.२०.१०-१२) इति॥

अत्र कंचित्प्रयोगविशेषं क्रमेण विधत्ते– "यः परस्ताद्ग्राम्यवादी स्यात् तस्य गृहाद्व्रीहीना हरेच्छुक्लाꣳश्च कृष्णाꣳश्च वि चिनुयाद्ये शुक्लाः स्युस्तमादित्यं चरुं निर्वपेदादित्या वै देवतया विड्विशमेवाव गच्छति" (तैसं २.३.१) इति। [१००]ग्रामेभ्यो हितं ग्राम्यं [१०१-]तद्राज्ञोऽग्रे वदतीति[-१०१] ग्राम्यवादी [१०२]मन्त्री।

---

७९. ड.ने.शृं.हो१–माहात्म्याधिक्यमिति; ड१–माहात्म्यमधिकमिति। ८०. अ.उ.जो.ना.पा.हा – स्वर्गमृत्युपाताल°। ८१–८१. ड.ड१.ने– 'त्रीन् द्यून' नास्ति। ८२. अ.उ.पा–ततः। ८३. इ– जनयितृत्वम्। ८४. आ.क– शीतस्पर्शा अभिभूतोष्णस्पर्शा ज्योस्ना°। ८५–८५. आ.क– अग्निदी-प्तेरादित्यसंबन्धश्च स्पष्टमेव श्रूयते; इ.उ.शृं–अग्निदीप्तेरादित्यसंबन्धश्च स्पष्टमेवाम्नायते। ८६. ड.ड१.शृं.हो१– °धारयितृत्वम्। ८७. आ.क.ड१.शृं– विशेषाङ्गोपदेशः। ८८. आ.क.ड१.शृं– प्रयोगे सोऽस्ति। ८९. आ.क –त्वमनुमन्यस्व राष्ट्र°। ९०. ने– मन्त्रमुक्त्वा वदन्नस्य। ९१. अ.उ.ड.ड१.ने.पा.हो१– राष्ट्रप्रदेशे। ९२. ड.ने.हो१– रोषविरोधिना। ९३–९३. ने– भयोत्थम्। ९४. ने– सिंहनामानम्। ९५. ड.ने.शृं.हो१– 'संजिहीर्षमाणम्' नास्ति। ९६. आ.क– ब्राह्मणेनोक्तस्य। ९७. अ.उ.पा– तस्य। ९८. ने.शृं–तेषाम्। ९९. आ.इ.क– निवपति। १००. अ.इ.उ.क.जो.ना.ने.पा.शृं.हा.हो१– ग्राम्येभ्यः। १०१–१०१. इ–तद्राज्ञो प्रवेद(य)तीति; अ.उ.पा–तद्वदतीति। १०२. अ.आ.उ.क.जो.ना.पा.हा– 'मन्त्री' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्यान्नु क्षत्रियाꣳ अव आदित्यान् याचिषामहे । सुमृडीकाꣳ अभिष्टये ॥

त्यान् । नु । क्षत्रियान् । अवः । आदित्यान् । याचिषामहे । सुमृडीकानिति सु-मृडीकान् । अभिष्टये ॥

" यः परस्ताद्ग्राम्यवादी स्यात् तस्य गृहाद्व्रीहीना हरेच्छुक्लांश्च कृष्णांश्च वि चिनुयाद्ये शुक्लाः स्युस्तमादित्यं चरुं निर्वपेत् " (तैसं २·३·१) इत्यस्याः पुरोनुवाक्या– ' त्यान् ' इति गायत्री ॥ [V]त्यान् तान् [V]नु प्राक्तनान् [V]क्षत्रियान् बलवतः [V]आदित्यान् [V]अवः रक्षणं [V]याचिषामहे [५७]याचामहे । " सिव्बहुलं लेटि " (पा ३.१.३४), "लेटोऽडाटौ " (पा ३.४.९४) इत्यडागमः । [V]सुमृडीकान् सुष्ठु सुखयितॄन् । " मृडीकादयश्च " (?) इति निपात्यते । शोभनं मृडीकत्वं येषामिति बहुव्रीहौ " नञ्सुभ्याम् " (पा ६.२.१७२) इत्युत्तरपदान्तोदात्तत्वम्, उञ्छादिः (पा ६.१.१६०) वा द्रष्टव्यः । पूर्ववद्रुत्वानुनासिकौ (पा ८·३·१, २, ९)। [V]अभिष्टये आभिमुख्येन तानेव यष्टुम् । शकन्ध्वादित्वात् पररूपत्वम् (६.१.९४ वा ४) । यद्वा– अभिष्टयो यागस्तन्निमित्तम् । छान्दसो वर्णविकारः ॥

स द्विविधः –अन्तरङ्गो बहिरङ्गश्च । तत्र बहिरङ्गः सभायामेव [१०३]वदति। अन्तरङ्गस्तु [१०४]सभायाः [१०५]परस्तादन्तः-पुरं गत्वा गूढं हितं [१०६]वदति तस्य गृहाद्व्रीहीना हरेत् । विट्शब्दवाच्यायाः प्रजाया आदित्यदेवताकत्वादादित्यचरुणा विशमेव प्राप्नोति ॥ विभक्तानां द्विविधतण्डुलानां मध्ये शुक्लैरादित्यचरुं विधाय कृष्णैर्वारुणचरुं विधत्ते–" अवगताऽस्य विडनवगतꣳ राष्ट्रमित्याहुर्यै कृष्णाः स्युस्तं वारुणं चरुं निर्वपेद्वारुणं वै राष्ट्रमुभे एव विशं च राष्ट्रं चाव गच्छति " (तैसं २·३·१) इति । अस्य यजमानस्याऽऽदित्यचरुणा यद्यपि प्रजा प्राप्ता भवति तथाऽपि राष्ट्रं भूमिविशेषस्तावता न प्राप्यत इत्यभिज्ञा आहुः । [१०७]अतस्तत्प्राप्तये वारुणं निर्वपेत् । यथा प्रजाया [१०८]आदित्या देवता तद्वद्राष्ट्रस्य वरुणो देवता, ततस्तयोस्तुष्ट्या तदुभयं प्राप्यते ॥ योऽयमपरुध्यमानः तस्यापरुद्धवत् यत्कर्म विहितं तस्मिन् कर्मणि पूर्वोक्ते एव याज्यानुवाक्ये ॥

त्यानिति ॥ यत्तु ' यः परस्तात् ' इत्यादिना [१०९]हविर्द्वये प्रयोगरूपं कर्मान्तरं विहितं तत्र शुक्लहविषः पुरोनुवाक्यामाह– ' त्यान्नु क्षत्रियाꣳ अव आदित्यान् याचिषामहे । सुमृडीकाꣳ अभिष्टये ' इति । वयं यजमानाः [V]अभिष्टये देवताभिमुख्येन कर्तव्येष्टिसिद्ध्यर्थम् [V]आदित्यान् प्रति [V]अवः [V]याचिषामहे । रक्षणं प्रार्थयामहे । कीदृशानादित्यान् ? येषां [११०]पूर्वमन्त्रे माहात्म्यं प्रपञ्चितं [V]त्यान् [V]नु तानेव [V]क्षत्रियान् क्षत्रियवत् प्रबलान् [V]सुमृडीकान् सुष्ठु सुखयितॄन् ॥

५७. तं१.तं२.–' याचामहे ' नास्ति।

१०३. अ.उ.जो.पा.हा–भवति। १०४. इ.क.जो.ड.ड१.ना.शृं.हा– सभायां विसर्जितायाम्। १०५. आ.क.ड.शृं– °दन्तःपुरे। १०६. इ.ड.ड१.ने.शृं.हो१–रहसि कथयति; क– रहसि वदति। १०७. अ. उ.पा– अतस्तत्प्राप्तुं°। १०८. ने.शृं–आदित्यः। १०९. आ.क.ड१.शृं.हो१–हविर्द्वय°। ११०. ने.हो१– पूर्व मन्त्र°; ड१– पूर्वमन्त्र°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा।
पाक्या चिद्वसवो धीर्या चिद् (५)युष्मानीतो अभयं ज्योतिरश्याम् ॥

न। दक्षिणा। वीति। चिकिते। न। सव्या। न। प्राचीनम्। आदित्याः। न। उत। पश्चा। पाक्या। चित्। वसवः। धीर्या। चित् (५)। युष्मानीतः। अभयम्। ज्योतिः। अश्याम् ॥

तत्रैव याज्या– ' न दक्षिणा ' इति त्रिष्टुप् ॥ [v]दक्षिणा दक्षिणं [v]सव्या सव्यम्। ५
उभयत्रापि " सुपां सुलुक्° " (७.१.३९) इत्याडादेशः। दक्षिणं सव्यं च [५८v]न [v]वि [v]चिकिते न विजानामि विशेषेण न जानामि, दक्षिणसव्यविभागज्ञानमपि मे नास्तीत्यर्थः। कितते[५९]श्छान्दसो लिट् (पा ३.४.६)। हे [v]आदित्याः, [v]प्राचीनं प्राक्। " विभाषाऽञ्चेरदिक्स्त्रियाम् " (पा ५.४.८) इति खः। [v]पश्चा पश्चात्। " पश्च पश्चा च° " (पा ५.३.३३) इति निपात्यते। प्राक्पश्चाच्च [v]न विचिकिते इति, प्राक्प्रत्यग्विभागज्ञानमपि मे नास्तीति। यस्मादेवं तस्मादहं [v]पाक्या [v]चित् १०
[६०]पाकयितव्यः, अपरिपक्वः पाक्यः बालः। " ऋहलोर्ण्यत् " (पा ३.१.१२४), " तित्स्वरितम् " (पा ६.१.१८५) इति स्वरितत्वम्। हे [v]वसवः वासहेतवः, [६०-v]धीर्या [v]चित्[-६०] धीरयितव्यः धीर्यः कातरः इति। " तत्करोति° " (पा ३·१·२६ वा ५, ६) इति णिजन्ताण्ण्यत्, पूर्ववदाकारः। यथा [६१]बालाः कातराश्च स्वयं किंचिद्धिताहितमजानन्तः अन्यैर्हिताहितकारिभिः देवेन वा [६२]नीयमाना भवन्ति, एवमहमपि युष्माभिर्नीतः युष्माभिः [६३]समीचीने पथि प्रवर्त्यमानः[-६३]। १५
वर्णविकारश्छान्दसः। " तृतीया कर्मणि " (पा ६·२·४८) इति पूर्वपदप्रकृतिस्वरत्वम्। विकृतत्वादनवग्रहः। [v]अभयं [v]ज्योतिः ज्ञानं [६४]विडवगमलक्षणम् [v]अश्यां प्राप्नुयाम्। " बहुलं छन्दसि " (पा २·४·७३) इति शपो लुक्। यद्वा– युष्मत्प्रसादेन अभयम् [६५]अपुनरावृत्तिभयं परं ज्योतिः [६६]अपि अश्याम्, किं पुनः [६७]विडवगमादीति।

**नोति। तत्रैव याज्यामाह– ' न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा। २०
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ' इति। हे [r]वसवः वासयितारः [r]आदित्याः, वैरिणाऽपरुध्यमानोऽहं तेनापरोधेन व्यामूढचित्तः सन् किमपि [r]न [r]वि [r]चिकिते विशेषेण न जानामि, इदं दक्षिणमिदं सव्यमिदं [r]प्राचीनम् इदं प्रतीचीनमिति कमपि विवेकं नानुभवामि। क इव? [r]पाक्या [r]चित् पाक्यः इव [r]धीर्या [r]चित् धीर्य इव। पूर्वं पक्वो न भवतीतः परं पाकं नेतव्यः पाक्योऽपरिपक्वधीर्बाल इत्यर्थः।**

५८. लं–' न ' नास्ति। ५९. तं१.तं२.–पाकयितव्यश्चित्। ६०–६०. अ.लं–' धीर्या चित् ' २५
नास्ति। ६१. लं–बाल°। ६२. अ.तं.मै–नीयमाना निर्भयाः; तं१–नीयमानाभिः। ६३–६३. अ.मै.लं–समिद्धते पथि प्रवर्तमानः; पं२–संदर्शिते पथि वर्तमानः। ६४. तं–विडपगम°। ६५. तं१.तं२.लं–पुनरावृत्ति°। ६६. मै–' अपि ' नास्ति ६७. तं१.तं२–विडपगमादीति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन ।
अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥
इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युरा चके ॥

आदित्यानाम् । अवसा । नूतनेन । सक्षीमहि । शर्मणा । शंतमेनेति शं-तमेन ।
अनागास्त्व इत्यनागाः–त्वे । अदितित्व इत्यदिति-त्वे । तुरासः । इमम् । यज्ञम् । दधतु । श्रोषमाणाः ॥
इमम् । मे । वरुण । श्रुधि । हवम् । अद्य । च । मृडय । त्वाम् । अवस्युः । एति । चक्रे ॥

अथ तत्रैव याज्या विकल्प्यते– 'आदित्यानाम्' इति त्रिष्टुप् । [V]आदित्यानाम् [V]अवसा [V]नूतनेन अभिनवेन [V]सक्षीमहि युक्ता भूयास्म । केन ? [V]शर्मणा सुखेन [V]शंतमेन सुखतमेन शान्ततमेन वा । किं च– [V]अनागास्त्वे निरपराधित्वे [V]अदितित्वे खण्डनरहितत्वे च [V]इमम् अस्मदीयं [V]यज्ञं [V]दधतु स्थापयन्तु [V]तुरासः त्वरमाणाः । [६८]तुर त्वरासंभ्रमयोः[-६८] । इगुपधात् कः (पा ३·१·१३५), "आज्जसेरसुक्" (पा ७.१·५०) । [V]श्रोषमाणाः अस्माकं स्तुतीः शृण्वन्तः । शृणोतेर्विकरणौ सिप्शपौ, लेटो वा व्यत्ययेन शानच्, श्रोषतिर्वा धात्वन्तरं द्रष्टव्यम् ॥

अथ "ये[६९] कृष्णाः स्युस्तं वारुणं चरुं निर्वपेत्" (तैसं २·३.१) इत्यस्याः पुरोनुवाक्या– 'इमं मे' इति गायत्री । श्रुधीति प्रथमपादान्तः ॥ हे [V]वरुण, [V]इमम् अस्मदीयं

पूर्वं धीरो न भवतीतः परं धीरत्वं नेतव्यो धीर्यः कातरो बाल इत्यर्थः । [V]युष्मानीतः युष्माभिः स्वकीयां [१११]विशं प्रापितः सन् [V]अभयं [V]ज्योतिः शत्रुभयरहितं विवेकज्ञानम् [V]अश्यां प्राप्नुयाम् ॥

आदित्यानामिति ॥ तत्रैव विकल्पितामन्यां याज्यामाह– 'आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन । अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः' इति । यजमाना वयम् [V]आदित्यानां संबन्धिना [V]नूतनेन इदानीं संपादितेन [V]अवसा रक्षणेन युक्ताः [११२]सन्तः [V]शर्मणा [V]शंतमेन सर्वोपद्रवरहितत्वात् अतिशान्तेन सुखेन [V]सक्षीमहि सक्ता भवेम । हे आदित्याः, भवन्तः [V]अनागास्त्वे अस्मदीये निरपराधित्वे [V]अदितित्वे सर्वदैवाखण्डितत्वे निमित्तभूते सति [V]श्रोषमाणाः अस्मदीयां [११३]स्तुतिं शृण्वन्तः [V]तुरासः त्वरमाणाः [V]इमं [V]यज्ञं [V]दधतु धारयन्तु ॥

इमामिति ॥ कृष्णव्रीहिचरौ पुरोनुवाक्यामाह– 'इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युरा चके' इति । हे [V]वरुण, [V]मे मदीयम् [V]इमं [V]हवम् आह्वानं [V]श्रुधि शृणु । श्रुत्वा [V]च [V]अद्य [V]अस्मान् [V]मृडय [११४]सुखय । [११५-]इमं हवं[-११५] च [V]अवस्युः पालनेच्छुः [V]त्वाम् [V]आ [V]चके आ समन्तात् शब्दयामि [११६]प्रार्थये ॥

६८. तं१–तुर रणसंभ्रमयोः; तं२–त्वर रणसंभ्रमयोः । ६९. तं१.तं२.–'ये' नास्ति ।

१११. ने.हो१– दिशम् । ११२. आ.क– 'सन्तः' नास्ति । ११३. अ.आ.उ.पा– स्मृतिम् । ११४. ड.ड१.ने.हो१–'सुखय' नास्ति । ११५–११५. आ.इ.क.ड१.ने.शृं.हो१–अहं । ११६. आ.क.ड१–प्रार्थयामि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

तत्त्वा यामि ब्रह्मणा वन्दमानस्
तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस
मा न आयुः प्र मोषीः ॥ ११ ॥

[नामाग्निः सꣳ शर्वसो रक्षमाणा धीर्यो चिदेकान्नपञ्चाशच्च] ॥ ५

[वायव्यं प्रजापतिस्ता वरुणं देवासुरा एष्वसावादित्यो दर्शर्षभामिन्द्रो वलस्य बार्हस्पत्यं वषट्कारोऽसौ सौरीं वरुणमाश्विनमिन्द्रं वो नर एकादश] ॥

[वायव्यमाग्नेयीं कृष्णग्रीवीमसावादित्यो वा अहोरात्राणि वषट्कारः प्रजनयिता हुवे तुराणां पञ्चषष्टिः] ॥

[वायव्यं प्र मोषीः] ॥ १०

तत्। त्वा। यामि। ब्रह्मणा। वन्दमानः।
तत्। एति। शास्ते। यजमानः। हविर्भिरिति हविः–भिः।
अहेडमानः। वरुण। इह। बोधि।
उरुशꣳसेत्युरु-शꣳस। मा। नः। आयुः। प्रेति। मोषीः ॥ ११ ॥

[मैसं ... कासं ...] १५

---

^{V}हवम् आह्वानं ^{V}शृधि शृणु। "बहुलं छन्दसि" (पा २·४·७३) इति शपो लुक्। "श्रुशृणुपृकृवृभ्यः°" (पा ६·४·१०२) इति धिभावः। श्रुत्वा ^{V}च ^{V}अद्य एव मां ^{V}मृडय सुखय। यस्मादहं ^{V}त्वाम् ^{V}अवस्युः रक्षणमात्मन इच्छन्। "क्याच्छन्दसि" (पा ३·२·१७०) इत्युप्रत्ययः। ^{V}आ ^{V}चके आभिमुख्येन शब्दयामि °प्रार्थये। कै गै शब्दे ॥

तत्रैव याज्या– 'तत्त्वा' इति त्रिष्टुप् ॥ हे ^{V}वरुण, ^{V}ब्रह्मणा मन्त्रेण त्वामेव ^{V}वन्दमानः २० स्तुवन्नहं ^{V}तत् तदर्थम्। चतुर्थ्याः लुक्। तदर्थमेव त्वां ^{V}यामि भजे। यद्वा–तदेव त्वां यामि याचे। छान्दसोऽन्त्यलोपः, परस्मैपदं च। ^{V}यजमानः अपि सर्वः ^{V}तत् एव ^{V}आ ^{V}शास्ते ^{V}हविर्भिः

---

७०. अ–प्रार्थयामि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चरुपुरोडाशादिभिः। हे [V]उरुशंस महास्तुतिक, त्वमपि तामस्मदीयां विज्ञापनाम् [V]इह कर्मणि [V]अहेडमानः अक्रुध्यन् [V]बोधि बुध्यस्व। पूर्ववद्विकरणस्य लुक्। "हुझल्भ्यो हेर्धिः" (पा ६.४.१०१)। "वा छन्दसि" (पा ३·४·८८) इत्यपित्त्वादेव ङित्त्वाभावाद्गुणः, अन्त्यलोपश्छान्दसः। किं पुनस्तत्प्रार्थनीयम् इत्याह--[V]नः अस्माकं [V]आयुः [७१]दीप्तिमन्नं वा [V]मा [V]प्र [V]मोषीः मा छेत्सीः तदर्थं विशं च [७२]राष्ट्रं चावगमयेति[७२] भावः ॥

इति भट्टभास्करमिश्रविरचिते [७३]ज्ञानयज्ञाख्ये यजुर्वेदभाष्ये द्वितीये काण्डे
[७४]प्रथमप्रपाठके एकादशोऽनुवाकः ॥
समाप्तश्च प्रपाठकः[७५] ॥

तदिति ॥ तत्रैव याज्यामाह– 'तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः' इति ॥ [V]तत् तस्मै [११७]रक्षणाय [V]ब्रह्मणा मन्त्रेण [V]वन्दमानः [V]त्वा [V]यामि त्वां प्राप्नोमि। अयं [V]यजमानः [V]हविर्भिः आराध्य [V]तत् रक्षणम् [V]आ [V]शास्ते। हे [V]वरुण, [V]अहेडमानः क्रोधरहितः [V]इह कर्मणि [V]बोधि अस्मद्विज्ञापनां बुध्यस्व। हे [V]उरुशꣳस [११८]प्रभूततपोपेत, [V]नः अस्माकम् [V]आयुः [V]मा [V]प्र [V]मोषीः मा विनाशय ॥ अपरुध्यमानस्य विशो राष्ट्रस्य च प्राप्तये द्विहविष्का काचिदिष्टिरुक्ता। केनचित् [११९]प्रतिबन्धविशेषेण यदि कृतायामपीष्टौ तत्प्राप्तिः प्रतिबध्येत तदानीं विशेषं विधत्ते–"यदि नावगच्छेदिममहमादित्येभ्यो भागं निर्वपाम्याऽमुष्मादमुष्यै विशोऽवगन्तोरिति निर्वपेदादित्या एवैनं भागधेयं प्रेप्सन्तो विशमव गमयन्ति" (तैसं २·३·१) इति। 'इमम्' इत्यादिनिर्वापमन्त्रोऽत्रैवोत्पाद्यते। अहं यजमानोऽमुष्माद्वैरिणोऽमुष्यास्तदीयप्रजायाश्चाऽऽनीयेमं व्रीहिरूपं हविर्भागमादित्येभ्यो निर्वपामि। किमर्थम्? अवगन्तोरस्मदीयां प्रजां राष्ट्रं चावगन्तुम्। अनेन मन्त्रेण निर्वापे सत्यादित्याः स्वयमेव तं भागमपेक्षमाणा एनं यजमानं स्वकीयां विशं प्रापयन्ति ॥ प्रतिबन्धाधिक्ये सति तावताऽप्यप्राप्तौ पुनरन्यं

---

७१. अ.मै४–जीवितमन्नं।
७२–७२. तं१.तं२–विवशं त्वरावगमयेति।
७३. अ.मै–'ज्ञानयज्ञाख्ये' नास्ति।
७४. अ.तं.तं२.पं.लं–प्रथमप्रश्ने।
७५. अ–प्रश्नः।

---

११७. अ.उ.जो.ना.पा.हा– वरुणाय।
११८. आ.क.ड१.शृं– प्रभूतस्तुते।
११९. ड१–प्रतिबोध°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विशेषं विधते– "यदि नावगच्छेदाश्वत्थान् मयूखान् सप्त मध्यमेषायामुप हन्यादिदमहमादित्यान् बध्नाम्याऽमुष्मादमुष्यै विशोऽवगन्तोरित्यादित्या एवैनं बद्धवीरा विशमव गमयन्ति" (तैसं २·३·१) इति। 'इदम्' इत्यादिर्बन्धनमन्त्रः। अमुष्माद्वैरिणः सकाशादमुष्या मदीयाया विशोऽवगन्तोः प्राप्तये यजमानोऽहमादित्यानिदं बध्नामि। इदमिति हस्तेन प्रदर्शनम्। अनेन मन्त्रेणाश्वत्थजन्यान् सप्त शङ्कून् हविर्धारिणः शकटस्य मध्यमायामीषायां कीलप्रक्षेपेण बध्नीयात्। तथा सत्यादित्याः स्वयमेव बद्धवीराः सन्तः [१२०]–स्वकीयान् चारान् भृत्यान्–[१२०] मोचयितुमेनं यजमानं विशं प्रापयन्ति॥ ततोऽपि [१२१]प्रबलतर-प्रतिबन्धके सति पुनरप्यन्यं विशेषं विधत्ते–"यदि नावगच्छेदेतमेवाऽऽदित्यं चरुं निर्वपेदिध्मेऽपि मयूखान्त्सं नह्येदनपरुध्यमेवाव गच्छति" (तैसं २·३·१) इति। [१२२]पूर्वत्र मध्यमायामीषायां शङ्कवः कीलिताः। इदानीमिध्मेऽपि शङ्कुबन्धनं विशेषः॥ तेषां शङ्कूनां पूर्ववद्वृक्षविशेषं विधते–"आश्वत्था भवन्ति मरुतां वा एतदोजो यदश्वत्थ ओजसैव विशमव गच्छति" (तैसं २·३·१) इति। अश्वत्थस्य मरुदोजस्त्वम् अर्थवादान्तरे द्रष्टव्यम्। [१२३]शङ्कुसंख्यां विधत्ते–"सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव गच्छति" (तैसं २·३·१) इति। [१२४]एतेषु सर्वेष्वपि प्रयोगेषु पूर्वोक्ते एव याज्यानुवाक्ये द्रष्टव्ये॥

अत्र विनियोगसंग्रहः।

"ऐन्द्र्यागे त्विन्द्रमिन्द्रं मरुद्या वेति मारुते।
भरेषु वैश्वदेवेन्द्रे प्रिया प्रैयङ्गवे चरौ॥ १॥
अग्निर्वसुमदादीनां चतुर्णां हि समूहके।
[१२५]यथा विकल्पिता याज्या कुत्र स्विष्टकृतो द्वयम्॥ २॥
यज्ञो भुवद्वति चरौ धारयन् धारयद्वति।
त्यानु त्रयं शुक्लचराविमं कृष्णचरौ तथा।
एकादशेऽनुवाकेऽस्मिन्मन्त्रा द्वाविंशतिर्मताः॥ ३॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके एकादशोऽनुवाकः॥ ११॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञा-परिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे प्रथमः प्रपाठकः॥ १॥

१२०–१२०. आ.क.जो.ना.हा– स्वकीयान् भृत्यान्; अ.इ.उ.पा– स्वकीयवीर्यान् भृत्यान्; ड.ने.हो१– स्वकीयान्नरान् भृत्यान्; ड१– स्वकीयान् नृवीराम् भ्रातृव्यान्। १२१. ड१– °तरपरिबन्धे; ने.शृं.हो१– °प्रतिबन्धे। १२२. हा सर्वत्र। १२३. क.ड.ड१.ने.शृं– शङ्कूनां संख्याम्। १२४. ना–एषु। १२५. हा–तथा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(अथ द्वितीयकाण्डे द्वितीयः प्रपाठकः)

हरिः ॐ ॥

प्रजापतिः प्रजा असृजत ताः सृष्टा इन्द्राग्नी अपागूहताꣳ
सोऽचायत् प्रजापतिरिन्द्राग्नी वै मे प्रजा अपाघुक्षतामिति

प्रजापतिरिति प्रजा-पतिः । प्रजा इति प्र-जाः । असृजत । ताः । सृष्टाः । इन्द्राग्नी इतीन्द्र-अग्नी । अपेति । अगूहताम् । सः । अचायत् । प्रजापतिरिति प्रजा-पतिः । इन्द्राग्नी इतीन्द्र-अग्नी । वै । मे । प्रजा इति प्र-जाः । अपेति । अघुक्षताम् ।

अथ काम्या इष्टयो विधीयन्ते । अत्रापि प्रायिकत्वात् काम्या उच्यन्ते । नैमित्तिकानामपि जातेष्टयादीनां मध्ये विधानात् । तासु न पर्वादिनियमः । "[1]उभा वामिद्राग्नी" (तैसं १.१.१४) इत्यारभ्य यथापूर्वं याज्यानुवाक्या आम्नायन्ते; वैश्वदेवमेव काण्डम्[1] ॥ प्रजापतिरित्यादि । एताः [v]ताः प्रजापतिना [v]सृष्टाः प्रजाः [v]इन्द्राग्नी [v]अप [v]अगूहताम् । "ऊदुपधाया गोहः" (पा ६.४.८९) [2]इत्यूकारः । इन्द्राग्निशब्दे "नोत्तरपदेऽनुदात्तादौ°" (पा ६.२.१४२) इति उभयपदप्रकृतिस्वरत्वे प्रतिषिद्धे समासान्तोदात्तत्वमेव । [v]सः च प्रजापतिः तत् [v]अचायत् अशृणोत् । [3]अपाघुक्षतामिति । ऊदित्वादिडभावे "शल इगुपधादनिटः क्सः" (पा ३.१.४५) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

[1]आद्ये प्रपाठके काम्याः पशवः समुदीरिताः ।
द्वितीयादित्रये काम्या वक्तव्या इष्टयोऽखिलाः ॥ २ ॥

अनुवाका द्वादश [2]स्युर्द्वितीयेऽर्थस्तु वर्ण्यते ।
प्रजाकामः [1]स्पर्धमानो युयुत्सुर्जितशत्रुकः ॥ ३ ॥

१–१. तं१.तं२.– 'उभा ..... काण्डम्' नास्ति । २. तं१.तं२– 'इत्यूकारः' इत्यस्यानन्तरम् 'उभा वामिन्द्राग्नी' इत्यारभ्य यथापूर्वं याज्यानुवाक्या आम्नायन्ते, वैश्वदेवकाण्डम् । ३. तं१तं२. मै–अघुक्षतामिति ।

१. अ.उ.पा– प्रथम°; ड–आद्य° । २. अ.उ.ना.पा.हा– स्युर्द्वितीये तूपवर्ण्यते । ३. अ.आ. उ.जो.ड.ना.पा.हा– स्पर्धकामः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्याः इष्टयः]

स एतमैन्द्राग्नमेकादशकपालमपश्यत् तं निरवपत् तावस्मै प्रजाः प्रासाधयतामिन्द्राग्नी वा एतस्य प्रजामप गूहतो योऽलं प्रजायै सन् प्रजां न विन्दते ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इन्द्राग्नी (१) एव स्वेन भागधेयेनोप धावति तावेवास्मै प्रजां प्र साधयतो विन्दते प्रजामैन्द्राग्नमेकादशकपालं निर्वपेत् स्पर्धमानः क्षेत्रे वा सजातेषु वेन्द्राग्नी एव स्वेन भागधेयेनोप धावति ताभ्यामेवेन्द्रियं वीर्यं भ्रातृव्यस्य वृङ्क्ते ५

इति। सः। एतम्। ऐन्द्राग्नमित्यैन्द्र-अग्नम्। एकादशकपालमित्येकादश-कपालम्। अपश्यत्। तम्। निरिति। अवपत्। तौ। अस्मै। प्रजा इति प्र-जाः। प्रेति। असाधयताम्। इन्द्राग्नी इतीन्द्र-अग्नी। वै। एतस्य। प्रजामिति प्र-जाम्। अपेति। गूहतः। यः। अलम्। प्रजाया इति प्र-जायै। सन्। प्रजामिति प्र-जाम्। न। विन्दते। ऐन्द्राग्नमित्यैन्द्र-अग्नम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। प्रजाकाम इति प्रजा-कामः। इन्द्राग्नी इतीन्द्र-अग्नी (१)। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तौ। एव। अस्मै। प्रजामिति प्र-जाम्। प्रेति। साधयतः। विन्दते। प्रजामिति प्र-जाम्। ऐन्द्राग्नमित्यैन्द्र-अग्नम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। स्पर्धमानः। क्षेत्रे। वा। सजातेष्विति स-जातेषु। वा। इन्द्राग्नी इतीन्द्र-अग्नी। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। ताभ्याम्। एव। इन्द्रियम्। वीर्यम्। भ्रातृव्यस्य। वृङ्क्ते।

स इत्यादि गतम्। एकादशसु कपालेषु संस्कृतः पुरोडाशः इति तद्धितार्थे " द्विगोर्लुगनपत्ये " (पा ४·१·८८) इति लुक्। " इगन्तकालकपाल° " (पा ६·२·२९) इति पूर्वपदप्रकृतिस्वरत्वम्। तस्यापि " संख्या " (पा ६·२·३५)। इति पूर्वपदप्रकृतिस्वरत्वम्। एकशब्दः कन्प्रत्ययान्त आद्युदात्तः। ^{V}प्र ^{V}असाधयतां प्रसाधितवन्तौ। प्रजननसामग्र्यां सत्यामेव ^{V}प्रजां ^{V}न लभते। तस्य ^{V}प्रजाम् ^{V}इन्द्राग्नी ^{V}अपागूहताम् इति। प्रजाकाम इति। " [४]-शीलिकामिभक्षाचरिभ्यो णः°[४] " (पा ३·२·१ वा ७), पूर्ववत् पूर्वपदप्रकृतिस्वरत्वं च[५]॥

[४]-सभामेष्यन्निमे कुर्युः-[४] एकादशकपालकम्।
[५]-ऐन्द्राग्ने पञ्चमे-[५] पौष्णं [६]चरुमेषोऽनु निर्वपेत्॥ ४॥
सभां प्राप्य क्षैत्रपत्यं चरुं कृत्वोर्ध्वमाचरेत्।
ऐन्द्राग्नयागमित्येतेऽनुवाके प्रथमे स्थिताः॥ ५॥

४–४. तं१.तं२.मै.लं– 'शीलिकामि ..... णः' नास्ति। ५. तं१.तं२.मै– 'च' नास्ति।

४–४. आ.उ.जो.ना.पा.हा– सभामेष्यति यः कुर्यात्। ५–५. हो१–इन्द्राग्ने पञ्चमे; शृं–ऐन्द्राग्नं पञ्चमे; आ.इ.जो.ना.ने.हा– ऐन्द्राग्नं पञ्चमं। ६. इ.क.जो.ना.हा– चरुमेवानु; ने–चरमे त्वनु।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि पाप्मना भ्रातृव्येण जयतेऽप वा एतस्मादिन्द्रियं वीर्यं क्रामति यः संग्राममुप-प्रयात्यैन्द्राग्नमेकादशकपालं निर्(२)वपेत् संग्राममुपप्रयास्यन्निन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियं वीर्यं धत्तः सहेन्द्रियेण वीर्येणोप प्र याति जयति तꣳ संग्रामं वि वा एष इन्द्रियेण वीर्येणर्ध्यते यः संग्रामं जयत्यैन्द्राग्नमेकादशकपालं निर्वपेत् संग्रामं जित्वेन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियं वीर्यं (३) धत्तो नेन्द्रियेण वीर्येण व्यृध्यतेऽप वा एतस्मादिन्द्रियं वीर्यं क्रामति य एति जनतामैन्द्राग्नमेकादशकपालं

वीति। पाप्मना। भ्रातृव्येण। जयते। अपेति। वै। एतस्मात्। इन्द्रियम्। वीर्यम्। क्रामति। यः। संग्राममिति सं-ग्रामम्। उपप्रयातीत्युप-प्रयाति। ऐन्द्राग्नमित्यैन्द्र-अग्नम्। एकादशकपालमित्येकादश-कपालम्। निरिति (२)। वपेत्। संग्राममिति सं-ग्रामम्। उपप्रयास्यन्नित्युप-प्रयास्यन्। इन्द्राग्नी इतीन्द्र-अग्नी। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तौ। एव। अस्मिन्। इन्द्रियम्। वीर्यम्। धत्तः। सह। इन्द्रियेण। वीर्येण। उप। प्रेति। याति। जयति। तम्। संग्राममिति सं-ग्रामम्। वीति। वै। एषः। इन्द्रियेण। वीर्येण। ऋध्यते। यः। संग्राममिति सं-ग्रामम्। जयति। ऐन्द्राग्नमित्यैन्द्र-अग्नम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। संग्राममिति सं-ग्रामम्। जित्वा। इन्द्राग्नी इतीन्द्र-अग्नी। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तौ। एव। अस्मिन्। इन्द्रियम्। वीर्यम् (३)। धत्तः। न। इन्द्रियेण। वीर्येण। वीति। ऋध्यते। अपेति। वै। एतस्मात्। इन्द्रियम्। वीर्यम्। क्रामति। यः। एति। जनताम्। ऐन्द्राग्नमित्यैन्द्र-अग्नम्। एकादशकपालमित्येकादश-कपालम्।

स्पर्धा संघर्षः [v]क्षेत्रे [b]विषये। क्षेत्रं सदपत्योत्पत्तिस्थानम्। सजाताः समानजन्मानो वशीकृताः पुरुषाः। [v]इन्द्रियं [v]वीर्यं च शत्रोः [v]वृङ्क्ते वर्जयति। इन्द्रियम् इन्द्रेणात्मना सृष्टं प्रजाकारणं वीर्यं सामर्थ्यं येन सजाता वशीक्रियन्ते। पाप्मलक्षणेन च [v]भ्रातृव्येण [v]वि [v]जयते व्यावृत्तो भूत्वा जयं प्राप्नोतीति। " विपराभ्यां जेः " (पा १.३.१९) इत्यात्मनेपदम्॥

अप वा इत्यादि। संग्रामजयार्थं [v]संग्रामम् उपप्रयास्यतः॥

वि वा एष इत्यादि। [v]संग्रामं जितवतः संग्रामश्रान्त्या इन्द्रियवीर्यहानिर्भवतीति॥

अप वा इत्यादि। [v]जनताम् एष्यतो वादार्थं संग्रामार्थं वा। [७]जनता जनसमूहः। " ग्रामजनबन्धुसहायेभ्यस्तल् " (पा ४.२.४२) इति तलप्रत्ययात् पूर्वस्योदात्तत्वम् (पा ६.१.१९३)।

---

६. मै४–क्षेत्रविषये। ७–७. तं१.तं२.मै.लं.– 'जनता जन ..... लाभार्थं वा' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निर्वपेज्जनतामेष्यन्निन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियं वीर्यं धत्तः सहेन्द्रियेण वीर्येण जनतामिति पौष्णं चरुमनु निर्वपेत् पूषा वा इन्द्रियस्य वीर्यस्यानुप्रदाता पूषणमेव (४) स्वेन भागधेयेनोप धावति स एवास्मा इन्द्रियं वीर्यमनु प्र यच्छति क्षैत्रपत्यं चरुं निर्वपेज्जनतामागत्येयं वै क्षेत्रस्य पतिरस्यामेव प्रति तिष्ठत्यैन्द्राग्नमेकादशकपालमुपरिष्टान्निर्वपेदस्यामेव प्रतिष्ठायेन्द्रियं वीर्यमुपरिष्टादात्मन् धत्ते ॥ १ ॥

[प्रजाकाम इन्द्राग्नी उपप्रयात्यैन्द्राग्नमेकादशकपालं निर्वीर्यं पूषणमेवैकान्नचत्वारिंश्च्च ।]।

निरिति । वपेत् । जनताम् । एष्यन् । इन्द्राग्नी इतीन्द्र-अग्नी । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । तौ । एव । अस्मिन् । इन्द्रियम् । वीर्यम् । धत्तः । सह । इन्द्रियेण । वीर्येण । जनताम् । एति । पौष्णम् । चरुम् । अनु । निरिति । वपेत् । पूषा । वै । इन्द्रियस्य । वीर्यस्य । अनुप्रदातेत्यनु-प्रदाता । पूषणम् । एव (४) । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मै । इन्द्रियम् । वीर्यम् । अनु । प्रेति । यच्छति । क्षैत्रपत्यमिति क्षैत्र-पत्यम् । चरुम् । निरिति । वपेत् । जनताम् । आगत्येत्या-गत्य । इयम् । वै । क्षेत्रस्य । पतिः । अस्याम् । एव । प्रतीति । तिष्ठति । ऐन्द्राग्नमित्यैन्द्र-अग्नम् । एकादशकपालमित्येकादश-कपालम् । उपरिष्टात् । निरिति । वपेत् । अस्याम् । एव । प्रतिष्ठायेति प्रति-स्थाय । इन्द्रियम् । वीर्यम् । उपरिष्टात् । आत्मन् । धत्ते ॥ १ ॥

[मैसं २.१.१; कासं ९.१७]

[v]पौष्णं [v]चरुम् । जनतामेष्यतः जनसमूहं सभादिकं गमिष्यतः इन्द्रियवीर्यहानिः भीत्या स्यात्, तत्प्रतिष्ठापनार्थेष्टिः; पूर्वावस्थायाः अधिकलाभार्थं वा[७] । प्रधानादनन्तरं [८]निर्वपणमनुनिर्वपणम्, अनुक्रमेण [९]प्रदानं अनुप्रदानम् ॥

[v]क्षैत्रपत्यं [v]चरुं [१०-v]निः [v]वपेत्-[१०] [v]जनताम् आगतवतः । [v]इयं पृथिवी [v]क्षेत्रस्य [v]पतिः [११]क्षेत्रभक्तीनामधिपतित्वात् । तस्माज्जनतां गत्वा अभिमतसंपत्त्या अनयेष्टया पृथिव्यां प्रतिष्ठितो भवति । आर्थवादिकी प्रतिष्ठा फलं, रात्रिसत्रन्यायात् ॥

उपरिष्टादिति ॥ [११]क्षैत्रपत्योत्तरकालमस्यां प्रतिष्ठितो भूत्वा [v]इन्द्रियं [v]वीर्यं च [v]उपरिष्टात् सर्वस्मिन्नप्यागामिनि काले आत्मनि [v]धत्ते स्थापयति । एवं क्षैत्रपत्यं नैमित्तिकमिति केचित् । प्रतिष्ठार्थमित्यन्ये । उपरिष्टादैन्द्राग्नं [१३]इन्द्रियवीर्यप्रतिष्ठास्थापनार्थमिति ॥

इति द्वितीये काण्डे द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥

८. मै४–निर्वापणमनुनिर्वापणम् । ९. पं१.लं–दानम् । १०–१०. लं– 'निः वपेत्' नास्ति । ११. लं–क्षेत्रपभक्ती°; पं२–क्षेत्रपक्ती°; तं२–क्षेत्रसभक्ती° । १२. लं–क्षैत्रपत्यादुत्तर° । १३. तं२–°प्रतिष्ठापना° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपादयेत् पथो वा एषोऽध्यर्धपथेनैति यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपादयत्यग्निमेव पथिकृतꣳ स्वेन भागधेयेनोप धावति स एवैनमपथात् पन्थामपिं नयत्यनड्वान् दक्षिणा वही ह्येष समृद्ध्या

५ अग्नये। पथिकृत इति पथि-कृते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यः। दर्शपूर्णमासयाजीति दर्शपूर्णमास-याजी। सन्। अमावास्यामित्यमा-वास्याम्। वा। पौर्णमासीमिति पौर्ण-मासीम्। वा। अतिपादयेदित्यति-पादयेत्। पथः। वै। एषः। अधीति। अर्धपथेन। एति। यः। दर्शपूर्णमासयाजीति दर्शपूर्णमास-याजी। सन्। अमावास्यामित्यमा-वास्याम्। वा। पौर्णमासीमिति पौर्ण-मासीम्। वा। अतिपादयतीत्यति-पादयति। अग्निम्। एव। १० पथिकृतमिति पथि-कृतम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। अपथात्। पन्थाम्। अपीति। नयति। अनड्वान्। दक्षिणा। वही। हि। एषः। समृद्ध्या इति सम्-ऋद्ध्यै।

अग्नये पथिकृत इत्यादि॥ दर्शपूर्णमासाभ्यामिष्टवान् दर्शपूर्णसयाजी। "करणे यजः" (पा ३·२·८५) इति णिनिः। अमावास्यापौर्णमासीशब्दौ [1]कर्मनामधेयकालवचनौ। स्वकाले १५ अननुष्ठानमतिपादनम्। पथो वा इति। पथः प्रच्युतो भूत्वा [2]अपथम् [3]अध्यारूढः तेनैति गच्छतीति। "पथो विभाषा" (पा ५·४·७२) इति समासान्तः। [4]अनड्वान् अनसो वोढा। पृषोदरादिः (पा ६.३.१०९)। अन्वाहार्यमासाद्यानड्वाहं दक्षिणां ददाति–वहीति। वहनप्रदेशो वहः। तद्वान् [4]वही। तेन वहता च यागानतिपन्नतां निनीषोः समृद्ध्यै भवत्यनड्वान्॥

दर्शाद्यतिक्रमेऽष्टाकपालः पथिकृतेऽग्नये।
२० अव्रत्याचरणेऽष्टाकपालं व्रातपतं चरेत्॥ ६॥
एतदीयाक्षरार्थस्तूभा वामित्यत्र वर्णितः।
पिशाचग्रहबाधे तु यजेद्राक्षोघ्नकं हविः॥ ७॥
अक्षरार्थस्त्वेतदीयः कृणुष्वेत्यत्र वर्णितः।
शत्रुं योऽभिचरेदेष कुर्याद्रुद्रवते हविः॥ ८॥
२५ कुर्यात् सुरभिमद्यागं नरगोमृतितद्धये।
युयुत्सुरपमृत्युभ्यो भीतश्च गृहदाहवान्॥ ९॥
एते त्रयोऽष्टाकपालं कुर्युः क्षामवतेऽग्नये।
अनुवाके द्वितीये तु[ङ] स्थिताः पाथिकृतादयः॥ १०॥

१. तं१.तं२– °वचसौ। २. लं– अयम्। ३. तं१.तं२.लं– आरूढः।

७.अ.इ.जो.ना.पा.श्रं.हा– ते; ड–'तु' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

अग्नये व्रतपतये (१) पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदग्निमेव व्रतपतिꣳ स्वेन भागधेयेनोप धावति स एवैनं व्रतमा लम्भयति व्रत्यो भवत्यग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यꣳ रक्षाꣳसि सचेरन्नग्निमेव रक्षोहणꣳ स्वेन भागधेयेनोप धावति स एवास्माद्रक्षाꣳस्यप हन्ति निशितायां निर्वपे (२) निशितायाꣳ हि रक्षाꣳसि प्रेरते संप्रेर्णान्येवैनानि हन्ति परिश्रिते याजयेद्रक्षसामनन्ववचाराय रक्षोघ्नी याज्यानुवाक्ये भवतो रक्षसाꣳ स्तृत्या

अग्नये। व्रतपतय इति व्रत-पतये (१)। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यः। आहिताग्निरित्याहित-अग्निः। सन्। अव्रत्यम्। इव। चरेत्। अग्निम्। एव। व्रतपतिमिति व्रत-पतिम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। व्रतम्। एति। लम्भयति। व्रत्यः। भवति। अग्नये। रक्षोघ्न इति रक्षः–घ्ने। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यम्। रक्षाꣳसि। सचेरन्। अग्निम्। एव। रक्षोहणमिति रक्षः–हनम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मात्। रक्षाꣳसि। अपेति। हन्ति। निशितायामिति नि-शितायाम्। निरिति। वपेत् (२)। निशितायामिति नि-शितायाम्। हि। रक्षाꣳसि। प्रेरत इति प्र-ईरते। संप्रेर्णानीति सं-प्रेर्णानि। एव। एनानि। हन्ति। परिश्रित इति परि-श्रिते। याजयेत्। रक्षसाम्। अनन्ववचारायेत्यननु-अवचाराय। रक्षोघ्नी इति रक्षः–घ्नी। याज्यानुवाक्ये इति याज्या-अनुवाक्ये। भवतः। रक्षसाम्। स्तृत्यै।

अव्रत्यमिति ॥ [४]वृत्तेर्वशादनृतवचनादि [५]अव्रत्यम्। "यतोश्चातदर्थे" (पा ६.२.१५६) इत्युत्तरपदान्तोत्तत्वम्। आ लम्भयतीति। "लभेश्च" (पा ७.१.६४) इति नुम्। व्रत्य इति। चरितस्याव्रत्यत्वापनयनात् स्वयमपि [६]व्रत्यः [७]भवति ॥

सचेरन्निति ॥ षच समवाये, [८]बाधेरन् इत्यर्थः। निशितायामिति। निशायां मध्यं निशिता रात्रिः, तत्रोत्थाय [९]अग्नये [१०]रक्षोघ्ने [११]निः [१२]वपेत्। [१३]आहुश्च तस्याः साद्गुण्यसामर्थ्यादमावास्यायाः कालापनयः स्यादिति। [१४]प्र [१५]ईरते प्रकर्षेण संचरन्ति। तस्मात् [१६]संप्रेर्णानि [१७]सम्यक् कृतप्रचरणान्येतानि भवन्ति। [१८]परिश्रिते [१९]परितश्छादिते, [२०]रक्षसाम् [२१]अनन्ववचाराय अननुप्रवेशाय। रक्षोघ्नीति। "वा छन्दसि" (पा ६.१.१०६) इति पूर्वसवर्णदीर्घत्वम्। रक्षोघ्न्यौ "रक्षोहणं वजिनम्", "वि ज्योतिषा बृहता" (तैसं १.२.१४) इति द्वे [२२]याज्यानुवाक्ये इति। यजत्यनयेति याज्या।

---

४. पं२– व्रते असाधु अनृतवचनादि; मै४–व्रते असाधुः अनृतवचनादिः। ५. मै.लं–बाधयेरन्; तं१.तं२–बोधयेरन्। ६. तं१.तं२.मै.लं– आशु च। ७. तं१.तं२.मै.लं–संहत्य। ८. तं१.तं२.मै–परिच्छादिते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नये रुद्रवते पुरोडाशमष्टाकपालं निर्वपेदभिचरन्नेषा वा अस्य घोरा तनूर्यद्रुद्रस्तस्मा एवैनमा वृश्चति ताजगार्तिमार्छत्यग्नये सुरभिमते पुरोडाशमष्टाकपालं निर्वपेद्यस्य गावो वा पुरुषा (३) वा प्रमीयेरन् यो वा बिभीयादेषा वा अस्य भेषज्या तनूर्यत् सुरभिमती तयैवास्मै भेषजं करोति सुरभिमते भवति पूतीगन्धस्यापहत्या अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत् संग्रामे संयत्ते भागधेयेनैवैनꣳ शमयित्वा परानभि

अग्नये। रुद्रवत इति रुद्र-वते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। अभिचरन्नित्यभि-चरन्। एषा। वै। अस्य। घोरा। तनूः। यत्। रुद्रः। तस्मै। एव। एनम्। एति। वृश्चति। ताजक्। आर्तिम्। एति। ऋच्छति। अग्नये। सुरभिमत इति सुरभि-मते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यस्य। गावः। वा। पुरुषाः (३)। वा। प्रमीयेरन्निति प्र-मीयेरन्। यः। वा। बिभीयात्। एषा। वै। अस्य। भेषज्या। तनूः। यत्। सुरभिमतीति सुरभि-मती। तया। एव। अस्मै। भेषजम्। करोति। सुरभिमत इति सुरभि-मते। भवति। पूतीगन्धस्येति पूति-गन्धस्य। अपहत्या इत्यप-हत्यै। अग्नये। क्षामवत इति क्षाम-वते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। संग्राम इति सं-ग्रामे। संयत्त इति सं-यत्ते। भागधेयेनेति भाग-धेयेन। एव। एनम्। शमयित्वा। परान्। अभि।

"ऋहलोर्ण्यत्" (पा ३.१.१२४), "यजयाच°" (पा ७·३·६६) इति कुत्वाभावः। अवदानेन सहोच्यत इत्यनुवाक्या, सहार्थेऽनुशब्दः। पूर्ववण्ण्यत्॥ [v]सृत्यै विनाशाय भवति। सरतिरेव क्तिनन्तः (पा ३·३·९४); [९]धात्वन्तरमिति केचित्॥

[v]रुद्रवते घोरस्वभाववते [v]अभिचरन्। एषा वा इति। रुद्रशब्देन [१०]तद्धर्मो घोरत्वं लक्ष्यते। [v]एषा खलु [v]अस्य अग्नेः [v]घोरा [v]तनूः [v]यत् रुद्रवद्घोरस्वभावत्वं, [v]तस्मै तादृशघोरमूर्तये [v]एनम् अभिचर्यमाणम् [v]आ [v]वृश्चति आभिमुख्येन छिनत्ति। ततः [v]ताजक् तदानीम् एव [v]आर्तिं गच्छति। "उपसर्गादति [११]धातौ" (पा ६.१·९१) इति वृद्धिः॥

[v]सुरभिमते सुरभिगन्धवते। यस्येति। [v]यस्य संबन्धिनः [v]गावः वा [v]पुरुषाः [v]वा सातत्येन [v]प्र [v]मीयेरन्। यो वेति। पृथगधिकारं केचिदाहुः। पूतीगन्धाद्भीतिः, अर्थवादे दर्शनात्। पूतीगन्धः [१२-]शवगन्धो दुर्गन्धो वा[-१२]। रात्रिसत्रन्यायेन तन्निवृत्तिः फलम्। [v]भेषज्या भेषजे साधुः[१३] (पा ४.४·९८)॥

[v]क्षामवते क्षीणेन निग्राह्येण तद्वते। आत्मदत्तेन पुरोडाशेन [v]भागधेयेन आत्मीयेन जनविषये अग्निं [v]शमयित्वा [v]परान् शत्रून् अग्नये [v]अभि [v]निर्दिशति निग्राह्यत्वेन दर्शयति। ततः च

९. मै४–ह्रस्वान्तमेव धात्वन्तरमिति। १०. तं२– तद्वृत्तिधर्मः। ११. मै४.लं– धातोः। १२–१२. तं१.तं२.मै.मै४.लं– शवगन्धः। १३. तं१.तं२.मै.मै४.लं–'साधुः' इत्यस्यानन्तरं 'पूतीगन्धः दुर्गन्धः'।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

निर्दिशति यमवरेषां विध्यन्ति जीवति स यं परेषां प्र स मीयते जयति तꣳ संग्राम-
(४)मभि वा एष एतानुच्यति येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते पुरुषाहुतिर्ह्यस्य
प्रियतमाऽग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद्भागधेयेनैवैनꣳ शमयति नैषां
पुराऽऽयुषोऽपरः प्र मीयतेऽभि वा एष एतस्य गृहानुच्यति यस्य गृहान् दहत्यग्नये
क्षामवते पुरोडाशमष्टाकपालं निर्वपेद्भागधेयेनैवैनꣳ शमयति। ५
ना(५)स्यापरं गृहान् दहति ॥ २ ॥

[व्रतपतये निशितायां निर्वपेत् पुरुषाः संग्रामं न चत्वारि च ।]।

निरिति । दिशति । यम् । अवरेषाम् । विध्यन्ति । जीवति । सः । यम् । परेषाम् । प्रेति । सः । मीयते । जयति । तम् । संग्राममिति सं-ग्रामम् (४) । अभीति । वै । एषः । एतान् । उच्यति । येषाम् । पूर्वापरा इति पूर्व-अपराः । अन्वञ्चः । प्रमीयन्त इति प्र-मीयन्ते । पुरुषाहुतिरिति १०
पुरुष-आहुतिः । हि । अस्य । प्रियतमेति प्रिय-तमा । अग्नये । क्षामवत इति क्षाम-वते । पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेत् । भागधेयेनेति भाग-धेयेन । एव । एनम् । शमयति । न । एषाम् । पुरा । आयुषः । अपरः । प्रेति । मीयते । अभीति । वै । एषः । एतस्य । गृहान् । उच्यति । यस्य । गृहान् । दहति । अग्नये । क्षामवत इति क्षाम-वते । पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेत् । भागधेयेनेति भाग-धेयेन । एव । एनम् । शमयति । १५
न (५) । अस्य । अपरम् । गृहान् । दहति ॥ २ ॥

[मैसं २.१.१०, ११; कासं १०.५–७]

[v]अवरेषाम् आत्मीयानां मध्ये [v]यं [v]विध्यन्ति शत्रवः [v]सः [v]जीवति, [v]परेषां शत्रूणां मध्ये [v]यं विध्यन्ति [v]सः [v]प्र [v]मीयते म्रियते, तथा च [v]तं [v]संग्रामं [१४v]जयति ॥

अभि वा इति ॥ [v]एषः अग्निः [v]एतान् [v]अभि [v]उच्यति आभिमुख्येन समवैति । उच २०
समवाये, दैवादिकः । कान् इत्याह—[v]येषां संबन्धिनः [v]पूर्वापराः पूर्वे चापरे च ज्ञातयः [v]अन्वञ्चः [१५]अन्वग्गतयः अविच्छेदेन क्रमोल्लङ्घनेन पुनः पुनः म्रियेरन्, [१६-]पुरुषाहुतेः प्रियतमत्वात्[-१६]। नैषामिति । [v]एषाम् आत्मीयानां मध्ये [v]आयुषः शतसंवत्सरप्रमाणात् [v]पुरा पूर्वम् [v]अपरः [v]न [v]प्र [v]मीयते पूर्वं मृतेभ्यः कश्चिदन्यो न म्रियते ॥

अभि वा इत्यादि ॥ पूर्ववत् । नास्येति । [v]अस्य [v]गृहान् [v]अपरं [v]न [v]दहति पुनर्न २५
दहति । क्रियाविशेषणत्वान्नपुंसकत्वम् ॥

इति द्वितीये द्वितीये द्वितीयोऽनुवाकः[१७] ॥

१४. लं– जनयति। १५. पं२.लं– अन्वजातयः; मै४– अन्वञ्चमतयः। १६–१६. तं२– पुरुषाहुतिः प्रियतमा। १७. मै– 'अनुवाकः' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

अग्नये कामाय पुरोडाशमष्टाकपालं निर्वपेद्यं कामो नोपनमेदग्निमेव कामꣳ स्वेन भागधेयेनोप धावति स एवैनं कामेन समर्धयत्युपैनं कामो नमत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेत् स्पर्धमानः क्षेत्रे वा सजातेषु वाऽग्निमेव यविष्ठꣳ स्वेन भागधेयेनोप धावति तेनैवेन्द्रियं वीर्यं भ्रातृव्यस्य (१) युवते वि पाप्मना भ्रातृव्येण जयतेऽग्नये यविष्ठाय पुरोडाशमष्टाकपालं

अग्नये। कामाय। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यम्। कामः। न। उपनमेदित्युप-नमेत्। अग्निम्। एव। कामम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। कामेन। समिति। अर्धयति। उपेति। एनम्। कामः। नमति। अग्नये। यविष्ठाय। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। स्पर्धमानः। क्षेत्रे। वा। सजातेष्विति स-जातेषु। वा। अग्निम्। एव। यविष्ठम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। तेन। एव। इन्द्रियम्। वीर्यम्। भ्रातृव्यस्य (१)। युवते। वीति। पाप्मना। भ्रातृव्येण। जयते। अग्नये। यविष्ठाय। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्।

अग्नये कामायेत्यादि॥ वैदिके कर्मणि फलस्य नियतत्वात् कृष्यादिफलविषयं काममाहुः, सर्वकामविषयमन्ये ब्रुवते। स एवेति। [v]सः अग्निः कामयमानम् [v]एनं [v]कामेन [v]सम् [v]अर्धयति। स च [v]कामः [v]एनम् [v]उप [v]नमति॥

यविष्ठः युवतमः, पृथक्कर्तृतमो वा। [v]युवते पृथक्करोति। व्यत्ययेन [1]आत्मनेपदम्। [v]पाप्मना [v]भ्रातृव्येण व्यावृत्तो जयमाप्नोति॥

[8]कामोपनतिमाकाङ्क्षन् कामुका(मदा)याग्नये चरेत्।
स्पर्धमानो यविष्ठाय वह्नये हविराचरेत्॥ ११॥
तथाऽभिचर्यमाणोऽपि यविष्ठाय हविश्चरेत्।
कृत्स्नायुःप्राप्तये कुर्याद्धविरायुष्मतेऽग्नये॥ १२॥
भूतिकामो हविः कुर्याद्वह्नये जातवेदसे।
कान्तिकामोऽष्टाकपालमाचरेद्रुक्मतेऽग्नये॥ १३॥
आज्ञां [9]कर्तुमभीप्सुः सन् कुर्यात् तेजस्वतेऽग्नये।
वैरिणोऽभिभवं वाञ्छन् साहन्त्याय हविश्चरेत्॥ १४॥
अनुवाके तृतीयेऽस्मिन् कामुकेष्टयादयः [10]श्रुताः।

१. मै४– शः।

८. इ– कामोपनयमाकाङ्क्षन्। ९. आ.ना–°मभिच्छुः; अ.उ.जो.पा– °मभीष्टुः। १०. इ–स्मृताः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

निर्वपेदभिचर्यमाणोऽग्निमेव यविष्ठꣳ स्वेन भागधेयेनोप धावति स एवास्माद्रक्षाꣳसि यवयति नैनमभिचरन्तस्तृणुतेऽग्नय आयुष्मते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत सर्वमायुरियामित्यग्निमेवाऽऽयुष्मन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मि(२)-न्नायुर्दधाति सर्वमायुरेत्यग्नये जातवेदसे पुरोडाशमष्टाकपालं निर्वपेद्भूतिकामोऽग्निमेव जातवेदसꣳ स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येवाग्नये रुक्मते पुरोडाशमष्टाकपालं ५

निरिति। वपेत्। अभिचर्यमाण इत्यभि-चर्यमाणः। अग्निम्। एव। यविष्ठम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मात्। रक्षाꣳसि। यवयति। न। एनम्। अभिचरन्नित्यभि-चरन्। स्तृणुते। अग्नये। आयुष्मते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यः। कामयेत। सर्वम्। आयुः। इयाम्। इति। अग्निम्। एव। आयुष्मन्तम्। १० स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मिन् (२)। आयुः। दधाति। सर्वम्। आयुः। एति। अग्नये। जातवेदस इति जात-वेदसे। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। भूतिकाम इति भूति-कामः। अग्निम्। एव। जातवेदसमिति जात-वेदसम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। भूतिम्। गमयति। भवति। एव। अग्नये। रुक्मते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। १५

[१-V]रक्षांसि [V]यवयति[-१] अभिचरतः सकाशात् रक्षांसि बाधकानि पृथक्करोति ततः प्रच्यावयति। यौतेर्णिचि व्यत्ययेन वृद्ध्यभावः। ततश्च साधनाभावात् [V]न [V]एनम् [V]अभिचरन् [V]स्तृणुते न हिंसितुं क्षमते॥

अग्नय आयुष्मत इत्यादि॥ गतम्। सर्वमायुः [३]औतं शतं वर्षाणि, [४-]षोडशाधिकं शतं वा[-४] (द्र. छांउ ३·१६·१-७) छान्दोग्योपनिषदि श्रुतत्वात्॥ २०

अग्नये जातवेदसे इति॥ जातानां वेदिता जातधनो वा जातवेदाः (द्र. निरुक्त ७·१९)॥

रुक्मान् दीप्तिमान्।

२–२. तं.तं.२.मै.लं– 'रक्षांसि यवयति' नास्ति। ३. मै४– शतं। ४–४. तं.तं१.मै.लं– षोडश वा शतं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

निर्वपेद्रुक्कामोऽग्निमेव रुक्मन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् रुचं दधाति रोचत एवाग्नये तेजस्वते पुरोडाश(३)मष्टाकपालं निर्वपेत् तेजस्कामोऽग्निमेव तेजस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् तेजो दधाति तेजस्व्येव भवत्यग्नये साहन्त्याय पुरोडाशमष्टाकपालं निर्वपेत् सीक्षमाणोऽग्निमेव साहन्त्यꣳ स्वेन भागधेयेनोप धावति तेनैव सहते यꣳ सीक्षते ॥ ३ ॥

[भ्रातृव्यस्यास्मिन् तेजस्वते पुरोडाशमष्टात्रिꣳशच्च ।] ।

निरिति । वपेत् । रुक्काम इति रुक्-कामः । अग्निम् । एव । रुक्मन्तम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मिन् । रुचम् । दधाति । रोचते । एव । अग्नये । तेजस्वते । पुरोडाशम् (३) । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेत् । तेजस्काम इति तेजः--कामः । अग्निम् । एव । तेजस्वन्तम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मिन् । तेजः । दधाति । तेजस्वी । एव । भवति । अग्नये । साहन्त्याय । पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेत् । सीक्षमाणः । अग्निम् । एव । साहन्त्यम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । तेन । एव । सहते । यम् । सीक्षते ॥ ३ ॥

[मैसं २.१-११ ; कासं १०.७]

तेजस्वान् [५]ऐश्वर्यवान् ॥

साहन्त्यायेति ॥ साधु अभिभविता सहन्तः । औणादिको झच् (उ ४१३, ४१५?) । स एव [६]साहन्त्यः । छान्दसो यत् (पा ५.१.६७) । [७]सीक्षमाणः अभिभवितुमिच्छन् शत्रून् । तितिक्षितुमिच्छन् निग्राह्यानिति केचित् । सहतेः सनि छान्दसं [७]दीर्घत्वमभ्यासलोपश्च । धात्वन्तरं वा सीक्षतिर्द्रष्टव्यः । तेनैवेति । [७]तेन साहन्त्येनाग्निना सहायेन सह यजमानः [७]सहते अभिभवति । कम्? [७]यं [७]सीक्षते अभिभवितुमिच्छति ॥

इति द्वितीयस्य द्वितीये तृतीयोऽनुवाकः ॥

---

५. तं१.तं२.मै.लं– औद्धत्यवान् । ६. पं२– सहन्त्यः ; लं– सहितः । ७. मै–ईत्वम° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नयेऽन्नवते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नवान्त्स्यामित्यग्निमेवान्नवन्तꣳ स्वेन भागधेयेनोप धावति स एवैनमन्नवन्तं करोत्यन्नवानेव भवत्यग्नयेऽन्नादाय पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नादः स्यामित्यग्निमेवान्नादꣳ स्वेन भागधेयेनोप धावति स एवैनमन्नादं करोत्यन्नाद (१) एव भवत्यग्नयेऽन्नपतये पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नपतिः स्यामित्यग्निमेवान्नपतिꣳ स्वेन भागधेयेनोप धावति स एवैनमन्नपतिं करोत्यन्नपतिरेव भवत्यग्नये पवमानाय

अग्नये। अन्नवत इत्यन्न-वते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यः। कामयेत। अन्नवानित्यन्न-वान्। स्याम्। इति। अग्निम्। एव। अन्नवन्तमित्यन्न-वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। अन्नवन्तमित्यन्न-वन्तम्। करोति। अन्नवानित्यन्न-वान्। एव। भवति। अग्नये। अन्नादायेत्यन्न-अदाय। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यः। कामयेत। अन्नाद इत्यन्न-अदः। स्याम्। इति। अग्निम्। एव। अन्नादमित्यन्न--अदम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। अन्नादमित्यन्न-अदम्। करोति। अन्नाद इत्यन्न-अदः (१)। एव। भवति। अग्नये। अन्नपतय इत्यन्न-पतये। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यः। कामयेत। अन्नपतिरित्यन्न-पतिः। स्याम्। इति। अग्निम्। एव। अन्नपतिमित्यन्न-पतिम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। अन्नपतिमित्यन्न-पतिम्। करोति। अन्नपतिरित्यन्न-पतिः। एव। भवति। अग्नये। पवमानाय।

अग्नयेऽन्नवत इत्यादि ॥ [v]अन्नवान् बह्वन्नः ॥
[v]अन्नादः अन्नादमशक्तियुक्तः।
[v]अन्नपतिः अन्नस्य पालयिता ॥

[11]वाञ्छत्यन्नवान् स्यां स कुर्यादन्नवतेऽग्नये ॥१५॥
[12]वाञ्छन्नन्नादने शक्तिमन्नादाय हविश्चरेत्।
[13]प्रभूतान्नस्वामितार्थी ह्यन्नस्य पतये चरेत् ॥ १६ ॥
पवमानः पावकश्च शुचिश्चेति त्रिभिर्गुणैः।
युक्तेभ्यः कुरुते दीर्घरोगयुक्तो हविस्त्रयम् ॥ १७ ॥
चक्षुष्पाटवकामोऽपि पूर्वोक्तं त्रयमाचरेत्।
रुद्रवद्यागमारभ्य ये प्रोक्ता एतदन्तकाः ॥ १८ ॥

११. ड.ड१.ने.शृं.हो१– °त्यन्नवत्त्वम्। १२. अ. आ.उ.क.जो.ड.ना.पा. – वाञ्छत्यन्नादके।
१३. ने.हो१– °स्वामितार्थे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये ज्योगामयावी यदग्नये पवमानाय निर्वपति प्राणमेवास्मिन् तेन दधाति यदग्नये (२) पावकाय वाचमेवास्मिन् तेन दधाति यदग्नये शुचय आयुरेवास्मिन् तेन दधात्युत यदीतासुर्भवति जीवत्येवैतामेव निर्वपेच्चक्षुष्कामो यदग्नये पवमानाय निर्वपति प्राणमेवास्मिन् तेन दधाति यदग्नये

५ पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेत् । अग्नये । पावकाय । अग्नये । शुचये । ज्योगामयावीति ज्योक्-आमयावी । यत् । अग्नये । पवमानाय । निर्वपतीति निः–वपति । प्राणमिति प्र-अनम् । एव । अस्मिन् । तेन । दधाति । यत् । अग्नये (२) । पावकाय । वाचम् । एव । अस्मिन् । तेन । दधाति । यत् । अग्नये । शुचये । आयुः । एव । अस्मिन् । तेन । दधाति । उत । यदि । इतासुरितीत-असुः । भवति । जीवति । एव । एताम् । एव । निरिति ।
१० वपेत् । चक्षुष्काम इति चक्षुः–कामः । यत् । अग्नये । पवमानाय । निर्वपतीति निः–वपति । प्राणमिति प्र-अनम् । एव । अस्मिन् । तेन । दधाति । यत् । अग्नये ।

पवमानः पापानां शोधयिता [1]प्राणस्थितिहेतुः । [2]पावकः [3]पापविश्लेषहेतुः वाचः प्रवृत्तिहेतुः । शुचिरौज्ज्वल्यहेतुरायुषोऽभिवृद्धिहेतुः । [4]ज्योगामयावी दीर्घामयः । उतेति । [5]गतासुरपि एतत्कर्म-सामर्थ्यात् [4]जीवति [4]एव आयुरन्तरं लभते ॥

१५ [5]एतामेवेत्यादि ॥ [4]चक्षुष्कामः तिमिरादिदोषनिवृत्तिकामः । [4]यदि अपि [4]अन्धः [4]भवति अनेन कर्मणा [4]प्र [4]पश्यति [4]एव प्रकृष्टदर्शनवान् भवति ॥

त्वमग्ने रुद्र इत्यत्र तदर्थो वर्णितोऽखिलः ।
प्रजाकामः [14]-[14]पुत्रवते वह्नये पुत्रिणे तथा -[14] ॥१९॥
[15]इन्द्रायेति हविर्भ्यां तु [16]युक्तामिष्टिमिहाचरेत् ।
२० क्षीरादिरसकामस्तु कुर्याद्रसवते चरुम् ॥ २० ॥
धनकामो वसुमते वह्नयेऽत्र हविश्चरेत् ।
युद्धं जित्वाऽन्नकामस्तु कुर्याद्वाजसृतेऽग्नये ॥ २१ ॥
द्विरग्न्युद्धरणे कुर्यादग्नयेऽग्निवते हविः ।
ज्योतिष्मतेऽग्नये कुर्यादुद्धृताग्निविनाशने ॥ २२ ॥
२५ अन्नवद्यागमारभ्य ज्योतिष्मदवसानकाः ।
अनुवाके चतुर्थेऽत्र [17]क्रमेणैते समीरिताः ॥ २३ ॥

१. लं– प्रागा(?)स्थितिहेतुः । २. लं– 'पावकः' नास्ति । ३. पं२ पापसंशोषहेतुः; मै४– पापासंश्लेषहेतुः; लं– 'पापविश्लेषहेतुः' नास्ति । ४. मै४– गतायुरपि । ५. तं१.तं२.लं– एतामेवेति ।

१४–१४. इ.जो.ना.हा–पुत्रकामः निर्वपेत् पुत्रिणेऽग्नये । १५. आ.क.–इन्द्रायेह; इ– इन्द्राय च ।
३० १६. आ.क–°ष्टिं समाचरेत्; ड१. हो१–°ष्टिमिमां चरेत्; ने–अग्नियुक्तामिमां चरेत् । १७. ड१– क्रमेणैव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पावकायं वाचमेवास्मिन् तेन दधाति यदग्नये शुचये चक्षुरेवास्मिन् तेन दधा(३)-त्युत यद्यन्धो भवति प्रैव पश्यत्यग्नये पुत्रवते पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय पुत्रिणे पुरोडाशमेकादशकपालं प्रजाकामोऽग्निरेवास्मै प्रजां प्रजनयति वृद्धामिन्द्रः प्र यच्छत्यग्नये रसवतेऽजक्षीरे चरुं निर्वपेद्यः कामयेत रसवान्त्स्यामित्यग्निमेव रसवन्तꣳ स्वेन भागधेयेनोप धावति स एवैनꣳ रसवन्तं करोति (४) रसवानेव भवत्यजक्षीरे भवत्याग्नेयी वा एषा यदजा साक्षादेव रसमव रुन्द्धेऽग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत वसुमान्त्स्यामित्यग्निमेव वसुमन्तꣳ स्वेन भागधेयेनोप धावति

पावकायं । वाचम् । एव । अस्मिन् । तेन । दधाति । यत् । अग्नये । शुचये । चक्षुः । एव । अस्मिन् । तेन । दधाति (३) । उत । यदि । अन्धः । भवति । प्रेति । एव । पश्यति । अग्नये । पुत्रवत इति पुत्र-वते । पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेत् । इन्द्राय । पुत्रिणे । पुरोडाशम् । एकादशकपालमित्येकादश-कपालम् । प्रजाकाम इति प्रजा-कामः । अग्निः । एव । अस्मै । प्रजामिति प्र-जाम् । प्रजनयतीति प्र-जनयति । वृद्धाम् । इन्द्रः । प्रेति । यच्छति । अग्नये । रसवत इति रस-वते । अजक्षीर इत्यज-क्षीरे । चरुम् । निरिति । वपेत् । यः । कामयेत । रसवानिति रस-वान् । स्याम् । इति । अग्निम् । एव । रसवन्तमिति रस-वन्तम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । एनम् । रसवन्तमिति रस-वन्तम् । करोति (४) । रसवानिति रस-वान् । एव । भवति । अजक्षीर इत्यज-क्षीरे । भवति । आग्नेयी । वै । एषा । यत् । अजा । साक्षादिति स-अक्षात् । एव । रसम् । अवेति । रुन्द्धे । अग्नये । वसुमत इति वसु-मते । पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेत् । यः । कामयेत । वसुमानिति वसु-मान् । स्याम् । इति । अग्निम् । एव । वसुमन्तमिति वसु-मन्तम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति ।

पुत्रवान् पुत्रजननशक्तिमान् ॥ पुत्री पुत्रवृद्धिहेतुः ॥

vरसवान् प्रशस्तरसोत्पत्तिहेतुः, अन्नवानित्येके ।

अजक्षीरे भवतीत्यादि । गतम् । अग्नेः स्वभूता vआग्नेयी । " सर्वत्राग्निकलिभ्याम् ° " (पा ४.२.८ वा २) इति ढक् । vवसुमान् वासहेतुभिर्वरिष्ठैर्जनैस्तद्वान् ॥

वाजसृते इति । वाजोऽन्नं [६]तत्साधनभूतान् संग्रामान्[६] [७]धावति [८]अप्रधृष्यत्वेन प्राप्नोतीति वाजसृत् । vसिसीर्षति सर्तुमिच्छति । वाजादिप्राप्त्यर्थमेव vसंग्रामं vजिगीषति, न तु जयमात्रेण

६–६. मै– °भूतात् संग्रामम् । ७. तं१.तं२– धावन्ति । ८. तं१.तं२– अपधृष्य° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स एवैनं वसुमन्तं करोति वसुमानेव भवत्यग्नये वाजसृते पुरोडाशमष्टाकपालं निर्वपेत् संग्रामे संयत्ते वाजं (५) वा एष सिसीर्षति यः संग्रामं जिगीषत्यग्निः खलु वै देवानां वाजसृदग्निमेव वाजसृतꣳ स्वेन भागधेयेनोप धावति धावति वाजꣳ हन्ति वृत्रं जयति तꣳ संग्राममथो अग्निरिव न प्रतिधृषे भवत्यग्नयेऽग्निवते पुरोडाशमष्टाकपालं निर्व-
५ पेद्यस्याग्नावग्निमभ्युद्धरेयुर्निर्दिष्टभागो वा एतयोरन्योऽनिर्दिष्टभागोऽन्यस्तौ संभवन्तौ यजमान(६)मभि सं भवतः स ईश्वर आर्तिमार्तोर्यदग्नयेऽग्निवते निर्वपति भागधेयेनैवैनौ

सः। एव। एनम्। वसुमन्तमिति वसु-मन्तम्। करोति। वसुमानिति वसु-मान्। एव। भवति। अग्नये। वाजसृत इति वाज-सृते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। संग्राम इति सं-ग्रामे। संयत्त इति सं-यत्ते। वाजम् (५)। वै। एषः। सिसीर्षति। यः।
१० संग्राममिति सं-ग्रामम्। जिगीषति। अग्निः। खलु। वै। देवानाम्। वाजसृदिति वाज-सृत्। अग्निम्। एव। वाजसृतमिति वाज-सृतम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। धावति। वाजम्। हन्ति। वृत्रम्। जयति। तम्। संग्राममिति सं-ग्रामम्। अथो इति। अग्निः। इव। न। प्रतिधृष इति प्रति-धृषे। भवति। अग्नये। अग्निवत इत्यग्नि-वते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यस्य। अग्नौ। अग्निम्। अभ्युद्धरेयुरित्यभि-उद्धरेयुः।
१५ निर्दिष्टभाग इति-निर्दिष्ट-भागः। वै। एतयोः। अन्यः। अनिर्दिष्टभाग इत्यनिर्दिष्ट-भागः। अन्यः। तौ। संभवन्ताविति सं-भवन्तौ। यजमानम् (६)। अभि। समिति। भवतः। सः। ईश्वरः। आर्तिम्। आर्तोरित्या-अर्तोः। यत्। अग्नये। अग्निवत इत्यग्नि-वते। निर्वपतीति निः-वपति। भागधेयेनेति भाग-धेयेन। एव। एनौ।

अस्यार्थः। धावतीत्यादि। [v]वाजं [v]वाजार्थं संग्रामं [v]धावति आक्रामति, [v]वृत्रं वारकं पापादिकं
२० च [v]हन्ति, [v]जयति च [v]संग्रामम्। [v]अथो अपि च [v]अग्निः [v]इव अयं [v]न [v]प्रतिधृषे। [10]प्रतिधर्षयितुं शक्यो न [11]भवतीत्यर्थे केन्प्रत्ययः (पा ३.४.१४)। [12]अप्रधृष्यः [v]भवति इत्यर्थः।

अग्निवान् अग्न्यन्तरेण [13]तद्वान्। "छन्दसीरः" (पा ८.२.१५) इति मतुपो वत्त्वम्। उपरि प्रणयनमुद्धरणम्[14]। तस्योपरि पुनः प्रणयनमभ्युद्धरणं प्रमादादिना। तत्र तयोरेकः [v]निर्दिष्टभागः यस्मै हविर्निरुप्तं भविष्यति, [v]अन्यः [v]अनिर्दिष्टभागः, तादृशौ भिन्नस्वभावौ। [v]तौ
२५ [v]संभवन्तौ सह भवन्तौ [v]यजमानम् [v]अभि [15]एतत्कारिणम् यजमानमेवाभिलक्ष्य [v]सं [v]भवतः

---

९. तं१.तं२.मै.लं ऊर्गर्थम्। १०. मै४– प्रधर्षयितुम्। ११. मै४– कृत्यर्थे। १२. तं२– प्रधृष्य। १३. तं१.तं२.मै लं– 'तद्वान्' नास्ति। १४. मै४–°यनमत्युद्धरणम्। १५. तं१.मै–एतत्कारणम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

शमयति नाऽऽर्तिमार्छति यजमानोऽग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेद्य-स्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायेदपर आदीप्यानूद्धृत्य इत्याहुस्तत्तथा न कार्यं यद्भागधेयमभि पूर्वं उद्ध्रियते किमपरोऽभ्युद्(७)ह्रियेतेति तान्येवावक्षाणानि संनिधाय मन्थेदितः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः। स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति ५

शमयति। न। आर्तिम्। एति। ऋच्छति। यजमानः। अग्नये। ज्योतिष्मते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। यस्य। अग्निः। उद्धृत इत्युत्-हृतः। अहुते। अग्निहोत्र इत्यग्नि-होत्रे। उद्वायेदित्युत्-वायेत्। अपरः। आदीप्येत्या-दीप्य। अनूद्धृत्य इत्यनु-उद्धृत्यः। इति। आहुः। तत्। तथा। न। कार्यम्। यत्। भागधेयमिति भाग-धेयम्। अभीति। पूर्वैः। उद्ध्रियत इत्युत्-ह्रियते। किम्। अपरः। अभि। उदिति (७)। ह्रियेत। इति। तानि। एव। १०
अवक्षाणानीत्यव-क्षाणानि। संनिधायेति सं-निधाय। मन्थेत्। इतः। प्रथमम्। जज्ञे। अग्निः। स्वात्। योनेः। अधीति। जातवेदा इति जात-वेदाः। सः। गायत्रिया। त्रिष्टुभा। जगत्या। देवेभ्यः। हव्यम्। वहतु। प्रजानन्निति प्र-जानन्। इति।

[१६]अभिव्याप्नुतः। ततः [V]सः यजमानः [V]आर्तिं गन्तुम् [V]ईश्वरः स्यात्। "ईश्वरे तोसुन्कसुनौ" (पा ३·४·१३) इति तोसुन्। यदित्यादि गतम्॥ १५

ज्योतिष्मान् ज्योतिषा युक्तः। [१७-V]यस्य यजमानस्य[-१७] अग्निहोत्रार्थम् [V]उद्धृतः [V]अग्निः अग्निहोत्रहोमात् [१८-]प्रागेव [V]उद्वायेत्[-१८] उद्गच्छेत् विनश्येत् तदा [V]अपरः अग्निः [V]आदीप्य, न तु मथित्वा, [V]अनूद्धृत्यः उद्वापनानन्तरं प्रणेयः [V]इति [V]आहुः। एतद्दूषयति—[V]तत् [V]तथा [V]न कर्तव्यम्। हेतुमाह—[V]यत् [V]भागधेयम् अभिलक्ष्य [V]पूर्वः अग्निः [V]उद्ध्रियते प्रणीयते [V]किं तदेव [१९]भागधेयमभिलक्ष्य [V]अपरः अग्निः [V]उत् [V]ह्रियेत? किमेतदुच्यते? तर्हि कथं कर्तव्यमित्याह—[V]तानि [V]एव [V]अवक्षाणानि २०
दग्धकाष्ठानि येभ्यः पूर्वं [V]उदभवत्। क्षै जै षै क्षये, तस्माल्ल्युट् (पा ३·३·११५)। तानि [V]संनिधाय [V]मन्थेत्। 'इतः प्रथमं जज्ञे' इति त्रिष्टुप्। पङ्क्तिप्रकारोऽयमिति केचित्। एवं हि स एवाग्निरवस्थितो

१६. लं–अभिव्याप्नुवतः। १७–१७. तं१.मै४.लं– यदि; तं२– 'यस्य यजमानस्य' नास्ति। १८–१८. लं– 'प्रागेव उद्वायेत्' नास्ति। १९. तं१.तं२.मै.लं– भागम्। २०. मै४–उद्वायेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छन्दोभिरेवैनꣳ स्वाद्योनेः प्र जनयत्येष वाव सोऽग्निरित्याहुर्ज्योतिस्त्वा अस्य परापतितमिति यदग्नये ज्योतिष्मते निर्वपति यदेवास्य (८) ज्योतिः परापतितं तदेवाव रुन्द्धे ॥ ४ ॥

[करोत्यन्नादो दधाति यदग्नये शुचये चक्षुरेवास्मिन् तेन दधाति करोति वाजं यजमानमुदेवास्य षट् च ।]।

छन्दोभिरिति छन्दः–भिः । एव । एनम् । स्वात् । योनेः । प्रेति । जनयति । एषः । वाव । सः । अग्निः । इति । आहुः । ज्योतिः । तु । वै । अस्य । परापतितमिति परा-पतितम् । इति । यत् । अग्नये । ज्योतिष्मते । निर्वपतीति निः–वपति । यत् । एव । अस्य (८) । ज्योतिः । परापतितमिति परा-पतितम् । तत् । एव । अवेति । रुन्द्धे ॥ ४ ॥

[कासं १०.६]

भवति । तदेवाह–छन्दोभिरिति । सम्यङ्निधानं संनिधानं, मथनानुगुणं [२१]निधाय तेष्वेव मथनेनाग्निमुत्पादयेदिति । तादृशावक्षाणाभावे तद्भस्मनाऽपि संस्पृश्य मन्थेदिति प्रदर्शनार्थमेवकारग्रहणम् । [v]छन्दोभिः गायत्र्यादिभिः [v]स्वात् [v]योनेः [२२]कारणादवक्षाणात्मकात् [v]प्र [v]जनयति [२३]अग्निम् । अग्निर्हि छन्दांसि श्रुत्वा जायते, यथा–"गायत्रं छन्दोऽनु प्र जायस्व" (तैसं १.३.७) इत्यादि । नन्वेवमपि मन्थनजन्मा अन्य एवायमग्निः, तत्राह–[v]एषः खलु मन्थनजन्मा [v]सः च [v]अग्निः, योनिगतस्यैकत्वात् । [v]ज्योतिः [v]तु [v]वै [v]अस्य अग्नेः [v]परापतितम् उत्सन्नं, तावता अग्निरेवोत्सन्न इति लौकिका मन्यन्ते, तस्मात् स एवायमग्निरिति यथोक्तदोषाप्रसङ्ग इत्याहुः पुराविदः । एवमुत्पादितेऽग्नौ, [v]अग्नये [v]ज्योतिष्मते [v]पुरोडाशम् [v]अष्टाकपालं [v]निर्वपेत् इति । यदग्नये इत्यादि । गतम् । मन्त्रार्थस्तु–[v]प्रथमम् अप्ययम् [v]अग्निः [v]इतः एव जातः [v]स्वात् आत्मीयात् [v]योनेः कारणात् [v]अधि [v]जज्ञे । [v]जातवेदाः जातानां वेदिता, जातधनो वा । [v]सः अयमिदानीं स्वाद्योनेर्गायत्र्यादिभिः जातः [v]देवेभ्यः [v]हव्यं [v]वहतु [v]प्रजानन् प्रकर्षेण वहनोपायज्ञः ॥

इति द्वितीये द्वितीये चतुर्थोऽनुवाकः ॥

पुत्रवद्यागमारभ्य प्रोक्तानामक्षरार्थकः ।
***यस्त्वा हृदेत्यत्र सर्वो [१८]विस्पष्टमुपवर्णितः ॥ २४ ॥**

---

२१. मै४–अभिधाय । २२. मै४– कारणाभावात् । २३. तं१.तं२.लं–अग्निः ।

---

*(द्र. तैसं १.४.४६)। १८. इ–°ष्टं समुदीरितः; ड.ड१.ने.शृं.हो१–°ष्टमनुवर्णितः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

वैश्वानरं द्वादशकपालं निर्वपेद्वारुणं चरुं दधिक्राव्णे चरुमभिशस्यमानो यद्वैश्वानरो द्वादशकपालो भवति संवत्सरो वा अग्निर्वैश्वानरः संवत्सरेणैवैनꣳ स्वदयत्यप पापं वर्णꣳ हते वारुणेनैवैनं वरुणपाशान्मुञ्चति दधिक्राव्णा पुनाति हिरण्यं दक्षिणा पवित्रं वै हिरण्यं पुनात्येवैनमाद्यमस्यान्नं भवत्ये-

---

वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्। निरिति। वपेत्। वारुणम्। चरुम्। दधिक्राव्ण इति दधि-क्राव्णे। चरुम्। अभिशस्यमान इत्यभि-शस्यमानः। यत्। वैश्वानरः। द्वादशकपाल इति द्वादश-कपालः। भवति। संवत्सर इति सं-वत्सरः। वै। अग्निः। वैश्वानरः। संवत्सरेणेति सं-वत्सरेण। एव। एनम्। स्वदयति। अपेति। पापम्। वर्णम्। हते। वारुणेन। एव। एनम्। वरुणपाशादिति वरुण-पाशात्। मुञ्चति। दधिक्राव्णेति दधि-क्राव्णा। पुनाति। हिरण्यम्। दक्षिणा। पवित्रम्। वै। हिरण्यम्। पुनाति। एव। एनम्। आद्यम्। अस्य। अन्नम्। भवति। १०

वैश्वानरं [1]द्वादशकपालमिति ॥ [V]अभिशस्यमानः पातकारोपेण दूष्यमाणः। [V]स्वदयति निर्दोषीकरोतीति। ष्वद आस्वादने, चुरादिरदन्तः। अपेति। [V]पापं [V]वर्णं रूपम् आरोप्यमाणं [V]अप [V]हते। दधिक्राव्णा पुनातीति। दधीनि धारकाणि पृथिव्यादीनि। "आदृगमहन°" (पा ३·२·१७१) इति किप्रत्ययः। तेषु सर्वेषु क्रमते व्याप्नोतीति व्यापकोऽग्निः दधिक्रावा, तेन [V]पुनाति। क्रमेः "अन्येभ्योऽपि दृश्यन्ते" (पा ३·२·७५) इति [2]वनिप्। "विड्वनोरनु-नासिकस्यात्" (पा ६·४·४१) इत्यात्वम्। हिरण्यमिति। अन्वाहार्यमासाद्य हिरण्यं दक्षिणां ददाति ॥

वैश्वानरं पुरोडाशं चरुं वरुणदेवकम्।
दधिक्राव्णे चरुं कुर्यादभिशस्तः परैः पुमान् ॥ २५ ॥
त्रिहविष्कामिमामेव प्रजार्थ्यपि समाचरेत्।
एकं वैश्वानरं कुर्यात् पुत्रे जातेऽभिवृद्धये ॥ २६ ॥
दर्शादिकमतिक्रम्य [19-]तद्वद्वैश्वानरं चरेत्[-19] ॥
[20-]अग्निमुद्वासयिष्यन्नाग्नेयमष्टाकपालकम् ॥ २७ ॥
उक्तं वैश्वानरं चोभे निर्वपेद्धविषी अथ[-20]।
वैश्वानरं मारुतं च [21-]ग्रामकामः समाचरेत्[-21] ॥ २८ ॥
अभिशस्तीष्टिमारभ्य पञ्चमेऽस्मिन्नुदाहृताः।

---

१. तं१.तं२– द्वादशकपालमित्यादि। २. तं२– क्वनिप्।

१९–१९. ड.ड१.ने.शृं.हो१.तं–वैश्वानरमाचरेत्। २०. ने.शृं– आग्नेयवैश्वानराद्वाऽग्न्युद्वासन-कामिनः; ड१–अग्नये वैश्वानरौ द्वौ चाग्निद्वासन(?)कामिनम्; ड.हो१–आग्नेयवैश्वानरौ द्वौ अग्न्युद्वासनकामिनः।
२१–२१. आ.क–ग्रामार्थी निर्वपेद्धविः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

-तामेव निर्वपेत् प्रजाकामः संवत्सरो (१) वा एतस्याशान्तो योनिः प्रजायै पशूनां निर्दहति योऽलं प्रजायै सन् प्रजां न विन्दते यद्वैश्वानरो द्वादशकपालो भवति संवत्सरो वा अग्निर्वैश्वानरः संवत्सरमेव भागधेयेन शमयति सोऽस्मै शान्तः स्वाद्योनेः प्रजां प्र जनयति वारुणेनैवैनं वरुणपाशान्मुञ्चति दधिक्राव्णा पुनाति हिरण्यं दक्षिणा पवित्रं वै हिरण्यं पुनात्येवैनं (२) विन्दते प्रजां वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिन् तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति

एताम्। एव। निरिति। वपेत्। प्रजाकाम इति प्रजा-कामः। संवत्सर इति सं-वत्सरः (१)। वै। एतस्य। अशान्तः। योनिम्। प्रजाया इति प्र-जायै। पशूनाम्। निरिति। दहति। यः। अलम्। प्रजाया इति प्र-जायै। सन्। प्रजामिति प्र-जाम्। न। विन्दते। यत्। वैश्वानरः। द्वादशकपाल इति द्वादश-कपालः। भवति। संवत्सर इति सं-वत्सरः। वै। अग्निः। वैश्वानरः। संवत्सरमिति सं-वत्सरम्। एव। भागधेयेनेति भाग-धेयेन। शमयति। सः। अस्मै। शान्तः। स्वात्। योनेः। प्रजामिति प्र-जाम्। प्रेति। जनयति। वारुणेन। एव। एनम्। वरुणपाशादिति वरुण-पाशात्। मुञ्चति। दधिक्राव्णेति दधि-क्राव्णा। पुनाति। हिरण्यम्। दक्षिणा। पवित्रम्। वै। हिरण्यम्। पुनाति। एव। एनम् (२)। विन्दते। प्रजामिति प्र-जाम्। वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्। निरिति। वपेत्। पुत्रे। जाते। यत्। अष्टाकपाल इत्यष्टा-कपालः। भवति। गायत्रिया। एव। एनम्। ब्रह्मवर्चसेनेति ब्रह्म-वर्चसेन। पुनाति। यत्। नवकपाल इति नव-कपालः। त्रिवृतेति त्रि-वृता। एव। अस्मिन्। तेजः। दधाति। यत्। दशकपाल इति दश-कपालः। विराजेति वि-राजा। एव। अस्मिन्। अन्नाद्यमित्यन्न-अद्यम्। दधाति। यत्। एकादशकपाल इत्येकादश-कपालः। त्रिष्टुभा। एव। अस्मिन्। इन्द्रियम्। दधाति।

एतामिति॥ त्रिहविष्कामिष्टिम्। एतस्येति। उक्तम्। कस्येत्याह—योऽलमिति। गतमन्यत्॥

पुत्रे जाते इति॥ [३]दशाहानन्तरं[३] पर्वण्येव। 'यदष्टाकपालः' [४]इत्यादिना अवयुत्य द्वादशकपालः[५] स्तूयते 'ब्रह्मवर्चसेन' इति। तद्धेतुत्वात् ताच्छब्द्यम्। त्रिवृतेति। नवस्तोत्रीयस्तोमस्त्रिवृत्। विराट् दशाक्षरा, [६]विराडन्नं च। त्रिष्टुभेति। तस्येन्द्रियहेतुत्वात् त्रिष्टुबिन्द्रिययोः

३–३. मै४– दर्शादनन्तरं पर्वण्येव; तं१.तं२.मै.लं– दशाहात्स्वयमपर्वण्येव। ४. मै–इत्यादि। ५. तं१.तं२–°कपालेन। ६. तं१.तं२.मै.लं–अन्नम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२.२.५)
काम्या इष्टयः]

यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति यस्मिञ्जात एतामिष्टिं निर्वपति पूत (३) एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवत्यव वा एष सुवर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपादयति सुवर्गाय हि लोकाय दर्शपूर्णमासाविज्येते वैश्वानरं द्वादशकपालं निर्वपेदमावास्यां वा पौर्णमासीं वाऽतिपाद्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरमेव प्रीणात्यथो संवत्सरमेवास्मा ५
उप दधाति सुवर्गस्य लोकस्य समष्ट्या (४) अथो देवता एवान्वारभ्य सुवर्गं लोकमेति

वीरहा वा एष देवानां योऽग्निमुद्वासयते न वा एतस्य ब्राह्मणा

यत्। द्वादशकपाल इति द्वादश-कपालः। जगत्या। एव। अस्मिन्। पशून्। दधाति। यस्मिन्। जाते। एताम्। इष्टिम्। निर्वपतीति निः—वपति। पूतः (३)। एव। तेजस्वी। अन्नाद इत्यन्न-अदः। इन्द्रियावी। पशुमानिति पशु-मान्। भवति। अवेति। वै। एषः। सुवर्गादिति १०
सुवः—गात्। लोकात्। छिद्यते। यः। दर्शपूर्णमासयाजीति दर्शपूर्णमास-याजी। सन्। अमावास्यामित्यमा-वास्याम्। वा। पौर्णमासीमिति पौर्ण-मासीम्। वा। अतिपादयतीत्यति-पादयति। सुवर्गायेति सुवः—गाय। हि। लोकाय। दर्शपूर्णमासाविति दर्श-पूर्णमासौ। इज्येते इति। वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्। निरिति। वपेत्। अमावास्यामित्यमा-वास्याम्। वा। पौर्णमासीमिति पौर्ण-मासीम्। वा। अतिपाद्येत्यति-पाद्य। संवत्सर इति सं-वत्सरः। वै। १५
अग्निः। वैश्वानरः। संवत्सरमिति सं-वत्सरम्। एव। प्रीणाति। अथो इति। संवत्सरमिति सं-वत्सरम्। एव। अस्मै। उपेति। दधाति। सुवर्गस्येति सुवः—गस्य। लोकस्य। समष्ट्या इति सम्-अष्ट्यै (४)। अथो इति। देवताः। एव। अन्वारभ्येत्यनु-आरभ्य। सुवर्गमिति सुवः—गम्। लोकम्। एति। वीरहेति वीर-हा। वै। एषः। देवानाम्। यः। अग्निम्।
उद्वासयत इत्युत्-वासयते। न। वै। एतस्य। ब्राह्मणाः। २०

सहजातत्वात्। जगत्येति। तस्याः पशव्यत्वात्। जातेष्टयाः फलमाह—यस्मिन्निति। पूतत्वादिकं जातस्य पुत्रस्य फलमिति दर्शयति। तेन पूतत्वादिगुणो जाते भवत्विति संकल्पः॥

अव वा एष इत्यादि॥ गतम् (तैसं २·२·२)। अत्र पाथिकृतवैश्वानरयोः [८]समुदाय इत्येके, विकल्प इत्यन्ये। अथो इति। अपि खल्वस्य [५]संवत्सरम् [५]एव [५]अस्मै [५]उप [५]दधाति उपस्थापयति। [९]तत्र अवयविन उपस्थापने का [१०]नामावयवयोः अतिपत्तिरिति। [५]अथो अपि च २५
[५]देवताः [५]एव [११]अवरुध्य स्वर्गं गच्छति, तत्कुतोऽस्य [१२]स्वर्गादवच्छित्तिरिति॥

वीरहेत्यादि॥ "उद्वास्य पुनरादधीत" (तैसं १·५·१) इत्यत्रेदमुच्यते। [५]ऋतायवः ऋतं सत्यं यज्ञं वा आत्मन इच्छन्तः। अस्य [५]अन्नम् [५]न [५]अक्षन् नादन्। "लुङ्सनोर्घस्लृ"

---

७. मै४— जातः। ८. मै४—समुच्चयः। ९. तं१.तं२.मै— 'तत्र' नास्ति। १०. पं२—अवयवो-पस्थितिः; मै४— अवयवोपपत्तिः। ११. तं१.तं२.मै.लं— अन्वारभ्य। १२. तं१.तं२.मै— अपच्छित्तिः। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

ऋतायवः पुराऽन्नमक्षन्नाग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन् यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रोऽग्नियावानेवाग्निस्तस्मा आतिथ्यं करोत्यथो यथा जनं यतेऽवसं करोति तादृगे(५)व तद्द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः संवत्सरः खलु वा अग्नेर्योनिः स्वामेवैनं योनिं गमयत्याद्यमस्यान्नं भवति वैश्वानरं द्वादशकपालं निर्वपेन्मारुतꣳ सप्तकपालं ग्रामकाम आहवनीये वैश्वानरमधि श्रयति

ऋतायव इत्यृत-यवः। पुरा। अन्नम्। अक्षन्। आग्नेयम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। वपेत्। वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्। अग्निम्। उद्वासयिष्यन्नित्युत्-वासयिष्यन्। यत्। अष्टाकपाल इत्यष्टा-कपालः। भवति। अष्टाक्षरेत्यष्टा-अक्षरा। गायत्री। गायत्रः। अग्निः। यावान्। एव। अग्निः। तस्मै। आतिथ्यम्। करोति। अथो इति। यथा। जनम्। यते। अवसम्। करोति। तादृक् (५)। एव। तत्। द्वादशकपाल इति द्वादश-कपालः। वैश्वानरः। भवति। द्वादश। मासाः। संवत्सर इति सं-वत्सरः। संवत्सर इति सं-वत्सरः। खलु। वै। अग्नेः। योनिः। स्वाम्। एव। एनम्। योनिम्। गमयति। आद्यम्। अस्य। अन्नम्। भवति। वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्। निरिति। वपेत्। मारुतम्। सप्तकपालमिति सप्त-कपालम्। ग्रामकाम इति ग्राम-कामः। आहवनीय इत्या-हवनीये। वैश्वानरम्। अधीति। श्रयति।

(पा २·४·३७), "मन्त्रे घसह्वर°" (पा २·४·८०) इति च्लेर्लुक्। भाषानिवृत्त्यर्थत्वान्मन्त्रग्रहणस्य; "घसिभसोर्हलि च" (पा ६·४·१००) इत्युपधालोपः, "शासिवसिघसीनां च" (पा ८·३·६०) इति षत्वम्। अग्निमुद्वासयिष्यन्नित्यादि। उद्वासनारम्भे अष्टाकपालनिर्वपणेन अष्टत्वान्वयात् गायत्रत्वाच्च [v]अग्निः [v]यावान् कश्चिदग्निर्नाम, तस्य सर्वस्य यत्र क्वापि गतस्य [v]आतिथ्यं [v]करोति। तस्मादुद्वासनेन [13-13]अग्नेरुत्कोपो न भवति[13-13]। [v]अथो अपि च [v]यथा [v]जनं जनपदादिकं जनमेव वाऽभीष्टं [v]यते गच्छते [v]अवसं पाथेयादि [v]करोति [15]लोकः, तादृशमेतदुद्वासनारम्भे अष्टाकपालनिर्वपणम्। अथ द्वादशकपालनिर्वपणेन द्वादशत्वान्वयात् द्वादशमासात्मकसंवत्सरयोनेरग्नेः[15] स्वस्यामेव[16] योनौ प्रतिष्ठापनं कृतं भवति। ततश्च न कश्चिदुद्वासने दोष इति॥

आहवनीय इति॥ उपसादनं च वैश्वानरस्यापरेणाहवनीयम्, एवमपरेण गार्हपत्यं [17]मारुतं, सामर्थ्यात् क्षत्रियस्यैवम्। क्षत्रियवृत्तीनामपीच्छन्ति द्रोणादेरिव। पापवस्यसस्येति। वसीयः पापं

१३-१३. पं२- अग्नेः कोपो न भवति; तं१.तं२.मै.लं- अग्नेरुत्क्षेप इति। १४. मै-'लोकः' नास्ति। १५. मै-'अग्नेः' नास्ति। १६. तं१.तं२.मै.लं- स्वायाम्। १७. तं१.तं२.मै.लं- 'मारुतम्' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मै सजाताꣳश्च्यावयति मारुतो भवति(६) मरुतो वै देवानां विशो देवविशेनैवास्मै मनुष्यविशमव रुन्द्धे सप्तकपालो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्द्धेऽनूच्यमान आ सादयति विशमेवास्मा अनुवर्त्मानं करोति ॥ ५ ॥ ५

[प्रजाकामः संवत्सरः पुनात्येवैनं पूतः समष्टयै तादृङ्मारुतो भवत्येकान्नत्रिꣳशच्च ।] ।

गार्हपत्य इति गार्ह-पत्ये। मारुतम्। पापवस्यसस्येति पाप-वस्यसस्य। विधृत्या इति वि-धृत्यै। द्वादशकपाल इति द्वादश-कपालः। वैश्वानरः। भवति। द्वादश। मासाः। संवत्सर इति सं-वत्सरः। संवत्सरेणेति सं-वत्सरेण। एव। अस्मै। सजातानिति स-जातान्। च्यावयति। मारुतः। भवति (६)। मरुतः। वै। देवानाम्। विशः। देवविशेनेति देव-विशेन। एव। अस्मै। मनुष्यविशमिति मनुष्य-विशम्। अवेति। रुन्द्धे। सप्तकपाल इति सप्त-कपालः। भवति। सप्तगणा इति सप्त-गणाः। वै। मरुतः। गणश इति गण-शः। एव। अस्मै। सजातानिति स-जातान्। अवेति। रुन्द्धे। अनूच्यमान इत्यनु-उच्यमाने। एति। सादयति। विशम्। एव। अस्मै। अनुवर्त्मानमित्यनु-वर्त्मानम्। करोति ॥ ५ ॥

[मैसं २.१.२ ; कासं १०-४] १५

पापवस्यसम्। राजदन्तादित्वात् परनिपातः (पा २.२.३१), ईयस ईकारस्य छान्दसो लोपः, " अनसन्तान्नपुंसकाच्छन्दसि " (पा ५.४.१०३) इत्यच् समासान्तः। [v]विधृत्यै विश्लेषाय। [v]च्यावयति प्रह्वीभूतान् करोति। देवविशेनेति। " अच् " (पा ५.४.७५) इति योगविभागादच् समासान्तः। गणश इति। " बहुगण° " (पा १.१.२३) इति संख्यात्वात् " संख्यैकवचनाच्च° " (पा ५.४.४३) इति शस्। अनूच्यमान इति। सामिधेनीसमूहे [v]अनूच्यमाने [१८]मारुतस्यासादन- २० काले प्रत्यञ्चं वैश्वानरम् [v]आ [v]सादयति। अनुवर्त्मानमिति। या वर्त्मन्यागत्यानुवर्मा[वर्त]नं करोति साऽनुवर्त्मा। देवविशां [१९]मरुतां संबन्धिनो मारुतस्यासादने पाश्चात्यतया मनुष्यविशोऽप्यनुवर्त्मानो भवन्तीति ॥

इति द्वितीये द्वितीये पञ्चमोऽनुवाकः ॥

१८–१८. मै४– मारुतमासादयति काले। १९. तं१.तं२.मै.लं– 'मरुतां' नास्ति। २५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदित्यं चरुं निर्वपेत् संग्राममुपप्रयास्यन्नियं वा अदितिरस्यामेव पूर्वे प्रति तिष्ठन्ति वैश्वानरं द्वादशकपालं निर्वपेदायतनं गत्वा संवत्सरो वा अग्निर्वैश्वानरः संवत्सरः खलु वै देवानामायतनमेतस्माद्वा आयतनादेवा असुरानजयन् यद्वैश्वानरं द्वादशकपालं निर्वपति देवानामेवाऽऽयतने यतते जयति तꣳ संग्राममेतस्मिन् वा एतौ मृजाते (१)

५ आदित्यम्। चरुम्। निरिति। वपेत्। संग्राममिति सं-ग्रामम्। उपप्रयास्यन्नित्युप-प्रयास्यन्। इयम्। वै। अदितिः। अस्याम्। एव। पूर्वे। प्रतीति। तिष्ठन्ति। वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्। निरिति। वपेत्। आयतनमित्या-यतनम्। गत्वा। संवत्सर इति सं-वत्सरः। वै। अग्निः। वैश्वानरः। संवत्सर इति सं-वत्सरः। खलु। वै। देवानाम्। आयतनमित्या-यतनम्। एतस्मात्। वै। आयतनादित्या-यतनात्। देवाः। असुरान्। अजयन्। यत्। वैश्वानरम्। १० द्वादशकपालमिति द्वादश-कपालम्। निर्वपतीति निः-वपति। देवानाम्। एव। आयतन इत्या-यतने। यतते। जयति। तम्। संग्राममिति सं-ग्रामम्। एतस्मिन्। वै। एतौ। मृजाते इति (१)।

आदित्यं चरुमित्यादि॥ गतम्। संग्रामजयेन ᵛअस्यां प्रतितिष्ठति॥ आयतनमिति॥ संग्रामायतनं ᵛगत्वा संग्रामजयार्थी तत्र यजेत। यद्वा— आ समन्ताद्यतनम् ᵛआयतनं संनाहगतं[1] प्राप्य ᵛवैश्वानरं ᵛनिर्वपेत्। ᵛदेवानाम् ᵛएव [2]संनाहे यतमानो वर्तमानो ᵛजयति ᵛसंग्रामम्[1]। १५ केचिदाहुः व्यायामस्थानमायतनमिति॥

एतस्मिन् वा इत्यादि॥ ᵛमृजाते पापमात्मीयं शोधयतः। विविधं परस्परं विद्विषन्तौ [3]अभिचारादिघोरानर्थप्रवृत्तौ [4]विद्विषाणौ, [5]तयोरन्यतरस्य ᵛअन्नं ᵛयः ᵛअत्ति तस्मिन्नात्मीयं पापं

निर्वपेच्चरुमादित्यं यः संग्रामं यियासति॥ २९॥
युद्धभूमिं गतस्तत्र कुर्याद्वैश्वानरं हविः।
२० मारणोद्यतयोरन्नं जग्ध्वा वैश्वानरं चरेत्॥ ३०॥
कृत्वा यः शपथं पूर्वं द्रुह्येदेषोऽपि तं चरेत्।
[22]-अविं तूभयतोदन्तं-[22] वा स्वीकृत्य तमाचरेत्॥ ३१॥
तं चरेद्याचितुं गच्छन्नागत्य च पुनश्चरेत्।
षष्ठेऽनुवाक आदित्यचर्वाद्या उपवर्णिताः॥ ३२॥
२५ *वैश्वानरो न इत्यत्र वर्णितोऽर्थोऽनुवाकयोः।

१. मै४- संग्रामः तम्। २-२. मै४-अस्याः सामर्थ्यात् क्षत्रियस्येयं क्षत्रियवृत्तीनामपीच्छन्ति द्रोणादेरिव यतमानो वर्तमानो जयति संग्राममम्; तं१.तं२.मै.लं- संनाहे वर्तते इति संग्रामम्। ३. मै.लं- आभिचारादि°। ४. मै-पुरुषौ। ५. मै-इतरस्य।

२२. अ.उ.ड१.पा- अविं नोभयतोदन्तं; ड-अविं सोभयतोदन्तं; ने-अभिन्नोभयतोदन्तं; शृं- ३० अविं वोभयतोदन्तम्। *(द्र. तैसं १.५.११)।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

यो विद्विषाणयोरन्नमत्ति वैश्वानरं द्वादशकपालं निर्वपेद्विद्विषाणयोरन्नं जग्ध्वा संवत्सरो वा अग्निर्वैश्वानरः संवत्सरस्वदितमेवात्ति नास्मिन् मृजाते संवत्सराय वा एतौ सममाते यौ समभाते तयोर्यः पूर्वोऽभिद्रुह्यति तं वरुणो गृह्णाति वैश्वानरं द्वादशकपालं निर्वपेत् समभानयोः पूर्वोऽभिद्रुह्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरमेवाऽऽप्त्वा

यः। विद्विषाणयोरिति वि-द्विषाणयोः। अन्नम्। अत्ति। वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्। निरिति। वपेत्। विद्विषाणयोरिति वि-द्विषाणयोः। अन्नम्। जग्ध्वा। संवत्सर इति सं-वत्सरः। वै। अग्निः। वैश्वानरः। संवत्सरस्वदितमिति संवत्सर-स्वदितम्। एव। अत्ति। न। अस्मिन्। मृजाते इति। संवत्सरायेति सं-वत्सराय। वै। एतौ। समिति। अमाते इति। यौ। सममाते इति सम्-अमाते। तयोः। यः। पूर्वः। अभिद्रुह्यतीत्यभि-द्रुह्यति। तम्। वरुणः। गृह्णाति। वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्। निरिति। वपेत्। सममानयोरिति सम्-अमानयोः। पूर्वः। अभिद्रुह्येत्यभि-द्रुह्य। संवत्सर इति सं-वत्सरः। वै। अग्निः। वैश्वानरः। संवत्सरमिति सं-वत्सरम्। एव। आप्त्वा।

विद्विषाणौ मृजाते। उभयोः अन्नम्[६] इति केचित्। [७]संवत्सरस्वदितमिति। संवत्सरेण निर्दोषीकृतमन्नम् [८]अत्ति। तस्मात् [८]न [८]अस्मिन् पापं [८]मृजाते। "तृतीया कर्मणि" (पा ६·२·४८) इति पूर्वपदप्रकृतिस्वरत्वम्। मृजेर्व्यत्ययेनाऽऽत्मनेपदम् (पा ३·१·८५)॥

संवत्सराय वा इत्यादि॥ [८]यौ [८]सममाते [९]संभूय एकस्मिन् कार्ये शपथं कुर्वाते, अस्मिन् विषये अन्योन्यमावाभ्यां न द्रोग्धव्यमिति, [८]एतौ खलु [८]संवत्सराय [८]सममाते संवत्सरार्थं संवत्सरमेव साक्षिणं कृत्वा। यद्वा— संवत्सरसमाप्तेः प्रागनभिद्रोहाय सममाते। तस्मात् [८]तयोः मध्ये [८]यः [८]पूर्वः [८]अभिद्रुह्यति, प्रथमं वा[१०] संवत्सरादर्वाक् [११]वा समयं भिनत्ति [८]तं [८]वरुणः [८]गृह्णाति, तस्मात् [८]सममानयोः [८]पूर्वः [८]अभिद्रुह्य [८]वैश्वानरं [८]द्वादशकपालं [८]निर्वपेत् इति। ततो यागबलेन [८]संवत्सरम् [८]एव [८]आप्त्वा आप्तं कृत्वा समाप्य [१२-१२]वा [८]परस्तात् एव [८]अभि [८]द्रुह्यति, अन्येनाभिद्रुग्धे[१२]

---

६. तं१.तं२.मै—अन्यतरम्; लं—अन्यम्। ७. तं१.तं२.मै.लं—°स्वदितमिति केचित्। ८. तं१.तं२.मै.लं—इति। ९. तं१.तं२.मै—'संभूय' नास्ति। १०. तं१.तं२.मै.लं—'वा' नास्ति। ११. तं१.तं२—'वा' नास्ति। १२-१२. मै४—परम् अस्मादेव पूर्वमन्येनाभिद्रुह्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निर्वरुणं (२) परस्तादभि द्रुह्यति नैनं वरुणो गृह्णात्याव्यं वा एष प्रति गृह्णाति योऽविं प्रतिगृह्णाति वैश्वानरं द्वादशकपालं निर्वपेदविं प्रतिगृह्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरस्वदितामेव प्रति गृह्णाति नाऽऽव्यं प्रति गृह्णात्यात्मनो वा एष मात्रामाप्नोति य उभयादत् प्रतिगृह्णात्यश्वं वा पुरुषं वा वैश्वानरं द्वादशकपालं

निर्वरुणमिति निः-वरुणम् (२)। परस्तात्। अभीति। द्रुह्यति। न। एनम्। वरुणः। गृह्णाति। आव्यम्। वै। एषः। प्रतीति। गृह्णाति। यः। अविम्। प्रतिगृह्णातीति प्रति-गृह्णाति। वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्। निरिति। वपेत्। अविम्। प्रतिगृह्येति प्रति-गृह्य। संवत्सर इति सं-वत्सरः। वै। अग्निः। वैश्वानरः। संवत्सरस्वदितामिति संवत्सर-स्वदिताम्। एव। प्रतीति। गृह्णाति। न। आव्यम्। प्रतीति। गृह्णाति। आत्मनः। वै। एषः। मात्राम्। आप्नोति। यः। उभयादत्। प्रतिगृह्णातीति प्रति-गृह्णाति। अश्वम्। वा। पुरुषम्। वा। वैश्वानरम्। द्वादशकपालमिति द्वादश-कपालम्।

पश्वादेव वा संवत्सरस्याभिद्रोहः कृतो भवति। [v]निर्वरुणं वरुणग्रहणरहितं, तदेवाह— [v]न [v]एनं [v]वरुणः गृह्णाति इति। अमतिरत्र सत्यापने वर्तते। यथा— "सोऽब्रवीदृतममीष्व" (तैसं २·३·५) इति। अम गत्यादिषु। "बहुलं छन्दसि" (पा २·४·७३) इति शपो लुक्॥

आव्यमिति॥ अवत्यस्मादिति [v]आव्यं पापं रोगविशेषो वा। अवतेः "ऋहलोर्ण्यत्" (पा ३·१·१२४)। [13]श्लेष्मरोगं केचिदाहुः॥ तदेव खल्वयं [v]प्रति [v]गृह्णाति [v]यः [v]अविं [v]प्रति-गृह्णाति। संवत्सरस्वदितामिति। संवत्सरेण निर्दोषीकृताम् [v]एव अविम् [v]प्रति [v]गृह्णाति। ततः [v]न [v]आव्यं [v]प्रति [v]गृह्णाति इति।

आत्मन इत्यादि॥ अश्वादिकम् [v]उभयादत् उभयोर्भागयोर्दन्तवत् [14]प्रतिगृह्णन् [v]आत्मनः [v]एषः [v]मात्रां प्रतिगृह्णाति। मीयतेऽनयेति मात्रा [15]प्रकृतिः। तस्याः हि प्रतिग्रहे प्रतिग्राह्यत्वे क्षिप्तः

१३. तं१.तं२.लं–शेफरोगं।
१४. मै४–प्रतिगृह्णाति।
१५. तं१.तं२.मै.लं– 'प्रकृतिः' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निर्वपेदुभयादत् (३) प्रतिगृह्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरस्वदितमेव प्रति गृह्णाति नाऽऽत्मनो मात्रामाप्नोति वैश्वानरं द्वादशकपालं निर्वपेत् सनिमेष्यन्त्संवत्सरो वा अग्निर्वैश्वानरो यदा खलु वै संवत्सरं जनतायां चरत्यथ स धनार्घो भवति यद्वैश्वानरं द्वादशकपालं निर्वपति संवत्सरसातामेव सनिमभि प्र च्यवते दानकामा अस्मै प्रजा भवन्ति ५

निरिति । वपेत् । उभयादत् (३) । प्रतिगृह्येति प्रति-गृह्य । संवत्सर इति सं-वत्सरः । वै । अग्निः । वैश्वानरः । संवत्सरस्वदितमिति संवत्सर-स्वदितम् । एव । प्रतीति । गृह्णाति । न । आत्मनः । मात्राम् । आप्नोति । वैश्वानरम् । द्वादशकपालमिति द्वादश-कपालम् । निरिति । वपेत् । सनिम् । एष्यन् । संवत्सर इति सं-वत्सरः । वै । अग्निः । वैश्वानरः । यदा । खलु । वै । संवत्सरमिति सं-वत्सरम् । जनतायाम् । चरति । अथ । सः । धनार्घ इति धन-अर्घः । भवति । यत् । वैश्वानरम् । द्वादशकपालमिति द्वादश-कपालम् । निर्वपतीति निः–वपति । संवत्सरसातामिति संवत्सर-साताम् । एव । सनिम् । अभि । प्रेति । च्यवते । दानकामा इति दान-कामाः । अस्मै । प्रजा इति प्र-जाः । भवन्ति ।

स्यादात्मा । यद्वा– आत्मनो मात्राऽल्पता आयुःसमाप्तिः, तां प्रतिगृह्णाति म्रियते इत्यर्थः । यद्वा– आत्मनो मात्रामेकदेशं प्रतिगृह्णाति एकदेशस्य प्रतिग्राह्यत्वेन क्षेपः । " छन्दसि च " (पा ५·४·१४२) इति दन्तस्य दतृभावः, वस्तुत्वेन विवक्षितत्वान्नपुंसकत्वम् । " अन्येषामपि दृश्यते " (पा ६·३·१३७) इति दीर्घत्वम् ॥

सनिमेष्यन्निति ॥ याच्ञालब्धं धनं सनिः, तदर्थम् [v]एष्यन् [v]वैश्वानरं [v]निर्वपेत् इति । यदेत्यादि । [v]संवत्सरं [v]जनतायां जनसमूहे दातृपार्श्वे चरन् [v]धनार्घः [v]भवति धनेन पूजितो महाधनो भवति । अर्घ पूजायाम्, कर्मणि घञ्, थाथादिनोत्तरपदान्तोदात्तत्वम् (पा ६·२·१४४)। [v]संवत्सरसातां संवत्सरेण [१६]दत्तां [v]सनिम् [v]अभि [v]प्र [v]च्यवते प्रगच्छति प्राप्तं चेष्टते । ततश्च सर्वाः [v]प्रजाः [v]अस्मै [v]दानकामाः [v]भवन्ति ॥

१६. लं– वदताम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्याः इष्टयः

यो वै संवत्सरं (४) प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवत्येतमेव वैश्वानरं पुनरागत्य निर्वपेद्यमेव प्रयुङ्क्ते तं भागधेयेन वि मुञ्चति प्रतिष्ठित्यै यया रज्ज्वोत्तमां गामाऽजेत् तां भ्रातृव्याय प्र हिणुयान्निर्ऋतिमेवास्मै प्र हिणोति ॥ ६ ॥

[मृजाते निर्वरुणं वपेदुभयाद्यो वै संवत्सरꣳ षट्त्रिꣳशच्च ।]

यः । वै । संवत्सरमिति सं-वत्सरम् (४) । प्रयुज्येति प्र-युज्य । न । विमुञ्चतीति वि-मुञ्चति । अप्रतिष्ठान इत्यप्रति-स्थानः । वै । सः । भवति । एतम् । एव । वैश्वानरम् । पुनः । आगत्येत्या-गत्य । निरिति । वपेत् । यम् । एव । प्रयुङ्क्त इति प्र-युङ्क्ते । तम् । भागधेयेनेति भाग-धेयेन । वीति । मुञ्चति । प्रतिष्ठित्या इति प्रति-स्थित्यै । यया । रज्ज्वा । उत्तमामित्युत्-तमाम् । गाम् । आऽजेदित्या-अजेत् । ताम् । भ्रातृव्याय । प्रेति । हिणुयात् । निर्ऋतिमिति निः—ऋतिम् । एव । अस्मै । प्रेति । हिणोति ॥ ६ ॥

[मैसं २.१.२ , कासं १०.३]

यो वा इत्यादि ॥ सन्यर्थं संवत्सरयागेन [V]प्रयुज्य [V]न [V]विमुञ्चति [१७-]न विमुञ्चेत् [V]सः[-१७] [V]अप्रतिष्ठानः [V]भवति प्रतिष्ठानशक्तिरहितः स्यात् । [१८]तस्मात् सनिं लब्ध्वा [V]आगत्य [V]एतं[१९] [V]वैश्वानरं [V]पुनः [V]निर्वपेत् । अत्र कपालोपदेशाभावात् न कर्मभेदः, अधिकारभेद [२०]एवायम् । संवत्सरं [V]प्रयुङ्क्ते [V]तं [V]भागधेयेन [V]वि [V]मुञ्चति, तच्चास्य [V]प्रतिष्ठित्यै भवति । तत्रागमनकाले यया [V]रज्ज्वा [V]उत्तमां [V]गां [२१-]सर्वासां काल्यमानानां[-२१] गवां पृष्ठतो गच्छन्तीं [२२]सनिलब्धाम् [V]आऽजेत् गमयेत्, [V]तां [V]भ्रातृव्याय [V]प्र [V]हिणुयात् [२३-]भ्रातृव्यस्य मध्ये गोष्ठे[-२३] [२४]न्यस्येत् भ्रातृव्यगवीं वाऽभिदध्यात्, [V]निर्ऋतिम् [२५]अलक्ष्मीम् [V]एव भ्रातृव्याय [V]प्र [V]हिणोति प्रेरयति ॥

इति द्वितीये द्वितीये षष्ठोऽनुवाकः ॥

१७–१७. तं१.तं२.मै.लं–'न विमुञ्चेत् सः' नास्ति । १८. तं१.तं२.मै.लं– 'तस्मात्' नास्ति । १९. तं१.तं२.मै.लं–एनम् । २०. मै४–सोऽयम् । २१–२१. मै४–सर्वा काम्यमानां गां वा । २२. तं१.तं२.मै४– सनिं लब्धां । २३–२३. तं१.तं२.मै.लं– भ्रातृव्यमध्यमगोष्ठे; मै४– भ्रातृव्यस्य मध्ये गोष्ठे । २४. तं१.तं२.मै.लं– न्यस्यति । २५. तं१.तं२.मै–लक्ष्मीमेव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

ऐन्द्रं चरुं निर्वपेत् पशुकाम ऐन्द्रा वै पशव इन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भवति चरुर्भवति स्वादेवास्मै योनेः पशून् प्र जनयतीन्द्रायेन्द्रियावते पुरोडाशमेकादशकपालं निर्वपेत् पशुकाम इन्द्रियं वै पशव इन्द्रमेवेन्द्रियावन्तꣳ स्वेन भागधेयेनोप धावति स (१) एवास्मा इन्द्रियं पशून् प्र यच्छति पशुमानेव भवतीन्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेद्ब्रह्मवर्चसकामो ५

ऐन्द्रम्। चरुम्। निरिति। वपेत्। पशुकाम इति पशुकामः। ऐन्द्राः। वै। पशवः। इन्द्रम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। पशून्। प्रेति। यच्छति। पशुमानिति पशु-मान्। एव। भवति। चरुः। भवति। स्वात्। एव। अस्मै। योनेः। पशून्। प्रेति। जनयति। इन्द्राय। इन्द्रियावत इतीन्द्रिय-वते। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। पशुकाम इति पशु-कामः। इन्द्रियम्। वै। १० पशवः। इन्द्रम्। एव। इन्द्रियावन्तमितीन्द्रिय-वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः (१)। एव। अस्मै। इन्द्रियम्। पशून्। प्रेति। यच्छति। पशुमानिति पशु-मान्। एव। भवति। इन्द्राय। घर्मवत इति घर्म-वते। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। ब्रह्मवर्चसकाम इति ब्रह्मवर्चस-कामः।

ऐन्द्रं चरुमित्यादि॥ गतम्। पशुमानिति। "ह्रस्वनुड्भ्यां मतुप्" (पा ६·१·१७६) १५ इति मतुप उदात्तत्वम्। स्वादेवेति। [1]स्वस्मात् [V]एव कारणादिन्द्रात् [V]पशून् [V]प्र [V]जनयति॥

इन्द्रियावत इति॥ "मन्त्रे सोमाश्व°" (पा ६·३·१३१) इति दीर्घत्वम्॥

पश्वर्थी निर्वपेदैन्द्रं चरुं यद्वेन्द्रियावते॥ ३३॥
पुरोडाशं ब्रह्मतेजो वाञ्छन् घर्मवते चरेत्।
अन्नार्थ्यैकवते कुर्याद्भूत्यर्थी तु हविस्त्रयम्॥ ३४॥ २०
घर्मेन्द्रियार्थैर्युक्तेभ्य इन्द्रेभ्यस्तद्यथाक्रमम्।
अंहोमुचे पापघाती वैमृधायान्यपीडितः॥ ३५॥
बद्धो वा परियत्तो वा त्रात्र इन्द्राय निर्वपेत्।
अर्काश्वमेधयुक्ताय [2]महायज्ञेच्छुराचरेत्॥ ३६॥
ऐन्द्रचर्वादयः प्रोक्ता अनुवाकेऽत्र सप्तमे। २५
* इन्द्रं व इत्यत्र सर्वस्तदर्थ उपवर्णितः॥ ३७॥

१. मै.लं– यस्मात्।

२३. ड.ड१–°यज्ञेष्वुराचरेत्। * (द्र. तैसं १·६·१२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

ब्रह्मवर्चसं वै घर्म इन्द्रमेव घर्मवन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवतीन्द्रायार्कवते पुरोडाशमेकादशकपालं निर्वपेदन्नकामोऽर्को वै देवानामन्नमिन्द्रमेवार्कवन्तꣳ स्वेन भागधेयेनो(२)प धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद एव भवतीन्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेदि-
५ न्द्रायेन्द्रियावत इन्द्रायार्कवते भूतिकामो यदिन्द्राय घर्मवते निर्वपति शिरं एवास्य तेन करोति यदिन्द्रायेन्द्रियावत आत्मानमेवास्य तेन करोति यदिन्द्रायार्कवते भूत एवान्नाद्ये प्रति तिष्ठति

ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। वै। घर्मः। इन्द्रम्। एव। घर्मवन्तमिति घर्म-वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मिन्। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्।
१० दधाति। ब्रह्मवर्चसीति ब्रह्म-वर्चसी। एव। भवति। इन्द्राय। अर्कवत इत्यर्क-वते। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। अन्नकाम इत्यन्न-कामः। अर्कः। वै। देवानाम्। अन्नम्। इन्द्रम्। एव। अर्कवन्तमित्यर्क-वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। (२)। उपेति। धावति। सः। एव। अस्मै। अन्नम्। प्रेति। यच्छति। अन्नाद इत्यन्न-अदः। एव। भवति। इन्द्राय। घर्मवत इति घर्म-वते। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्।
१५ निरिति। वपेत्। इन्द्राय। इन्द्रियावत इतीन्द्रिय-वते। इन्द्राय। अर्कवत इत्यर्क-वते। भूतिकाम इति भूति-कामः। यत्। इन्द्राय। घर्मवत इति घर्म-वते। निर्वपतीति निः-वपति। शिरः। एव। अस्य। तेन। करोति। यत्। इन्द्राय। इन्द्रियावत इतीन्द्रिय-वते। आत्मानम्। एव। अस्य। तेन। करोति। यत्। इन्द्राय। अर्कवत इत्यर्क-वते। भूतः। एव। अन्नाद्य इत्यन्न-अद्ये। प्रतीति। तिष्ठति।

२० [v]घर्मः प्रतापः। [v]अर्कः [v]अन्नम्। अर्चनीयत्वात्। अर्चतेः कर्मणि घञ्, कुत्वम्। अर्क स्तुतौ [1]इत्यस्मात् [वा]।

[3]त्रिहविष्का भूतिकामेष्टिः[3]। शिर इति। शिरःस्थानीयत्वात् घर्मस्य, "घर्मः शिरः (तैब्रा १.१.७) इति च दर्शनात्। उच्छ्रितशिरस्को भवतीत्यर्थः। आत्मानमिति। आत्मवत्तां बलवत्ताम् [v]अस्य [v]करोति। भूत इति। भूतिं गत्वा [v]अन्नाद्ये प्रतिष्ठितो भवति। भवत्येवेति।
२५ भूष्णुतां [4]प्रतापातिशयं [5]प्राप्नोति ॥

२. मै४–इत्यर्थः। ३–३. तं१.तं२ – त्रिहविष्कामेष्टिः। ४. पं२.मै४ – संपदतिशयम्। ५. मै–प्राप्नोतु।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२.२.७)
काम्या इष्टयः]

भवत्येवेन्द्राया(३)ऽहोमुचे पुरोडाशमेकादशकपालं निर्वपेद्यः पाप्मना गृहीतः स्यात् पाप्मा वा अऽहः इन्द्रमेवाऽहोमुचꣳ स्वेन भागधेयेनोप धावति स एवैनं पाप्मनोऽहसो मुञ्चतीन्द्राय वैमृधाय पुरोडाशमेकादशकपालं निर्वपेद्यं मृधोऽभि प्रवेपेरन् राष्ट्राणि वाऽभि समीयुरिन्द्रमेव वैमृधꣳ स्वेन भागधेयेनोप धावति स एवास्मान्मृधो(४)ऽप हन्तीन्द्राय त्रात्रे ५

भवति । एव । इन्द्राय (३) । अऽहोमुच इत्यऽहः – मुचे । पुरोडाशम् । एकादशकपालमित्येकादश-कपालम् । निरिति । वपेत् । यः । पाप्मना । गृहीतः । स्यात् । पाप्मा । वै । अऽहः । इन्द्रम् । एव । अऽहोमुचमित्यऽहः – मुचम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । एनम् । पाप्मनः । अऽहसः । मुञ्चति । इन्द्राय । वैमृधाय । पुरोडाशम् । एकादशकपालमित्येकादश-कपालम् । निरिति । वपेत् । यम् । मृधः । १० अभीति । प्रवेपेरन्निति प्र-वेपेरन् । राष्ट्राणि । वा । अभीति । समीयुरिति सम्-ईयुः । इन्द्रम् । एव । वैमृधम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मात् । मृधः (४) । अपेति । हन्ति । इन्द्राय । त्रात्रे ।

अऽहोमुचे [६]इति ॥ अंहसां पापानां मोचयित्रे ॥

वैमृधायेति ॥ [७]विमृधां संग्रामाणां [८]जेतृत्वेन संबन्धी वैमृधः । यमिति । [९]यं संग्रामाभिमुख्येन १५ प्रकर्षेण वेपेरन् परान् कम्पयेयुः । [९]राष्ट्राणि नानादेशवासिनः [९]वा जनाः यम् [९]अभि [९]समीयुः आभिमुख्येन संहत्योपद्रवन्ति, यं योद्धारो भूत्वा शत्रवः [९]अभि [९]प्रवेपेरन् यं [९]वा बद्ध्वा नेतुं सर्वजनपदवासिनोऽभिसमीयुः [१०]परिगच्छेयुः ॥

---

६. तं१.तं२.मै.लं– 'इति' नास्ति।
७. तं१.तं२.मै.लं– विविधानाम्। २०
८. तं१.तं२. मै– जनयितृत्वेन।
९. मै.लं–'वा' नास्ति।
१०. मै४– परिभवेयुः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

पुरोडाशमेकादशकपालं निर्वपेद्बद्धो वा परियत्तो वेन्द्रमेव त्रातारꣳ स्वेन भागधेयेनोप धावति स एवैनं त्रायत इन्द्रायार्काश्वमेधवते पुरोडाशमेकादशकपालं निर्वपेद्यं महायज्ञो नोपनमेदेते वै महायज्ञस्यान्त्ये तनू यदर्काश्वमेधाविन्द्रमेवार्काश्व-मेधवन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मा (५) अन्ततो महायज्ञं च्यावयत्युपैनं महायज्ञो नमति ॥ ७ ॥

[इन्द्रियावन्तꣳ स्वेन भागधेयेनोप धावति सोऽर्कवन्तꣳ स्वेन भागधेयेनैवेन्द्रायास्मान्मृधोऽस्मै सप्त च ।]

पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। बद्धः। वा। परियत्त इति परि-यत्तः। वा। इन्द्रम्। एव। त्रातारम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। त्रायते। इन्द्राय। अर्काश्वमेधवत इत्यर्काश्वमेध-वते। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। यम्। महायज्ञ इति महा-यज्ञः। न। उपनमेदित्युप-नमेत्। एते इति। वै। महायज्ञस्येति महा-यज्ञस्य। अन्त्ये इति। तनू इति। यत्। अर्काश्वमेधावित्यर्क-अश्वमेधौ। इन्द्रम्। एव। अर्काश्वमेधवन्तमित्यर्काश्वमेध-वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै (५)। अन्ततः। महायज्ञमिति महा-यज्ञम्। च्यावयति। उपेति। एनम्। महायज्ञ इति महा-यज्ञः। नमति ॥ ७ ॥

[मैसं २.२.९-१० कासं १०.८, ९]

---

[v]बद्धः निगडितः, [v]परियत्तः परितो निरुद्धः ॥

[v]अर्काश्वमेधौ महाक्रतू, तद्वते ताभ्यामाराधनीयाय। महायज्ञः सोमयागः। उक्तं चाचार्येण—" ते देवा एतं महायज्ञमपश्यन् " (तैसं ३.२.२) इत्यत्र। अन्त्ये तनू इति। उत्तमे विकृती। अन्तत इति। "अस्य समीपे [v]महायज्ञम् आगमयति। स च [v]महायज्ञः [v]एनम् [v]उप [v]नमति ॥

इति द्वितीये द्वितीये सप्तमोऽनुवाकः ॥

---

११. तं१,तं२,मै,लं– तस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

इन्द्रायान्वृजवे पुरोडाशमेकादशकपालं निर्वपेद्ग्रामकाम इन्द्रमेवान्वृजुꣳ स्वेन भागधेयेनोप धावति स एवास्मै सजाताननुकान् करोति ग्राम्येव भवतीन्द्राण्यै चरुं निर्वपेद्यस्य सेनाऽसꣳशितेव स्यादिन्द्राणी वै सेनायै देवतेन्द्राणीमेव स्वेन भागधेयेनोप धावति सैवास्य सेनाꣳ सꣳ श्यति बल्बजानपी(१)ध्मे सं नह्येद्गौर्यत्राधिष्कन्ना न्यमेहत्

इन्द्राय । अन्वृजव इत्यनु-ऋजवे । । पुरोडाशम् । एकादशकपालमित्येकादश-कपालम् । निरिति । वपेत् । ग्रामकाम इति ग्राम-कामः । इन्द्रम् । एव । अन्वृजुमित्यनु-ऋजुम् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मै । सजातानिति स-जातान् । अनुकानित्यनु-कान् । करोति । ग्रामी । एव । भवति । इन्द्राण्यै । चरुम् । निरिति । वपेत् । यस्य । सेना । असꣳशितेत्यसं-शिता । इव । स्यात् । इन्द्राणी । वै । सेनायै । देवता । इन्द्राणीम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सा । एव । अस्य । सेनाम् । समिति । श्यति । बल्बजान् । अपीति (१) । इध्मे । समिति । नह्येत् । गौः । यत्र । अधिष्कन्नेत्यधि-स्कन्ना । न्यमेहदिति नि-अमेहत् ।

इन्द्रायान्वृजव इत्यादि ॥ अनुक्रमेणार्जयति प्रापयति विधेयीकरोति[1] इत्यन्वृजुः । ऋजु गतौ, औणादिक उप्रत्ययः (उ २७), व्यत्ययेनाव्ययपूर्वपदप्रकृतिस्वरत्वम् (पा ६·२·२)। यद्वा अनुगता ऋजवो यस्मिन्नित्यन्वृजुः । सर्वेऽप्यस्मिन् ऋजवो भवन्तीति । [v]ग्रामकामः ग्रामं वशीकर्तुकामः । अनुकानिति । इममेव कामयमानान् [v]करोति । " अनुकाभिकाभीकः कमिता " (पा ५·२·७४) इति निपात्यते ॥

इन्द्राणी इन्द्रपत्नी । " इन्द्रवरुण° " (पा ४·१·४९) इति ङीष्, आनुगागमश्च, " उदात्तयणः° " (पा ६·१·१७४) इति विभक्तेरुदात्तत्वम् । [v]असꣳशिता अधृता [v]स्वमार्गेऽनवस्थिता,

ग्रामार्थ्यन्वृजवे कुर्यादिन्द्राण्यै सैन्यकामुकः । २०
युद्धार्थी [24]नष्टधैर्यो वा कुर्यान्मन्युमते हविः ॥ ३८ ॥
दात्रेऽन्यदीयदानार्थी प्रदात्रे तूत्तमर्णकः ।
[25]राज्यभ्रष्टो [26]भ्रश्यमानो वा सुत्राम्णे चरेद्धविः ॥ ३९ ॥
संपद्योग्यस्त्वन्यसाम्ये [27]सत्यैन्द्रं संपदे चरेत् ।
अष्टमे त्वनुवाकेऽस्मिन्नन्वृजुप्रमुखाः[28] श्रुताः ॥ ४० ॥ २५
तदर्थोऽन्वह मासा* इत्यत्र सम्यङ्निरूपितः ।

१. मै४– °करोतीत्यर्थः । २. मै४– स्वकार्ये ।

२४. इ–हतचित्तः । २५. ड.ड१.ने.शृं.हो१– राज्याद्भ्रष्टः । २६. ड१– ग्रस्यमानः । २७. अ.आ.उ.जो.पा.हा.– सत्यैन्द्रे । २८. ड.ड१.ने.हो१– °जुसंमुखाः । *(द्र. तैसं १.७.१३)।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ततो बल्बजा उदतिष्ठन् गवामेवैनं न्यायमपिनीय गा वेदयतीन्द्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निर्वपेत् संग्रामे संयत्त इन्द्रियेण वै मन्युना मनसा संग्रामं जयतीन्द्रमेव मन्युमन्तं मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो दधाति जयति तꣳ (२) संग्राममेतामेव निर्वपेद्यो हतमनाः स्वयंपाप इव स्यादेतानि हि वा एतस्मादपक्रान्तान्यथैष हतमनाः स्वयंपाप इन्द्रमेव मन्युमन्तं मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो दधाति

ततः। बल्बजाः। उदिति। अतिष्ठन्। गवाम्। एव। एनम्। न्यायमिति नि-आयम्। अपिनीयेत्यपि-नीय। गाः। वेदयति। इन्द्राय। मन्युमत इति मन्यु-मते। मनस्वते। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। संग्राम इति सं-ग्रामे। संयत्त इति सं-यत्ते। इन्द्रियेण। वै। मन्युना। मनसा। संग्राममिति सं-ग्रामम्। जयति। इन्द्रम्। एव। मन्युमन्तमिति मन्यु-मन्तम्। मनस्वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मिन्। इन्द्रियम्। मन्युम्। मनः। दधाति। जयति। तम् (२)। संग्राममिति सं-ग्रामम्। एताम्। एव। निरिति। वपेत्। यः। हतमना इति हत-मनाः। स्वयंपाप इति स्वयं-पापः। इव। स्यात्। एतानि। हि। वै। एतस्मात्। अपक्रान्तानीत्यप-क्रान्तानि। अथ। एषः। हतमना इति हत-मनाः। स्वयंपाप इति स्वयं-पापः। इन्द्रम्। एव। मन्युमन्तमिति मन्यु-मन्तम्। मनस्वन्तम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मिन्। इन्द्रियम्। मन्युम्। मनः। दधाति।

अतीक्ष्णा वा अनुज्ज्वला वा। [v]बल्बजान् दीर्घतृणानि, यैः कटः क्रियते, तान् [v]अपि [v]इध्मे संनहय सह बद्ध्वा सहैवेध्मेन अभ्यादधाति सह वा प्रोक्षेत्। अधिष्कन्नोति। अधिकं स्कन्नम् अधिक-पुरीषस्रावि[v]णी [v]यत्र [v]न्यमेहत् नितरां मेहति तत्र जायन्ते [v]बल्बजाः। गवामित्यादि। [v]गवाम् अग्रे एषां प्रवेशेन [v]गाः [v]वेदयति लम्भयति सेनास्वामिनम्॥

इन्द्राय मन्युमते इति॥ मनस्वान् उद्धतमनस्कः। इन्द्रियादित्रयेण संग्रामजयः॥

एतामित्यादि॥ गतम्। [v]हतमनाः प्रतिबद्धप्रभानः[३] [v]स्वयंपापः असत्यविचारेण स्वरूपेण पापः। एतानीति। इन्द्रियमन्युमनांसि अस्मात् [v]अपक्रान्तानि। [v]अथ अनन्तरम् [v]एषः [v]हतमनाः [v]स्वयंपापः च भवति॥

---

३. मै४– °प्रतिभानः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

न हतमनाः स्वयंपापो भवतीन्द्राय दात्रे पुरोडाशमेकादशकपालं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्यु(३)रितीन्द्रमेव दातारꣳ स्वेन भागधेयेनोप धावति स एवास्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवन्तीन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं निर्वपेद्यस्मै प्रत्तमिव सन्न प्रदीयेतेन्द्रमेव प्रदातारꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्र दापयतीन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपेदपरुद्धो वा(४)ऽपरुध्यमानो वेन्द्रमेव सुत्रामाणꣳ स्वेन भागधेयेनोप धावति स एवैनं त्रायतेऽनपरुध्यो भवतीन्द्रो वै सदृङ्देवताभिरासीत् स न व्यावृतमगच्छत् स

न। हतमनेति हत-मनाः। स्वयंपाप इति स्वयं-पापः। भवति। इन्द्राय। दात्रे। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। यः। कामयेत। दानकामा इति दान-कामाः। मे। प्रजा इति प्र-जाः। स्युः (३)। इति। इन्द्रम्। एव। दातारम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। दानकामा इति दान-कामाः। प्रजा इति प्र-जाः। करोति। दानकामा इति दान-कामाः। अस्मै। प्रजा इति प्र-जाः। भवन्ति। इन्द्राय। प्रदात्र इति प्र-दात्रे। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। यस्मै। प्रत्तम्। इव। सत्। न। प्रदीयेतेति प्र-दीयेत। इन्द्रम्। एव। प्रदातारमिति प्र-दातारम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। प्रेति। दापयति। इन्द्राय। सुत्राम्ण इति सु-त्राम्णे। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। अपरुद्ध इत्यप-रुद्धः। वा (४)। अपरुध्यमान इत्यप-रुध्यमानः। वा। इन्द्रम्। एव। सुत्रामाणमिति सु-त्रामाणम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। त्रायते। अनपरुध्य इत्यनप-रुध्यः। भवति। इन्द्रः। वै। सदृङ्डिति स-दृङ्। देवताभिः। आसीत्। सः। न। व्यावृतमिति वि-आवृतम्। अगच्छत्। सः।

इन्द्राय दात्र इत्यादि। गतम्॥

इन्द्राय प्रदात्र इत्यादि। प्रकर्षेण दाता प्रदाता। vप्रत्तम् एव vसत् vन vप्रदीयेत तस्य vदात्राऽप्रत्तमदत्तं vप्र vदापयति॥

सुत्रामा सुष्ठु त्राता। "आतो मनिन्°" (पा ३·२·७४) इति मनिन्प्रत्ययः vअपरुद्धः, अपरोधनमैश्वर्यभङ्गः vराज्यभ्रंशो वा॥

vसदृङ् सदृशः। "समानान्ययोश्च" (पा ३·२·६० वा १) इति क्विन्प्रत्ययः। अस्मै यजमानाय इदं मया दत्तामिति के(न)चित् व्यावृत् व्यावृत्तिः। संपदादिलक्षणः क्विप् (पा ३·३·१०८ वा ९)। vशक्वरी शक्वर्यौ vयाज्यानुवाक्ये द्वे अपि vअकरोत्।

४. तं१.तं२.मै४– दाता°। ५. मै.लं– राष्ट्र°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिमुपाधावत् तस्मा एतमैन्द्रमेकादशकपालं निरवपत् तेनैवास्मिन्निन्द्रियमदधाच्छक्करी याज्यानुवाक्ये अकरोद्वज्रो वै शक्करी स एनं वज्रो भूत्या ऐन्द्ध (५) सोऽभवत् सोऽबिभद्भूतः प्र मा धक्ष्यतीति स प्रजापतिं पुनरुपाधावत् स प्रजापतिः शक्कर्या अधि रेवतीं निरमिमीत शान्त्या अप्रदाहाय योऽलꣳ श्रियै सन्त्सदृङ्समानैः स्यात् तस्मा एतमैन्द्रमेकादशकपालं निर्वपेदिन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं दधाति रेवती पुरोनुवाक्या भवति (६) शान्त्या अप्रदाहाय शक्करी याज्या वज्रो वै शक्करी स एनं वज्रो भूत्या इन्द्धे भवत्येव ॥ ८ ॥ [अपि तꣳ स्युर्वैन्द्र भवति चतुर्दश च]

प्रजापतिमिति प्रजा-पतिम् । उपेति । अधावत् । तस्मै । एतम् । ऐन्द्रम् । एकादशकपालमित्येकादश-कपालम् । निरिति । अवपत् । तेन । एव । अस्मिन् । इन्द्रियम् । अदधात् । शक्करी इति । याज्यानुवाक्ये इति याज्या-अनुवाक्ये । अकरोत् । वज्रः । वै । शक्करी । सः । एनम् । वज्रः । भूत्यै । ऐन्द्ध (५) । सः । अभवत् । सः । अबिभेत् । भूतः । प्रेति । मा । धक्ष्यति । इति । सः । प्रजापतिमिति प्रजा-पतिम् । पुनः । उपेति । अधावत् । सः । प्रजापतिरिति प्रजा-पतिः । शक्कर्याः । अधीति । रेवतीम् । निरिति । अमिमीत । शान्त्यै । अप्रदाहायेत्यप्र-दाहाय । यः । अलम् । श्रियै । सन् । सदृङ्डिति स-दृङ् । समानैः । स्यात् । तस्मै । एतम् । ऐन्द्रम् । एकादशकपालमित्येकादश-कपालम् । निरिति । वपेत् । इन्द्रम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मिन् । इन्द्रियम् । दधाति । रेवती । पुरोनुवाक्येति पुरः-अनुवाक्या । भवति (६) । शान्त्यै । अप्रदाहायेत्यप्र-दाहाय । शक्करी । याज्या । वज्रः । वै । शक्करी । सः । एनम् । वज्रः । भूत्यै । इन्द्धे । भवति । एव ॥८॥

[मैसं २.२.१०-१२ कासं १०.८-१०]

सप्तपदा शक्करी। सा शक्त्यतिशयाद्वज्रतुल्या। [V]सः च शक्कर्यात्मा [६V]वज्रः [V]एनं भूत्यर्थम् [V]ऐन्द्ध [७]दीप्तमकरोत्। [V]सः च [V]अभवत् भूतिमगमयत्। अथ [V]सः इन्द्रः [V]अबिभेत् [V]भूतः भूतिं गतोऽपि पुनरबिभेत् अयं [८]शाक्वरो वज्रः [V]प्र [V]धक्ष्यति माम् [V]इति। स इत्यादि। गतम्। शक्कर्या [V]अधि शक्कर्यामधि शक्करीस्थाने पुरोनुवाक्यां [V]रेवतीं [V]निः [V]अमिमीत प्रकृष्टवान्। यद्वा—शक्कर्या अधि रेवतीं निरमिमीत पृथक्त्वेन निर्मितवान् शिष्टं पादत्रयं त्यक्तवान्। तादृशी शक्कर्यस्तीतीदमेव प्रमाणम्। सा च रेवती [V]शान्त्यै [V]अप्रदाहाय अभवत्। तत्र "रेवतीर्नः सधमादः" (तैसं १.७.१३) इति पुरोनुवाक्या रेवतीशब्दयोगात् रेवती। अत एव धनसंबन्धात् शान्त्या अप्रदाहाय च भवति। योऽलमिति। अधिकां श्रियं प्राप्तुं योग्योऽपि [V]यः [९V]समानैः तुल्यश्रीक एव भवति। "प्रो ष्वस्मै" (तैसं १.७.१३) इति सप्तपदा [V]शक्करी [V]याज्या। गतमन्यत्॥

इति द्वितीये द्वितीये अष्टमोऽनुवाकः ॥

६. मै४– यज्ञः। ७. तं१.तं२.मै.लं– दीप्तिम°। ८. मै– शक्वरः। ९. मै४–सहितैः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्त्सारस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदाग्नावैष्णव एकादशकपालो भवत्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन चाभि चरति सारस्वत्याज्यभागा भवति वाग्वै सारस्वती वाचैवैनमभि चरति बार्हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवैनमभि चरति (१) प्रति वै परस्तादभिचरन्तमभि चरन्ति द्वेद्वे पुरोऽनुवाक्ये कुर्यादिति प्रयुक्त्या ५

आग्नावैष्णवमित्याग्ना-वैष्णवम्। एकादशकपालमित्येकादश-कपालम्। निरितिं। वपेत्। अभिचरन्नित्यभि-चरन्। सारस्वती। आज्यभागेत्याज्य-भागा। स्यात्। बार्हस्पत्यः। चरुः। यत्। आग्नावैष्णव इत्याग्ना-वैष्णवः। एकादशकपाल इत्येकादश-कपालः। भवति। अग्निः। सर्वाः। देवताः। विष्णुः। यज्ञः। देवताभिः। च। एव। एनम्। यज्ञेन। च। अभीति। चरति। सारस्वती। आज्यभागेत्याज्य-भागा। भवति। वाक्। वै। सारस्वती। वाचा। एव। एनम्। अभीति। चरति। १० बार्हस्पत्यः। चरुः। भवति। ब्रह्म। वै। देवानाम्। बृहस्पतिः। ब्रह्मणा। एव। एनम्। अभीति। चरति (१)। प्रतीति। वै। परस्तात्। अभिचरन्तमित्यभि-चरन्तम्। अभीति। चरन्ति। द्वेद्वे इति द्वे-द्वे। पुरोनुवाक्ये इति पुरः–अनुवाक्ये। कुर्यात्। अतीति। प्रयुक्त्या इति प्र-युक्त्यै।

आग्नावैष्णवमित्यादि ॥ अनिष्टकारिणं प्रत्यनिष्टाचरणम् अभिचारः। [१-]आज्यं भागः[-१] यस्याः सा [v]आज्यभागा [v]सरस्वती, आज्यहविष्केत्यर्थः। सा द्वितीया देवता द्वितीयस्य हविषः ॥ १५

[१-]प्रति वा इत्यादि[-१] ॥ प्रथममेव [v]अभिचरन्तम् अभिचारप्रवृत्तं शत्रुं [v]परस्तात् अयम् [v]प्रति अभिचरति। तस्मात् प्रत्याभिचारद्योतनाय [v]द्वेद्वे [v]पुरोनुवाक्ये [v]कुर्यात् द्विर्द्विः पुरोनुवाक्याम् अन्वाहेत्यर्थः। [३]अत्र प्रकृतिद्वित्वापेक्षं द्विर्वचनम्। पक्षान्तरम्– " अग्नाविष्णू सजोषसा " (तैसं

[२९-]आग्नावैष्णव आद्यः[-२९] [३०-]स्यादाज्यं सारस्वतं ततः[-३०] ॥ ४१ ॥
बार्हस्पत्यचरुश्चैतत् कुर्यादभिचरंस्त्रयम्। २०
यः प्रत्यभिचरेत् सोऽपि कुर्यादेतद्धविस्त्रयम् ॥ ४२ ॥
पीडितोऽन्याभिचारेण शान्त्यै तामिष्टिमाचरेत्।
[३१-]यज्ञोपनतिकामः सन्नाग्नावैष्णवमाचरेत्[-३१] ॥ ४३ ॥
घृते चरुं दृष्टिकामोऽध्वरकल्पां चरेद्धविः।
अन्यानुबन्ध्यकालेऽयं मैत्रावरुणमाचरेत् ॥ ४४ ॥
अनुवाके तु नवमेऽभिचारादय ईरिताः। २५

१–१. तं१.तं२– आज्यभागः। २–२. तं२– बार्हस्पत्य इत्यादि। ३. तं१.तं२–तत्र।

२९–२९. हा–अथाग्नावैष्णवादौ; श्रृं–आग्नावैष्णव आदौ। ३०–३०. ने.हो१ आज्यसारस्वतौ।
३१–३१.– यज्ञार्थ्येकादशकपालमाग्नावैष्णवं चरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

एतयैव यजेताभिचर्यमाणो देवताभिरेव देवताः प्रतिचरति यज्ञेन यज्ञं वाचा वाचं ब्रह्मणा ब्रह्म स देवताश्चैव यज्ञं च मध्यतो व्यवसर्पति तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्त्स्तृणुत आग्नावैष्णवमेकादशकपालं निर्वपेद्यं यज्ञो नो(२)पनमेदग्निः सर्वा देवता विष्णुर्यज्ञोऽग्निं चैव विष्णुं च स्वेन भागधेयेनोप धावति तावेवास्मै यज्ञं प्र यच्छत

५ एतया । एव । यजेत । अभिचर्यमाण इत्यभि-चर्यमाणः । देवताभिः । एव । देवताः । प्रतिचरतीति प्रति-चरति । यज्ञेन । यज्ञम् । वाचा । वाचम् । ब्रह्मणा । ब्रह्म । सः । देवताः । च । एव । यज्ञम् । च । मध्यतः । व्यवसर्पतीति वि-अवसर्पति । तस्य । न । कुतः । चन । उपाव्याध इत्युप-आव्याधः । भवति । न । एनम् । अभिचरन्नित्यभि-चरन् । स्तृणुते । आग्नावैष्णवमित्याग्ना-वैष्णवम् । एकादशकपालमित्येकादश-कपालम् । निरिति । वपेत् । यम् । यज्ञः । न (२) । उपनमेदित्युप-नमेत् ।

१० अग्निः । सर्वाः । देवताः । विष्णुः । यज्ञः । अग्निम् । च । एव । विष्णुम् । च । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । तौ । एव । अस्मै । यज्ञम् । प्रेति । यच्छतः ।

४.७.१) " अग्नाविष्णू महि तत् " (तैसं १.८.२२) इति प्रथमस्य पुरोनुवाक्ये । " अग्नाविष्णू महि धाम " (तैसं १.८.२२) इति याज्या । "प्र णो देवी", "आ नो दिवः" (तैसं १.८.२२) इति द्वितीयस्य पुरोनुवाक्ये । " पावीरवी " (तैसं ४.१.११) इति याज्या । " [४]बृहस्पते

१५ जुषस्व नः " (तैसं १.८.२२) इति " एवा पित्रे " (तैसं १.८.२२) इति तृतीयस्य पुरोनुवाक्ये । "बृहस्पते अति यत्" (तैसं १.८.२२) इति याज्या इति[४] ॥ [५]अति [५]प्रयुक्त्यै अतिशयेन प्रयुक्त्यर्थम् । अभिचरन्तं सकृत्प्रयुञ्जानं द्विःप्रयोगेणायम्[६] अतिशेत इति । यदा तु द्विर्द्विः पुरोनुवाक्यामन्वाह तदानीं त्रिस्त्रिर्हविषामवद्यतीति । काः पुनस्ताः पुरोनुवाक्याः ? उच्यन्ते— " अग्नाविष्णू महि तद्वां महित्वम् " (तैसं १.८.२२), " प्र णो देवी सरस्वती " (तैसं १.८.२२), " बृहस्पते

२० जुषस्व नः " (तैसं १.८.२२) इत्येताः ॥

एतयैवेति ॥ त्रिहविषा प्रकृतया इष्ट्या । [६]अभिचर्यमाण इति[६] । यः [५]अभिचर्यमाणः अभिचारफलमनर्थमभिचारिण्येव संक्रामयितुमिच्छति सोऽपि [५]एतया [५]यजेत । देवताभिरिति । आ तृतीयैर्देवतादिभिः परकीयान् [५]प्रतिचरति तस्यैव सकाशं प्रापयति । ततस्तान् देवतादीन् शत्रोरात्मनश्च मध्ये विविधमवसर्पयति साधयति । ततः [५]तस्य कुतश्चिदन्यस्मादपि बाधकात् [५]उपा-

२५ व्याधः उपपीडा [५]न [५]भवति । अत [७]एव [५]एनम् [५]अभिचरन्[७] [५]न [५]स्तृणुते न हिनस्ति ॥

[८]यज्ञस्योपनतिः यियक्षोः[८] ।

४–४. लं– 'बृहस्पते जुषस्व.....याज्या इति' नास्ति । ५. तं१.तं२.मै.लं– °णापि । ६–६. तं१.तं२.पं२.लं– बृहस्पते जुषस्व नः एवा पित्र इति तृतीयस्य पुरोनुवाक्ये, बृहस्पते अति यदिति याज्या अभिचर्यमाण इति । ७–७. लं– एनमभिचारम् । ८–८. तं१.तं२.मै– यज्ञस्योपनतिरियं केषादधर्मः (?); पं२–

३० यज्ञस्योपनतिरियक्षादधमम् (?)।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

उपैनं यज्ञो नमत्याग्नावैष्णवं घृते चरुं निर्वपेच्चक्षुष्कामोऽग्नेर्वै चक्षुषा मनुष्या वि पश्यन्ति यज्ञस्य देवा अग्निं चैव विष्णुं च स्वेन भागधेयेनोप धावति तावेवा(३)-स्मिञ्चक्षुर्धत्तश्चक्षुष्मानेव भवति धेन्वै वा एतद्रेतो यदाज्यमनडुहस्तण्डुला मिथुनादेवास्मै चक्षुः प्र जनयति घृते भवति तेजो वै घृतं तेजश्चक्षुस्तेजसैवास्मै तेजश्चक्षुरव रुन्द्ध इन्द्रियं वै वीर्यं वृङ्क्ते भ्रातृव्यो यजमानोऽयजमानस्याध्वरकल्पां प्रति निर्वपेद्भ्रातृव्ये यजमाने ५
नास्येन्द्रियं (४) वीर्यं वृङ्क्ते पुरा वाचः प्रवदितोर्निर्वपेद्यावत्येव वाक् तामप्रोदितां

उपेति । एनम् । यज्ञः । नमति । आग्नावैष्णवमित्याग्ना-वैष्णवम् । घृते । चरुम् । निरिति । वपेत् । चक्षुष्काम इति चक्षुः-कामः । अग्नेः । वै । चक्षुषा । मनुष्याः । वीति । पश्यन्ति । यज्ञस्य । देवाः । अग्निम् । च । एव । विष्णुम् । च । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । तौ । एव (३) । अस्मिन् । चक्षुः । धत्तः । चक्षुष्मान् । एव । भवति । धेन्वै । वै । एतत् । रेतः । १०
यत् । आज्यम् । अनडुहः । तण्डुलाः । मिथुनात् । एव । अस्मै । चक्षुः । प्रेति । जनयति । घृते । भवति । तेजः । वै । घृतम् । तेजः । चक्षुः । तेजसा । एव । अस्मै । तेजः । चक्षुः । अवेति । रुन्द्धे । इन्द्रियम् । वै । वीर्यम् । वृङ्क्ते । भ्रातृव्यः । यजमानः । अयजमानस्य । अध्वरकल्पामित्यध्वर-कल्पाम् । प्रति । निरिति । वपेत् । भ्रातृव्ये । यजमाने । न । अस्य । इन्द्रियम् (४) । वीर्यम् । वृङ्क्ते । पुरा । वाचः । प्रवदितोरिति प्र-वदितोः । निरिति । वपेत् । १५
यावती । एव । वाक् । ताम् । अप्रोदितामित्यप्र-उदिताम् ।

अग्नेर्वा इत्यादि । तृतीयार्थे षष्ठी । अग्निना [v]चक्षुषा [१-v]मनुष्याः विविधं [v]पश्यन्ति, यज्ञेन चक्षुषा [v]देवाः । यद्वा—चक्षुर्दर्शनं[१] अग्नेर्यज्ञस्य दर्शनेनेति । रेत इति । भक्षिततृणादिपरिणामत्वात् कार्यमित्यर्थः । कृष्यादिद्वारेण [v]अनडुहः कार्याः [v]तण्डुलाः । तस्माद्घृते चरुं निर्वपन् [v]मिथुनात् धेन्वनडुहः, [v]चक्षुः [v]प्र [v]जनयति, मिथुनाद्धि सर्वाः प्रजायन्ते इति भावः । घृते भवतीत्यादि । २०
गतम् ॥

इन्द्रियं वा इत्यादि । [v]भ्रातृव्यः [v]यजमानः सोमेनेष्टवान् चेत् [v]अयजमानस्य [v]इन्द्रियं वागादिकं [v]वीर्यं च [v]वृङ्क्ते वर्जयति स्वयमाददीत । तस्माद्भ्रातृव्यो यजमानः सोमेनेष्टवांश्चेत् [१]अयजमानोऽन्यः [v]अध्वरकल्पाम् अध्वरतुल्याम् इष्टिं [v]प्रति [v]निः [v]वपेत् अध्वरकल्पया यजेत । पुरा वाचः प्रवदितोरिति । प्रातरनुवाककाल इत्यर्थः । विहगादयः यावद्वाचं प्रवदन्ति तावदुत्थाय निर्वपेत् । " भावलक्षणे स्थेण्कृञ्वदि° " (पा ३.४.१६) इति तोसुन्प्रत्ययः । [v]यावती [v]एव २५

तैसं...१८

१-१. लं– 'मनुष्या विविधं.....चक्षुर्दर्शनम्' नास्ति । १०. तं१.तं२– यजमानो° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

भ्रातृव्यस्य वृङ्क्ते तामस्य वाचं प्रवदन्तीमन्या वाचोऽनु प्र वदन्ति ता इन्द्रियं वीर्यं यजमाने दधत्याग्नावैष्णवमष्टाकपालं निर्वपेत् प्रातःसवनस्याऽऽकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रं प्रातःसवनं प्रातःसवनमेव तेनाऽऽप्नोत्या(५)ग्नावैष्णवमेकादशकपालं निर्वपेन्माध्यंदिनस्य सवनस्याऽऽकाले ५ सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदेकादशकपालो भवत्येकादशाक्षरा त्रिष्टुप् त्रैष्टुभं माध्यंदिनꣳ सवनं माध्यंदिनमेव सवनं तेनाऽऽप्नोत्याग्नावैष्णवं द्वादशकपालं निर्वपेत्

भ्रातृव्यस्य । वृङ्क्ते । ताम् । अस्य । वाचम् । प्रवदन्तीमिति प्र-वदन्तीम् । अन्याः । वाचः । अनु । प्रेति । वदन्ति । ताः । इन्द्रियम् । वीर्यम् । यजमाने । दधति । आग्नावैष्णवमित्याग्ना-वैष्णवम् । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेत् । प्रातःसवनस्येति प्रातः- सवनस्य । आकाल १० इत्या-काले । सरस्वती । आज्यभागेत्याज्य-भागा । स्यात् । बार्हस्पत्यः । चरुः । यत् । अष्टाकपाल इत्यष्टा-कपालः । भवति । अष्टाक्षरेत्यष्टा-अक्षरा । गायत्री । गायत्रम् । प्रातःसवनमिति प्रातः- सवनम् । प्रातःसवनमिति प्रातः-सवनम् । एव । तेन । आप्नोति (५) । आग्नावैष्णवमित्याग्ना-वैष्णवम् । एकादशकपालमित्येकादश-कपालम् । निरिति । वपेत् । माध्यंदिनस्य । सवनस्य । आकाल इत्या-काले । सरस्वती । आज्यभागेत्याज्य-भागा । १५ स्यात् । बार्हस्पत्यः । चरुः । यत् । एकादशकपाल इत्येकादश-कपालः । भवति । एकादशाक्षरेत्येकादश-अक्षरा । त्रिष्टुप् । त्रैष्टुभम् । माध्यंदिनम् । सवनम् । माध्यंदिनम् । एव । सवनम् ।

[v]वाक् [v]तां सर्वाम् [v]अप्रोदिताम् एव [v]भ्रातृव्यस्य [v]वृङ्क्ते[11] । तथा च सति [v]ताम् [v]अस्य [v]प्रवदन्तीं प्रकर्षेण सर्वोत्कर्षेण वदन्तीं [v]वाचम् [v]अनु [v]प्र [v]वदन्ति । प्रजानां सर्वाः [v]अन्याः [v]वाचः तस्या गुणभूतां वदन्ति । अथ [v]ताः च तादृश्यो वाचः प्राधान्यम् [12]अस्याविष्कुर्वाणा अस्मिन् २० [v]यजमाने अध्वरकल्पामिष्टिं कुर्वाणे [v]इन्द्रियं [v]वीर्यं च [v]दधति ॥

इदानीमध्वरकल्पां विदधाति—आग्नावैष्णवमित्यादि ॥ प्रातःसवनस्याऽऽकाल इति । आकलनम् आकालः । थाथादिनोत्तरपदान्तोदात्तत्वम् (पा ६·२·१४४)। [v]प्रातःसवनस्य स्थाने । यद्वा—प्रातःसवनस्य यः कालः आ ततः आ तत्समाप्तेः । आङ् अभिविधौ । अव्ययीभावः । "तृतीयासप्तम्योर्बहुलम्" (पा २·४·८४) इत्यम्भावाभावः । अव्ययपूर्वपदप्रकृतिस्वरत्वस्य तत्पुरुष- २५ विषयत्वात् समासान्तोदात्तत्वम् (पा ६·१·२२३)। सरस्वत्याज्यभागेत्यादि । गतम् । एवं माध्यन्दिनतृतीयसवनयोर्वेदितव्यम् । त्रिष्टुब्जगतीशब्दाभ्याम् उत्सादित्वादञ् (पा ४·१·८६)। [13]गायत्रादिविभक्तत्वात् सवनानां [14-v]गायत्रं [v]त्रैष्टुभं[-14] [v]जागतम् इत्युच्यते । देवताभिरित्यादि । व्याख्यातम् ॥

११. लं- वृज्यते । १२. मै४- अस्यापि विकुर्वाणे । १३. तं१.तं२.मै४.लं- गायत्र्यादि । १४-१४. मै४- गायत्रत्रैष्टुभजागतत्वम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

तृतीयसवनस्याऽऽकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यद्द्वादशकपालो भवति द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमेव तेनाऽऽप्नोति देवताभिरेव देवताः (६) प्रतिचरति यज्ञेन यज्ञं वाचा वाचं ब्रह्मणा ब्रह्म कपालैरेव छन्दाꣳस्याप्नोति पुरोडाशैः सवनानि मैत्रावरुणमेककपालं निर्वपेद्वशायै काले यैवासौ भ्रातृव्यस्य वशाऽनूबन्ध्या सो एवैषैतस्यैककपालो भवति न हि कपालैः पशुमर्हत्याप्तुम् ॥ ९ ॥ ५

[ब्रह्मणैवैनमभि चरति यज्ञो न तावेवाऽस्यैन्द्रियमाप्नोति देवता सप्तत्रिꣳशच्च ।]

तेन । आप्नोति । आग्नावैष्णवमित्याग्ना-वैष्णवम् । द्वादशकपालमिति द्वादश-कपालम् । निरिति । वपेत् । तृतीयसवनस्येति तृतीय-सवनस्य । आकाल इत्या-काले । सरस्वती । आज्यभागेत्याज्य-भागा । स्यात् । बार्हस्पत्यः । चरुः । यत् । द्वादशकपाल इति द्वादश-कपालः । भवति । द्वादशाक्षरेति द्वादश-अक्षरा । जगती । जागतम् । तृतीयसवनमिति तृतीय-सवनम् । तृतीयसवनमिति १० तृतीय-सवनम् । एव । तेन । आप्नोति । देवताभिः । एव । देवताः (६) । प्रतिचरतीति प्रति-चरति । यज्ञेन । यज्ञम् । वाचा । वाचम् । ब्रह्मणा । ब्रह्म । कपालैः । एव । छन्दाꣳसि । आप्नोति । पुरोडाशैः । सवनानि । मैत्रावरुणमिति मैत्रा-वरुणम् । एककपालमित्येक-कपालम् । निरिति । वपेत् । वशायै । काले । या । एव । असौ । भ्रातृव्यस्य । वशा । अनूबन्ध्येत्यनु-बन्ध्या । सो इति । एव । एषा । एतस्य । एककपाल इत्येक-कपालः । भवति । न । हि । कपालैः । १५ पशुम् । अर्हति । आप्तुम् ॥ ९ ॥

[मैसं २.१.७; कासं १०.१]

कपालैरिति ॥ अष्टत्वादिविशिष्टैः [v]कपालैः गायत्र्यादीनि [15]प्रातःसवनादिसंबन्धीनि [v]छन्दांसि [v]आप्नोति । अष्टाकपालादिभिः [16]पुरोडाशविशेषैः प्रातःसवनादीन्याप्नोति ॥

वशायै काल इति ॥ अनूबन्ध्यायाः वशायाः [v]काले, तत्स्थाने वा । [v]या [v]एव [v]असौ २० पूर्वं [v]भ्रातृव्यस्य यागे [v]अनूबन्ध्या [v]वशा अभूत् सा [v]एव [v]एषा [v]एतस्य यजमानस्यायं मैत्रावरुणः [v]एककपालः क्रियते तस्याः प्रतिक्रियेत्यर्थः । सा इत्यस्यार्थे सो इति निपातः । सा उ इति पदद्वय-समुदायो वा । तत्रैकादेशस्य परं प्रत्यादिवद्भावात् "ओत्" (पा १.१.१५) इति प्रगृह्यत्वम् । न हीति । [17]कपालबहुत्वमपशव्यत्वेन [18]निर्दिश्यते । कश्चिदाह—अयं मैत्रावरुणः पुरोडाशोऽनूबन्ध्याख्यं पशुमाप्तुं क्रियते । तत्र पुरोडाश एव पश्वाप्तिहेतुः । अतः [19]कपालपरत्वम् अकिञ्चित्करम् । २५ पुरोडाशनिष्पत्त्यर्थमेकं [20]कपालमस्त्विति ॥

इति द्वितीये द्वितीये नवमोऽनुवाकः ॥

१५. मै– प्रातःसवनसं°। १६. तं१.तं२.मै.लं–पुरोडाशैः । १७. तं१.तं२.– °द्वित्वम°। १८. मै४– निन्द्यते। १९. पं२– °लबहुत्वम् ; मै४–कपालम्। २०. तं२–°लमिति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतꣳ सोमारौद्रं चरुं निरवपन् तेनैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतꣳ सोमारौद्रं चरुं निर्वपेत् सोमं चैव रुद्रं च स्वेन भागधेयेनोप धावति तावेवास्मिन् ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव भवति तिष्यापूर्णमासे निर्वपेद्रुद्रो (१) वै तिष्यः सोमः पूर्णमासः

असौ । आदित्यः । न । वीति । अरोचत । तस्मै । देवाः । प्रायश्चित्तिम् । ऐच्छन् । तस्मै । एतम् । सोमारौद्रमिति सोमा-रौद्रम् । चरुम् । निरिति । अवपन् । तेन । एव । अस्मिन् । रुचम् । अदधुः । यः । ब्रह्मवर्चसकाम इति ब्रह्मवर्चस-कामः । स्यात् । तस्मै । एतम् । सोमारौद्रमिति सोमा-रौद्रम् । चरुम् । निरिति । वपेत् । सोमम् । च । एव । रुद्रम् । च । स्वेन । भागधेयेनेति भाग-धेयेन उपेति । धावति । तौ । एव । अस्मिन् । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । धत्तः । ब्रह्मवर्चसीति ब्रह्म-वर्चसी । एव । भवति । तिष्यापूर्णमास इति तिष्या-पूर्णमासे । निरिति । वपेत् । रुद्रः (१) । वै । तिष्यः । सोमः । पूर्णमास इति पूर्ण-मासः ।

असावादित्य इत्यादि । सोमारौद्रमिति । उत्तरपदवृद्धिश्छान्दसी । तिष्यापौर्णमासे इति । तैष्यां पौर्णमास्यामित्यर्थः । तिष्येण सहितः पूर्णमासस्तिष्यापूर्णमासः । " अन्येषामपि दृश्यते " (पा ६·३·१३७) इति दीर्घत्वम् । तिष्यः पुष्यः । रुद्रो वा इत्यादि । तयोस्तत्प्रधानत्वात्ताच्छब्द्यम् । साक्षादिति । अव्यवधानेन द्वयोरपि तेजस्वित्वात् ॥

ब्रह्मवर्चसकामस्तु सोमारौद्रं चरुं चरेत् ॥ ४५ ॥
चर्मदोषाद्विभीतस्तु सोमापौष्णं समाचरेत् ।
प्रजाकामोऽभिचारी च [३२]दीर्घरोगयुतस्तथा ॥ ४६ ॥
परस्य वैरिजनको वा सोमारौद्रमाचरेत् ।
दशमे त्वनुवाकेऽस्मिन् सौमारौद्रादयः [३३]श्रुताः ॥ ४७ ॥
***अग्नाविष्णू महीत्यत्र वर्णितोऽर्थोऽनुवाकयोः ।**

१. तं१.तं२– 'साक्षादिति' नास्ति।

३२. इ– दीर्घरोगं गतस्तथा; अ–दीर्घरोगायतस्तथा; उ.पा– दीर्घरोगयतस्तथा ।
३३. इ.ने.हो१– स्मृताः । * (तैसं १·८·२२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

साक्षादेव ब्रह्मवर्चसमव रुन्द्धे परिश्रिते याजयति ब्रह्मवर्चसस्य परिगृहीत्यै श्वैतायै श्वेतवत्सायै दुग्धं मथितमाज्यं भवत्याज्यं प्रोक्षणमाज्येन मार्जयन्ते यावदेव ब्रह्मवर्चसं तत् सर्वं करोत्यतिं ब्रह्मवर्चसं क्रियत इत्याहुरीश्वरो दुश्चर्मा भवितोरितिं मानवी ऋचौ धाय्ये कुर्याद्यद्वै किं च मनुरवदत् तद्भेषजं (२) भेषजमेवास्मै करोति यदिं बिभीयाद्-दुश्चर्मा भविष्यामीतिं सोमापौष्णं चरुं निर्वपेत् सौम्यो वै देवतया पुरुषः पौष्णाः ५

साक्षादितिं स-अक्षात्। एव। ब्रह्मवर्चसमितिं ब्रह्म-वर्चसम्। अवेति। रुन्द्धे। परिश्रित इतिं परिं-श्रिते। याजयति। ब्रह्मवर्चसस्येतिं ब्रह्म-वर्चसस्य। परिगृहीत्या इतिं परिं-गृहीत्यै। श्वैतायै। श्वेतवत्साया इतिं श्वेत-वत्सायै। दुग्धम्। मथितम्। आज्यम्। भवति। आज्यम्। प्रोक्षणमितिं प्र-उक्षणम्। आज्येन। मार्जयन्ते। यावत्। एव। ब्रह्मवर्चसमितिं ब्रह्म-वर्चसम्। तत्। सर्वम्। करोति। अतीतिं। ब्रह्मवर्चसमितिं ब्रह्म-वर्चसम्। क्रियते। इतिं। आहुः। ईश्वरः। दुश्चर्मेतिं १० दुः–चर्मा। भवितोः। इतिं। मानवी इतिं। ऋचौ। धाय्ये इतिं। कुर्यात्। यत्। वै। किम्। च। मनुः। अवदत्। तत्। भेषजम् (२)। भेषजम्। एव। अस्मै। करोति। यदिं। बिभीयात्। दुश्चर्मेतिं दुः–चर्मा। भविष्यामि। इतिं। सोमापौष्णमितिं सोमा-पौष्णम्। चरुम्। निरितिं। वपेत्। सौम्यः। वै। देवतया। पुरुषः। पौष्णाः।

[v]परिश्रिते [२]कटादिभिः परितः छादिते। 'याजयति' इति वचनात् [३]प्रधानं तु १५ परिश्रिते, स्विष्टकृदाद्यपरिश्रिते एव॥

श्वेताया इत्यादि॥ ईदृशेनाज्येन एतत् कुर्यात्। सर्वब्रह्मवर्चसलाभः। सर्वं प्रोक्षण-मार्जनान्याज्येनेति। एवं [v]ब्रह्मवर्चसम् [v]अति [v]क्रियते अन्यत्रोत्पाद्यते, तत्रायं [v]दुश्चर्मा श्वित्री भवितुम् [v]ईश्वरः स्यात् [v]इति [v]आहुः ब्रह्मविदः, तत्परिहाराय [v]मानवी मानव्यौ [v]ऋचौ [v]धाय्ये [v]कुर्यात्। "मक्षू देववतः" (तैसं १.८.२२) [४]इत्याद्ये द्वे धाय्ये लोके दधाति। आद्ये इत्येके। अन्त्ये २० इत्यन्ये। "देवानां य इन्मनः" इति सर्वत्रानुषज्यते। "समिध्यमानः" इति "समिद्धः" (तैब्रा ३.५.२) इत्येतयोर्मध्ये ये भवतः ते धाय्ये। यद्वा इत्यादि। मननात् [v]मनुः मनस्वी प्रजापतिः। तेनोक्तं सर्वं [v]भेषजं सर्वोपद्रवशमनं भवति। एवं मनोर्विशिष्टत्वान्मानव्योरप्यृचोर्विशिष्टत्वम्। अतस्तयोर्धाय्यात्वात्[५] [६-]दुश्चर्मत्वभयाप्रसङ्गः[-६]॥

सोमापौष्णमिति॥ पूर्ववदुत्तरपदवृद्धिः॥ २५

२. तं१.तं२.मै.लं– कशादिभिः। ३. तं१.तं२–प्रधानत्वे। ४. तं१.तं२.मै.लं–इत्यासाम्। ५. तं१.तं२– °र्धाय्यत्वात्। ६–६. मै४– दुश्चर्मत्वमित्यातिप्रसङ्गः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पशवः स्वयैवास्मै देवतया पशुभिस्त्वचं करोति न दुश्चर्मा भवति सोमारौद्रं चरुं निर्वपेत् प्रजाकामः सोमो वै रेतोधा अग्निः प्रजानां प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजां प्र जनयति विन्दते (३) प्रजाꣳ सोमारौद्रं चरुं निर्वपेदभिचरन्त्सौम्यो वै देवतया पुरुष एष रुद्रो यदग्निः स्वाया एवैनं देवतायै निष्क्रीय रुद्रायापि दधाति ताजगार्तिमार्छति सोमारौद्रं चरुं निर्वपेज्ज्योगामयावी सोमं वा एतस्य रसो गच्छत्यग्निꣳ शरीरं यस्य ज्योगामयति सोमादेवास्य रसं निष्क्रीणात्यग्नेः शरीरमुत यदी(४)तासुर्भवति जीवत्येव सोमारुद्रयोर्वा एतं ग्रसितꣳ होता

पशवः । स्वया । एव । अस्मै । देवतया । पशुभिरिति पशु-भिः । त्वचम् । करोति । न । दुश्चर्मेति दुः--चर्मा । भवति । सोमारौद्रमिति सोमा-रौद्रम् । चरुम् । निरिति । वपेत् । प्रजाकाम इति प्रजा-कामः । सोमः । वै । रेतोधा इति रेतः--धाः । अग्निः । प्रजानामिति प्र-जानाम् । प्रजनयितेति प्र-जनयिता । सोमः । एव । अस्मै । रेतः । दधाति । अग्निः । प्रजामिति प्र-जाम् । प्रेति । जनयति । विन्दते (३) । प्रजामिति प्र-जाम् । सोमारौद्रमिति सोमा-रौद्रम् । चरुम् । निरिति । वपेत् । अभिचरन्नित्यभि-चरन् । सौम्यः । वै । देवतया । पुरुषः । एषः । रुद्रः । यत् । अग्निः । स्वायाः । एव । एनम् । देवतायै । निष्क्रीयेति निः--क्रीय । रुद्राय । अपीति । दधाति । ताजक् । आर्तिम् । एति । ऋच्छति । सोमारौद्रमिति सोमा-रौद्रम् । चरुम् । निरिति । वपेत् । ज्योगामयावीति ज्योक्-आमयावी । सोमम् । वै । एतस्य । रसः । गच्छति । अग्निम् । शरीरम् । यस्य । ज्योक् । आमयति । सोमात् । एव । अस्य । रसम् । निष्क्रीणातीति निः--क्रीणाति । अग्नेः । शरीरम् । उत । यदि (४) । इतासुरितीत-असुः । भवति । जीवति । एव । सोमारुद्रयोरिति सोमा-रुद्रयोः । वै । एतम् । ग्रसितम् । होता ।

अग्निरिति ॥ रोदनाद्रुद्रत्वमग्नेः । स्वाया इति । सौम्यं पुरुषं सोमात् Vनिष्क्रीय Vरुद्राय अग्नये Vअपि Vदधाति उपहरति, Vताजक् तदानीमेव Vआर्तिम् Vआ Vऋच्छति ॥

ज्योगामयावी व्याख्यातः । ७गतमन्यत् । ग्रसितमिति । Vसोमारुद्रयोः आस्यगतं खलु Vहोता याज्यया यजन् Vनिः Vखिदति निष्क्रमयति । " ग्रसितस्कभित° " (पा ७·२·३४) इति

७. तं१,तं२,मै.लं– ' गतमन्यत् ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

निरिणदति स ईश्वर आर्तिमार्तोरनड्वान् होत्रा देया वह्निर्वा अनड्वान् वह्निर्होता वह्निनैव वह्निमात्मानꣳ स्पृणोति सोमारौद्रं चरुं निर्वपेद्यः कामयेत स्वेऽस्मा आयतने भ्रातृव्यं जनयेयमिति वेदिं परिगृह्यार्धमुद्धन्यादर्धं नार्धं बर्हिषः स्तृणीयादर्धं (५) नार्धमिध्मस्याभ्यादध्यादर्धं न स्व एवास्मा आयतने भ्रातृव्यं जनयति ॥ १० ॥

[रुद्रो भेषजं विन्दते यदि स्तृणीयादर्धं द्वादश च ।] ५

निरिति । खिदति । सः । ईश्वरः । आर्तिम् । आर्तोरित्या-अर्तोः । अनड्वान् । होत्रा । देयः । वह्निः । वै । अनड्वान् । वह्निः । होता । वह्निना । एव । वह्निम् । आत्मानम् । स्पृणोति । सोमारौद्रमिति सोमा-रौद्रम् । चरुम् । निरिति । वपेत् । यः । कामयेत । स्वे । अस्मै । आयतन इत्या-यतने । भ्रातृव्यम् । जनयेयम् । इति । वेदिम् । परिगृह्येति परि-गृह्य । अर्धम् । उद्धन्यादित्युत्-हन्यात् । अर्धम् । न । अर्धम् । बर्हिषः । स्तृणीयात् । अर्धम् (५) । न । अर्धम् । इध्मस्य । अभ्यादध्यादित्यभि-आदध्यात् । अर्धम् । न । स्वे । एव । अस्मै । आयतन इत्या-यतने । भ्रातृव्यम् । जनयति ॥ १० ॥

[मैसं २.१.५; कासं ११.५]

निपात्यते । ततश्च [V]सः [8]होता [V]आर्तिं गन्तुम् [V]ईश्वरः स्यात् । तस्मात् तेन [V]होत्रा अन्वाहार्य-सादनानन्तरम् [V]अनड्वान् [V]देयः । तथा सति [V]वह्निना वोढ्रा अनडुहा वह्निं यज्ञस्य वोढारम् [V]आत्मानं [V]स्पृणोति प्रीणयति, वर्धयति वा । [9]स्पृ प्रीत्यादिषु[9] सौवादिकः ॥

यः कामयेतेति ॥ कृषिभूमौ परस्य [10]क्षेत्रमाश्रितां [V]वेदिं [V]परिगृह्य तस्याः [V]अर्धं वाऽध्यव-साय दक्षिणम् [V]उद्धन्यात् । [11]अर्धान्तरं [V]न उद्धन्यात् । [V]अर्धं तदेव [V]बर्हिषा [V]स्तृणीयात् छादयेत् । [11]अर्धान्तरं [V]न स्तृणीयात् । [12]बर्हिषोऽर्धमुत्करे त्यजेत् । [V]इध्मस्य [V]अर्धम् [V]अभि [V]आदध्यात् [V]न अर्धान्तरं, उत्करे तं त्यजेत् । एवं कुर्वन् [V]स्वे एव [V]आयतने [V]अस्मै [V]भ्रातृव्यं [V]जनयति गृहजातमेवास्य शत्रुं करोति ॥

इति द्वितीये द्वितीये दशमोऽनुवाकः ॥

---

८. तं१.तं२.मै.लं– 'होता' नास्ति। ९–९. लं–सवर्त्यादिषु (?); तं१.तं२. 'स्पृ प्रीत्यादिषु' नास्ति। १०. पं२.मै४– क्षेत्रमर्यादायाम्। ११. मै४– अर्धम्। १२. तं१.तं२– बर्हिषोऽत्यर्धमु°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

ऐन्द्रमेकादशकपालं निर्वपेन्मारुतꣳ सप्तकपालं ग्रामकाम इन्द्रं चैव मरुतश्च स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवत्याहवनीय ऐन्द्रमधिं श्रयति गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै सप्तकपालो मारुतो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्द्धेऽनूच्यमान आ सादयति विशमेवा-
५ (१)स्मा अनुवर्त्मानं करोत्येतामेव निर्वपेद्यः कामयेत क्षत्राय च विशे च समदं दध्यामित्यैन्द्रस्यावद्यन् ब्रूयादिन्द्रायानु ब्रूहीत्याश्राव्य ब्रूयान्मरुतो यजेति

ऐन्द्रम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। मारुतम्। सप्तकपालमिति सप्त-कपालम्। ग्रामकाम इति ग्राम-कामः। इन्द्रम्। च। एव। मरुतः। च। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। ते। एव। अस्मै। सजातानिति स-जातान्। प्रेति। यच्छन्ति।
१० ग्रामी। एव। भवति। आहवनीय इत्या-हवनीये। ऐन्द्रम्। अधीति। श्रयति। गार्हपत्य इति गार्ह-पत्ये। मारुतम्। पापवस्यसस्येति पाप-वस्यसस्य। विधृत्या इति वि-धृत्यै। सप्तकपाल इति सप्त-कपालः। मारुतः। भवति। सप्तगणा इति सप्त-गणाः। वै। मरुतः। गणश इति गण-शः। एव। अस्मै। सजातानिति स-जातान्। अवेति। रुन्द्धे। अनूच्यमान इत्यनु-उच्यमाने। एति। सादयति। विशम्। एव (१)। अस्मै। अनुवर्त्मानमित्यनु-वर्त्मानम्। करोति। एताम्। एव।
१५ निरिति। वपेत्। यः। कामयेत। क्षत्राय। च। विशे। च। समदमिति स-मदम्। दध्याम्। इति। ऐन्द्रस्य। अवद्यन्नित्यव-द्यन्। ब्रूयात्। इन्द्राय। अन्विति। ब्रूहि। इति। आश्राव्येत्या-श्राव्य। ब्रूयात्। मरुतः। यज। इति।

ऐन्द्रमेकादशकपालमित्यादि। गतम्॥ आहवनीये ऐन्द्रमित्यादि। व्याख्यातम्॥

समदमिति॥ क्षत्रवैश्ययोः परस्परं संग्रामं जनयेयमिति। ᵛऐन्द्रस्य ᵛअवद्यन् ᵛब्रूयात्
२० ᵛइन्द्राय ᵛअनु ᵛब्रूहि ᵛइति। होता च तदानीं "इन्द्रं वो विश्वतस्परि" (तैसं २.१.११)

ग्रामाथ्यैन्द्रं मारुतं च कुर्यादेतद्धविर्द्वयम्॥ ४८॥
विड्राज्ञोः कलहं [३४]वाञ्छन्नपि तामेव निर्वपेत्।
कलहं [३५]तु समाधातुं वाञ्छन्नपि चरेदमूम्॥ ४९
ऐन्द्रं च वैश्वदेवं च ग्रामकामश्चरेद्धविः।
२५ प्रैयङ्गवं मरुद्भयस्तु ग्रामकामश्चरुं चरेत्॥ ५०॥
समानैरप्रिये जाते [३६-संज्ञान्या तु-३६] समाचरेत्।
एकादशेऽनुवाकेऽस्मिन्नुक्ता ऐन्द्रादयोऽखिलाः॥ ५१॥
*पूर्वप्रपाठकान्त्यानुवाकेऽस्यार्थ उदीरितः।

३४. ड.ड१.ने.हो१— गच्छन्नपि। ३५. आ.क.शृं— तम्। ३६–३६. आ.क.ड.ड१.शृं— संज्ञानीं ताम्। *(तैसं २.१.३१)।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

मारुतस्यावद्यन् ब्रूयान्मरुद्भ्योऽनु ब्रूहीत्याश्राव्य ब्रूयादिन्द्रं यजेति स्व एवैभ्यो भागधेये समदं दधाति वितृंहाणास्तिष्ठन्त्येतामेव (२) निर्वपेद्यः कामयेत कल्पेरन्निति यथादेवतमवदाय यथादेवतं यजेद्भागधेयेनैवैनान् यथायथं कल्पयति कल्पन्त एवैन्द्रमेकादशकपालं निर्वपेद्वैश्वदेवं द्वादशकपालं ग्रामकाम इन्द्रं चैव विश्वांश्च देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवत्यैन्द्र- ५
स्यावदाय वैश्वदेवस्यावद्येदथैन्द्रस्यो(३)परिष्टादिन्द्रियेणैवास्मा उभयतः

मारुतस्य । अवद्यन्नित्यव-द्यन् । ब्रूयात् । मरुद्भ्य इति मरुत्-भ्यः । अन्विति । ब्रूहि । इति । आश्राव्येत्या-श्राव्य । ब्रूयात् । इन्द्रम् । यज । इति । स्वे । एव । एभ्यः । भागधेय इति भाग-धेये । समदमिति स-मदम् । दधाति । वितृंहाणा इति वि-तृंहाणाः । तिष्ठन्ति । एताम् । एव (२) । निरिति । वपेत् । यः । कामयेत । कल्पेरन् । इति । यथादेवतमिति यथा-देवतम् । १०
अवदायेत्यव-दाय । यथादेवतमिति यथा-देवतम् । यजेत् । भागधेयेनेति भाग-धेयेन । एव । एनान् । यथायथमिति यथा-यथम् । कल्पयति । कल्पन्ते । एव । ऐन्द्रम् । एकादशकपालमित्येकादश-कपालम् । निरिति । वपेत् । वैश्वदेवमिति वैश्व-देवम् । द्वादशकपालमिति द्वादश-कपालम् । ग्रामकाम इति ग्राम-कामः । इन्द्रम् । च । एव । विश्वान् । च । देवान् । स्वेन । १५
भागधेयेनेति भाग-धेयेन । उपेति । धावति । ते । एव । अस्मै । सजातानिति स-जातान् । प्रेति । यच्छन्ति । ग्रामी । एव । भवति । ऐन्द्रस्य । अवदायेत्यव-दाय । वैश्वदेवस्येति वैश्व-देवस्य । अवेति । वेत् । अथ । ऐन्द्रस्य (३) । उपरिष्टात् । इन्द्रियेण । एव । अस्मै । उभयतः ।

इत्यन्वाह । अत्याक्रम्य [v]आश्राव्य [v]ब्रूयात् 'मरुतो यज' [v]इति । होता च "या वः शर्म शशमानाय" (तैसं १·५·११) इति यजति । अथ [v]मारुतस्य [v]अवद्यन् [v]ब्रूयात् 'मरुद्भ्योऽनु ब्रूहि' इति । होता च "मरुतो यद्ध वो दिवः" (तैसं १·५·११) इत्यन्वाह । अत्याक्रम्य [v]आश्राव्य [v]ब्रूयात् 'इन्द्रं यज' २०
[v]इति । होता च "इन्द्रं नरः" (तैसं २·१·११) इति यजति । एवं [1v]स्वे [v]भागधेये इन्द्रस्य मरुतां च [2]कलहम् [3]उत्पादयति । ततश्चैते [v]वितृंहाणाः परस्परं हिंसन्तः [v]तिष्ठन्ति, [4]क्षत्रिया विशश्च [5-5]संग्रामरुचयो भवन्ति ॥ कल्पेरन् [6]इति । निवृत्तसंग्रामा [7]स्वरूपेऽवतिष्ठेरन्नित्यर्थः । यथादेवतमिति । या यस्य देवता तदनतिक्रमेण [v]अवदाय [v]यजेत् । ततश्च एतान् [v]यथायथं यो यस्य भागः तेनैव तं [v]कल्पयति स्थापयति [8-8]स्वरूपे स्थापयति[8-8] । ततश्च [9]ते निवृत्तविरोधाः [10]कल्पन्ते[10] ॥ २५

१. लं– स्वेन । २. मै– कल्पम् । ३. मै– उपादधाति । ४. मै४– क्षत्रम् । ५–५. तं१– 'संग्रामरुचयो.....कल्पन्ते' नास्ति । ६. मै– 'इति' नास्ति । ७. मै.लं– विड्रूपे° । ८. मै– 'स्वरूपे स्थापयति' नास्ति । ९. मै४– 'ते' नास्ति । १०. मै– विकल्पन्ते ।
तैसं...१९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सजातान् परि गृह्णात्युपाधाय्यपूर्वयं वासो दक्षिणा सजातानामुपहित्यै पृश्नियै दुग्धे प्रैयङ्गवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकामः पृश्नियै वै पयसो मरुतो जाताः पृश्नियै प्रियङ्गवो मारुताः खलु वै देवतया सजाता मरुत एव स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति प्रियवती याज्यानुवाक्ये (४) भवतः
५ प्रियमेवैनꣳ समानानां करोति द्विपदा पुरोऽनुवाक्या भवति द्विपद

सजातानिति स-जातान् । परीति । गृह्णाति । उपाधाय्यपूर्वयमित्युपाधाय्य-पूर्वयम् । वासः । दक्षिणा । सजातानामिति स-जातानाम् । उपहित्या इत्युप-हित्यै । पृश्नियै । दुग्धे । प्रैयङ्गवम् । चरुम् । निरिति । वपेत् । मरुद्भ्यः इति मरुत्-भ्यः । ग्रामकाम इति ग्राम-कामः । पृश्नियै । वै । पयसः । मरुतः । जाताः । पृश्नियै । प्रियङ्गवः । मारुताः । खलु । वै । देवतया । सजाता इति
१० स-जाताः । मरुतः । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । ते । एव । अस्मै । सजातानिति स-जातान् । प्रेति । यच्छन्ति । ग्रामी । एव । भवति । प्रियवती इति प्रिय-वती । याज्यानुवाक्ये इति याज्या-अनुवाक्ये (४) । भवतः । प्रियम् । एव । एनम् । समानानाम् । करोति । द्विपदेति द्वि-पदा । पुरोनुवाक्येति पुरः-अनुवाक्या । भवति । द्विपद इति द्वि-पदः ।

ऐन्द्रस्येत्यादि ॥ प्रथमम् [v]ऐन्द्रस्य [v]अवदाय द्विः [v]वैश्वदेवस्य [v]अव द्यति । [v]अथ [v]ऐन्द्रस्य
१५ [v]उपरिष्टात् पुनरवद्यति । एवम् [v]इन्द्रियेण इन्द्रदत्तेन वीर्येण [v]सजातान् [v]उभयतः आदावन्ते च [v]परि [v]गृह्णाति । अथान्वाहार्यमासाद्य उपाधाय्यपूर्वयं वासः दक्षिणां दद्यात् । [11]वस्त्रान्तयोः [12]उपधेयं [13]-रक्तं सूत्रम्-[13] उपाधाय्यम् । छान्दसो ण्यत् (पा ३·१·१२४), कृदुत्तरपदप्रकृतिस्वरत्वेन " तित्स्वरितम् " (पा ६·१·१८५) इति स्वरितत्वम् । तत्सूत्रम् पूर्वं वानकाल एव यातीति उपाधाय्यपूर्वयम् । विचि (पा ३.२.७४) नपुंसकस्य ह्रस्वत्वम् (पा १·२·४७); दासीभारादित्वात्
२० पूर्वपदप्रकृतिस्वरत्वम् (पा ६·२·४२) । बहुव्रीहिर्वा—उपाधाय्यं वस्त्रं पूर्वयं प्रथमं प्राप्यं यस्य कारणत्वेन तत्तथोक्तम् । [v]उपहित्यै उपसेवायै भवति [v]सजातानाम् ॥

पृश्नियै दुग्धे इत्यादि ॥ पृश्निः श्वेता गौः । शुक्लबिन्दुचितेत्येके । प्रैयङ्गवमिति । प्रियङ्गुः [14]धान्यविशेषः । विकारे " ओरञ् " (पा ४·३·१३९) इत्यञ् । [v]पृश्नियै प्रियङ्गवः इति । [v]पयसः [v]जाताः इत्येव । मारुताः खलु वा इत्यादि । गतम् ॥

२५ प्रियवती इति ॥ "प्रिया वो नाम हुवे तुराणाम्", "श्रियसे कं भानुभिः" (तैसं २·१·११) इत्येते प्रियशब्दवत्यौ [v]याज्यानुवाक्ये [v]भवतः । द्विपदेति । " प्रिया वो नाम " इति [v]द्विपदा

---

११. मै–वस्त्रान्तरयोः । १२. मै४– 'उपधेयम्' नास्ति । १३–१३. तं१.मै.लं– रत्नं विरुत्रम् । १४. मै४– धान्यतृणविशेषः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवार्व रुन्द्धे चतुष्पदा याज्या चतुष्पद एव पशूनर्व रुन्द्धे देवासुराः संयत्ता आसन् ते देवा मिथो विप्रिया आसन् तेऽ३ऽन्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठमानाश्चतुर्धा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैः स इन्द्रः प्रजापतिमुपाधावत् तमे(५)तया संज्ञान्याऽयाजयदग्नये वसुमते पुरोडाशमष्टाकपालं निरवपत् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायाऽऽदित्यवते चरुं ततो वा इन्द्रं ५

एव। अवेति। रुन्द्धे। चतुष्पदेति चतुः-पदा। याज्या। चतुष्पद इति चतुः—पदः। एव। पशून्। अवेति। रुन्द्धे। देवासुरा इति देव-असुराः। संयत्ता इति सं-यत्ताः। आसन्। ते। देवाः। मिथः। विप्रिया इति वि-प्रियाः। आसन्। ते। अन्यः। अन्यस्मै। ज्यैष्ठ्याय। अतिष्ठमानाः। चतुर्धेति चतुः—धा। वीति। अक्रामन्। अग्निः। वसुभिरिति वसु-भिः। सोमः। रुद्रैः। इन्द्रः। मरुद्भिरिति मरुत-भिः। वरुणः। आदित्यैः। सः। इन्द्रः। प्रजापतिमिति प्रजा-पतिम्। उपेति। अधावत्। तम् (५)। एतया। संज्ञान्येति सं-ज्ञान्या। अयाजयत्। अग्नये। वसुमत इति वसु-मते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्। निरिति। अवपत्। सोमाय। रुद्रवत इति रुद्र-वते। चरुम्। इन्द्राय। मरुत्वते। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। वरुणाय। आदित्यवत इत्यादित्य-वते। चरुम्। ततः। वै। इन्द्रम्।

त्रिष्टुप्, एकद्वित्रिभिश्च पङ्क्त्याऽन्या इति। द्वौ पादावस्या इति द्विपदा। "संख्यासुपूर्वस्य" (पा ५.४.१४०) इति लोपः समासान्तः। "टाबृचि" (४.१.९) इति टापि "पादः पत्" (६.४.१३०) इति पद्भावः, "द्वित्रिभ्यां पाद्दन्°" (पा ६.२.१९७) इत्युत्तरपदान्तोदात्तत्वम्। एवं चतुष्पदा याज्येति। "श्रियसे कम्" इति पूर्वोक्ता ॥

देवासुरा इत्यादि ॥ संज्ञानेष्टिविधिः। [v]देवाः अपि [v]मिथः विप्रियाः [v]आसन्, [v]ते देवाः अन्योऽन्यस्य ज्यैष्ठ्यं श्रैष्ठ्यमसहमानाः [v]अन्यः [v]अन्यस्मै [v]अतिष्ठमानाः कार्येषु अप्रकाशमानाः [v]चतुर्धा [v]वि [v]अक्रामन् चतुर्धा व्यूह्य स्थिताः। इन्द्रमनादृत्य "अग्निर्वसुभिः" इत्यादि क्रमेण स्थिताः। अन्योऽन्यस्मा इति। "कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः समासवच्च बहुलम्। यदा न समासवत् प्रथमैकवचनं तदा पूर्वपदस्य" (८.१.१२ वा ११) इति समासाभावे पूर्वपदस्य प्रथमैकवचनम्। [१५]अन्यः अन्यस्मै[१५]। अन्यस्मै अन्यस्मै इत्यर्थः। "श्लाघह्नुङ्स्थाशपाम्°" (पा १.४.३४)

१५-१५. तं१.मै.मै४.लं– 'अन्यः अन्यस्मै' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवा जैष्ठ्यायाभि समजानत यः समानैर्मिथो विप्रियः स्यात् तमेतया संज्ञान्या याजयेदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेत् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणाया(६)ऽऽदित्यवते चरुमिन्द्रमेवैनं भूतं ज्यैष्ठ्याय समाना अभि सं जानते वसिष्ठः समानानां भवति ॥ ११ ॥

५ [विशमेव तिष्ठन्त्येतामेवाथैन्द्रस्य याज्यानुवाक्ये तं वरुणाय चतुर्दश च।]।

देवाः । ज्यैष्ठ्याय । अभि । समिति । अजानत । यः । समानैः । मिथः । विप्रिय इति वि-प्रियः । स्यात् । तम् । एतया । संज्ञान्येति सं-ज्ञान्या । याजयेत् । अग्नये । वसुमत इति वसु-मते । पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेत् । सोमाय । रुद्रवत इति रुद्र-वते । चरुम् । इन्द्राय । मरुत्वते । पुरोडाशम् । एकादशकपालमित्येकादश-कपालम् । वरुणाय ।
१० (६) आदित्यवत इत्यादित्य-वते । चरुम् । इन्द्रम् । एव । एनम् । भूतम् । ज्यैष्ठ्याय । समानाः । अभि । समिति । जानते । वसिष्ठः । समानानाम् । भवति ॥ ११ ॥

[मैसं १२.१.५-६; कासं ११.५]

इति संप्रदानत्वम् । " प्रकाशनस्थेयाख्ययोश्च " (पा १.३.२३) इत्यात्मनेपदम् । ज्यैष्ठ्यायेति । तादर्थ्ये चतुर्थी । अथ Vइन्द्रः देवानां राजा Vप्रजापतिम् Vउप Vअधावत् इत्थमस्मिन् प्रति-
१५ विधेह्यत्रेति । अथ प्रजापतिरिन्द्रं [१६-१६]Vसंज्ञान्या इष्ट्या[१६] Vअयाजयत् ' अग्नये वसुमते ' [१७]इत्येतया [१८]संज्ञायते सम्यक् [१९]ज्येष्ठभावेन ज्ञायते[१८] अनयेति करणे ल्युट् । Vततः Vदेवाः Vज्यैष्ठ्याय Vइन्द्रम् Vअभि Vसम् Vअजानत अभ्युपगतवन्तोऽस्य ज्यैष्ठ्यम् । " संप्रतिभ्यामनाध्याने " (पा १.३.४६) इत्यात्मनेपदम् ॥

यः समानैरित्यादि । स यैः संजिज्ञासीत तेष्वपरतेष्वेतामिष्टिं निर्वपेत् । ततः समानाः Vएनम्
२० यजमानम् Vइन्द्रम् Vएव Vभूतं Vज्यैष्ठ्याय Vअभि Vसं Vजानते । Vततः Vसमानानां Vवसिष्ठः वसुमत्तमः Vभवति । " विन्मतोर्लुक् " (पा ५.३.६५), " टेः " (पा ६.४.१५५) इति टिलोपः ॥

इति द्वितीये द्वितीये एकादशोऽनुवाकः ॥

१६–१६. तं१.मै.लं– संज्ञानेष्ट्या। १७.लं–इति एकया। १८–१८. लं–' संज्ञायते सम्यग्ज्येष्ठ-भावेन ज्ञायते ' नास्ति। १९. मै४– ज्यैष्ठ्य°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हिरण्यगर्भ ❀

हिरण्यगर्भ इति हिरण्य-गर्भः ॥

अथ याज्याकाण्डं वैश्वदेवमेव । तत्र[1] " यो मृत्योर्बिभीयात् तस्मा एतां प्राजापत्यां शतकृष्णलां निर्वपेत् " (तैसं २·३·२) इत्यस्याः पुरोनुवाक्या– ' हिरण्यगर्भः ' इति त्रिष्टुप् ॥ प्रतीकग्रहणं

[३७]द्वादशेऽन्त्यानुवाकेऽत्र काम्ययाज्याः श्रुतौ श्रुताः ।
व्याख्यास्यन्ते तदर्थेष्टीरुदाहृत्यात्र पूर्ववत् ॥ ५२ ॥

मृत्युभीतस्येष्टिं विधातुं प्रस्तौति– " देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावन् तेभ्य एतां प्राजापत्याꣳ शतकृष्णलां निरवपत् तयैवैष्वमृतमदधात् " (तैसं २·३·२) इति । शतं [३८]सुवर्णानि कृष्णलतुलितानि यस्याः समष्टेः सा कृष्णलसमष्टिः शतकृष्णला, तां प्रजापतिदेवताकां [३९]निरवपत्, तयैव शतकृष्णलया देवेष्वपमृत्युवारणरूपममृतमदधात् ॥ विधत्ते– " यो मृत्योर्बिभीयात् तस्मा एतां प्राजापत्याꣳ शतकृष्णलां निर्वपेत् प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन्नायुर्दधाति सर्वमायुरेति " (तैसं २·३·२) इति । मृत्योरपमृत्योः । [४०]सर्वमायुर्जन्मकाले यावदायुरारब्धेन कर्मणा [४१]प्रापितं तत्सर्वं विघ्नेन विना प्राप्नोति ॥ शतसंख्यां प्रशंसति– " शतकृष्णला भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति " (तैसं २·३·२) इति ॥ पाकाय घृतद्रव्यं विधत्ते– " घृते भवत्यायुर्वै घृतममृतꣳ हिरण्यमायुश्चैवास्मा अमृतं च समीची दधाति " (तैसं २·३·२) इति । " आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीकः " (तैसं ३·३·८) इति मन्त्रे [४३]घृतप्रियस्याग्नेरायुष्प्रदत्वात् घृतस्यायुष्ट्वम् । यद्वा-घृतजन्येन बलेनेन्द्रियाणां देहे दृढबद्धतया निर्गमनाभावादायुर्भवतीति तद्धेतुत्वम् । समीची स्वस्वकार्यक्षमे मृत्युपरिहारायानुकूले । अवदानपरिमाणं विधत्ते– " चत्वारिचत्वारि कृष्णलान्यव द्यति चतुरवत्तस्याऽऽप्त्यै " (तैसं २·३·२) इति । पुरोडाशे प्रकृतिभूते सकृदुपस्तीर्य द्विरवदाय सकृदभिघारणेन चतुरवत्तं संपद्यते । [४३]अत्र त्वेकैकस्मिन्नवदाने कृष्णलगतया चतुःसंख्यया चतुरवत्तं संपद्यते । तत्र प्रधानस्य हविषश्चतुष्टयं [४४]द्विरवदातव्यमिडार्थमपि चतुष्टयम् । अनेनाभिप्रायेण [४५]वीप्सा । तदेतन्मनसि निधाय सूत्रकार आह– ' तानि पवित्रवत्याज्य आवपति । धर्ममात्रं श्रपणम् । प्रचरणकाले अष्टौ[४६] देवताया अवद्यति । चत्वारि स्विष्टकृति । द्वे प्राशित्रेऽष्टाविडायाम् । चतुर्धाकरणकाले सर्वाणि प्राशित्रे समोप्यैकधा ब्रह्मण उपहरति । तानि ब्रह्मा भक्षयति । भक्षापनय इत्तरेषाम् " (आपश्रौ १९·२१·३–८) इति ॥ सर्वेषामृत्विग्भागानां सहैव ब्रह्मणे प्रदानं विधत्ते– " एकधा ब्रह्मण उप हरत्येकधैव यजमान आयुर्दधाति " (तैसं २·३·२) इति । एकधेत्यनेन सर्वभागसाहित्यमुच्यते । उपहरति दद्यादित्यर्थः । अनेन [४७]दानेन यजमानेऽपि सर्वमायुरेकीकृत्य स्थापयति ॥

हिरण्यगर्भ इति ॥ अस्यामिष्टौ [४८]याज्यानुवाक्ये द्विविधे विकल्पिते, तासु चतसृष्वृक्षु तिसृणां प्रतीकान्याम्नायन्ते– ' हिरण्यगर्भ आपो ह यत् प्रजापते ' इति । " हिरण्यगर्भः समवर्ततात्रे "

१. तं१.मै.लं– ' तत्र ' नास्ति।

३७. ने–द्वादशे हयनु°; ड१.शृं– द्वादशे त्वनु।° ३८. ड.ड१– सुवर्णानि कृष्णलानि। ३९. ड.ड१– निर्वपेत्। ४०. इ.जो.ना.हा– ' सर्वमायुः ' नास्ति। ४१. ड१– प्रापितं तत्र। ४२. इ.ने.हो१– घृतप्रतीकस्या°। ४३. अ.इ.उ.पा– तत्र। ४४. जो.ना.हा.– °मिडार्थानामपि। ४५. क– ' वीप्सा ' नास्ति। ४६. हो१– ' अष्टौ ' नास्ति। ४७. इ– तद्दानेन। ४८. याज्यानुवाक्येऽपि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आपो॑ ह॒ यत् ❀
प्रजा॑पते ❀ ।

आप॑ः । ह॒ । यत् ।
प्रजा॑पत॒ इति॒ प्रजा॑-प॒ते॒ ॥

५ चेदं " हिरण्यगर्भः समवर्तताग्रे " (तैसं ४·१·८) इत्यस्याः । इयं चाग्निकाण्डे व्याख्यास्यते, यत्राम्नास्यते, " ऊर्ध्वा अस्य " (तैसं ४·१·८) इत्यत्र । हिरण्मयाण्डगर्भः प्रजापतिः [v]अग्रे प्रथमं [v]समवर्तत ततः [v]जातः सर्वस्य भूतजातस्य [v]एकः[२] [v]पतिः [v]आसीत् । [v]सः [v]पृथिवीं विस्तीर्णां दिवं [v]द्याम् अन्तरिक्षम् [v]इमां भूमिं च [v]दाधार धारयति । तस्मै [v]कस्मै एकस्मै अविज्ञातस्वभावाय वा [v]देवाय [v]हविषा अनेन [v]विधेम परिचरेमेति ॥

१० अथ तत्रैव पुरोनुवाक्याविकल्पः– 'आपो ह यत्' इति त्रिष्टुप् ॥ इदं च प्रतीकग्रहणं " आपो ह यन्महतीर्विश्वम् " इत्यस्याः । इयमपि तत्रैव व्याख्यास्यते (तैसं ४·१·८) । महत्यः [v]आपः यस्मात् [३]गर्भम् [v]आयन्, [v]दक्षं सर्वसृष्टिकुशलं [v]दधानाः तमेव गर्भं स्वयं भुञ्जयन्त्यः जनयितुकामाः, तस्मात् कारणात् [v]देवानां सर्वेषाम् [v]एकः [v]असुः प्राणभूतः प्रजापतिः [v]निरवर्तत [४]निष्पन्नोऽभवत् । तस्मै [v]कस्मै [५]एकस्मै, अविज्ञातस्वभावाय वा [v]देवाय [v]हविषा परिचरेमेति ॥

१५ अथ तत्रैव याज्या– ' प्रजापते ' इति त्रिष्टुप् ॥ इदं च प्रतीकग्रहणं– " प्रजापते न त्वदेतान्यन्यः " (तैसं १·८·१४) इत्यस्याः । इयं च " सोमस्य त्विषिरसि " (तैसं १·८·१४) इत्यत्र व्याख्याता । हे [v]प्रजापते, [v]न खलु कश्चित् त्वत्तः [v]अन्यः तानि [v]एतानि विश्वानि [v]जातानि भूतानि [v]परि [v]बभूव परिभवति । तस्मात् [v]यत्कामाः [v]वयं [v]जुहुमः [v]तत् [v]नः अस्माकम् [v]अस्तु । किं च [v]वयं [v]रयीणां [v]पतयः स्वामिनश्च [v]स्याम इति ॥

२० इत्येका । ' आपो ह [४९]यन्महतीर्विश्वमायन् " इति द्वितीया । ते उभे अपि चतुर्थकाण्डस्य प्रथमप्रपाठके (तैसं ४·१·८) समाम्नातत्वात् तत्रैव व्याख्यास्येते । " प्रजापते न त्वदेतान्यन्यः " [५०]इत्येषा तृतीया । सा तु प्रथमकाण्डस्याष्टमप्रपाठके (तैसं १·८·१४) व्याख्याता ॥

२. लं– एकस्य । ३. लं– यज्ञम् । ४. मै४–निष्क्रम्यावर्तत । ५. लं– ' एकस्मै ' नास्ति ।

४९. ड.ड१ यद्बृहतीर्गर्भमायन् । ५०. शृं– इत्येषा सा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स वेद पुत्रः पितरꣳ स मातरꣳ स सनुर्भुवत् स भुवत् पुनर्मघः।
स द्यामौर्णोदन्तरिक्षꣳ स सुवः स विश्वा भुवो अभवत् स आऽभवत्॥

सः। वेद। पुत्रः। पितरम्। सः। मातरम्।
सः। सूनुः। भुवत्। सः। भुवत्। पुनर्मघ इति पुनः-मघः।
सः। द्याम्। और्णोत्। अन्तरिक्षम्। सः। सुवः। ५
सः। विश्वाः। भुवः। अभवत्। सः। एति। अभवत्॥

अथ तत्रैव याज्याविकल्पः— 'स वेद पुत्र' इतीयं जगती॥ [V]सः एव प्रजापतिः [V]पुत्रः भूत्वा [V]पितरं [V]मातरं च [V]वेद जानाति, ममायं पिता इयं मातेति जानन् पुत्रात्मना स एव वर्तते। [V]सः एव [V]सूनुः [V]भुवत् यो यः सोतव्य उत्पाद्यः पदार्थः सोऽपि भूधरादिः स एव [6]भवेत्। पुनश्च [V]सः एव मघः हिरण्यादि धनं [V]भुवत् भवेत् स एव [7]तथा [8]भवति। [9]भवतेर्लेटि शपो लुक्। १० "भूसुवोस्तिङि" (पा ७·३·८८) इति गुणाभावः। यद्वा— सूनुः [10]सोमयजमानः तद्भावेन च भवति। मघः सोतव्य सोमः तादात्म्येन च वर्तते। किं च— [V]सः एव [V]द्यां द्युलोकम् [V]और्णोत् छादयति स्वेन [11]महिम्ना तेजसा वा, सः एव [12-V]अन्तरिक्षम् और्णोत् इत्येव[-12]। [V]सः [13]एव [V]सुवः पृथिवीं च और्णोत्। [14-]सुष्ठु [15]आवरणात्[-14] सुवः सर्वविकाराणां सुष्ठु गन्त्री। तन्वा-

स इति॥ अथ चतुर्थीमृचमाह— 'स वेद पुत्रः पितरꣳ स मातरꣳ स सूनुर्भुवत् स भुवत् १५
पुनर्मघः। स द्यामौर्णोदन्तरिक्षꣳ स सुवः स विश्वा भुवो अभवत् स आऽभवत्' इति। 'द्यौः पिता पृथिवी माता प्रजापतिर्बन्धुः' इति मन्त्रवर्णात् ब्रह्माण्डमध्ये सत्यलोके वर्तमानस्य [51]प्रजापतेः अण्डस्योपरितनकपालरूपा द्यौः पिताऽधस्तनकपालरूपा पृथिवी माता। [V]सः [V]पुत्रः प्रजापतिः तं [V]पितरं [52-]तां च [V]मातरं [V]वेद[-52]। अभिज्ञः [V]सः प्रजापतिः [V]सूनुः [V]भुवत् तयोर्मातापित्रोः पुत्रो भवति। अत एव तयोर्वेदनं तस्योपपन्नम्। मघशब्दो धनवाची। पुनः पुनर्यजमानाय दातव्यं धनं [53]यस्यासौ [V]पुनर्मघः। २० तादृशोऽयं प्रजापतिः [V]भुवत् भवति। किं च [V]सः प्रजापतिः सर्वव्यापी विराड्रूपं धृत्वा [V]द्याम् [54]उपरितनकपालम् [V]और्णोत् आच्छादितवान्। [55]तथा [V]अन्तरिक्षं स्वर्गं च [V]सः और्णोत्। किं च [51-V]सः एव [V]विश्वाः [V]भुवः इमं लोकमारभ्याधस्तनाः सर्वा भूमीः [V]अभवत् [57]प्राप्नोत् आच्छादितवानित्यर्थः। किं च सत्यलोके समागत्य चतुर्मुखत्वेन रूपान्तरेण परिमितः [V]अभवत्॥

६. मै४— भुवत्। ७. मै४— तथा तथा च; लं—तथा तथा। ८. तं१— भवेत्। ९. लं— २५
भवतेर्लेटि। १०. मै४— सोतव्य यजमानः। ११. मै४— आत्मना। १२–१२. तं१.लं— अन्तरिक्षमेको दिव्येव। १३. तं१. एवम्। १४–१४. तं१—'सुष्ठु आवरणात्' नास्ति। १५. मै— वरणात्।

५१. इ— प्रजापतेर्हिरण्यगर्भस्यो°; अ.इ.उ.ना.पा.हा— °कपालमात्रम्। ५२. आ.क—मातरं च वेत्ति; ड—तां च वेद; ड१—तां च मातरं चेति। ५३. ड.ड१.ने.हो.१— यस्य सः। ५४. ड१— उपरितनम्। ५५ ने— अथ। ५६. आ— अतः। ५७. ने— प्राप्नोति। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उदु त्यं ❀ चित्रम् ❀ ।

उदिति । उ । त्यम् ॥ चित्रम् ॥

दित्वादुवङ् (पा ६·४·७७ वा १), छान्दसमाद्युदात्तत्वम्। यद्वा– सूतेरसुनि गुणाभावश्छान्दसः, सवित्री सर्वविकाराणाम्। किं बहुनेत्याह– [v]सः एव [v]विश्वा [v]भुवः भूतजातानि विश्वा भुवः भावयित्रीः [१६]योनीः कारणानि [v]अभवत् प्राप्तवान् उत्पादितवान्। [v]सः एव च [v]आऽभवत् आवृत्यावृत्य प्राप्नोति उत्पादयति। यद्वा– स एव विश्वा भुवः अभवत् भवति विश्वभूतजातात्मना कारणात्मना वा स एवावतिष्ठते। स एव [१७]चावृत्यावृत्य [१८]तद्रूप्येण भवति वर्तते [१९]सोऽस्माकं [२०]प्रत्यूहम् अपनयत्विति ॥

" यो ब्रह्मवर्चसकामः स्यात् तस्मा एतं सौर्यं चरुं निर्वपेत् " (तैसं २·३·२) इत्यस्याः पुरोनुवाक्या– ' उदु त्यम् ' इति गायत्री ॥ व्याख्यातेयं ग्रहेषु (तैसं १·४·४३)। अस्या इदं प्रतीकग्रहणम्। तमिमं [v]जातवेदसं [v]देवं सूर्यं [v]केतवः रश्मयः [v]उत् [v]वहन्ति विश्वस्य लोकस्य दर्शनार्थमिति ॥

तत्रैव याज्या– ' चित्रम् ' इति त्रिष्टुप् ॥ इयमपि तत्रैव व्याख्याता (तैसं १·४·४३)। प्रतीकग्रहणमेवेदम्। [v]चित्रं चायनीयं [v]देवानाम् [v]अनीकं [२१]चमूस्थानीयं मित्रादीनामपि चक्षुःस्थानीयम् [v]उदगात् उद्गच्छति। [२२]किं च [v]द्यावापृथिवी [v]अन्तरिक्षं च [v]आऽप्राः आऽप्रात् आपूरयन्ति। [v]जगतः जङ्गमस्य [v]तस्थुषः स्थावरस्य च [v]आत्मा [v]सूर्यः इति ॥

इष्ट्यन्तरं विधत्ते– ' असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतꣳ सौर्यं चरुं निरवपन् तेनैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतꣳ सौर्यं चरुं निर्वपेदमुमेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसꣳ दधाति ब्रह्मवर्चस्येव भवति " (तैसं २·३·२) इति। यदुक्तं सूत्रकारेण–" सौर्यं चरुं रुक्माभ्यां परिगृह्य [५८]आसादयति " (आपश्रौ १९·२१·९) इति, तदेतद्विधत्ते– ' उभयतो रुक्मौ भवत उभयत एवास्मिन् रुचं दधाति " (तैसं २·३·२) इति। उभयत उपरिष्टादधस्ताच्चेत्यर्थः ॥ प्रयाजार्थं आज्ये कृष्णलं प्रक्षिप्य होमं विधत्ते– " प्रयाजेप्रयाजे कृष्णलं जुहोति दिग्भ्य एवास्मै ब्रह्मवर्चसमव रुन्द्धे " (तैसं २·३·२) इति। पञ्चसु प्रयाजेषु हूयमानैस्तैजसैः पञ्चभिः कृष्णलैः पञ्चभ्यो दिग्भ्यो [५९]ब्रह्मवर्चसाख्यस्य तेजसः प्राप्तिर्भवति ॥

उदिति ॥ अत्र याज्यानुवाक्ययोः प्रतीके दर्शयति– ' उदु त्यं चित्रम् ' इति। ' उदु त्यं जातवेदसम् ' इति पुरोनुवाक्या। ' चित्रं देवानामुदगादनीकम् ' इति याज्या। ते उभे अपि प्रथमकाण्डस्य चतुर्थप्रपाठके व्याख्याते (तैसं १·४·४३) ॥

१६. तं१.मै.लं– स्योनीः। १७. मै.लं– ' आवृत्य ' नास्ति। १८. मै– तद्रूपेण। १९. लं– योऽस्माकम्। २०. मै४– मृत्युम्। २१. तं१.मै४.लं– समूह°। २२. तं१.मै– उदु त्यं च।

५८. ने– स्थापयति। ५९. अ.उ.पा–ब्रह्मवर्चसस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

स प्रत्नवन्नवीयसाऽग्ने द्युम्नेन संयता। बृहत् ततन्थ भानुना॥

सः। प्रत्नवदिति प्रत्न-वत्। नवीयसा। अग्ने। द्युम्नेन। संयतेति सं-यता। बृहत्। ततन्थ। भानुना॥

"आग्नेयमष्टाकपालं निर्वपेत् सावित्रं द्वादशकपालं भूम्यै चरुं यः कामयेत हिरण्यं विन्देय हिरण्यं मोप नमेत्" (तैसं २·३·२) इत्यस्यास्त्रिहविष्काया आग्नेयस्य पुरोनुवाक्या– 'स प्रत्नवत्' इति गायत्री॥ हे [V]अग्ने, [V]सः त्वं [V]प्रत्नवत् पुराणार्हम्। यद्वा– प्रागिव। यद्वा–पुरातनेनेव [V]नवीयसा नवतरेण [V]द्युम्नेन यशसा [२३]धनेन वा [V]संयता त्वमेव संगच्छता। "शतुरनुमः°" (पा ६·१·१७३) इति व्यत्ययेन न प्रवर्तते। यद्वा– [२४]त्वय्येव [२५]संयता धनेन[२५]। यमेः किपि अनुनासिकलोपे तुक्। कृदुत्तरपदकृतिस्वरत्वम्। संयतशब्दादेव तृतीयाया आकारः। "परादिश्छन्दसि°" (पा ६·२·१९९) इत्युत्तरपदाद्युदात्तत्वम्। ईदृशेन द्युम्नेन [२६]द्योतनशीलेन [V]भानुना भासनशीलेन [V]बृहत् महदिदं विश्वं [V]ततन्थ विस्तारय। छान्दसो लिट्। यद्वा– विश्वं बृहत् भृशं ततन्थ तथा कुर्वंश्चास्माकं हिरण्यलाभहेतुर्भवेति॥

[६०]हिरण्यार्थिनः त्रिहविष्कामिष्टिं विधत्ते– "आग्नेयमष्टाकपालं निर्वपेत् सावित्रं द्वादशकपालं भूम्यै चरुं यः कामयेत हिरण्यं विन्देय हिरण्यं मोप नमेदिति यदाग्नेयो भवत्याग्नेयं वै हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दते सावित्रो भवति सवितृप्रसूत एवैनद्विन्दते भूम्यै चरुर्भवत्यस्यामेवैनद्विन्दत उपैनꣳ हिरण्यं नमति" (तैसं २·३·२) इति। हिरण्यं विन्देय प्रथमतः प्रयत्नं कृत्वा कियदपि [६१]लभेय, [६२]तत ऊर्ध्वं वृद्ध्यादिरूपेणाधिकं स्वयमेव मां प्राप्नुयादिति कामयितुरियमिष्टिः। फलान्तराय त्रिहविष्काम् [६३]एतामेव विधत्ते– "*-वि वा एष इन्द्रियेण वीर्येणर्ध्यते यो हिरण्यं विन्दत एतामेव निर्वपेद्धिरण्यं वित्त्वा नेन्द्रियेण वीर्येण व्यृध्यते" (तैसं २·३·२) इति॥ हिरण्यं लब्धवतश्चोरादिभीत्या कातरत्वमिन्द्रियव्यृद्धिः॥ पुनरपि फलान्तराय तां विधत्ते*– "एतामेव निर्वपेद्यस्य हिरण्यं नश्येद्यदाग्नेयो भवत्याग्नेयं वै हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दति सावित्रो भवति सवितृप्रसूत एवैनद्विन्दति भूम्यै चरुर्भवत्यस्यां वा एतन्नश्यति यन्नश्यत्यस्यामेवैनद्विन्दति" (तैसं २·३·२) इति॥ [६५]मार्गपातनस्थानविस्मृत्यादिना विनष्टस्य हिरण्यस्य पुनर्लाभार्थमियमिष्टिः॥

स इति॥ एतेषु त्रिषु हविःषु प्रथमस्य पुरोनुवाक्यामाह–'स प्रत्नवन्नवीयसाऽग्ने द्युम्नेन संयता। बृहत् ततन्थ भानुना' इति। हे [V]अग्ने, [V]सः त्वं [V]द्युम्नेन हिरण्येन [V]बृहत् [V]ततन्थ महदैश्वर्यं विस्तारय। [६६]किंवत्? [V]प्रत्नवत् पुरातना धनिका उदाराः सन्त ऐश्वर्यं यथा विस्तारयन्ति तद्वत्। कीदृशेन द्युम्नेन?

२३. मै४– अग्नेन। २४. मै– त्वयैव। २५–२५. तं१– स्वधनेन। २६. तं१.मै.लं– 'द्योतनशीलेन' नास्ति।

६०. ड.ड१.हो१–हिरण्यार्थिने। ६१. ड–लभे; अ.उ.जो.पा.हा– लभेयं। ६२. ड.ने.हो१–तत्। ६३. आ.ड–ताम्; ड१.शृं.हो१–तामेव। [*-* शृङ्गेरीवर्जं सर्वेषु लिखितपुस्तकेषु अत्रत्यो भाष्यभागः त्रुटित इव, संचरित इव प्रतिभाति।]। ६४. ड.ड१.ने– मार्गे पातन°। ६५. क.जो. शृं.हा– किं तत्; ड.ड१.ने.हो१– किं च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो (१) नर्या पुरूणि।
अग्निर्भुवद्रयिपती रयीणाꣳ सत्रा चक्राणो अमृतानि विश्वा ॥

नीति। काव्या। वेधसः। शश्वतः। कः। हस्ते। दधानः (१)। नर्या। पुरूणि। अग्निः। भुवत्। रयिपतिरिति रयि-पतिः। रयीणाम्। सत्रा। चक्राणः। अमृतानि। विश्वा ॥

५ तत्रैव याज्या—'नि काव्या' इति त्रिष्टुप्॥ कवेर्भावः काव्यं द्रष्टृत्वं समीचीनदर्शनत्वम्। गुणवचनत्वात् ष्यञ् (पा ५.१.१२४), "सुपां सुलुक्°" (पा ७.१.३९) इति तृतीयाया आकारः। अयम् [v]अग्निः [v]काव्या कवित्वेन आत्मीयेन [v]वेधसः विधातॄन् यजमानान् [v]शश्वतः नित्यान् अविच्छिन्नयागान् [v]नि [v]कः नियमेन करोति। लुङि "मन्त्रे घस°" इति च्लेर्लुक्, लङि वा शपो लुक्, उभयत्र "बहुलं छन्दस्यमाङ्योगेऽपि" (पा ६.४.७५) इत्यडभावः। लेटि
१० वा शपो लुक्। किं कुर्वन्नित्याह— [v]हस्ते [v]दधानः ददानः प्रत्यक्षवत् प्रयच्छन्नित्यर्थः। किं? नर्याणि [v]नरेभ्यो हितानि धनानि हिरण्यादीनि। गवादिर्द्रष्टव्यः (पा ५.१.२)। "तत्र साधुः" (पा ४.४.९८) इति वा यत्। [v]पुरूणि बहूनि। किं च— अयमित्थं कुर्वन् [v]रयीणां वा [v]रयिपतिः सर्वेषां धनानां नित्यं पालकः [v]भुवत् भवेत्। शपो लुकि पूर्ववत् गुणाभावः, "परादिश्छन्दसि°" (पा ६.२.१९९) इत्युत्तरपदाद्युदात्तत्वम्, "नामन्यतरस्याम्" (पा ६.१.१७७)
१५ इति नामः। पुनश्च किं कुर्वन्नित्याह— [v]सत्रा सहभूतानि। पूर्ववदाकारः, शेर्वा लोपः, छान्दसो वा डाच्। [v]चक्राणः ददानः सहैव दातुं शक्तः। शक्तौ चानश् (पा ३.२.१२९)। "बहुलं छन्दसि" (पा २.४.७६) इति शपः श्लुः, यद्वा— छान्दसस्य लिटः कानजादेशः। किं चक्राणः? विश्वानि [v]अमृतानि अमरणहेतुभूतानि हिरण्यादीनि॥

[v]नवीयसा अत्यन्तनूतनेन पितृपितामहाद्युपार्जितव्यतिरिक्तेनेदानीमेवार्ज्यमानेन, [v]संयता अस्मान् प्राप्नुवता,
२० [v]भानुना [६६-]कालुष्याभावादत्यन्तं भासमानेन-[६६]॥

नीति॥ तत्रैव याज्यामाह—'नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि। अग्निर्भुवद्रयिपती रयीणाꣳ सत्रा चक्राणो अमृतानि विश्वा' इति॥ कविः पण्डितस्तस्य भावः काव्यं पाण्डित्यं बुद्ध्यतिशयः। अयम् [v]अग्निः [v]काव्या [६७]काव्येन स्वकीयबुद्ध्यतिशयेन [६८]यजमानान् [v]शश्वतः [६९]निरन्तरानुष्ठानशाश्वतिकान् [v]वेधसः विधातृसदृशान् [v]नि [v]कः नितरां करोतु। कीदृशोऽग्निः? [v]नर्या मनुष्येभ्यो हितानि
२५ [v]पुरूणि बहुधनानि [v]हस्ते [v]दधानः। किं च सोऽग्निः [v]रयीणां [v]रयिपतिः [v]भुवत् सर्वेषां धनानाम् अधिपतिरासीत्। अतः [v]अमृतानि हिरण्यानि [v]विश्वा सर्वाणि [v]सत्रा [v]चक्राणः सहस्थितानि कर्तुं शक्तः। तादृशोऽस्मभ्यं हिरण्यं ददातु॥

२७. मै४— नृभ्यो।

६६-६६. ने— तीक्ष्ण्याभावात् अत्यन्तसहसा तेजोवता। ६७. अ.इ.उ.जो.पा.हा— वाक्येन।
३० ६८. ने— यजमानवशतः। ६९. ड.ने— °ष्ठानेन शश्वतः शाश्वतिकान्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदम् ॥
वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥

हिरण्यपाणिमिति हिरण्य-पाणिम् । ऊतये । सवितारम् । उपेति । ह्वये ।
सः । चेत्ता । देवता । पदम् ॥ ५
वामम् । अद्य । सवितः । वामम् । उ । श्वः ।
दिवेदिव इति दिवे-दिवे । वामम् । अस्मभ्यमित्यस्म-भ्यम् । सावीः ।
वामस्य । हि । क्षयस्य । देव । भूरेः । अया । धिया । वामभाज इति वाम-भाजः । स्याम ॥

अथ सावित्रस्य द्वादशकपालस्य पुरोनुवाक्या– 'हिरण्यपाणिम्' इति गायत्री ॥ व्याख्यातेयं ग्रहेषु (तैसं १·४·२५)। [V]हिरण्यपाणिं हिरण्याभरणपाणिं रसहरणरश्मिं हितरमणीयरश्मिं वा [V]सवितारम् [V]उप [V]ह्वये उपेत्याह्वयामि, [V]ऊतये रक्षणाय। [V]सः खलु [V]चेत्ता ज्ञाता अस्माकं [V]पदम् आस्पदं [V]देवता अस्माकं स एवेति ॥ १०

तत्रैव याज्या– 'वाममद्य' इति त्रिष्टुप् ॥ इयमपि तत्रैव व्याख्याता (तैसं १·४·२३)। हे [V]सवितः, [V]वामं वननीयं हिरण्यादि धनम् [V]अद्य अस्मिन्नहनि [V]सावीः सुवः प्रेरय । [V]श्वः अपि [V]वामम् एव सुवः। किं बहुना– [V]दिवेदिवे दिनेदिने [V]अस्मभ्यं [V]वामम् एव सुवः [२९]-अस्मभ्यं वाममेव सुवः-[२९] । किं च– हे [V]देव [V]भूरेः [V]वामस्य [V]क्षयस्य निवासस्य यद्वामं तद्वाजः [V]स्याम । यद्वा– अद्य श्वः क्रमेण सर्वदा [V]वामभाजः वयं वामस्य क्षयस्य निवासस्यापि संबन्धिनो भूयास्म । [V]अया [V]धिया अनया बुद्ध्या [२९]वामप्राप्तिविषयया । यद्वा– अनेन कर्मणा यागात्मकेनेति ॥ १५

हिरण्यपाणिमिति ॥ द्वितीयस्य हविषः पुरोनुवाक्यामाह – 'हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम्' इति। अस्मभ्यं दातुं हिरण्यं पाणौ यस्य सः[७०] हिरण्यपाणिस्तादृशं [V]सवितारम् उपगम्य [V]ह्वये आह्वयामि। किमर्थम्? [V]ऊतये रक्षणाय। [V]सः सविता देवतारूपः [V]पदम् अस्मद्योग्यं स्थानं [V]चेत्ता ज्ञाता ॥ २०

वाममिति ॥ अत्रैव याज्यामाह– 'वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः। वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम' इति। हे [V]सवितः, [V]अद्य [V]अस्मभ्यं [V]वामं [७१][V]वननीयं कर्मफलं [V]सावीः प्रेरय देहीत्यर्थः। [V]श्वः अपि [V]वामं सावीस्तदूर्ध्वं दिने दिने [V]वामं सावीः। हे [V]देव, [V]वामस्य वननीयस्य [V]भूरेः विस्तीर्णस्य [V]क्षयस्य स्वर्गनिवासस्य सिद्धये [V]अया अनया [७२][V]धिया श्रद्धायुक्तबुद्धया [V]वामभाजः वननीयकर्मानुष्ठायिनः [V]स्याम ॥ २५

२८–२८. पं२.मै४.लं– 'अस्मभ्यं वाममेव सुवः' नास्ति। २९. तं१.मै.लं– अहंप्राप्ति°।

७०. इ–असौ; ड–'सः' नास्ति। ७१. ने.हो१– वननशील°; ड–वननशीलं। ७२. ड.शृं.हो१–'धिया' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बडित्था पर्वतानां खिद्रं बिभर्षि पृथिवि।
प्र या भूमि प्रवत्वति मह्ना जिनोषि (२) महिनि ॥

बट्। इत्था। पर्वतानाम्। खिद्रम्। बिभर्षि। पृथिवि।
प्रेति। या। भूमि। प्रवत्वति। मह्ना। जिनोषि (२)। महिनि ॥

अथ भूम्याश्वरोः पुरोनुवाक्या–'बडित्था' इत्यनुष्टुप्॥ [V]बट् [V]इत्था सत्यम्, इत्थमिदं यद्वक्ष्यामः। किं पुनस्तदित्याह– हे [V]पृथिवि विस्तीर्णे हे [३०]भूमे। " कृदिकारादक्तिनः " (का-पा ४.१.४५ वा) इति ङीष्। हे [V]प्रवत्वति, प्रवत् प्रगतं प्रवणम्। " उपसर्गाच्छन्दसि° " (पा ५.१.११८) इति वतिः। हे तद्वति। " तसौ मत्वर्थे " (पा १.४.१९) इति भत्वम्। हे [V]महिनि महनीये पूज्ये। महेरौणादिक इनिच्, गौरादित्वात् ङीष् (पा ४.१.४१)। यद्वा– मह उत्सवः प्रजानामिति, हे तद्वति। ईदृशी त्वं [V]पर्वतानां [V]खिद्रं [३१]छिद्रं बिलं हिरण्यादिपूर्णं [V]बिभर्षि। [V]या त्वं द्रविणवती धारय विस्तीर्णा खलु त्वं, या त्वं [V]मह्ना माहात्म्येन। महेरौणादिको निप्रत्ययः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। [V]प्र [V]जिनोषि प्रकर्षेण प्रजास्तर्पयसि, यस्मात् प्रवणवती अत एव पूजिता। जिवि प्रीणने, ईदित्वान्नुम् (पा ७.१.५८), वकारस्य छान्दसं संप्रसारणम्। यद्वा– जयतेर्ण्यत्ययेन श्लुः। केचिदाहुः– सत्यमित्थं पर्वतानां मेखलानां खिद्रं [३२]छेदनप्रवहमुदकं बिभर्षि। पृथुत्वात् प्रभूतं वर्षोदकं बिभर्षि। या त्वं प्र(व)णवती प्रवणगामिनाम् उदकेन मह्ना महता विश्वमिदं प्रकर्षेण जिनोषि तर्पयसि, अत एव [३३]महनीयाऽसि। अनेनैव क्रमेण सर्वहिरण्यादिलाभहेतुत्वात्॥

बडित्थेति॥ तृतीयहविषः पुरोनुवाक्यामाह– ' बडित्था पर्वतानां खिद्रं बिभर्षि पृथिवि। प्र या भूमि प्रवत्वति मह्ना जिनोषि महिनि ' इति। हे [V]पृथिवि, त्वं [V]पर्वतानां संबन्धिनं [V]खिद्रं खेदजनकं भारम् [V]इत्था [V]बट् [V]बिभर्षि। इत्थमिति हस्तेनाभिनयः। बट् बाढं दृढमित्यर्थः। हे [V]भूमि, त्वं [V]मह्ना त्वदीयेन महिम्ना [V]या [V]प्र [V]जिनोषि यान् पर्वतान् प्रकर्षेण प्रीणयसि तेषां खिद्रमिति पूर्वत्रान्वयः। ' प्रवत्वति महिनि ' इति द्वयं संबुद्ध्यन्तस्य भूमिपदस्य विशेषणम्। [V]प्रवत्वति प्रवणवति [V]महिनि महत्त्वयुक्ते पूजायुक्ते वा। अत्र [७३]प्रवणवत्त्वेन जलसमृद्धिः सूच्यते। तया च जलसमृद्धया यान् प्राणिनः प्रीणयसि तानपि बाढं बिभर्षीत्यपि योजनीयम्॥

३०. पं२.लं– भूमि भूमे। ३१. मै– 'छिद्रं' नास्ति। ३२. तं१– खेदन°। ३३. तं१– महनीया।

७३. ने–प्रणवयुक्तत्वेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

स्तोमासस्त्वा विचारिणि प्रति ष्टोभन्त्यक्तुभिः ।
प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥

स्तोमासः । त्वा । विचारिणीति वि-चारिणि । प्रतीति । स्तोभन्ति । अक्तुभिरित्यक्तु-भिः ।
प्रेति । या । वाजम् । न । हेषन्तम् । पेरुम् । अस्यसि । अर्जुनि ॥

तत्रैव याज्या–'स्तोमासस्त्वा' इत्यनुष्टुप् ॥ हे भूमे [v]विचारिणि, विविधं चरणं गमनं भक्षणं वा ५
विचारः, हे तद्वति । [v]स्तोमासः स्तोमाः स्तोत्राणि [v]प्रतिष्टोभन्ति प्रत्येकं प्रतिमुखा वा स्तुवन्ति ।
[v]अक्तुभिः त्वदीयैः कर्मभिः [३४]अपदानैः [३५]स्तुतिभिः स्तोत्रभक्तिभिः [३६]वा, [v]या त्वं तथा [३७]स्तूयमाना
हे [v]अर्जुनि निर्मले । "अन्यतो ङीष् (पा ४·१·४०) इति ङीष् । [v]हेषन्तं [३८]शब्दवन्तं दुष्टं [v]वाजं
[v]न अश्वमिव, यथा दुष्टो वाजी निरर्थकान् शब्दान् करोति एवं [३९]निरर्थकशब्दाभिधायिनम् अमन्त्रार्थ- १०
ज्ञमिति। किं च–[४०]वाजमिव बलमिव [v]पेरुम् अश्वमिव पानशीलम्, उपलक्षणत्वात् पानाशनमात्रकृतार्थम्
[४१]अयज्ञार्हं पुरुषं [४२-४३]प्र [v]अस्यसि [४३] त्वं खल्वर्जुनीति । सर्वे [४३]स्तोत्रादयस्त्वामेव स्तुवन्ति । तेषां च
मध्ये वाजिनमिव हेषन्तमिव पेरुं त्वं नाद्रियसे तस्मात् तादृशान् अस्मान्[४४] त्वामेव स्तुवतो हिर-
ण्यादिदानेन तृप्तान् कुर्विति । "उपसर्गात् सुनोति°" (पा ८·३·६५) इत्यादिना स्तोभतेः षत्वम् ॥

स्तोमास इति ॥ तत्रैव याज्यामाह–'स्तोमासस्त्वा विचारिणि प्रति ष्टोभन्त्यक्तुभिः । प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि' इति । विविधश्चारो जनानां संचारो यस्यां पृथिव्यां सा विचारिणी, तथाविधे १५
हे पृथिवि, [v]स्तोमासः प्राणिनां संघाः [v]अक्तुभिः अभिव्यक्तैः [७४]नानाविधसस्यैर्निमित्तभूतैः [७५-७६]त्वा त्वां
[v]प्रति [v]ष्टोभन्ति प्रत्येकमाश्रयन्ते । हे [v]अर्जुनि धवले निर्मले पृथिवि, [v]या त्वं [v]पेरुं पानादिभोग्यवस्तुकामिनं
प्रकर्षेण [v]अस्यसि भोगाय प्रेरयसि । कमिव ? [v]हेषन्तं [v]वाजं [v]न वाजिनमिव । यथा लोके बाह्यादिप्रदेशे
तुरङ्गान्तरं दृष्ट्वा स्वोत्साहेन हेषाशब्दं कुर्वन्तमुत्तमाश्वं सादिनोऽभ्यासाय प्रेरयन्ति तद्वत् ॥ सोमवामिनश्चरुं
विधातुं प्रस्तौति–"इन्द्रस्त्वष्टुः सोममभीषहाऽपिबत् स विष्वङ्व्याच्छत् स इन्द्रियेण सोमपीथेन व्यार्ध्यत स २०
यदूर्ध्वमुदवमीत् ते श्यामाका अभवन्त्स प्रजापतिमुपाधावत् तस्मा एतꣳ सोमेन्द्रꣳ श्यामाकं चरुं निरवपत्
तेनैवास्मिन्निन्द्रियꣳ सोमपीथमदधात्" (तैसं २·३·२) इति। इन्द्रो विश्वरूपं त्वष्टुः पुत्रं हत्वा सोमयागे
तेन [७६]त्वष्ट्रा स्वयमनाहूतः सन् कुपितो यज्ञस्य भ्रंशं कृत्वा प्रसह्य [७७]तदीयसोममपिबदिति पञ्चमप्रपाठके
(तैसं २·५·२) प्रपञ्चयिष्यते । तदत्र संगृह्योच्यते । अभीषहा बलात्कारेणेत्यर्थः । सोमं पीत्वा
त्वष्टुर्भीतो नानादिगभिमुखो विशेषेण पलायनं कृतवान् । पलायमानश्च [७८]तदुपघातादिन्द्रियस्वास्थ्यकरेण २५

३४. मै४– अपादानैः । ३५. तं१.मै४.लं–अक्तुभिः । ३६. तं१.मै.लं–'वा' नास्ति । ३७. मै४–ज्ञायमाना । ३८. लं–'शब्दवन्तं' नास्ति । ३९. तं१.पं२.लं– °कपदाभिधायिनम् । ४०. पं२.लं–वाजिनमिव । ४१. मै– अयज्वानम्; तं१.लं–'अयज्ञार्हं' नास्ति । ४२–४२. मै४– प्रकर्षेण त्यजसि । ४३. मै४–स्तोतारस्त्वा° । ४४. तं१– 'अस्मान्' नास्ति ।

७४. ड.ने.हो१–°विधसंख्यैर् °। ७५. आ.क–'त्वा' नास्ति । ७६. अ.इ.उ.जो.ना.पा.हा– ३०
त्वष्ट्रा यः । ७७. ड– तदीयं सोम°; आ.इ.पा–'तदीय°' नास्ति । ७८. अ.उ.पा– °स्वास्थ्यकारेण ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः ।
अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यच्छ ॥

ऋदूदरेण । सख्या । सचेय । यः । मा । न । रिष्येत् । हर्यश्वेति हरि-अश्व । पीतः ।
अयम् । यः । सोमः । न्यधायीति नि-अधायि । अस्मे इति ।
तस्मै । इन्द्रम् । प्रतिरमिति प्र-तिरम् । एमि । अच्छ ॥

" एतामेव निर्वपेद्धिरण्यं वित्त्वा " (तैसं २·३·२) [४५-४५]इतस्या अपि[४५] याज्यानुवाक्या भवन्ति " एतामेव निर्वपेद्यस्य हिरण्यं नश्येत् " (तैसं २·३·२) इत्यस्या अप्येता एव ॥

" यः सोमवामी स्यात् तस्मा एतꣳ सोमेन्द्रꣳ श्यामाकं चरुं निर्वपेत् " (तैसं २.३·२) [४६]इत्येतस्याः पुरोनुवाक्या–'ऋदूदरेण' इति त्रिष्टुप् ॥ [v]ऋदूदरेण मृदूदरेण यस्मिन्नन्तःप्रविष्टे अपान्ते उदरस्य मृदुत्वं भवति तादृशेन । छान्दसो वर्णलोपः, उत्तरपदप्रकृतिस्वरत्वं च । [४७-v]सख्या समानख्यानेन[४७] माममुञ्चता सोमेन रसात्मना [v]सचेय संगसीय । पुनश्च विशेष्यते– हे [v]हर्यश्व इन्द्र, अयं सोमः [v]पीतः[४८] [v]न [v]रिष्येत् नोद्यात् नो हिंस्यात् । अपि चास्माकं [v]यः [v]अयं [v]सोमः [v]न्यधायि उदरे निधीयते [v]तस्मै [४९-४९]तदर्थं तत्प्रधानार्थम्[४९] [v]इन्द्रं [v]प्रतिरं प्रवर्तयितारं [v]अच्छ [v]एमि आभिमुख्येन भजेय ॥

[७९]सोमपानेन व्यृद्धोऽभूत् तदानीं [७९]स इन्द्रः यत् [८०-८०]सोमरसस्वरूपमूर्ध्वं मुखेन[८०] वमनं कृतवान्, तद्भूमौ पतित्वा श्यामाकरूपेण निष्पन्नम् । ततः स इन्द्रः [८१]प्रजापत्युपदेशेन सोमेन्द्रचरुं कृत्वा स्वोदर एव [८२]जरणेनेन्द्रियप्रदं सोमपानं प्राप्तवान् ॥ अथ विधत्ते– ' वि वा एष इन्द्रियेण सोमपीथेनर्ध्यते यः सोमं वमिति यः सोमवामी स्यात् तस्मा एतꣳ सोमेन्द्रꣳ श्यामाकं चरुं निर्वपेत् सोमं चैवेन्द्रं च स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियꣳ सोमपीथं धत्तो नेन्द्रियेण सोमपीथेन व्यृध्यते " (तैसं २·३·२) इति । प्रातःसवनादिप्रयोगे यो यजमानः [८३]पीतं सोमं [८४]वमिति [८५-८५]स एष सोमस्य [८६]वमनादिन्द्रियसामर्थ्यप्रदेन[८५] सोमपानेन व्यृद्धो भवति । तादृशसोमवामिनो यजमानस्यायं चरुः ॥ द्वौ देवौ द्रव्यं च प्रशंसति–" यत् सौम्यो भवति सोमपीथमेवाव रुन्द्धे यदैन्द्रो भवतीन्द्रियं वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्द्धे श्यामको भवत्येष वाव स सोमः साक्षादेव सोमपीथमव रुन्द्धे " (तैसं २·२·३) इति ॥

ऋदूदरेणेति ॥ अत्र पुरोनुवाक्यामाह– ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः । अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यच्छ ' इति । हे [v]हर्यश्व इन्द्र, [v]यः सोमः [v]पीतः [v]मा [v]न

४५–४५. मै४– इत्येतस्या एव; तं१.लं– एतस्या एव। ४६. तं१– अस्याः । ४७–४७. लं– समो समानाख्यानेन। ४८. पं२– मया पीतः । ४९–४९. मै४– तदवस्थानार्थम् ।

७९. आ.श्रं– 'सः' नास्ति । ८०–८०. इ.क.ना.हा.हो१– °स्वरूपमूर्ध्वमुखेन; ड.ने–स्वरूपम् और्ध्वमुखेन । ८१. क–प्रजापत्युद्देशेन । ८२. ड.ने.हो१– पूरणेने° । ८३. ने–भक्षितम् । ८४. ड.जो. ना.श्रं–वमति । ८५–८५. ने– स सोमवामी स्यात् जरणादिन्द्रियसामर्थ्यात् प्रसादेन । ८६. इ.श्रं– क्षरणादि°; हो१– अजरणादि° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आपान्तमन्युस्तृपलप्रभर्मा
धुनिः शिमीवाञ्छरुमाꣳ ऋजीषी ।
सोमो विश्वान्यतसा वनानि
नार्वागिन्द्रं प्रतिमानानि देभुः ॥

आपान्तमन्युरित्यापान्त-मन्युः । तृपलप्रभर्मेति तृपल-प्रभर्मा । ५
धुनिः । शिमीवान् । शरुमानिति शरु-मान् । ऋजीषी ।
सोमः । विश्वानि । अतसा । वनानि ।
न । अर्वाक् । इन्द्रम् । प्रतिमानानीति प्रति-मानानि । देभुः ॥

तत्रैव याज्या— ' आपान्तमन्युः ' इति त्रिष्टुप् ॥ द्वावपि सोमेन्द्रौ प्राधान्येन स्तूयेते । [v]आपान्तमन्युः सर्वतोऽपगतमन्युः । अम गत्यादिषु, निष्ठायां " रुष्यमत्वर° " (पा ७·२·२८) १०
इतीडभावः, " गतिरनन्तरः " (पा ६·२·४९) इति गतेः प्रकृतिस्वरत्वम् । यद्वा— मन्युर्दीप्तिः, आपान्तमन्युः आपतितदीप्तिः । पण व्यवहारे स्तुतौ च, पन च, इत्यस्य निष्ठायां छान्दस इडभावः । [v]तृपलप्रभर्मा, त्रयाणामुपलानां समाहारस्तृपलं, त्र्युपलमिति वक्तव्ये पूर्वपदस्य [५०]संप्रसारणे

[r]रिष्येत् वमनेन मां न हिंस्यात् तादृशेन [r]सख्या सखिवद्धितकारिणा सोमेन [r]सचेय संगतो भूयासम् । कीदृशेन सोमेन ? [r]ऋदूदरेण । अत्र मकारो लुप्तः । [८७-८७]वमनाभावान्मृदुत्वं स्वास्थ्यमापन्नमुदरं यस्य सोमस्य १५
स एष ऋदूदरः[-८७] । सः [r]अयं [r]सोमः [r]अस्मे [८८]अस्मदीयोदरे [r]न्यधायि निहितः । [r]तस्मै तदर्थं सोमस्य [८९]जरणार्थं [r]प्रतिरं प्रकर्षेण [९०-९०]वमनापदं तारयितारम्[-९०] [v]इन्द्रम् [v]अच्छ [v]एमि आभिमुख्येन प्राप्नोमि भजामीत्यर्थः ।

आपान्तमन्युरिति ॥ तत्रैव याज्यामाह— ' आपान्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाꣳ ऋजीषी । सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः ' इति । अत्र पादत्रयेण सोमस्य २०
स्तुतिश्चतुर्थपादेनेन्द्रस्य । अन्ततोऽपगत आपान्तः सर्वात्मना विनष्टो मन्युः कोपो यस्य सोऽयम् [r]आपान्तमन्युः । बहुभिर्ग्रावभिरभिषूयमाणः [९१]अपि न क्रुध्यतीत्यर्थः । त्रिषु सवनेष्वभिषवार्थमासादिता

५०. तं१.लं— संप्रसारणम् ।

८७–८७. ड–वमनाभावान्न मृदुत्वं स्वास्थ्यमापन्नमस्मदुदरं...; ने–वमनविनाभावात् मृदु तर्हि स्वास्थ्यमापन्नमस्मदुदरं यस्य सोमस्य एवम् ऋदूदरः; शृं–°मापन्नम् अस्मदुदरं यस्य सोमस्य स एव ऋदूदरः; २५
हो१–वमनाभावात् न मृदु स्वास्थ्यमापन्नमस्मदुदरं यस्य सोमस्य स एष मृदूदरः । ८८. अ.इ.उ.क.ने.पा. हो१–मदीयोदरे°; जो.ना.हा–अस्मदीये उदरे । ८९. ने– भक्षणार्थं; ड–क्षरणार्थम् । ९०–९०. ने– वमनापनोदनार्थं वारयितारम्; हो१– वमनापराधं वारयितारम्; ड– वमनापदार्थं धारयितारम् । ९१. हो१– 'अपि' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तरपदस्यादिलोपः, " परादिश्छन्दसि° " (पा ६·२·१९९) इत्युत्तरपदाद्युदात्तत्वम्। त्रिभिरुपलैः ग्रावभिः प्रभर्मा प्रहारोऽभिषवो यस्य [५१]सः तथोक्तः। हरतेरौणादिको मनिन्। " ह्मग्रहोर्भः° " (पा ८·२·३२ वा १) इति भत्वम्। [V]धुनिः कम्पनशीलः। धूञ् कम्पने, औणादिको निन्प्रत्ययः। यद्वा– " °धूञ्प्रीञोर्नुक्° " (पा ७·३·३७ वा १) इति नुकि धूनयतेरौणादिक (उ ५५७) इन्प्रत्ययः, धातोश्च ह्रस्वत्वम्। धूनयिताऽङ्गानां धुनिः। [V]शिमीवान् कर्मवान् मानाभिषवपवनग्रहणादिसंततबहुकर्मा। [V]शरुमान्, शरणं शरुः हिंसा अभिषवपीडा, तद्वान्। [V]ऋजीषी निःसारीकृतः। एवं ग्रावग्रहारादिसद्भावेऽपि यः [V]सोमः अपगतमन्युः आगतदीप्तिरेव भवति, स एवास्माकं [V]विश्वानि [V]अतसा अतसानि अविच्छिन्नानि। अततेरौणादिकोऽसच् (उ ३९७)। [V]वनानि वननीयानि धनानि। यद्वा– अतसानि शुष्काणि, वनानि सरसानि, तानि विश्वान्यपि सोम एव, सर्वौषधिराजत्वात् सोमस्य। एवं [५२]वरणीयवस्तुसाम्यादिना सोमः स्तुतः। इदानीमिन्द्रस्तुतिरूपमे [तिरनुपमै] वेति दर्शयति– [V]अर्वाक् अर्वाचीनानि [V]प्रतिमानानि [५३]उपमानानि [V]इन्द्रं [V]न एव [V]देभुः दम्भुवन्ति न बाधन्ते। समत्वेन स्पर्शनमेव वस्त्वन्तरैरिन्द्रस्य बाधः। एवंगुणकाविमौ सोमेन्द्रौ [५४]व्यपगतवान्तदोषं मा कुरुतमिति। " श्रन्थिग्रन्थिदम्भिस्वञ्जीनां च " (का-पा १·२·६ वा) इति लिटः कित्त्वम्। शरुमानित्यस्य पूर्ववद्भुत्वानुनासिकौ (पा ८·३·१, ९)॥

उपलास्तृपलास्तेषां प्रभर्म प्रहारो यस्य [९२]सोमस्य सोऽयं [R]तृपलप्रभर्मा। [V]धुनिः कम्पमानः [९३]प्रहारैरितस्ततः कम्पते। शिमीशब्दः कर्मवाची। शिम्यो बहुविधानि अभिषवशोधनग्रहणादीनि कर्माण्यस्य सन्तीति [V]शिमीवान्। शरवोऽभिषवकाले शीर्णावयवाः, ते च बहवो यस्यासौ [V]शरुमान्, रसनिष्पीडनेन यदवशिष्टं नीरसं तदृजीषं तदस्यास्तीति [V]ऋजीषी। ईदृशः [V]सोमः [V]विश्वानि [V]वनानि वर्धयतीति शेषः। " सोमो वा ओषधीनाꣳ राजा " (द्र. तैसं ३·४·५; १·६·१) " सोमो वनस्पतीनाम् " (तैसं १·८·१०), " वनस्पतिगते सोमे " इत्यादि श्रुतिस्मृतिभ्यां [९४]चान्द्ररश्मिभिर्वनस्याभिवृद्धिदर्शनाच्च वर्धयितृत्वम्। कीदृशानि वनानि? [V]अतसा सर्वत्र [९५]संततानीत्यर्थः। [V]अर्वाक् अर्वाचीनानि [V]प्रतिमानानि लौकिकोपमानानि [९६९७]इन्द्रं [V]न [V]देभुः [V]न[९७] हिंसन्ति। नीचैरुपमानैः स्वसाम्यापादनम् एवोत्तमस्य[९८] हिंसा, तां कर्तुमुपमानानि न प्रवर्तन्त इत्यर्थः॥

५१. तं१.मै.लं– 'सः' नास्ति। ५२. मै४– वर्णनीय°। ५३. तं१.मै.लं– 'उपमानानि' नास्ति। ५४. तं१– °वान्तरोषम्; लं– °वान्तरेषम्।

९२. जो.ड.ना.ने.हा.हो१– 'सोमस्य' नास्ति। ९३. ने– प्रहारात् ततः। ९४. ने.शृं.हो१– °र्वनस्पतिवृद्धि°; ड–चन्द्ररश्मिभिर्वनस्पतिवृद्धि°। ९५. अ.उ.पा– संतप्तानीत्यर्थः; ड–संवृतानीत्यर्थः। ९६. ड.ने.शृं– 'इन्द्रं' नास्ति। ९७. ने.शृं–नैव। ९८. अ.उ.क.पा– एवोत्तमास्य; इ–एवोत्तम°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्र (३)सुवानः सोम ऋतयुश्चिकेतेन्द्राय ब्रह्म जमदग्निरर्चन् ।
वृषा यन्ताऽसि शवसस्तुरस्यान्तर्यच्छ गृणते धर्त्र दृꣳह ॥

प्रेति (३) । सुवानः । सोमः । ऋतयुरित्यृत-युः । चिकेत । इन्द्राय । ब्रह्म । जमदग्निः । अर्चन् । वृषा । यन्ता । असि । शवसः । तुरस्य । अन्तः । यच्छ । गृणते । धर्त्रम् । दृꣳह ॥

अथ सोमवामी ह वा अन्यो भवत्यन्यः सोमातिपवितः स यः सोमातिपवितः स्यात् ५
"तस्मा एतं सोमेन्द्रं श्यामाकं चरुं निर्वपेत्" (तैसं २.३.२) [५५]इत्यस्यैषा पुरोनुवाक्या–'प्र सुवानः' इति त्रिष्टुप् ॥ [V]सुवानः अभिषुण्वानः । विकरणस्य लुक्, लिटि वा कानचि (पा ३.२.१०६) द्विर्वचनाभावः, अभ्यासलोपो वा । [V]सोमः इति व्यत्ययेन प्रथमा, सोमं सुन्वानो यजमानः । "सुपां सुलुक्°" (पा ७.१.३९) इति वा स्वादेशः । सोमायतेर्वा पचाद्यच् (पा ३.१.१३४)। वृषादित्वादाद्युदात्तत्वम् (पा ६.१.२०३) । [V]ऋतयुः[५६] ऋतं सत्यं यज्ञं वा आत्मन इच्छन् । क्यचि १०
"न च्छन्दस्यपुत्रस्य" (पा ७.४.३५) इतीत्वाभावः, "क्याच्छन्दसि" (पा ३.२.१७०) इत्युप्रत्ययः । [V]प्र [V]चिकेत प्रकर्षेण जानाति । [५७]कित ज्ञाने । [V]इन्द्राय इन्द्रार्थं [V]ब्रह्म परिवृढम् एतदन्नं हवीरूपं प्र चिकेत [V]जमदग्निः । जमु अदने । नित्यं जमन् अदन् हवींषि भुञ्जानः, एवं यस्याग्निः स जमदग्निः । उपमानपूर्वपदं वा, [५८]जमदग्नितुल्यः । [V]अर्चन् पूजयन् इन्द्रमेव बहु मन्यमानः । यद्वा– इन्द्रमर्चन् । कर्मणि चतुर्थी । यत् सोमं सुनुते, यच्चेयक्षते, यच्च हविः प्रकर्षेण जानाति, १५
यच्चास्याग्निः सदा हविर्भुञ्जानो भवति तत् सर्वमिन्द्रमर्चयितुं करोति यजमानः । हेतौ शतृप्रत्ययः (पा ३.२.१२६)। अर्च पूजायामुदात्तेत् भौवादिकः । तेनाण्यन्तत्वाद्यजमानेऽपि परस्मैपदमेव । यस्मादेवं तस्मात् हे इन्द्र, त्वं [V]वृषा वर्षिता कामानां [V]यन्ता यमयिता [५९]यथायमतिसारी

**प्रेति ॥ तत्रैव विकल्पितां पुरोनुवाक्यामाह– 'प्र सुवानः सोम ऋतयुश्चिकेतेन्द्राय ब्रह्म जमदग्निरर्चन् । वृषा यन्ताऽसि शवसस्तुरस्यान्तर्यच्छ गृणते धर्त्र दृꣳह' इति । [V]ऋतयुः यज्ञमिच्छुर्यजमानः २०
[V]सोमः [V]सुवानः सोममभिषुण्वन् [V]इन्द्राय [V]ब्रह्म इन्द्रार्थं बृहत् सोमपानं [V]प्र [V]चिकेत प्रकर्षेण जानाति । कीदृशो यजमानः ? [V]जमदग्निः एतन्नामकमुनिसदृशः । किं कुर्वन् ? [V]अर्चन् स्तुतिभिः पूजयन् । हे इन्द्र, त्वं [V]वृषा फलस्य वर्षयिता [V]यन्ता [V]असि सोमस्य नियामकोऽसि । कीदृशस्य ? [V]शवसः बलवतः, उदरे स्थापयितुमशक्यस्येत्यर्थः । [V]तुरस्य वमनाय त्वरमाणस्य । [V]अन्तः [V]यच्छ नियन्तृत्वादुदरमध्ये तं [९९]सोमं [१००]जरयितुं नियच्छ । [V]गृणते त्वां स्तुवते यजमानाय [V]धर्त्रं [V]दृꣳह सोमस्य धारकं वायुं दृढीकुरु ॥ २५**

५५. तं१– इति तस्या एषा । ५६. पं२– सनियतः । ५७. तं१.लं– चिकित । ५८. तं१.मै– जमदग्निसूल्यर्थ (?)। ५९. तं१– यथाति° ।

९९. ड.ने.हो१– 'सोमं' नास्ति । १००. ने.शृं– 'जरयितुम्' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

सबाधस्ते मदं च शुष्मयं च ब्रह्म नरो ब्रह्मकृतः सपर्यन् ।
अर्को वा यत् तुरते सोमचक्षास्तत्रेदिन्द्रो दधते पृत्सु तुर्याम् ॥

सबाध इति स-बाधः । ते । मदम् । च । शुष्मयम् । च ।
ब्रह्म । नरः । ब्रह्मकृत इति ब्रह्म-कृतः । सपर्यन् ।
अर्कः । वा । यत् । तुरते । सोमचक्षा इति सोम-चक्षाः ।
तत्र । इत् । इन्द्रः । दधते । पृत्स्विति पृत्-सु । तुर्याम् ॥

न भवति तथाऽवस्थापयिता त्वम् [V]असि । कस्य ? [V]शवसः बलवतः । मत्वर्थीयो लुप्यते । [V]तुरस्य त्वरमाणस्य अधो निःसरतः । तुर त्वरासंभ्रमयोः इत्यस्मात् इगुपदलक्षणः कः, (पा ३·१·१३५)। तस्मात् सोममतिसरन्तम् [V]अन्तः [V]यच्छ [६०]-अन्तरेव उदर एव-[६०] नियमय यथाऽतो नातिसरेत् । [V]गृणते त्वामेव स्तुवानाय यजमानाय । " शतुरनुमः° " (पा ६·१·१७३) इति चतुर्थ्या आद्युदात्तत्वम् । तदर्थं किं कर्तव्यमिति चेत् श्रूयतां—[V]धर्त्रम् अपि तस्य [६१]सोमस्य धारणसमर्थं वायुं [V]दृंह [६१]-दृढं कुरु-[६२] ॥

तत्रैव याज्या—'सबाधः' इति त्रिष्टुप् ॥ बाधनं [६३]बाक्कर्मनिमित्तं बुद्धेर्व्यसनं; तत्सहिताः [V]सबाधः ऋत्विज उच्यन्ते । छान्दसं समासान्तोदात्तत्वम् । यद्वा-सह बाध्यते इति सबाधः । कृदुत्तरपदप्रकृतिस्वरत्वम् । हे सोम, [V]ते तव [V]मदं हर्षं देवानां त्वत्कृतं हर्षं [६४V]शुष्मयं [V]च [V]ब्रह्म, शुष्मं बलं तदिच्छतीति सर्वस्यात्मनो वेति । क्यचि, पूर्ववदीत्वाभावे पचाद्यच् (पा ३.१.१३४)। धा[या धा]तोर्वा " आतोऽनुपसर्गे कः " (पा ३.२.३)। ईदृशं ब्रह्म अन्नं च देवानां त्वत्कृतं त्वत्परिमाणरूपं [V]नरः मनुष्याः ऋत्विजः [V]ब्रह्मकृतः ब्रह्मणे हविष्कर्तारः ब्रह्मणः परिवृढस्य वा तव कर्तारः अभिषवं कुर्वन्तः ते [V]सपर्यन् त्वां पूजयन्ति । छान्दसे लङि अडभावः । लेटि

सबाध इति ॥ तत्रैव विकल्पितां याज्यामाह—'सबाधस्ते मदं च शुष्मयं च ब्रह्म नरो ब्रह्मकृतः सपर्यन् । अर्को वा यत् तुरते सोमचक्षास्तत्रेदिन्द्रो दधते पृत्सु तुर्याम्' इति । हे सोम, [V]नरः मनुष्याः ऋत्विजः [V]ते [१०१]तुभ्यं [V]ब्रह्म इयामाकचरुरूपं परिवृढं हविः [V]सपर्यन् पूजयन्ति समर्पयन्ति । कीदृशस्य [१०२]ते? [V]सबाधः । धकारान्तो बाध्-शब्दः [१०३]अभिषवकृतमुपद्रवं ब्रूते, तेनोपद्रवेण सह वर्तत इति 'सबाध्' इति प्रातिपदिकं, तस्य षष्ठी सबाध इति । अभिषवपीडितस्य तवेत्यर्थः । कीदृशं ब्रह्म? [V]मदं [V]च हर्षकरमपि

६०–६०. मै– अन्तरेवम् । ६१. लं–क्रम° । ६२. पं२– दृढीकुरु । ६३. मै४–बाधाकर्म° । ६४. तं१.लं–शुष्मियम् ।

१०१. अ.आ.उ.क.ड.पा.शृं.हो१– 'तुभ्यं' नास्ति । १०२. क.ड.ने–'ते' नास्ति । १०३. हो१–अभिषवकर्तृकमु° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वा "इतश्च लोपः°" (पा ३.४.९७)। सम्यक् संपादनमेव पूजा, संभवात्। [v]अर्कः [v]वा [६५]अन्नमिव [६६]दृष्टपरिणामं [v]यत् [v]तुरते त्वरते [६७]अपागन्तुमुत्सहते किमिदं तव युज्यते, [६८]योऽसि [v]सोमचक्षाः सोमवाचकः।[६९-] चष्ट इति[-६९] चक्षः। कर्तर्यसुन्, "बहुलं संज्ञाच्छन्दसोः°" (द्र.काशिका २.४.५४) इति ख्याञादेशाभावः। वाचकं पदमुच्यते। सोमशब्दश्चक्षो यस्य स तथोक्तः। यद्वा– सोमशब्देन ख्यातव्यः सोमचक्षाः। "गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च" (द्र. उ ६७६) इत्यसुन्। यद्वा–प्रकाशनं चक्षः सोम इति प्रकाशो यस्य तादृशं त्वाम्। यद्वा–अर्कः सविता, अर्कः स्वयमेव त्वं[७०] सोमचक्षाः इदानीं सोमशब्दाभिधेयः। वाशब्दोऽवधारणे। यद्वा--अर्क एव [७१]सोमः त्वं ईदृशो महानुभावो भवान्। [७२]यद्वा-त्वन्निमित्तं हर्षं देवानां कर्तुं संक्लेशात् ऋत्विजः परिवृढानां हविषां कर्तारः त्वां सपर्यन्ति, एवमर्कः अर्चनीय एव [७३]सन् [७४]सोमस्यापि प्रकाशयिता भवान् त्वरते। तुर त्वरणसंभ्रमयोः। [v]तत्र [v]इन्द्रः एव तुरते इन्द्र एव तथा करोति। हेतुमाह– [७५-v]यत् यस्मात् स [१०] एव [v]दधते धारयति उत्पादयति[-७५]। लेट्याडागमः (पा ३.४.९४)। किम्? [v]पृत्सु पृतनासु संग्रामेषु [v]तुर्याँ [७६-]त्वरितं यानम्। किब्विचौ[-७६]। यद्वा– [तुरतेस्तूर्यतेर्वा?] किबन्तात् क्यचि "अ प्रत्ययात्" (पा ३.३.१०२) इत्यकारप्रत्ययः। यद्वा– पृतनासु कंचित् पुरुषं दुर्बलं तूर्णं [७७]यातारं करोति तस्मात् स एवात्र पीतानां सोमानां [७८]परस्परसंग्रामस्थानीये भवन्तं तुर्याँ त्वर्याँ त्वरिततरमधोयान्तं करोति। यद्वा--तूर्णं [७९]धावयितारं वायुं करोति, तस्मात् स एव भवन्तम् [८०-]इन्द्रं [१५] नियमयत्विति[-८०]। "°मांसपृतनासानूनाम्" (द्र. पा ६.१.६३ वा १) इति पृतनाशब्दस्य पृद्भावः॥

[v]शुष्मयं [v]च बलप्रापकमपि। कीदृशा नरः? [v]ब्रह्मकृतः इष्टिरूपं परिवृढं कर्म कुर्वन्तीति ब्रह्मकृतः। [१०४-]सोमचक्षाः [v]अर्कः [v]वा[-१०४] सोमशब्देनाभिधीयमानस्त्वं सूर्य एव। अतस्तेजस्वित्वान्नास्ति तव कश्चिद्- [१०५-]व्युपद्रव इत्यभिप्रायः। [१०५-]यदि अत्रास्मदुदरे[-१०५] पीतो रसः [१०६v]तुरते वमनाय व्यग्रतां करोति, [१०७-v]तत्र [v]इत्[-१०७] तत्रैवोदरेऽयम् [v]इन्द्रः [v]पृत्सु संग्रामेष्विव [v]तुर्याँ [v]दधते तूर्णं यातारं करोति, वमनाय संभ्रमं [२०] कुर्वतः सोमस्य निवारकं वायुं शीघ्रं तत्र प्रेरयतीत्यर्थः॥

६५. तं१.लं– युन्नमिव। ६६. लं – दृष्टपरिणामः; पं२– दुष्परिणामः; मै४–दुष्परिणामम्। ६७. लं–योगमु°। ६८. तं१.मै.लं– योऽस्य। ६९–६९. मै४–चक्षाः इति चक्षेः। ७०. मै४– त्वं सोमचक्षाः सोमशब्दवाच्यः सोम एव वा त्वं। ७१. मै४– वा। ७२. तं१.मै–यथा। ७३. तं१.लं–यत्। ७४. मै४– सोमयागस्यापि। ७५–७५. मै४–यद्यस्मादेवं दधते धारयन्ति उत्पादयन्ति। ७६–७६. पं२– [२५] कस्विचो (?); मै–क्षब्दिचो। ७७. मै [टिप्पणी]–दातारम्। ७८. मै४–परस्परसंघर्षे संग्रामस्थानीये। ७९. तं१.पं२.लं– योद्धयितारम्; मै४– धापयितारम्। ८०–८०. मै४–अन्तर्निगमयत्विति।

१०४–१०४. क.ने हो१–अर्को वा सोमचक्षः अर्कः,ड–अथवा सोमचक्षाः अर्कः। १०५–१०५. अ.उ. जो.ना.पा.हा–यथाऽस्मदुदरे; ने–यद्यत्राप्यस्मदुदरे। १०६. ड.शृं–त्वरते। १०७–१०७.इ.हो१–'तत्रेत्' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् (४)।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥

वषट्। ते। विष्णो। आसः। एति। कृणोमि।
तत्। मे। जुषस्व। शिपिविष्टेति शिपि-विष्ट। हव्यम् (४)।
वर्धन्तु। त्वा। सुष्टुतय इति सु-स्तुतयः। गिरः। मे।
यूयम्। पात। स्वास्तभिरिति स्वस्ति-भिः। सदा। नः ॥

[[८१]अभ्युदयेष्टयां (तैसं२·५·५) तृतीयस्य हविषः पुरोनुवाक्या 'वषट्' इति त्रिष्टुप्। 'प्र तत् ते' इत्युत्तरा याज्या, सा च तदुत्तरया 'किमित् ते' इत्यनया ऋचा विकल्प्यते[८१]]। हे [v]विष्णो, व्यापनशील [v]ते तव। आङ् मर्यादायाम्। [v]वषट् [v]कृणोमि करोमि ददामि। किम्? [v]आसः अस्यते क्षिप्यत इत्यासः, अग्नौ क्षिप्यमाणं हविरुच्यते। कर्मणि घञ्, वचनव्यत्ययः, "कर्षात्वतः°" (पा ६.१·१५९) इत्यन्तोदात्तत्वम्। यद्वा– असुनि, (द्र. उ ६३८) [८२]सवर्णव्यत्ययः। हे [v]शिपिविष्ट, [v]तत् [v]मे [v]हव्यं हविः [v]जुषस्व सेवस्व। शिपयो रश्मयः, तैर्वेष्टितः प्रविष्टो वा। "पृषोदरादित्वात्" (पा ६·३·१०९) अभीष्टं रूपं सिद्धम्। किं च–मम [v]सुष्टुतयः शोभनस्तुति-कारणभूताः [v]गिरः त्वां [v]वर्धन्तु वर्धयन्तु स्तुवन्तिति यावत्। स्तुत्या हि स्तोतव्यो वर्धते। "बहुलं संज्ञाछन्दसोः" (द्र. उ. १९०) इति णिलुक्, "छन्दस्युभयथा" (पा ३·४·११७) इति वा शप आर्धधातुकत्वम्। [v]यूयं च मया स्तुताः [८३v]नः अस्मान् [v]स्वस्तिभिः अविनाशैः [v]पात रक्षत [v]सदा सर्वदा। पूजार्थमेकस्मिन् बहुवचनम् ॥

वषडिति॥ अथ पञ्चमप्रपाठके विहितायामभ्युदयेष्टौ–'विष्णवे शिपिविष्टाय शृते चरुम्' (तैसं २·५·५) इत्युक्तं यत् तृतीयं हविस्तत्रानन्तरभावि मन्त्रत्रयमुत्कर्षणीयम्। तस्मिंश्च त्रये पुरोनुवाक्यां दर्शयति–'वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्। वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः' इति। अस्यते क्षिप्यते कर्मानुष्ठानाय देवतया [१०८]विधिना वा प्रेर्यत इति [v]आसः यजमानः। तादृशोऽहं [v]ते तव [v]आ समन्तात् [v]वषट् [v]कृणोमि हविर्दानं करोमि। शिपिषु पशुषु विष्टः प्रविष्टो यज्ञः शिपिविष्टः पशुसाध्यो यज्ञ इत्यर्थः। "यज्ञो वै विष्णुः। पशवः शिपिः" (तैसं २·५·५) इति श्रुतेः। हे [v]शिपिविष्ट यज्ञात्मक [v]विष्णो, [v]मे मदीयं [v]तत् हव्यं [v]जुषस्व। [v]सुष्टुतयः शोभनस्तुतिरूपाः [v]मे [v]गिरः त्वां [v]वर्धन्तु वृद्धिं प्रापयन्तु। एकस्मिन्नपि विष्णौ यूयमिति पूजार्थं बहुवचनम्। पूज्याः [v]यूयं [v]स्वस्तिभिः श्रेयोभिः [v]नः अस्मान् [v]सदा [v]पात रक्षत ॥

८१–८१. (अयमत्र संभावितः पाठः।); मै– न्यादितेषां पुरोनुवाक्याविकल्पेन उत्तरत्र [यस्य... उत्तरास्तिस्रः] वषडिति; पं२.मै४– अभ्युदयेष्टयां पुरोनुवाक्यां विकल्पेन उत्तरत्र वषडिति। तै१.लं– अन्यादितेषां पुरोनुवाक्याविकल्पेन उत्तरत्र वषडिति। ८२. मै४–वर्ण°। ८३. तै१–'नः' नास्ति।

१०८. ने.हो१–विशेषेण।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

प्र तत् ते अद्य शिपिविष्ट नामार्यः शꣳसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतवीयान् क्षयन्तमस्य रजसः पराके ॥

प्रेति । तत् । ते । अद्य । शिपिविष्टेति शिपि-विष्ट । नाम । अर्यः । शꣳसामि । वयुनानि । विद्वान् । तम् । त्वा । गृणामि । तवसम् । अतवीयान् । क्षयन्तम् । अस्य । रजसः । पराके ॥

'प्र तत् ते' इति त्रिष्टुप् ॥ हे [v]शिपिविष्ट, [v]ते तव [v]तत् [v]नाम शिपिविष्टेत्येवं रूपम् [v]अद्य अस्मिन् कर्मणि [v]प्र [v]शंसामि । प्रशस्तगुणाभिधाय्येवेदं नाम [c4]न तु निन्दितं मन्तव्यम् । अज्ञ: त्वमिति न वक्तव्यमित्याह– [v]अर्यः अरणीयोऽहम् । " अर्यः स्वामिवैश्ययोः " (पा ३·१·१०३) इति [c5]। कोऽभिप्रायः ? एषोऽभिप्रायः । केचिदाहुः–शेप इव निर्वेष्टितः संयतरश्मिः शिपिविष्ट इति । अन्ये तु ब्रुवते–निर्विष्टशेपः शिपिविष्ट इति । अपरे त्वाचक्षते–निवृत्तरश्मिः शिपिविष्ट इति । नैतेषु त्रिष्वपि पक्षेषु अनेन पदेन कश्चिद्गुणोऽभिधीयते । अपि तु निन्दैव । ततश्चानेन पदेन निर्वापादि क्रियमाणमुपालम्भमस्यावहेत् । अत इमं दोषमपनेतुमिदमुक्तमिति । तत्कथमिति चेत् उच्यते–नात्र शेपशब्दोऽस्ति; न च केवलोऽपि विशिर्निरुपसृष्टस्यार्थमभिधातुमीष्टे । तस्मात् शिपयो रश्मयः, श्यतेः शिपयः तैक्ष्ण्यात्; तेषु प्रविष्टः शिपिविष्ट इति प्रशंसापरमेतत् । अतोऽहमप्येतत् प्रशंसामीति । [v]अतवीयान् तन्नामानं [v]तवसं [c6]तपस्विनं महान्तम् । 'तु' इति वृद्धिकर्मा । असुन्नतात् उत्पन्नो मत्वर्थीयो लुप्यते । अत एव प्रत्ययान्तरसंक्रान्त्या नञ्विषयत्वाभावादाद्युदात्तत्वाभावः । ईदृशमहं [v]गृणामि स्तौमि । अतवीयान्, अतिशयेन तपस्वी तवीयान्, ततोऽन्योऽतवीयान् । यद्यप्यहं विद्यामहिम्ना तवीयान्, तथाऽपि त्वदपेक्षया अतवीयान् । तादृशोऽपि त्वत्प्रसादेन त्वां स्तौमीति । " विन्मतोर्लुक् " (पा ५·३·६५) तपस्विशब्दादीयसुन्प्रत्ययः । अत एवातिशय्य-

प्रेति ॥ तत्रैव याज्यामाह– 'प्र तत् ते अद्य शिविविष्ट नामार्यः शꣳसामि वयुनानि विद्वान् । तं त्वा गृणामि तवसमतवीयान् क्षयन्तमस्य रजसः पराके' इति । हे [v]शिपिविष्ट, [v]अद्य अस्मिन् यज्ञे [v]ते त्वदीयं [109-v]तत् [v]नाम अहं [v]प्र [v]शंसामि [-109]। [110]कीदृगहम् ? [v]वयुनानि [v]विद्वान्, [111]ज्ञापकानि नामनिर्वचनानि जानन् । " यज्ञो वै विष्णुः । पशवः शिपिः । यज्ञ एव पशुषु प्रति तिष्ठति " (तैसं २·५·५) इति श्रुत्या आख्यातं[112] शिपिविष्टनाम्नो निर्वचनं जानामीत्यर्थः । अत एव [v]अर्यः अहम् शब्दार्थाभिज्ञानां स्वामी, हे विष्णो, [113-v]तं [v]त्वा[-113] [v]गृणामि तथाविधं त्वां स्तौमि । किंविधम् ? [v]अस्य [v]रजसः [v]पराके [v]क्षयन्तं [114]दृश्यमानस्य मलिनलोकस्यात्यन्तं दूरे निवसन्तं [v]तवसं तपस्विनम् । कीदृशोऽहम् ? [v]अतवीयान् अतपस्वी । यद्यप्यहं तपोरहितस्तथाऽपि तपस्विनस्तव प्रसादात् स्तोतुं शक्त इत्यर्थः ॥

८४–८४. तं१.लं– नामेति मम मतिरिति । ८५. मै४– तवस्विनम् ।

१०९–१०९. ने–नाम प्रशंसावहम् । ११०. ड.ने.शृं.हो१–कीदृशोऽहम् । १११. ने.हो१–ज्ञानानि । ११२. शृं– व्याख्यातम् । ११३–११३. अ.इ.उ.जो.ना.पा.हा– त्वाम् । ११४. हा– दृश्यमानस्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

किमित् ते विष्णो परिचक्ष्यं भूत् प्र यद्ववक्षे शिपिविष्टो अस्मि।
मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ (५) ॥

किम्। इत्। ते। विष्णो इति। परिचक्ष्यमिति परि-चक्ष्यम्। भूत्।
प्रेति। यत्। ववक्षे। शिपिविष्ट इति शिपि-विष्टः। अस्मि।
५ मा। वर्पः। अस्मत्। अपेति। गूहः। एतत्।
यत्। अन्यरूप इत्यन्य-रूपः। समिथ इति सम्-इथे। बभूथ (५)।

मानोऽपि तपस्वीति गम्यते। द्वयोर्हि तपस्विनोरन्यतरस्तपीयान् भवति। इदानीमुक्तं शिपिविष्ट-पदार्थं समर्थयितुमाह– ᵛअस्य ᵛरजसः अन्तरिक्षस्य ᵛपराके परागते दूरे प्रदेशे ᵛक्षयन्तं निवसन्तं तथाऽपि सर्वलोकप्रकाशकं त्वां स्तौमि, इदं तव शिपिविष्टत्वम्। अतः ᶜᵇतत् प्रशंसा-
१० मीति। क्षि निवासगत्योः, व्यत्ययेन शप्॥

'किमित् ते' इति त्रिष्टुबेव॥ हे ᵛविष्णो, ᵛते तव ᵛकिं ᵛपरिचक्ष्यं गूहनीयं वर्जनीयमेव ᵛभूत् भवति? नैवैतत् वर्जनीयम्। चक्षेः छान्दसो यत्, "बहुलः संज्ञाच्छन्दसोः" (द्र. का. पा २. ४.५४) इति ख्याऽऽदेशाभावः। भवतेर्लेटि शपो लुक्। "भूसुवोस्तिङि" (पा ७·३·८८) इति गुणाभावः। लङि वा छान्दसः शपो लुक् (पा २·४·७३)। लुङि वा "गातिस्था°" (पा २·४·७७) इति
१५ सिचो लुक्। "बहुलं छन्दस्यमाङ्योगेऽपि" (पा ६·४·७५) इत्यडभावः। इदानीं तदेव परिसंख्ये-यतया संभाव्यमानं दर्शयति–हे शिपिविष्ट, ᵛशिपिविष्टः ᵛअस्मि इति ᵛयत् ᵛववक्षे किमिदं तदेव

किमिति॥ तत्रैव विकल्पितां याज्यामाह–'किमित् ते विष्णो परिचक्ष्यं भूत् प्र यद्ववक्षे शिपिविष्टो अस्मि। मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ' इति। हे ᵛविष्णो, त्वं ᵛयत् यस्मात् ११५कारणात् ᵛशिपिविष्टः ᵛअस्मि इति प्रकर्षेण ᵛववक्षे पुनः पुनः ११६वक्षि तस्मात् ᵛते तव मनसि
२० **ᵛकिम् ᵛइत् ᵛपरिचक्ष्यं ᵛभूत् किमिदं गर्हणीयमभूत्, नैतद्गर्हणीयं, वृथैव तव लज्जेत्यभिप्रायः। यद्यप्येतन्नाम ११७-लोकेऽत्यन्तरोगिण्युद्घाटितगुह्यत्वचि मूढैः-११७ प्रयुज्यते शिपिविष्टोऽयमिति, तथाप्यव-यवार्थस्य ब्राह्मणेन व्याख्यातत्वान्नास्त्यत्र तव लज्जाकारणम्। तस्मात् ᵛएतत् ᵛवर्पः वरिष्ठं नाम ᵛअस्मत् ᵛमा ᵛअप ᵛगूहः, अस्माकमग्रे गूढं मा कुरु। ᵛयत् यस्मात् त्वं गूहनायैव ᵛसमिथे युद्धे ११८कवचशीर्षकाभ्यां गूढः ᵛअन्यरूपः ᵛबभूथ बभूविथ, ११९तदन्यत्र यथा तथा वा भवतु, १२०तथाऽप्यस्मद्बुद्धौ प्रशस्तमिदं मा**
२५ **गोपायेत्यर्थः।**

---

८६. मै–'तत्' नास्ति।

---

११५. इ– कारणादहं। ११६. ड.ने.–पठितत्वात्। ११७–११७. [शुद्धीकृतोऽयं पाठः]; आ.जो. शृं.हा–°त्यन्तरोगिण्युत्पाटितगुह्यत्वचि(चि?)मूढैः; पा– °त्यन्तरङ्गिण्युत्पाटितगुह्यत्वविमूढैः; क.हो१– °त्यन्तरोगिण्युद्घाटितगुह्यत्वचि (?) मूढैः! ११८. क.हा–°शीर्षण्याभ्याम्। ११९. आ.क– तदन्यथा।
३० १२०. ड– तथाऽप्यस्मद्वृद्धौ; ने.हो१– तथाऽस्मद्वृद्धौ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परिचक्ष्यं भवति। नैतदेवम्। तस्मात् शिपिविष्टोऽस्मीति ब्रुवन्नेव विश्वव्यापी वर्तस्वेति। वक्तेर्व्यत्ययेन आत्मनेपदम्, "बहुलं छन्दसि" (पा २·४·७६) इति शपः श्लुः। इदानीं प्रशस्तगुणाभिधाय्येतन्नाम न परिसंख्येयम्, अपि तु लोके ख्यापयितव्यमिति दर्शयितुमाह– [v]वर्पः वरितव्यमिदमुच्छ्रितं नाम [v]मा [v]अप [v]गूहः नेदं अस्माकं गूहनीयम्, अपि तु लोके श्लाघमानेन त्वया आघोषणीयमेव। वर्प गतौ, असुन्प्रत्ययः। गूहतेश्छान्दसोऽङ्प्रत्ययः। अथ यदि ब्रूयाः नापगूहामीति, मृषैतत्, यस्मात् त्वं [v]समिथे संग्रामे उदयकाले रक्षोभिः सह तव यः संग्रामः तत्र [v]अन्यरूपः [v]बभूथ भवसि, न मध्याह्न इव महातेजा भवसि। तन्नूनं लज्जया शत्रुजनसमवाये उदयकाले एतदात्मीयं रूपं छादयसीति संलक्ष्यते। तस्मान्नैवमिदं गूहनीयमिति। "बभूथाततन्थ°" (पा ७·२·६४) इतीडभावो निपात्यते। अन्य आहुः– उक्तं शिपिविष्टोऽस्मीति नेदं परिसंख्येयमिति। अथापि यत् त्वं लज्जयेव समिथे संग्रामे उदयकाले अन्यरूपः भवसि, इदमेव वर्पः प्रशस्ततरं रूपं, [v]तस्मादेतन्माऽपगूहः सर्वावस्थास्वपि इदमेव रूपं तव भवतु इदमेव शोभनमिति। अत्र निरुक्तादिषु (निरुक्त ५·८) बहुधा व्याख्यानानि कृतानि, अत्र युक्तरूपमिदस्माभिरुक्तम्॥

पशुकामस्य त्रिहविष्कामिष्टिं विधत्ते– "अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं पशुकामोऽग्निरेवास्मै पशून् प्रजनयति वृद्धानिन्द्रः प्र यच्छति" (तैसं २·३·२) इति॥ पञ्चद्रव्यसमष्टिरूपं तृतीयं हविर्विधत्ते– "दधि मधु घृतमापो धाना भवन्त्येतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्द्धे" (तैसं २·३·२) इति। तत्र दधिघृतयोः पशुसंबन्धात् तत्साहचर्येण सर्वेषां पशुरूपत्वम्॥ [121]अस्मिन् हविषि द्रव्यसंख्यां विविधद्रव्यत्वं च प्रशंसति– "पञ्चगृहीतं भवति पाङ्क्ता हि पशवो बहुरूपं भवति बहुरूपा हि पशवः समृद्ध्यै" (तैसं २·३·२) इति। एकैकस्य द्रव्यस्य ग्रहणेन पञ्चगृहीतत्वं गोमहिषाश्वादिरूपेण पशूनां बहुरूपत्वम्॥ द्रव्यं विधाय देवतां विधत्ते– "प्राजापत्यं भवति प्राजापत्या वै पशवः प्रजापतिरेवास्मै पशून् प्र जनयति" (तैसं २·३·२) इति॥ [122-122]'घृतं न पूतम्' 'उभे सुश्चन्द्र' इत्येते ऋचौ[122] विधत्ते– "आत्मा वै पुरुषस्य मधु यन्मध्वग्नौ जुहोत्यात्मानमेव तद्यजमानोऽग्नौ प्र दधाति पङ्क्त्यौ याज्यानुवाक्ये भवतः पाङ्क्तः पुरुषः पाङ्क्ताः पशव आत्मानमेव मृत्योर्निष्क्रीय पशूनव रुन्द्धे" (तैसं २·३·२) इति। [123]यस्मिन् कस्मिंश्चिद्दुर्गे समुत्पन्नस्य मधुनो दध्यादिवत् सर्वप्राणिसुलभत्वं नास्ति, आत्माऽपि हस्तपादादिवत् सर्वैः सुष्ठु विज्ञेयो न भवति, तत्साम्यात् मधुनः पुरुषत्वं मधुहोमेन वह्नौ प्रक्षिप्तस्याऽऽत्मनः [124]पङ्क्तिच्छन्दसोः पाठेन मृत्योर्निष्क्रयो भवति॥

८७. तं१.मै.लं– °देतं मा°।

१२१. अ.इ.उ.जो.ना.पा.हा– तस्मिन्। १२२–१२२. जो.ना.हा.– 'घृतं...ऋचौ' नास्ति। १२३. ड.ने–'यस्मिन्' नास्ति। १२४. ने– °च्छन्दसः; ड१– छन्दसाम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम्। शिशीहि नः सूनुमतः॥
दा नो अग्ने शतिनो दाः सहस्रिणो दुरो न वाजꣳ श्रुत्या अपा वृधि।

अग्ने। दाः। दाशुषे। रयिम्। वीरवन्तमिति वीर-वन्तम्। परीणसमिति परि-नसम्। शिशीहि। नः। सूनुमत इति सूनु-मतः॥
५ दाः। नः। अग्ने। शतिनः। दाः। सहस्रिणः। दुरः। न। वाजम्। श्रुत्यै। अपेति। वृधि।

अथ "अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं पशुकामः" (तैसं २.३.२) इत्यस्य प्राजापत्येन सह त्रिहविष आग्नेयस्य पुरोनुवाक्या--'अग्ने दाः' इति गायत्री॥ हे [v]अग्ने, [v]दाशुषे हवींषि दत्तवते यजमानाय [v]रयिं धनलक्षणं [cc-v]दाः देहि। लेटि शपो लुक्। रयिर्विशेष्यते--[v]वीरवन्तं[-cc] पुत्रपौत्रादिमन्तं तेषां भोगपर्याप्तम्,
१० [v]परीणसं, नासिकया सर्वेऽवयवा लक्ष्यन्ते, परिगतसर्वावयवम्। छान्दसो नसादेशः। "उपसर्गाद्बहुलम्" (पा ८.४.२८) इति णत्वम्। "अन्येषामपि दृश्यते" (पा ६.३.१३७) इति दीर्घत्वम्। किं च--[v]नः अस्माकं अस्य यजमानस्य [v]सूनुमतः त्वया दीयमानपुत्रपौत्रादिकस्य रयिं [v]शिशीहि तीक्ष्णीकुरु [c9]उज्ज्वलीकुरु। यद्वा--नोऽस्मान् शिशीहि उज्ज्वलीकुरु। सूनुमतः सूनुः सोता सोमस्याभिषोता यजमानः तत्सहितानस्मान् पुत्रादिसमृद्धान् कृत्वा अस्मान् ऋत्विग्यज-
१५ मानान् सर्वानपि शिशीहि। श्यतेर्लोटि "बहुलं छन्दसि" (पा २.४.७६) इति शपः श्लुः। अभ्यासस्य चेत्त्वम्। "ई हल्यघोः" (पा ६.४.११३) इतीत्वम्॥

[10]अथ तत्रैव याज्या--'दा नः' इति जगती॥ हे [v]अग्ने, [v]दाः देहि [v]नः अस्मभ्यम्। किम्? [v]शतिनः [v]सहस्रिणः च पशून् [v]दाः देहि। [v]दुरः [v]न द्वाराणीव पशुप्राप्त्युपायानिव [v]वाजम्

अग्न इति॥ तत्र प्रथमहविषः पुरोनुवाक्यामाह--'अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम्। शिशीहि नः सूनुमतः' इति। हे [v]अग्ने, [v]दाशुषे हविर्दत्तवते यजमानाय [v]रयिं [v]दाः धनं देहि। [125-v]तथा [v]वीरवन्तं वीरैः[-125] भृत्यादिभिरुपेतं पुत्रं देहि। कीदृशम्? [v]परीणसं परितः शोभना नासिकाद्या अवयवा यस्य तं तथाविधम्। [v]सूनुमतः [126-v]त्वया दीयमानैः[-126] पुत्रैर्युक्तान् [v]नः अस्मान् [v]शिशीहि सर्वेषु कार्येषु तीक्ष्णीकुरु॥

८८-८८. मै४--देहि शपो लुक् पुरुषव्यत्ययः। ८९. मै--उज्ज्वलितं कुरु। ९०. मै--'अथ' नास्ति।

१२५-१२५. इ.ने.शृं.हो१--तथा वीरैः; ड१--तत्तथाविधैः। १२६-१२६. अ.उ.जो.पा.हा--त्वया दीप्यमानैः; ड.ने.हो१--त्वदीयमानैः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

प्राची द्यावापृथिवी ब्रह्मणा कृधि सुवर्ण शुक्रमुषसो वि दिद्युतः ॥

प्राची इति । द्यावापृथिवी इति द्यावा-पृथिवी । ब्रह्मणा । कृधि । सुवः । न । शुक्रम् । उषसः । वीति । दिद्युतः ॥

अन्नम् [v]अपावृधि अपावृणु [v]श्रुत्यै श्रवणार्थं, यथा वयं लोके जेतारः स्याम तदनुरूपं [११]पशुप्राप्त्युपायभूतमन्नमाह पुरु [....मन्नमपावृणु]। " बहुलं छन्दसि " (पा २·४·७३) इति शपो लुक्। " श्रुशृणुपृकृवृम्यः " (पा ६·४·१०२) इति धिभावः । केचिदाहुः– दुरः द्वाराणि पशुप्राप्त्युपायानपावृधि; वाजमन्नं श्रुत्यै नापावृधि; अपि तु अश्रवणार्थम् अपावृधि, यथा अपावृते अन्ने पशुसाध्ये [१२]श्रवणं न क्रियते, अविचार्यैवार्थित्वमात्रेण पश्वादिकं दीयते तथा अपावृधीति । अथापरे ब्रुवते– वाजमन्नं पशुहेतुकं श्रुत्यै श्रवणायापावृधि श्रवणसामर्थ्यायाविष्कुरु, अन्नेन हि श्रवणसामर्थ्यमुपजायते; असति ह्यन्ने श्रवणसामर्थ्याभावात् । तस्माच्छ्रुत्या अपावृधि दुरो न श्रोत्रादीनि द्वाराणीव, [१३-]यथैतानि श्रवणार्थमपावृतानीति[-१३]। किं च [v]द्यावापृथिवी द्यावापृथिव्यौ [v]प्राची [१४]प्राच्यौ अनुकूले [v]ब्रह्मणा परिवृढेन हविषा कर्मणा वा [v]कृधि [१५]कुरु । पूर्ववच्छपो लुक्, धिभावश्च । यद्वा–ब्रह्मणा अन्नेन सदाऽस्माकं प्राची अनुगुणे द्यावापृथिव्यौ [१६]कुरु । किं च– [v]सुवः [v]न [१७]सुवरिव आदित्य इव । सांहितिकं णत्वं छान्दसम् । [v]शुक्रं पुत्रादिकम् [v]उषसः उदयात् [v]वि [v]दिद्युतः विशेषेण [१८]द्योतयन्ति । द्युतेरन्तर्भावितण्यर्थाच्छान्दसो लिट् । व्यत्ययेन परस्मैपदम् । " द्युतिस्वाप्योः° " (पा ७·४·६७) इत्यभ्यासस्य संप्रसारणम् ॥

दा इति ॥ तत्रैव याज्यामाह– ' दा नो अग्ने शतिनो दाः सहस्रिणो दुरो न वाजꣳ श्रुत्या अपावृधि । प्राची द्यावापृथिवी ब्रह्मणा कृधि सुवर्ण शुक्रमुषसो वि दिद्युतुः ' इति । हे [v]अग्ने, [v]नः [१२७]अस्मभ्यं [v]शतिनः [v]दाः शतसंख्याकान् पशून् देहि तथा सहस्रसंख्याकान् देहि । [v]दुरः [v]न द्वाराणीव । पशुसंपत्तौ हि–" वायव्यꣳ श्वेतमा लभेत " (तैसं २·१·१), " सरस्वत्याज्यभागा स्यात् " (तैसं २·२·९) इत्यादीनि बहूनि कर्माणि सुखेनानुष्ठातुं शक्यन्ते । अतोऽनुष्ठानस्य द्वारभूतान् पशून् देहि । ततः पशुप्राप्तेरूर्ध्वं [v]वाजम् अन्नं [v]श्रुत्यै ब्राह्मणभोजनादिजन्यकीर्तये [v]अपावृधि विघ्नमपनीय वर्धय । प्रकर्षेणाऽऽनुकूल्यमञ्चतो गच्छत इति प्राच्यौ । [v]ब्रह्मणा मन्त्रपुरःसरेण कर्मणा तुष्टः त्वं[१२८] द्यावापृथिव्यौ प्राच्यौ कुरु । [v]उषसः उषःकालाः [v]सुवः [v]न स्वर्ग इवास्मद्गृहे [v]शुक्रं प्रकाशं [v]वि [v]दिद्युतः विशेषेण द्योतितं कुर्वन्तु प्रभूतं कुर्वन्त्वित्यर्थः ॥

९१. तं१.मै.लं–°प्राप्तिद्वारभूत° । ९२. मै–श्रावणा; लं–श्रावणानि; तं१–श्रवणा । ९३–९३. लं–अथैतानि श्रवणार्थानि न श्रवणार्थमपावृतानीति; तं१–अथ तानि श्रवणार्थमपावृतानीति। ९४. तं१.लं–प्राचौ। ९५. मै– ' कुरु ' नास्ति। ९६. तं१.मै.लं– ' कुरु ' नास्ति। ९७. तं१.लं– सुवरिति। ९८. मै– द्योतयन्ते ।

१२७. इ–अस्मान्। १२८. आ.क– सन्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

अग्निर्दा द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति ।
अग्निर्दिवि हव्यमा तनानाग्नेर्धामानि विभृता पुरुत्रा ॥
❀मा (६) नो मर्धीरा❀ तू भर ॥

अग्निः । दाः । द्रविणम् । वीरपेशा इति वीर-पेशाः । अग्निः । ऋषिम् । यः । सहस्रा । सनोति । अग्निः । दिवि । हव्यम् । एति । तनान् । अग्नेः । धामानि । विभृतेति वि-भृता । पुरुत्रेति पुरु-त्रा ॥ मा (६) । नः । मर्धीः ॥ एति । तु । भर ॥

[1]–[1]अत्रेव याज्याविकल्पः–[1]–'अग्निर्दा' इति त्रिष्टुप् ॥ अयम् [V]अग्निः [V]द्रविणं धनं [V]दाः दात् ददाति । लेटि शपो लुक् । [10]पुरुषव्यत्ययः । [V]वीरपेशाः विक्रान्तरूपः [V]यः [V]अग्निः [V]ऋषिं दर्शयितारं श्रेयसां, यः [V]सहस्रा सहस्रेण प्रकारैः [V]सनोति संविभजते । [V]अग्निः खलु [V]दिवि देवेषु आदित्ये वा [V]हव्यम् [V]आ [V]तनान सर्वतस्तनोति । तस्मादेवं महानुभावस्य [V]अग्नेः धामानि स्थानानि हवींषि वा [V]विभृता धारयिता येन पशुमन्तः स्यामेति । [V]पुरुत्रा पुरूणि बहूनि । " देवमनुष्यं " (पा ५.४.४६) इति त्राप्रत्ययः । आख्यातस्य संहितिकं दीर्घत्वम् ॥

अथ ' इन्द्राय प्रदात्रे ' (तैसं २·३·२) इत्यस्याः पुरोनुवाक्या याज्या च– ' मा नो मर्धीरा तू भर ' इति ॥ " मा नो मर्धीरा भरा दद्धि तन्नः ", "आ तू भर माकिरेतत् परि ष्ठात्" (तैसं १·७·१३) इत्येतयोरेते प्रतीके गृह्येते । व्याख्याते चैते " अन्वह मासाः " (तैसं १·७·१३) इत्यत्र । तत्र प्रथमा-अस्मान् [V]मा [V]मर्धीः संग्रामेण मा बाधिष्ठाः । दध्यादिकम् [V]आ [V]भर आहृत्यास्मभ्यं तत् प्रदेहि । किं ? [V]दाशुषे हवींषि दत्तवते यजमानाय दातुं [V]यत् ते [V]भूरि बहु संपादितं [V]तत् तद्धनमिदानीम् अस्मभ्यं देहि । वयमपि [V]नव्ये नूतने [V]देष्णे दानसमर्थे [V]अस्मिन् [V]शस्ते प्रशस्ते त्वदीये [V]उक्थे शस्त्रस्थानीये स्तोत्रे [11]–[11]त्वां [V]स्तुवन्तः–[11] त्वां [V]प्र [V]ब्रवाम प्रब्रूमः प्रकर्षेणाभिमतानि याचामहे, हे [V]इन्द्र, इति ॥

अग्निरिति ॥ तत्रैव विकल्पितां याज्यामाह– ' अग्निर्दा द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति । अग्निर्दिवि हव्यमा तनानाग्नेर्धामानि विभृता पुरुत्रा ' इति । अयम् [V]अग्निः [V]द्रविणं [V]दाः ददातु । [V]वीरपेशाः वीराणामस्मत्पुत्रादीनां पालकः [V]यः अग्निः असौ [V]ऋषिम् ऋषिसमानं पुत्रं [V]सहस्रा सहस्रप्रकारेण [V]सनोति ददातु । सः [V]अग्निः [V]दिवि स्वर्गे [V]हव्यम् अस्मदीयम् [V]आ [V]ततान समन्ताद्विस्तारितवान् । तादृशस्य [V]अग्नेः [V]पुरुत्रा [12]–[12]पुरुषु प्रदेशेषु[12] [V]धामानि स्थानानि [V]विभृता विशेषेण संपादितानि ॥

मेति ॥ द्वितीयहविषो याज्यानुवाक्ययोः प्रतीके दर्शयति– ' मा नो मर्धीरा तू भर ' इति । " मानो मर्धीरा भरा दद्धि तन्नः " इति पुरोनुवाक्या, " आ तू भर माकिरेतत् परि ष्ठात् " इति याज्या । तदुभयं पूर्वकाण्डे सप्तमप्रपाठके (तैसं १·७·१३) व्याख्यातम् ॥

९९–९९. तं१.मै– अत्रैव विकल्प्यते । १००. तं१.लं–' पुरुषव्यत्ययः ' नास्ति । १०१–१०१. लं–' त्वां स्तुवन्तः ' नास्ति ।

१२९–१२९. ना.हा–पुरुषु बहुप्रदेशेषु; इ–बहुदेशेषु; श्रं–बहुप्रदेशेषु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

घृतं न पूतं तनूररेपाः शुचि हिरण्यम् । तत् ते रुक्मो न रोचत स्वधावः ॥
उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर ॥

घृतम् । न । पूतम् । तनूः । अरेपाः । शुचि । हिरण्यम् ।
तत् । ते । रुक्मः । न । रोचत । स्वधाव इति स्वधा-वः ॥ ५
उभे इति । सुश्चन्द्रेति सु-चन्द्र । सर्पिषः । दर्वी इति । श्रीणीषे । आसनि ।
उतो इति । नः । उदिति । पुपूर्याः । उक्थेषु । शवसः । पते ।
इषम् । स्तोतृभ्यः इति स्तोतृ-भ्यः । एति । भर ॥

द्वितीया—हे [v]इन्द्र, [१०२v]आ [v]भर वसु [v]एतत् [१०३-v]मा [v]परिष्ठात्[१०३] अस्मभ्यमन्यत्र [१०४]माऽस्थात् । त्वां हि वयं सर्वेषां [v]वसूनां संबन्धिनं पतिं [v]वसुपतिं [v]विद्म जानीमः । अस्मात् १०
[v]यत् [v]ते [v]माहिनं महन्महनीयं [v]दत्रं दातव्यं धनम् [v]अस्ति [v]तत् [v]अस्मभ्यं [v]प्रयन्धि प्रयच्छ,
हे [v]हर्यश्व [१०५]हरिवाहनेति । अत्राचार्येण (द्र. बौश्रौ १३·२५), " प्रदातारं हवामहे ", " प्रदाता
वज्री " (तैसं १·७·१३) इत्येते उक्ते । तत्र विकल्पो वेदितव्यः ॥

अथ प्राजापत्यस्य पुरोनुवाक्या—' घृतं न पूतम् ' इति । अक्षरपङ्क्तिः पञ्चपदा ॥ [v]घृतं
[v]न घृतमिव [v]पूतं शुद्धं [v]तनूः शरीरं तव, अनिरुक्तत्वात् प्रजापतिरामन्त्र्यते । हे [v]स्वधावः १५
अन्नवन् । " मतुवसोः " (पा ८·३·१) इति रुत्वम् । [v]अरेपाः अपापा तनूः तव रोचते
[v]हिरण्यम् इव [v]शुचि रोचते, [v]रुक्मः [v]न रजतमिव रोचते तव तनूरिति । तदिति लिङ्ग-
व्यत्ययः, सा तव तनूरिति । यद्वा— [v]तत् [v]ते अन्नं रोचते । किमिवेत्याह— पूतं घृतमिव
अरेपास्तनूरिव शुचि हिरण्यमिव रोचनशीलं रजतमिवेति ॥

तत्रैव याज्या—' उभे ' इति पञ्चपदा पङ्क्तिः । हे [v]सुश्चन्द्र सुकान्त । "सुपूर्वश्च चन्द्रपरः" २०
(तैप्रा ५·५) इति शकारः सांहितिक आगमः । [v]दर्वी हनू [v]सर्पिषः संबन्धिन्यौ सर्पिःसंसिक्ते ।

घृतमिति ॥ तृतीयहविषः पुरोनुवाक्यामाह— ' घृतं न पूतं तनूररेपाः शुचि हिरण्यम् । तत् ते रुक्मो न रोचत स्वधावः ' इति । हे [v]स्वधावः अन्नवन् प्रजापते, [v]तनूः [v]अरेपाः त्वदीयं शरीरं पापरहितम् । किमिव ? [v]पूतं [v]घृतं [v]न घृतमिव । नेत्युत्तरत्रानुवर्तते । [v]शुचि [v]हिरण्यं न शुद्धं सुवर्णमिव, [v]रुक्मः [v]न, आभरणमिव [v]ते त्वदीयं तच्छरीरं [v]रोचत सर्वेभ्यो रोचताम् ॥ २५

उभे इति ॥ तत्रैव याज्यामाह— ' उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि । उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर ' इति । हे [v]सुश्चन्द्र, सुष्ठ्वाह्लादनकर, [v]आसनि त्वदीय आस्ये [v]सर्पिषः संबन्धिन्यौ [v]उभे दर्वीसदृशे हनू [v]श्रीणीषे सेवसे हनुपूरणपर्यन्तं सर्पिस्त्वया पीतमित्यर्थः । [v]उत अपि च, हे [v]शवसः [v]पते बलस्याधिपते [v]उक्थेषु शस्त्रवत्सु यज्ञेषु [v]नः अस्मान् [v]उत्पुपूर्याः [v]उत्कर्षेण पूरय प्रापयेत्यर्थः । [v]स्तोतृभ्यः यजमानेभ्यः [v]इषम् अन्नम् [v]आ [v]भर संपादय ॥ ३०

१०२. लं– आभर आभर । १०३–१०३. तं१.लं– परिष्ठाः । १०४. लं– तिष्ठ । १०५. मै– हरितवाहनेति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वायो शतꣳ हरीणां युवस्व पोष्याणाम्
उत वा ते सहस्रिणो रथ आ यातु पाजसा ॥

वायो इति । शतम् । हरीणाम् । युवस्व । पोष्याणाम् ।
उत । वा । ते । सहस्रिणः । रथः । एति । यातु । पाजसा ॥

दीर्यते भक्ष्यते अन्नमाभ्यामिति दर्वी । ते [V]श्रीणीषे सदा सेवसे । यद्वा– [V]उमे दर्वी । सर्पिषः श्रीणीषे सर्पिः प्रापयसि सर्पिषा [१०६]मिश्रीकुरुष्व । [१०७V]आसनि आस्ये । पद्दन्नादिना (पा ६. १.६३) आसन्भावः । [V]उतो अपि च हे [V]शवसः [V]पते बलस्य पातः । "षष्ठ्याः पतिपुत्र°" (पा ८.३.५३) इति सत्वम् । [V]नः अस्माकम् [V]उक्थेषु स्तोत्रवत्सु यज्ञेषु [V]उत्पुपूर्याः उच्छिष्टं पूरय सामर्थ्याद्धनं बलमेव वा अविशेषणात् सर्वम् । अनिरुक्तत्वात् प्रजापतिरामन्त्र्यते । पूरी आप्यायने । लिङि "बहुलं छन्दसि" इति शपः श्लु । किं च– [V]इषम् अन्नं [V]स्तोतृभ्यः [V]आ [V]भर स्तोतृभ्यः ऋत्विग्भ्यः [१०८]आहर । "हृग्रहोर्भः°" (पा ८.२.३२ वा १) ॥

अथ वायव्ये क्वचिद्विनियुज्यते लिङ्गात्–'वायो शतम्' इति पुरोनुवाक्या उष्णिक् । हे [V]वायो, [V]हरीणां हरितवर्णानामश्वानां [V]शतं [V]युवस्व मिश्रय रथे योजय [१०९]अस्मद्यज्ञमागन्तुम् । यौतेः व्यत्ययेन शः, आत्मनेपदं च । पोष्याणामिति । पोषे साधूनामिति "तत्र साधुः" (पा ४.४.९८) इति यत् । [V]उत [V]वा अपि वा [V]ते तव [V]सहस्रिणः । किं? हरिसहस्रवतः । किं? सहस्रं हरीणां रथे युज्यतामिति सामर्थ्याल्लभ्यते । यद्वा–ते हरयः सहस्रिणः सहस्रसंख्यावन्तो रथे युज्यन्ताम् । तत एवंयुक्तो [V]रथः [V]आ [V]यातु । अस्मत्सकाशमागच्छतु । [V]पाजसा बलेन सहितः ॥

वायविति ॥ अथान्यत्र "वायव्यां यवागूं निर्वपेत्" (कपिसं ४८.१५) इत्यादिना विहिते [१३०]कर्मण्युत्कर्षणीयां पुरोनुवाक्यामाह–'वायो शतꣳ हरीणां युवस्व पोष्याणाम् । उत वा ते सहस्रिणो रथ आ यातु पाजसा' इति ॥ हे [V]वायो, [V]पोष्याणां पुष्टिमतां [V]हरीणाम् अश्वानां [V]शतं [V]युवस्व [१३१]अस्मद्यज्ञे समागन्तुं रथे योजय । [V]उत [V]वा [V]ते [V]सहस्रिणः अथ वा ते सहस्रसंख्याका अश्वा रथे युज्यन्तामिति शेषः । स च [V]रथः [V]पाजसा बलेन शीघ्रम् [V]आ [V]यातु ॥

१०६. मै४.लं– मिश्रीकरोषि कुरुष्व वा; तं१– मिश्रीकुरुषे कुरुष्व । १०७. तं१– 'आसनि' नास्ति । १०८. तं१.मै.लं– आभर । १०९. तं१.मै–अस्मद्द्युम्नमा°; मै४– यजमानमा° ।

१३०. उ.पा– °त्कर्षेणेमां । १३१. अ.आ.उ.क.जो.ना.पा.हा– °स्मदूग्रहे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्र याभि(७)र्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायविष्टये दुरोणे।
नि नो रयिꣳ सुभोजसं युवेह नि वीरवद्गव्यमश्वियं च राधः ॥

प्रेति। याभिः (७)। यासि। दाश्वाꣳसम्। अच्छ।
नियुद्भिरिति नियुत्-भिः। वायो। इष्टये। दुरोण इति दुः—ओने।
नीति। नः। रयिम्। सुभोजसमिति सु-भोजसम्। युव। इह।
नीति। वीरवदिति वीर-वत्। गव्यम्। अश्वियम्। च। राधः ॥

तत्रैव याज्या—'प्र याभिः' इति त्रिष्टुप्। अच्छ इति प्रथमपादान्तः॥ हे [v]वायो, [v]याभिः वडबाभिः नियुत्संज्ञाभिः [v]प्र [v]यासि गच्छसि। [v]दाश्वाꣳसं हविर्दत्तवन्तं [111]यजमानम् [v]अच्छ अभिगन्तुम् [v]इष्टये यागाय पुनरपि यागं प्रवर्तयितुम्। "मन्त्रे वृष°" (पा ३·३·९६) इति क्तिन उदात्तत्वम्। "निपातस्य च" (पा ६·३·१३६) इति संहितायां अच्छेत्यस्य दीर्घत्वम्। [v]दुरोणे [111]यज्ञगृहे ताभिः आगत्य [v]इह अस्मद्यज्ञगृहे [v]रयिं धनं [v]सुभोजसं शोभनभोजनम्। "सोर्मनसी°" (पा ६·२·११७) इत्युत्तरपदाद्युदात्तत्वम्। [v]नि [v]युव मिश्रय शोभनभुक्तिकं धनमस्माभिर्मिश्रय। पूर्ववत् व्यत्ययेन शः। नियुव च [v]राधः धनम्। कीदृशम्? [v]वीरवत् पुत्रपौत्रादिवत् [v]गव्यं गोसमृद्धिनिमित्तम्। "गोद्व्यचः°" (पा ५·१·३९) इति यत्। यद्वा—गव्यैः क्षीरादिभिस्तद्वत्। [v]अश्वियम् अश्वसमूहवत्। "केशाश्वाभ्याम्°" (पा ४·२·४८) इति छः, छान्दसं ह्रस्वत्वम्, आद्युदात्तत्वं च। यद्वा— अश्वयोगस्यापि निमित्तभूतम्। छान्दसो यत्॥

उत्तरयोः क्वचिदैन्द्रे द्रष्टव्यो विनियोगः—'रेवतीर्नः' इति गायत्री पुरोनुवाक्या॥ व्याख्याता चेयं "अन्वह मासाः" (तैसं १.७·१३) इत्यत्र। [v]रेवतीः धनवत्यः [v]नः अस्माकं [v]सधमादः सहमाद्यन्त्यः [v]इन्द्रे [v]सन्तु [v]तुविवाजाः चरुपुरोडाशादिबहुन्नाः। [v]याभिः वयं [v]क्षुमन्तः शब्दयन्तः स्तुवन्तः [v]मदेम माद्येम ता इन्द्रार्थमस्माकं बहुन्नाः सन्तु, सर्वार्थसाधनभूता आप उच्यन्ते॥

प्रेति॥ तत्रैव याज्यामाह— 'प्र याभिर्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायविष्टये दुरोणे। नि नो रयिꣳ सुभोजसं युवेह नि वीरवद्गव्यमश्वियं च राधः' इति॥ हे [v]वायो, [v]दुरोणे [112]यज्ञगृहे [v]इष्टये क्रियमाणेष्टिसिद्धयर्थं नियुत्संज्ञकाभिः [v]याभिः वडवाभिः [v]दाश्वांसम् [v]अच्छ हविर्दत्तवन्तं यजमानं प्राप्तुं प्रकर्षेण [v]यासि ताः समीचीना अस्माकमनुकूला इति शेषः। [v]इह कर्मणि [v]नः अस्माकं [v]सुभोजसं [v]रयिं सुष्ठु भोजनोपयुक्तं धनं [v]नि [v]युव नितरां मिश्रय। किं च [v]राधः अन्नं नि युव। कीदृशं राधः? [v]वीरवत् [v]गव्यम् [v]अश्वियं पुत्रैर्गोभिरश्वैर्युक्तमित्यर्थः॥

११०. मै—'यजमानं' नास्ति। १११. लं—यज्ञाहे।

११२. इ—यजमानगृहे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥
रेवाꣳ इद्रेवतः स्तोता स्यात् त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य ॥ १२ ॥
[दधानो जिनोषि देभुः प्र हव्यं बभूथ मा याभिश्चत्वारिꣳशच्च] ।
[प्रजापतिस्ताः सृष्टा अग्नये पथिकृतेऽग्नये कामायाग्नयेऽन्नवते वैश्वानरमादित्यं चरुमैन्द्रं चरुमिन्द्रायान्वृजव आग्नावैष्णवमसौ सोमारौद्रमैन्द्रमेकादशकपालꣳ हिरण्यगर्भो द्वादश] ।
[प्रजापतिरग्नये कामायाभि सं भवतो यो विद्विषाणयोरिध्मे सं नह्येदाग्नावैष्णवमुपरिष्टाद्यासि दाश्वाँसमेकसप्ततिः] । [प्रजापतिः प्रेदु हरिवः श्रुतस्य] ।

रेवतीः । नः । सधमाद इति सध-मादः । इन्द्रे । सन्तु । तुविवाजा इति तुवि-वाजाः । क्षुमन्तः । याभिः । मदेम ॥
रेवान् । इत् । रेवतः । स्तोता । स्यात् । त्वावत इति त्व-वतः । मघोनः । प्रेति । इत् । उ । हरिव इति हरि-वः । श्रुतस्य ॥ १२ ॥
[मैसं ... कासं ...]

तत्रैव याज्या[११२] । ' रेवान् ' इति गायत्री ॥ [V]रेवान् धनवान् महाधनः । " रयेर्मतौ° " (पा ६·१·३७ वा ६) इति संप्रसारणम् । " रेशब्दाच्च° " (पा ६·१·१७६ वा १) इति मतुप उदात्तत्वम् । सांहितिकौ रुत्वानुनासिकावुक्तौ । [V]इत् इत्यवधारणे । धनवानेव स्यात् भवितुमर्हति । कः ? [V]रेवतः धनवतः यस्य कस्यचिदपि परिवृढस्य [V]स्तोता [V]स्यात् । अथ [११३]यदैवमेतद्भवति तदा [V]त्वावतः त्वत्सदृशस्य । " युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् "

रेवतीरिति ॥ अथ काप्यैन्द्रकर्मणि [१३३]उत्क्रष्टुम् उक्तयाज्यानुवाक्ये [१३४]आम्नायेते । तत्र पुरोनुवाक्यामाह– ' रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ' इति । रेवत्यो धनवत्यः [V]सधमादः अस्माभिः सह [१३५]मादय(द्य)न्त्यो हर्षयुक्ताः [V]तुविवाजः बह्वन्नोपेता आपः [V]नः अस्माकं स्वामिनि [V]इन्द्रे [V]सन्तु [१३६]अस्मत्सुखाय तिष्ठन्तु ॥ [V]याभिः अद्भिः सह वयं [V]क्षुमन्तः शब्दयन्त इन्द्रं स्तुवन्तः [V]मदेम [१३७]हृष्यास्म ॥

रेवानिति ॥ तत्रैव याज्यामाह– ' रेवाꣳ इद्रेवतः स्तोता स्यात् त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य ' इति । हे [V]हरिवः इन्द्र, अयं यजमानः [V]रेवाꣳ [V]इत् धनवानेव सन् [V]रेवतः धनवतो देवस्य [V]प्रेदु [१३८]अत्यन्तप्रकर्षेण [V]स्तोता [V]स्यात् । कीदृशस्य देवस्य ? [V]त्वावतः त्वत्सदृशस्य [V]मघोनः [१३९]-धनवतः [V]श्रुतस्य-[१३३] [१४०]देवेषु श्रूयमाणस्य । तादृशं देवं स्तुत्वा स्वाभीष्टं प्राप्नोतीत्यभिप्रायः ॥

---

११२. तं१.मै– याज्या पुरोनुवाक्या वा। ११३. मै४– यद्वैव°; लं– यदेव° ।

---

१३३. ' उत्क्रष्टुम् ' नास्ति। १३४. शृं– आम्नाते। १३५. अ– संपादयन्त्यः। १३६. क– अस्मत्सुखाय समीपस्थाय। १३७. क.ना–हृष्याम। १३८. क.जो.ना.हा– अत्यन्तं प्रकर्षेण। १३९–१३९. क.ना– अन्नधनवतः श्रुतस्य; जो.हा– अन्नधनवतः युतस्य; अ.पा– अन्नवत युक्तस्य; ड.ड१.ने.हो१– अन्नवतः श्रुतस्य; शृं– अन्नवतः ऋतस्य। १४०. ड१– वेदेषु।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(पा ५·२·३९ वा १) इति वतुप् । " आ सर्वनाम्नः " (पा ६·३·९१) इत्यात्वम् । [v]मघोनः धनवतः । [v]श्रुतत्य सर्वेष्वपि लोकेषु धनवत्तया विख्यातस्य त्वावतो धनवतः स्तोता सः [v]प्र एव स्यात् प्रकर्षेण रेवान् [११४]भवितुमर्हतीति । [v]उ इति पादपूरणः,[११५] विशेषख्यापने वा । त्वावतः अस्त्वित्यर्थः । हे [v]हरिवः हरिभिरश्वैर्युक्त इन्द्र । " मतुवसोः° " (पा ८·३·१) इति रुत्वम् ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये
द्वितीये काण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥
॥ समाप्तश्च [११५]प्रपाठकः ॥

अत्र विनियोगसंग्रहः ।

" हिरण्याऽऽपः प्रजा सेति चतस्रः शतकृष्णले ।
उदु चित्रं चरौ सौर्ये स प्रेत्याग्नेययागके ॥ १ ॥
हिर सावित्रके तद्वद्बडित्था [१४१]भूमिगे चरौ[१४१] ।
सोमेन्द्र ऋदू चत्वारः शिपिविष्टे वषट्त्रयम् ॥ २ ॥
अग्ने तिस्रो दातृयुक्ते मा न आ तू प्रदातृके ।
घृतं [१४२]दध्यादिगणके वायो वायव्यके क्वचित् ॥ ३ ॥
[१४३]काप्यैन्द्रे रेवतीर्लिङ्गादिति[१४३] त्रिंशदुदीरिताः " ॥ इति ॥

अथ मीमांसा ॥ अष्टमाध्यायस्य प्रथमपादे चिन्तितम्–

" कृष्णलेषु घृतस्योत [१४४]व्रीहेस्तेजोयुतेर्भवेत् ।
घृतस्य मैवं वैशद्याच्चरुशब्दयुतेस्तथा " ॥ (जैन्या ८·१·२१) ॥

" प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलम् " (मैसं २·२·२) इत्यत्र कृष्णलेषूपांशुयाजद्रव्यस्य घृतस्य धर्माः कर्तव्याः, कृष्णलाख्यसुवर्णस्य घृतस्य च तेजस्वित्वसाम्यादिति चेत् । न । सुवर्णशकल-व्रीह्योर्वैशद्यसाम्यात् । न हि घृतस्य [१४५]प्रबलकाठिन्याविरलत्वादिरूपं वैशद्यमस्ति । [१४६]चरुशब्दश्चौषधिद्रव्य-विषयः कृष्णले [१४७-]प्रयुज्यमान ओषधिधर्मान्[-१४७] प्रापयति । तस्मात् व्रीहिधर्माः[१४८] कर्तव्याः ॥

दशमाध्यायस्य प्रथमपादे चिन्तितम्—

" अवघातः कृष्णलानामस्ति नो वाऽस्ति पाकवत् ।
प्रत्यक्षोक्त्या चरेत् पाकमवघाते तु नास्ति सा " ॥ (जैन्या १०·१·४) ॥

११४–११४. तं१.लं– भवितुमर्हति । ११५. तं१– ' प्रपाठकः ' इत्यस्यानन्तरं ' शुभमस्तु ' ।

१४१–१४१. जो.ना–भूमिगोचरौ । १४२. अ.इ.उ.क.जो.ना.पा.शृं.हा–दध्यादिगुणके । १४३–१४३. अ.उ.पा– काप्यैन्द्री रेव°; क.हा–काप्यैन्द्री रेवतीलिङ्गा°; इ– काम्यैन्द्ररेवतीलिङ्गा° । १४४. अ.उ.ने.पा– °स्तेजोयुतिर्भवेत् । १४५. अ.उ.पा.शृं– °ठिन्यविचल°; क.जो.ड.ड१.ने.हा– °ठिन्यविरल° । १४६. आ.ना.पा.हो१– °ब्दस्त्वौषधद्रव्य°; ने– °शब्दस्य ओषधिद्रव्यविषयः । १४७–१४७. आ.ड.शृं.हो१–प्रयुज्यमान औषध-धर्मान्; अ.उ.क.जो.पा.हा – प्रयुज्यमानानोषधधर्मान् । १४८. ने.हो१– त्वाष्ट्रव्रीहिधर्माः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विकृतिरूपाणां काम्येष्टीनां काण्डे [१४९]पठयते–" प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः " (मैसं २.२.२) इति। कृष्णलशब्दः सुवर्णशकलवाची। प्रकृतौ ' व्रीहीनवहन्ति ' इति पुरोडाशहेतूनां व्रीहीणामवघातो विहितः। सोऽत्र चरुहेतूनां कृष्णलानां [१५०]चोदकवशादस्ति नो वेति संदेहः। अस्तीति पूर्वपक्षप्रतिज्ञा। वितुषीकरणं [१५१]प्रकृत उपकारः[१५१]। लुप्तेऽप्युपकारे तत्सत्तायां पाकवदिति निदर्शनम्। लुप्तेऽपि [१५२]विक्लेदनोपकारे पाकः प्रतिवादिनोऽभिमतः, तद्वदवघातोऽप्यस्तु। ' घृते श्रपयति ' इति प्रत्यक्षोक्त्या पाकोऽभ्युपगतः। अवघाते तु सोक्तिर्नास्तीति वैषम्यादवघातो नास्ति॥

तत्रैव द्वितीयपादे चिन्तितम्—

" [१५३]नास्त्यस्ति वा कृष्णलेषु पाकः श्रौतोऽप्यसंभवी।
अदृष्टार्थतया स स्यादौष्ण्ये तु सुतरां भवेत् " ॥ (जैन्या १०.२.१) इति॥

' घृते श्रपयति ' इति प्रत्यक्षश्रुतिविहितोऽपि पाको विक्लेदनायोग्येषु न कर्तव्य इति पूर्वः पक्षः। [१५४]दृष्टार्थस्य विक्लेदनस्यासंभवेऽप्यदृष्टार्थं पाकः कर्तव्यः। अन्यथा विधिवैयर्थ्यापत्तेः। यदा तु पाकशब्द औष्ण्यवाची तदा न कोऽपि विवादः॥

तत्रैवान्यच्चिन्तितम्—

" उपस्तराभिघारौ [१५५]स्तस्तेषु नो वा द्वयं भवेत्।
अदृष्टार्थमसंसक्तिर्दृष्टार्थौ[१५६] नेति लुप्यते " ॥ (जैन्या १०.२.२)॥

तेषु कृष्णलेषूपस्तरणमभिघारणं [१५७]चेत्येतदुभयं पाकवददृष्टार्थं कर्तव्यमिति पूर्वः पक्षः। न तावत् पाकवदत्र प्रत्यक्षविधिरस्ति। चोदकस्तु दृष्टं द्वारमपेक्षते। [१५८]सर्वत्रोपस्तरणाभिघारणयोर्दृष्टार्थत्वात्। सूक्ष्माणां पुरोडाशावयवानां स्रुचि संसक्तिं निवारयितुं तदुभयं क्रियते। कृष्णलानां तु संसक्तिप्रसङ्ग एव नास्ति। अतस्तन्निवारणलक्षणं द्वारं नास्तीत्युपस्तरणाभिघारणद्वयं लुप्यते॥

तत्रैवान्यच्चिन्तितम्—

" भक्षो नास्त्यस्ति वा तेषु नास्ति प्रीतेरभावतः।
चुश्रुषाकारनिर्धानवचनात् स्यात् प्रदानवत् " ॥ (जैन्या १०.२.३)॥

यथा पुरोडाशे [१५९]-प्राशित्रादिभागो भक्ष्यते[१५९] न[१६०] तथा तेषु कृष्णलेषु [१६१]भक्षोऽस्तीति। प्रीतिरूपस्य दृष्टद्वारस्याभावादिति पूर्वः पक्षः। " चुश्रुषाकारं भक्षयन्ति " (द्र. माश्रौ २.५.४.७; आपश्रौ १३.१७.६) " [१६२]निर्धयन्तो भक्षयन्ति " (द्र. आपश्रौ १३.७.५) इति प्रत्यक्षं वचनमाम्नायते। इक्षुदण्डभक्षणे तद्रसस्वीकारे च यः शब्दविशेषस्तस्यानुकरणं चुश्रुषेति। [१६३]घृते [१६४]निरुप्तेषु कृष्णलेषु [१६५]यल्लिप्तमाज्यं तदन्तर्नेतुमिव [१६६]बलात् चुश्रुषां कृत्वा तदाज्यं [१६७]निःशेषेण [१६७]पिबन्तो भक्षयेयुरित्यर्थः। अनदनीयद्रव्याणामपि कृष्णलानां यथा वचनात् प्रदानं तद्वदभक्ष्याणामपि भक्षणं भवेत्॥

१४९. आ.हा– उदाहियते। १५०. हा–बाधक°। १५१–१५१. अ.उ.ड.ड१.ने.पा.हो१–तत्कृत उप°; शृं–तच्छ्रुतेरुप°; आ.ना–प्राकृत उप°। १५२. ड–विविन्ने क्लेदनोपकारः; ने–विच्छेदेनोपकारः। १५३. ने.हो१– नास्त्यत्र। १५४. अ.उ.ड.ड१.ने.पा.पा.हो१–दृष्टस्य। १५५. अ.उ.जो.ना.पा.हा–द्वौ तेषु। १५६. अ.उ.क.जो.पा.शृं.हा– °र्दृष्टार्थं; आ–°क्तिदृष्टार्थं। १५७. क.हा– चेत्युभयं। १५८. आ.क.ड– प्रकृताबुप°। १५९–१५९. ड–°भागा भक्ष्यन्ते। १६०. आ.क.ड– 'न' नास्ति। १६१. आ.क.ड–'भक्षः' नास्ति। १६२ अ.उ.पा– निर्धायं। १६३. ड१.ने.हो१– 'घृते' नास्ति। १६४. अ.उ.जो.ना.पा.हा– उपलिप्त°। १६५. आ.क.जो.हा– बालाः; अ.उ.पा–यत्। १६६. ड१–विशेषेण। १६७. ड१– पिबन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

तत्रैवान्यच्चिन्तितम् —

" [१६८]सकृत्सहत्वयोरेकमेकधेत्यन्त्यमेव वा ।
एकं नियामकाभावादबाधादन्त्यमेव हि " ॥ (जैन्या १०·२·४) ॥

तत्रैव [१६९]कृष्णलभक्षणे श्रूयते–" एकधा ब्रह्मण उपहरति " (तैसं २·३·२) इति । तत्रैकधेत्ययं धाप्रत्ययः प्रकारवाची (द्र. पा ५·३·४२) सञ्जेकवारमित्यमुमर्थं वा बहूनां सहभावं वा ब्रूते । उपहारो भक्षणाय समर्पणम् । एकधेत्यनेन शब्देन सकृत्वसहत्वयोरन्यतरद्विवक्षितमुत सहत्वमेवेति संशयः । नियामकाभावादुभयोर्मध्ये यत्किंचिदन्यतरदिति पूर्वः पक्षः । अबाधोऽत्र नियामकः । प्रकृताविडाप्राशित्रचतुर्धाकरणशंयुवाककालेषु [१७०]चतुर्धाभक्षणसिद्धये चत्वार उपहारा उपदिष्टाः । अत्रापि [१७१]ते चोदकप्राप्ताः । [१७२]तत्र सकृत्त्वपक्ष उपरितनास्त्रय उपहारास्तत्तत्कालविशेषाश्च बाध्येरन् । सहत्वपक्षे कालविशेषा एव बाध्यन्ते, न तु त्रय उपहाराः । तस्मादन्त्यपक्षरूपं सहत्वमेवैकधेत्यस्य शब्दस्यार्थः ॥

तत्रैवान्यच्चिन्तितम् –

" सर्वं ब्रह्मण इत्यत्र ब्रह्मभागस्य सर्वता ।
[१७३]अन्यभागस्यापि वाऽऽद्यो भागान्तरमबाधितुम् ॥
[१७४]-सर्वत्वमन्यभागीयं ब्रह्मणोऽत्र-[१७४] विधीयते ।
स्वभागीयं चोदकाप्तं बाध्यतामन्यभक्षणम् " ॥ (जैन्या १०·२·५-६) ॥

कृष्णलभक्षण एवेदमपरं श्रूयते – " सर्वं ब्रह्मणे परिहरति " इति । परिहारः समर्पणम् । ब्रह्मसहितानामृत्विजामेकैकस्य चतुर्षु कालेषु चत्वारो [१७५]भक्षणभागाः चोदकप्राप्ताः । [१७६]-तत्र सर्वता-[१७६] किं ब्रह्मसंबन्धिचतुर्भागविषया, [१७७]उतेतरसंबन्धिभागचतुष्टयविषयाऽपीति संदेहः । अध्वर्युप्रभृतीनामृत्विजां ये ये चत्वारो भागास्तेषां बहूनामबाधनायाऽऽद्यः [१७८]पक्षोऽभ्युपगन्तव्यः । तत्रैषा वचनव्यक्तिः – ब्रह्मसंबन्धमनूद्य सर्वत्वपरिहारयोरेकमनुवादेऽन्तर्भाव्य इतरद्विधेयं 'यद्ब्रह्मणे सर्वं तत्परिहरति, यद्ब्रह्मणे परिहरति तत्सर्वम्' इति । उभयथाऽपि [१७९]विधेर्ब्रह्मभागमात्रे पर्यवसानात् चोदकप्राप्ता अन्यभागा अबाधिता भविष्यन्तीति पूर्वः पक्षः । सर्वत्वपरिहारावनूद्य ब्रह्मसंबन्धोऽत्र विधीयते । यत् परिहर्तव्यं सर्वं [१८०]तद्ब्रह्मण इति वचनव्यक्तिः । तत्र ब्रह्मभागाणामितरभागाणां च यत्सर्वत्वं तस्य ब्रह्मसंबन्धे सति ब्रह्मभागाणां ब्रह्मसंबन्धस्य चोदकादेव प्राप्तत्वात् [१८१]तत्रानर्थको विधिः अन्यभागानां ब्रह्मसंबन्धविधाने पर्यवस्यति । तस्मादन्येषां भक्षणं बाध्यते ॥

तत्रैवान्यच्चिन्तितम् –

" [१८२]युगपत्स्वस्वकाले वा तत्सर्वं [१८३]भक्षयेदयम् ।
अविलम्बादादिमोऽन्त्यस्तं तं कालमबाधितुम् " ॥ (जैन्या १०·२·७) ॥

अतीतेनाधिकरणद्वयेन युगपत्सर्वं ब्रह्मणे समर्पयेदित्युक्तं तत्र भक्षयितुं युगपत्समर्पितस्य सर्वस्य मध्ये कियदपि भक्षयित्वाऽवशेषितस्य विलम्बे कारणाभावाद्युगपदित्याद्यः [१८४]पक्षः प्राप्नोति । चोदकप्राप्तस्य

---

१६८. अ.उ.पा.– सकृद्बहुत्व...धेत्ययमेव । १६९. अ.उ.पा.–कृष्णलशेषे । १७०. अ.उ.ड.ने.पा.शृं.हो१– चतुर्वारभक्षण° । १७१. ड.ड१.ने.हो१– 'ते' नास्ति । १७२. ड१– अत्र । १७३. अ.उ.पा.ड१.ने– स्वस्वकालस्यापि । १७४–१७४. अ.उ.पा– सर्वस्वमन्यभागाय प्रणेतृत्वं; ने–सर्वस्वमन्यभागीयं ब्रह्मणेऽत्र; ड–सर्वत्रमन्यभागीयं ब्रह्मणा प्र°; ड१–स्वे सर्वत्वमन्यभागीयं ब्रह्मणेति; क.जो.पा.हा.हो१– °यं ब्रह्मणेऽत्र । १७५. हो१– भक्षाः; ड.ड१– भागाः, शृं–भक्षभागाः । १७६–१७६. ड.ड१.ने.हो१– सूत्रसंमताः । १७७. ने–उतेतरविषयसंबन्धि° । १७८. ड.ड१.ने.शृं–पक्षोऽवगन्तव्यः । १७९. ड.शृं.हो१– विधिर्ब्र° । १८०. अ.उ.ड.ड१.ने.पा.शृं.हा.हो१– ब्रह्मणः । १८१. ने–तस्यान° । १८२. शृं– °स्वस्य काले । १८३. ने– ब्रह्मणे वयम्; ड– ब्रह्मणे भक्षयेदयम् । १८४. अ.उ.ड.ने.पा.हो१–'पक्षः' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्तत्कालस्याबाधो विलम्बे हेतुः। तस्मात् स्वस्वकाल [१८५]इत्यपरः पक्षोऽभ्युपगन्तव्यः ॥

अष्टमाध्यायस्य प्रथमपादे चिन्तितम्–

" फलं च नियमः कर्ता संघः सौर्ये न वाऽग्रिमः।
प्रयाजवन्न विध्यादिविध्यन्तत्वविभेदतः " ॥ (जैन्या ८·१·१६) ॥

इष्टौ फलादयश्चत्वारः सन्ति। फलं स्वर्गः। नियमो यावज्जीवकर्तृत्वम्। कर्ता स्वर्गकामः। संघ आग्नेयादीनां षण्णां साहित्यम्। त एते चत्वारः सौर्ये प्रयाजादिवदतिदेष्टव्या इति चेत्। न। वैषम्यात्। [१८६]प्रयाजादिराकाङ्क्षितविध्यन्तत्वादतिदिश्यते। विध्यादिस्तु नाऽऽकाङ्क्षितः। 'सौर्यं चरुं निर्वपेत्' इति मुख्यविधेः प्रत्यक्षश्रवणात्। अन्यथा [१८७]विध्यन्तत्वेऽपि कस्याऽऽकाङ्क्षा वर्ण्येत। तस्मात् प्रधानकर्मणोऽनाकाङ्क्षितस्य विकृतावप्रवृत्तेस्तत्संबद्धाः फलादयोऽप्यनाकाङ्क्षितत्वान्नातिदिश्यन्ते ॥

तत्रैवान्यच्चिन्तितम्–

" गोदोहनाद्यस्ति नो वा भवेत् प्रणयनाश्रयात्।
[१८८]अनङ्गत्वादपेक्षाया अभावान्नातिदिश्यते " ॥ (जैन्या ८·१·१७) ॥

" चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्य " (द्र. आपश्रौ १·१६·२) इति [१८९]दर्शपूर्णमासयोः श्रुतं[१८९] गोदोहनं सौर्येऽप्यतिदेष्टव्यम्। कुतः? [१९०]तदाश्रयस्य प्रणयनस्य सद्भावादिति चेत्। मैवम्। क्रत्वङ्गतया चमस एव [१९१]प्रणयनसाधनमपेक्षितं [१९२]न त्वनङ्गं[१९२] पुरुषार्थं गोदोहनम्। अतः फलनियमादिवन्नातिदेशः ॥

तत्रैवान्यच्चिन्तितम्–

" स्पर्शद्वयं व्यवस्थाप्यं विकल्प्यं वा व्यवस्थितिः।
प्रकृताविव नो तत्र [१९३]तस्याः शाब्दत्ववर्जनात् " ॥ (जैन्या ८·१·१८) ॥

दर्शपूर्णमासयोर्हविषां स्पर्शनद्वयं [१९४]व्यवस्थितमन्त्रद्वयसाध्यमाम्नातम्—" चतुर्होत्रा [१९५]पौर्णमास्यामभिमृशेत् पञ्चहोत्रा [१९६]अमावास्यायाम् " (आपश्रौ ४·८·८) इति। " पृथिवी होता " (तैआ ३·२) इत्यादिमन्त्रश्चतुर्होता। " अग्निर्होता " (तैआ ३·३) इत्यादि मन्त्रः पञ्चहोता। [१९७]तदेतदुभयं सौर्यादौ चोदकप्राप्तं सत् कालभेदेनानुष्ठानद्वये व्यवस्थापनीयम्। कुतः? प्रकृतौ पौर्णमास्यमावास्ययोः [१९८]कालयोर्भेदेन व्यवस्थितत्वादिति चेत्। न। प्रकृतौ व्यवस्थाया [१९९]आर्थिकत्वात्। [२००]शाब्दस्यैवाङ्गत्वेनातिदेशार्हत्वात्। तस्मादुभयं विकृताविच्छया विकल्प्यते ॥

तत्रैवान्यच्चिन्तितम्—

" षट्सु कस्याप्युताऽऽग्नेयस्यैव सौर्येऽग्रिमो यतः।
अविशेषो न देवैक्यादौषधद्रव्यकत्वतः " ॥ (जैन्या ८·१·१९) ॥

दर्शपूर्णमासगतेषु [२०१]षट्सु यागेषु[२०१] यस्य कस्यापि विध्यन्तः सौर्ये कर्तव्यः, अस्यैवेति विशेषनियामकस्याभावादिति चेत्। न। देवतैक्यस्य नियामकत्वात्। सौर्यशब्दगततद्धितप्रत्ययविग्रहस्य सूर्यौविति द्विवचनेनापि कर्तुं शक्यत्वात् [२०२]देवतैक्यम् [२०३]अनिश्चितमिति चेत्। न। [२०४]विधिशेषार्थवादोक्तौ

१८५.आ.ड१.शृं– इत्यन्त्यः। १८६. अ.उ.पा– °प्रयाजादिराकाङ्क्षे स विध्य°। १८७. आ.क.शृं–विध्यन्ते। १८८. अ.उ– असंगत्वा°। १८९–१८९. ड.ड१– °मासगतं। १९०.हो१– तदाश्रयणीयस्य; ड.ने– तदाश्रयणस्य। १९१. ड.ड१.ने.हो१– प्रणयनमपेक्षितम्। १९२–१९२. अ.उ.पा–न त्वसङ्ग°; ड– तत्त्वसङ्गं; आ.क– न त्वङ्गम्। १९३. ने.हो१– तस्याम्। १९४. अ.उ.जो.ने.पा.हा–व्यवस्थितं मन्त्रद्वय°; हो१–व्यवक्षितमन्त्रद्वयं साध्य°। १९५. क.जो.ड.ड१.ना.शृं.हो.हा१– पौर्णमासीमभि°। १९६. क.ना.शृं–अमावास्याम्। १९७. आ– तदुभयम्। १९८. क–कालभेदेन। १९९. ड.ने.हो१–सार्थकत्वात्, ड१– साधकत्वात्। २००. अ.उ.पा– शब्दस्यैवा°। २०१–२०१. अ.उ.पा– 'षट्सु यागेषु' नास्ति। २०२. ड.ड१.ने.हो१– तद्देवतैक्यम्। २०३. ड१.ने–अनुस्यूतमिति। २०४. ड– °वादोक्त्या।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

'अमुमेवाऽऽदित्यम्' इत्येकवचनेन तद्व्यपदेशात्। आग्नेयार्थवादेऽपि "सोऽग्नयेऽध्रियत' (तैसं २·६·३) इत्येकवचनं व्यपदिष्टम्। अत आग्नेयस्यैव विध्यन्तो न त्वग्नीषोमीयैन्द्राग्नयोः। यद्यप्यैन्द्रयोर्दधिपयसोः प्राजापत्य उपांशुयाजेऽपि देवतैक्यमस्ति तथाऽप्यौषधद्रव्यकत्वमाग्नेये विशेष्यते। तस्मात् तस्यैव विध्यन्तः॥

नवमाध्यायस्य द्वितीयपादे चिन्तितम्–

"सौर्यादौ पार्वणौ होमौ स्तो न वा कालदेवकौ। ५
स्तः संघदेवकौ संघाविकारत्वान्न तत्र तौ" ॥ (जैन्या ९·२.२६)॥

दर्शपूर्णमासयोः श्रूयते– "स्रुवेण [२०५]पार्वणौ जुहोति" (द्र. बौश्रौ १·१७) इति। तत्र पर्वशब्दः कालविशेषवाची। ततः कालदेवकौ तौ होमौ आराद्युपकारकतया प्रयाजादिवत् सौर्यादिविकृतिष्वतिदिश्येते इति चेत्। मैवम्। पर्वशब्दस्याऽऽग्नेयादित्रिकसंघपरत्वात्। दानार्थवाचिनः पृणातेर्धातोर्निष्पन्नोऽयं पर्वशब्दः। [२०६-स च-२०६] [२०७]प्रीय(पूर्य)ते [२०८]दीयतेऽस्मिन्नित्यधिकरणव्युत्पत्त्या कालमाचष्टे। भावव्युत्पत्त्या १०
तु क्रियापरः सन् प्रकरणवशादाग्नेयादिकर्मत्रयसंघमाह। तथा च [२०९]मन्त्रवर्णोऽप्यनुगृहीतो भवति। "ऋषभं वाजिनं वयं पूर्णमासं यजामहे" (तैब्रा ३·७·५) इत्येको मन्त्रः। "अमावास्या सुभगा सुशेवा धेनुरिव भूय आप्यायमाना" (तैब्रा ३·७·५) इत्यपरो मन्त्रः। तत्राग्नीषोमवत् कर्मत्रयसंघस्य व्यासक्तदेवता-त्वम्। न च संघस्य विकृतिः सौर्यादिः। किं त्वाग्नेयस्यैव। ततः संघार्थयोर्होमयोर्नास्ति सौर्यादौ प्राप्तिः॥

दशमाध्यायस्य प्रथमपादे चिन्तितम्– १५

"सौर्ये चरौ चरुः स्थाली किं [२१०]वाऽन्नं लौकिकोक्तितः।
[२११-स्थाल्यस्यां श्रपणं-२११] योग्यं कपालविकृतित्वतः॥
[२१२]विद्वत्श्रुतिप्रसिद्ध्याऽन्नं [२१३]देवतातद्धितोक्तितः।
[२१४]योग्यत्वेन [२१५-प्रदेयं तत्पुरोडाशहविर्यथा-२१५]" ॥ (जैन्या १०·१·१९-२०)॥

"सौर्यं चरुं निर्वपेत्" (तैसं २·३·२) इत्यादिवाक्ये चरुशब्दः [२१६]किं स्थालीं वक्ति, २०
[२१७]आहोस्वित् ओदनमिति संदेहः। [२१८]तत्र लौकिका आ हिमवत आ च कुमारीभ्यः सर्वेऽपि [२१९]सर्वदेशीयस्वस्वभाषाप्रसिद्ध्या [२२०]यत्किंचिद्गकारवकाराद्यक्षरमुपरि प्रक्षिप्य चरुशब्दमल्पे पात्रे पाकाधिकरणे ताम्रादिमये प्रयुञ्जते। निघण्टुकाराश्च 'उखा स्थाली चरुः' इत्येतान् शब्दान् पर्यायत्वेन [२२१]उपदिशन्ति। तस्माच्चरुशब्दः स्थालीं वक्ति। यदि [२२२]तस्याः अदनीयत्वाभावेन पुरोडाशवत् प्रदान-योग्यता न स्यात् तर्हि मा भूत् पुरोडाशविकृतित्वं, पुरोडाशाधिष्ठानकपालविकृतित्वं तु भविष्यति, श्रपणयोग्य- २५
तायाः सद्भावात्। यथा कपालेषु हविः [२२३]श्रप्यते तथा स्थाल्यामपि श्रपयितुं शक्यते। तस्माच्चरुः स्थालीति प्राप्ते ब्रूमः— अन्नमेव चरुशब्देनोच्यते। कुतः? श्रुतिप्रसिद्धेः। "आदित्यः प्रायणीयश्चरुः" (द्र. ऐब्रा १·७) इति विधाय तद्वाक्यशेषे हि "अदितिमोदनेन" इत्योदनशब्देन चरुरनूद्यते। यदि भोज्यान्ने

---

२०५. ने.हो१–पार्वणहोमौ; ड.–पार्वणौ होमौ। २०६–२०६. ने–अतः। २०७. ड१–क्रियते; हो१– ब्रीयते। २०८. ने– 'दीयते' नास्ति। २०९. जो.ना.हा– °प्यनुसंगृहीतः। २१०. ड– वा ३०
स्यात्। २११–२११. ने– स्थाल्यां श्रपणंसंयोग्यम्; ड१– स्थाल्यां श्रपणंयोग्यम्। २१२. शृं–विद्वत्कृति°। २१३. उ.जो.पा.हा – दैवतं तद्धि°। २१४. अ.उ.ड.पा.हो१ – यागत्वेन। २१५–२१५. ड१– प्रदीयन्ते पुरो°। २१६. शृं– 'किं' नास्ति। २१७. क.हा– उत। २१८. क.हा– तत्र च। २१९. अ.उ.पा – सर्वदेशीयभाषा°; ड.ने.हो१ – स्वस्वदेशीयभाषा°; शृं– स्वस्वदेशीयभाषा°। २२०. अ.उ.पा– °वकारमुपरि; क– °गकारचकाराद्यक्षरमुपरि; ने.शृं– °वकाराद्युपरि। २२१. ड.ड१.ने.शृं.हो१– ३५
पठन्ति। २२२. अ.उ.पा– स्थाल्याः। २२३. ने– घ्रियते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चरुशब्दः क्वापि न प्रयुज्यते तर्ह्योदनविशेषवाची चरुशब्दोऽस्तु। तत्र विद्वत्प्रसिद्धेः। विद्वांसो [२२४]याज्ञिकाः शब्दैकगम्यधर्माधर्मव्यवहारिणः शब्दार्थाविप्लवे तात्पर्यवन्तो [२२५]अनवस्थावितान्तरूष्मपक्वे जीवतण्डुले [२२६]विशदसिद्धे ओदने चरुशब्दं प्रयुञ्जते। सत्योदनवाचित्वे 'सौर्यम्' इति तद्धितोऽप्युपपद्यते। यथा "आग्नेयम्" इति [२२७]देवतातद्धितसंयुक्तपुरोडाशः प्रदेयद्रव्यं तथा चरुरपि। अन्ये च निघण्टुकाराः "हव्यपाके चरुः पुमान्" (अमरकोश २.७.२२) इति पठन्ति। तस्माच्चरुशब्दोऽन्नवाची॥

तत्रैवान्यच्चिन्तितम्—

"चरुः कपाले पक्तव्यः क्वापि वा [२२८]उचितेऽथवा।
कपाले [२२९]चोदकप्राप्तेरनपूपत्वतः क्वचित्॥
स्थाल्यां [२३०]-चरुत्वयोग्यत्वात् कटाहे[-२३०] योग्यता न हि।
चिन्ताद्वयफलं [२३१]त्वत्र पेषणादिनिवर्तनम्"॥ (जैन्या १०.१.२१-२२)॥

विषयसंशयनिर्देशकं पूर्वार्धं स्पष्टार्थम्। यथा प्रकृतौ पुरोडाशस्य कपाले पाकस्तथा विकृतौ चरोदित्याद्यः पूर्वपक्षः। [२३२-]पुरोडाशस्यापूपत्वात् कपालगतोष्मणा[-२३२] पाकः संभवति। चरुस्त्वोदनत्वात् [२३३]उदकगतोष्मणा [२३४]पक्तव्यः। अतोऽप्राकृतकार्यत्वाच्चोदकप्राप्तिर्नास्तीति यद्युच्येत तर्हि अनपूपस्य चरोरुदकधारणयोग्ये कटाहघटादौ यत्र क्वापि पाक इति द्वितीयः पूर्वपक्षः। निरुप्तानां मुष्टिचतुष्टयपरिमितानां तण्डुलानामल्पेनैव पात्रेण पक्तुं योग्यत्वाच्चरोः स्थाल्यामेव पाक इति राद्धान्तः। पूर्वत्र चरुरोदन इति चिन्तितम्। [-२३५]न ह्योदने[२३५-] पेषणादिरस्ति। अतः पेषणादिनिवृत्तिः पूर्वचिन्तायाः साक्षात् फलम्। तद्द्वारेण चरुनिष्पादकस्थालीचिन्ताया अपि [२३६]फलमित्युपचर्यते॥

[२३७]पेषणादीन्यनुक्रामति—

"पेषणं यवनं वापस्तापश्चोपहितिः प्रथा।
मार्जनाध्यूहनज्वालास्तथा व्युद्वृत्य सादनम्"॥ (जैन्या १०.१.२३)॥

पेषणं चूर्णनं, यवनं पिष्टस्योदकमिश्रणं, वाप उदकमिश्रणाय पिष्टस्य पात्रे प्रक्षेपः, तापः कपालानामङ्गारैः प्रतापनम्, उपहितिरङ्गारेषु कपालस्थापनम्, [२३८-]प्रथा कपालेष्ववस्थापितस्य[-२३८] पुरोडाशस्य [२३९]हस्तसंघट्टनेन सर्वेषु कपालेषु प्रसारणं, मार्जनं श्लक्ष्णीकरणम्, अध्यूहनं भस्मनाङ्गारैश्चोपर्याच्छादनम्, ज्वाला दर्भपुञ्जीलैः [२४०]उपरिज्वालनम्, व्युद्वृत्य सादनं [२४१-]कपालेभ्यः पृथक्कृतस्य पुरोडाशस्यान्तर्वेद्यवस्थापनम्[-२४१]। ननु पेषणादिनिवृत्तेः पूर्वाधिकरणद्वयफलत्वे किमिति सूत्रकारः प्रत्येकं सूत्रैः विचारितवानित्याशङ्क्य मन्दमतिव्युदासायेत्याह-"एतानि मन्दप्रज्ञस्य कर्तव्यानीति विभ्रमः। [२४२]अपूपस्यैव योग्यानीत्येतद् सूत्रैर्निरूपितम्"॥

---

२२४. ने.हो१- याज्ञिक°। २२५. ड१.ने- अनवस्थापितान्तरूष्मपक्व°। २२६. आ.क- विशदसिक्थे। २२७. ना- देवतातद्धितसंयुक्तः पुरोडाशः; अ.उ.पा- देवता तथा तत्संयुक्त।° २२८. अ.उ.जो.ड१.ने.पा.हा-पिठरेऽथवा। २२९. ड.ड१.हो१-°रनुरूपत्वतः। २३०-२३०. ना-चरोस्तु योग्यत्वात् कटाहे; अ.उ.पा- चरुरयोग्यत्वात् पक्तये। २३१. ने- तत्र। २३२-२३२. ने-°पूर्वत्वादेककपालगतोष्मणा; शृं- °पूपपरत्वा°। २३३. ने- उद्गतो°। २३४. ने- कर्तव्यः। २३५-२३५. शृं- न तर्ह्योदने। २३६. ड१- °त्युपपद्यते। २३७. ड.हो१- °दीन्यनुपक्रमति; ने- °णादिजन्यमपक्रमति। २३८-२३८. क- प्रथा कपाले व्यवथापितस्य; हो१- प्रथा कपालेष्वास्थापितस्य; ने- प्रथनं कपालेष्ववस्थापितस्य। २३९ ने- हस्तेन संघ°। २४०. आ- प्रज्वालनम्; ड१.शृं.हो१ - अपज्वालनम्; ने - उपज्वालनम्। २४१-२४१. ड.ड१- कपालेभ्यः पुरोडाशं पृथक्कृत्यान्तर्वेद्यास्थापनम्। २४२. ड१- अपूर्वस्यैव।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्रैव चतुर्थपादे चिन्तितम्—

" सौर्यादिनिगमे कोऽपि शब्दः स्याद्वैध एव वा।
चरौ[२४३]सूर्यान्वयादाद्यः प्रयोगान्वयतोऽन्तिमः " ॥ (जैन्या १०.४.२३) ॥

" सौर्यं चरुं निर्वपेत् " (तैसं २.३.२) इत्यादिविकृतिषु चोदकातिदिष्टा ये निगमाः तेष्वग्न्यादिशब्दस्थाने सूर्याद्यर्थप्रत्यायकः शब्द [२४४]ऊहितव्यः। स चार्थ आदित्यरव्यादिना पर्यायेणापि प्रत्याययितुं शक्यते। वैधस्तु सूर्यशब्दः [२४५]चरुयागे एवान्वितः, न त्वग्न्यादिशब्दवन्निगमेषु पठितः। तस्मात् यः कोऽपीति प्राप्ते ब्रूमः। अत्र " सौर्यं चरुं निर्वपेत् " (तैसं २.३.२) इति प्रयोगवचनेन सूर्यान्वयो भवति, न तु [२४६]-सौर्यं चरुमिति-[२४६] चरुणा। कारकविभक्तिर्हि द्वितीया। सा चाऽऽख्यातेन संबध्यते न नाम्ना। सति च प्रयोगान्वये याज्यापुरोनुवाक्ययोर्निगमेषु वा [२४७]-यत्र यत्र-[२४७] प्रयोगोऽपेक्षितस्तत्र सर्वत्र सूर्यशब्द एव युक्तः। प्रकृतावपि निगमेषु नार्थमात्रविवक्षयाऽग्निशब्दः प्रयुज्यते, किं तर्हि ? [२४८]वैधशब्द-विवक्षयाऽपि। तथा सत्यतिदेशोऽपि वैधशब्दविषय एव भविष्यति। तस्मात् सूर्यशब्द एव प्रयोक्तव्यः ॥

द्वादशाध्यायस्य द्वितीयपादे चिन्तितम्–

" आरम्भणीया सौर्यादौ नोत स्यान्न प्रयोगवत्।
क्रत्वर्था न [२४९]प्रयोगार्था क्रत्वारम्भे ततो भवेत् " ॥ (जैन्या १२.२.६) ॥

दर्शपूर्णमासयोः प्रथमप्रयोगस्यैवोपक्रम आरम्भणीया न प्रयोगान्तरस्येति नवमे (जैन्या ९.१.१५) निर्णीतम्। आदौ कृतस्य [२५०]कर्तृसंस्कारस्य यावज्जीवपर्यापत्वाद्यथा न प्रयोगान्तर आरम्भणीयापेक्षा, तथा [२५१]यावज्जीवप्रकृतिकालमध्यपातिनीनां सौर्यादिविकृतीनां नास्ति तदपेक्षेति प्राप्ते ब्रूमः – " दर्शपूर्णमासावारप्स्यमानः " (द्र. मैसं १.४.१४) इत्युक्तत्वात् क्रत्वर्थेयमारम्भणीया, न तु प्रयोगार्था। क्रत्वन्तराणि हि सौर्यादीनि। ततः [२५२]प्रयोगान्तरवैषम्यात् सौर्यादौ सा कर्तव्या। न च यावज्जीवकालः प्रकृत्यङ्गं, कर्तृधर्मत्वेन द्वितीये (जैन्या २.४.१-२) [२५३]वर्णितत्वात्। अतो नोक्तरक्षोध्नन्यायोऽत्र प्रसरति। तस्मान्नास्त्यत्र प्रसङ्गः।

[२५४]तृतीयाध्याये चतुर्थपादे चिन्तितम्–

" सोमवामिचरुर्लोके वेदे [२५५]वेन्द्रियसंक्षयः।
दृष्टदोषो लौकिकेऽतो वमने विहितश्चरुः ॥
अदोषो वमनायैव लोके [२५६]-पानं श्रुतौ-[२५६] पुनः।
[२५७]जरणाय ततो वान्तिदोषशान्त्यै भवेच्चरुः " ॥ (जैन्या ३.४.३१-३२) ॥

---

२४३. अ.उ.पा – सूर्याश्रयादाद्यः। २४४. ने–कर्तव्यः। २४५. क.उ.ड१.ना.शृं.हो१–चरुत्यागे। २४६–२४६. क.ड–सौर्यश्चरुरीति। २४७–२४७. क.ड१–यत्र। २४८. ड१.हो१–वेदशब्द°। २४९. ड.ड१.हो१–प्रयोगार्थम्। २५०. ड१–कर्तुः संस्का°। २५१. ड१–यावतज्जीवलक्षणप्रकृति°। २५२. क.हा–प्रयोगान्तरे वैष° । २५३. शृं.हो१–निर्णीतत्वात्। २५४. ड१–तृतीयाध्यायस्य। २५५. ड१.ने–°संज्ञया। २५६–२५६. अ.उ.पा.हा–पाठात् क्रतौ; ड१.ने.शृं.हो१– पानात् क्रतौ। २५७. अ.उ.पा–करणाय; हो१–जननाय।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इदमाम्नायते- " सोमेन्द्रं चरुं निर्वपेच्छ्यामाकं सोमवामिनः " (मैसं २·२·१३, द्र. तैसं २·३·२) इति। तत्र लौकिके सोमवमने विहितोऽयं चरुः। कुतः? " वि वा एष इन्द्रियेण वीर्येणर्ध्यते यः सोमं वमिति " (द्र. मैसं २·२·१३, तैसं २·३·२) इति [२५८]दृष्टदोषमुपन्यस्य तच्छान्तये चरुविधानादिति चेत्। मैवम्। लोके [२५९]धातुसाम्यार्थिना वमनायैव सोमस्य पाने सति वमनस्य [२६०]दोषहेतुत्वाभावात्। वेदे तु " हिन्व मे गात्रा हरिवः " (तैसं ३·२·५) इत्यनेन मन्त्रेण जरयितुं सोमः [२६१]पीयते। तत्र वमनप्रायश्चित्तार्थोऽयं चरुः॥

तत्रैवान्यच्चिन्तितम्-

" [२६२]ऋत्विजां वमनेऽप्येष [२६३]कर्तुरेवोत वर्जनात्।
[२६४]विशेषस्याग्रिमो मैवं कर्तुरेव [२६५]निरूपितः " ॥ (जैन्या ३·४·३३)॥

[२६६]ईदृशस्य [२६७]सोमवमने चरुरिति विशेषस्याभावात् [२६८]ऋत्विजां यजमानस्य [२६९-]च वमने[-२६९] सर्वत्रासौ चरुरिति चेत्। मैवम्। ' [२७०-]यो [२७१]वमति स निर्वपति ' इति निर्वप्तुर्वमनं[-२७०] चरुनिमित्तं, निर्वप्ता च यजमानः। ऋत्विजो निर्वप्तृत्वेऽधिकारान्तरप्रसङ्गात्। तस्माद्यजमानस्यैव वमने चरुविधिः॥

अष्टमाध्यायस्य प्रथमपादे चिन्तितम्—

" क्षीरस्याऽऽज्यस्य वा नीरे मधुन्यप्यग्रिमो यतः।
द्रवत्वं न घृतेऽप्यस्य [२७२]सत्त्वात् वर्णाच्च[२७३] संभवात् " ॥ (जैन्या ८·१·२२)॥

चित्रायागे श्रूयते-" दधि मधु घृतमापो धानास्तण्डुलास्तत्संसृष्टं प्राजापत्यम् " (द्र. तैसं २·३·२, मैसं २·३·६) इति। तत्र मधुन्युदके च [२७४]द्रवत्वसामान्येन सांनाय्यगतस्य पयसो धर्मा इति चेत्। न। घृतेऽप्यग्निसंपर्केण द्रवत्वसद्भावात् [२७५]अशुक्लवर्णत्वादाज्यधर्माणामुत्पवनादीनां संभवात् [२७६]पयोधर्माणां दोहनादीनामसंभवाच्च [२७७]उपांशुयाजगतस्याऽऽज्यस्य धर्माः कर्तव्याः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे द्वितीयप्रपाठके प्रथमादिद्वादशान्ता अनुवाकाः॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञा-
परिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे द्वितीयः प्रपाठकः॥

---

२५८. अ.उ.पा-°पमापन्नस्य। २५९. आ.ड.ने.शृं.हा-साम्यार्थिनः। २६०. आ.शृं-दोषा-हेतुत्वात्। २६१. ड-दीयते। २६२. क.ने.हा.हो१-ऋत्विजः। २६३. ने-कर्तुरेव हि। २६४. अ.उ.ड१.ने.पा.हो१-विशेषानुक्तितो; शृं-विशेषभुक्तितो। २६५. क.ड.ने.शृं.हो१-निरुक्तितः। २६६. अ.आ.उ.पा-ईशस्य। २६७. क.जो.ना.हा-सोमस्य वमेन। २६८. हो१-ऋत्विजः। २६९-२६९. जो.ना.हा-वा वमने; ड१.ने-वमने; ड-वमनेन। २७०-२७०. ने-यो वमिष्यन् निर्वपतीति वमनं। २७१. अ.उ.क.पा.हा-वमिति। २७२. ने.हो१-स्वत्त्वात्। २७३. ड१-वर्णस्य च। २७४. ड.ने.हो१-°साम्येन। २७५. अ.उ.पा-अशुद्धवर्ण°। २७६. क-पयसो धर्माणाम्। २७७. क.जो.ना.हा-°यागगतस्य; ड१- उपांशुगतस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(अथ द्वितीयकाण्डे तृतीयः प्रपाठकः)

हरिः ॐ ॥

आदित्येभ्यो भुवद्वद्ध्वयश्चरुं निर्वपेद्भूतिकाम आदित्या वा एतं भूत्यै प्रति नुदन्ते योऽलं भूत्यै सन् भूतिं न प्राप्नोत्यादित्यानेव भुवद्वतः स्वेन भागधेयेनोप धावति त

आदित्येभ्यः । भुवद्वद्ध्वय इति भुवद्वत्-ध्यः । चरुम् । निरिति । वपेत् । भूतिकाम इति भूति-कामः । आदित्याः । वै । एतम् । भूत्यै । प्रतीति । नुदन्ते । यः । अलम् । भूत्यै । सन् । भूतिम् । न । प्राप्नोतीति प्र-आप्नोति । आदित्यान् । एव । भुवद्वत इति भुवत्-वतः । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । ते । एव । एनम् । भूतिम् । गमयन्ति ।

'आदित्येभ्यो भुवद्वद्ध्वयः' इत्यादि ॥ [1]भवता [2]भवित्रा तद्वन्तो भुवद्वन्तः, याज्यानुवाक्ययोः तादृशत्वात् । भवतेर्लटः शत्रादेशः, "बहुलं छन्दसि" (पा २·४·७३) इति शपो लुक् । व्यत्ययेनाद्युदात्तत्वम् । शपि वा व्यत्ययेन गुणाभावः । तत्रादुपदेशाल्लसार्वधातुकानुदात्तत्वे (पा ६·१·१८६) धातुस्वरः, "तसौ मत्वर्थे" (पा १·४·१९) इति व्यत्ययेन न प्रवर्तते । तत्र "यज्ञो देवानाम्" (तैसं २·१·११) इति पुरोनुवाक्या, "शुचिरपः" (तैसं २·१·११) इति याज्या । तत्र "आदित्यासो भवता मृडयन्तः" (तैसं २·१·११), "य आदित्यानां भवति प्रणीतौ" (तैसं २·१·११) इति दर्शनात् भुवद्वत्त्वम् । गतमन्यत् ॥ १५

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
काम्येष्टयः श्रुताः काश्चिद्द्वितीये तु प्रपाठके ।
तृतीये तु विधास्यन्ते तत्तत्फलमभीप्सिनः[1] ॥ २ ॥
[2]काम्येष्टित्वे समानेऽपि [3-]संप्रदायकृता भिदा[-3] । २०
प्रपाठकद्वयस्यैवं चतुर्थस्यापि गम्यताम् ॥ ३ ॥
चतुर्दशानुवाकाः स्युस्तृतीयेऽस्मिन्[4] प्रपाठके ।
तदर्थास्तु क्रमेणेह वक्ष्यन्तेऽवसरे सति ॥ ४ ॥

१. मै४– भुवता । २. तं१.मै.लं– अपिद्रा (?) ।

१. ड.ने.हो१– °मभीप्सतः । २. अ.उ.ड.ने.पा.हो१– काम्येष्टित्व° । ३–३. अ.इ.उ.जो. २५ पा.हा.हो१– संप्रदायकृताभिधा । ४. ने– °येऽत्र ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

एवैनं भूतिं गमयन्ति, भवत्येवादित्येभ्यो धारयद्वद्भ्यश्चरुं निर्वपेदपरुद्धो वाऽपरुध्यमानो वाऽऽदित्या वा अपरोद्धार आदित्या अवगमयितार आदित्यानेव धारयद्वतः (१)

भवति । एव । आदित्येभ्यः । धारयद्वद्भ्य इति धारयद्वत्-भ्यः । चरुम् । निरिति । वपेत् । अपरुद्ध इत्यप-रुद्धः । वा । अपरुध्यमान इत्यप-रुध्यमानः । वा । आदित्याः । वै । अपरोद्धार इत्यप-रोद्धारः । आदित्याः । अवगमयितार इत्यव-गमयितारः । आदित्यान् । एव । धारयद्वत इति धारयत्-वतः (१) ।

'धारयद्वद्भ्यः' इति ॥ धारयच्छब्दवत्त्वात् याज्यानुवाक्ययोः, यथा– "धारयन्त आदित्यासः" (तैसं २·१·११), "तिस्रो भूमीर्धारयन्" (तैसं २·१·११) इति । [3]अत्रापि पूर्ववद्भत्वाभावः, अयस्मयादित्वाद्वा (पा १·४·२०) उभयत्र पदत्वम् । अपरुद्ध इत्यादि । [v]अपरुद्धः राजान्तरेणापहृतराष्ट्रः । स एतं [v]चरुं [v]निर्वपेत् पुनः राष्ट्रं लप्सीयेति । [v]अपरुध्यमानः [v]वा राजान्तरेणापजिहीर्षितराष्ट्रः । स वा निर्वपेदिमं चरुं मा मा राष्ट्रं हासीदिति । आदित्या वा इत्यादि । [v]आदित्याः एव राष्ट्रस्य [v]अपरोद्धारः अपहर्तारः राष्ट्रापहारेण वाऽस्य दुःखयितारः । [v]आदित्याः एव तस्य [4-v]अवगमयितारः पुनः प्रापयितारः[-4] । तस्मात् [v]तेन अनेन चरुणा एनमपरुद्धं [5v]विशि प्रकृतिषु [v]दाध्रति धारयन्ति धारयद्वत्त्वात् । धारयतेः "दाधर्तिर्दर्धर्ति°" (पा ७·४·६५) इत्यादिना निपात्यते । ततश्च अयम् [v]अनपरुध्यः अपरोद्धुमशक्यः [v]भवति । छान्दसो यत्, "ययतोश्चातदर्थे" (पा ६·२·१५६) इत्युत्तरपदान्तोदात्तत्वम् ॥ अथात्र प्रयोगविशेषा उच्यन्ते– तत्र [v]अपरुध्यमानः [v]अस्य अपरोद्धुः [v]पदं पदपांसून् [v]आ ददीत–'अदितेऽनु मन्यस्व' इति ॥ हे [v]अदिते अखण्डिते पृथिवि, माम् [v]अनु [v]मन्यस्व अनुजानीहि राज्यप्राप्तिमिति । गतमन्यत् ॥

भूतिकामो भुवद्भद्भ्य आदित्येभ्यश्चरुं चरेत् ।
रुद्धोऽवरुध्यमानो वा धारयद्भद्भ्य आचरेत् ॥ ५ ॥
शुक्लैर्व्रीहिभिरादित्यं चरुं कृष्णैस्तु वारुणम् ।
रुध्यमानः प्रकुर्वीत मयूखानां च [6]कीलनम् ॥ ६ ॥
तद्वन्धनं तथाऽऽदित्यं [7]चरुमेव समाचरेत् ॥
आद्यानुवाके कथितमेतत्सर्वं [8]विवेकतः ॥ ७ ॥
'*इन्द्रं वो विश्व' इत्यत्राक्षरार्थस्तूपवर्णितः ।

३. मै४–तत्रापि । ४–४. तं१. अपगमयितार,: पं२– अवगमयितारः । ५. तं१.लं– विशिष्ट°।

५. आ– कीर्तनम् । ६. श्रृं– चरुमेषः । ७. आ.क.जो.ना.हा– विशेषतः; इ– अशेषतः ।
*(तैसं १·६·१२)।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

स्वेन भागधेयेनोप धावति त एवैनं विशि दाधृत्यनपरुध्यो भवत्यदितेऽनु मन्यस्वेत्यपरुध्यमानोऽस्य पदमा ददीतेयं वा अदितिरियमेवास्मै राज्यमनु मन्यते सत्याऽऽशीरित्याह सत्यामेवाऽऽशिषं कुरुत इह मन इत्याह प्रजा एवास्मै समनसः करोत्युप

स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। ते। एव। एनम्। विशि। दाधृति। अनपरुध्य इत्यनप-रुध्यः। भवति। अदिते। अन्विति। मन्यस्व। इति। अपरुध्यमान इत्यप-रुध्यमानः। अस्य। पदम्। एति। ददीत। इयम्। वै। अदितिः। इयम्। एव। अस्मै। राज्यम्। अन्विति। मन्यते। सत्या। आशीरित्या-शीः। इति। आह। सत्याम्। एव। आशिषमित्या-शिषम्। कुरुते। इह। मनः। इति। आह। प्रजा इति प्र-जाः। एव। अस्मै। समनस इति स-मनसः। करोति। उप।

अथ तान् पांसून् यजमानस्याञ्जलौ आवपति– 'सत्याशीः' इति। सत्या अमोघफला [६]आशीः प्रार्थना [७]अस्य अयमस्माकमनपरुद्धो भवत्विति यावत्। गतमन्यत्॥

अथैतान् पांसूनुपनिगृह्णाति[८] उपनिपीडयति– 'इह मनः' इति॥ [v]इह अस्मिन् मयि [v]मनः अस्तु प्रजानामिति। ततः सर्वाः [९v]प्रजाः [v]अस्मै [v]समनसः अस्मिन्नेव सक्तमनसः [v]करोति, ततोऽनपरुद्धो [१०]भवतीति॥

अथ पदपांसूनादाय हरति– 'उप प्रेत' इति द्विपदया जगत्या॥ सामर्थ्याच्चायं मन्त्रोऽञ्जल्यावपनमन्त्रात् पूर्वो द्रष्टव्यः। हे [v]मरुतः [v]सुदानवः सुष्ठु दातारः, अभिमतानाम् [v]उप [v]प्रेत उप संप्राप्नुत। [v]एना अनेनावरोधकेन। "सुपां सुलुक्°" (पा ७.१.३९) इति तृतीयाया आजादेशः। [v]विश्पतिना राज्ञा सह उप प्रेत। अयस्मयादित्वेन भत्वात् (पा १.४.२०) विशो जश्त्वाभावः, तेनानवग्रहः, "परादिश्छन्दसि°" (पा ६.२.१९९) इत्युत्तरपदाद्युदात्तत्वम्। [v]अमुम् अपरुध्यमानं वीरसिंहवर्माणं [v]राजानम् [v]अभि इममभिमुखीकृत्येममनपरुद्धं कर्तुमुप प्रेतेति। मारुतीत्यादि। मरुतां राज्ञां च विशामधिपतित्वात् [v]विशा [v]राष्ट्रेण समृद्धम् [११v]एनं करोति, एतन्मन्त्रसामर्थ्यात्। अथ तान् पांसून् संचरे अपरोद्धुर्मार्गे परावपति। अत्र यं यजमानो द्वेष्टि तं मनसा ध्यायति, अथ चरुणा यजेतेति। एवमपरुध्यमानः [१२]अनपरुद्धो भवति॥

---

६. तं१.पं२.मै४– ममाशीः। ७. मै४–अस्तु। ८. तं१–°निगृह्णीते। ९. तं१.मै.लं–'प्रजाः' नास्ति। १०. तं१– भवत्विति। ११. तं१.मै.लं–एव। १२. पं२– अपरुद्धः; मै४–अनपरोध्यः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

प्रेतं मरुतः (२) सुदानव एना विश्पतिनाऽभ्यमुꣳ राजानमित्याह मारुती वै विड्ज्येष्ठो विश्पतिर्विशैवैनꣳ राष्ट्रेण समर्धयति यः परस्ताद्ग्राम्यवादी स्यात् तस्य गृहाद्व्रीहीना हरेच्छुक्लाꣳश्च कृष्णाꣳश्च वि चिनुयाद्ये शुक्लाः स्युस्तमादित्यं चरुं निर्वपेदादित्या वै देवतया विड्विशमेवाव गच्छत्य(३)वगताऽस्य विडनवगतꣳ राष्ट्रमित्याहुर्ये कृष्णाः स्युस्तं वारुणं चरुं निर्वपेद्वारुणं वै राष्ट्रमुभे एव विशं च राष्ट्रं

प्रेति । इत । मरुतः (२) । सुदानव इति सु-दानवः । एना । विश्पतिना । अभीति । अमुम् । राजानम् । इति । आह । मारुती । वै । विट् । ज्येष्ठः । विश्पतिः । विशा । एव । एनम् । राष्ट्रेण । समिति । अर्धयति । यः । परस्तात् । ग्राम्यवादीति ग्राम्य - वादी । स्यात् । तस्य । गृहात् । व्रीहीन् । एति । हरेत् । शुक्लान् । च । कृष्णान् । च । वीति । चिनुयात् । ये । शुक्लाः । स्युः । तम् । आदित्यम् । चरुम् । निरिति । वपेत् । आदित्या । वै । देवतया । विट् । विशम् । एव । अवेति । गच्छति (३) । अवगतेत्यव - गता । अस्य । विट् । अनवगतमित्यनव - गतम् । राष्ट्रम् । इति । आहुः । ये । कृष्णाः । स्युः । तम् । वारुणम् । चरुम् । निरिति । वपेत् । वारुणम् । वै । राष्ट्रम् । उभे इति । एव । विशम् । च । राष्ट्रम् ।

अथ अपरुद्धराष्ट्रावगतये इष्टयन्तरं विदधाति– 'यः परस्तात्' इति ॥ [13]ग्राम्यैः पूर्वमुक्ते पश्चाद्ग्रामप्रधानपुरुषतया ग्रामहितानां वक्ता [v]यः [v]तस्य [v]गृहात् [v]व्रीहीन् आहृत्य शुक्लकृष्ण-विवेकेन[14] शुक्लान् [v]आदित्यं [v]चरुं [v]निर्वपेत् । "त्यान्नु क्षत्रियान्" (तैसं २·१·११) इति पुरोनुवाक्या, "न दक्षिणा" (तैसं २·१·११) इति याज्या । [15]तस्या अप्यादित्यत्वात्[15] आदित्यात्या [16]विशोऽवगत्यै भवति । अवगतेति । अथ [v]आहुः–एवमनेन चरुणा [v]अस्य अपरुद्धस्य [v]विट् [v]अवगता लब्धा भवति, [v]राष्ट्रं तु [v]अनवगतम् एव [v]इति । तस्मात् कृष्णान् व्रीहीन् [v]वारुणं [v]चरुं [v]निः [v]वपेत् । तत्रास्य [17]वारुणत्वात् वारुणस्य राष्ट्रस्यावगत्यै भवति । तस्मादेवमुभयोः कृतयोः [v]विशं [18v]राष्ट्रं [v]च कृते अपि [v]अव [v]गच्छति । "इमं मे वरुण", "तत्त्वा यामि" (तैसं २·१·११) इत्यस्य याज्यानुवाक्ये ॥

१३. पं२– ग्राम्ये; मै४–ग्रामे। १४. तं१– °विवेके। १५–१५. तं१– तस्या स्यादि°; मै४– तत्रास्यादि°। १६. तं१.लं– विशेष्यावगत्यै (१)। १७. पं२– वरुणत्वात्। १८. तं१.लं– 'राष्ट्रं' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चावं गच्छति यदि नावगच्छेदिमसहमादित्येभ्यो भागं निर्वपाम्याऽमुष्मादमुष्यै विशोऽवगन्तोरिति निर्वपेदादित्या एवैनं भागधेयं प्रेप्सन्तो विशमव (४) गमयन्ति यदि नावगच्छेदाश्वत्थान् मयूखान्त्सप्त मध्यमेषायामुप हन्यादिदमहमादित्यान् बध्नाम्याऽमुष्मादमुष्यै विशोऽवगन्तोरित्यादित्या एवैनं बद्धवीरा विशमव

च । अवेति । गच्छति । यदि । न । अवगच्छेदित्यव-गच्छेत् । इमम् । अहम् । आदित्येभ्यः । भागम् । निरिति । वपामि । एति । अमुष्मात् । अमुष्यै । विशः । अवगन्तोरित्यव - गन्तोः । इति । निरिति । वपेत् । आदित्याः । एव । एनम् । भागधेयमिति भाग - धेयम् । प्रेप्सन्त इति प्र - ईप्सन्तः । विशम् । अवेति (४) । गमयन्ति । यदि । न । अवगच्छेदित्यव - गच्छेत् । आश्वत्थान् । मयूखान् । सप्त । मध्यमेषायामिति मध्यम - ईषायाम् । उपेति । हन्यात् । इदम् । अहम् । आदित्यान् । बध्नामि । एति । अमुष्मात् । अमुष्यै । विशः । अवगन्तोरित्यव - गन्तोः । इति । आदित्याः । एव । एनम् । बद्धवीरा इति बद्ध - वीराः । विशम् । अवेति ।

यदीत्यादि ॥ अथैवं कृतेऽपि वारुणे [v]यदि राष्ट्रं [v]न [v]अवगच्छेत् न लभेत ततः 'इममहम्' इत्यादिना मन्त्रेण पुनरादित्येभ्यः [v]निर्वपेत् । अथ निरुप्योपनमति[19] न संसादयति, अथावगते राष्ट्रे संसादयति । अत्र "यज्ञो देवानाम्" (तैसं २.१.११), "आदित्यानामवसा" (तैसं २.१.११) इति याज्यानुवाक्ये । अथ निरुप्यानासादनस्य प्रयोजनमाह– [v]आदित्याः [v]एव [v]एनं [v]भागधेयं [v]प्रेप्सन्तः [v]विशम् [20-v]अव [v]गमयन्ति इति[-20] । न ह्ययमनवगते राष्ट्रे विशि वा हविः संसादयति । तस्माद्धविःप्रेप्सया शीघ्रं विशं राष्ट्रं चावगमयति । मन्त्रस्तु व्याख्यायते– [v]इमं भागधेयम् [v]आदित्येभ्यः [21]हविः [v]निर्वपामि इति । [v]अमुष्मात् अपरोद्धुर्वीरसिंहवर्मणः सकाशात् [v]अमुष्यै अमुष्या [22]देवकोट्टकायाः [v]विशः [v]अवगन्तोः [23]अवगमात् अलाभात् । 'अमुष्मात्' 'अमुष्यै' इति च सर्वविशेषार्थं सामान्यपदं, नामविशेषं चात्र निर्दिशेत् । "भावलक्षणे स्थेण्° " (पा. ३.४.१६) इति तोसुन्, "तादौ च°" (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् ॥

अथैवं कृतेऽपि [v]यदि [v]न [v]अवगच्छेत् राष्ट्रं विड्वा, ततः [v]आश्वत्थान् अश्वत्थविकारान् [v]मयूखान् शाड्कून् [v]सप्त त्रीषे शकटे [v]मध्यमेषायाम् [v]उप [v]हन्यात् 'इदमहम्' इति मन्त्रेण ।

१९. मै४.लं– °परमति । २०–२०. लं–अवगतं यन्ति । २१. तं१–'हविः' नास्ति । २२. मै४– देवकोकाया । २३. तं.मै.लं– अवगमनात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

गमयन्ति यदि नावगच्छेदेतमेवाऽऽदित्यं चरुं निर्वपेदिध्मेऽपि मयूखान्त्सं नह्येदन-परुध्यमेवाव गच्छत्याश्वत्था भवन्ति मरुतां वा एत(५)दोजो यदश्वत्थ ओजसैव विशमव गच्छति सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव गच्छति ॥१॥

[धारयद्वतो मरुतो गच्छति विशमवैतदष्टादश च]।

५ गमयन्ति। यदि। न। अवगच्छेदित्यव - गच्छेत्। एतम्। एव। आदित्यम्। चरुम्। निरिति। वपेत्। इध्मे। अपीति। मयूखान्। समिति। नह्येत्। अनपरुध्यमित्यनप - रुध्यम्। एव। अवेति। गच्छति। आश्वत्थाः। भवन्ति। मरुताम्। वै। एतत्। ओजः। यत्। अश्वत्थः। ओजसा। एव। विशम्। अवेति। गच्छति। सप्त। भवन्ति। सप्तगणा इति सप्त - गणाः। वै। मरुतः। गणश इति गण - शः। एव। विशम्। अवेति। गच्छति ॥ १ ॥

१० [कासं ११.६]

" अनुदात्तादेश्च " (पा ४.३.१४०) इत्यश्वत्थशब्दादञ्। [२४]अत्रायं प्रयोगः†— प्रागीषमनोऽवस्थाप्य तत्र मध्यमेषायां मध्यममुपहत्य त्रीन् प्रतीचस्त्रीन् प्राचः आयातयति। अथैवं कृते *-[V]बद्धवीराः [२५-]अनेन कर्मणा अत्र प्रतिनिबद्धवीर्याः-[२५] [V]आदित्याः आत्मवीर्यमोक्षार्थं [V]विशम् [V]अव [V]गमयन्ति राष्ट्रं च। मन्त्रार्थस्तु— ' इदम् ' इति क्रियाविशेषणम्। [V]अहम् [V]आदित्यान् [V]इदं १५ [V]बध्नामि। अमुष्मादित्यादि। गतम्॥

[२६]अथैवं कृते [V]यदि [V]न [V]अवगच्छेत् राष्ट्रं विड्वा, [V]एतम् अनन्तरं विहितम् [V]आदित्यं [V]चरुं [V]निः [V]वपेत्। [V]इध्मे [V]अपि [२७-V]मयूखान् [V]संनह्येत्-[२७], सप्ताश्वत्थान् सहेध्मेनाभ्यादध्यात्। एवं कृतेऽवश्यम्-* [V]अनपरुध्यं पुनः [२८]केनचिदपि [२९]अवरोद्धुमशक्यं राष्ट्रं विशं च [V]अव [V]गच्छति लभते। पूर्ववदन्तोदात्तत्वम्। आश्वत्था इत्यादि। गतम्। मरुतामोजस्त्वमत्युच्छ्रितत्वेन [३०-]मरुतां २० बलस्य व्यक्तिस्थानत्वात्-[३०]। गणश इति। " संख्यैकवचनाच्च° " (पा ५.४.४३) इति शस्। " बहुगण° " (पा १.१.२३) इति संख्यासंज्ञा। [३१]गणंगणं विशः [३२-V]अव [V]गच्छति-[३२]।

इति द्वितीये तृतीये प्रथमोऽनुवाकः।

२४. मै४-तत्रायम्। †[द्र. बौश्रौ १३.२२]। *-*[' बद्धवीरा ' इत्यारभ्य ' एवंकृतेऽवश्यम् ' इत्यन्तः भागः लं-पुस्तके नास्ति।]। २५-२५. मै- ' अनेन कर्मणा अत्र प्रतिबद्धवीर्याः ' नास्ति। २६. २५ मै-एवम्। २७-२७. मै-' मयूखान् संनह्येत् ' नास्ति। २८. मै४-कैश्चिदपि। २९. मै४- उपरोद्धुम्। ३०-३०. तं१.मै.लं- मरुतामचलव्यक्तिस्थानत्वात्; पं२- मरुतामचलस्य व्यक्तस्थानत्वात्। ३१. तं१- गणम्। ३२-३२. मै४- अवगमयति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावन् तेभ्य एतां प्राजापत्याꣳ शतकृष्णलां निरवपत् तयैवैष्वमृतमदधाद्यो मृत्योर्बिभीयात् तस्मा एतां प्राजापत्याꣳ शतकृष्णलां निर्वपेत् प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन्नायुर्दधाति सर्वमायुरेति शतकृष्णला भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये (१) प्रति तिष्ठति घृते भवत्यायुर्वै

देवाः । वै । मृत्योः । अबिभयुः । ते । प्रजापतिमिति प्रजा - पतिम् । उपेति । अधावन् । तेभ्यः । एताम् । प्राजापत्यामिति प्राजा - पत्याम् । शतकृष्णलामिति शत - कृष्णलाम् । निरिति । अवपत् । तया । एव । एषु । अमृतम् । अदधात् । यः । मृत्योः । बिभीयात् । तस्मै । एताम् । प्राजापत्यामिति प्राजा-पत्याम् । शतकृष्णलामिति शत - कृष्णलाम् । निरिति । वपेत् । प्रजापतिमिति प्रजा - पतिम् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । सः । एव । अस्मिन् । आयुः । दधाति । सर्वम् । आयुः । एति । शतकृष्णलेति शत - कृष्णला । भवति । शतायुरिति शत - आयुः । पुरुषः । शतेन्द्रिय इति शत - इन्द्रियः । आयुषि । एव । इन्द्रिये (१)। प्रतीति । तिष्ठति । घृते । भवति । आयुः । वै ।

देवा वा इत्यादि । शतकृष्णलामिति । शतं स्वर्णानि कृष्णलानि कृष्णलतुलितानि [१-]परिमाणान्यस्याः समष्टेः[-१] सा तथोक्ता । [v]तया देवेष्वमृतत्वम् [v]अदधात् प्रजापतिः । गतमन्यत् ॥

शतकृष्णलां निर्वपेदिति । अयं क्रमः– " देवस्य त्वा सवितुः प्रसवे इति प्रतिपदं कृत्वा प्रजापतये जुष्टं निर्वपामि इति चतुरो मुष्टीन् कृष्णलान्निर्वपति । हविष्कृता वाचं विसृज्य गार्हपत्ये [२]नवं पात्रमधिश्रित्य तिरःपवित्रमाज्यमानीय तिरःपवित्रं कृष्णलान्यावपति " (बौश्रौ १३·२३)। तदिदमुक्तं ' घृते भवति ' इत्यादि ॥ [v]समीची अनुक्रमेण संगते । " अथाज्यं निर्वपति, अथाज्यम् अधिश्रयति, उभयं पर्यग्निकृत्वा अन्तर्वेद्यासादयति " (बौश्रौ १३·२३)। धर्ममात्रं श्रपणं, न विक्लेदनाय ॥

[८]मृत्योर्भीतस्यायुरर्थे निर्वपेच्छतकृष्णलाम् ॥८॥
ब्रह्मवर्चसकामो यः स सौर्यं चरुमाचरेत् ।
हिरण्यकामः कुर्वीत ह्याग्नेयादिहविस्त्रयम् ॥ ९ ॥
हिरण्यलाभे तन्नाशेऽप्येतदेव समाचरेत् ।
सोमवामी तु सोमेन्द्रं चरुं [९]श्यामाकमाचरेत् ॥ १० ॥
[१०]पश्वर्थी ह्याग्नये दात्र इत्यादित्रयमाचरेत् ।
अनुवाके द्वितीयेऽर्थो एतावन्त उदीरिताः ॥
*हिरण्यगर्भ इत्यत्राक्षरार्थः स्पष्टमीरितः ॥ ११ ॥

१–१. पं२.मै– परिमाणमस्याः सममीष्टम् । २. तं१.लं– नव° ।

८. आ.हा.– मृत्योर्भीतो ह्यायु°; क.ड.शृं.हो१– मृत्योर्भीतस्त्वायु° । ९. अ.उ.क.जो.ना.पा.शृं. हा– श्यामाकतश्चरेत् । १०. हा– पश्वर्थे; आ.क– पश्वर्थं । *[तैसं २·२·१२]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

घृतममृतꣳ हिरण्यमायुश्चैवास्मा अमृतं च समीचीं दधाति चत्वारिचत्वारि कृष्णलान्यव द्यति चतुरवत्तस्याऽऽप्त्या एकधा ब्रह्मण उप हरत्येकधैव यजमान आयुर्दधात्यसावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतꣳ सौर्यं चरुं निरवपन् तेनैवास्मिन् (२) रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतꣳ सौर्यं चरुं निर्वपेदमुमेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवत्युभयतो रुक्मौ भवत उभयत एवास्मिन् रुचं दधाति प्रयाजेप्रयाजे

घृतम्। अमृतम्। हिरण्यम्। आयुः। च। एव। अस्मै। अमृतम्। च। समीची इति। दधाति। चत्वारिचत्वारीति चत्वारि-चत्वारि। कृष्णलानि। अवेति। द्यति। चतुरवत्तस्येति चतुः-अवत्तस्य। आप्त्यै। एकधेत्येक-धा। ब्रह्मणे। उपेति। हरति। एकधेत्येक-धा। एव। यजमाने। आयुः। दधाति। असौ। आदित्यः। न। वीति। अरोचत। तस्मै। देवाः। प्रायश्चित्तिम्। ऐच्छन्। तस्मै। एतम्। सौर्यम्। चरुम्। निरिति। अवपन्। तेन। एव। अस्मिन् (२)। रुचम्। अदधुः। यः। ब्रह्मवर्चसकाम इति ब्रह्मवर्चस-कामः। स्यात्। तस्मै। एतम्। सौर्यम्। चरुम्। निरिति। वपेत्। अमुम्। एव। आदित्यम्। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मिन्। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। दधाति। ब्रह्मवर्चसीति ब्रह्म-वर्चसी। एव। भवति। उभयतः। रुक्मौ। भवतः। उभयतः। एव। अस्मिन्। रुचम्। दधाति। प्रयाजेप्रयाज इति प्रयाजे-प्रयाजे।

चत्वारिचत्वारीत्यादि ॥ सर्वावदानार्थं वीप्सा। एकस्मिन् अवदाने [v]चत्वारिचत्वारि गृह्णीयात्। तद्यथा—"अष्टौ देवताया अवद्यति, चत्वारि स्विष्टकृते, अष्टाविडायै, चत्वारि अवान्तरेडायै, एकं प्राशित्राय, एकं यजमानाय, आज्यमेव जुह्वतो [3]जुह्वति [4]आज्यमेव [5]प्राश्नन्तः प्राश्नन्ति[5]" (बौश्रौ १३.२३)। अथ चतुर्धाकरणकाले शिष्टान्येकयोद्धृत्य [v]ब्रह्मणे [v]उप [v]हरति, इतरेषां भक्षापनयनम् ॥

असावादित्य इत्यादि ॥ गतम् ॥

[6-6]उभयत इत्यादि[6-6] ॥ सुवर्णरजतौ [7v]रुक्मौ उपकल्प्य शृतं [8]हि हविः ताभ्यां[8] पर्युपास्यान्तर्वेद्यासादयति, अपोह्य रुक्मौ चरुणा प्रचारः। [v]उभयतः उभयोरपि पूर्वोत्तरयोरायुषोः [v]अस्मिन् यजमाने [9-v]रुचं [v]दधाति[9-]। यद्वा— उभयोर्लोकयोः इहामुत्र चास्मिन् रुचं दधाति ॥

---

३. तं१— जुह्वति। ४. मै—आज्यं च। ५-५. तं१.मै.लं—प्राश्नतः प्राश्नातः। ६-६. तं१— 'उभयत इत्यादि' नास्ति। ७. तं१— कुक्षौ। ८-८. मै४— हविः स्थाल्याम्। ९-९. तं१— रुचा दधाति; मै४— चरुं दधाति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृष्णलं जुहोति दिग्भ्य एवास्मै ब्रह्मवर्चसमव रुन्द्धे आग्नेयमष्टाकपालं निर्वपेत् सावित्रं द्वादशकपालं भूम्यै (३) चरुं यः कामयेत हिरण्यं विन्देय हिरण्यं मोप नमेदिति यदाग्नेयो भवत्याग्नेयं वै हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दते सावित्रो भवति सवितृप्रसूत एवैनद्विन्दते भूम्यै चरुर्भवत्यस्यामेवैनद्विन्दत उपैनꣳ हिरण्यं नमति वि वा एष इन्द्रियेण वीर्येण ऋध्यते यो हिरण्यं विन्दते एता(४)मेव निर्वपेद्धिरण्यं वित्त्वा नेन्द्रियेण वीर्येण व्यृध्यत एतामेव निर्वपेद्यस्य हिरण्यं नश्येद्यदाग्नेयो भवत्याग्नेयं वै हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दति सावित्रो भवति सवितृप्रसूत एवैनद्- ५

कृष्णलम् । जुहोति । दिग्भ्य इति दिक् - भ्यः । एव । अस्मै । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । अवेति । रुन्द्धे । आग्नेयम् । अष्टाकपालमित्यष्टा - कपालम् । निरिति । वपेत् । सावित्रम् । द्वादशकपालमिति द्वादश-कपालम् । भूम्यै (३) । चरुम् । यः । कामयेत । हिरण्यम् । विन्देय । हिरण्यम् । मा । उपेति । नमेत् । इति । यत् । आग्नेयः । भवति । आग्नेयम् । वै । हिरण्यम् । यस्य । एव । हिरण्यम् । तेन । एव । एनत् । विन्दते । सावित्रः । भवति । सवितृप्रसूत इति सवितृ - प्रसूतः । एव । एनत् । विन्दते । भूम्यै । चरुः । भवति । अस्याम् । एव । एनत् । विन्दते । उपेति । एनम् । हिरण्यम् । नमति । वीति । वै । एषः । इन्द्रियेण । वीर्येण । ऋध्यते । यः । हिरण्यम् । विन्दते । एताम् (४) । एव । निरिति । वपेत् । हिरण्यम् । वित्त्वा । न । इन्द्रियेण । वीर्येण । वीति । ऋध्यते । एताम् । एव । निरिति । वपेत् । यस्य । हिरण्यम् । नश्येत् । यत् । आग्नेयः । भवति । आग्नेयम् । वै । हिरण्यम् । यस्य । एव । हिरण्यम् । तेन । एव । एनत् । विन्दति । सावित्रः । भवति । सवितृप्रसूत इति सवितृ - प्रसूतः । एव । एनत् ।

प्रयाजेप्रयाजे इति ॥ पञ्च सुवर्णानि कृष्णालान्युपकल्प्य[१०] [v]प्रयाजेप्रयाजे [११]एकैकं [v]कृष्णलम् अन्ववधाय [v]जुहोति । दिग्भ्य इति । दिशामपि पञ्चत्वात् ।

आग्नेयमष्टाकपालमित्यादि ॥ गतम् ॥

वि वा एष इत्यादि ॥ गतम् । [v]हिरण्यं [v]वित्त्वा लब्ध्वा [v]एतां [v]निः [v]वपेत् ॥

एतामेवेति ॥ [v]यस्य [v]हिरण्यं [v]नश्येत् [१२]स नष्टस्य हिरण्यस्य[१२] लाभाय [v]एतां [v]निर्वपेत् । विन्दतिः स्वरितेत् । तत्र नष्टस्य लाभे कर्त्रभिप्रायस्य [१३]फलान्तरस्य अपूर्वस्य[१३] अभावादात्मनेपदाभावः ।

---

१०. तं१.मै.लं– उपलिप्य। ११. तं१.मै.लं– एकम्। १२–१२. मै–प्रसह्य नष्टस्य; तं१–नष्टस्य; तं१.लं– 'स नष्टस्य हिरण्यस्य' नास्ति। १३–१३. तं१. मै– पूर्वस्य; लं– 'फलान्तरस्य अपूर्वस्य' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

विन्दति भूम्यै चरुर्भवत्यस्यां वा एतन्नश्यति यन्नश्यत्यस्यामेवैनद्विन्दतीन्द्र(५)स्त्वष्टुः सोममभीषहाऽपिबत् स विष्वङ्व्यार्छत् स इन्द्रियेण सोमपीथेन व्यार्ध्यत स यदूर्ध्वमुदवमीत् ते श्यामाका अभवन्त्स प्रजापतिमुपाधावत् तस्मा एतꣳ सौमेन्द्रꣳ श्यामाकं चरुं निरवपत् तेनैवास्मिन्निन्द्रियꣳ सोमपीथमदधाद्वि वा एष इन्द्रियेण सोमपीथेनर्ध्यते यः सोमं वमिति यः सोमवामी स्यात् तस्मा (६) एतꣳ सौमेन्द्रꣳ श्यामाकं

विन्दति। भूम्यै। चरुः। भवति। अस्याम्। वै। एतत्। नश्यति। यत्। नश्यति। अस्याम्। एव। एनत्। विन्दति। इन्द्रः (५)। त्वष्टुः। सोमम्। अभीषहेत्यभि-सहा। अपिबत्। सः। विष्वङ्। व्यार्छत्। सः। इन्द्रियेण। सोमपीथेनेति सोम-पीथेन। व्यार्ध्यत। सः। यत्। ऊर्ध्वम्। उदवमीदित्युत्-अवमीत्। ते। श्यामाकाः। अभवन्। सः। प्रजापतिमिति प्रजा-पतिम्। उपेति। अधावत्। तस्मै। एतम्। सौमेन्द्रम्। श्यामाकम्। चरुम्। निरिति। अवपत्। तेन। एव। अस्मिन्। इन्द्रियम्। सोमपीथमिति सोम-पीथम्। अदधात्। वीति। वै। एषः। इन्द्रियेण। सोमपीथेनेति सोम-पीथेन। ऋध्यते। यः। सोमम्। वमिति। यः। सोमवामीति सोम-वामी। स्यात्। तस्मै (६)। एतम्। सौमेन्द्रम्। श्यामाकम्।

इन्द्रस्त्वष्टुरित्यादि ॥ [v]अभीषहा [17]प्रसह्य [v]सोमम् [v]अपिबत्। सहतेः क्विपि " नहिवृति-वृषि० " (पा ६.३.११६) इत्युपसर्गस्य दीर्घत्वम्। शक्तिमभिभूय [15]अयथाबलं समग्रमपिबत्। ततः [v]सः सोमस्तेन पीतः [v]विष्वङ् नानागमनः उपरिष्टादधस्ताच्च [v]वि [v]आर्छत् विनिर्गतोऽभवत्। ततः [v]सः [16]इन्द्रः [v]इन्द्रियेण [v]सोमपीथेन पीतेन सोमेन व्यृद्धोऽभवत्। तत्र [v]सः इन्द्रः [v]यत् [v]ऊर्ध्वम् [v]उत् [v]अवमीत्, [v]ते [v]श्यामाकाः [v]अभवन्। [18]वर्षाप्रभवो धान्यविशेषः श्यामाकः। अथ [v]सः इन्द्रः [v]प्रजापतिम् उपेत्य [19]इत्थमस्ति, प्रतिविधातव्यमित्यब्रवीत्। तस्मा इत्यादि। गतम्। सोमेन्द्रमिति। " नेन्द्रस्य परस्य " (पा ७.३.२२) इति उत्तरपदस्य वृद्ध्यभावः। [19]सोमशब्दस्य तु पूर्वपदस्य नेष्यते वृद्धिः। श्यामाकमिति। " अनुदात्तादेश्च " (पा ४.३.१४०) इत्यस्य अपवादः, " कोपधाच्च " (पा ४.३.१३७) इत्यण् ॥

यः सोमवामी स्यादिति ॥ [21]वैदिकस्य वमने चरुर्विधीयते, न विरेकार्थस्य लौकिकस्य। आहुश्च– " पानव्यापच्च [22]तद्वत् " (मीसू ३.४.३२) इति। [22]तत्रापि यजमानस्य वमने न ऋत्विजामिति " तत्सर्वत्राविशेषात् " (मीसू ३.४.३४) इत्यत्र प्रतिपादितम्। गतमन्यत्। एष वाव [23]स सोम इति। [24]उद्वान्तसोमपरिणामत्वात् ॥

१४. तं१.मै– 'प्रसह्य' नास्ति। १५. मै–यथाबलम्। १६. लं– 'इन्द्रः' नास्ति। १७. लं–वर्षाभवः। १८. तं१.मै.लं– इत्थमस्मिन्। १९. मै–सोमस्य। २०. मै४– वेदिकस्य। २१. लं– तत्। २२. मै४– नात्रापि। २३ तं१– 'सः' नास्ति। २४. तं१.मै.लं– °परिमाण°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चरुं निर्वपेत् सोमं चैवेन्द्रं च स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियꣳ सोमपीथं धत्तो नेन्द्रियेण सोमपीथेन व्यृध्यते यत् सौम्यो भवति सोमपीथमेवाव रुन्द्धे यदैन्द्रो भवतीन्द्रियं वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्द्धे श्यामाको भवत्येष वाव स सोमः (७) साक्षादेव सोमपीथमव रुन्द्धेऽग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं पशुकामोऽग्निरेवास्मै पशून् प्रजनयति ५
वृद्धानिन्द्रः प्र यच्छति दधि मधु घृतमापो धाना भवन्त्येतद्वै पशूनाꣳ रूपꣳ

चरुम् । निरिति । वपेत् । सोमम् । च । एव । इन्द्रम् । च । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । तौ । एव । अस्मिन् । इन्द्रियम् । सोमपीथमिति सोम - पीथम् । धत्तः । न । इन्द्रियेण । सोमपीथेनेति सोम - पीथेन । व्रीति । ऋध्यते । यत् । सौम्यः । भवति । सोमपीथमिति सोम - पीथम् । एव । अवेति । रुन्द्धे । यत् । ऐन्द्रः । भवति । इन्द्रियम् । वै । सोमपीथ इति १०
सोम - पीथः । इन्द्रियम् । एव । सोमपीथमिति सोम - पीथम् । अवेति । रुन्द्धे । श्यामाकः । भवति । एषः । वाव । सः । सोमः (७) । साक्षादिति स - अक्षात् । एव । सोमपीथमिति सोम - पीथम् । अवेति । रुन्द्धे । अग्नये । दात्रे । पुरोडाशम् । अष्टाकपालमित्यष्टा - कपालम् । निरिति । वपेत् । इन्द्राय । प्रदात्र इति प्र - दात्रे । पुरोडाशम् । एकादशकपालमित्येकादश - कपालम् । पशुकाम इति पशु - कामः । अग्निः । एव । अस्मै । पशून् । प्रजनयतीति प्र - जनयति । १५
वृद्धान् । इन्द्रः । प्रेति । यच्छति । दधि । मधु । घृतम् । आपः । धानाः । भवन्ति । एतत् । वै ।
पशूनाम् । रूपम् ।

अग्नये दात्र इत्यादि ॥ तृतीयं संसृष्टहविः प्राजापत्यम् । " उदात्तयणः " (पा ६.१.१७४) इति चतुर्थ्या उदात्तत्वम् ॥

दधि मध्वित्यादि ॥ अत्रायं *प्रयोगः– " देवस्य त्वा इति प्रतिपदं कृत्वा अग्नये दात्रे २०
जुष्टम् इति चतुरो मुष्टीन् व्रीहीणां निर्वपति । अथैवमेव इन्द्राय प्रदात्रे, एवं व्रीहीणाम् । अथैवमेव प्रजापतये जुष्टम् इति चतुरो यवानां, तेषां व्रीहिष्वेव [२५]हविष्कृतमुद्वादयन्ति, उपोद्यच्छन्ते [२६]यवान्, हविष्कृता वाचं [२७]विसृजन्ते । समानं कर्माऽऽधिवपनात् । [२८]अध्युप्य दक्षिणार्धे गार्हपत्यस्य अष्टौ कपालान्युपदधाति, [२९]एकादशोत्तरतः अथैनान् यवानुलूखले परिक्षुद्य गार्हपत्ये कपालमधिश्रित्य धाना भर्जयन्ति, यदैते हवींषि अभिपृणक्ति तदैता धानाश्चतुष्टयेन [३०]उपसृजन्ति २५

* (द्र. बौश्रौ १३.२७)। २५. मै४–हविष्कृतमुद्वासयन्ति । २६. लं– यावत् । २७. मै४.लं–विसृजते । २८. मै– अधिवाप्य । २९. मै– एकादेशो° । ३०. मै– उपसृजति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रूपेणैव पशूनव रुन्द्धे पञ्चगृहीतं भवति पाङ्क्ता हि पशवो बहुरूपं भवति बहुरूपा हि पशवः (८) समृद्ध्यै प्राजापत्यं भवति प्राजापत्या वै पशवः प्रजापतिरेवास्मै पशून् प्र जनयत्यात्मा वै पुरुषस्य मधु यन्मध्वग्नौ जुहोत्यात्मानमेव तद्यजमानोऽग्नौ प्र दधाति पङ्क्त्यौ याज्यानुवाक्ये भवतः पाङ्क्तः पुरुषः पाङ्क्ताः पशव आत्मानमेव मृत्योर्निष्क्रीय पशूनव रुन्द्धे ॥ २ ॥

[इन्द्रियेऽस्मिन्भूम्या एतामिन्द्रः स्यात् तस्मै सोमो बहुरूपा हि पशव एकंचत्वारिंशच्च ।]

रूपेण । एव । पशून् । अवेति । रुन्द्धे । पञ्चगृहीतमिति पञ्च - गहीतम् । भवति । पाङ्क्ताः । हि । पशवः । बहुरूपमिति बहु - रूपम् । भवति । बहुरूपा इति बहु - रूपाः । हि । पशवः (८) । समृद्ध्या इति सम् - ऋद्ध्यै । प्राजापत्यमिति प्राजा - पत्यम् । भवति । प्राजापत्या इति प्राजा - पत्याः । वै । पशवः । प्रजापतिरिति प्रजा - पतिः । एव । अस्मै । पशून् । प्रेति । जनयति । आत्मा । वै । पुरुषस्य । मधु । यत् । मधु । अग्नौ । जुहोति । आत्मानम् । एव । तत् । यजमानः । अग्नौ । प्रेति । दधाति । पङ्क्त्यौ । याज्यानुवाक्ये इति याज्या - अनुवाक्ये । भवतः । पाङ्क्तः । पुरुषः । पाङ्क्ताः । पशवः । आत्मानम् । एव । मृत्योः । निष्क्रीयेति निः–क्रीय । पशून् । अवेति । रुन्द्धे ॥ २ ॥

[मैसं २.२. १३; कासं ११.४, १, २]

दध्ना मधुना घृतेनाद्भिः " इति । एवं Vपञ्चगृहीतं Vभवति । पाङ्क्ता इति पङ्क्तिप्रभवाः । पङ्क्ति-शब्दः उत्सादिः (पा ४.१.८६) । बहुरूपमिति । दध्यादीनां नानारूपत्वात् । " बहोर्नञ्वत् " (पा ६.२.१७५) इति उत्तरपदान्तोदात्तत्वम् । प्राजापत्यमिति । तृतीयस्य प्राजापत्यत्वात् ॥

अथ मधुहोमं दूषयति– ' आत्मा ' इति ॥ Vपुरुषस्य Vआत्मा Vमधु [३१]मन्तृत्वात् । [३२]मन्यतेर्मधु, उप्रत्यये धकारोऽन्तादेशो विधीयते । तस्मात् [३३]मधुना Vअग्नौ होमेन Vआत्मानम् Vएव Vअग्नौ Vयजमानः प्रक्षिपति, तस्मादयुक्तम् [३४]इदम् इति । परिहरति– पङ्क्त्याविति । " घृतं न पूतम् ", " उभे सुश्चन्द्र सर्पिषः " (तैसं २.२.१२) इति प्राजापत्यस्य [३५V]याज्यानुवाक्ये Vभवतः । आत्मानमेवेति । [३६]याज्यानुवाक्यात्मपङ्क्त्यात्मनः पुरुषस्याग्नावनुप्रवेशात् अग्न्यात्मकात् Vमृत्योः Vआत्मानं मधुहोमेनाग्नौ प्रविष्टं Vनिष्क्रीय Vपशून Vअव Vरुन्द्धे ।

इति द्वितीये तृतीये द्वितीयोऽनुवाकः ॥

३१. मै४– मन्दत्वात् । ३२. तं१.मै४.लं– मद्यते° । ३३. मै.लं– मधुनः । ३४. तं१.मै.लं – 'इदम्' नास्ति । ३५. मै४– पुरोनुवाक्ये । ३६. मै४– याज्यानुवाक्यात्मकं पङ्क्त्या° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

देवा वै सत्रमासतर्द्धिपरिमितं यशस्कामास्तेषाꣳ सोमꣳ राजानं यश आर्छत् स गिरिमुदैत् तमग्निरनूदैत् तावग्नीषोमौ समभवतां ताविन्द्रो यज्ञविभ्रष्टोऽनु परैत् तावब्रवीद्याजयतं मेति तस्मा एतामिष्टिं निरवपतामाग्नेयमष्टाकपालमैन्द्रमेकादशकपालꣳ सौम्यं चरुं तयैवास्मिन् तेज (१) इन्द्रियं ब्रह्मवर्चसमधत्तां

देवाः । वै । सत्रम् । आसत । ऋद्धिपरिमितमित्यृद्धि-परिमितम् । यशस्कामा इति यशः-कामाः । तेषाम् । सोमम् । राजानम् । यशः । आर्छत् । सः । गिरिम् । उदिति । ऐत् । तम् । अग्निः । अनु । उदिति । ऐत् । तौ । अग्नीषोमावित्यग्नी-सोमौ । समिति । अभवताम् । तौ । इन्द्रः । यज्ञविभ्रष्ट इति यज्ञ-विभ्रष्टः । अनु । परेति । ऐत् । तौ । अब्रवीत् । याजयतम् । मा । इति । तस्मै । एताम् । इष्टिम् । निरिति । अवपताम् । आग्नेयम् । अष्टाकपालमित्यष्टा-कपालम् । ऐन्द्रम् । एकादशकपालमित्येकादश-कपालम् । सौम्यम् । चरुम् । तया । एव । अस्मिन् । तेजः (१) । इन्द्रियम् । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । अधत्ताम् ।

देवा वै सत्रमासतेति ॥ ऋद्ध्या फलेन परिमितमविच्छिन्नं [v]सत्रम् [v]आसत, तादृशं ऋतुविशेषमकुर्वत [v]यशस्कामाः [v]देवाः । केचिदाहुः— सत्रासनं ऋतुविशेषः सत्रशब्देनोच्यते, तत्र 'गोपोषं [1]पुष्णाति' इतिवत् सामान्यवचन आस्तिर्द्रष्टव्यः इति । अन्ये त्वाहुः— आस्थानकर्मा [2]आस्तिरिति । तेषामित्यादि । गतम् । [v]तेषाम् इति निर्धारणे षष्ठी । समभवतामिति । एकीभूतौ ऐकमत्यं गताविति्यर्थः । तस्मा [3]एताम् इति । इन्द्राय [v]इष्टिं [v]निः [v]अवपताम् अग्नीषोमौ त्रिहविष्काम् । गतमन्यत् ॥

देवा इति ॥ अथ तृतीयेऽनुवाके यज्ञविभ्रष्टादीनामिष्टयो विधातव्याः । तत्रादौ [11]-यज्ञविभ्रष्टेष्टिं विधातुं-[11] प्रस्तौति—'देवा वै सत्रमासतर्द्धिपरिमितं यशस्कामास्तेषाꣳ सोमꣳ राजानं यश आर्छत् स गिरिमुदैत् तमग्निरनूदैत् तावग्नीषोमौ समभवतां ताविन्द्रो यज्ञविभ्रष्टोऽनु परैत् तावब्रवीद्याजयतं मेति तस्मा एतामिष्टिं निरवपतामाग्नेयमष्टाकपालमैन्द्रमेकादशकपालꣳ सौम्यं चरुं तयैवास्मिन् तेज इन्द्रियं ब्रह्मवर्चसमधत्ताम्' इति ॥ ऋद्ध्या काम्यमानेन यशोलक्षणेन फलेन परिमितं [v]सत्रम् अनुष्ठितवन्तः । सन्ति सहस्रं सत्राणि, तेषु येन यशः सिध्यति तदन्वतिष्ठन् । [v]तेषां देवानां मध्ये [12]फलीभूतं [v]यशः [v]सोमं [13]प्राप्नोत् । [v]सः च सोमोऽन्येषां यशो मा भूदिति मन्वानस्तेन यशसा सह [v]गिरिं कंचिद्दुर्गं [14]पर्वतमारोहत् । [v]अग्निः च [15]-सहसा तस्य-[15] पृष्ठत एवाऽऽरोहत् । [v]तौ द्वौ [v]अग्नीषोमौ परस्परमैकमत्यं गतौ । ततः [v]तौ उभौ [v]अनु फलरहितः [v]इन्द्रः चिरकालेन गत्वा मां फलाय [v]याजयतम् [v]इति [16]अवोचत् । तौ च [v]तस्मै त्रिहविष्काम् [v]इष्टिं [v]निरवपताम् । तैस्त्रिभिर्हविर्भिस्तेजआदिकं [17]त्रयं लब्धम् ॥

१. मै– पुष्णाते । २. मै४– अस्मिन् विषये आसीरिति । ३. तं१.तं२.मै– 'एताम्' नास्ति ।

११–११. आ.ड.शृं– °विभ्रष्टेष्टिविधानाय । १२. ड.ने.शृं.हो१– फलभूतं । १३. जो.ना.हा– प्राप्तं; ने.हो१– प्राप्नोति । १४. ड.ने.शृं.हो१– 'पर्वतम्' नास्ति । १५–१५. जो.ना– सह तस्य; इ– सहास्य । १६. इ.क.ड.ने.शृं.हो– प्रार्थयामास । १७. ने.हो१– त्रयमपि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

यो यज्ञविभ्रष्टः स्यात् तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालमैन्द्रमेकादशकपालꣳ सौम्यं चरुं यदाग्नेयो भवति तेज एवास्मिन् तेन दधाति यदैन्द्रो भवतीन्द्रियमेवास्मिन् तेन दधाति यत् सौम्यो ब्रह्मवर्चसं तेनाऽऽग्नेयस्य च सौम्यस्य चैन्द्रे समाश्लेषयेत् तेजश्चैवास्मिन् ब्रह्मवर्चसं च समीची (२)

५ यः। यज्ञविभ्रष्ट इति यज्ञ-विभ्रष्टः। स्यात्। तस्मै। एताम्। इष्टिम्। निरिति। वपेत्। आग्नेयम्। अष्टाकपालमित्यष्टा-कपालम्। ऐन्द्रम्। एकादशकपालमित्येकादश - कपालम्। सौम्यम्। चरुम्। यत्। आग्नेयः। भवति। तेजः। एव। अस्मिन्। तेन। दधाति। यत्। ऐन्द्रः। भवति। इन्द्रियम्। एव। अस्मिन्। तेन। दधाति। यत्। सौम्यः। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। तेन। आग्नेयस्य। च। सौम्यस्य। च। ऐन्द्रे। समाश्लेषयेदिति सम्-आश्लेषयेत्। तेजः। च। १० एव। अस्मिन्। ब्रह्मवर्चसमिति ब्रह्म-वर्चसम्। च। समीची इति (२)।

ब्रह्मवर्चसं तेनेति ॥ [४]दधाति इत्येव ॥

आग्नेयस्य चेत्यादि ॥ कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी। आग्नेयं सौम्यं [५-५]च [५]ऐन्द्रे [५]समाश्लेषयेत्[-५] समाश्लिष्टानि संहितानि सर्वाणि हवींषि अधिश्रयेत्। [६-५]तेजः [५]च [५]ब्रह्मवर्चसं [५]च [५]अस्मिन्[-६] यजमाने यज्ञविभ्रष्टे [५]समीची संगते [७५]दधाति। आग्नेयसौम्ययोर्वा [८]लेपौ। १५ इष्टिपशुसोमानां स्वकालेऽकरणं विभ्रेषः ॥

य इति ॥ अथ विधत्ते–' यो यज्ञविभ्रष्टः स्यात् तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालमैन्द्रमेकादशकपालꣳ सौम्यं चरुं यदाग्नेयो भवति तेज एवास्मिन् तेन दधाति यदैन्द्रो भवतीन्द्रियमेवास्मिन् तेन दधाति यत् सौम्यो ब्रह्मवर्चसं तेन ' इति ॥ इष्टिपशुसोमानां [१८]स्वस्वकालेष्वननुष्ठानं भ्रेषस्तं भ्रेषं प्राप्तस्येयमिष्टिः ॥

२० **आग्नेयस्येति ॥ अत्रैव कंचिद्विशेषं विधत्ते– ' आग्नेयस्य च सौम्यस्य चैन्द्रे समाश्लेषयेत् तेजश्चैवास्मिन् ब्रह्मवर्चसं च समीची दधाति ' इति ॥ [१९-]एतच्च सूत्रकारेणैव व्याख्यातम्– " संहितानि हवींष्यधिश्रयेदित्यर्थः। लेपौ वाऽस्मिन् समाश्लेषयेत् " (आपश्रौसू १९.२१.१८-१९) इति। सांहित्यपक्षे आग्नेयं सौम्यं चेति द्वितीया द्रष्टव्या। पक्षान्तरे लेपमित्यध्याहारः। तेन समाश्लेषणेन [५]अस्मिन् यजमान आज्ञाशक्तिः श्रुताध्ययनसंपत्तिः [५]च इत्येते संपूर्णे स्थापयति[-१९] ॥**

२५ ४. मै४–दधामि। ५. मै– चन्द्रमाश्लेषयेत्। ६. मै४– तेजोब्रह्मवर्चसावास्मिन्। ७. मै४– निदधाति। ८. तं१.तं२– लोपः।

१८. अ.ड.ने.पा. स्वस्वकालेऽननुष्ठानं; उ– स्वकालेऽननुष्ठानं; इ– स्वकालेष्वननुष्ठानं; हो१– स्वस्वकाले नानुष्ठानम्। १९. अ.इ.उ.पा– एतच्च पूर्णं स्थापयति; हा– एकस्मिन् पूर्णं स्थापयति; आ. क.जो.ना– ' एतच्च ..... लेपमित्यध्याहारः ' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

दधात्यग्नीषोमीयमेकादशकपालं निर्वपेद्यं कामो नोपनमेदाग्नेयो वै ब्राह्मणः स सोमं पिबति स्वामेव देवताꣳ स्वेन भागधेयेनोप धावति सैवैनं कामेन समर्धयत्युपैनं कामो नमत्यग्नीषोमीयमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकामोऽग्नीषोमावेव स्वेन भागधेयेनोप धावति तावेवास्मिन् ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव (३) भवति यदष्टाकपालस्तेनाऽऽग्नेयो यच्छ्यामाकस्तेन सौम्यः समृद्ध्यै ५

दधाति । अग्नीषोमीयमित्यग्नी - सोमीयम् । एकादशकपालमित्येकादश-कपालम् । निरिति । वपेत् । यम् । कामः । न । उपनमेदित्युप - नमेत् । आग्नेयः । वै । ब्राह्मणः । सः । सोमम् । पिबति । स्वाम् । एव । देवताम् । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । सा । एव । एनम् । कामेन । समिति । अर्धयति । उपेति । एनम् । कामः । नमति । अग्नीषोमीयमित्यग्नी - सोमीयम् । अष्टाकपालमित्यष्टा - कपालम् । निरिति । वपेत् । ब्रह्मवर्चसकामम् १० इति ब्रह्मवर्चस - कामः । अग्नीषोमावित्यग्नी - सोमौ । एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । तौ । एव । अस्मिन् । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । धत्तः । ब्रह्मवर्चस्येति ब्रह्म - वर्चस्ये । एव (३) । भवति । यत् । अष्टाकपाल इत्यष्टा - कपालः । तेन । आग्नेयः । यत् । श्यामाकः । तेन । सौम्यः । समृद्ध्या इति सम् - ऋद्ध्यै । १५

अग्नीषोमीयमित्यादि ॥ " द्यावापृथिवीशुनासीर° " (पा ४·२.३२) इति छः । ब्राह्मणस्याग्नेयत्वात् सोमवत्त्वाच्चास्य अग्निः सोमश्च स्वा देवता ॥

अग्नीषोमीयमष्टाकपालमिति ॥ गतम् ॥ ' यच्छ्यामाकः ' इति वचनात् श्यामाकानां निर्वपेत् ॥

अग्नीषोमीयमिति ॥ कामितार्थसिद्ध्यर्थमिष्टयन्तरं विधत्ते – ' अग्नीषोमीयमेकादशकपालं निर्वपेद्यं कामो नोपनमेदाग्नेयो वै ब्राह्मणः स सोमं पिबति स्वामेव देवताꣳ स्वेन भागधेयेनोप धावति सैवैनं कामेन समर्धयत्युपैनं कामो नमति ' इति ॥ अग्निना सह [२०]मुखे [२१]जातत्वात् सोमपातृत्वाच्च तदुभयं ब्राह्मणस्य देवता ॥ २०

अग्नीषोमीयमिति ॥ ब्रह्मवर्चसार्थं श्यामाकपुरोडाशं विधत्ते– ' अग्नीषोमीयमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकामोऽग्नीषोमावेव स्वेन भागधेयेनोप धावति तावेवास्मिन् ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव भवति यदष्टाकपालस्तेनाऽऽग्नेयो यच्छ्यामाकस्तेन सौम्यः समृद्ध्यै ' इति ॥ कपालगतयाऽष्टसंख्यया गायत्रीस्मरणात् तद्द्वारेण हविष आग्नेयत्वम्, " अष्टाक्षरा गायत्री गायत्रोऽग्निः " (तैसं २·२·५) इति श्रुत्यन्तरात्। तथा–" सोमो वा अकृष्टपच्यस्य राजा " (तैब्रा १·६·१) इत्यादिश्रुतेः श्यामाकधान्येन [२२]हविषः सौम्यत्वम्। अनेनैवार्थवादेन विधिवाक्ये पुरोडाशस्य श्यामाकमयत्वमुन्नेयम् ॥ २५

२०. जो. ना.हा– मुखेन; इ– मुखेन सह, उ– 'मुखे' नास्ति। २१. उ– 'जातत्वात्' नास्ति। २२. अ.उ. जो.पा.हा– हविषा। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमाय वाजिनं श्यामाकं चरुं निर्वपेद्यः क्लैब्याद्बिभीयाद्रेतो हि वा एतस्माद्वाजिनमपक्रामत्यथैष क्लैब्याद्बिभाय सोममेव वाजिनꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् रेतो वाजिनं दधाति न क्लीबो भवति ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद्ग्रामकामो (४) ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव भवति

सोमाय । वाजिनं । श्यामाकम् । चरुम् । निरिति । वपेत् । यः । क्लैब्यात् । बिभीयात् । रेतः । हि । वै । एतस्मात् । वाजिनम् । अपक्रामतीत्यप - क्रामति । अथ । एषः । क्लैब्यात् । बिभाय । सोमम् । एव । वाजिनम् । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । सः । एव । अस्मिन् । रेतः । वाजिनम् । दधाति । न । क्लीबः । भवति । ब्राह्मणस्पत्यमिति ब्राह्मणः–पत्यम् । एकादशकपालमित्येकादश - कपालम् । निरिति । वपेत् । ग्रामकाम इति ग्राम - कामः (४) । ब्रह्मणः । पतिम् । एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । सः । एव । अस्मै । सजातानिति स - जातान् । प्रेति । यच्छति । ग्रामी । एव । भवति ।

सोमाय वाजिन इत्यादि ॥ [V]वाजिनं वाजिनस्थानीयं प्रजननशक्तिमत् [V]रेतः अस्मात् [V]अप [V]क्रामति । [V]अथ अनन्तरम् [V]एषः [V]क्लैब्यात् [V]बिभाय बिभेति । छान्दसो लिट् । गतमन्यत् ॥

ब्राह्मणस्पत्यमित्यादि ॥ पत्युत्तरपदलक्षणो ण्यः (पा ४·१·८५) । गणवती इति । "गणानां त्वा गणपतिम्", "स इज्जनेन" (तैसं २·३· १४) इति । "वा छन्दसि" (पा ६·१·१०६) इति पूर्वसवर्णदीर्घत्वम् । गणवत्यौ ॥

सोमायेति ॥ क्लीबत्वपरिहारायेष्टिं विधत्ते– 'सोमाय वाजिने श्यामाकं चरुं निर्वपेद्यः क्लैब्याद्बिभीयाद्रेतो हि वा एतस्माद्वाजिनमपक्रामत्यथैष क्लैब्याद्बिभाय सोममेव वाजिनꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् रेतो वाजिनं दधाति न क्लीबो भवति' इति ॥ प्रजननसमर्थोऽन्नरसो वाजस्तद्वते [V]वाजिने । यदा [V]वाजिनं प्रजननसमर्थान्नरसरूपं [V]रेतः अस्मात् पुरुषात् [V]अपक्रामति [२३]रोगेणादृष्टविशेषेण वा तत्सामर्थ्यं [२४]प्रतिबध्यते, [२५]तदानीम् [२६]अस्य क्लीबत्वं संपद्यते तस्मात् क्लीबत्वात् [V]बिभाय बिभेति ॥

ब्राह्मणस्पत्यमिति ॥ इष्टयन्तरं विधत्ते– 'ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद्ग्रामकामो ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव भवति' इति ॥

२३. शृं– दाषणादृष्ट° ।
२४. अ.पा– प्रतिविध्यते; उ– प्रविध्यते ।
२५. इ–तदा ।
२६. अ.उ.पा– सम्यक्; जो.ना.हा– अस्य सम्यक् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

गणवती याज्यानुवाक्ये भवतः सजातैरेवैनं गणवन्तं करोत्येतामेव निर्वपेद्यः कामयेत ब्रह्मन् विशं वि नाशयेयमिति मारुती याज्यानुवाक्ये कुर्याद्-ब्रह्मन्नेव विशं वि नाशयति ॥ ३ ॥

[तेजः समीची ब्रह्मवर्चस्येव ग्रामकामश्चित्वारिंशच्च ।]

गणवती इति गण-वती । याज्यानुवाक्ये इति याज्या-अनुवाक्ये । भवतः । सजातैरिति स-जातैः । एव । एनम् । गणवन्तमिति गण-वन्तम् । करोति । एताम् । एव । निरिति । वपेत् । यः । कामयेत । ब्रह्मन् । विशम् । वीति । नाशयेयम् । इति । मारुती इति । याज्यानुवाक्ये इति याज्या-अनुवाक्ये । कुर्यात् । ब्रह्मन् । एव । विशम् । वीति । नाशयति ॥३॥

[मैसं २·१·४, २·३ कासं १०·२, ११·४]

सजातैरिति । [v]सजातैः गणैः तद्वन्तम् [v]एनं [v]करोति ॥ ब्रह्मन् विशमिति । [९]नशिर्गति-कर्मा छान्दसः । [१०-v]ब्रह्मन् ब्राह्मणे[-१०] [v]विशं वैश्यं [v]वि [v]नाशयेयम् विशेषेण गमयेयं प्रापयेयमिति । यद्वा– ब्रह्मणि प्रतियोगिनि विनष्टा भवन्तु वैश्या इति । [११-v]मारुती मारुत्यौ[-११] "मरुतो यद्ध वो दिवः", "या वः शर्म" (तैसं १·५·११) इति । ब्रह्मणि [v]विशं प्रापयत्येव । "आ तू न उप गन्तन" (तैसं १·५·११) इति [१२-]च मन्त्रलिङ्गात्[-१२], मरुतो हि देवानां विशः ॥

इति द्वितीये तृतीये तृतीयः ॥

गणवती इति ॥ [२७]अत्र "गणानां त्वा", "स इज्जनेन" (तैसं २·३·१४) इत्येते ऋचौ अन्त्यानुवाके समाम्नास्यमाने विधत्ते– 'गणवती याज्यानुवाक्ये भवतः सजातैरेवैनं गणवन्तं करोति' इति ॥ गणशब्दो ययोर्ऋचोरस्ति ते गणवत्यौ ॥

एतामेवेति ॥ यदा वैश्यजातिः धनिकत्वगर्वेण[२८] ब्राह्मणमतिक्रामति तदा तस्मिन् ब्राह्मणे तां जातिं वश्यां कर्तुं तामेवेष्टिं विधत्ते– 'एतामेव निर्वपेद्यः कामयेत ब्रह्मन् विशं वि नाशयेयमिति' इति ॥ [v]ब्रह्मन् ब्राह्मणे [v]वि [v]नाशयेयं गर्वविनाशनेन [२९]आत्मसात् कुर्याम् । "मरुतो यद्ध वो दिवः", "या वः शर्म" इत्येते ऋचौ "वैश्वानरो न ऊत्या" (तैसं १·५·११) इत्यस्मिन्ननुवाके समाम्नाते अत्रापि प्रतीकेन ग्रहीष्येते ॥

मारुती इति ॥ तदुभयमत्र विधत्ते– 'मारुती याज्यानुवाक्ये कुर्याद्ब्रह्मन्नेव विशं वि नाशयति' इति ॥ मरुतां संबन्धिन्यौ मारुत्यौ । "मरुतो वै देवानां विशः" (तैसं २·२·५) इति [३०]श्रुतेस्तदनुग्रहात् मानुषीं विशमधीनां करोति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठके प्रथमादितृतीयान्ता अनुवाकाः ॥

९. तं१.तं२– नशतिः । १०–१०. तं२.लं– ब्रह्म बृंहणि ब्राह्मणे; तं१– बृंहणि ब्राह्मणे । ११–११. तं२– मारुत्या । १२–१२. तं१.तं२.मै.लं– मन्त्रलिङ्गम् ।

२७. ने.हो तत्र । २८. इ–धनिकत्ववर्गेण । २९. ने.हो–१–अधीनाम् । ३०. आ.क.जो.ना.हा–°स्तदनुग्रहेण ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्यम्णे चरुं निर्वपेत् सुवर्गकामोऽसौ वा आदित्योऽर्यमाऽर्यमणमेव स्वेन भाग-धेयेनोप धावति स एवैनꣳ सुवर्गं लोकं गमयत्यर्यम्णे चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरित्यसौ वा आदित्योऽर्यमा यः खलु वै ददाति सोऽर्यमाऽर्य-मणमेव स्वेन भागधेयेनोप धावति स एवा(१)स्मै दानकामाः प्रजाः करोति

५ अर्यम्णे । चरुम् । निरिति । वपेत् । सुवर्गकाम इति सुवर्ग - कामः । असौ । वै । आदित्यः । अर्यमा । अर्यमणम् । एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । सः । एव । एनम् । सवर्गमिति सुवः–गम् । लोकम् । गमयति । अर्यम्णे । चरुम् । निरिति । वपेत् । यः । कामयेत । दानकामा इति दान - कामाः । मे । प्रजा इति प्र - जाः । स्युः । इति । असौ । वै । आदित्यः । अर्यमा । यः । खलु । वै । ददाति । सः । अर्यमा । अर्यमणम् । एव । स्वेन ।
१० भागधेयेनेति भाग - धेयेन । उपेति । धावति । सः । एव (१) । अस्मै ।
दानकामा इति दान - कामाः । प्रजा इति प्र - जाः । करोति ।

अर्यम्ण इत्यादि । गतम् ॥ अरीन् यमयतीत्यर्यमा, इन्द्र इति केचित् । यम इत्यपरे । [१]-सूर्य इत्यन्ये-[१] । याज्याया [२]इन्द्रमनूत्पन्नत्वात् ॥

तृतीये यज्ञविभ्रष्टो यः [१]-कामं प्राप्तुमिच्छति-[१] ।
१५ ब्रह्मवर्चसकामो यः क्लीबत्वाद्यो बिभेति च ॥ १ ॥
ग्रामकामो ब्राह्मणो यो विशः स्थापनमिच्छति ।
एतेषामिष्टयः प्रोक्तास्तत्तत्फलसमाप्तये ॥ २ ॥

अथ चतुर्थे स्वर्गकामादीनामिष्टयो विधातव्याः ।

अर्यम्ण इति ॥ तत्र स्वर्गार्थिन इष्टिं विधत्ते– ' अर्यम्णे चरुं निर्वपेत् सुवर्गकामोऽसौ वा
२० आदित्योऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवैनꣳ सुवर्गं लोकं गमयति ' इति ॥

अर्यम्ण इति ॥ प्रतिग्रहार्थिनस्तामेवेष्टिं विधत्ते– ' अर्यम्णे चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरित्यसौ वा आदित्योऽर्यमा यः खलु वै ददाति सोऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवास्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवन्ति ' इति ॥ लोके [१]यः कोऽपि द्रव्यं [१]ददाति सोऽयं सूर्यवत् कीर्त्या भासमानत्वात् [१]अर्यमा इत्युपचर्यते । तं प्रेरयितुं मुख्यायार्यम्णे चरुर्युक्तः ॥

२५ १–१. तं१.तं२.लं– सूर्य इत्यपरे।
२. तं१.तं२.पं२.लं–इन्द्रानुत्प°; मै४–'इन्द्रमनूत्पन्नत्वात्' नास्ति।

१–१. इ.हो१– कामप्राप्तिमिच्छति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

दानकामा अस्मै प्रजा भवन्त्यर्यम्णे चरुं निर्वपेद्यः कामयेत स्वस्ति जनतामियामित्यसौ वा आदित्योऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवैनं तद्गमयति यत्र जिगमिषतीन्द्रो वै देवानामानुजावर आसीत् स प्रजापतिमुपाधावत् तस्मा एतमैन्द्रमानुषूकमेकादशकपालं नि(२)रवपत् तेनैवैनमग्रं देवतानां पर्यणयद्-

दानकामा इति दान-कामाः। अस्मै। प्रजा इति प्र-जाः। भवन्ति। अर्यम्णे। चरुम्। निरिति। वपेत्। यः। कामयेत। स्वस्ति। जनताम्। इयाम्। इति। असौ। वै। आदित्यः। अर्यमा। अर्यमणम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। एनम्। तत्। गमयति। यत्र। जिगमिषति। इन्द्रः। वै। देवानाम्। आनुजावर इत्यानु-जावरः। आसीत्। सः। प्रजापतिमिति प्रजा-पतिम्। उपेति। अधावत्। तस्मै। एतम्। ऐन्द्रम्। आनुषूकमित्यानु-सूकम्। एकादशकपालमित्येकादश-कपालम्। निरिति (२)। अवपत्। तेन। एव। एनम्। अग्रम्। देवतानाम्। परीति। अनयत्।

यः खल्विति ॥ दातुरर्यमत्वं ताद्धर्म्यात् ॥

स्वस्तीति ॥ अविघ्नेन। तद्गमयतीति। गन्तव्यं स्वस्ति गमयति। अरणहेतुरर्यमेति ॥

इन्द्रो वा इत्यादि ॥ [v]आनुजावरः इव [v]आसीत्। [३]आनुजावरोपकर्षते [रोऽपकृष्टतरः]। आनुषूकमिति। अनुषूयन्त इत्यानुषूकाः व्रीहिविशेषाः, ये लूनेभ्यः स्तम्बेभ्यः स्वयं पुनः प्ररोहन्ति, तत्प्रभवाणां व्रीहीणामियं संज्ञा। "सत्सूद्विष॰" (पा ३·२·६१) इति क्विप्, अल्पार्थे (पा ५·३·८५) प्रागिवीयः कः[४], सुषामादित्वात् षत्वम् (पा ८·३·९८)। तेषां विकारः पुरोडाशः आनुषूकः। कोपधादण् (पा ४·३·१३७)। [v]अग्रं प्राधान्यं [v]देवतानां [v]पर्यणयत् सर्वतः

अर्यम्ण इति ॥ सभां जिगमिषोरिष्टिं विधत्ते–'अर्यम्णे चरुं निर्वपेद्यः कामयेत स्वस्ति जनतामियामित्यसौ वा आदित्योऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवैनं तद्गमयति यत्र जिगमिषति' इति ॥ [r]स्वस्ति निर्विघ्नेन [r]जनतां जनसमूहम् ॥

इन्द्र इति ॥ यः समानानां मध्ये श्रैष्ठ्यमलभमानः [२]तदीयानुजादवरो निकृष्टो वर्तते तस्य श्रैष्ठ्यप्राप्त्यर्थमिष्टिं विधातुं प्रस्तौति–'इन्द्रो वै देवानामानुजावर आसीत् स प्रजापतिमुपाधावत् तस्मा एतमैन्द्रमानुषूकमेकादशकपालं निरवपत् तेनैवैनमग्रं देवतानां पर्यणयद्बुध्नवती अग्रवती याज्यानुवाक्ये अकरोद्बुध्नादेवैनमग्रं पर्यणयत्' इति ॥ पश्चात् जातो भ्राताऽनुजः [३]तस्मादप्यवरोऽनुजावरस्तद्वत् वर्तमान [r]आनुजावरः [४]अत्यन्तनिकृष्ट इत्यर्थः। व्रीहिस्तम्बेषु लूनेष्ववशिष्टमूलेभ्योऽनुसूयन्ते पश्चादुत्पद्यन्त

३. मै४– आनुजावरोपकल्प्यते; लं– 'आनुजावरोपऽकर्षते' नास्ति। ४. मै– 'कः' नास्ति।

२. शृं– तदीयानुज इव; हो१– तदीयवृक्ष इवावरः; ड.ने– तदीयान् वृक्ष इवावरः। ३. हो१ – तस्याप्य°। ४. आ– निकृष्टः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

बुध्नवती अग्रवती याज्यानुवाक्ये अकरोद्बुध्नादेवैनमग्रं पर्यणयद्यो राजन्य आनुजावरः स्यात् तस्मा एतमैन्द्रमानुषूकमेकादशकपालं निर्वपेदिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनमग्रꣳ समानानां परि णयति बुध्नवती अग्रवती याज्यानुवाक्ये भवतो बुध्नादेवैनमग्रं (३) परि णयत्यानुषूको भवत्येषा ह्येतस्य देवता य आनुजावरः समृद्ध्यै

५ बुध्नवती इति बुध्न - वती । अग्रवती इत्यग्र - वती । याज्यानुवाक्ये इति याज्या - अनुवाक्ये । अकरोत् । बुध्नात् । एव । एनम् । अग्रम् । परीति । अनयत् । यः । राजन्यः । आनुजावर इत्यानु - जावरः । स्यात् । तस्मै । एतम् । ऐन्द्रम् । आनुषूकमित्यानु-सूकम् । एकादशकपालमित्येकादश - कपालम् । निरिति । वपेत् । इन्द्रम् । एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । सः । एव । एनम् । अग्रम् । समानानाम् । परीति । नयति ।

१० बुध्नवती इति बुध्न - वती । अग्रवती इत्यग्र - वती । याज्यानुवाक्ये इति याज्या - अनुवाक्ये । भवतः । बुध्नात् । एव । एनम् । अग्रम् (३) । परीति । नयति । आनुषूक इत्यानु - सूकः । भवति । एषा । हि । एतस्य । देवता । यः । आनुजावर इत्यानु - जावरः । समृद्ध्या इति सम् - ऋद्ध्यै ।

प्रापयत् । बुध्नवती इति । "बुध्नादग्रमङ्गिरोभिः" इति पुरोऽनुवाक्या, "बुध्नादग्रेण वि मिमाय मानैः" (तैसं २.३.१४) इति याज्या । बुध्नादेवेति । मूलात् ᵛएव आरभ्य दृढमूलामिति यावत् ।

१५ आनुजावर इति । अनुजः कनिष्ठः । तस्मान्निकृष्टैश्वर्यो यः अनुजस्य गुणभूतो भवति सः अनुजावरः, स एव ᵛआनुजावरः । "सांनाय्यानुजावर°" (द्र. पाभा पा ५·४·३६) इत्यादिना स्वार्थिकोऽण् । एषा हीति । ᵛयः ᵛआनुजावरः ᵛएतस्य ᵛएषा ᵛदेवता । का ? या आनुषूकस्य, आनुषूकभागी ५इन्द्रः इत्यर्थः ॥

इति द्वितीयफलरूपा व्रीहयोऽनुषूकाः ५तेभ्यो निष्पन्नम् ᵛआनुषूकम् । ᵛतेन हविषा प्रजापतिः ᵛदेवतानां
२० **मध्य इन्द्रं श्रैष्ठ्यं प्रापितवान् । बुध्नशब्दोऽस्ति ययोर्ऋचोस्ते बुध्नवत्यौ । अग्रशब्दोऽस्ति ययोर्ऋचोस्ते अग्रवत्यौ । 'बुध्नादग्रम्", "बुध्नादग्रेण" (तैसं २·३·१४) इत्येते अन्त्यानुवाके समाम्नास्यमाने । ᵛबुध्नात् मूलादारभ्य ᵛअग्रम् अवसानं प्रापयत् । कर्मानुष्ठानकालमारभ्य यावज्जीवं श्रैष्ठ्यं प्रापितवानित्यर्थः ॥**

य इति ॥ अथ विधत्ते– 'यो राजन्य आनुजावरः स्यात् तस्मा एतमैन्द्रमानुषूकमेकादशकपालं निर्वपेदिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनमग्रꣳ समानानां परि णयति बुध्नवती अग्रवती याज्या-
२५ **नुवाक्ये भवतो बुध्नादेवैनमग्रं परि णयत्यानुषूको भवत्येषा ह्येतस्य देवता य आनुजावरः समृद्ध्यै' इति ॥**

५. तं१.तं२– 'इन्द्रः' नास्ति ।

५. ड.ने.हो१– तैः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

यो ब्राह्मण आनुजावरः स्यात् तस्मा एतं बार्हस्पत्यमानुषूकं चरुं निर्वपेद्बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनमग्रꣳ समानानां परि णयति बुध्नवती अग्रवती याज्यानुवाक्ये भवतो बुध्नादेवैनमग्रं परि णयत्यानुषूको भवत्येषा ह्येतस्य (४) देवता य आनुजावरः समृद्ध्यै ॥

[एव निरग्रमेतस्य चत्वारि च ।] ५

यः । ब्राह्मणः । आनुजावर इत्यानु - जावरः । स्यात् । तस्मै । एतम् । बार्हस्पत्यम् । आनुषूकमित्यानु - सूकम् । चरुम् । निरिति । वपेत् । बृहस्पतिम् । एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । सः । एव । एनम् । अग्रम् । समानानाम् । परीति । नयति । बुध्नवती इति बुध्न - वती । अग्रवती इत्यग्र - वती । याज्यानुवाक्ये इति याज्या - अनुवाक्ये । भवतः । बुध्नात् । एव । एनम् । अग्रम् । परीति । नयति । आनुषूक इत्यानु - सूकः । भवति । एषा । हि । एतस्य (४) । देवता । यः । आनुजावर इत्यानु - जावरः । समृद्ध्या इति सम् - ऋद्ध्यै ॥ ४ ॥

[मैसं २.२.४; कासं ११.४]

यो ब्राह्मण इत्यादि ॥ ब्राह्मणानुजावरविषये बार्हस्पत्यचरुविधिः । शेषो गतः ॥

इति द्वितीये तृतीये चतुर्थोऽनुवाकः ॥

---

[r]यः आनुषूकः [r]आनुजावरः [r]एतस्य इयमानुषूकधान्यभागिन्येव [r]देवता युक्ता, सदृशत्वात् । तस्मादानुषूक-पुरोडाशः [r]समृद्ध्यै संपद्यते ॥

य इति ॥ आनुजावरब्राह्मणस्येष्टिं विधत्ते–' यो ब्राह्मण आनुजावरः स्यात् तस्मा एतं बार्हस्पत्य-मानुषूकं चरुं निर्वपेद्बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनमग्रꣳ समानानां परि णयति बुध्नवती अग्रवती याज्यानुवाक्ये भवतो बुध्नादेवैनमग्रं परि णयत्यानुषूको भवत्येषा ह्येतस्य देवता य आनुजावरः समृद्ध्यै " इति ॥ अत्र " प्र यो जज्ञे ", " महान्मही " इति द्वे याज्यानुवाक्ये (तैसं २.३.१४) । ' स बुध्नादाष्ट जनुषाऽभ्यग्रम् ' इति बुध्नाग्रशब्दयोस्तत्र विद्यमानत्वात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतेस्त्रयस्त्रिꣳशद्दुहितर आसन् ताः सोमाय राज्ञेऽददात् तासाꣳ रोहिणीमुपैत् ता ईर्ष्यन्तीः पुनरगच्छन् ता अन्वैत् ताः पुनरयाचत ता अस्मै न पुनरददात् सोऽब्रवीदृतममीष्व यथा समावच्छ उपैष्याम्यथ ते पुनर्दास्यामीति स ऋतमामीत्

प्रजापतेरिति प्रजा - पतेः । त्रयस्त्रिꣳशदिति त्रयः–त्रिꣳशत् । दुहितरः । आसन् । ताः । सोमाय । राज्ञे । अददात् । तासाम् । रोहिणीम् । उपेति । ऐत् । ताः । ईर्ष्यन्तीः । पुनः । अगच्छन् । ताः । अन्विति । ऐत् । ताः । पुनः । अयाचत । ताः । अस्मै । न । पुनः । अददात् । सः । अब्रवीत् । ऋतम् । अमीष्व । यथा । समावच्छ इति समावत् - शः । उपैष्यामीत्युप - एष्यामि । अथ । ते । पुनः । दास्यामि । इति । सः । ऋतम् । आमीत् ।

प्रजापतेस्त्रयस्त्रिꣳशदित्यादि ॥ अश्विन्यादयः सप्तविंशतिः तारकाभिमानिन्यः[१], ऋद्ध्यादयः[१] षडन्या इत्येके। अन्ये तु षट् कृत्तिकाः अभिजिदेका अश्विन्यादयः षड्विंशतिरिति त्रयस्त्रिंशत्तारका इत्याहुः। ईर्ष्यन्तीरिति । सपत्नीबहुमानमसहमानाः पितरमेव [v]पुनः [v]अगच्छन् । [v]ताः अन्वगच्छत् सोमः । [v]अयाचत प्रजापतिम् । ततः [v]ताः सोमाय [v]न [v]अददात् प्रजापतिः । अथ [v]सः प्रजापतिः [v]अब्रवीत् सोमम् [v]ऋतं सत्यम् [v]अमीष्व प्रतिपद्यस्व शपथं कुरु, सत्येनेति यावत् । शपो लुक् (पा २·४·७२), छान्दस इडागमः । शपथप्रयोगं दर्शयति - यथेति । [v]यथा इदमर्थरूपं

स्वर्गकामो दानकामः सभां गन्तुं य इच्छति ।
राजन्यो [1-]ब्राह्मणश्च द्वौ यौ-[1] [v]स्यातामानुजावरौ ॥
[3]तुर्येऽनुवाक एतेषामाम्नाता इष्टयः क्रमात् ॥ १ ॥

प्रजापतेरिति ॥ [3]अथ पञ्चमे राजयक्ष्मगृहीतस्येष्टिं विधातुं प्रस्तौति– 'प्रजापतेस्त्रयस्त्रिꣳशद्दुहितर आसन् ताः सोमाय राज्ञेऽददात् तासाꣳ रोहिणीमुपैत् ता ईर्ष्यन्तीः पुनरगच्छन् ता अन्वैत् ताः पुनरयाचत ता अस्मै न पुनरददात् सोऽब्रवीदृतममीष्व यथा समावच्छ उपैष्याम्यथते पुनर्दास्यामीति स ऋतमामीत् ता अस्मै पुनरददात् तासाꣳ रोहिणीमेवोपैत् तं यक्ष्म आर्च्छद्राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत् पापीयानभवत् तत् पापयक्ष्मस्य यज्जायाभ्योऽविन्दत् तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एता एव नमस्यन्नुपाधावत् ता अब्रुवन् वरं वृणामहै समावच्छ एव न उपाय इति तस्मा एतमादित्यं चरुं निरवपन् तेनैवैनं पापात् स्वामादमुञ्चन्' इति ॥ "अम्बा दुला नितत्निर

१. तं१.तं२– °भिमान्यः । २. तं१.तं२.पं२.लं– ऋगादयः ।

१–१. इ – ब्राह्मणश्चाथ द्वौ । २. क.जो.ना.हा – चतुर्थानुवाके; इ–चतुर्थवाके; अ.उ.पा–तृतीयेऽनुवाके; ने.हो१– तुरीयानुवाके; शृं–तुर्यानुवाके । ३. आ– 'अथ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

ता अस्मै पुनरददात् तासां रोहिणीमेवोपैत्(१) तं यक्ष्म आर्छद्राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत् पापीयानभवत् तत् पापयक्ष्मस्य यज्जायाभ्यो-ऽविन्दत् तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति

ताः । अस्मै । पुनः । अददात् । तासाम् । रोहिणीम् । एव । उपेति (१) । ऐत् । तम् । यक्ष्मः । आर्छत् । राजानम् । यक्ष्मः । आरत् । इति । तत् । राजयक्ष्मस्येति राज - यक्ष्मस्य । जन्म । यत् । पापीयान् । अभवत् । तत् । पापयक्ष्मस्येति पाप-यक्ष्मस्य । यत् । जायाभ्यः । अविन्दत् । तत् । जायेन्यस्य । यः । एवम् । एतेषाम् । यक्ष्माणाम् । जन्म । वेद । न । एनम् । एते । यक्ष्माः । विन्दन्ति ।

[V]समावच्छः [V]उप [V]एष्यामि इति एवं शपथः क्रियताम् । [V]अथ एतास्तुभ्यं [V]पुनः [V]दास्यामि [V]इति । समादावतुप् स्वार्थिकः । समामित्यर्थः । ततः " संख्यैकवचनात्° " (पा ५·४·४३) इति शसः क्रियाविशेषणत्वात् कर्मत्वम् । सर्वेष्वपि अहःसु सममेवैताः सर्वा उपेष्यामीत्यर्थः । [V]सः सोमः तथा अकरोत्, प्रजापतिश्च [V]पुनः [३V]अददात् । अथ सोमः [४]पुनरपि [V]तासां मध्ये [V]रोहिणीम् [V]एव [V]उप [V]ऐत् । अथ सत्यातिक्रमात् [V]तं सोमं [V]यक्ष्मः क्षयरोगः आर्तमकरोत् । यक्ष पूजायाम्, औणादिको मन्प्रत्ययः । रोगोत्तमत्वं पूजा । राजानमित्यादि । राज्ञो यक्ष्मः राजयक्ष्म इति ।

भ्रयन्ती मेघयन्ती वर्षयन्ती चुपुणीका" (तैसं ४·४·५) इत्येवमाम्नाताः सप्त कृत्तिकाः । अवशिष्टा अश्विन्यादयः षड्विंशतिस्तारकाः । ता एताः [V]त्रयस्त्रिंशत् । तत्र रोहिणीव्यतिरिक्ताः [V]ईर्ष्यन्तीः तदीयं सुखमसहमानाः [V]पुनः प्रजापतिम् [V]अगच्छन् । सोमः [V]ताः अनुगम्य प्रजापतिं याचितवान् । [V]सः प्रजापतिः एवम् [V]अब्रवीत् शपथं प्रतिपद्यस्व तत् [V]यथा [V]समावच्छः [४]साम्येनैताः [V]उपैष्यामि इति, ततस्ताः [V]पुनः [V]दास्यामि [V]इति । [V]सः च [५]सोमः शपथं कृत्वा ताः स्वीकृत्य शपथम् उल्लङ्घ्य पूर्ववत् [V]रोहिणीम् [V]एव [६-V]उपैत् । ततः स यक्ष्मव्याधिगृहीतोऽभूत्[६] । ततः [V]राजानं [V]यक्ष्मः प्राप्तवान् [V]इति व्युत्पत्या राजयक्ष्मनाम्नो व्याधेः [V]जन्म संपन्नम् । यस्मादयं सोमः [V]पापीयान् तस्मादेतत्प्राप्त्या [V]पाययक्ष्मस्य जन्म संपन्नम् । यस्मात् [V]जायाभ्यः निमित्तभूताभ्यो [७]व्याधिमलभत तस्मात् जायेन्यनामकस्य व्याधेर्जन्म संपन्नम् ।

३. तं१.तं२.मै– अदात् । ४. तं१.तं२.लं– 'पुनरपि' नास्ति।

४. आ.क– साम्येन ताः । ५. जो.ना.हा– सोमः पुनः । ६–६. शृं– उपेत्य क्षयव्याधिग्रस्तोऽभूत्; ड– उपेत्य क्षयव्याधिसहितोऽभूत्; ने.हो– एत्य च क्षयव्याधिग्रस्तोऽभूत्; इ.जो.ना.हा– °व्याधिग्रस्तो बभूव । ७. ने– व्याधिरभवत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स एता एव नमस्यन्नुपाधावत् ता अब्रुवन् वरं वृणामहै समावच्छ एव न उपाय इति तस्मा एत(२)मादित्यं चरुं निरवपन् तेनैवैनं पापात् स्रामादमुञ्चन् यः पापयक्ष्मगृहीतः स्यात् तस्मा एतमादित्यं चरुं निर्वपेदादित्यानेव स्वेन भागधेयेनोप धावति

सः । एताः । एव । नमस्यन् । उपेति । अधावत् । ताः । अब्रुवन् । वरम् । वृणामहै । समावच्छ इति समावत्-शः । एव । नः । उपेति । अयः । इति । तस्मै । एतम् (२) । आदित्यम् । चरुम् । निरिति । अवपन् । तेन । एव । एनम् । पापात् । स्रामात् । अमुञ्चन् । यः । पापयक्ष्मगृहीत इति पापयक्ष्म-गृहीतः । स्यात् । तस्मै । एतम् । आदित्यम् । चरुम् । निरिति । वपेत् । आदित्यान् । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति ।

पापीयानिति । पुरुषान्तरयक्ष्मात् पापतरत्वात् पापश्चासौ यक्ष्मश्चेति । जायाभ्य इति । "तत आगतः" (पा ४·३·७४) इति छान्दस एन्यः । य एवमिति । एकस्यैव यक्ष्मस्य निमित्तभेदेन त्रित्वमुपचर्यते । विन्दन्तीति । बाधितुं न लभन्ते । अथ सोमः प्रजापतिं मुक्त्वा [v]एताः जायाः [v]एव [v]नमस्यन् पूजयन् [v]उप [v]अधावत् आर्तोऽस्मि प्रसीदन्तु भवत्य इति । अथ [v]ताः [v]अब्रुवन् [v]वरं [v]वृणामहै समम् [v]एव चास्मान् [v]उपायः उपगच्छ [v]इति, तुल्यप्रतिपत्तयो वयं स्यामेति । इत्थमिदं

---

[v]ते एते त्रयो [8]क्षयव्याधेरवान्तरविशेषाः । तज्जन्मवेदिनो व्याधेरलाभः फलम् । ततः सोमेन नमस्कृताः [10]सेविताश्चैताः सर्वाः साम्येनोपगमनं [v]वरं वृत्वा व्याधिपरिहाराय [v]चरुं निरुप्य, सोमं तस्मात् [v]पापात् [v]स्रामात् [11]प्रबलात् रोगादमोचयन् ॥

य इति ॥ इदानीं विधत्ते– 'यः पापयक्ष्मगृहीतः स्यात् तस्मा एतमादित्यं चरुं निर्वपेदादित्यानेव स्वेन भागधेयेनोप धावति त एवैनं पापात् स्रामान्मुञ्चन्ति' इति ॥ 'आदित्यान्' इत्यर्थवादे [12]श्रवणादस्य चरोरदितिर्देवता न भवति ॥

अमावास्यायामिति ॥ पौर्णमासीं वारयितुं विधत्ते– 'अमावास्यायां निर्वपेदमुमेवैनमाप्याय-मानमन्वा प्याययति' इति ॥ अमावास्यायामतीतायां शुक्लप्रतिपदमारभ्य सोमस्य [13]कलावृद्ध्याऽऽप्यायनं भवति ॥

---

८. ने हो१– 'ते' नास्ति । ९. आ.इ.–यक्ष्मव्याधे° । १०. शृं– सेविताश्च ताः; ड– सहिताश्च ताः; हो१–संहिताश्चैताः । ११. प्रतिबन्धात् । १२. इ– श्रुतत्वादस्य । १३. अ.पा– °द्ध्याप्यागमनं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

त एवैनं पापात् स्रामान्मुञ्चन्त्यमावास्यायां निर्वपेदमुमेवैनमाप्यायमानमन्वा प्याययति नवोनवो भवति जायमान इति पुरोनुवाक्या भवत्यायुरेवास्मिन् (३) तया दधाति यमादित्या अꣳशुमाप्याययन्तीति याज्यैवैनमेतया प्याययति ॥ ५ ॥

[एवोपैतमस्मिन् त्रयोदश च ।]

ते । एव । एनम् । पापात् । स्रामात् । मुञ्चन्ति । अमावास्यायामित्यमा - वास्यायाम् । निरिति । ५
वपेत् । अमुम् । एव । एनम् । आप्यायमानमित्या - प्यायमानम् । अनु । एति । प्याययति ।
नवोनव इति नवः—नवः । भवति । जायमानः । इति । पुरोनुवाक्येति पुरः— अनुवाक्या ।
भवति । आयुः । एव । अस्मिन् (३) । तया । दधाति । यम् । आदित्याः । अꣳशुम् ।
आप्याययन्तीत्या - प्याययन्ति । इति । याज्या । एति । एव । एनम् । एतया । प्याययति ॥ ५ ॥

[मैसं २.२.७, कासं ११.३] १०

करिष्यामीति सोमेनाभ्युपगते [V]तस्मै [V]आदित्यं [V]चरुं [V]निः [V]अवपन् जायाः, [V]तेन [V]एव [V]पापात् [V]स्रामात् रोगात् [V]एनम् [V]अमुञ्चन् ॥

य इत्यादि ॥ गतम् । अमावास्यायामिति । शुक्लप्रतिपःप्रभृति आप्यायते चन्द्रः, तम् [V]अनु यजमानम् [V]आ [V]प्याययति ॥

एवैनमिति ॥ [V]एतया [५V]एनम् [V]आ [V]प्याययति [V]एव । १५

इति द्वितीये तृतीये पञ्चमोऽनुवाकः ।

नवोनव इति ॥ चतुर्थप्रपाठकस्यान्त्यानुवाके समाम्नास्यमाने ऋचौ विधत्ते—' नवोनवो भवति जायमान इति पुरोनुवाक्या भवत्यायुरेवास्मिन् तया दधाति यमादित्या अꣳशुमाप्याययन्तीति याज्यैवैनमेतया प्याययति ' इति ॥ ते एते ऋचौ तत्रैव (तैसं २.४.१४) व्याख्यास्येते । [१४]प्रथमायामृच्यन्ते ' दीर्घमायुस्तिरति ' इत्युक्तत्वात् तत्पाठेनाऽऽयुष्प्राप्तिः । अमावास्यायामादित्ये प्रविष्टानां चन्द्रकलानां पुनरादित्यादेव २०
चन्द्रेण लब्धत्वाच्चन्द्रोत्कर्ष आदित्यस्यैवोत्कर्ष इति कृत्वा तस्या ऋच आदित्यचरावेवयधिकरण्यम् । द्वितीयस्यामृचि ' आ प्याययन्ति ' इति श्रवणात् तयर्चा यजमानस्याऽऽप्यायनं युक्तम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

५. तं१.तं२.मै.लं– ' एनम् ' नास्ति । २५

१४. ने.शृं– प्रथमाया ऋचोऽन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिर्देवेभ्योऽन्नाद्यं व्यादिशत् सोऽब्रवीद्यदिमाँल्लोकानभ्यतिरिच्यातै तन्ममासदिति तदिमाँल्लोकानभ्यत्यरिच्यतेन्द्रꣳ राजानमिन्द्रमधिराजमिन्द्रꣳ स्वराजानं ततो वै स इमाँल्लोकाꣳस्त्रेधाऽदुहत् तत् त्रिधातोस्त्रिधातुत्वं

प्रजापतिरिति प्रजा - पतिः । देवेभ्यः । अन्नाद्यमित्यन्न - अद्यम् । व्यादिशदिति वि - आदिशत् । सः । अब्रवीत् । यत् । इमान् । लोकान् । अभीति । अतिरिच्यातै इत्यति - रिच्यातै । तत् । मम । असत् । इति । तत् । इमान् । लोकान् । अभि । अतीति । अरिच्यत । इन्द्रम् । राजानम् । इन्द्रम् । अधिराजमित्यधि - राजम् । इन्द्रम् । स्वराजानमिति स्व - राजानम् । ततः । वै । सः । इमान् । लोकान् । त्रेधा । अदुहत् । तत् । त्रिधातोरिति त्रि - धातोः । त्रिधातुत्वमिति त्रिधातु-त्वम् ।

प्रजापतिर्देवेभ्य इत्यादि ॥ [v]व्यादिशत् पृथक्त्वेन व्यावृत्तमादिशत्, एकैकलोकविशेषाधिकमित्यर्थः । अथ देवानां तथा व्यादिश्य [v]सः [v]अब्रवीत् प्रजापतिः, [१-v]यत् अन्नाद्यम् [v]इमान्[-१] सर्वानपि [v]लोकान् अभ्यतिरिच्यते अतिव्याप्य वर्तते [२]नैकैकलोकावधिकं भवति [v]तत् [v]मम [v]असत् अस्तु । अतिरिच्यतेर्लेटि (पा ३.४.९४) आडागमः, " वैतोऽन्यत्र " (पा ३.४.९६) इत्यैत्वम् । आस्तेर्लेटयाडागमः । तस्मात् [v]इमान् [v]लोकान् [v]अभि [v]अति [v]अरिच्यत प्राजापत्यमैश्वर्यम् । किमस्मान् लोकानित्याह–[v]इन्द्रं [v]राजानम् इति [३]व्यादिशत् । तिस्र एतास्त्रिधातोर्देवताः[४] लोकत्रयात्मिकाः । [v]ततः खलु त्रिधातुदेवतानां त्रित्वात् प्रजापतिः लोकत्रयव्यापी, [५]व्याप्य तान् [v]इमान्[-५] [v]लोकान् [v]त्रेधा [v]अदुहत् त्रिप्रकारमदुहत् । उत्तरोत्तरज्यायस्त्वात् त्रिप्रकारलोकत्रयात्मना आत्मीयमैश्वर्यं विभक्तवान् । तदित्यादि । त्रयो धातवो धनान्यस्मिन्निति त्रिधातुः, त्रेधा धातव्यत्वात् पुरोडाशस्य । धातव्या वा पुरोडाशा धातवः, त्रिधा भिन्नाः पुरोडाशा अस्मिन्निति । यद्वा– सर्वाधारलोकत्रयात्मकत्वात् त्रिधातुः ॥

इष्टिर्यक्ष्मगृहीतस्य पञ्चमे समुदीरिता ॥

प्रजापतिरिति ॥ षष्ठे त्वन्नादनशक्तिकामस्येष्टिं विधातुं प्रस्तौति– ' प्रजापतिर्देवेभ्योऽन्नाद्यं व्यादिशत् सोऽब्रवीद्यदिमाँल्लोकानभ्यतिरिच्यातै तन्ममासदिति तदिमाँल्लोकानभ्यत्यरिच्यतेन्द्रꣳ राजानमिन्द्रमधिराजमिन्द्रꣳ स्वराजानं ततो वै स इमाँल्लोकाꣳस्त्रेधाऽदुहत् तत् त्रिधातोस्त्रिधातुत्वम् ' इति ॥ [v]प्रजापतिः अत्तुं योग्यमन्नं [v]देवेभ्यः विभज्य तवेदं [१]तवेदमित्यादिशत् । [२]तत्तदन्नं स्वीकर्तुं प्रवृत्तान् देवान् प्रत्येवम् [v]अब्रवीत् [v]यत् अन्नम् [v]इमान् [v]लोकान् [३]अभिव्याप्यातिरिक्तं भवति [v]तत् [v]मम अस्त्विति । [४-v]तत्

१–१. तं२– यदन्नाद्यमिदानीम् । २. लं– नैके लोकावधिकम् । ३. तं१.तं२. मै– 'व्यादिशत्' नास्ति । ४. तं१.तं२.लं– 'देवताः' नास्ति । ५–५. मै–व्याप्तानिमान् ।

१. इ– तवेदमिति व्यादिशत् । २. आ.क– तस्मादन्नं । ३. अ.उ.पा– अतिव्याप्या° । ४–४. अ.उ.जो.ना.पा.हा– तद्वक्ष्यमाणम् ; इ.क.हो१– तद्वन्नक्ष्यमाणमन्नम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

यं कामयेतान्नादः स्यादिति तस्मा एतं त्रिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाशं(१)-मेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञेऽयं वा इन्द्रो राजाऽयमिन्द्रोऽधि-राजोऽसाविन्द्रः स्वराडिमानेव लोकान्त्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति

यम्। कामयेत। अन्नाद इत्यन्न - अदः। स्यात्। इति। तस्मै। एतम्। त्रिधातुमिति त्रि - धातुम्। ५
निरिति। वपेत्। इन्द्राय। राज्ञे। पुरोडाशम् (१)। एकादशकपालमित्येकादश-कपालम्। इन्द्राय। अधिराजायेत्यधि - राजाय। इन्द्राय। स्वराज्ञ इति स्व - राज्ञे। अयम्। वै। इन्द्रः। राजा। अयम्। इन्द्रः। अधिराज इत्यधि - राजः। असौ। इन्द्रः। स्वराडिति स्व - राट्। इमान्। एव। लोकान्। स्वेन। भागधेयेनेति भाग - धेयेन। उपेति। धावति। ते। एव। अस्मै। अन्नम्। प्रेति। यच्छन्ति। अन्नाद इत्यन्न - अदः। एव। भवति। १०

यमित्यादि ॥ गतम्। तत्रायं प्रयोगः*– चतुरश्चतुरो मुष्टीनेकैकस्यै देवतायै निरुप्य हविष्कृता वाचं विसृजते। समानं कर्माऽऽधिवपनात्। अथाध्युप्य गार्हपत्य एकदशोत्तानानि कपालान्युपदधाति। तेष्वेव त्रीन् पुरोडाशानधिश्रयति। प्रथममधिश्रित्य [६]परितपनान्तं कृत्वा तस्मि-न्नुत्तरं ततो ज्यायांसमधिश्रयति। पुनस्तदन्तं [७]कर्म कृत्वा तस्मिन्नुत्तरं ततो ज्यायांसमधिश्रयतीति ॥

[४]वक्ष्यमाणमन्नम्– [५]इमान् [५]लोकान् [५]अभिव्याप्यातिरिक्तमासीत्। क इमे लोका इति [६]तदुच्यते इन्द्रराजादि- १५
शब्दाभिधेया एवेमे लोकाः, इन्द्रराजादीनां पृथिव्यादिलोकत्रयपालकत्वात्। एवमुक्त्वा [७]सः प्रजापतिरिन्द्र-राजादीन् [७]लोकान् [७८]त्रेधा [७]अदुहत्। तेभ्यो लोकेभ्यस्त्रिविधं सारं गृहीतवानित्यर्थः। तदिदं सारं [८]प्रजापतिः [८]स्वप्रियत्वेन [९]स्वीकृतवान् [१०]लोकातिरिक्तमन्नम्। यस्मात् त्रेधा [११]दोहनमकरोत् तस्मात् त्रिधातुनाम्नो यागस्य [१२]त्रिधातुत्वं संपन्नम्। लोकेभ्यो दुग्धास्त्रयो धातवो भागा यस्मिन् यागे स [१३]यागस्त्रिधातुः ॥

यमिति ॥ अथ विधत्ते– 'यं कामयेतान्नादः स्यादिति तस्मा एतं त्रिधातुं निर्वपेदिन्द्राय राज्ञे २०
पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञेऽयं वा इन्द्रो राजाऽयमिन्द्रोऽधिराजोऽसाविन्द्रः स्वरा-डिमानेव लोकान्त्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति यथा वत्सेन प्रत्तां गां दुह एवमेवेमाँल्लोकान् प्रत्तान् काममन्नाद्यं दुहे' इति। [५]यं यजमानमुद्दिश्याध्वर्युः [५]कामयेत अयं यजमानः [५]अन्नादः [५]स्यात् [५]इति [५]तस्मै यजमानायेयमिष्टिः। [५]अयं भूलोकाधिपतिः [५]इन्द्रः [५]राजा। [५]अयम् [१४]अन्त-

*(द्र. बौश्रौ १३·२८, आपश्रौ १९·२२·१-६)। ६. मै४– परिदानान्तं कर्म। ७. तं१.तं२.मै.लं–'कर्म' नास्ति। २५

५. अ.उ.पा – अतिव्याप्या°। ६. क.ड.हा – उच्यते; आ.शृं.हो१– उच्यन्ते। ७. ड.हा – त्रिधा। ८. ड.ने– प्रजापतेः। ९. अ.उ. पा– स्वप्रयत्नेन; ड.ने.हो१–प्रियत्वेन। १०. अ.उ.ड.ने.पा.हो१– स्वीकृतं। ११. ना– इमान् लोकाति°; जो.हा– तानिमान् लोकाति°; इ– तानिमाँल्लोकानति°। १२. इ –अदुहत् दोहमकरोत्। १३. अ.उ.पा–यागस्त्रैधातुः। १४. अ.आ.उ.क.जो.ना.पा.हा.हो१– अन्तरिक्षाधि°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यथा वत्सेन प्रत्तां गां दुह एवमेवेमाँल्लोकान् प्रत्तान् काममन्नाद्यं दुह उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्या उत्तरउत्तरो ज्यायान् भवत्येवमिव हीमे लोकाः समृद्ध्यै

यथा । वत्सेन । प्रत्ताम् । गाम् । दुहे । एवम् । एव । इमान् । लोकान् । प्रत्तान् । कामम् । अन्नाद्यमित्यन्न - अद्यम् । दुहे । उत्तानेष्वित्युत् - तानेषु । कपालेषु । अधीति । श्रयति । अयातयामत्वायेत्ययातयाम - त्वाय । त्रयः । पुरोडाशाः । भवन्ति । त्रयः । इमे । लोकाः । एषाम् । लोकानाम् । आप्त्यै । उत्तरउत्तर इत्युत्तरः—उत्तरः । ज्यायान् । भवति । एवम् । इव । हि । इमे । लोकाः । समृद्ध्या इति सम् - ऋद्ध्यै ।

यथेति ॥ [V]प्रत्तां प्रदातुं क्षीरमारब्धाम् । आदिकर्मणि निष्ठा (पा ३·४·७१) । [V]यथा वत्ससंसर्गेण बृंहितोधोभारां [V]दुहे दुग्धे । " लोपस्त आत्मनेपदेषु " (पा ७·१·४१) इति तलोपः । [V]एवम् [V]एव [V]इमान् [V]लोकान् अनेन त्रिधातुना वत्सस्थानीयेन [V]प्रत्तान् [V]कामं स्वाभिमतम् [V]अन्नाद्यं दुग्धे यजमानः ॥

उत्तानेष्विति ॥ गतम् । यातयामत्वं गतरसत्वम् । त्रय इति । पुरोडाशत्रित्वेन लोकत्रयप्राप्तिः[६] । उत्तरउत्तर इति । लोकानामुत्तरोत्तरज्यायस्त्वात् पुरोडाशानामपि उत्तरोत्तरज्यायस्त्वं [V]समृद्ध्यै भवति । सदृशयोगात् समृद्धिः ॥

[V]रिक्षलोकाधिपतिः [V]इन्द्रः [V]अधिराजः । [V]असौ स्वर्गलोकाधिपतिः [V]इन्द्रः [१६·V]स्वराट् । [V]इमान् [V]एव [V]लोकान् लोकाधिपतीन् इन्द्रराजादीन् [V]स्वेन [V]भागधेयेन सेवते । [V]यथा लोके [V]वत्सेन [१६]वत्सचोषणेन [V]प्रत्तां प्रस्नवनं प्रापितां [V]गां [१७]जनो दोग्धि, [V]एवम् [V]एव [V]इमान् [V]लोकान् [V]प्रत्तान् [१८]देवैरभिवर्धितान् प्राप्य स्वाभीष्टम् अन्नाद्यं [१९-]दोग्धि लभते[-१९] ॥

उत्तानेष्विति ॥ अत्र यदुक्तं सूत्रकारेण- "अथैनं त्रिधातुमेकादशसूत्तानेषु कपालेष्वधिश्रयति । प्रथमं पुरोडाशमधिश्रित्य परितपनान्तं कृत्वा [२०]तस्मिन्नुत्तरं द्वितीयं ज्यायांसमधिश्रित्य तावदन्तमेव कृत्वा तस्मिन्नुत्तरं ज्यायांसमधिश्रयति । प्रचरणकाले दक्षिणार्धात् प्रथमां देवतां यजेत् । मध्यात् द्वितीयाम् । उत्तरार्धात् तृतीयाम् । सर्वेषामभिगमयन्नवद्यतीत्युक्तम् । प्राच्यां दिशि 'त्वमिन्द्र' इति तिस्र ऋचो व्यत्यासमन्वाह । प्रथमामनूच्य मध्यमया यजेत् । मध्यमामनूच्य [२१]उत्तमया यजेत् । उत्तमामनूच्य प्रथमया यजेत् । एवं सर्वा याज्याः पुरोनुवाक्याश्च भवन्ति" (आपश्रौसू १९·२१·२२–१९·२२·६) इति ॥ तत्राधिश्रयणं विधत्ते–' उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय ' इति ॥ प्रकृतावधोमुखानां कपालानामुपरि पुरोडाशावधिश्रयति । अत्रापि तथात्वे यातयामत्वं गतसारत्वं [२२]स्यात् तत्परिहारायोत्तानत्वम् ॥

त्रय इति ॥ पुरोडाशसंख्यां प्रशंसति– 'त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्यै' इति ॥

८. मै४– °त्रयावातिः; लं– °त्रयव्यातिः; तं१.तं२.मै– °त्रयातिः ।

१५. अ.उ.जो.ड.ना.ने.पा.शृं हा–स्वराजः । १६. ड– चोषणेन; ने– पीत्वा चोषणेन । १७. इ– नरः । १८. ने–°रभिपातितान् । १९–१९. अ.आ.जो.ना.पा.हा–लभते; ने–दोग्धि लभ्यते; हो१–दोग्धीति लभ्यते । २०. आ– तस्मिन्नुपरि द्वितीयं । २१. शृं– अन्तिमया । २२. अ.आ.उ.जो.ना.पा.हा– 'स्यात्' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

सर्वेषामभिगमयन्नव द्यत्यछम्बट्कारं व्यत्यासमन्वाहानिर्दाहाय ॥ ६ ॥

[पुरोडाशं त्रयः षड्विंशतिश्च ।]

सर्वेषाम् । अभिगमयन्नित्यभि - गमयन् । अवेति । द्यति । अछम्बट्कारमित्यछम्बट् - कारम् । व्यत्यासमिति वि - अत्यासम् । अन्विति । आह । अनिर्दाहायेत्यनिः–दाहाय ॥ ६ ॥

[मैसं २.२.५ कासं १०.१०] ५

सर्वेषामिति ॥ [V]सर्वेषां पुरोडाशानाम् [V]अभिगमयन् पार्श्वे गमनं कुर्वन् [V]अव [V]द्यति । यत्र प्रथमस्यावद्यति तत्पार्श्वे द्वितीयस्यापि, तत्पार्श्वे तृतीयस्य । एतदुक्तं [6]भवति– दक्षिणार्धात् प्रथमां देवतां यजेत्, मध्यात् द्वितीयाम्, उत्तरार्धात् तृतीयाम् इति । [V]अछम्बट्कारम् [10]अनार्तत्वं, एकस्मिन् भागे त्रयाणामवदाने त्रयमप्यार्तं स्यात् ।

व्यत्यासमिति ॥ व्यत्यासो विनिमयः । [V]व्यत्यासं व्यत्ययस्य । णमुलि प्रत्ययात् पूर्वस्योदात्तत्वम् (पा ६.१.१९३) । "प्राच्यां दिशि त्वमिन्द्र" (तैसं २.४.१४) इत्यादयः तिस्रः ऋचः । तत्र प्रथमामनूच्य मध्यमया यजेत् प्रथमे, मध्यमामनूच्य उत्तमया यजेत् द्वितीये, उत्तमामनूच्य प्रथमया यजेत् तृतीये इति । एवं सर्वा याज्याः पुरोऽनुवाक्याश्च भवन्ति । तद्यथा–'इन्द्राय राज्ञेऽनुब्रूहि' इत्युक्ते प्राच्यां "दिशि त्वमिन्द्र" इति [V]अनु [V]आह पुरोनुवाक्याम्, "इन्द्रो जयाति न परा जयातै" (तैसं २.४.१४) इति यजति । 'इन्द्रायाधिराजाय' इत्युक्ते "इन्द्रो जयाति न परा जयातै" इत्यन्वाह पुरोनुवाक्याम्, "अस्येदेव प्र रिरिचे" (तैसं २.४.१४) इति यजति । 'इन्द्राय स्वराज्ञेऽनुब्रूहि' इत्युक्ते "अस्येदेव" इति पुरोनुवाक्यामन्वाह, "प्राच्यां दिशि त्वमिन्द्र" " इति यजति । एवं क्रियमाणम् [V]अनिर्दाहाय भवति । इतरथा हवींषि निर्दग्धानि विनाशितानि स्युः ॥ ॥ इति द्वितीये तृतीये षष्ठोऽनुवाकः ॥

उत्तरउत्तर इति ॥ [23-]ज्यायस्त्वं विधत्ते[-23]– 'उत्तरउत्तरो ज्यायान् भवत्येवमिव हीमे लोकाः समृद्ध्यै' इति ॥ भूर्लोकात् [24-]अन्तरिक्षं ज्यायः[-24] तस्मादपि स्वर्गो ज्यायान् ॥

सर्वेषामिति ॥ ऊर्ध्वाधोभावेन [25]स्थितानां सर्वेषां पुरोडाशानाम् अंशमंशमभिलक्ष्य[21] यथा युगपदेव हस्तप्राप्तिर्भवति तथाऽवदानं विधत्ते– 'सर्वेषामभिगमयन्नव द्यत्यछम्बट्कारम्' इति ॥ छम्बट्कारो वैयर्थ्यम् । एकस्यापि पुरोडाशस्य यथा वैयर्थ्यं न भवति तथेत्यर्थः ॥

व्यत्यासमिति ॥ याज्यानुवाक्यासु [27]विपर्यासं विधत्ते–'व्यत्यासमन्वाहानिर्दाहाय' इति ॥ [28]अविनाशायेत्यर्थः । व्यत्यासाभावे ह्यृचां त्रित्वाद्धवींषि [29]विनश्येरन् एकैकस्य हविषः [30]पृथग्याज्यानुवाक्ययोः संपादयितुमशक्यत्वात् । [31]सूत्रोक्तप्रकारेण तु व्यत्यासेन षडृचः संपद्यन्त इति नास्ति हविर्नाशः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठके षष्ठोऽनुवाकः ॥

९. तं१.तं२– 'भवति' नास्ति। १०. तं१.तं२.मै४– अनार्तत्वाय। ३०

२३–२३. ने–'ज्यायस्त्वं विधत्ते' नास्ति । २४–२४. ड–अन्तरिक्षो ज्यायान्; ने–अन्तरिक्षलोको ज्यायान् । २५. इ.क.जो.ना.हा– स्थापितानां । २६. आ.क ड.ने.श्रं.हो१–अंशमभिलक्ष्य । २७. ना– विपर्ययं । २८. ड. ने–हविरविनाशा° । २९. ड.ने.हो१– नश्येरन् । ३०. इ– प्रथमयाज्यानु° । ३१. इ–सूत्रकारोक्तप्रसारणे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवासुराः संयत्ता आसन् तान् देवानसुरा अजयन् ते देवाः पराजिग्याना असुराणां वैश्यमुपाऽऽयन् तेभ्य इन्द्रियं वीर्यमपाक्रामत् तदिन्द्रोऽचायत् तदन्वपाक्रामत् तदवरुधं नाशक्नोत् तदस्मादभ्यर्धोऽचरत् स प्रजापतिमुपाधावत् तमेतया सर्वपृष्ठयाऽयाजयत् तयैवास्मिन्निन्द्रियं वीर्यमदधाद्-

५ देवासुरा इति देव - असुराः । संयत्ता इति सं - यत्ताः । आसन् । तान् । देवान् । असुराः । अजयन् । ते । देवाः । पराजिग्याना इति परा - जिग्यानाः । असुराणाम् । वैश्यम् । उपेति । आयन् । तेभ्यः । इन्द्रियम् । वीर्यम् । अपेति । अक्रामत् । तत् । इन्द्रः । अचायत् । तत् । अनु । अपेति । अक्रामत् । तत् । अवरुधमित्यव - रुधम् । न । अशक्नोत् । तत् । अस्मात् । अभ्यर्ध इत्यभि - अर्धः । अचरत् । सः । प्रजापतिमिति प्रजा - पतिम् । उपेति । अधावत् । तम् । एतया ।
१० सर्वपृष्ठयेति सर्व - पृष्ठया । अयाजयत् । तया । एव । अस्मिन् । इन्द्रियम् । वीर्यम् । अदधात् ।

देवासुरा इत्यादि ॥ [v]पराजिग्यानाः पराजयं प्राप्तवन्तः । "लिटः कानच्° " (पा ३·२·१०६), "सन्लिटोर्जेः" (पा ७·३·५७) इति कुत्वम् । [v]वैश्यं विट्त्वं, विशः प्रजाः किंकरादयः । गुणवचनलक्षणः ष्यञ् (पा ५·१·१२४) । तेभ्य इति । वैश्यं प्रतिपद्यमानेभ्यः देवेभ्यस्तेषाम् [v]इन्द्रियं [v]वीर्यं च [v]अपाक्रामत् । [v]इन्द्रः [v]तत् श्रुत्वा [v]तत् [v]अनु देवसकाशात् [v]अपाक्रामत्
१५ तदवरुरुत्सया । अथ [v]तत् अवरोद्धुं [v]न [v]अशक्नोत् । "शकि णमुल्कमुलौ" (पा ३·४·१२) इति कमुल् । तदस्मादित्यादि[1] । [v]तत् तदा [v]अस्मात् इन्द्रियात् वीर्याच्च [v]अभ्यर्धः अर्धमभिगतः न सर्वं, स्ववीर्येण अर्धं लब्ध्वा [v]अचरत् इन्द्रः । अथार्धान्तरं लिप्समानः [v]प्रजापतिम् [v]उप [v]अधावत् । स चैनं सर्वपृष्ठेष्टया [v]अयाजयत् । सर्वाणि पृष्ठानि स्तोत्राणि रथन्तरबृहद्वैरूप-वैराजशाक्वररैवताख्यानि यस्यामिन्द्रविशेषणत्वेन सन्ति सा तथोक्ता । तयेत्यादि । गतम् ॥

१० [1]षष्ठेऽन्नादनकामस्य त्रिधातुर्याग ईरितः ॥

देवासुरा इति ॥ [2-]अथेन्द्रियसामर्थ्यं शरीरसामर्थ्यं च कामयमानस्येष्टिं[-2] विधातुं प्रस्तौति– **'देवासुराः संयत्ता आसन् तान् देवानसुरा अजयन् ते देवाः पराजिग्याना असुराणां वैश्यमुपाऽऽयन् तेभ्य इन्द्रियं वीर्यमपाक्रामत् तदिन्द्रोऽचायत् तदन्वपाक्रामत् तदवरुधं नाशक्नोत् तदस्मादभ्यर्धोऽचरत् स प्रजापतिमुपाधावत् तमेतया सर्वपृष्ठयाऽयाजयत् तयैवास्मिन्निन्द्रियं वीर्यमदधात्'** इति ॥ [v]पराजिग्यानाः पराजयं
१५ प्राप्नुवन्तः [v]देवाः [v]असुराणां संबन्धि [v]वैश्यं प्राप्ताः, विशो भावो वैश्यम् ; [3]असुरसेवकप्रजारूपत्वमित्यर्थः। तदानीं तेषां यदिन्द्रियसामर्थ्यं यच्छरीरसामर्थ्यं तदुभयं [v]तेभ्यः देवेभ्यः [v]अपाक्रामत् । [v]इन्द्रः [v]तत् विदित्वा

१. तं१.तं२.मै– तदस्मादिति ।

१. इ– षष्ठे त्वन्नाद्यकामस्य । २–२. इ– अथेन्द्रियकामस्येष्टिं । ३. ड.हो१– °रूपत्वात्मित्यर्थः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

य इन्द्रियकामो (१) वीर्यकामः स्यात् तमेतया सर्वपृष्ठया याजयेदेता एव देवताः स्वेन भागधेयेनोप धावति ता एवास्मिन्निन्द्रियं वीर्यं दधति यदिन्द्राय राथंतराय निर्वपति यदेवाग्नेस्तेजस्तदेवाव रुन्द्धे यदिन्द्राय बार्हताय यदेवेन्द्रस्य तेजस्तदेवाव रुन्द्धे यदिन्द्राय वैरूपाय यदेव सवितुस्तेजस्त(२)देवाव रुन्द्धे

यः । इन्द्रियकाम इतीन्द्रिय - कामः (१) । वीर्यकाम इति वीर्य - कामः । स्यात् । तम् । एतया । सर्वपृष्ठयेति सर्व - पृष्ठया । याजयेत् । एताः । एव । देवताः । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । ताः । एव । अस्मिन् । इन्द्रियम् । वीर्यम् । दधति । यत् । इन्द्राय । राथंतरायेति राथं - तराय । निर्वपतीति निः—वपति । यत् । एव । अग्नेः । तेजः । तत् । एव । अवेति । रुन्द्धे । यत् । इन्द्राय । बार्हताय । यत् । एव । इन्द्रस्य । तेजः । तत् । एव । अवेति । रुन्द्धे । यत् । इन्द्राय । वैरूपाय । यत् । एव । सवितुः । तेजः । तत् (२) । एव । अवेति । रुन्द्धे ।

एता इति ॥ राथन्तरादीन्द्रविशेषान् । यदित्यादि । रथन्तरस्य पृष्ठसाम्नः संबधी राथन्तरः । उत्सादित्वादञ् (पा ४·१·८६) । एवं [v]बार्हताय इत्यत्रापि । वैरूपादयोऽणन्ताः ॥

यदेवाग्नेरित्यादि ॥ रथन्तरस्याग्निभक्तत्वात् । यथा—" तमग्निर्देवताऽन्वसृज्यत गायत्री छन्दो रथन्तरं साम " (तैसं ७·१·१) । एवं सर्वत्र द्रष्टव्यम् ॥

---

[r]तत् सामर्थ्यद्वयम् [r]अनु [4]स्वयमपि अवरोद्धुम् [r]अपाक्रामत् । गत्वा च [r]तत् अवरोद्धुं [r]न [r]अशक्नोत् । तदानीमिन्द्रः [r]अस्मात् सामर्थ्यद्वयादभिप्राप्ताधिः सन् [r]अचरत् । तत इतरार्धप्राप्त्यर्थं [r]प्रजापतिम् उपसेव्य सर्वपृष्ठयेष्ट्या संपूर्णं प्राप्तवान् । रथन्तरबृहद्रूपवैराजशाक्ररैवतसामसाध्यानि सर्वाणि [8]पृष्ठस्तोत्राणि तैर्युक्त इन्द्रोऽत्र देवता । तस्मादियमिष्टिः सर्वपृष्ठा । नात्र स्तोत्रपाठः प्रयोक्तव्यः; किंतु स्तोत्राभिज्ञत्वं देवताया विशेषणम् ॥

य इति ॥ इदानीं विधत्ते– ' य इन्द्रियकामो वीर्यकामः स्यात् तमेतया सर्वपृष्ठया याजयेदेता एव देवताः स्वेन भागधेयेनोप धावति ता एवास्मिन्निन्द्रियं वीर्यं दधति ' इति ॥

यदिति ॥ [5]राथंतरत्वादिगुणविशिष्टाः [6]षडिन्द्रविशेषाः, एता [7]एव देवता इत्युच्यन्ते । [8]तान् देवताविशेषान् विधत्ते–' यदिन्द्राय राथन्तराय निर्वपति यदेवाग्नेस्तेजस्तदेवाव रुन्द्धे यदिन्द्राय बार्हताय यदेवेन्द्रस्य तेजस्तदेवाव रुन्द्धे यदिन्द्राय वैरूपाय यदेव सवितुस्तेजस्तदेवाव रुन्द्धे यदिन्द्राय वैराजाय यदेव धातुस्तेजस्तदेवाव रुन्द्धे यदिन्द्राय शाक्राय यदेव मरुतां तेजस्तदेवाव रुन्द्धे यदिन्द्राय रैवताय यदेव बृहस्पतेस्तेजस्तदेवाव रुन्द्ध एतावन्ति वै तेजाꣳसि तान्येवाव रुन्द्धे ' इति ॥ पृष्ठस्तोत्रनिष्पादकं रथंतरं साम वेत्तीति राथन्तरः । एवं बार्हतादिषु योज्यम् । अग्नीन्द्रादीनां [9]रथंतरादिसामाभिमानित्वात् राथन्तरत्वादिविशेषणैस्तदीयतेजःप्राप्तिर्भवति ॥

---

४. क– स्वयमवरुधं । ५. आ.ड – राथंतरादि° । ६. शृं– षडिन्द्रदेवविशेषाः । ७. शृं– ' एव ' नास्ति । ८. ड.हो१– एतान् । ९. अ.उ.पा– रथन्तरादीनामभि° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदिन्द्राय वैराजाय यदेव धातुस्तेजस्तदेवावरुन्द्धे यदिन्द्राय शाक्राय यदेव मरुतां तेजस्तदेवावरुन्द्धे यदिन्द्राय रैवताय यदेव बृहस्पतेस्तेजस्तदेवावरुन्द्ध एतावन्ति वै तेजाꣳसि तान्येवावरुन्द्ध उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय द्वादशकपालः पुरोडाशो (३) भवति वैश्वदेवत्वाय समन्तं पर्यवद्यति समन्तमेवेन्द्रियं वीर्यं यजमाने दधाति

यत्। इन्द्राय। वैराजाय। यत्। एव। धातुः। तेजः। तत्। एव। अवेति। रुन्द्धे। यत्। इन्द्राय। शाक्राय। यत्। एव। मरुताम्। तेजः। तत्। एव। अवेति। रुन्द्धे। यत्। इन्द्राय। रैवताय। यत्। एव। बृहस्पतेः। तेजः। तत्। एव। अवेति। रुन्द्धे। एतावन्ति। वै। तेजाꣳसि। तानि। एव। अवेति। रुन्द्धे। उत्तानेष्वित्युत्-तानेषु। कपालेषु। अधीति। श्रयति। अयातयामत्वायेत्ययातयाम-त्वाय। द्वादशकपाल इति द्वादश-कपालः। पुरोडाशः (३)। भवति। वैश्वदेवत्वायेति वैश्वदेव-त्वाय। समन्तमिति सम्-अन्तम्। पर्यवद्यतीति परि-अवद्यति। समन्तमिति सम्-अन्तम्। एव। इन्द्रियम्। वीर्यम्। यजमाने। दधाति।

उत्तानेष्वित्यादि ॥ व्याख्यातम्। तत्रायं *प्रयोगः— इन्द्राय राथन्तराय चतुरो मुष्टीन् व्रीहीणां निरुप्य पुनरपि [1]बार्हताद्यै एकैकस्यै देवतायै चतुरश्चतुरो मुष्टीन्निरुप्य हविष्कृता वाचं विसृज्य गार्हपत्ये द्वादशोत्तानानि कपालान्युपधायाधिश्रयतीति ॥

द्वादशकपाल इति ॥ एकः [v]पुरोडाशः [v]द्वादशकपालः कार्यः, [v]वैश्वदेवत्वाय, द्वादशकपालस्य विश्वेदेवसंबन्धित्वात्। समन्तमिति ॥ पूर्वार्धादारभ्य प्रदक्षिणमुत्तरापवर्गं परितोऽवद्यति ॥

उत्तानेष्विति ॥ पूर्वोक्तत्रिधातावि विशेषं विधत्ते— 'उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय' इति ॥

द्वादशकपाल इति ॥ अत्र निर्वापविधिभेदात् पुरोडाशषट्कप्राप्तेः [10]तदपवादायैकत्वं विधत्ते— 'द्वादशकपालः पुरोडाशो भवति वैश्वदेवत्वाय' इति ॥ अन्यत्र—"वैश्वदेवं द्वादशकपालं ग्रामकामः" (तैसं २.२.११; द्र. तैसं २.२.५) इत्यादिविधानात् कपालगतद्वादशसंख्या विश्वेषां देवानां प्रिया। अतोऽत्रापि यथोक्तगुणविशिष्टानां विश्वेषामिन्द्रादिदेवानां प्रीतिर्भवति ॥

समिति ॥ यदुक्तं सूत्रकारेण— "सर्वपृष्ठां निर्वपति। यदिन्द्राय राथन्तरायेति यथासमाम्नातं द्वादशसूक्तानेषु कपालेष्वधिश्रयति। प्रचरणकाले पूर्वार्धात् प्रथमां देवतां यजति। एवमितराः प्रदक्षिणमुत्तरापवर्गम्। समन्तं पर्यवद्यतीत्युक्तम्। अभि त्वा शूर नोनुम इति षड्ऋचो व्यत्यासमन्वाह" (आपश्रौ १९.२२.७-१२), "कदा चन [11]स्तरीरसीत्यासां चतुर्थीं[11] दधाति" (आपश्रौ १९.२३.२) इति च। तत्र 'पूर्वार्धात्' इत्यादिनोक्तं सर्वतोऽवदानं विधत्ते— 'समन्तं पर्यवद्यति समन्तमेवेन्द्रियं वीर्यं यजमाने दधाति' इति ॥

*(बौश्रौ १३.२९)। १. तं१.तं२.पं२.लं— बार्हतायै; मै४— बार्हतादिभ्यः।

१०. इ—तदीयैकत्वं; जो.ना. हा—तदेकत्वं; अ.उ.पा— तदा एकत्वं। ११-११. आ—स्तरीरसीति चतुर्थम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

व्यत्यासमन्वाहानिर्दाहायाश्वं ऋषभो वृष्णिर्वस्तः सा दक्षिणा वृषत्वायैतयैव यजेताभिशस्यमान एताश्चेद्वा अस्य देवता अन्नमदन्त्यदन्त्युवेवास्य मनुष्याः ॥ ७ ॥

[इन्द्रियकामः सवितुस्तेजस्तत्पुरोडाशोऽष्टात्रिंशच्च ।]

व्यत्यासमिति वि - अत्यासम्। अन्विति। आहु। अनिर्दाहायेत्यनिः–दाहाय। अश्वः। ऋषभः। वृष्णिः। वस्तः। सा। दक्षिणा। वृषत्वायेति वृष - त्वाय। एतया। एव। यजेत। अभिशस्यमान इत्यभि - शस्यमानः। एताः। च। इत्। वै। अस्य। देवताः। अन्नम्। अदन्ति। अदन्ति। उ। एव। अस्य। मनुष्याः ॥ ७ ॥

[मैसं २.२.१३ कासं १०.१०]

व्यत्यासमिति ॥ " त्वामिद्धि हवामहे " (तैसं २.४.१४) इति षड्चो व्यत्यस्य vअन्वाह। तद्यथा– ' इन्द्राय राथन्तरायानुब्रूहि ' इत्युक्ते " अभि त्वा शूर नोनुमः " (तैसं २.४.१४) इत्यनूच्य " त्वामिद्धि हवामहे " इति यजति। ' इन्द्राय बार्हताय ानुब्रूहि ' इत्युक्ते " त्वामिद्धि हवामहे " इत्यनूच्य " यद् द्याव इन्द्र ते " (तैसं २.४.१४) इति यजति। ' इन्द्राय वैरूपायानुब्रूहि ' इत्युक्ते " यद् द्याव इन्द्र " इत्यनूच्य " पिबा सोममिन्द्र " (तैसं २.४.१४) इति यजति। ' इन्द्राय वैराजायानुब्रूहि ' इत्युक्ते " पिबा सोममिन्द्र " इत्यनूच्य " कदा चन स्तरीरसि " (तैसं १.४.२२) इति यजति। ' इन्द्राय शाक्वरायानुब्रूहि ' (तैसं २.४.१४) इत्युक्ते " कदा चन स्तरीरसि " इत्यनूच्य " रेवतीर्नः सधमादः " (तैसं २.४.१४) इति यजति। ' इन्द्राय रैवतायानुब्रूहि ' इत्युक्ते " रेवतीर्नः सधमादः " इत्यनूच्य " अभि त्वा शूर नोनुमः " (तैसं २.४.१४) इति यजति ॥

अश्व इत्यादि ॥ अन्वाहार्यमासाद्य अश्वादीन् दक्षिणां दद्यात्। वृषत्वायेति। वृषत्वं सेक्तृत्वं वीर्यवत्त्वम्। एषां दानं vवृषत्वाय भवति यजमानस्य, सेक्तृत्वादेषाम् ॥

व्यत्यासमिति ॥ चतुर्थप्रपाठकस्यान्त्यानुवाके समाम्नास्यमानानाम्–" अभि त्वा शूर नोनुमः " (तैसं २.४.१४) इत्यादीनां पञ्चानामृचां, चतुर्थीत्वेन [12]प्रक्षेप्यमाणायाः " कदा चन स्तरीरसि " (तैसं १.४.२२) इत्यस्याश्च पूर्वोक्तत्रिधातुन्यायेनैकैकस्याः पुरोनुवाक्यात्वं याज्यात्वं च विधत्ते– ' व्यत्यासमन्वाहानिर्दाहाय ' इति ॥

अश्व इति ॥ चोदकप्राप्तामन्वाहार्यदक्षिणां बाधितुं विधत्ते– ' अश्व ऋषभो वृष्णिर्वस्तः सा दक्षिणा वृषत्वाय ' इति ॥ [13]अविजातौ पुमान् vवृष्णिः। [14]अजजातौ पुमान् vवस्तः। vवृषत्वाय पुंस्त्वाधिक्याय ॥

१२ क.श्रृं– प्रक्षिप्यमाणायाः। १३. क– अविजातः। १४. क– अजजातः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभिशस्यमान इति ॥ [3]परिवादारोपेण दूषणमभिशंसः । एताश्चेदिति । [V]एताः [V]देवताः [V]अस्य [V]अन्नम् [V]अदन्ति [V]च [V]इत्, [V]अदन्ति [V]एव [V]अस्य अन्नं [V]मनुष्याः; अभिशस्तत्वात् मुक्तो भोज्यान्नः एव भवतीति यावत् । " उकारोऽपृक्तः प्रकृत्या वकारोऽन्तरे " (तैप्रा ९.१६) इति संहितायां वकार आगमः, " °तन्वादीनां छन्दसि बहुलम् " (पा ६.४.७७ वा १) इति संहितायाम् [4]"उवङ् वा"[5] ।

इति द्वितीये तृतीये सप्तमोऽनुवाकः ।

एतयेति ॥ मिथ्यापवादपरिहारार्थं तामेवेष्टिं विधत्ते– ' एतयैव यजेताभिशस्यमान एताश्चेद्वा अस्य देवता अन्नमदन्त्यदन्त्युवेवास्य मनुष्याः ' इति ॥ [r]एताः राथन्तरेन्द्रादयो [r]देवताः [r]अस्य [r]अन्नं पुरोडाशरूपं यदि [r]अदन्ति तदानीं [r]मनुष्याः सर्वथाऽपि [r]अदन्ति [r]एव । " वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति " (तैउ १.११) इत्यादौ शिष्यानुशासने शिष्यस्य मिथ्यापवादयुक्तेषु व्यवहारसंदेहे सति शिष्टाचारेण निर्णय आम्नातः–" यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः " (तैउ १.११) इति । [15]यदा मनुष्येष्वपि शिष्टानामाचारो नियामकः तदा[16] [17]देवतानामाचारो नियामक इति किमु [18]वक्तव्यमित्यभिप्रेत्य [19-]' अदन्त्युवेव ' इत्यवधारितम्[-19] ॥

अथ मीमांसा ॥ तृतीयाध्यायस्य पञ्चमपादे चिन्तितम् –

" रथंतरादिभिर्भिन्ना इन्द्रास्तेषां न भिद्यते ।
पुरोडाशस्तत्र शेषकार्यं किं भिद्यते न वा ॥
[20]भिद्यते कर्मणां भेदाच्चोदकैः पृथगुक्ततः ।
शेषस्य सर्वतुल्यत्वात् तत्कार्यं सकृदिष्यताम् " ॥ (जैन्या ३.५.६-७) ॥

" य इन्द्रियकामो वीर्यकामः स्यात् तमेतया सर्वपृष्ठया याजयेत् " (तैसं २.३.७) इति विहितायामिष्टौ षडिन्द्रा एवं श्रूयन्ते–' इन्द्राय राथंतरायेन्द्राय बार्हतायेन्द्राय वैरूपायेन्द्राय वैराजायेन्द्राय शाक्करायेन्द्राय रैवताय ' इति । तत्र स्वरूपेणैकः [21]अपि इन्द्रः पृष्टस्तोत्रेषु षट्सु विहितानां षण्णां रथंतरादिसाम्नां संबन्धेन विशेष्यमाणः षोढा भिद्यते । तासां सर्वासामिन्द्रदेवतानामेक एव पुरोडाशो विधीयते– "द्वादशकपालः पुरोडाशो भवति वैश्वदेवत्वाय" (तैसं २.३.७) इति । तस्मिन् पुरोडाश [22]उक्तदेवताभ्यः [23]सर्वेभ्यः पृथक्प्रदानाय बहुभ्यः प्रदेशेभ्योऽवदानं श्रूयते– " समन्तं पर्यवद्यति " (तैसं२.३.७) इति । तत्र देवताभेदेन [24]प्रदानभेदेन च कर्मणां भेदे सति चोदकैः पृथगतिदेशात् स्विष्टकृदिडादि शेषकार्यं षट्कृत्वः पृथक्कर्तव्यमिति चेत् । मैवम् । शेषस्यैकत्वेन तत्प्रतिपत्तेः पृथक्त्वासंभवात् । तस्मात् [25]सकृदेव कार्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

---

३. तं१.तं२.मै– परिवदनारोपणम् । ४–४. पं२– उत्वं च; तं१.तं२–उवङ् ।

१५. क.ड– यथा । १६. क.ड–तथा । १७. इ.जो.ना– देवानामाचारः । १८. इ– वक्तव्यमित्याद्यभिप्रेत्य । १९–१९. आ– अदन्त्येवेत्यवस्थापितम् । २०. श्रृं– भिद्यते । २१. ड.हो– 'अपि' नास्ति । २२. हो१– संपृक्तदेवताभ्यः । २३. अ.उ.जो.ना.पा.हा– 'सर्वेभ्यः' नास्ति । २४. अ.उ.जो.पा.हा– प्रधान° । २५. हो१– एक एव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

रजनो वै कौणेयः क्रतुजितं जानकिं चक्षुर्वन्यमयात् तस्मा एतामिष्टिं निरवपदग्नये भ्राजस्वते पुरोडाशमष्टाकपालꣳ सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालं तयैवास्मिञ्चक्षुरदधाद्यश्चक्षुष्कामः स्यात् तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालꣳ सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालमग्नेर्वै चक्षुषा

रजनः । वै । कौणेयः । क्रतुजितमिति क्रतु - जितम् । जानकिम् । चक्षुर्वन्यमिति चक्षुः –वन्यम् । अयात् । तस्मै । एताम् । इष्टिम् । निरिति । अवपत् । अग्नये । भ्राजस्वते । पुरोडाशम् । अष्टाकपालमित्यष्टा - कपालम् । सौर्यम् । चरुम् । अग्नये । भ्राजस्वते । पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । तया । एव । अस्मिन् । चक्षुः । अदधात् । यः । चक्षुष्काम इति चक्षुः–कामः । स्यात् । तस्मै । एताम् । इष्टिम् । निरिति । वपेत् । अग्नये । भ्राजस्वते । पुरोडाशम् । अष्टाकपालमित्यष्टा - कपालम् । सौर्यम् । चरुम् । अग्नये । भ्राजस्वते । पुरोडाशम् । अष्टाकपालमित्यष्टा - कपालम् । अग्नेः । वै । चक्षुषा ।

रजनो वा इत्यादि ॥ [v]रजनः नाम कुणेरपत्यम् । "इतश्चानिञः" (पा ४·१·१२२) इति ढक् । [v]क्रतुजितं नाम जनकस्यापत्यम् [v]अयात् प्रापद्यत । कीदृशम् ? [v]चक्षुर्वन्यं चक्षुषो वनितारं संविभक्तारं चक्षुषः प्रदातारम् । छान्दसः कर्तरि [1]कृत्यः । यद्वा - कूणिताक्षः कूणिर्विपन्नाक्षः, तस्यापत्यं [v]कौणेयः । पितुरक्षिव्यापत्तिकथनं पुत्रस्य व्यापन्नाक्षित्वं द्योतयितुम् । पित्रा सरूपो हि सन् पुत्रो भवतीति । [v]जानकिम् अयात् [2]चक्षुषो लाभाय[1], चक्षुषो वननं संभजनं चक्षुर्वन्यं, तत् जानकिमयात् । याच्ञाकर्मा वा यातिः, चक्षुर्लाभं तमयाचतेति । चक्षुरेव वा वननीयं चक्षुर्वन्यं, तत् तमयाचतेति । भ्राजस्वान् दीप्तिमान् । उभयत आग्नेयावष्टाकपालौ पुरोडाशौ, मध्ये सौर्यश्चरुः ॥

अग्नेर्वै चक्षुषेति ॥ [v]अग्नेः हेतोर्यच्चक्षुः प्रवर्तते तेनेत्यर्थः । विभक्तिव्यत्यये वा अग्निना [v]चक्षुषा इति । एवं [v]सूर्यस्य इति ॥

सप्तमे सर्वपृष्ठोक्ता वीर्यकामाभिशस्त्योः ॥

रजन इति ॥ अथाष्टमे चक्षुष्कामस्य त्रिहविष्कामिष्टिं विधातुं प्रस्तौति–' रजनो वै कौणेयः क्रतुजितं जानकिं चक्षुर्वन्यमयात् तस्मा एतामिष्टिं निरवपदग्नये भ्राजस्वते पुरोडाशमष्टाकपालꣳ सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालं तयैवास्मिञ्चक्षुरदधात् ' इति ॥ रजननामकः कश्चित् पुरुषः क्रतुजिन्नामकं पुरुषम् [v]अयात् प्राप्नोत् । [v]रजनः कुणेरपत्यं, क्रतुजित् जनकस्यापत्यं, स तु चक्षुर्वन्यश्चक्षुषो दृष्टेर्वननं संभजनं तदर्हतीति चक्षुर्वन्यः, रोगोपहतां दृष्टिं समाधातुं शक्त इत्यर्थः । अतो दृष्टिपाटवाय [v]क्रतुजितं प्राप्य त्रिहविष्कयेष्ट्या तत्पाटवं प्राप्तवान् ॥

य इति ॥ विधत्ते– ' यश्चक्षुष्कामः स्यात् तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालꣳ सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालमग्नेर्वै चक्षुषा मनुष्या वि पश्यन्ति सूर्यस्य देवा

१. लं– कृत्यर्थः । २–२. तं१.तं२– चक्षुर्लाभाय ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मनुष्या वि (१) पश्यन्ति सूर्यस्य देवा अग्निं चैव सूर्यं च स्वेन भागधेयेनोप धावति तावेवास्मिञ्चक्षुर्धत्तश्चक्षुष्मानेव भवति यदाग्नेयौ भवतश्चक्षुषी एवास्मिन् तत् प्रति दधाति यत् सौर्यो नासिकां तेनाभितः सौर्यमाग्नेयौ भवतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते

५ मनुष्याः। वीति (१)। पश्यन्ति। सूर्यस्य। देवाः। अग्निम्। च। एव। सूर्यम्। च। स्वेन। भागधेयेनेति भाग - धेयेन। उपेति। धावति। तौ। एव। अस्मिन्। चक्षुः। धत्तः। चक्षुष्मान्। एव। भवति। यत्। आग्नेयौ। भवतः। चक्षुषी इति। एव। अस्मिन्। तत्। प्रतीति। दधाति। यत्। सौर्यः। नासिकाम्। तेन। अभितः। सौर्यम्। आग्नेयौ। भवतः। तस्मात्। अभितः। नासिकाम्। चक्षुषी इति। तस्मात्। नासिकया। चक्षुषी इति। विधृते इति वि - धृते।

१० यदाग्नेयाविति॥ यस्मादभितः ᵛआग्नेयौ पुरोडाशौ ᵛभवतः, तस्मादाग्नेये ᵛचक्षुषी ᵛअस्मिन् यजमाने विपन्नचक्षुषि ᵛप्रति ᵛदधाति पुनः स्थापयति। ᵛयत् ᵛसौर्यः मध्ये भवति ᵛनासिकां ᵛतेन अस्मिन् प्रतिदधात्येव; नासिकया विधृते हि चक्षुषी पश्यतः। अभितः सौर्यमिति। ᵛअभितः उभयतः आदावन्ते च सौर्यस्य। "अभितःपरितः०" (पा-भा २·३·२) इति द्वितीया। यस्मादेवं ᵛतस्मात् ᵛनासिकाम् ᵛअभितः ᵛचक्षुषी, ᵛतस्मात् एव ᵛचक्षुषी ᵛनासिकया १५ ᵛविधृते॥

अग्निं चैव सूर्यं च स्वेन भागधेयेनोप धावति तावेवास्मिञ्चक्षुर्धत्तश्चक्षुष्मानेव भवति' इति॥ ᵛआजस्वते [1]दीप्त्याधिक्ययुक्ताय। उन्मेषनिमेषसद्भावान्मनुष्यदृष्टिरनित्या। अग्निश्च कदाचिज्ज्वलति कदाचित् उपशाम्यति[2]। तस्मात् [3]अनित्यत्वसाम्यलक्षणेन मनुष्यदृष्टेरग्नेश्च संबन्धः। देवानां त्वनिमिषत्वात् सूर्यप्रकाशवन्नित्या तदीया दृष्टिरित्यस्ति तस्याः [4]सूर्यसंबन्धः॥

२० यदिति॥ आग्नेयद्वयमध्यवर्ति सौर्यं [5]-चक्षुर्द्वयमध्यवर्तिनासिकासाम्येन-[5] प्रशंसति-'यदाग्नेयौ भवतश्चक्षुषी एवास्मिन् तत् प्रति दधाति यत् सौर्यो नासिकां तेनाभितः सौर्यमाग्नेयौ भवतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते' इति॥ तेनाऽऽग्नेयद्वयेनास्मिन् यजमाने चक्षुषोः प्रतिष्ठा। [6]-तेन सौर्येण नासिकायाः [7]प्रतिष्ठा। ᵛनासिकया ᵛचक्षुषी ᵛविधृते परस्परमिश्रणाभावाय [8]विविधत्वेन स्थापिते। अत्राऽऽग्नेयस्य प्रथमस्य "उदग्ने शुचयस्तव शुक्रा" (तैसं २·४·१४) इति पुरोनुवाक्या, २५ "वि ज्योतिषा बृहता भात्यग्निः" (तैसं २·४·१४) इति याज्या॥

समानी इति॥ चरमस्य मन्त्रान्तरशङ्कां वारयितुं विधत्ते-'समानी याज्यानुवाक्ये भवतः समान[9] हि चक्षुः समृद्ध्यै' इति॥ ᵛसमानी एकविधे॥

१. अ.उ.पा-'दीप्त्या' नास्ति। २ अ.इ.उ.क.जो.ड.ना.पा.शृं.हा.हो१-°शाम्यतीति। ३. इ-अनित्यसाम्य°; अ.उ.पा-अनित्यत्वसाम्यलक्षणे। ४. आ-सौर्य°। ५-५. ड.शृं.हो१-च चक्षुर्द्वय-३० नासिकासाम्येन; इ-°मध्यगतनासिकासाम्येन। ६. ड.शृं.हो१-तत्तेन। ७. ड.हो१-प्रतिष्ठापनम्। ८. इ-विधृतत्वेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

समानी याज्यानुवाक्ये भवतः समानꣳ हि (२) चक्षुः समृद्ध्या उदु त्यं जातवेदसꣳ सप्त त्वा हरितो रथे चित्रं देवानामुदगादनीकमिति पिण्डान् प्र यच्छति चक्षुरेवास्मै प्र यच्छति यदेव तस्य तत् ॥ ८ ॥

[वि हर्यष्टाविꣳशतिश्च]

समानी इति । याज्यानुवाक्ये इति याज्या - अनुवाक्ये । भवतः । समानम् । हि (२) । चक्षुः । ५
समृद्ध्या इति सम् - ऋद्ध्यै । उदिति । उ । त्यम् । जातवेदसमिति जात - वेदसम् । सप्त ।
त्वा । हरितः । रथे । चित्रम् । देवानाम् । उदिति । अगात् । अनीकम् । इति । पिण्डान् । प्रेति ।
यच्छति । चक्षुः । एव । अस्मै । प्रेति । यच्छति । यत् । एव । तस्य । तत् ॥ ८ ॥

[मैसं २.३.६; कासं ११.१]

समानी इति ॥ ' समानं हि चक्षुः ' इति वचनात् चक्षुःस्थानीययोराग्नेययोः [v]समानी १०
[3]समान्यौ समानरूपे [v]याज्यानुवाक्ये [v]भवतः, " उदग्ने शुचयस्तव ", " वि ज्योतिषा " (तैसं २.४.१४) इति । सौर्यस्य तु—" उदु त्यं जातवेदसम् ", " चित्रं देवानाम् " (तैसं २.४.१४) इति । " केवलमामक° " (पा ४.१.३०) इति समानशब्दात् ङीष्, " वा छन्दसि " (पा ६.१.१०६) इति पूर्वसवर्णदीर्घत्वम् ॥

उदु त्यमित्यादि ॥ चतुर्धाकरणकाले सौर्यात् त्रीन् [v]पिण्डान् उद्धृत्य ' उदु त्यम् ' १५
इत्यादिभिर्मन्त्रैः यजमानाय [v]प्र [v]यच्छति । स च प्राश्नातीति गम्यते । मन्त्रत्रयस्य सौर्यत्वात् सौर्यादेव [४-४]उद्धृत्य प्रयच्छतीति[-४] । ननु चक्षुष्कामस्य किं पिण्डैरित्याह— [v]चक्षुः [v]एव [v]अस्मै सनासिकमिदानीं दीयते, न पिण्डत्रयमात्रम् । किं यत् किंचित् चक्षुर्देहाननुगुणमेव दीयते ? नेत्याह—[v]यत् [v]एव [v]तस्य चक्षुः [v]तत् एव दीयते, न यत् किंचित् ॥

इति द्वितीये तृतीयेऽष्टमोऽनुवाकः ॥ २०

**उदिति ॥ यदुक्तं सूत्रकारेण— " चतुर्धाकरणकाले सौर्यांस्त्रीन् पिण्डानुद्धृत्योदु त्यं जातवेदसꣳ, सप्त त्वा हरितो रथे, चित्रं देवानामुदगादनीकमिति पिण्डान् यजमानाय प्रयच्छति । तान् यजमानः प्राश्नाति " (आपश्रौ १९.२३.४-५) इति, तत्र त्रिभिर्मन्त्रैः पिण्डदानं विधत्ते— ' उदु त्यं जातवेदसꣳ, सप्त त्वा हरितो रथे, चित्रं देवानामुदगादनीकमिति पिण्डान् प्र यच्छति चक्षुरेवास्मै प्र यच्छति यदेव तस्य तत् ' इति ॥ ' उदु त्यम् ', ' चित्रं देवानाम् ' इत्येतदुभयं प्रथमकाण्डस्य चतुर्थप्रपाठके (तैसं १.४.४३) २५
व्याख्यातम् । ' सप्त त्वा हरितः ' इत्येषा तूपरितनस्य प्रपाठकस्यान्त्यानुवाके (तैसं २.४.१४) समाम्नास्यमानत्वात् तत्रैव व्याख्यास्यते । [v]तस्य यजमानस्य रोगोत्पतेः पुरा [v]यत् [r]एव चक्षुः पाटवोपेतमासीत् [९v]तत् पिण्डदानेन [१०]दत्तमेव भवति ॥**

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

३. लं— ' समान्यौ ' नास्ति । ४–४. तं१.तं२.मै४—°उद्भ्रियन्ते इति । ३०

९. ड.शृं.हो१— तदेव । १०. ड.शृं— दत्तवान् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमभिभूश्चेत्ता वसुविदामनमस्यामनस्य देवा ये सजाताः ❀ कुमाराः ❀ समनसस्तानहं कामये हृदा ते मां

ध्रुवः । असि । ध्रुवः । अहम् । सजातेष्विति स - जातेषु । भूयासम् । धीरः । चेत्ता । वसुविदिति वसु - वित् । ध्रुवः । असि । ध्रुवः । अहम् । सजातेष्विति स - जातेषु । भूयासम् । उग्रः । चेत्ता । वसुविदिति वसु - वित् । ध्रुवः । असि । ध्रुवः । अहम् । सजातेष्विति स जातेषु । भूयासम् । अभिभूरित्यभि - भूः । चेत्ता । वसुविदिति वसु - वित् । आमनमित्या - मनम् । असि । आमनस्येत्या-मनस्य । देवाः । ये । सजाता इति स - जाताः । कुमाराः । समनस इति स - मनसः । तान् । अहम् । कामये । हृदा ।

१० अथ सांग्रहिणीमिष्टिं विधास्यति ॥ तस्यां परिधिपरिधानमन्त्राः एते– ' ध्रुवोऽसि ' इत्याद्याः, याजमानेषु (तैसं १·६·२) व्याख्यातप्रायाः । [v]ध्रुवः नित्यः [v]असि [v]अहम् अपि [v]सजातेषु [v]ध्रुवः [v]भूयासम् । [v]धीरः धारयिता [v]चेत्ता ज्ञाता [v]वसुवित् धनानां वा लब्धा च भूयासम् ॥ अथ द्वितीयः– ' ध्रुवोऽसि ' इत्यादि ॥ गतम् । [v]उग्रः [१-]उद्गूर्णायुधः च, अथ[-१] [v]चेत्ता च [v]वसुवित् च भूयासम् ॥ अथ तृतीयः– ' ध्रुवोऽसि ' इत्यादि ॥ गतम् ॥ [v]अभिभूः १५ अभिभविता शत्रूणां [v]चेत्ता [v]वसुवित् च भूयासम् इति ।

अथ तस्यामेव पुरस्तात् स्विष्टकृत उपहोमाः– ' आमनमसि ' इत्याद्याः त्रयः[२] ॥ एताश्च तिस्रः पञ्चपदाः पङ्क्तयः । 'आमनमस्यामनस्य देवा ये सजाताः समनसः' इति प्रथमा । 'ये कुमाराः'

अष्टमे दृष्टिकामस्य त्रिहविष्केष्टिरीरिता ॥

ध्रुव इति ॥ अथ नवमे [१]सांग्रहणीष्टिं विधास्यन्नादौ चोदकप्राप्तान् " गन्धर्वोऽसि विश्वावसुः " २० **(तैसं १·१·११) इत्यादिकान् परिधिमन्त्रानपवदितुं मन्त्रान्तराणि दर्शयति– ' ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमभिभूश्चेत्ता वसुवित् ' इति ॥ हे मध्यमपरिधे, त्वं [१]स्थिरः [१]असि त्वदीयस्थापनेन [१]अहम् अपि ज्ञातिषु मध्ये स्थिरः [१]भूयासम् । किं च धैर्यवानभिज्ञो [३]धनवांश्च भूयासम् । एवं दक्षिणोत्तरपरिधिमन्त्रयोः [४]व्याख्या । ज्ञातीनां प्रतिवादित्वराहित्याय [५]आज्ञाधारित्वमुग्रत्वम् । आज्ञामुल्लङ्घ्य प्रतिवादिनः** २५ **[६]तिरस्कृतत्वं अभिभूत्वम् ॥**

१–१. मै–उद्गूर्णः । २. मै– ' त्रयः ' नास्ति ।

१. इ.ना.–शृं–सांग्रहणीं । २. इ– ध्रुवः । ३. हो१– धनलब्धा च; शृं– धनं लब्ध्वा च । ४. ड.शृं.हो१– व्याख्येयम् । ५. अ.उ. पा– अधरत्वमु° । ६. अ.आ.उ.पा– तिरस्कृत्वम्; क.जो.ड.ना. हा.हो– तिरस्कर्तृत्वम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

कामयन्ताꣳ हृदा तान् म आमनसः कृधि स्वाहाऽऽमनमस्या(१)मनस्य देवा याः स्त्रियः समनसस्ता अहं कामये हृदा ता मां कामयन्ताꣳ हृदा ता म आमनसः कृधि स्वाहा

ते । माम् । कामयन्ताम् । हृदा । तान् । मे । आमनस इत्या-मनसः । कृधि । स्वाहा । आमनमित्या-मनम् । असि (१) । आमनस्येत्या-मनस्य । देवाः । याः । स्त्रियः । समनस इति स-मनसः । ताः । अहम् । कामये । हृदा । ताः । माम् । कामयन्ताम् । हृदा । ताः । मे । आमनस इत्या-मनसः । कृधि । स्वाहा ।

इति द्वितीया । ' याः स्त्रियः ' इति तृतीया । तत्र ' आमनमसि ' इत्यादिकं सर्वं द्वितीयेऽपि मन्त्रे [३]विनियुज्यते । [४]तृतीये तु मन्त्रलिङ्गाद्भेदात् सर्वं पुनराम्नायते[५] एते । उपहोमाः सांग्रहिण्या एवाङ्गभूताः । आमनमिति च [६]आमनकरं सांग्रहिण्याख्यं कर्मोच्यते, हूयमानं वाऽऽज्यम् । अत्र सामर्थ्यात् समः समासे आकारः आगतः । संगृहीतं मनोऽस्मिन्निति [७]आमनम् । छान्दसोऽन्य-लोपः । यद्वा– आभिमुख्येन मननं करोतीत्यामनम् । पचाद्यच् (पा ३·१·१३४), छान्दसं पूर्वपद-प्रकृतिस्वरत्वम् । पचाद्यजन्तेन वा प्रादिसमासः[८] । ईदृशस्यास्य संबन्धिनो हे [९]देवाः, यूयमपीदं श्रोतुम् [१०]अर्हथ यदामनं ब्रूमहे इति । देवेभ्य आवेद्य पुनरप्यामनमाह– [११]ये [११]सजाताः मया समानजन्मानः । कुमाराणां स्त्रीणां च वक्ष्यमाणत्वात् महान्तः [१२]पुमांसः इति गम्यते । ब्राह्मणं च भविष्यति– ' एतावन्तो वै सजाता ये महान्तो ये क्षुल्लका याः स्त्रियः ' इति । तत्र गोबली-

आमनमिति ॥ परिधिमन्त्रानाम्नायोपहोममन्त्रान् पठति– ' आमनमस्यामनस्य देवा ये सजाताः कुमाराः समनसस्तानहं कामये हृदा ते मां कामयन्ताꣳ हृदा तान्म आमनसः कृधि स्वाहाऽऽमनमस्या-मनस्य देवा याः स्त्रियः समनसस्ता अहं कामये हृदा ता मां कामयन्ताꣳ हृदा ता म आमनसः कृधि स्वाहा ' इति ॥ अत्र ' सजाताः कुमाराः ' इति पदभेदमवलम्ब्याविशिष्टानुषङ्गेण मन्त्रद्वयं द्रष्टव्यम् । सजातान् [७]आकामयितुं मनुत इति [७]आमनम् । [८]हे हूयमानाज्य, त्वं [७]तादृशम् [७]असि । अतः [७]आमनस्य सजातान् [९]आकामयितुं मन्वानस्य [१०]यजमानस्य [११]ये [११]सजाताः ज्ञातिप्रभृतयः [११]समनसः [१२]समनस्का अनुकूलाः सन्ति, हे [७]देवाः, [७]तान् सजातान् [७]अहं [७]हृदा चित्तेन [७]कामये । [७]ते च [७]मां [७]हृदा [७]कामयन्ताम् । [७]तान् सजातान् [७]मे मदर्थम् [७]आमनसः [१३]मामाकामयितुं मन्वानान् कुरु । इदमाज्यं स्वाहुतम् । एवं कुमारमन्त्रस्त्रीमन्त्रौ व्याख्येयौ ॥

३. मै४– अनुषज्यते । ४–४. तं१.तं२.लं– ' तृतीये तु ... पुनराम्नायते ' नास्ति । ५. मै– आमननकारणम् । ६. मै४–' °समासः ' इत्यस्यानन्तरम् ' ईदृशं त्वमसि ' । ७. तं१.तं२-मै.लं– अर्हन्ति । ८. तं१.तं२.मै.लं– पुंसः ।

७. अ.इ.उ.जो. पा.शृं.हा– आकारयितुम् । ८. क.जो.ना.हा– हे आमन । ९. अ.उ.जो.पा शृं.हा– आकारयितुम्; इ– नो धारयितुम् । १०. ड.हो१– ' यजमानस्य ' नास्ति । ११. ड.हो१– समानमनस्काः । १२. अ.उ.– मां तारयितुं; पा – मामवतारयितुं; शृं.हो१– मामाकारयितुं; जो.हा– मत्कार्यार्थं कारयितुं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

वश्वदेवीꣳ सांग्रहणीं निर्वपेद्ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति सांग्रहणी भवति मनोग्रहणं वै संग्रहणं मन एव सजातानां (२) गृह्णाति

वैश्वदेवीमिति वैश्व - देवीम्। सांग्रहणीमिति सां - ग्रहणीम्। निरिति। वपेत्। ग्रामकाम इति ग्राम - कामः। वैश्वदेवा इति वैश्व - देवाः। वै। सजाता इति स - जाताः। विश्वान्। एव। देवान्। स्वेन। भागधेयेनेति भाग - धेयेन। उपेति। धावति। ते। एव। अस्मै। सजातानिति स - जातान्। प्रेति। यच्छन्ति। ग्रामी। एव। भवति। सांग्रहणीति सां - ग्रहणी। भवति। मनोग्रहणमिति मनः— ग्रहणम्। वै। संग्रहणमिति सं - ग्रहणम्। मनः। एव। सजातानामिति स - जातानाम् (२)। गृह्णाति।

वर्दन्यायेन [१]प्रथमेन महतां समानजातानां[१] ग्रहणम्। [v]समनसः समानमनसः संगतमनसो वा ये सजाताः महान्तो मम समनसः [v]तान् [v]अहं [v]कामये [v]हृदा हृदयेन, समनस एव सदा कामये। [v]ते अपि [v]मां तादृशमेव [v]कामयन्तां [v]हृदा हृदयेन। अवधानार्थं हृदयग्रहणम्। [१०]त्वमपि [v]तान् [v]आमनसः [११]-आगतमनसः संगृहीतमनसः-[११] [v]कृधि कुरु। शपो लुकि "श्रुशृणुपृकृवृभ्यः" (पा ६.४.१०२) इति धिभावः। स्वाहुतमिदं करोमीति॥ अथ द्वितीयः—आमनमित्यादि॥ बाल्ययौवनयोर्मध्ये वर्तमानाः [v]कुमाराः। समानमन्यत् स्वाहान्तम्॥ अथ तृतीयः—आमनमित्यादि॥ सर्वं समानम्; स्त्रीलिङ्गं तु विशेषः॥

इदानीमिष्टिं विदधाति— 'वैश्वदेवीम्' इत्यादि। मनसः संग्रहणस्य हेतुत्वेन संबन्धिनी सांग्रहणी इष्टिः। चरुरत्र श्रप्यते॥

वश्वदेवीमिति॥ इदानीमिष्टिं विधत्ते— 'वैश्वदेवीꣳ सांग्रहणीं निर्वपेद्ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति' इति॥ मनसा परस्परमैकमत्येन [१३]सम्यक् स्वीकारः संग्रहणम्। तद्यस्यामिष्टावस्ति सा सांग्रहणी॥

सांग्रहणीति॥ तदेतदभिप्रेत्येष्टिविशेषणं प्रशंसति— 'सांग्रहणी भवति मनोग्रहणं वै संग्रहणं मन एव सजातानां गृह्णाति' इति॥ ज्ञातिमनसः स्वाधीनत्वेन ग्रहणं [१४v]मनोग्रहणं, तदेव सम्यग्ग्रहणमित्युच्यते। ततः सांग्रहण्येष्ट्या [v]सजातातां [v]मनः स्वाधीनं करोति॥

९-९. तं१.तं२.मै.लं- प्रथमे महताम्। १०. लं- 'त्वमपि' इत्यस्यानन्तरं 'मे'। ११-११. लं- गृहीतमनसः।

---

१३. ड.शृं-'सम्यक्' नास्ति। १४. ड.हो१- 'मनोग्रहणम्' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमिति परिधीन् परि दधात्याशिषमेवैतामा शास्तेऽथो एतदेव सर्वꣳ सजातेष्वधि भवति यस्यैवं विदुष एते परिधयः परिधीयन्त

ध्रुवः। असि। ध्रुवः। अहम्। सजातेष्विति स-जातेषु। भूयासम्। इति। परिधीनिति परि-धीन्। परीति। दधाति। आशिषमित्या-शिषम्। एव। एताम्। एति। शास्ते। अथो इति। एतत्। एव। सर्वम्। सजातेष्विति स-जातेषु। अधीति। भवति। यस्य। एवम्। विदुषः। एते। परिधय इति परि-धयः। परिधीयन्त इति परि-धीयन्ते। ५

'ध्रुवोऽसि' इत्यादिना आम्नातानां मन्त्राणां विनियोगं दर्शयति। 'आशिषम्' इति 'ध्रुवो भूयासम्' इत्यादिकाम्। [V]अथो अपि च [V]सजातेषु मध्ये [V]एतत् [V]सर्वं [V]भवति यत् ध्रुवत्वं धीरत्वं वसुवित्त्वमित्यादि। एतत् सर्वं यथा श्रूयते तथा भवति। [12]यद्वा– एतत् सर्वं प्राप्नोति। भू प्राप्तौ। न ग्रामप्राप्तिमात्रमेवेति[13] भावः। [V]यस्य [V]एवं [V]विदुषः एतैर्मन्त्रैः [V]एते परिधयः [V]परिधीयन्ते॥ १०

ध्रुव इति। आदावाम्नातान् मन्त्रान् विनियुङ्क्ते–'ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमिति परिधीन् परि दधात्याशिषमेवैतामा शास्तेऽथो एतदेव सर्वꣳ सजातेष्वधि भवति यस्यैवं विदुष एते परिधयः परिधीयन्ते' इति॥ त्रिष्वपि मन्त्रेषु 'भूयासम्' इत्यभिधानादाशासनं गम्यते। किं च [r]एवं [r]विदुषः [15]एतैर्मन्त्रैः परिधाने सति [r]सजातेषु मध्ये मन्त्रैः प्रार्थितं सर्वमधिकं संपद्यते॥

आमनमिति॥ मन्त्रान्तराणि विनियुङ्क्ते– आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहो- १५
त्येतावन्तो वै सजाता ये महान्तो ये क्षुल्लका याः स्त्रियस्तानेवाव रुन्द्धे त एनमवरुद्धा उप तिष्ठन्ते' इति॥ अत्र 'सजाताः' [16]इत्यादिके मन्त्रभागे 'समनसः' [17]इत्याद्युत्तरभागोऽनुषञ्जनीयः। 'कुमाराः' इत्यादिके मन्त्रभागे 'आमनमसि' [18]इत्यादिमन्त्रपूर्वभागोऽनुषञ्जनीयः। तथा सति [19]त्रिभिर्मन्त्रैराहुतित्रयं संपद्यते। स्वकुले [20]-[20]स्वजातिषु मध्ये[20]-[20] स्वग्रामे [21]च [r]ये [r]महान्तः पुरुषाः प्रौढाः [r]ये च [r]क्षुल्लकाः बालाः [r]याः च पत्नीभगिनीमात्रादयः [r]स्त्रियः [r]एतावन्तः एवापेक्षिताः [r]सजाताः [r]तान् अनयेष्टया स्वाधीनान् करोति। २०
[r]ते च जनाः स्वाधीना [22]-एव सन्तः[22]- [r]एनं सेवन्ते॥

१२. तं२.मै.लं– 'यद्वा' नास्ति। १३. मै४– °प्राप्तिमेवेति।

१५. ड.शृं.हो१– तैर्मन्त्रैः।
१६. आ.क.ड.शृं.हो१– इत्यन्ते।
१७. अ.आ.उ.क.जो.ना.पा.हा– इत्याद्युक्तभागो°। २५
१८. अ.उ.पा–°मन्त्रभागो°; इ.ड.शृं.हो१– इत्यादिपूर्वभागो°।
१९. इ– एभिर्मन्त्रै°; अ.उ.पा– प्रतिमन्त्रैः।
२०–२०. ड.शृं.हो१–'स्वजातिषु मध्ये' नास्ति।
२१. ड– वा।
२२–२२. शृं.हो१. ड– 'एव सन्तः' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोत्येतावन्तो वै सजाता ये महान्तो ये क्षुल्लका याः स्त्रियस्तानेवाव रुन्द्धे (३) त एनमवरुद्धा उप तिष्ठन्ते ॥ ९ ॥

[स्वाहाऽऽमनमसि सजातानाꣳ रुन्द्धे पञ्च च ।]

आमनमित्या-मनम् । असि । आमनस्येत्या - मनस्य । देवाः । इति । तिस्रः । आहुतीरित्या - हुतीः । जुहोति । एतावन्तः । वै । सजाता इति स - जाताः । ये । महान्तः । ये । क्षुल्लकाः । याः । स्त्रियः । तान् । एव । अवेति । रुन्द्धे (३) । ते । एनम् । अवरुद्धा इत्यव-रुद्धाः । उपेति । तिष्ठन्ते ॥९॥

[मैसं २.३.२; कासं १२.२]

'आमनम्' इत्यादि स्विष्टकृतः पुरस्तात् [v]तिस्रः स्रुवाहुतीरुपजुहोति । [v]क्षुल्लकाः क्षुद्राः कुमाराः । [१४]क्षुधं लान्तीति *क्षुल्लकाः । कान्तात् कुत्सायां [१५]प्राग्वीयः कः* ॥

तृतीये नवमोऽनुवाकः ॥

अत्र विनियोगसंग्रहः—

"सांग्रहण्यां तु परिधीन् परिधत्ते ध्रुवस्त्रयात् ।
[२३]आमनेति त्रिभिस्तत्र उपहोमास्त्रयो मताः ॥
मन्त्रभेदः सजातेति कुमारेति पदद्वयात् ॥ १ ॥

अत्र मीमांसा ॥ दशमाध्यायस्य चतुर्थपादे चिन्तितम्—

"आमनाहुतिभिर्बाध्या अनूयाजा न वाऽग्रिमः ।
[२४]त्रित्वलिङ्गाद्विशिष्टोक्तेर्भेदो मध्योक्ततोऽन्तिमः" ॥ (जैन्या १०.४.१०) इति ॥

सांग्रहणीष्टौ श्रूयते- 'आमनमस्यामनस्य देवा ये सजाताः इति तिस्र आहुतीर्जुहोति" इति। एताभिस्तिसृभिराहुतिभिः प्राकृतास्त्रयोऽनूयाजाः बाध्याः । कुतः ? त्रित्वलिङ्गात् । पूर्वाधिकरणे (१०.४.८-९) सप्तदशसंख्याविशिष्टप्राकृतपश्वभावेन मा भूद्बाध्यत्वम् । इह तु त्रित्वविशिष्टत्वादनूयाजा बाध्यन्ताम् । यद्वा- तदनुवादेन मन्त्रगुणविधानात् प्राकृतमन्त्रबाध इति पूर्वः पक्षः । किं त्रित्वमात्रमनूद्य मन्त्रसहिता आहुतयो विधीयन्ते, आहोस्वित् त्रित्वविशिष्टा आहुतीरनूद्य मन्त्रविधिः । आद्ये [२५]त्रित्वमग्न्यादिष्वपि सत्त्वेन नानूयाज-लिङ्गम् । द्वितीये विशेषणविशेष्ययोरुद्देश्ययोर्भेदेन वाक्यं भिद्येत । तस्मात् कर्मान्तरविधानान्न बाधः, किं तु समुच्चयः । तत्र मध्योक्तिर्लिङ्गम् । तथा चाऽम्नायते- "यत् प्रयाजानूयाजानां पुरस्ताद्वोपरिष्टाद्वा जुहुयाद्- बहिरात्मन् सजातानादधीताथ यन्मध्यतो जुहोति मध्यत एव सजातानात्मन् धत्ते" (मैसं २.३.२) इति । तस्मादामनहोमानामनूयाजैः सह समुच्चयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

---

१४. तं१.तं२.मै.लं-क्षुधा। १५. मै-प्रतिषेधः [...यां प्राग्वीयः]; तं१.तं२.लं-प्रतिषेधकः। *-*[काशिका- 'क्षुधं लातीति क्षुल्लः । तस्मादज्ञातादिषु प्राग्वात्के अन्तोदात्तः क्षुल्लकशब्दः (पा ६.२.३९)]।

---

२३. हो१ आमनं तु। २४. हो१-त्रित्वं च लिङ्गवैशिष्टे भेदोः; श्रृं-त्रित्वान्न लिङ्गं वैशिष्टे भेदो। २५. क- त्रित्वस्य गार्हपत्यादिषु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

यन्नवमैत् तन्नवनीतमभवद्यदसर्पत् तत् सर्पिरभवद्यदध्रियत तद्घृतमभवदश्विनोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि

यत्। नवम्। ऐत्। तत्। नवनीतमिति नव - नीतम्। अभवत्। यत्। असर्पत्। तत्। सर्पिः। अभवत्। यत्। अध्रियत। तत्। घृतम्। अभवत्। अश्विनोः। प्राण इति प्र - अनः। असि। तस्य। ते। दत्ताम्। ययोः। प्राण इति प्र - अनः। असि। ५

अथ " अग्निं वा एतस्य " (तैसं २.३.११) इत्यादिपञ्चहविरिष्टिर्वक्ष्यते। तस्यामाज्यावेक्षण अनुवर्तयति— ' यन्नवमैत् ' इत्यादि ॥ [v]यत् यस्मात् [v]नवम् [v]ऐत् नवमेव [1]उपलब्धि गच्छति उद्भृतमभवत् तस्मात् [v]नवनीतम् [v]अभवत्। नवनीतं गतम्[2]। दासीभारादिर्द्रष्टव्यः (पा ६.२.४२)। यद्वा नवं नीतमस्येति बहुव्रीहिः। यस्मात् [v]असर्पत् विसृतमभवत् तस्मात् सर्पणात् विसर्पणात् [v]सर्पिः [v]अभवत्। यस्मादुपरि तत् [v]अध्रियत तस्मादपि सृप्तं संहतमभवत्, १० तस्मात् [v]घृतम् [v]अभवत्। धृङ् अवस्थाने। छान्दसो वर्णविपर्यासः। तादृशं च त्वमसि। तव खल्वेता अवस्थाः परोक्षवन्निर्दिश्यन्ते ॥

अथोपहोमाः— ' अश्विनोः ' इत्यादयश्चत्वारः ॥ [v]अश्विनोः [v]प्राणः त्वम् [v]असि, हे यजमान, [3]त्वदधीनजीवितत्वात्। प्राणितीति प्राणः, पचाद्यच् (पा ३.१.१३४)। प्राणवायुर्वा।

इष्टिः सांग्रहणी प्रोक्ता नवमे ग्रामकामिणः ॥ १५

अथ व्यवहितेनैकादशानुवाकेनाऽऽयुष्कामेष्टिं विधित्सुर्दशमे तन्मन्त्रान् पठति।

यदिति ॥ कल्पः— " यन्नवमैत् तन्नवनीतमभवदित्याज्यमवेक्ष्य " (आपश्रौ १९.२३.१३) इति। अनेन प्राकृतः "आज्यमसि (तैसं १.६.१) इत्यवेक्षणमन्त्रो बाधितः। पाठस्तु—" यन्नवमैत् तन्नवनीतमभवद्यदसर्पत् तत् सर्पिरभवद्यदध्रियत तद्घृतमभवत् ' इति ॥ [v]यत् यस्मात् कारणाद्दध्न उद्ध्रियमाणं [1]सत् [v]नवम् [v]ऐत् नवं[1] नूतनं [2]रूपमभवत् तस्मात् [3]नवं च तन्नीतं चेत्युद्भृतस्य[3] सारपिण्डस्य नवनीतनाम १० संपन्नम्। [v]यत् यस्मात् कारणादग्निसंपर्के सति पिण्डो विलीयमानः [v]असर्पत् [4]प्रसृतोऽभूत् तस्मात् [v]सर्पिः इति नाम। यस्मात् प्रसृतस्य शीतलपात्रस्थापनेन तत्पुनः [v]अध्रियत [4][v]तत् घनीभूतमभवत् तस्मात् [v]घृतम् इति नाम। घृ क्षरणदीप्त्योरिति धातोर्नैतद्रूपं, किं तु [6]धृतमित्यस्य धकारस्य घकारादेशः ॥

अश्विनोरिति ॥ कल्पः - " उपहोमकालेऽश्विनोः प्राणोऽसीत्येतैः प्रतिमन्त्रं चतुर उपहोमान् जुहोति " (आपश्रौ १९.२४.१) इति। पाठस्तु - ' अश्विनोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि २५

१. मै— लब्धिम्। २—२. तं१.तं२.मै—' गतम् ' इत्यस्यानन्तरं ' उद्भृतमिति। नवनीतम् '। ३. तं१.तं२.मै.लं— °जीवनत्वात्।

१ उ.पा.शृं— सन्नवं। २. शृं — घृतमभवत्। ३—३. अ — नवनीतं तेन चोद्भृतस्य क.जो.ना.हा— नवं च तन्नीतं च नवनीतं तेन चोद्भृतस्य; ड.हो१—नवनीतं चेधृतस्यास्य। ४. क— °तोभवत्। ५. ड.शृं— ' तत् ' नास्ति। ६. आ— घृतमित्यत्र। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वाहेन्द्रस्य प्राणोऽसि तस्य ते ददातु यस्य प्राणोऽसि स्वाहा मित्रावरुणयोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि स्वाहा विश्वेषां देवानां प्राणोऽसि (१) तस्य ते ददतु येषां प्राणोऽसि स्वाहा

घृतस्य धारामृतस्य पन्थामिन्द्रेण दत्तां प्रयतां मरुद्भिः ।
तत् त्वा विष्णुः पर्यपश्यत् तत् त्वेडा गव्यैरयत् ॥ ५

स्वाहा । इन्द्रस्य । प्राण इति प्र - अनः । असि । तस्य । ते । ददातु । यस्य । प्राण इति प्र - अनः । असि । स्वाहा । मित्रावरुणयोरिति मित्रा - वरुणयोः । प्राण इति प्र - अनः । असि । तस्य । ते । दत्ताम् । ययोः । प्राण इति प्र - अनः । असि । स्वाहा । विश्वेषाम् । देवानाम् । प्राण इति प्र - अनः । असि (१) । तस्य । ते । ददतु । येषाम् । प्राण इति प्र-अनः । असि । स्वाहा । घृतस्य । धाराम् । अमृतस्य । पन्थाम् । इन्द्रेण । दत्ताम् । प्रयतामिति प्र - यताम् । मरुद्भिरिति मरुत् - भिः । तत् । त्वा । विष्णुः । परीति । अपश्यत् । तत् । त्वा । इडा । गवि । ऐरयत् ।

उपचारो वा, अश्विनोः प्राणस्थानीयस्त्वमसि यागद्वारेणोपकारकत्वात् । [v]तस्य तादृशस्य [v]ते तव [v]दत्ताम् अश्विनौ । [४]कम्? प्राणं, सामर्थ्यात् आयुष्कामेष्टित्वात् । कौ? अश्विनौ [v]ययोः [v]प्राणः त्वम् [v]असि, अत आत्मार्थमेव तव प्राणं दत्ताम् इति ॥ इन्द्रस्येत्यादि ॥ समानम् ॥

पुनराज्यमवेक्षयति – ' घृतस्य धाराम् ' इति ॥ त्रिष्टुबियं बृहती वा । हे आज्य, [v]घृतस्य [५]क्षरितस्य विलीनस्य तव [v]धाराम् । यद्वा– उदकधारां वृष्टिहेतुम् । [v]अमृतस्य अमृतत्वस्य [v]पन्थां यागद्वारेण प्राप्तिहेतुम् [v]इन्द्रेण ईश्वरेण [v]दत्ताम् उत्पादिताम् । यद्वा– इन्द्रेण यजमानेन देवेभ्यः दत्ताम् । [v]प्रयताम् प्रकर्षेणोत्पादितां शोधितां वा [v]मरुद्भिः । [v]तत् तादृक्स्वभावं त्वां [v]विष्णुः

स्वाहेन्द्रस्य प्राणोऽसि तस्य ते ददातु यस्य प्राणोऽसि स्वाहा मित्रावरुणयोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि स्वाहा विश्वेषां देवानां प्राणोऽसि तस्य ते ददतु येषां प्राणोऽसि स्वाहा ' इति ॥ हे यजमान, त्वम् [v]अश्विनोः [v]प्राणः [v]असि प्राणवत् प्रियोऽसि, तस्मात् [v]ययोः [v]प्राणः [v]असि तावश्विनौ [v]तस्य [v]ते प्रियस्य तवाऽऽयुर्हेतुभूतं प्राणं [v]दत्ताम् । प्राणमित्येतत् सामर्थ्यात् [७]लभ्यते । तयोरश्विनोरिदमाज्यं [v]स्वाहा हुतमस्तु । एवमुत्तरेषु योज्यम् ॥

घृतस्येति ॥ कल्पः– " यत्खादिर आज्यं तदग्नेणाऽऽहवनीयं पर्याहृत्य[८] दक्षिणस्यां [९]-वेदिश्रोण्यां सादयति[९] । तद्यजमानोऽवेक्षते घृतस्य धारामृतस्य पन्थामिति " (आपश्रौ १९.२४.३-४) इति ॥ पाठस्तु – ' घृतस्य धारामृतस्य पन्थामिन्द्रेण दत्तां प्रयतां मरुद्भिः । तत् त्वा विष्णुः पर्यपश्यत् तत् त्वेडा

---

४. तं१.तं२.लं– किम् । ५. मै४– क्षारितस्य ।

---

७. अ.इ– आनीयते । ८. आ– पर्याहृत्य तेन । ९. अ.आ.इ.क– वेदिश्रोण्यामासादयति; हा–वेदिश्रोण्या सादयति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

पावमानेन त्वा स्तोमेन गायत्रस्य वर्तन्योपाꣳशोर्वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्यायै बृहद्रथन्तरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सवितोत् (२) सृजतु जीवातवे जीवनस्यायै

पावमानेन । त्वा । स्तोमेन । गायत्रस्य । वर्तन्या । उपाꣳशोरित्युप - अꣳशोः । वीर्येण । देवः । त्वा । सविता । उदिति । सृजतु । जीवातवे । जीवनस्यायै । बृहद्रथन्तरयोरिति बृहत् - रथन्तरयोः । त्वा । स्तोमेन । त्रिष्टुभः । वर्तन्या । शुक्रस्य । वीर्येण । देवः । त्वा । सविता । उदिति (२) । सृजतु । जीवातवे । जीवनस्यायै ।

व्यापकः यजमानो वा [६-v]परि [v]अपश्यत् । [v]तत् तादृशं [६] त्वाम् [v]इडा पृथिवी [v]गवि [v]ऐरयत् [७]यागादिक्रमेण ऐरयत् उदपादयत् ॥

ऋत्विजः पर्याहुः-- ' पावमानेन ' इत्यादि ॥ हे यजमान, त्वां [v]पावमानेन, पवमाना बहिष्पवमानादयः, तेषां संबन्धिना [v]स्तोमेन स्तवनेन, [v]गायत्रस्य छन्दसः [v]वर्तन्या मार्गेण सोमानयनमार्गेण, [v]उपांशोः ग्रहस्य [v]वीर्येण [८]त्वामुत्सृजत्विति, [v]देवः [v]सविता त्वाम् [v]उत् [v]सृजतु आमयान्निर्गमयतु । प्रत्येकान्वयाय ' त्वा ' इत्यस्यानुवृत्तिः । पावमानेन स्तोमेन त्वामुत्सृजतु, गायत्रस्य वर्तन्या त्वामुत्सृजतु, उपांशोर्वीर्येण त्वामुत्सृजत्विति । [v]जीवातवे जीवनहेतवे औषधादयः, [v]जीवनस्यायै जीवनप्रदायै । जीवनशब्दात् क्यच्, छन्दस्यसुगागमः (पा ७·१·५०), " अ प्रत्ययात् " (पा ३.३·१०२) [९]इत्यकारप्रत्ययः ॥ बृहद्रथन्तरयोस्त्वेत्यादि ॥ समानम् ॥

गव्यैरयत् ' इति ॥ [v]घृतस्य [v]धाराम् । ' [१०-]अवेक्षेत ' इत्यध्याहारः[-१०] । कीदृशीं धाराम् ? [v]अमृतस्य [v]पन्थां कर्मफलस्य साधनत्वेन मार्गभूताम्, [v]इन्द्रेण वृष्टितृणोत्पत्त्यादिपरम्परया [v]दत्तां संपादितां, [v]मरुद्भिः [११]वैश्याधिपैः [v]प्रयतां [१२-]विक्रयाय भाण्डेषु प्रयत्नेन संचिताम्[-१२] । हे घृत, [v]तत् [v]त्वा [१३]तथाविधं त्वां विष्णुसदृशो यजमानः [v]पर्यपश्यत् परिपश्यति । [v]इडा पश्वभिमानिनी देवता तादृशं त्वां [v]गवि [v]ऐरयत् प्रेरयति गोषु स्थापयति ॥

पावमानेनेति ॥ कल्पः– "अथास्य ब्रह्मा दक्षिणं हस्तं गृह्णाति । ब्रह्मण [१४-]इतर ऋत्विजो[-१४] हस्तमन्वारभ्य यजमानं पर्याहुः पावमानेन त्वा स्तोमेनेति" (आपश्रौ १९·२४·५-६) इति । पाठस्तु–'पावमानेन त्वा स्तोमेन गायत्रस्य वर्तन्योपाꣳशोर्वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्यायै बृहद्रथंतरयोस्त्वा

६–६.मै४– परिपश्यति तादृशम् । ७. तं१.तं२.मै.लं – उदयादि° । ८. मै४– प्राधान्यात् तस्य वीर्यवत्त्वात् । ९. तं१.तं२– इत्याकार° ।

१०–१०. जो.ना.हा–अवेक्षेत इति शेषः; ड–अवेक्ष्य इत्यध्याहारः । ११. हो१– ऐश्वर्याधिपैः । १२–१२. आ.क.जो.ना.हा– क्रयणभाण्डेषु प्रयत्नेन धृताम्; अ– क्रियाभाण्डेषु प्रयत्नेन सेवितां । १३. ड.हो१–तादृग्विधम् । १४–१४. अ.इ– ऋत्विजः; उ.पा– इतरमहर्विजः; जो.ना.हा–इतरं महर्त्विजः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

अग्नेस्त्वा मात्रया जगत्यै वर्तन्याऽऽग्रयणस्य वीर्येण
देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्यायै
इममग्न आयुषे वर्चसे कृधि प्रियꣳ रेतो वरुण सोम राजन्।
मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथाऽसत् ॥

५ अग्नेः। त्वा। मात्रया। जगत्यै। वर्तन्या। आग्रयणस्य। वीर्येण।
देवः। त्वा। सविता। उदिति। सृजतु। जीवातवे। जीवनस्यायै।
इमम्। अग्ने। आयुषे। वर्चसे। कृधि। प्रियम्। रेतः। वरुण। सोम। राजन्।
माता। इव। अस्मै। अदिते। शर्म। यच्छ।
विश्वे। देवाः। जरदष्टिरिति जरत्-अष्टिः। यथा। असत्।

१० अग्नेस्त्वेत्यादि ॥ अग्निर्मीयते यया सा [V]अग्नेः मात्रा अग्नेरात्मा अग्नेरात्मस्थानीयम् अग्निष्टोमसाम यज्ञायज्ञियम्। समानमन्यत्। [V]जगत्यै इति षष्ठ्यर्थे चतुर्थी ॥

हिरण्याद्घृतं निष्पिबन्तमनुमन्त्रयते–' इममग्ने ' इति। त्रिष्टुबेषा। हे [V]अग्ने, [V]इमं घृतम्। उभयलिङ्गो घृतशब्दः। [V]आयुषे [V]वर्चसे [१८]-बलाय चास्य-[१९] [V]कृधि कुरु। पूर्ववत् शपो लुक्

१५ स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्याया अग्नेस्त्वा मात्रया जगत्यै वर्तन्याऽऽग्रयणस्य वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्यायै' इति ॥ हे यजमान, त्वां [V]सविता [V]देवः [V]उत्सृजतु दीर्घरोगात् मोचयतु। केन साधनेन? बहिष्पवमानादीनां संबन्धिना त्रिवृदादिस्तोमसाध्येन स्तोत्रेण, [V]गायत्रस्य [V]वर्तन्या गायत्रच्छन्दसो यो मार्गस्तेन सोमाहरणरूपेण यज्ञाङ्गसंपादनेन, [V]उपांशोः [V]वीर्येण उपांशुग्रहहोमसाध्यसामर्थ्येन। अत्र प्रतिसाधनं वाक्यभेदेनान्वेतुं त्वेतिशब्दस्य पुनरुक्तिः। किमर्थम्
१० उत्सृजत्विति तदुच्यते। [V]जीवातवे जीवनहेत्वौषधादिसंपादनाय। तदपि किमर्थमिति तदुच्यते। [V]जीवनस्यायै चिरं जीवितुमिच्छा जीवनस्या तदर्थम्। एवं द्वितीयतृतीयमन्त्रौ योजनीयौ। [V]अग्नेः [V]मात्रया [१५]-मीयतेऽग्निर्यथा गीत्या सा गीतिर्मात्रा [१५]-यज्ञायज्ञियस्य गानमित्यर्थः-[१६] ॥

इममिति ॥ कल्पः– "अथ यजमानो हिरण्याद्घृतं निष्पिबति। इममग्न आयुषे वर्चसे कृधीति प्राञ्चन्तमभिमन्त्रयते" (आपश्रौसू १९.२४.७-८) इति॥ पाठस्तु–'इममग्न आयुषे वर्चसे कृधि प्रियꣳ रेतो वरुण
१५ सोम राजन्। मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथाऽसत्' इति॥ हे [V]अग्ने, [V]इमं यजमानं दीर्घायुषे बलाय च [V]कृधि समर्थं कुरु। हे [V]वरुण, हे [V]सोम [V]राजन्, [१७]अस्य यजमानस्य [V]प्रियं [V] रेतः पुत्रोत्पादकं

१०–१०. मै४– बलमायुश्च।

१५. ड.शृं.हो१– प्रमीयते°। १६–१६. ड.हो१– यज्ञियसामर्थ्यमिति; शृं– °यज्ञियसामगानमित्यर्थः। १७. ड.हो१– तस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

अग्निरायुष्मान्त्स वनस्पतिभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि ❀ सोम आयुष्मा(३)न्त्स ओषधीभिर्यज्ञ ❀ आयुष्मान्त्स दक्षिणाभिर्ब्रह्माऽऽयुष्मत् ❀ तद्ब्राह्मणैरायुष्मद्देवा ❀ आयुष्मन्तस्तेऽमृतेन

अग्निः । आयुष्मान् । सः । वनस्पतिभिरिति वनस्पति - भिः । आयुष्मान् । तेन । त्वा । आयुषा । आयुष्मन्तम् । करोमि । सोमः । आयुष्मान् (३) । सः । ओषधीभिरित्योषधि - भिः । यज्ञः । ५
आयुष्मान् । सः । दक्षिणाभिः । ब्रह्म । आयुष्मत् । तत् । ब्राह्मणैः । आयुष्मत् । देवाः ।
आयुष्मन्तः । ते । अमृतेन ।

(पा २·४·७३), धिभावश्च (पा ६·४·१०२)। [v]प्रियं [v]रेतः, सर्वस्य प्रकृतिभूतत्वात् प्रियत्वं रेतस्त्वं च। हे [v]वरुण हे सोमलताभिमानिन् हे [v]राजन् चन्द्र। यद्वा– वल्लीनिवृत्त्यर्थं राजशब्देन सोमो विशेष्यते। यूयमप्यस्यायुषे कुरुत। किं च– हे [v]अदिते, त्वमपि [v]अस्मै यजमानाय [v]माता [v]इव १०
[v]शर्म सुखं [v]यच्छ देहि। हे [v]विश्वे [v]देवाः, यूयमपि इदं कर्तुमर्हथ। किम्? [v]यथा अयं यजमानः [v]जरदष्टिः जीर्णत्वेन अष्टिर्व्याप्तिर्यस्य। जरामश्नुते इति वा जरदष्टिः। छान्दसी रूपसिद्धिः। [11-v]असत् भवेत्[-11] दीर्घायुः यथा स्यात् तथा कुरुत। यद्वा–अस्य यजमानस्य [12]यथा जरदष्टिः जराव्याप्तिः [11-]असत् भवेत्[-11] तथा कुरुत दीर्घायुषं कुरुत। जीर्यतेरतृन्प्रत्ययः (पा ३·२·१०४) भावे द्रष्टव्यः। अस्तेः [13]लेटि अडागमः (पा ३·४·९४) ॥ १५

ब्रह्मा यजमानस्य हस्तं गृह्णाति– ' अग्निरायुष्मान् ' इति ॥ [v]अग्निः [v]आयुष्मान् दीर्घायुः। [v]सः [v]वनस्पतिभिः [v]आयुष्मान् तैर्हेतुभिः तैर्वा सह। [v]तेन [v]आयुषा उभयेनायुषा त्वाम् [v]आयुष्मन्तं

संपादय। हे [v]अदिते पृथिवि, मातृवत् [v]अस्मै सुखं प्रयच्छ। हे [v]विश्वे देवाः, अयं यजमानो [v]यथा [v]जरदष्टिः [v]असत् तथा कुर्वन्तु। जराया अष्टिर्व्याप्तिर्यस्यासौ जरदष्टिः। बाल्ये यौवने च मरणरहितो जरामायुःसंपूर्तिपर्यन्तां यथा व्याप्नोति तथा कुर्वन्त्वित्यर्थः ॥ २०

अग्निरिति ॥ कल्पः– " अग्निरायुष्मानित्यनुवाकशेषेणास्याध्वर्युर्दक्षिणं हस्तं गृह्णाति " (आपश्रौ १९·२४·११) इति ॥ पाठस्तु–' अग्निरायुष्मान्त्स वनस्पतिभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि सोम आयुष्मान्त्स ओषधीभिर्यज्ञ आयुष्मान्त्स दक्षिणाभिर्ब्रह्माऽऽयुष्मत् तद्ब्राह्मणैरायुष्मद्देवा आयुष्मन्तस्तेऽमृतेन पितर आयुष्मन्तस्ते स्वधयाऽऽयुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि ' इति ॥ [v]अग्निः [v]आयुष्मान्

११–११. तं१.तं२– असद्भावे। १२. तं१.तं२.मै.लं– ' यथा ' नास्ति। १३. मै४– लेट् वा। २५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

***पितर आयुष्मन्तस्ते स्वधयाऽऽयुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि ॥१०॥**

[विश्वेषां देवानां प्राणोऽसि त्रिष्टुभौ वर्तन्या शुक्रस्य वीर्येण
देवस्त्वा सवितोत्सोम आयुष्मान् पञ्चविंशतिश्च ।]

पितरः । आयुष्मन्तः । ते । स्वधयेति स्व - धया । आयुष्मन्तः । तेन । त्वा । आयुषा ।
५ आयुष्मन्तम् । करोमि ॥ १० ॥

[मैसं २.३.४ कासं ११.७]

[V]करोमि दीर्घायुषं करोमि, हे यजमान । सोमादिषु ' आयुष्मान् तेन ' इत्याद्यनुषज्यते । [V]सोमः [V]ओषधीभिः, [V]यज्ञः [V]दक्षिणाभिः, [V]ब्रह्म [V]ब्राह्मणैः, [V]देवाः [V]अमृतेन, [V]पितरः [V]स्वधया ॥

इति द्वितीये तृतीये दशमोऽनुवाकः ॥

---

१० भवति । तत्कथमिति तदुच्यते, [r]सः अग्निः [r]वनस्पतिभिः [r]आयुष्मान् काष्ठेषु प्रक्षिप्यमाणेषु [१८]ज्वालापरम्परया वर्धते न तृपशाम्यति । [r]तेन अग्नेः [v]आयुषा अभिवर्धमानेन त्वाम् [v]आयुष्मन्तं [r]करोमि । एवमुत्तरत्र योज्यम् । [r]सोमः सोमरस ओषधीष्वभिपूयमाणासु वर्धते । [r]यज्ञः [v]दक्षिणाभिः वशीकृतेष्वृत्विक्षु वर्धते । वेदश्च ब्राह्मणेष्वध्यापकेषु अविच्छेदेन वर्धते । [r]देवाः च हवीरूपेण [r]अमृतेन जीवन्ति । [r]पितरः च स्वधाकारपूर्वकेण पिण्डादिना जीवन्ति । प्रतिवाक्यमनुषङ्गद्योतनाय ' तेन त्वाऽऽयुषा ' इति पुनः पठ्यते ॥

१५ अत्र विनियोगसंग्रहः—

ज्योगामयाविनस्त्विष्टौ यन्नवेत्याज्यमीक्षते ।
अश्विनोरुपहोमाः स्युर्घृत स्वाम्याज्यमीक्षते ॥ १ ॥
[१९]स्तृष्ट्वर्त्विजो ब्रह्महस्तं पावेति स्वामिनं जगुः ।
इमं घृतं पिबन्तं तु स्वामिनं मन्त्रयेत [२०]हि ॥ २ ॥
२० अग्निः सोमश्च यज्ञश्च ब्रह्मदेवाः पितेति षट् ।
यथोचितानुषङ्गैस्तैर्गृह्णीते[२१] स्वामिहस्तकम् ।
दशमे त्वनुवाकेऽस्मिन्मन्त्राः षोडश वर्णिताः ॥ ३॥ इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

---

२५ १८. ड.हो१ – ज्वालाधिकम्; शृं – ज्वालापरम् । १९. उ – ते चर्त्विजो; जो.ना.हा– ते-ऋत्विजो ; ड– सर्वर्त्विजो । २०. ड–वै । २१ क– °गृह्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

अग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो वरुण एनं वरुणपाशेन गृह्णाति सरस्वतीं वागग्नाविष्णू आत्मा यस्य ज्योगामयति यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालꣳ सौम्यं चरुं वारुणं दशकपालꣳ सारस्वतं चरुमाग्नावैष्णवमेकादशकपालमग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्रसं (१)

अग्निम्। वै। एतस्य। शरीरम्। गच्छति। सोमम्। रसः। वरुणः। एनम्। वरुणपाशेनेति वरुण-पाशेन। गृह्णाति। सरस्वतीम्। वाक्। अग्नाविष्णू इत्यग्ना-विष्णू। आत्मा। यस्य। ज्योक्। आमयति। यः। ज्योगामयावीति ज्योक्–आमयावी। स्यात्। यः। वा। कामयेत। सर्वम्। आयुः। इयाम्। इति। तस्मै। एताम्। इष्टिम्। निरिति। वपेत्। आग्नेयम्। अष्टाकपालमित्यष्टा-कपालम्। सौम्यम्। चरुम्। वारुणम्। दशकपालमिति दश-कपालम्। सारस्वतम्। चरुम्। आग्नावैष्णवमित्याग्ना-वैष्णवम्। एकादशकपालमित्येकादश-कपालम्। अग्नेः। एव। अस्य। शरीरम्। निष्क्रीणातीति निः–क्रीणाति। सोमात्। रसम् (१)।

इदानीं तां पञ्चहविषमिष्टिं विदधाति– 'अग्निं वा' इत्यादि ॥ [V]यस्य [V]ज्योक् [1-]नित्यम् [V]आमयति आमयः तस्य शरीरादीनि अग्न्यादीन् देवान् गच्छन्ति स्वकारणानुप्रवेशात् [2]कार्यरूपनाशात् कर्तरि कार्यशक्त्युपसंहारः स्यात्। "रुजार्थानाम्°" (पा २.३.५४) इति यस्येति कर्मणि षष्ठी। यो[-2] ज्योगामयावीत्यादि ॥ गतम् ॥

अग्नेरेवेत्यादि ॥ यत्र यत्र शरीरादीनि गतानि तेभ्यः तानि [V]निष्क्रीणाति हविःप्रदानेन। ततोऽसौ यजमानः [V]यदि अपि गतासुः [V]भवति [V]जीवति [V]एव, किं पुनरायुःशेषवतामामय-

इष्टेर्विधास्यमानाया दशमे मन्त्र ईरितः ॥

अग्निमिति ॥ अथैकादशे तामिष्टिं विधातुं प्रस्तौति– 'अग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो वरुण एनं वरुणपाशेन गृह्णाति सरस्वतीं वागग्नाविष्णू आत्मा यस्य ज्योगामयति' इति ॥ [1-]यं दीर्घव्याधिः पीडयति[-1] [V]एतस्य [V]शरीरम् [V]अग्निं प्रविशति, मांसभक्षणेन कृशत्वात्। सोमेन रसस्वीकारात् बलक्षयः। [V]वरुणपाशेन ग्रहणादुदरादिव्यथा। [V]सरस्वतीम् एतदीया [2V]वाक् भाषा [V]गच्छति, तेनायं भाषितुं न शक्नोति। जीवात्मा तु [V]अग्नाविष्णू प्राप्नोति, तेन मुमूर्षति ॥

य इति ॥ [3]इदानीं विधत्ते– 'यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालꣳ सौम्यं चरुं वारुणं दशकपालꣳ सारस्वतं चरुमाग्नावैष्णवमेकादशकपालमग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्रसं वारुणेनैवैनं वरुणपाशान्मुञ्चति सारस्वतेन वाचं दधात्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन च भिषज्यत्युत यदीतासुर्भवति जीवत्येव' इति ॥ ज्योगामयाविनो रोगपरिहाराथमरोगस्य [V]वाऽपमृत्युपरिहारार्थमियं पञ्चहविष्केष्टिः ॥

१–१. तं१.तं२– 'नित्यम्.....यो' इत्येतावान् अंशो नास्ति। २. मै४– तत्कार्य°।

१. ड.हो.१–'यं दीर्घव्याधिः पीडयति' नास्ति। २. ड–'वाक्' नास्ति। ३. हो१–इष्टिम्। ४. आ–चाऽप°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वारुणेनैवैनं वरुणपाशान्मुञ्चति सारस्वतेन वाचं दधात्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन च भिषज्यत्युत यदीतासुर्भवति जीवत्येव यन्नवमैत् तन्नवनीतमभवदित्याज्यमवेक्षते रूपमेवास्यैतन्महिमानं व्याचष्टेऽश्विनोः प्राणोऽसीत्याहाश्विनौ वै देवानां (२) भिषजौ ताभ्यामेवास्मै भेषजं करोतीन्द्रस्य प्राणोऽसीत्याहेन्द्रियमेवास्मिन्नेतेन दधाति मित्रावरुणयोः प्राणोऽसीत्याह प्राणापानावेवास्मिन्नेतेन दधाति

वारुणेन। एव। एनम्। वरुणपाशादिति वरुण-पाशात्। मुञ्चति। सारस्वतेन। वाचम्। दधाति। अग्निः। सर्वाः। देवताः। विष्णुः। यज्ञः। देवताभिः। च। एव। एनम्। यज्ञेन। च। भिषज्यति। उत। यदि। इतासुरितीत-असुः। भवति। जीवति। एव। यत्। नवम्। ऐत्। तत्। नवनीतमिति नव-नीतम्। अभवत्। इति। आज्यम्। अवेति। ईक्षते। रूपम्। एव। अस्य। एतत्। महिमानम्। व्याचष्ट इति वि-आचष्टे। अश्विनोः। प्राण इति प्र-अनः। असि। इति। आह। अश्विनौ। वै। देवानाम् (२)। भिषजौ। ताभ्याम्। एव। अस्मै। भेषजम्। करोति। इन्द्रस्य। प्राण इति प्र-अनः। असि। इति। आह। इन्द्रियम्। एव। अस्मिन्। एतेन। दधाति। मित्रावरुणयोरिति मित्रा-वरुणयोः। प्राण इति प्र-अनः। असि। इति। आह। प्राणापानाविति प्राण-अपानौ। एव। अस्मिन्। एतेन। दधाति।

निवृत्तिः भवतीति। यद्वा-यागबलेन आमयश्च नश्यति, सर्वं चाऽऽयुः शतसंवत्सरप्रमाणं लभते॥ आज्यमवेक्षत इति॥ अस्य मन्त्रस्य [v]एतत् [v]रूपम् [v]एव विनैव व्याख्यानम् आज्यस्य [v]महिमानं [v]व्याचष्टे [v]व्याकरोति अवस्थात्रयविवरणात्।

अश्विनोरित्यादि॥ पुरस्तात् [3]स्विष्टकृतः स्रुवाहुत्युपहोममन्त्रा एते॥

यदिति॥ मन्त्रं विनियुङ्क्ते–'यन्नवमैत् तन्नवनीतमभवदित्याज्यमवेक्षते रूपमेवास्यैतन्महिमानं व्याचष्टे' इति॥ मन्त्रोक्तैर्नवनीतसर्पिर्घृतनिर्वचनैरस्याऽऽज्यस्य [r]एतत् विद्यमानमेव[4] [v]रूपं [v]महिमानं ख्यापनाय मन्त्रः [v]व्याचष्टे। यद्वा–मन्त्रस्यैतत्स्वरूपमेव घृतस्य महिमानं व्याचष्टे। मन्त्राक्षरैरेव स्पष्टं प्रतीयते नात्र पृथग्वक्तव्यमस्तीत्यर्थः॥

अश्विनोरिति॥ उपहोममन्त्रान् व्याचष्टे– 'अश्विनोः प्राणोऽसीत्याहाश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोतीन्द्रस्य प्राणोऽसीत्याहेन्द्रियमेवास्मिन्नेतेन दधाति मित्रावरुणयोः प्राणोऽसीत्याह प्राणापानावेवास्मिन्नेतेन दधाति विश्वेषां देवानां प्राणोऽसीत्याह वीर्यमेवास्मिन्नेतेन दधाति' इति॥

३. तं१.तं२– स्विष्टकृतम्।

५. आ.उ.क.जो. ना.पा.हा– 'एव' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विश्वेषां देवानां प्राणोऽसीत्याह वीर्यमेवास्मिन्नेतेन दधाति घृतस्य धारामृतस्य पन्थामित्याह यथायजुरेवैतत् पावमानेन त्वा स्तोमेनेत्या(३)ह प्राणमेवास्मिन्नेतेन दधाति बृहद्रथन्तरयोस्त्वा स्तोमेनेत्याहौज एवास्मिन्नेतेन दधात्यग्नेस्त्वा मात्रयेत्याहाऽऽत्मानमेवास्मिन्नेतेन दधात्यृत्विजः पर्याहुर्यावन्त एवर्त्विजस्त एनं भिषज्यन्ति

विश्वेषाम्। देवानाम्। प्राण इति प्र-अनः। असि। इति। आह। वीर्यम्। एव। अस्मिन्। एतेन। दधाति। घृतस्य। धाराम्। अमृतस्य। पन्थाम्। इति। आह। यथायजुरिति यथा-यजुः। एव। एतत्। पावमानेन। त्वा। स्तोमेन। इति (३)। आह। प्राणमिति प्र-अनम्। एव। अस्मिन्। एतेन। दधाति। बृहद्रथंतरयोरिति बृहत्-रथंतरयोः। त्वा। स्तोमेन। इति। आह। ओजः। एव। अस्मिन्। एतेन। दधाति। अग्नेः। त्वा। मात्रया। इति। आह। आत्मानम्। एव। अस्मिन्। एतेन। दधाति। ऋत्विजः। परीति। आहुः। यावन्तः। एव। ऋत्विजः। ते। एनम्। भिषज्यन्ति।

घृतस्य धारामित्यादि ॥ अनेन यजमानमाज्यमवेक्षयति। यथायजुरिति। अमृतत्वप्राप्ति-हेतुत्वमस्य यथा यजुर्वदति ᵛएतत् ᵛएव भवति ॥

पावमानेनेत्यादि ॥ ᵛब्रह्मणः ᵛहस्तम् ᵛअन्वारभ्य ᵛऋत्विजः ᵛपर्याहुः इमान् मन्त्रान्। तदेवाह– 'ऋत्विजः पर्याहुः' इति। परीति आसीना आहुः।

घृतस्येति ॥ यजमानस्याऽऽज्यावेक्षणमन्त्रे[६] स्पष्टार्थतां दर्शयति– 'घृतस्य धारामृतस्य पन्थामित्याह यथायजुरेवैतत्' इति ॥

पावमानेनेति ॥ ऋत्विग्भिः [७]पठनीयानां मन्त्राणां तात्पर्यं दर्शयति– 'पावमानेन त्वा स्तोमेनेत्याह प्राणमेवास्मिन्नेतेन दधाति बृहद्रथंतरयोस्त्वा स्तोमेनेत्याहौज एवास्मिन्नेतेन दधात्यग्नेस्त्वा मात्रयेत्याहाऽऽत्मानमेवास्मिन्नेतेन दधाति' इति ॥ पवमानस्य वायोः प्राणरूपत्वात् तेन प्राणस्थापनं, बृहद्रथंतरयोः पृष्ठस्तोत्रप्रकृतित्वेन सारत्वात् तेनौजोधारणम्। अग्नेरात्मा, मीयतेऽनयेत्युक्तत्वात् तेनाऽऽत्म-स्थापनम् ॥

ऋत्विज इति ॥ एतेषां [८]त्रयाणां पाठं विधत्ते– 'ऋत्विजः पर्याहुर्यावन्त एवर्त्विजस्त एनं भिषज्यन्ति' इति ॥

ब्रह्मण इति ॥ पाठकाले हस्तग्रहणं विधत्ते– 'ब्रह्मणो हस्तमन्वारभ्य पर्याहुरेकधैव यजमान आयुर्दधति यदेव तस्य तत्' इति ॥ ᵛएकधा ᵛएव सर्वेषामृत्विजामैकमत्येनैव ᵛतस्य यजमानस्य ᵛयत् ᵛएव आयुः संपादनीयमस्ति ᵛतत् सर्वं [९]तस्मिन् यजमाने स्थापयन्ति ॥

६. ड–°मन्त्रस्य। ७. आ– पठ्यमानानां। ८. अ.इ.ड.हो१– त्रयाणां मन्त्राणां। ९. ड. हो१– 'तस्मिन्' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मणो हस्तमन्वारभ्य पर्याहुरेकधैव यजमान आयुर्दधति यदेव तस्य तद्धिरण्याद्-(४)घृतं निष्पिबत्यायुर्वै घृतममृतꣳ हिरण्यममृतादेवाऽऽयुर्निष्पिबति शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यथो खलु यावतीः समा

ब्रह्मणः । हस्तम् । अन्वारभ्येत्यनु - आरभ्य । परीति । आहुः । एकधेत्येक - धा । एव । यजमाने । आयुः । दधति । यत् । एव । तस्य । तत् । हिरण्यात् (४) । घृतम् । निरिति । पिबति । आयुः । वै । घृतम् । अमृतम् । हिरण्यम् । अमृतात् । एव । आयुः । निरिति । पिबति । शतमानमिति शत - मानम् । भवति । शतायुरिति शत - आयुः । पुरुषः । शतेन्द्रिय इति शत - इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति । तिष्ठति । अथो इति । खलु । यावतीः । समाः ।

ब्रह्मण इति । 'हस्तमन्वारभ्य' [४]इति वचनात्[४] [५]सर्वमस्य [v]आयुः [v]एकधा कृत्वा[५] अस्मिन् [v]दधति, [v]यत् [v]एव [v]तस्य आयुः [v]तत् एव दधति[६] ।

हिरण्यादिति ॥ अयमत्र *प्रयोगः — यावतीः समाः एष्यन् मन्येत तावन्मानं सौवर्णं प्रवर्तं कुण्डलम् उपकल्प्य खादिरे नवे पात्रे उपस्तीर्णाभिघारितं [७]निधाय सह हविर्भिरन्तर्वेद्यासाद्य उपहोमान् हुत्वा संस्रावैः प्रवर्तमभिघार्य अग्नेराहवनीयं पर्याहृत्य दक्षिणतो निधाय यजमानमवेक्षयति । [८]अथायमवेक्ष्यास्माद्धिरण्यान्निष्पतत् घृतं[८] पिबति । यद्वा - हिरण्यलग्नं [v]घृतं निःशेषं पिबति । आयुर्वा इति । उभयत्रापि तद्धेतुत्वात् ताच्छब्द्यम् । शतमानमिति । शतगुञ्जाप्रमाणं प्रवर्ताकारं सुवर्णं [v]भवति । गुञ्जफलाकारः कर्णवेष्टः । प्रवर्तस्य [९]शतसंख्यान्वयात् तत्प्रमाणायुर्वीर्य-

हिरण्यादिति ॥ यदुक्तं सूत्रकारेण— "पात्रसंसादनकाले खादिरं पात्रं चतुःस्रक्ति [१०]प्रयुनक्ति । सौवर्णस्य [११]प्रवर्तं शतमानस्य कृतम् । अथो खलु यावतीः समा एष्यन्मन्येत तावन्मानꣳ स्यात्" (आपश्रौ १९·२३·११-१२) इति; "आज्यग्रहणकाले तूष्णीं [१२]खादिरे चतुर्गृहीतं[१२] गृहीत्वा सादनकाल उत्तरेण ध्रुवां खादिरं सादयित्वा तस्मिन् प्रवर्तमवदधाति" (आपश्रौ १९·२३·१३) इति च; [१३]प्रवर्तं कर्णाभरणं कुण्डलम्; [तत्र] घृते स्थापितात् [१४]प्रवर्तान्निष्पीडितस्य घृतस्य पानं विधत्ते— 'हिरण्याद्घृतं निष्पिबत्यायुर्वै घृतममृतꣳ हिरण्यममृतादेवाऽऽयुर्निष्पिबति' इति ॥

शतमानमिति ॥ तस्य परिमाणं द्वेधा विधत्ते— 'शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यथो खलु यावतीः समा एष्यन्मन्येत तावन्मानꣳ स्यात् समृद्ध्यै' इति ॥ [v]शतमानं

४–४. तै१.तै२.मै.लं— परिवचनात् । ५. मै४— समं हि आयुरेकधा कृतत्वात् । ६. लं— दधाति । *(द्र. बौश्रौ १३·३१-३२)। ७. मै— 'निधाय' नास्ति । ८–८. मै४— यथायमवेक्षिता स्याद्धिरण्यान्निष्पिबति तत् घृतं पिबति । ९–९. तै१.तै२.मै.लं— शतसंख्यात्वात्तत्प्रमाणायुषामस्य लाभः ।

१०. आ.उ.पा—प्रयुङ्क्ते । ११. ड.हो१— प्रवर्तयुगम् । १२. क.जो.ना.हा— खादिरे चतुर्°; अ.इ— खादिरेण चतुर्गृहीतं १३. आ.श्रृं— प्रवर्तः । १४. हो१— °न्निष्पिष्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

एष्यन् मन्येत तावन्मानꣳ स्यात् समृद्ध्या इममग्न आयुषे वर्चसे कृधीत्याहाऽऽयुरेवास्मिन् वर्चो दधाति विश्वे देवा जरदष्टिर्यथाऽसदित्या(५)ह जरदष्टिमेवैनं करोत्यग्निरायुष्मानिति हस्तं गृह्णात्येते वै देवा आयुष्मन्तस्त एवास्मिन्नायुर्दधति सर्वमायुरेति ॥ (११) ॥

[रसं देवानाꣳ स्तोमेनेति हिरण्यादसदिति द्वाविꣳशतिश्च ।] ५

एष्यन् । मन्येत । तावन्मानमिति तावत्-मानम् । स्यात् । समृद्ध्या इति सम्-ऋद्ध्यै । इमम् । अग्ने । आयुषे । वर्चसे । कृधि । इति । आह । आयुः । एव । अस्मिन् । वर्चः । दधाति । विश्वे । देवाः । जरदष्टिरिति जरत्-अष्टिः । यथा । असत् । इति (५) । आह । जरदष्टिमिति-जरत-अष्टिम् । एव । एनम् । करोति । अग्निः । आयुष्मान् । इति । हस्तम् । गृह्णाति । एते । वै । देवाः । आयुष्मन्तः । ते । एव । अस्मिन् । आयुः । दधति । सर्वम् । आयुः । एति ॥ ११ ॥ १०

[मैसं २.३.५, कासं ११.८]

लाभः[१]। अथो खल्विति पक्षान्तरं दर्शयति । यावतः संवत्सरान् [v]एष्यन् जीवितुं [v]मन्येत [v]तावन्मानं कुर्यात् [१०]प्रवर्तकम् । यजमानस्य गतानि वर्षाणि शताच्छोधयित्वा [११-]शिष्टसंमितक्रम-निर्मितं कुर्यात्[-११] । एवं हि अभिमतसंख्याऽन्वयात् [v]समृद्ध्यै भवति ॥

इममग्न आयुष इति ॥ घृतं निष्पिबन्तमनुमन्त्रयते । जरदष्टिमेवेति । जराप्राप्त्या दीर्घायुष्ट्वं लक्ष्यते ॥ १५

अग्निरायुष्मानिति । ब्रह्मा यजमानस्य हस्तं गृह्णाति ॥

इति द्वितीये तृतीये एकादशोऽनुवाकः

[१५]पञ्चपणपरिमितमित्यसकृदुक्तम् । अथवा रुग्णो यजमानो यावतो भाविनः संवत्सरान् प्राप्नोत्वित्यध्वर्युः [v]मन्येत तावद्भिर्मानैः परिमितं कर्तव्यम् । मानशब्दो गुञ्जाबीजं ब्रूते । रुग्णस्यातीतमायुः परित्यज्याऽऽगामिन आयुषो यावन्तः संवत्सरा एतस्य मनसि निश्चितास्तावद्भिर्गुञ्जाबीजैः परिमितमित्यर्थः ॥ २०

इममिति ॥ प्राञ्चतो [१६]यजमानस्याभिमन्त्रणमन्त्रे प्रथमचरमभागयोरभिप्रायं दर्शयति– ' इममग्न आयुषे वर्चसे कृधीत्याहाऽऽयुरेवास्मिन् वर्चो दधाति विश्वे देवा जरदष्टिर्यथाऽसदित्याह जरदष्टिमेवैनं करोति ' इति ॥ आयुषश्चरमभागस्थाया जराया अष्टिर्व्याप्तिर्यस्य । अथवा जीर्यत्यष्टिरशनं यस्यासौ [v]जरदष्टिः, नीरोग इत्यर्थः ॥ २५

अग्निरिति ॥ अध्वर्योर्यजमानदक्षिणहस्तग्रहणं विधत्ते – ' अग्निरायुष्मानिति हस्तं गृह्णात्येते वै देवा आयुष्मन्तस्त एवास्मिन्नायुर्दधति सर्वमायुरेति ' इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

१०. मै४– प्रवर्तम् । ११–११ मै४– शिष्टवत्सरं निर्मिमीत निर्मितं कुर्यात् । ३०

१५. क– पञ्चपलपरि°; ङ– पञ्च पञ्चपण° । १६. क, हा– °स्यानुमन्त्रण° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपाल-मपश्यत् तं निरवपत् ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणाश्चतुष्कपालान्निर्वपेद्वरुणमेव

प्रजापतिरिति प्रजा - पतिः । वरुणाय । अश्वम् । अनयत् । सः । स्वाम् । देवताम् । आर्छत् । सः । परीति । अदीर्यत । सः । एतम् । वारुणम् । चतुष्कपालमिति चतुः– कपालम् । अपश्यत् । तम् । निरिति । अवपत् । ततः । वै । सः । वरुणपाशादिति वरुण - पाशात् । अमुच्यत । वरुणः । वै । एतम् । गृह्णाति । यः । अश्वम् । प्रतिगृह्णातीति प्रति - गृह्णाति । यावतः । अश्वान् । प्रतिगृह्णीयादिति प्रति - गृह्णीयात् । तावतः । वारुणान् । चतुष्कपालानिति चतुः– कपालान् । निरिति । वपेत् । वरुणम् । एव ।

-"प्राजापत्यो वा अश्वः"- इति ॥ [v]प्रजापतिः आत्मदेवत्यम् [v]अश्वम् [v]वरुणाय [v]अनयत् अददात् । [v]सः अश्वं ददत् [v1]स्वाम् आत्मानम् अश्वस्य [v]देवताम् [v]आर्च्छत् [2]आर्तामकरोत्, ईशितव्यापगमात् देवतात्वहानिरेवार्तिः । ततश्च [v]सः प्रजापतिः विगलितदेवताभावः परितः सर्वतः [v]अदीर्यत विपन्नोऽभवत् वरुणपाशैर्गृहीत इत्यर्थः । तदेवाह– 'वरुणो वा [3]एतम्' इत्यादि । ननु प्रतिग्रहीतुरिदमुच्यते, प्रतिगृह्णातीति दर्शनात् । नैवम् । उपक्रमावगतदातृश्रुतिविरोधात्, दातृ-विषयमेवेदं विपरिणाम्यते । उक्तं चेदं न्यायविद्भिः – "अवैदिकं [अचोदितं] च कर्ममेदात्" इत्यत्र– "सा लिङ्गादार्त्विजे स्यात्" (मीसू ३.४.३०-३१) इति । तस्मादुपक्रमोपसंहारा-

एकादशे त्विष्टिरुक्ता दीर्घरोग्यायुरर्थिनोः ॥

प्रजापतिरिति ॥ अथ द्वादशेऽश्वदानवत इष्टिं [1]विधास्यन् प्रस्तौति–'प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तं निरवपत् ततो वै स वरुणपाशादमुच्यत' इति ॥ [v]अनयत् दत्तवान् । देवस्य भावो देवता । [v]सः प्रजापतिः स्वकीयं देवत्वम् [2v]आर्छत् आर्तमकरोत् । "प्राजापत्यो वा अश्वः" (द्र तैसं ५.१.२) इति श्रुतेः प्रजापतिरेव पूर्वमश्वस्य देवता । तस्मिन्नश्वे वरुणाय दत्ते सति स्वकीयमश्वस्वामित्वमपगतं, तन्निमित्तेन दुःखेन [v]सः प्रजापतिः [v]पर्यदीर्यत तदीयं शरीरं परितो दीर्णं [3]दीर्घरोगग्रस्तमभूत् । स च रोगो [v]वरुणपाशरूपत्वाद्वारुणेष्ट्या निवृत्तः ॥

वरुण इति ॥ इदानीमिष्टिं विधत्ते– 'वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणाञ्चतुष्कपालान्निर्वपेद्वरुणमेव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्-मुञ्चति' इति ॥ [v]प्रतिगृह्णाति इत्यस्यान्तर्भावितण्यर्थत्वात् प्रतिग्राहयति ददातीत्ययमर्थः संपद्यते ॥

- [द्र. तैसं ५.१.२]। १. मै४– स्वम्। २. मै४.लं–आर्तम°। ३. मै– 'एतम्' नास्ति; मै४.लं– एतमिति।

१. अ.इ– विधातुं। २. अ.इ.उ.ड.पा – 'आर्च्छत्' नास्ति। ३. ड– 'दीर्घ°' नास्ति। ४. अ.इ– °पाशपरत्वा°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुञ्चति (१) चतुष्कपाला भवन्ति चतुष्पाद्वयश्वः समृद्ध्या

स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । सः । एव । एनम् । वरुणपाशादिति वरुण - पाशात् । मुञ्चति (१)। चतुष्कपाला इति चतुः–कपालाः । भवन्ति । चतुष्पादिति चतुः–पात् । हि । अश्वः । समृद्ध्या इति सम् - ऋद्ध्यै । ५

विरोधात्मकलिङ्गबलेन प्रतिग्राहयतीत्यर्थो युज्यते । तस्मात् दाता प्रजापतिः वारुणेन चतुष्कपालेन [v]वरुणपाशात् [v]अमुच्यत । तस्मादन्योऽपि [v]यावतः [v]अश्वान् [v]प्रतिगृह्णीयात् प्रतिग्राहयेत् [v]तावतः [v]वारुणान् [v]चतुष्कपालान् [v]निः [v]वपेत् इति । इदं वैदिकेऽश्वप्रतिग्रह इति वेदितव्यम् । उक्तं हि "दोषात् त्विष्टिर्लौकिके स्यात्" इत्यत्र "अर्थवादो वाऽनुपपादात् तस्माद्यज्ञे प्रतीयेत" (मीसू ३.४.२८-२९) इति । तत्रान्तर्भावितण्यर्थो गृह्णातिर्वेदितव्यः । यद्वा–ण्यन्तादेव लकारे "बहुल- १०
मन्यत्रापि°" (उ १९०) इति णिलुक्, तत्र व्यत्ययेन श्नाप्रत्ययः । केचिदाहुः– "वारुणो वा अश्वः" (तैब्रा ३.९.१६) इति, वरुणदेवत्योऽश्वः; स प्रजापतिना वरुणाय दीयमानो वरुणं स्वां देवतामपि आत्मीयदेवतात्वेन वर्तमानमपि [४]प्रतिग्रहस्य दुष्टत्वात् आर्तमकरोत् । स वरुणः पर्यदीर्यत वरुणपाशैर्गृहीतो व्यापद्यत । अथ [५]स वरुणो वारुणं चतुष्कपालं दृष्ट्वा वरुणाय [६]तं निरवपत् । ततो वरुणो वरुणपाशादमुच्यत । वारकं वा पापं वरुणः । यो नाम कश्चित् वरुणाख्यो १५
वा अश्वं प्रतिगृह्णाति [७-]वरुण एनं गृह्णाति[-७] । तस्मात् "यावतोऽश्वान् [८]प्रतिगृह्णीयात्" इति प्रतिग्रहीतुरेव विधीयते इति । [९]तदिदं न्यायविरुद्धम् [१०]इति नाद्रियामहे । ननु कथमेकस्यैव [११]देवतात्वं यजमानत्वं च स्यात्? नैष दोषः । "इन्द्रो वै सदृङ् देवतामिरासीत्" (तैसं २.२.८) इत्यत्र यथा [१२-]इन्द्र आत्मार्थम्[-१२] ऐन्द्रमानुषूकमेकादशकपालं विदधाति, यथा– "वरुणं सुषुवाणम्" (तैसं २.१.९) इत्यत्र वरुणो वारुणीं [१३-]वशामा लभते एवमिदं भविष्यति ॥ २०

चतुष्कपाला इति ॥ कपालसंख्यां प्रशंसति – 'चतुष्कपाला भवन्ति चतुष्पाद्वयश्वः समृद्ध्यै' इति ॥

४. तं१.तं२–अप्रतिगृह्य । ५. तं१.तं२– 'सः' नास्ति । ६. तं१.तं२.मै.लं– 'तं' नास्ति । ७-७. लं– 'वरुण एनं गृह्णाति' नास्ति । ८. तं१.तं२.मै.लं– 'प्रतिगृह्णीयात्' नास्ति । ९. तं१.तं२.लं– यदिदम् । १०. तं१.तं२.मै.लं– इत्यादिना । ११. मै४–दातृत्वम् । १२-१२. मै४–इन्द्रार्थम् ऐन्द्राग्नम् । २५
१३-१३. तं१.तं२– 'वशामालभते ..... अश्वप्रतिग्रही कृत्वापि' इत्येतावान् भागः नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकमतिरिक्तं निर्वपेद्यमेव प्रतिग्राही भवति यं वा नाध्येति तस्मादेव वरुणपाशान्मुच्यते यद्यपरं प्रतिग्राही स्यात् सौर्यमेककपालमनु निर्वपेदमुमेवाऽऽदित्यमुच्चारं कुरुते-

एकम्। अतिरिक्तमित्यति - रिक्तम्। निरिति। वपेत्। यम्। एव। प्रतिग्राहीति प्रति - ग्राही। भवति। यम्। वा। न। अध्येतीत्यधि - एति। तस्मात्। एव। वरुणपाशादिति वरुण-पाशात्। मुच्यते। यदि। अपरम्। प्रतिग्राहीति प्रति - ग्राही। स्यात्। सौर्यम्। एककपालमित्येक-कपालम्। अनु। निरिति। वपेत्। अमुम्। एव। आदित्यम्। उच्चारमित्युत् - चारम्। कुरुते।

एकमतिरिक्तमिति ॥ यावतोऽश्वान्[१४] प्रतिगृह्णीयात् तेभ्यः [v]अतिरिक्तं [v]निः [v]वपेत्, यथा षट् प्रतिगृह्य सप्तमं निर्वपेदिति। यमेवेति। [v]यं प्रतिग्रहीष्यन् [v]भवति [v]यं [v]वा [१५]पूर्वप्रतिगृहीतं [v]न [v]अध्येति नाधिगच्छति न स्मरति वा, [v]तस्मात् सर्वस्मान्निमित्तात् उपजातात् [v]वरुणपाशात् [v]मुच्यते। "अकेनोर्भविष्यदाधमर्ण्ययोः" (पा २.३.७०) इति षष्ठीप्रतिषेधः ॥

यद्यपरमिति ॥ अश्वप्रतिग्राही कृत्वाऽपि[१३] वारुणीमिष्टिं [v]यदि भूयोऽपि [१६]प्रतिग्रहीष्यन् [v]स्यात् [v]सौर्यम् [v]एककपालम् [v]अनु [v]निः [v]वपेत्। अपरमिति क्रियाविशेषणम्। [v]अमुम् [v]आदित्यम् [v]उच्चारम् उच्छ्रिताचारम् उपरि चरन्तं वा [v]कुरुते, ततः स एव वरुणपाशादिदोषं परिहरिष्यतीति।

एकमिति ॥ अश्वसंख्यातोऽधिकं पुरोडाशं विधत्ते- 'एकमतिरिक्तं निर्वपेद्यमेव प्रतिग्राही भवति यं वा नाध्येति तस्मादेव वरुणपाशान्मुच्यते' इति ॥ [v]यम् [v]एव अश्वमित ऊर्ध्वं यदा कदाचित् [५]कालान्तरे प्रतिग्रहीष्यति दास्यति, अथवा [v]यं कंचिदश्वं प्रतिगृहीतं [v]न [v]अध्येति विस्मरति तदर्थोऽयम् अतिरिक्तः पुरोडाशः ॥

यदीति ॥ निमित्तविशेषणाङ्गाधिक्यं विधत्ते- 'यद्यपरं प्रतिग्राही स्यात् सौर्यमेककपालमनु निर्वपेदमुमेवाऽऽदित्यमुच्चारं कुरुते' इति ॥ कांश्चिदश्वान् [६]दत्त्वा तदानीमेवेष्ट्यनुष्ठाने सत्येकेनातिरिक्तेन सहिताः तावन्तः [७]-तत्र पुरोडाशाः दत्ताश्चपर्याप्ताः-[७]। यदा तु [८]'दानानन्तरमेवेष्टिर्नानुष्ठिता किं तु कंचित् कालम् अतिलङ्घ्य' पुनरप्यपरोऽश्वो दत्तस्तदा [१०]सातिरिक्तान् दत्ताश्वसंख्याकान् पुरोडाशान्निरुप्य [v]सौर्यम् [v]अनु [v]निर्वपेत्। तेन [v]आदित्यम् [v]एव ऊर्ध्वचारिणं [v]कुरुते। स चाऽऽदित्यो विलम्बदोषं परिहरन्नुपरिष्टाद्वर्तत इत्यभिप्रायः ॥

१४. मै.लं- 'अश्वान्' नास्ति। १५. लं- °प्रतिगृहीतारम्। १६. पं२.लं-प्रतिग्राहयिष्यन्।

५. अ.इ-कल्पान्तरे। ६. जो.ना.हा- गृहीत्वा। ७. आ.ड.शृं.हो१- पुरोडाशाः पर्याप्ताः; इ- पुरोडाशा दत्ताश्वपर्याप्ताः; क-तत्र पुरोडाशाः पर्याप्ताः। ८. अ.इ-दानादूर्ध्वं न तदनन्तरमेवेष्टिः कृता; क.जो.ना.हा- दानादनन्तरमेवेष्टिर्नानुष्ठिता। ९. शृं- विलम्ब्य। १०. क.हा- सोऽतिरिक्तान्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

ऽपोऽवभृथमवैत्यप्सु वै वरुणः साक्षादेव वरुणमव यजतेऽपोनप्त्रीयं चरुं (२) पुनरेत्य निर्वपेदप्सुयोनिर्वा अश्वः स्वामेवैनं योनिं गमयति स एनꣳ शान्त उप तिष्ठते ॥१२॥

[मुञ्चति चरुꣳ सप्तदश च ।]

अपः । अवभृथमित्यव - भृथम् । अवैति । एति । अप्स्वित्यप्-सु । वै । वरुणः । साक्षादिति स-अक्षात् । एव । वरुणम् । अवैति । यजते । अपोनप्त्रीयमित्यपः–नप्त्रीयम् । चरुम् (२) । पुनः । एत्येत्या - इत्य । निरिति । वपेत् । अप्सुयोनिरित्यप्सु - योनिः । वै । अश्वः । स्वाम् । एव । एनम् । योनिम् । गमयति । सः । एनम् । शान्तः । उपेति । तिष्ठते ॥ १२ ॥

[मैसं २.३.३ कासं १२.६]

Vअपः अवभृथकर्मार्थम् Vअवैति । Vअपोनप्त्रीयं Vचरुम् अवभृथात् Vएत्य Vपुनः Vनिः Vवपेत् । " अपोनप्त्रपांनप्तृभ्यां घः " (पा ४.२.२७), " छ च " (पा ४.२.२८) इति छप्रत्ययः । अपांनप्ता चतुर्थः अपोनप्ता । छान्दसः सुगागमः । अप्सुयोनिरिति । " अपो योनियन्मतुषु सप्तम्या अलुक् " (पा ६.३.१ वा ७) इत्यलुक् । शान्त इति । निवृत्तवरुण-पाशादिदोषः सुखहेतुरेव V[17]उपतिष्ठते मित्रवदुपसंप्राप्नोति ॥

इति तृतीये द्वादशोऽनुवाकः ॥

अप इति ॥ इष्टयङ्गत्वेनावभृथं विधत्ते– ' अपोऽवभृथमवैत्यप्सु वै वरुणः साक्षादेव वरुणमव यजते ' इति ॥ Vअपः प्राप्य तत्र Vअवभृथं कर्म कुर्यात् । तेन वरुणो निराकृतो भवति ॥

अपोनप्त्रीयमिति ॥ अङ्गान्तरं विधत्ते– ' अपोनप्त्रीयं चरुं पुनरेत्य निर्वपेदप्सुयोनिर्वा अश्वः स्वामेवैनं योनिं गमयति स एनꣳ शान्त उप तिष्ठते ' इति ॥ अपोनप्ता देवता यस्य सोऽयमपोनप्त्रीयस्तं Vचरुम् अवभृथदेशाद्यज्ञभूमौ समागत्य Vनिर्वपेत् । अप्सु योनिरुत्पत्तिर्यस्याश्वस्य सोऽयम् Vअप्सुयोनिः । उच्चैःश्रवसोऽश्वस्य समुद्रादुत्पत्तिः पुराणेषु प्रसिद्धा । तस्मादपोनप्त्रीयचरुणा तमश्वं स्वकीययोनिगामिनं करोति । Vसः चाश्वः Vशान्तः सन् रोगमनुत्पाद्य Vएनं यजमानं सेवते ॥

अत्र मीमांसा ॥ तृतीयाध्यायस्य चतुर्थपादे चिन्तितम् –

" अश्वप्रतिग्रहेष्टिस्तु दातुरित्यभिधास्यते ।
दानद्वये लौकिके वा वैदिके वा भवेदियम् ॥
अविशेषाद्द्वयोर्यद्वा न देयः केसरीत्यतः ।
निषेधाल्लौकिकात् तत्र प्रायश्चित्तिरियं भवेत् ॥
न जलोदरहेतुत्वं प्रमितं लौकिके क्वचित् ।
वैदिके तु श्रुतं [11]तस्मात् तत् प्रायश्चित्तयेऽत्र सा " ॥ (जैन्या ३.४.२६-२८) ॥

इदमाम्नायते– " यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणाञ्चतुष्कपालान्निर्वपेत् " इति । तत्र प्रतिग्रहशब्दो दानपर इत्यनन्तरमेव वक्ष्यते । तत्र [12]विशेषाश्रवणाल्लौकिकवैदिकदानयोरुभयोरप्यसाविष्टिरित्येकः पक्षः । ' न केसरिणो ददाति ' इति स्मृत्या मित्रदायादादिभ्यः प्रीत्या क्रियमाणमश्वदानं लौकिकं निषिद्धं, तदनुष्ठाने प्रायश्चित्तरूपेयमिष्टिरिति द्वितीयः पक्षः । " वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति "

१७. तं१.तं२– उपतिष्ठति ।

११. ड–यस्मात् । १२. उ.पा– विशेषेणाश्रवणा° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्यश्वदाने जलोदरव्याधिरूपो दृष्टदोषो वरुणग्रहवाक्येनोच्यते। न च लौकिकस्याश्वदानस्य तद्धेतुत्वं प्रमितम्। वैदिकस्य तु[13] जन्मान्तरविषयं दोषश्रवणम्। अतो वैदिकदाने सेष्टिः प्रायश्चित्तम्। अस्ति हि वैदिकमश्वदानं, "वडबा दक्षिणा" (तैसं १·८·२१) इत्यादिश्रवणात्॥

[14]तत्रैवान्यच्चिन्तितम्–

"यावतः प्रतिगृह्णीयादश्वांस्तावत्य इष्टयः।
प्रतिग्रहीतुर्दातुर्वा स्यादाद्योऽस्तु यथाविधि॥
असंजातविरोध्यर्थवादात् [15]दातुः प्रजापतेः।
इष्टिः श्रुता ततो [16]दातुर्णिजर्थेऽपि विधिं नयेत्" ॥ (जैन्या ३·४·२९-३०)॥

पूर्वोदाहृते वाक्ये 'प्रतिगृह्णीयात्' इति [17]विधिपदश्रवणात् प्रतिग्रहीतुरिष्टिरिति चेत्। न। उपक्रमरूपेणार्थवादेन दातुस्तदिष्टिप्रतीतेः। उपक्रमश्चैवं श्रूयते– "प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तं निरवपत् ततो वै स वरुणपाशादमुच्यत" (तैसं २·३·१२) इति। अनयदत्तवान्। स च दाता प्रजापतिः स्वकीयां वरुणदेवतां जलोदररोगप्रदां प्राप्तवान्। तेन च रोगेण ग्रस्तः प्रजापतिर्विदीर्णो भूत्वा रोगपरिहारायेष्टिं कृत्वा रोगादमुच्यतेत्यत्र दातुरिष्टिरित्यवगम्यते। असंजातविरोध्युपक्रमानुसारेण विधायकपदमपि प्रतिग्राह्येदित्येवमन्तर्भावितणिजर्थपरतया न्याय्येयम्॥

पञ्चमाध्यायस्य द्वितीयपादे चिन्तितम्–

"[18]प्रतिग्रहे तु बह्वश्वे[18] पूर्वन्यायोऽस्ति वा न वा।
अस्ति तत्साम्यतो मैवं पुरोडाशस्य [19]शोषतः"॥ (जैन्या ५·२·३)॥

"यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणाञ्चतुष्कपालान् निर्वपेत्" इति। अत्र [20]शतसंख्यादियुक्तबह्वश्वप्रतिग्रहे बहुपुरोडाशेषूदाहृतप्रत्यक्षवचनेन साहित्यं प्राप्तम्। तत्र पूर्वन्यायेन सर्वेषु पुरोडाशेष्वेकैकोऽधिश्रयणादिधर्मोऽनुष्ठेय इति चेत्। मैवम्। [21]तप्तेषु कपालेषु क्रमेण पुरोडाशानधिश्रित्य [22]यावता कालेन[22] प्रथमपुरोडाशे द्वितीयसंस्कारं कर्तुमागच्छति तावता [23]कालेनासौ शुष्को [24]भस्मीभवति। तस्मादेकैकस्मिन् पुरोडाशे कृत्स्नधर्मसमापनमित्येवं काण्डानुसमयोऽभ्युपेतव्यः॥

एकादशाध्यायस्य चतुर्थपादे चिन्तितम्—

"तन्त्रं चतुष्कपालानां भेदो वा तन्महत्त्वतः।
कुम्भीवत् तन्त्रता मैवं भेदः स्यात् प्रकृताविव"॥ (जैन्या ११·४·१८)॥

इदं श्रूयते– "यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणाञ्चतुष्कपालान्निर्वपेत्" इति। यथा प्राजापत्येषु कुम्भ्या महत्त्वेन तन्त्रं तथाऽत्रापि कपालमहत्त्वेन तन्त्रमिति चेत्। मैवम्। प्रकृतौ प्रतिपुरोडाशं कपालभेदेन तद्भेदस्यैव चोदकप्राप्तेः। किं चात्यन्तविशालेषु कपालेषु चतुर्षु पुरोडाशानां शतेष्ववस्थापितेष्वेकस्यैव कपालस्यैकदेशे पुरोडाशस्यैकस्य समाप्तेर्न कोऽपि पुरोडाशश्चतुष्कपालः सिद्धयेत्। तस्मात् प्रतिपुरोडाशं [25]कपालचतुष्टवभेदः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः॥ १२॥

---

१३. हो१– तत्तद्°। १४. आ– अत्रैव। १५. ड.हो१–धातुः। १६. ड– धातु स्यात् णिज°। १७. ड.हो१– 'विधि°' नास्ति। १८–१८. उ. क.जा.पा.हा– प्रतिग्रहीतुर्बह्वश्वे। १९. हो१– दोषतः; उ.जो.ना.पा.हा– शेषतः। २०. उ.पा– °दिव्रह्वश्व°। २१. आ.हा– तप्तेषु चतुर्षु। २२–२२. ड– तावता कपालेन। २३. शृं– 'कालेन' नास्ति। २४. शृं–मषीभवति। २५. ड.शृं.हो१–°चतुष्कभेदः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

या वामिन्द्रावरुणा यतव्या तनूस्तयेममꣳहसो मुञ्चतं या वामिन्द्रावरुणा सहस्या ❀ रक्षस्या ❀ तेजस्या ❀ तनूस्तयेममꣳहसो मुञ्चतं

या । वाम् । इन्द्रावरुणेतीन्द्रा - वरुणा । यतव्या । तनूः । तया । इमम् । अꣳहसः । मुञ्चतम् । या । वाम् । इन्द्रावरुणेतीन्द्रा - वरुणा । सहस्या । रक्षस्या । तेजस्या । तनूः । तया । इमम् । अꣳहसः । मुञ्चतम् । ५

" यः पाप्मना गृहीतः स्यात् तस्मा एतामैन्द्रावरुणीं पयस्यां निर्वपेत् " (तैसं २.३.१३) इत्यादि कारणं वक्ष्यति । तां पुरोडाशात् चतुर्धा कृत्वा व्यूहति– ' या वामिन्द्रावरुणा ' इति चतुर्भिर्मन्त्रैः ॥ यतव्या सहस्या रक्षस्या तेजस्येति चतुर्णां विशेषः । शेषस्तुल्यः । हे [v]इन्द्रावरुणा इन्द्रावरुणौ । " सुपां सुलुक्° " (पा ७.१.३९) इत्याकारः । " देवताद्वन्द्वे च " (पा ६.३.२६) इति पूर्वपदस्यानङ् । [v]वां युवयोः [v]या [v]यतव्या [v]तनूः शरीरम् । यातूनि यातुधानाः रक्षांसि तेषां हननी रक्षोयातूनां हन्त्रीति यावत् । [v]तया तन्वा [v]इमं यजमानम् [v]अꣳहसः पापात् [v]मुञ्चतं शोधयतम् ॥ या वामित्यादि ॥ [v]या [v]सहस्या तनूः । सहो बलम् अभिभवितृत्वं तद्वती । " मत्वर्थे मासतन्वोः " (पा ४.४.१२८) इति यत् । समानमन्यत् ॥ या वामित्यादि ॥ या [v]रक्षस्या तनूः रक्षसां हननी । स एव यत् । ततोऽनुषङ्गः ॥ या वामित्यादि ॥ या [v]तेजस्या तनूः तेजस्विनी । पूर्ववन्मत्वर्थीयो यत् । स्पष्टमन्यत् ॥ १५

चतुष्कपाला विहिता द्वादशे त्वश्वदानिनः ॥

अथ त्रयोदशे पाप्मना गृहीतस्येष्टिं विधित्सुरादौ मन्त्रान् पठति । कल्पः– " ऐन्द्रावरुणं पुरोडाशं निरुप्यैन्द्रावरुणीं पयस्यां निर्वपेत् । उद्वास्यालंकृत्य पयस्यायां [1]पुरोडाशमवदधाति । एतयैव प्रच्छाद्याऽऽसादयति । अथास्मात् प्रतिदिशं पयस्यां व्यूहति । या वामिन्द्रावरुणा यतव्या तनूरित्येतैरेव पुनः समूहति । [2-]अमुक्तमिति मन्त्रान्तान्[-2] संनमति । सहैव [3]पयस्यायाः पुरोडाशस्यावद्यति । यो वामिन्द्रावरुणावग्नौ स्नाम इत्युपहोमाः " (आपश्रौ १९.२५.१-८) इति ।

येति ॥ तत्र प्रथमस्य व्यूहनमन्त्रस्य पाठस्तु– ' या वामिन्द्रावरुणा यतव्या तनूस्तयेममꣳहसो मुञ्चतम् ' इति ॥ हे [r]इन्द्रावरुणौ, [r]वां युवयोः [r]या [r]तनूः [r]यतव्या पापात् [4]पालयितुं प्रयत्नवती [r]तया तन्वा यजमानं पापात् मोचयतम् ॥

येति ॥ द्वितीयतृतीयचतुर्थमन्त्राणां पाठस्तु – ' या वामिन्द्रावरुणा सहस्या रक्षस्या तेजस्या तनूस्तयेममꣳहसो मुञ्चतम् ' इति ॥ ' सहस्या ' इत्यत्र ' तनूः ' इत्यस्यान्त्यभागस्यानुषङ्गः । ' तेजस्या ' इत्यत्र ' या वाम् ' इत्याद्यभागस्यानुषङ्गः । ' रक्षस्या ' इत्यत्रोभयोर्भागयोरनुषङ्गः । सहो बलं तदर्हतीति [r]सहस्या । रक्षो रक्षणं तदर्हतीति [r]रक्षस्या । तेजो रोचनशक्तिस्तदर्हतीति [r]तेजस्या ॥

१. ड– °दधातीति । २–२. आ– मुञ्चतमित्यस्य स्थानेऽमुक्तमिति मन्त्रान्तान् क– मुञ्चतमिति मन्त्रान् । ३. अ,इ– पयस्यया । ४. आ– मोचने । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यो वामिन्द्रावरुणावग्नौ स्रामस्तं वामेतेनाव यजे यो वामिन्द्रावरुणा द्विपात्सु पशुषु चतुष्पात्सु गोष्ठे गृहेष्वप्स्वोषधीषु वनस्पतिषु स्रामस्तं वामेतेनाव यज

यः। वाम्। इन्द्रावरुणाविती॑न्द्रा-वरुणौ। अग्नौ। स्रामः। तम्। वाम्। एतेन। अवेति। यजे। यः। वाम्। इन्द्रावरुणेती॑न्द्रा-वरुणा। द्विपात्स्विति द्विपात्-सु। पशुषु। चतुष्पात्स्विति चतुष्पात्-सु। गोष्ठ इति गो-स्थे। गृहेषु। अप्स्वित्यप्-सु। ओषधीषु। वनस्पतिषु। स्रामः। तम्। वाम्। एतेन। अवेति। यजे।

अथोपहोमा अष्टौ—'यो वाम्' इत्यादयः। अग्न्यादयो वनस्पत्यन्ता विशेषाः। शिष्टमष्टस्वप्यनुषज्यते। स्रावयति नाशयतीति स्रामः पाप्मा [१]येनायं गृहीतः। [v]यः[२] [v]वां युवयोः संबन्धिनो यजमानस्य [v]अग्नौ [v]स्रामः अग्न्याधारः पाप्मा तेन कृतः [v]तं [v]वां युवयोः संबन्धिनाऽनेन कर्मणा [v]अव [v]यजे नाशयामि हे [v]इन्द्रावरुणौ। अवपूर्वो यजिर्विनाशकर्मा। [v]यः [v]द्विपात्सु [v]पशुषु स्रामः इति द्वितीये। [३]द्विपदो मनुष्याः। "संख्यासुपूर्वस्य" (पा ५.४.१४०) इति लोपः समासान्तः। "पादः पत्" (पा ६.४.१३०) इति पद्भावः, "द्वित्रिभ्यां पाद्दन्°" (पा ६.२.१९७) इत्युत्तरपदान्तोदात्तत्वम्। यः [v]चतुष्पात्सु पशुषु स्रामः इति तृतीये। स्वरवर्जं पूर्ववत्। गवादयः चतुष्पादः। यः [v]गोष्ठे इति चतुर्थे। गावस्तिष्ठन्त्यस्मिन्निति "सुपि स्थः" (पा ३.२.४) इति कः। "अम्बाम्ब°" (पा ८.३.९७) इत्यादिना षत्वम्। यः [v]गृहेषु इति पञ्चमे। "गेहे कः" (पा ३.१.१४४) इति कः। यः [v]अप्सु इति षष्ठे। "ऊडिदम्°" (पा ६.१.१७१) इति विभक्तेरुदात्तत्वम्। यः [v]ओषधीषु इति सप्तमे। यवादयः ओषधयः। "ओषधेश्च विभक्तौ°" (पा ६.३.१३२) इति दीर्घत्वम्। यः [v]वनस्पतिषु

य इति॥ [५]उपहोमेषु प्रथममन्त्रस्य पाठस्तु—'यो वामिन्द्रावरुणावग्नौ स्रामस्तं वामेतेनाव यजे' इति॥ हे [v]इन्द्रावरुणौ [v]अग्नौ [v]वां युवयोः [v]यः [v]स्रामः पापविशेषो युवयोर्होमार्थे [६]वह्नौ यजमानेन यः अपराधः कृतः [v]तम् अपराधं [v७]वां युवयोः [८]संबन्धिनम् [v]एतेन होमेन [v]अव [v]यजे विनाशयामि॥

य इति॥ द्वितीयादीनां सप्तानां मन्त्राणां पाठस्तु—'यो वामिन्द्रावरुणा द्विपात्सु पशुषु चतुष्पात्सु गोष्ठे गृहेष्वप्स्वोषधीषु वनस्पतिषु स्रामस्तं वामेतेनाव यजे' इति॥ 'द्विपात्सु पशुषु' इत्यत्र 'स्रामस्तं वाम्' इत्याद्युत्तरभागस्यानुषङ्गः। 'वनस्पतिषु स्रामः' इत्यत्र 'यो वाम्' इत्यादेः प्रथमभागस्यानुषङ्गः। 'चतुष्पात्सु' इत्यादिषु पञ्चसु पूर्वोत्तरभागयोरनुषङ्गः। हे [v]इन्द्रावरुणौ, युवयोः संबन्धी यः यजमानस्तस्य [v]द्विपात्सु पशुषु मनुष्यादिरूपेषु [v]यः [v]स्रामः पापविशेषः [v]तं पापविशेषं युवयोः संबन्धिना [v]एतेन कर्मणा विनाशयामि। एवं सर्वत्र योज्यम्॥

१. मै४—तेनायम्। २. मै४—'यः' इत्यस्यानन्तरम् 'अस्य'। ३. मै—द्विपादः।

५. आ—उपहोमे। ६. अ.इ—अग्नौ; क.जो.ना.हा—अग्नौ वह्नौ। ७. आ.उ.क.जो.ना.पा. शृं.हा.हो१—'वाम्' नास्ति। ८. आ—संबन्धिना।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

इन्द्रो वा एतस्यै(१)न्द्रियेणापं क्रामति वरुण एनं वरुणपाशेनं गृह्णाति यः पाप्मना गृहीतो भवति यः पाप्मना गृहीतः स्यात् तस्मा एतामैन्द्रावरुणीं पयस्यां निर्वपेदिन्द्र एवास्मिन्निन्द्रियं दधाति वरुण एनं वरुणपाशान्मुञ्चति पयस्या भवति पयो हि वा एतस्मादपक्रामत्यथैष पाप्मना गृहीतो यत् पयस्या भवति पय एवास्मिन् तया दधाति

इन्द्रः । वै । एतस्य (१) । इन्द्रियेण । अपेति । क्रामति । वरुणः । एनम् । वरुणपाशेनेति वरुण - पाशेन । गृह्णाति । यः । पाप्मना । गृहीतः । भवति । यः । पाप्मना । गृहीतः । स्यात् । तस्मै । एताम् । ऐन्द्रावरुणीमित्यैन्द्रा - वरुणीम् । पयस्याम् । निरिति । वपेत् । इन्द्रः । एव । अस्मिन् । इन्द्रियम् । दधाति । वरुणः । एनम् । वरुणपाशादिति वरुण - पाशात् । मुञ्चति । पयस्या । भवति । पयः । हि । वै । एतस्मात् । अपक्रामतीत्यप - क्रामति । अथ । एषः । पाप्मना । गृहीतः । यत् । पयस्या । भवति । पयः । एव । अस्मिन् । तया । दधाति । १०

इत्यष्टमे । पलाशादयो वनस्पतयः । वनस्पत्यादित्वात् पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् (पा ६·२·१४०) । पारस्करप्रभृतित्वात् सुट् (पा ६·१·१५७) ॥

अथातः पयस्यां विदधाति [४]ब्राह्मणम्– ' इन्द्रो वा एतस्य ' इत्यादि ॥ अस्य [५]इन्द्रियेण सह [५]इन्द्रः [५]अप [५]क्रामति, [५]वरुणः च [५]एनं [५]वरुणपाशेन [५]गृह्णाति, [५]यः [५]पाप्मना [५]गृहीतः [५]भवति । यस्मादेवं तस्मात् [५]यः [५]पाप्मना [५]गृहीतः [५]स्यात् [५]तस्मै तत्पापशमनार्थं [५]ऐन्द्रावरुणीं [५]पयस्यां निः [५]वपेत् । पयसि भवा पयस्या आमिक्षा । अत्रायं प्रयोगः*– इन्द्रावरुणाभ्यां चतुरो मुष्टीन् व्रीहीणां निरुप्य दक्षिणार्धे गार्हपत्यस्यैकादश कपालान्युपदधाति । यदैवं(तं) पुरोडाशमधिवृ(पृ)णक्ति तदा एतामामिक्षां गार्हपत्ये अधि [५]श्रपयति । अथैतं पुरोडाशमुपस्तीर्णामिघारितमुद्वास्य [६-६]आमिक्षया संप्रच्छाद्य [६-६] अन्तर्वेद्यासादयतीति ॥ पयस्या भवतीत्यादि ॥ गतम् ॥

इन्द्र इति ॥ अथेष्टिं विधत्ते– ' इन्द्रो वा एतस्येन्द्रियेणाप क्रामति वरुण एनं वरुणपाशेन गृह्णाति यः पाप्मना गृहीतो भवति यः पाप्मना गृहीतः स्यात् तस्मा एतामैन्द्रावरुणीं पयस्यां निर्वपेदिन्द्र एवास्मिन्निन्द्रियं दधाति वरुण एनं वरुणपाशान्मुञ्चति ' इति ॥ [९-९]यः पापगृहीत एतदीयेन [९]इन्द्रियेण सह [९]इन्द्रः अपगच्छति,[९-९] [१०-१०]वरुणः रोगेण [९]एनं बाधते[१०-१०] [११]अतः [१२-१२]पाप्मना गृहीतस्य तदुभयविषयेष्टिः[११-१२] । पयसि प्रभवाऽऽमिक्षा पयस्या ॥

पयस्येति ॥ तां प्रसंसति– ' पयस्या भवति पयो हि वा एतस्मादपक्रामत्यथैष पाप्मना गृहीतो यत् पयस्या भवति पय एवास्मिन् तया दधाति ' इति ॥ पयःशब्देन क्षीरादिसात्त्विकाहारजनितश्रद्धया

४. लं–' ब्राह्मणम् ' नास्ति । * (बौश्री १३·३३) । ५. तं१.तं२.मै.लं– श्रयति । ६–६. तं१.तं२.मै.लं– आमिक्षायां संप्रवेश्य ।

९–९. जो.पा– ' यः पाप.....गच्छति ' नास्ति । १०–१०. जो.ना.पा–एनं वरुणपाशेन गृह्णाति । ११. जो.पा–'अतः' नास्ति । १२–१२ जो– पाप्मना गृहीतस्य तस्मात् तदुभयविषयेष्टिः; पा– पाप्मना गृहीतस्य तस्य तदुभयविषयेष्टिः; क.ड.शृं.हो१–पापगृहीतस्य तदुभयविषयेष्टिः; हा–पाप्मना गृहीतस्य तस्मादुभयविषयेष्टिः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पयस्यायां (२) पुरोडाशमव दधात्यात्मन्वन्तमेवैनं करोत्यथो आयतनवन्तमेव चतुर्धा व्यूहति दिक्ष्वेव प्रति तिष्ठति पुनः समूहति दिग्भ्य एवास्मै भेषजं करोति

पयस्यायाम् (२)। पुरोडाशम्। अवेति। दधाति। आत्मन्वन्तमित्यात्मन्-वन्तम्। एव। एनम्। करोति। अथो इति। आयतनवन्तमित्यायतन-वन्तम्। एव। चतुर्धेति चतुः-धा। वीति। ऊहति। दिक्षु। एव। प्रतीति। तिष्ठति। पुनः। समिति। ऊहति। दिग्भ्य इति दिक्-भ्यः। एव। अस्मै। भेषजम्। करोति।

पयस्यायामिति ॥ आमिक्षायां संप्रच्छाद्य [V]पुरोडाशम् आसादयति। आत्मन्वन्तमिति। आत्मवत्त्वं बलवत्त्वम्। "अनो नुट्" (पा ८·२·१६), "ह्रस्वनुड्भ्यां°" (पा ६·१·१७६) इति मतुप उदात्तत्वम्। [V]अथो अपि च [V]आयतनवन्तं गृहवन्तम् [V]एव [V]एनं [V]करोति, अनेन प्रच्छादनेन पयस्यायां पिधानेन ॥

चतुर्धेति ॥ प्रतिदिशं पयस्यां [V]व्यूहति पुरोडाशं [V]चतुर्धा कृत्वा व्यूहति। एतेन [V]दिक्षु प्रतिष्ठितो भवति ॥

पुनः समूहतीति ॥ [७]दिग्भ्यः अवकृष्य[७] समूहीकरोति। [V]दिग्भ्यः [V]एव आकृष्य [V]अस्मै यजमानाय [V]भेषजं पापरोगशमनं [V]करोति ॥

कृतं [१३]पुण्यमुपलक्ष्यते। [१४]तत्पुण्यानुष्ठानमेव [V]एतस्मात् यजमानात् [१५]यदि [V]अपक्रामति तदानीम् [V]एषः [V]पाप्मना [V]गृहीतः भवति। यदि अत्र हविः [V]पयस्या भवेत् तर्हि [V]अस्मिन् यजमाने [V]तया पयस्यया [१६-]आहारोपलक्षितं पुण्यमाहितं[-१६] भवति ॥

पयस्यायामिति ॥ [१७]अथाप्राप्तं [१८]कंचिदंशविशेषं विधत्ते- 'पयस्यायां पुरोडाशमव दधात्यात्मन्वन्तमेवैनं करोत्यथो आयतनवन्तमेव' इति ॥ शरीरसदृशस्य कठिनस्य पुरोडाशस्य [१९]प्रक्षेपेण [V]एनं यजमानम् [V]आत्मन्वन्तं दृढशरीरोपेतं [V]करोति। सति हि पापे तज्जन्यरोगेण शरीरस्यादार्ढ्यम्। किं च [२०-]पयस्याया आधारत्वेन[-२०] [२१-]यजमानोऽप्यायतनवान् गृहग्रामादिरूपाधारवान् भवति[-२१] ॥

चतुर्धेति ॥ 'या वामिन्द्रावरुणा' इत्यादिमन्त्रैर्हविषो विभागं विधत्ते- 'चतुर्धा व्यूहति दिक्ष्वेव प्रति तिष्ठति' इति ॥

पुनरिति ॥ विभक्तस्यैकीभावं विधत्ते- 'पुनः समूहति दिग्भ्य एवास्मै भेषजं करोति' इति ॥

७-७. तं१.तं२- कर्तव्यमपकृष्य; लं- कर्तव्यं चावकृष्य।

१३. हा-प्रभावमु°। १४. ड.हो१- तत्पुण्यमेव। १५. ड.शृं- यदा। १६-१६. अ.इ.शृं- क्षीरोपलक्षितं पुण्यं। १७. ड-'अथ' नास्ति। १८. शृं- कंचिदङ्गविशेषं। १९. क.हा- प्रक्षेपणेन। २०-२०. अ.आ.इ- पयस्याधारत्वेन। २१-२१. आ.ना.जो-यजमानमप्यायतनवन्तं गृहग्रामादिरूपाधारवन्तं; अ-यजमानो...रूपाधारोपेतो भवति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

समूह्यावं द्यति यथाऽऽविद्धं निष्कृन्तति तादृगेव तद्यो वामिन्द्रावरुणावग्नौ स्रामस्तं वामेतेनावं यज इत्याह दुरिष्ट्या एवैनं पाति (३) यो वामिन्द्रावरुणा द्विपात्सु पशुषु स्रामस्तं वामेतेनावं यज

समूह्येति सम्-ऊह्य। अवेति। द्यति। यथा। आविद्धमित्या-विद्धम्। निष्कृन्ततीति निः–कृन्तति। तादृक्। एव। तत्। यः। वाम्। इन्द्रावरुणावितीन्द्रा-वरुणौ। अग्नौ। स्रामः। तम्। वाम्। एतेन। अवेति। यजे। इति। आह। दुरिष्ट्या इति दुः–इष्ट्याः। एव। एनम्। पाति (३)। यः। वाम्। इन्द्रावरुणेतीन्द्रा-वरुणा। द्विपात्स्विति द्विपात्-सु। पशुषु। स्रामः। तम्। वाम्। एतेन। अवेति। यजे।

समूह्येति ॥ पयस्यया सह पुरोडाशस्य [v]अवद्यति। यथेति। [v]आविद्धं दोषेण पीडितं [v]निष्कृन्तति कर्तनेन [c]निष्कालितदोषं करोति [१-v]तादृक् इदं[-१] समूह्यावदानम्। १०

'यो वाम्' इत्यादय उक्ता उपहोमाः। दुरिष्ट्या [१०]इत्यादि। अग्नौ कृतं पापं दुरिष्टिरेवेति। "तादौ च°" (पा ६·२·५०) इति गतेः प्रकृतिस्वरत्वम् ॥

'यो वामिन्द्रावरुणा द्विपात्सु पशुषु स्रामः' इति द्वितीयमन्त्रं दर्शयति। उपलक्षणं चैतत् तृतीयादीनाम्। एतावतीर्वा इत्यादि। प्रजायन्त इति प्रजाः। "अन्येष्वपि दृश्यते" (पा ३·

समूह्येति ॥ मिश्रितयोः पुरोडाशामिक्षयोः [२३]सहावदानं विधत्ते– 'समूह्याव द्यति यथाऽऽविद्धं निष्कृन्तति तादृगेव तत्' इति ॥ [v]यथा लोके वैरिणा मुक्तम् [v]आविद्धं [२३-]स्वशरीरे बाणादिकं[-२३] संदंशादिना निष्कृष्य [२४]छिनत्ति [v]तादृक् [v]एव [v]तत् [v]समूह्य अवदानं संपद्यते ॥ १५

य इति ॥ [२५]उपहोमेषु प्रथममन्त्रं व्याचष्टे– 'यो वामिन्द्रावरुणाग्नौ स्रामस्तं वामेतेनाव यज इत्याह दुरिष्ट्या एवैनं पाति' इति ॥ होमाधारे अग्नौ [२६]कृतेन स्रामेणापराधेन दुरिष्टिर्भवति [v]तम् अपराधम् [v]अव [v]यजे [v]इति उक्त्या तस्या दुरिष्टेः सकाशात् [v]एनं यजमानं रक्षति ॥ २०

य इति ॥ अवशिष्टानां मन्त्राणां तात्पर्यं दर्शयति– 'यो वामिन्द्रावरुणा द्विपात्सु पशुषु स्रामस्तं वामेतेनाव यज इत्याहैतावतीर्वा आप ओषधयो वनस्पतयः प्रजाः पशव उपजीवनीयास्ता एवास्मै वरुणपाशान्-मुञ्चति' इति ॥ 'पशुषु स्रामस्तं वाम्' इत्येवमनुषङ्गो योजयित्वा प्रदर्शितः। [२७]प्राणिभिरुपजीवनयोग्या

८. तं१.तं२.पं२.लं– निष्कलितदोषम्। ९–९. तं१.तं२.मै.लं– तादृशीदम्। १०. तं१.तं२.मै.लं– इति। २५

२२. अ.इ– सकृदवदानं। २३. उ.पा.हा– स्वशरीरादिकं। २४. क.हा.हो१–आच्छिनत्ति। २५. आ–उपहोमे। २६. क.ड.जो.ना.पा.हा–घृतेन। २७. आ.उ.क.जो.ना.पा.हा.हो१–प्राण्युप°; अ.इ–प्राणिनामुप°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

इत्याहैतावतीर्वा आप ओषधयो वनस्पतयः प्रजाः पशव उपजीवनीयास्ता एवास्मै वरुणपाशान्मुञ्चति ॥ १३ ॥

[एतस्य पयस्यायां पाति षड्विंशतिश्च ।]

इति । आह । एतावतीः । वै । आपः । ओषधयः । वनस्पतयः । प्रजा इति प्र - जाः । पशवः ।
उपजीवनीया इत्युप - जीवनीयाः । ताः । एव । अस्मै ।
वरुणपाशादिति वरुण - पाशात् । मुञ्चति ॥ १३ ॥

[मैसं २.३.१; कासं ११.११]

२.१०१) इति डः । [v]आपः [v]ओषधयः [v]वनस्पतयः [v]पशवः च द्विप्रकारा इत्येतावत्यः [v]प्रजाः प्राणिनाम् [v]उपजीवनीयाः । [११]तस्मादुपजीव्यत्वात् एषामेव मन्त्रेषूपादानं, न [१२]सर्पादीनामिति भावः । [१३]एताश्च एतैरुपहोमैः [v]वरुणपाशात् [v]मुञ्चति [v]अस्मै यजमानाय । यथास्यापहतपाप्मान [१४]उपजीव्याः स्युरिति ।

इति द्वितीये तृतीये त्रयोदशोऽनुवाकः ॥

अवादयः पञ्च पदार्थाः । तत्र पशुशब्देन द्विपादश्चतुष्पादश्च गृह्यन्ते । [२८-२८]गृहा अप्यत्रोपलक्ष्यन्ते[२८-२८] । या एतावत्यः [v]उपजीवनीयाः [v]ताः सर्वा अपि यजमानार्थं [v]वरुणपाशात् उपद्रवान्मोचयन्ति ॥

अत्र [२९]विनियोगसंग्रहः

या वामिति चतुर्मन्त्रैश्चतुर्धा व्यूहते हविः ।
यो [३०]वामित्यष्टभिर्मन्त्रैरुपहोमा [३१]इहेरिताः ॥ १ ॥
द्विपात्स्विति[v]त्यादिना मन्त्रभेदः सप्तविधो भवेत् ।
त्रयोदशोऽनुवाकेऽस्मिन् मन्त्रा द्वादश [३२]वर्णिताः ॥ २ ॥ इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

११. तं१.तं२.मै.लं – °पजीवनत्वात् । १२. तं१.तं२.मै.लं – सर्वादीनाम् । १३. मै४– 'एताश्च' नास्ति । १४. तं१.तं२.मै.लं– उपजीवाः ।

२८–२८. अ.इ– 'गृहा...लक्ष्यन्ते' नास्ति । २९. शृं– संग्रहश्लोकाः । ३०. अ.इ.ड.शृं हो१– वामित्यादिभिर्मन्त्रैरुपहोमाः । ३१. अ.आ.इ.उ.जो.ना.पा– उदीरिताः । ३२. उ.क.जो.ना.पा. हा– कीर्तिताः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

स प्रत्नवन्नि काव्येन्द्रं वो विश्वतस्परीन्द्रं नरः ॥

सः । प्रत्नवदिति प्रत्न - वत् । नीति । काव्या । इन्द्रम् । वः । विश्वतः । परीति । इन्द्रम् । नरः ॥

अथेष्टिकाण्डे याज्याकाण्डम् । तत्र– " यो यज्ञविभ्रष्टः स्यात् तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालमैन्द्रमेकादशकपालं सौम्यं चरुम् " (तैसं २·३·३) इत्येतस्याः त्रिहविषः आग्नेयस्य पुरोऽनुवाक्या– ' स प्रत्नवत् ' इति गायत्री ॥ व्याख्यातेयं–" हिरण्यगर्भः " (तैसं २·२·१२) इत्यत्र । इह तु प्रतीकग्रहणम् । हे [V]अग्ने, [V]सः त्वं [V]प्रत्नवत् प्रागिव । यद्वा - पुराणो हि । [V]नवीयसा नवतरेण [V]द्युम्नेन यशसा [V]संयता त्वामेव संगच्छता [[V]भानुना भासनशीलेन] [V]बृहत् [V]ततन्थ भृशं विश्वं विस्तारयेति ॥

तत्रैव याज्या– ' नि काव्या ' इति त्रिष्टुप् ॥ इयमपि तत्रैव (तैसं २·२·१२) व्याख्याता । इदं च प्रतीकग्रहणम् । [V]काव्या कवित्वेन द्रष्टृत्वेन आत्मीयेन [V]वेधसः यजमानान् [V]शश्वतः अविच्छिन्नयागान् [V]नि [V]कः नियमेन करोतु । [V]नर्या नर्याणि नरेभ्यो हितानि [V]पुरूणि बहूनि धनानि [V]हस्ते [V]दधानः ददानः । एवं कुर्वन्नयम् [V]अग्निः [V]रयीणां सर्वेषां संबन्धी [V]रयिपतिः भवतु । विश्वान्यपि [V]अमृतानि अमरणहेतुभूतानि [V]सत्रा सहभूतानि हिरण्यादीनि [V]चक्राणः सोऽस्माकं यज्ञविभ्रेषदोषम् अपनयत्विति ।

अथैन्द्रस्य पुरोऽनुवाक्या– ' इन्द्रं वः ' इति गायत्री ॥ इयमपि [1]षष्ठान्ते (तैसं १·६·१२) व्याख्याता । प्रतीकमत्र गृह्यते । हे ऋत्विग्यजमानाः, [V]वः युष्माकं [V]जनेभ्यः पुत्रादिभ्यः युष्मभ्यमस्मभ्यं च सर्वार्थं [2V]विश्वतः उपरि स्थितम् [V]इन्द्रं [V]हवामहे आह्वयामः । यद्वा–[3]विश्वस्मात् उपरि आह्वयामः । [V]अस्माकम् एव [V]केवलः साधकः यज्ञविभ्रेषादिदोषापनयनेन स्वामी भवत्विति ॥

तत्रैव याज्या– ' इन्द्रं नरः ' इति त्रिष्टुप् ॥ इयमपि तत्रैव (तैसं १·६·१२) व्याख्याता । प्रतीकग्रहणमिदम् । [V]नरः मनुष्याः [V]इन्द्रम् एव [V]नेमधिता सर्वेषां हविषामर्धेन

विहिता पापिनस्त्वष्टिरनुवाके त्रयोदशे ॥

स इति ॥ अथास्मिन्नन्तिमे चतुर्दशेऽनुवाके काम्ययाज्या[पुरोनुवाक्याः] उच्यन्ते ॥ तत्र त्रिहविष्का [1-]येयं यज्ञविभ्रेष्टेष्टिः[-1] तृतीयानुवाके समाम्नाता, तस्यां प्रथमद्वितीययोर्हविषोः क्रमेण [2]याज्यानुवाक्ययोः प्रतीकं दर्शयति–' स प्रत्नवन्नि काव्येन्द्रं वो विश्वतस्परीन्द्रं नरः ' इति ॥ ' स प्रत्नवन्नवीयसा ' [3]इत्यनुवाक्या, ' नि काव्या वेधसः ' इति याज्या । एतदुभयमाग्नेये हविषि द्रष्टव्यम् । तच्च " [4-]हिरण्यगर्भ

१. मै४– इष्ट्यन्तरे । २. मै४– विश्वस्य । ३. मै४– विश्वस्या ।

१–१. उ.क.जो.ना.पा.हा– विभ्रष्टेष्टिः; शृं.हो–यज्ञविभ्रष्टेष्टिः । २. अ.इ– याज्यानुवाक्यासु; जो.हा–याज्यानुवाक्यायाः । ३. ड.शृं.हो१– इति पुरोनुवाक्या । ४. इ–पूर्वमेव; अ– उभयमपि द्वितीयप्रपाठके ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः । न रिष्येत् त्वावतः सखा ॥

त्वम् । नः । सोम । विश्वतः । रक्ष । राजन् । अघायत इत्यघ - यतः ।
न । रिष्येत् । त्वावत इति त्व - वतः । सखा ॥

धार्यं भवते आहुयामि [आह्वयन्ति]। [४]कदा ? यदा [v]पार्याः परलोकाय हिताः [५-]परप्राप्तेर्वा साध्वीर्वा[-५] [v]धियः कर्माणि [v]ताः इन्द्रमेवापेक्षमाणाः [v]युनजते युञ्जते । तस्मात् सः [v]त्वं [v]शूरः [v]नृषाता नृभिः संभक्ता [v]शवसः बलस्य नृभ्यो दाता [६-]तेन वा[-६], इत्थंभूतः [v]चकानः तृप्तिशीलः [v]गोमति [v]व्रजे अस्मान् [v]आ [v]भज यज्ञविश्रेषदोषापनयनेन गोमतोऽस्मान् कुर्विति ॥

अथ सौम्यस्य पुरोऽनुवाक्या– ' त्वं नः ' इति गायत्री । हे [v]सोम [v]राजन्, [v]नः[७] अस्मान् [v]विश्वतः विश्वस्मात् [v]अघायतः अघं पापम् अस्माकमिच्छतः जनात् [v]रक्ष । " छन्दसि परेच्छायामपि " (द्र. पाभा ३·१·८) इति क्यच्, " अश्वाघस्यात् " (पा ७·४·३७) इत्वात्वम्, " शतुरनुमः° " (पा ६·१·१७३) इति विभक्तेरुदात्तत्वम् । [v]त्वावतः त्वत्सदृशस्य । " युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् " (पा ५·२·३९ वा १) इति वतिः, " आ सर्वनाम्नः " (पा ६·३·९१) इत्यात्वम् । त्वावतः हि [v]सखा कश्चिदपि [v]न [v]रिष्येत् यज्ञविश्रेषादिभिः हिंस्यो भवितुं नार्हति । तस्मात् तदनुरूपमस्मान् रक्ष । " द्व्यचोऽतस्तिङः " (पा ६·३·१३५) इति संहितायां रक्षेत्यस्य दीर्घत्वम् ॥

आपो इ " (तैसं २·२·१२) इत्यस्मिन्ननुवाके[४] व्याख्यातम् । ' इन्द्रं वो विश्वतस्परि ' इत्यनुवाक्या, ' इन्द्रं नरो नेमधिता ' इति याज्या । [५]एतदुभयमैन्द्रे हविषि द्रष्टव्यम् । तच्च प्रथमकाण्डस्य षष्ठप्रपाठके, व्याख्यातम् (तैसं १·६.१२) ॥

त्वमिति ॥ अथ सौम्यस्य हविषः पुरोनुवाक्यामाह–' त्वं नः सोम विश्वतो रक्षा राजन्नघायतः । न रिष्येत् त्वावतः सखा ' इति ॥ अघं पापम् अस्मदुपद्रवमिच्छन्नघायंस्तस्मात् पापसंघात् [v]विश्वतः सर्वस्मात् [v]नः अस्मान् हे सोमराजन्, [v]त्वं [v]रक्ष । [v]त्वावतः त्वादृशस्य प्रभोः [v]सखा कश्चित् समर्थोऽपि त्वदनुग्रहात् न [v]रिष्येत् अस्मान्न हिनस्ति ॥

४. तं१.तं २– तदा। ५–५. मै४– दुःखपारप्राप्तौ साधवो वा। ६–६. तं१.तं२– वा।
७. तं१.तं२– ' नः ' नास्ति।

५. शृं– तदुभय°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेडन् राजन्त्सोम प्रति हव्या गृभाय ॥
अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥

या । ते । धामानि । दिवि । या । पृथिव्याम् । या । पर्वतेषु । ओषधीषु । अप्स्वित्यप् - सु ।
तेभिः । नः । विश्वैः । सुमना इति सु - मनाः । अहेडन् । राजन् । सोम । प्रतीति । हव्या । गृभाय ॥ ५
अग्नीषोमेत्यग्नी - सोमा । सवेदसेति स - वेदसा । सहूती इति स - हूती । वनतम् । गिरः ।
समिति । देवत्रेति देव - त्रा । बभूवथुः ॥

तत्रैव याज्या– ' या ते ' इति त्रिष्टुप् ॥ हे [v]सोम [v]राजन्, [v]या यानि [v]ते तव [v]धामानि स्थानानि नामानि [८]वा, जन्मानि वा तेजांसि वा [v]दिवि सन्ति, यानि च [v]पृथिव्यां[९] यानि च [v]पर्वतेषु, यानि [v]ओषधीषु, यानि वा [v]अप्सु, [v]तेभिः तैः [v]विश्वैः धामभिः [१०]नामभिः १०
सर्वात्मनाऽस्मभ्यम् उपकुर्वद्भिः, स्थानैर्वा सर्वत्र संनिधानहेतुभिः, जन्मभिर्वा नानोपकारहेतुभिः, तेजोभिर्वा [११]सर्वदोषोपशमनैः [v]अहेडन् अक्रुध्यन् [१२]आह्वानादिकं सहमानः अपि तु [v]सुमनाः सानुग्रहमना एव भूत्वा । " सोर्मनसी° " (पा ६·२·११७) इत्युत्तरपदाद्युदात्तत्वम् । हेडृ अनादरे । अस्माकं हव्यानि [v]प्रति [v]गृभाय प्रतिगृह्याण । " छन्दसि शायजपि " (पा ३·१·८४), " ह्वग्रहोर्भः° " (पा ८·२·३२ वा १) इति भत्वम् । प्रतिगृह्य चास्माकं भ्रेषदोषम् [१३]अपनयेति ॥ १५

" अग्नीषोमीयमेकादशकपालं निर्वपेद्यं कामो नोपनमेत् " (तैसं २·३·३) [१४]इत्यस्याः पुरोनुवाक्या– ' अग्नीषोमा ' इति गायत्री ॥ हे [v]अग्नीषोमा अग्नीषोमौ । पूर्ववदाकारः, " ईदग्नेः सोमवरुणयोः " (पा ६·३·२७) इति ईकारः, " अग्नेः स्तुत्स्तोमसोमाः " (पा ८·३·८२)

**येति ॥ तत्रैव याज्यामाह– ' या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु । तेभिर्नो विश्वैः सुमना अहेडन् राजन्त्सोम प्रति हव्या गृभाय ' इति ॥ हे [v]सोम [v]राजन्, [v]ते तव [v]दिवि पृथि- २०
व्यादिषु च प्रदेशेषु यानि [v]धामानि स्थानानि सन्ति, प्रतिप्रदेशं पृथगनुवादार्था यच्छब्दावृत्तिः । [v]तेभिः [v]विश्वैः तैः सर्वैः स्थानैर्युक्तः शोभनमनस्कः क्रोधरहितः सन् [v]नः अस्माकं [v]हव्या हवींषि [v]प्रति [v]गृभाय प्रतिगृहाण । यस्मिन् स्थाने त्वं स्थितस्तत आगत्य हविः स्वीकुर्वित्यर्थः ॥**

अग्नीषोमा इति ॥ " अग्नीषोमीयमेकादशकपालं निर्वपेद्यं कामो नोपनमेत् " (तैसं २·३·३) इत्यत्र पुरोनुवाक्यामाह – ' अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ' इति ॥ हे २५

८. मै४. ' वा ' नास्ति । ९. मै४– ' पृथिव्याम् ' इत्यस्यानन्तरं ' सन्ति ' । १०. लं–' नामभिः ' नास्ति । ११. तं१.तं२.मै.लं– सर्वदोषक्षालनैः । १२. तं१.तं२.मै – अस्यानादिकः (?); पं२– आस्यानादीकः (?) १३. मै४– अपनयीत्वति । १४. तं१.तं२.मै.लं– इत्यस्य ।

तैसं. . .३२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युवमे(१)तानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् ।
युवꣳ सिन्धूꣳरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् ॥

युवम् (१) । एतानि । दिवि । रोचनानि । अग्निः । च । सोम । सक्रतू इति स-क्रतू । अधत्तम् ।
युवम् । सिन्धून् । अभिशस्तेरित्यभि - शस्तेः । अवद्यात् ।
अग्नीषोमावित्यग्नी - सोमौ । अमुञ्चतम् । गृभीतान् ॥

इति षत्वम् । युवां [V]सवेदसा सवेदसौ समानधनौ [V]सहूती समानहूतौ समानाह्वानौ । " समानस्य छन्दसि° " (पा ६·३·८४) इति सभावः । ईदृशौ युवां [V]वनतं भजतम् अस्माकं [V]गिरः स्तुतिवचनानि । [V]देवत्रा देवांश्च [V]सं [V]बभूवथुः संगतौ भवतः । प्रमाणानतिरेकः संभवः । देवानाम् अप्याराध्यत्वेन वर्तेथाम् । यद्वा-युवां सवेदसा सहूती देवत्रा देवेष्वपि देवोपकारेष्वपि संबभूवथुः संगतौ भवतः । " देवमनुष्य° " (पा ५·४·५६) इति त्राप्रत्ययः । तौ युवाम् अस्माकमपि काममुपनयतमिति ॥

तत्रैव याज्या-' युवमेतानि ' इति त्रिष्टुप् ॥ हे [V]सोम, त्वं [V]च [V]अग्निः [V]च [V]युवं युवाम् [V]एतानि प्रसिद्धानि [V]दिवि स्थितानि [V]रोचनानि दीपनशीलानि ग्रहनक्षत्रादीनि [V]अधत्तम् [१५]अधारयताम् । छान्दसो लङ् । यद्वा-युवामेव रोचनानि दिवि अधत्तं स्थापितवन्तौ । [V]सक्रतू [V]समानकर्माणौ । किं च युवामेव [V]सिन्धून् नदीः । स्यन्दनात् सिन्धवः । रुत्वानुनासिकौ उक्तौ । [V]अभिशस्तेः पातकाद्यारोपात् पापात् [V]अवद्यात् परिवादपापाच्च तत्स्थानीयात् कालुष्यादिदोषात् [V]अमुञ्चतम् । [V]गृभीतान् तेन दोषेण गृहीतानापि तान् सिन्धूनपि अमुञ्चतम् । तस्मादेवं महानुभावौ युवामस्माकं काममुपनयतम् इति ॥

[V]अग्नीषोमौ [V]गिरः अस्मदीयाः स्तुतीः [V]वनतं भजतम् । कीदृशौ ? [V]सवेदसा समानज्ञानयुक्तौ [V]सहूती समानाह्वानयुक्तौ । [V]देवत्रा देवेषु मध्ये [V]सं [V]बभूवथुः युवां [६-]संभूयैव सन्तौ[-६] न कदाचिदप्यन्योऽन्यं वियुक्तावित्यर्थः ॥

युवमिति ॥ तत्रैव याज्यामाह- ' युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् । युवꣳ सिन्धूꣳरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् ' इति ॥ हे [V]सोम, त्वम् [V]अग्निः [V]च इत्येतौ युवां [V]सक्रतू समानसंकल्पौ सन्तौ [V]दिवि [V]एतानि [V]रोचनानि नक्षत्रादीनि [V]अधत्तम् अस्थापयतम् । हे अग्नीषोमौ, युवां [V]गृभीतान् [V]सिन्धून् [७]मध्योदकादिनिमित्तेनापूर्णत्वापवादेन पङ्कादिरूपेण [८]अवद्येन [९]दोषेण च गृहीताः सर्वा नदीः [V]अभिशस्तेः तस्मादपवादात् [V]अवद्यात् पङ्कादिदुष्टदोषाच्च [V]अमुञ्चतं मोचितवन्तौ । यद्यप्येतत् सर्वमीश्वरकृत्यं तथापि तद्रूपत्वेनैतौ स्तूयेते ॥

१५. तं१.तं२.मै.लं- धारयथः ।

६-६. शृं.हो१-संभूयावस्थितौ । ७. ड.शृं-रथ्योदकादि°; [द्र. कलकत्तामुद्रितपुस्तके तलटिप्पण्यां -'अगाधोदकादि']। ८. आ.क- दुष्टेन । ९. जो.पा- दोषिणश्च; इ.उ- दूषिणश्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नीषोमाविमꣳ सु मे शृणुतं वृषणा हवम् । प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥
आऽन्यं दिवो मातरिश्वा जभाराऽमथ्नादन्यं परि श्येनो अद्रेः ।
अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् ॥

अग्नीषोमावित्यग्नी - सोमौ । इमम् । स्विति । मे । शृणुतम् । वृषणा । हवम् ।
प्रतीति । सूक्तानीति सु - उक्तानि । हर्यतम् । भवतम् । दाशुषे । मयः ॥ ५
एति । अन्यम् । दिवः । मातरिश्वा । जभार । अमथ्नात् । अन्यम् । परीति । श्येनः । अद्रेः ।
अग्नीषोमेत्यग्नी - सोमा । ब्रह्मणा । वावृधाना । उरुम् । यज्ञाय । चक्रथुः । उ । लोकम् ॥

" अग्नीषोमीयमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकामः " (तैसं २.३.३) [१५]इत्यस्य पुरोऽनुवाक्या— ' अग्नीषोमौ ' इत्यनुष्टुप् ॥ हे [V]अग्नीषोमौ [V]वृषणा कामानां वर्षितारौ । " सुपां सुलुक्° " (पा ७.१.३९) इत्याकारः । [V]इमं [V]मे [V]हवम् आह्वानं [V]सु [V]शृणुतं सुष्ठु [V]शृणुतम् १०
आह्वानप्रयोजनं यथावत् कुरुतम् इति यावत् । " भावेऽनुपसर्गस्य " (पा ३.३.७५) इति ह्वयतेः अप्, संप्रसारणं च । किं च—श्रुत्वाऽऽह्वानम् अस्माकं [V]सूक्तानि [V]प्रति [V]हर्यतं मनसा प्रतिगृह्णीतम् । हर्य गतौ । तथा कृत्वा [V]दाशुषे हविर्दत्तवते [१७]तस्मै यजमानाय [V]मयः [१८]सुखं तद्धेतू[-१८] [V]भवतम् ॥

[१९]अत्रैव याज्या—' आऽन्यं दिवः ' इति त्रिष्टुप् ॥ उपरिष्टाल्लक्षणत्वात्[२०] (द्र तैसं २.६.२) १५
त्रिष्टुप्त्वाच्च केचिदिमां याज्यामाहुः । आचार्यस्तु इमां विहाय " अग्नीषोमा हविषः " इत्युत्तरां याज्यां दर्शितवान् (बोश्रौ १३.२६) । तत्र विकल्पः । [V]अन्यम् एकं युवयोर्मध्ये अग्निं

**अग्नीषोमाविति ॥ " अग्नीषोमीयमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकामः " (तैसं २.३.३) इत्यत्र पुरोनुवाक्यामाह— ' अग्नीषोमाविमꣳ सु मे शृणुतं वृषणा हवम् । प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ' इति ॥ हे [V]अग्नीषोमौ [V]वृषणा कामानां वर्षयितारौ, युवां [V]मे मदीयम् इमं [V]हवम् आह्वानं सुष्ठु [V]शृणुतं २०
[V]सूक्तानि [१०]अस्मदीयानि [V]प्रति [V]हर्यतं मनसा प्रतिगृह्णीतं, [V]दाशुषे हविर्दत्तवते यजमानाय [V]मयः सुखं [V]भवतं संपादयतम् ॥**

**एति ॥ तत्रैव याज्यामाह— ' आऽन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः । अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् ' इति ॥ [V]मातरिश्वा वायुः [V]अन्यं युवयोरेकमग्निं [V]दिवः द्युलोकस्थादादित्यात् [V]आ [V]जभार आहृतवान् । तथा चान्यत्र मन्त्र आम्नायते— " आ दूतो २५
अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः " (ऋसं ६.८.४) इति । [V]श्येनः गायत्र्याः पक्षिरूपावतारो**

---

१६. मै४—इत्यस्याः । १७. मै४— अस्मै । १८—१८. तं१.तं२.मै.लं— सुखहेतू । १९. मै४— तत्रैव । २०. तं१.तं२.मै.लं— °लक्षणा ।

---

१०. इ.उ.जो.पा— सूक्तसदृशानि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नीषोमा हविषः प्रस्थितस्य वीतꣳ (२) हर्यतं वृषणा जुषेथाम्।
सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥

अग्नीषोमेत्यग्नी - सोमा। हविषः। प्रास्थितस्येति प्र - स्थितस्य।
वीतम् (२)। हर्यतम्। वृषणा। जुषेथाम्।
५ सुशर्माणेति सु - शर्माणा। स्ववसेति सु - अवसा। हि। भूतम्।
अथ। धत्तम्। यजमानाय। शम्। योः ॥

[V]दिवः आदित्यात् [V]मातरिश्वा वायुः [11]प्राणप्रवृत्तिरूपः [V]आ [V]जभार आजहार आनीतवान्, यथा—"आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः" (ऋसं ६·८·४) इति। [V]अन्यम् एकं सोमं [V]श्येनः, गायत्री श्येनो भूत्वा [V]अद्रेः उच्छ्रितात् स्थानात् तृतीयस्या दिवः [V]परि १० [V]अमथ्नात् आहरत्। तस्मात् हे[22] [V]अग्नीषोमौ एवं महानुभावौ [V]ब्रह्मणा ऋगादिना मन्त्रेण परिवृढेन वा अनेन हविषा [V]वावृधाना वावृधानौ वर्धमानौ। ताच्छीलिकश्चानश् (पा ३·२·१२९), "तुजादीनाम्° " (पा ६·१.७) इत्यभ्यासस्य दीर्घत्वं, पूर्ववदात्वम्। [V]उरुं विस्तीर्णं लोकं स्थानं यत्र यजमानो गच्छति तादृशं [V]यज्ञाय यज्ञवते यजमानाय। यद्वा— यज्ञाय यज्ञफलभोगार्थं यजमानाय। [V]लोकं [V]चक्रथुः [23]उरुं कुरुतम्। [V]उ इति पादपूरणः अवधारणार्थो वा। तदर्थमस्मै १५ ब्रह्मवर्चसं दत्तमिति ॥

अथ याज्याविकल्पः— 'अग्नीषोमा हविषः' इति त्रिष्टुप्॥ हे [V]अग्नीषोमौ, [V]हविषः [V]प्रस्थितस्य उपस्थितस्य प्रारब्धस्य वा [V]वीतं खादतम्। वी गत्यादिषु, आदादिकः। [V]हर्यतं मनसा

[V]अन्यं युवयोरेकं सोमम् [V]अद्रेः [V]परि [11]पर्वतवदुन्नततमस्य द्युलोकस्योपरि [V]अमथ्नात् सोमरक्षकाणां तत्रत्यानां मन्थनं विलोडनं पराजयरूपं क्षोभं कृत्वा समानीतवानित्यर्थः॥ एतच्च—"कद्रूश्च वै सुपर्णी २० च" (तैसं ६·१·६) इत्यस्मिन्ननुवाके समाम्नातम्। हे [V]अग्नीषोमौ, युवां [V]ब्रह्मणा [V]वावृधाना मन्त्रेण वर्धमानौ यज्ञार्थम् [V]उरुं [V]लोकं विस्तीर्णं स्थानं [12-V]चक्रथुः उ-[12] कृतवन्तावेव यजमानस्य फलभूतं लोकं संपादितवन्तावित्यर्थः॥

अग्नीषोमा इति॥ तत्रव विकल्पितां याज्यामाह— 'अग्नीषोमा हविषः प्रस्थितस्य वीतꣳ हर्यतं वृषणा जुषेथाम्। सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः' इति॥ हे अग्नीषोमौ २५ [V]वृषणा कामानां वर्षयितारौ युवां [V]प्रस्थितस्य समर्पितस्य [V]हविषः सारं [V]वीतं प्राप्नुतं [V]हर्यतं प्रतिगृह्णीतं [V]जुषेथां सेवेथां, [V]सुशर्माणा शोभनसुखयुक्तौ [V]स्ववसा शोभनरक्षणोपेतौ [V]भूतं भवतम्। [V]हि यस्मादेवं तस्मात् [V]अथ अनन्तरं [V]यजमानाय यजमानार्थं [V]शं सुखं [V]योः पुत्रादिमिश्रणं च धत्तं कुरुतम्॥

२१. तं१.तं२.मै.लं— प्राणवृति°। २२. मै—वै। २३. तं१.तं२.मै.लं— 'उरुं' नास्ति।

११. हा— पर्वतस्य तदुन्नत°। १२-१२. ड.हो१—चक्रथुः; शृं— चक्रथुः उरु।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आ प्यायस्व॒ ❀ सं ते॑ ❀ ॥

एति॑ । प्या॒य॒स्व॒ । समिति॑ । ते॒ ॥

प्रतिगृह्णीतं स्पृहयतम् । " °अदुपदेशात्° " (पा ६·१·१८६) इति लसार्वधातुकानुदात्तत्वे धातुस्वरः । [v]जुषेथां नित्यं सेवेथाम् । पूर्ववल्लसार्वधातुकानुदात्तत्वे शस्योदात्तत्वम् । हे [v]वृषणा वर्षितारौ कामानां युवां [v]सुशर्माणा सुशर्माणौ सुग्रहौ सुसुखौ वा [v]स्ववसा स्ववसौ शोभनरक्षणौ । ५
उभयत्र पूर्ववदात्वम् । " सोर्मनसी° " (पा ६·२·११७) इत्युत्तरपदाद्युदात्तत्वम् । ईदृशौ युवां यजमानौ [v]भूतं भवतम् । " बहुलं छन्दसि " (पा २·४·७३) इति शपो लुक्, " हि च " (पा ८·१·३४) इति निघाताभावः । [v]अथ अनन्तरं [v]यजमानाय [v]धत्तं दत्तं [v]शं शमनं रोगाणां [v]योः यावतश्च आगामिनां भयानाम् । शाम्यतियौतिभ्यां व्यत्ययेन भावे विचि वचनव्यत्ययः । यौतेर्वा असुनि अडादेशाभावः । अपदान्तेऽपि पूर्ववद्भुत्वं, णिद्वद्भावाभावश्च । ब्रह्मवर्चसिनं च कुरुतमिति ॥ १०

" सोमाय वाजिने श्यामाकं चरुं निर्वपेद्यः क्लैब्यात् बिभीयात् " (तैसं २·३·३) इत्यस्य पुरोऽनुवाक्या–' आ प्यायस्व ' इति गायत्री ॥ इयमग्निकाण्डे व्याख्यास्यते यत्राऽऽम्नायते प्रकृतौ " [२४]मा नो हिꣳसीत्[-२४] " (तैसं ४·२·७) इत्यत्र । इह तु प्रतीकग्रहणम् । हे [v]सोम, तव प्रसादात् [v]वृष्णियं वीर्यं [v]विश्वतः [v]समेतु [२५]समागच्छतु । त्वदर्थं च माम् [v]आ [v]प्यायस्व । किं च [v]वाजस्य अन्नस्य [v]संगथे संगमनार्थं [v]भव इति ॥ १५

तत्रैव याज्या– ' सं ते ' इति त्रिष्टुप् ॥ इमामपि तत्रैव (तैसं ४·२·७) व्याख्यास्यामः । इह तु प्रतीकग्रहणमस्याः । हे [v]सोम तव प्रसादात् [v]पयांसि [v]वाजाः [v]वृष्ण्यानि च मां समागच्छन्तु[२६] । [v]अभिमातिषाहः, अभिमातिः पाप्मा क्लैब्यहेतुः, तस्याभिभवितुः तव । किं च [v]अमृताय अमृतत्वार्थम् [v]आप्यायमानः [v]दिवि [v]श्रवांसि अन्नानि [v]उत्तमानि [v]धिष्व स्थापयेति ॥

" ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद्ग्रामकामः " (तैसं २·३·३) इत्यस्य[२७] २०
पुरोऽनुवाक्या–' गणानां त्वा ' इति जगती ॥ हे [v]ब्रह्मणः परिवृढस्य कर्मणो वा [v]पते पालयितः । " षष्ठ्याः पतिपुत्र° " (पा ८·३·५३) इति सत्वम्, " सुबामन्त्रिते° " (पा २·१·२) इति

एति ॥ " सोमाय वाजिने श्यामाकं चरुं निर्वपेत् " (तैसं २·३·३) इत्यत्र याज्यानुवाक्ययोः प्रतीके दर्शयति–' आ प्यायस्व सं ते ' इति ॥ ' आ प्यायस्व समेतु ते ' इत्येषा पुरोनुवाक्या, ' सं ते पयाꣳसि ' इत्येषा याज्या । एते उभे चतुर्थकाण्डस्य द्वितीयप्रपाठके " मा नो हिꣳसीज्जनिता " (तैसं ४·२·७) इत्यस्मिन्ननुवाके समाम्नास्येते अतस्तत्रैव व्याख्यास्येते ॥ २५

२४–२४. लं– हि हीयुः । २५. तं१.तं२.मै – समागच्छताम् । २६. त१.तं२.मै.लं–संगच्छन्तु । २७. मै४ – इत्यस्याः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥

गणानाम् । त्वा । गणपतिमिति गण - पतिम् । हवामहे ।
कविम् । कवीनाम् । उपमश्रवस्तममित्युपमश्रवः— तमम् ।
ज्येष्ठराजमिति ज्येष्ठ - राजम् । ब्रह्मणाम् । ब्रह्मणः । पते ।
एति । नः । शृण्वन् । ऊतिभिरित्यूति - भिः । सीद । सादनम् ॥

पराङ्गवद्भावात् षष्ठयामन्त्रितसमुदायो निहन्यते । त्वां ᵛगणानां सर्वेषां संबन्धिनं ᵛगणपतिं ग्रामादिसंघातस्वामिनं ᵛहवामहे आह्वयामः । पूर्ववत् संप्रसारणम् । ᵛकवीनां क्रान्तदर्शनानामपि ᵛकविं क्रान्तदर्शिनम् । ᵛउपमश्रवस्तमम् उपमीयते अनेन इत्युपमः, सर्वेषां श्रवसामन्नानाम् उपमानं यस्य श्रवः, न तु केनचिदुपमीयते प्रसिद्धमुपमानमिति, स उपमश्रवाः । "आतश्चोपसर्गे" (पा ३·३·१०६) इत्यङ्, "ङ्यापोः संज्ञाच्छन्दसोः°" (पा ६·३·६३) इति ह्रस्वत्वम् । [२९-यद्वा—करणस्य-२९] कर्मविवक्षायाम् "आतश्चोपसर्गे" (पा ३·१·१३६) इति कः । यद्वा—श्रूयते इति श्रवः [२९-यस्य *-सर्वदा श्रूयते, अत एवोपमश्रवाः न कदाचिद्दृश्यते-*-१९] स उपमश्रवाः, श्रूयमाणोपम इति यावत् । [३०-आहिताग्न्यादिः (पा २·२·३७) द्रष्टव्यः-३०] । अनुभवाभावार्थैव श्रूयमाणत्वोक्तिः-*, 'विषं भुङ्क्ष्व' [३१-इतिवदन्यपरत्वात्-३१] । सर्वानुपमश्रवसः अतिशेते इति [३२-उपमश्रवस्तमः तम्-३२] । ᵛज्येष्ठराजं ज्येष्ठं [३३-प्रशस्ततमं-३३] राजतीति जेष्ठराट् । स त्वम् एवं महानुभावः अस्माकं स्तुतीः ᵛशृण्वन् ᵛऊतिभिः रक्षणैः तर्पणैर्वा हेतुभूतैः ताभिर्व्याप्रियमाणाभिरुपलक्षितः ᵛसादनम् आत्मीयमासनम् ᵛआ ᵛसीद अधितिष्ठ । सीदन्त्यस्मिन्निति सादनं, छान्दसं दीर्घत्वम् । तथा ग्रामाधिपतिरिवासीदन् अस्मभ्यं ग्रामं देहीति ॥

गणानामिति ॥ "ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद्ग्रामकामः" (तैसं २·३·३) इत्यत्र पुरोनुवाक्यामाह—'गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम्' इति । ᵛब्रह्मणां ᵛब्रह्मणस्पते हे कृत्स्नमन्त्रपते, ᵛगणानां ᵛगणपतिं कृत्स्नदेवगणस्वामिनं ᵛत्वां ᵛहवामहे आह्वयामः । कीदृशं त्वाम् ? ᵛकविं ᵛकवीनां विदुषां मध्ये प्रशस्तं विद्वांसम्, ᵛउपमश्रवस्तमम् उपमानत्वेन श्रवः कीर्तिर्यस्यासावुपमश्रवाः, सर्वगुणसंपन्नत्वेनायमेव सर्वेषां पदार्थानामुपमानमित्येतादृशी कीर्तिः, अतिशयेनोपमश्रवा उपमश्रवस्तमः तादृशं, राज्ञां मध्ये ज्येष्ठो ज्येष्ठराजः तादृशम् । यथोक्तगुणोपेतस्त्वं ᵛनः अस्माकम् ᵛऊतिभिः पालनैर्निमित्तभूतैर्युक्तः सन् ᵛसादनम् अस्मिन् कर्मण्युपवेशनम् ᵛआ ᵛसीद प्राप्नुहि ॥

२८. तं१.तं२.— यद्विकरणस्य, मै— यद्वि [द्वा-श्यन्] विकरणस्य । २९–२९. मै४–यस्य सर्वाः श्रुतय एवोपमा न काचित् दृश्यते । *–* [लं— 'यस्य सर्वदा ..... श्रूयमाणत्वोक्तिः' इत्येतावान् भागः नास्ति ।] । ३०. तं१. तं२.मै— आहिताग्निर्द्रष्टव्यः । ३१. तं१.तं२— इति यदन्य° । ३२–३२. तं१. तं२.मै.लं— °श्रवस्तमम् । ३३. तं१.तं२.मै.लं— प्रशस्तम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ।
देवानां यः पितरमाविवासति (३) श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥
स सुष्टुभा स ऋक्वता गणेन वलꣳ रुरोज फलिगꣳ रवेण ।
बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥

सः । इत् । जनेन । सः । विशा । सः । जन्मना । ५
सः । पुत्रैः । वाजम् । भरते । धना । नृभिरिति नृ - भिः ।
देवानाम् । यः । पितरम् । आविवासतीत्या - विवासति (३) ।
श्रद्धामना इति श्रद्धा - मनाः । हविषा । ब्रह्मणः । पतिम् ॥
सः । सुष्टुभेति सु - स्तुभा । सः । ऋक्वता । गणेन । वलम् । रुरोज । फलिगम् । रवेण ।
बृहस्पतिः । उस्रियाः । हव्यसूद इति हव्य - सूदः । कनिक्रदत् । वावशतीः । उदिति । आजत् ॥ १०

तत्रैव याज्या– ' स इज्जनेन ' इति जगती ॥ [V]सः एव [V]जनेन परिजनेन किंकरादिना, [V]सः एव [V]विशा विड्भिरुपजीवनीभिः [३४]प्रजाभिः, [V]सः एव [V]जन्मना [३५]जनोः जन्मप्रभृति[-३५], [V]सः एव [V]पुत्रैः पुत्रपौत्रादिभिः एतैः सर्वैः सह [V]वाजम् [३६]अन्नं [V]भरते दधाति । [V]धना धनानि च [V]नृभिः अन्यैश्च बन्धुसुहृदादिभिः सह स एव दधाति । " नृ चान्यतरस्याम् " (पा ६·१·१८४) इति विभक्तेरुदात्तत्वाभावः, " सावेकाचः° " (पा ६·१·१६८) इति हि [३७]प्राप्नोति । स एव दधातीति । क इत्याह ? [V]यः [V]श्रद्धामनाः श्रद्धायुक्तमनाः [V]देवानां [V]पितरं पातारं [V]ब्रह्मणस्पतिं [V]हविषा [V]आविवासति परिचरति । आविवासतिः परिचरणकर्मा ॥ १५

अथ बार्हस्पत्य उपहोमः – ' स सुष्टुभा ' इति ॥ त्रिष्टुबेषा ॥ [V]सः बृहस्पतिः [V]सुष्टुभा [३८]शोभनं स्तुवता[-३८] । स्तोभतिः स्तुतिकर्मा । स्तौतेर्वा क्विपि वर्णव्यत्यये तुको भत्वम्, " उप-

स इति ॥ तत्रैव याज्यामाह–' स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः । देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ' इति ॥ [V]सः [V]इत् सः एव यजमानः [V]जनेन किंकरादिना युक्तं [V]वाजम् अन्नम् [V]भरते दधाति । [V]सः एव [V]विशा करप्रदया प्रजया, सहितं वाजं भरते । [V]सः एव ब्राह्मणादिजन्मना सहितं [१३]वाजं भरते । [V]सः एव [V]पुत्रैः सहितं [१३]वाजं भरते । स एव [V]नृभिः बन्धुभिः सहितानि [V]धना द्रव्याणि भरते । [V]यः यजमानः [१४V]श्रद्धामनाः श्रद्धायुक्तमनस्कः [V]देवानां [V]पितरं पालयितारं [V]ब्रह्मणस्पतिं [V]हविषा स्वकीयेन [V]आ विवासति आ समन्ताद्विशेषेण परिचरति, स इज्जनेनेति पूर्वत्रान्वयः ॥

स इति ॥ अत्रैव विकल्पितां याज्यामाह । यद्वा–[१५]तत्रैवोपहोमार्थं मन्त्रमाह[-१५]– ' स सुष्टुभा स ऋक्वता गणेन वलꣳ रुरोज फलिगꣳ रवेण । बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ' इति ॥

३४. तं१.तं२– ' प्रजाभिः ' नास्ति । ३५. मै४–जननेन । ३६. तं१.तं२.मै.लं– ' अन्नं ' नास्ति ।
३७. मै४– ' प्राप्नोति ' इत्यस्यानन्तरम् ' उक्तम् ' । ३८. तं१.तं२.मै– शोभनस्तुवता । ३०
१३. हो१– अन्नम् । १४. क.हा– ' श्रद्धामनाः ' नास्ति । १५–१५. ड. श्रं.हो१– °होममन्त्रमाह ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मरुतो यद्ध वो दिवो❀

मरुतः । यत् । ह । वः । दिवः ।

सर्गात् सुनोति° " (पा ८·३·६५) इत्यादिना षत्वम् । [V]ऋक्तता स्तुतिमता [३९]मन्त्रवता वा । " झयः " (पा ८·२·१०) इति मतुपो वत्त्वम्, अयस्मयादित्वेन (पा १·४·२०) पदत्वात् कुत्वम्, भत्वाज्झत्वाभावः । ईदृशेन [V]गणेन सहितः [V]बलं मेघम् । वृणोतेः पचाद्यच् (पा ३·१·१३४)। कपिलकादित्वात् लत्वम् (द्र. पाभा ८·२·१८)। [V]रुरोज भिनत्ति [V]फलिगं स्वच्छोदकपूर्णं, [४०]फलम् उदकं वा [V]रवेण शब्देन उपलक्षितम्[४१] । रवेण वा फलिगं गिरिगुहादिषु प्रतिफलवन्तम् । किं च - अयं [V]बृहस्पतिः [V]हव्यसूदः [४२]हविषां भोक्ता । कर्मणि " कूलसूद-स्थलकर्षाः° " (पा ६·२·१२९) इत्युत्तरपदाद्युदात्तत्वम् । [४३-V]कनिक्रदत् अत्यर्थं क्रन्दन् हविरशनेन शब्दं कुर्वाणः । यद्वा–हविष आस्वादनेन अहो स्वादिष्ठमिति प्रशंसाशब्दं कुर्वाणः । दाधर्त्यादौ (पा ७·४·६५) निपात्यते । अभ्यस्तानामादिः (पा ६·१·१८९) इत्याद्युदात्तत्वम्[४३] । [V]उस्रियाः [४४]गाः [V]वावशतीः अत्यर्थं कामयमानाः । वशेर्यङि " न वशः " (पा ६·१·२०) इति संप्रसारणाभावः । पूर्ववदाद्युदात्तत्वम् । [V]उत् [V]आजत् भञ्जनानन्तरं बलात् उद्गमयति । अज गतिक्षेपणयोः, छान्दसो लुङ् ॥

" एतामेव निर्वपेद्यः कामयेत ब्रह्मन् विशं विनाशयेयमिति मारुती याज्यानुवाक्ये कुर्यात् " (तैसं २·३·३) इत्यस्याः पुरोनुवाक्या– ' मरुतो यद्ध वः ' इति गायत्री ॥

[V]सः देवः [V]सुष्टुभा शोभना स्तुभः सामावयवाः स्तोभा यस्य मन्त्रगणस्य सोऽयं सुष्टुप् तेन सुष्टुभा, [V]ऋक्तता, ऋचो बहुविधा यस्मिन् मन्त्रगणे स ऋक्तांस्तेन ऋक्तता, [V]रवेण ध्वनियुक्तेन [V]गणेन मन्त्रसमूहेन तुष्टः सन् [V]रुरोज बभञ्जेत्यन्वयः । कं बभञ्ज[४५] ? [V]फलिगं, फलमस्यास्तीति फली यजमानः, तं गच्छति प्राप्नोतीति फलिगः तादृशं [V]बलं प्रबलं प्रतिबन्धं रुरोज । [V]हव्यसूदः हविर्भोक्ता [V]कनिक्रदत् अहो स्वादुतमं हविरिति क्रन्दनं कुर्वाणः [V]बृहस्पतिः [V]वावशतीः प्रस्नुतस्तनत्वेन वत्सान् प्रति [४७]हम्बारवं कुर्वतीः [V]उस्रियाः गा उत्कर्षेणैतदीयगृहं प्रति प्रेरयति । स इत्यभ्यास आदरार्थः ॥

मरुत इति ॥ " एतामेव निर्वपेद्यः कामयेत ब्रह्मन् विशं वि नाशयेयमिति मारुती याज्यानुवाके कुर्यात् " (तैसं २·३·३) इति विहितयोः प्रतीके दर्शयति– ' मरुतो यद्ध वो दिवो या वः शर्म ' इति ॥ ' मरुतो यद्ध वः ' [४८]इत्यनुवाक्या, ' या वः शर्म ' इति याज्या । एतच्चोभयं प्रथमकाण्डस्य पञ्चमप्रपाठके (तैसं १·५·११) व्याख्यातम् ॥

३९. तं१.तं२.मै– ' मन्त्रवता ' नास्ति। ४०. तं१.तं२.मै.लं– बलवत्। ४१. तं१.तं२.मै.लं– ' उपलक्षितम् ' इत्यस्यानन्तरं ' बलम् ' ४२. तं१.तं२.मै.लं – हविषः। ४३–४३. तं१. तं२.मै.लं– ' कनिक्रदत् ..... मादिरित्याद्युदात्तत्वम् ' नास्ति । ४४. तं१.तं२.मै– अपः ।

१६. आ– बलं। १७. ड– रवम्। १८. ड.श्रं– पुरोनुवाक्या।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

या वः शर्म ॥

अर्यमाऽऽ याति वृषभस्तुविष्मान् दाता वसूनां पुरुहूतो अर्हन् ।
सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु ॥

या । वः । शर्म ॥

अर्यमा । एति । याति । वृषभः । तुविष्मान् । दाता । वसूनाम् । पुरुहूत इति पुरु - हूतः । अर्हन् । ५
सहस्राक्ष इति सहस्र - अक्षः । गोत्रभिदिति गोत्र - भित् । वज्रबाहुरिति वज्र - बाहुः ।
अस्मासु । देवः । द्रविणम् । दधातु ॥

व्याख्याता चेयं " वैश्वानरो नः " (तैसं १.५.११) इत्यत्र । इह त्वस्याः प्रतीकग्रहणम् । हे vमरुतः, vवः युष्मान् यस्मात् वयं vसुम्नायन्तः सुखमिच्छन्तः; vहवामहे आह्वयामः तस्मात् vनः अस्मान् क्षिप्रं vदिवः vआ vउपगन्तन अस्मत्सकाशमागच्छत[४५] ब्रह्मणि विशं स्थापयितुमिति ॥ १०

तत्रैव याज्या–' या वः शर्म ' इति त्रिष्टुप् ॥ इयमपि तत्रैव व्याख्याता (तैसं १.५.११)। प्रतीकग्रहणमिह[४६]। हे vमरुतः, युष्माकं यानि शर्माणि सुखानि vत्रिधातूनि त्रिलोकस्थानानि vशशमानाय युष्मान् भजमानाय दातुं vसन्ति भवन्ति, यानि च vदाशुषे हविर्दत्तवते यजमानाय अधिकं vयच्छत प्रयच्छत, vतानि vअस्मभ्यं vवि vयन्त विशेषेण दत्त । किं च हे vवृषणः कामानां वर्षितारः, [४७]अस्मभ्यं vसुवीरं शोभनपुत्रादिकं vरयिं [४८]vधत्त इति ॥ १५

" अर्यम्णे चरुं निर्वपेत् सुवर्गकामः " (तैसं २.३.४) इत्यस्याः पुरोऽनुवाक्या–' अर्यमाऽऽ याति ' इति त्रिष्टुप् ॥ अरीन् [४९]-यमयतीति vअर्यमा-[४९] इन्द्र उच्यते, वक्ष्यमाणेभ्यो लिङ्गेभ्यः ।

अर्यमेति ॥ " अर्यम्णे चरुं निर्वपेत् सुवर्गकामः " (तैसं २.३.४) इति चतुर्थेऽनुवाके यद्विहितं तत्र पुरोनुवाक्यामाह–' अर्यमाऽऽ याति वृषभस्तुविष्मान् दाता वसूनां पुरुहूतो अर्हन् । सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु ' इति ॥ " असौ वा आदित्योऽर्यमा " (तैसं २.३.४) इतिश्रुतेरर्यमशब्द आदित्यं ब्रूते । स चेन्द्राभेदोपचारेणेन्द्रधर्मैः स्तूयते । rवृषभः कामानां वर्षयिता । rतुविष्मान् महाबलः, rवसूनां धनानां rदाता, पुरुषु बहुषु यज्ञेषु [१९]rहूत आहूतः । rअर्हन् स्वर्गं दातुं योग्यः । सहस्राक्षत्वादिकं स्पष्टम् ॥ १०

४५. तं१.तं२.मै.लं–°गच्छतेति । ४६. तं१.तं२.मै.लं–°मिदम् । ४७ मै–अस्मभ्यं सुवर्षम् '। ४८. मै– दत्त । ४९–४९. तं१.तं२.मै.लं– यमयति उपयतीत्यर्यमा । २५

१९. शृं–हूयते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

ये तेऽर्यमन् बहवो देवयानाः पन्थानो(४)राजन् दिव आचरन्ति ।
तेभिर्नो देव महि शर्म यच्छ शं न एधि द्विपदे शं चतुष्पदे ॥

ये । ते । अर्यमन् । बहवः । देवयाना इति देव - यानाः ।
पन्थानः (४) । राजन् । दिवः । आचरन्तीत्या - चरन्ति ।
तेभिः । नः । देव । महि । शर्म । यच्छ ।
शम् । नः । एधि । द्विपद इति द्वि - पदे । शम् । चतुष्पद इति चतुः - पदे ॥

सः [V]आ [V]याति आगच्छति आगच्छतु वा। [V]वृषभः वर्षिता कामानां [V]तुविष्मान् महाबलः [V]दाता [V]वसूनां धनानां [V]पुरुहूतः बहुभिर्यजमानैराहूतः, बहुषु वा स्थानेषु आहूतः। तेन "तृतीया कर्मणि" (पा ६.२.४८) इत्यस्याप्रसङ्गः। [V]अर्हन् दानादिकं कर्तुमर्हन्। अर्हच्छब्दः पूज्यवाची, हे पूजनीय। [V]सहस्राक्षः बह्विन्द्रियः बहुकार्यकरणसमर्थेन्द्रियो वा [५०]सहस्रनेत्र एव वा[५०], [V]गोत्रभित्[५१] मेघानां पर्वतानां वा भेत्ता विदारयिता [V]वज्रबाहुः वज्रपाणिः। "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" (पाभा २.२.३६ वा १) इति परनिपातः। ईदृशः [V]देवः [V]अस्मासु [V]द्रविणं स्वर्गाख्यं धनं [V]दधातु ॥

तत्रैव याज्या—'ये तेऽर्यमन्' इति त्रिष्टुप् ॥ हे [V]अर्यमन् राजन् दीप्यमान, [V]ते तव [V]ये [V]बहवः [V]देवयानाः देवाः [५२]यादृशैः गच्छन्ति, देवान् वा यैर्गच्छन्ति तादृशाः, [V]दिवः द्युलोकात् [V]आचरन्ति आभिमुख्येन यावत्कर्मस्थानम् आतन्यन्ते [V]तेभिः तैः पथिभिः [V]नः अस्मभ्यं, हे [V]देव देवनादिमत्[५३], [V]महि महत् [V]शर्म सुखं [V]यच्छ देहि। किं च [V]नः अस्माकं [V]द्विपदे [V]चतुष्पदे च [५४V]शम् [V]एधि सुखहेतुर्भव, तादृशमार्गगम्यस्वर्गहेतुर्भवेति यावत्। स्वरसमासान्तावुक्तौ।

य इति ॥ तत्रैव याज्यामाह- 'ये तेऽर्यमन् बहवो देवयानाः पन्थानो राजन् दिव आचरन्ति। तेभिर्नो देव महि शर्म यच्छ शं न एधि द्विपदे शं चतुष्पदे' इति ॥ हे [V]अर्यमन् [V]राजन्, [V]ते त्वदीयाः [V]देवयानाः देवैर्गन्तुमर्हाः [V]ये [V]बहवः [V]पन्थानः आ [V]दिवः स्वर्गपर्यन्तं चरन्ति गच्छन्ति, हे [V]देव, [V]तेभिः तैः पथिभिः [V]नः अस्माकं [V]महि [V]शर्म महत् सुखं [V]यच्छ, [V]द्विपदे मनुष्याय [V]नः अस्माकं संबन्धिने [V]शम् [V]एधि सुखकरो भव। [V]चतुष्पदे गवादिरूपाय शम् एधि। "अर्यम्णे चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युः" (तैसं २.३.४), "अर्यम्णे चरुं निर्वपेद्यः कामयेत स्वस्ति जनतामियाम्" (तैसं २.३.४) इत्यनयोरपि एते एव याज्यानुवाक्ये ॥

५०-५०. तं१.तं२.मै.लं- 'सहस्रनेत्र एव वा' नास्ति। ५१. मै- गोत्रभृत्। ५२. तं१.तं२. मै.लं- यैः। ५३. मै४- दानादिमत्। ५४. तं१.तं२- शर्म।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

बुध्नादग्रमङ्गिरोभिर्गृणानो वि पर्वतस्य दꣳहितान्यैरत् ।
रुजद्रोधाꣳसि कृत्रिमाण्येषाꣳ सोमस्य ता मद इन्द्रश्चकार ॥

बुध्नात् । अग्रम् । अङ्गिरोभिरित्यङ्गिरः–भिः । गृणानः । वीति । पर्वतस्य । दꣳहितानि । ऐरत् । रुजत् । रोधाꣳसि । कृत्रिमाणि । एषाम् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥

" यो राजन्य आनुजावरः स्यात् तस्मा एतमैन्द्रमानुषूकमेकादशकपालं निर्वपेत्.... ५
बुध्नवती अग्रवती याज्यानुवाक्ये भवतः " (तैसं २·३·४) इत्यस्याः पुरोऽनुवाक्या– 'बुध्ना-
दग्रमङ्गिरोभिः ' इति त्रिष्टुप् ॥ [v]बुध्नात् मूलादारभ्य यावत् [v]अग्रम् उपक्रमादारभ्य यावत्समाप्ति
[५५]उभावदानानि [v]गृणानः गृणानैः स्तुवद्भिः [v]अङ्गिरोभिः इत्थंभूतः । " सुपां सुलुक् " "
(पा ७·१·३९) इति तृतीयाया [५६]बहुवचनस्य स्वादेशः । यद्वा– व्यत्ययेन कर्मणि कर्तृप्रत्ययः ।
अङ्गिरोभिः स्तूयमानः । [v]पर्वतस्य मेघस्य [v]दꣳहितानि स्तम्भितानि[५७] [v]रोधांसि उदकस्य रोधनानि १०
द्वारपिधानानि [v]रुजत् भिनत् प्रथमं ततः [v]वि [v]ऐरत् विविधं प्रेरयति विश्लेषयति यथोदकं
पतति । यद्वा–उदकमेव व्यैरत् विकिरति । " बहुलं संज्ञाछन्दसोः " (द्र. उ १९०) इति णिलुक् ।
कीदृशानि रोधांसि ? [v]कृत्रिमाणि कृत्रिमाण्येव [५८]आत्मकृतानीव अयत्नेन[५८] भिनत्ति [v]एषां मेघानां
संबन्धीनि । पर्वतस्येति [५९]वचनव्यत्ययेनैकवचनम् । इत्येवंविधानि यानि कर्माणि तानि
सर्वाण्यपि [v]सोमस्य [v]मदे सोमपाननिमित्ते मदे सति [v]इन्द्रः [v]चकार करोति । एवं महानुभाव १५
इन्द्र इमं राजन्यं समानानामग्रं परिणयत्विति ॥

बुध्नादिति ॥ " यो राजन्य आनुजावरः स्यात् तस्मा एतमैन्द्रमानुषूकमेकादशकपालं निर्वपेत् "
(तैसं २·३·४) इत्यत्र पुरोनुवाक्यामाह– " बुध्नादग्रमङ्गिरोभिर्गृणानो वि पर्वतस्य दꣳहितान्यैरत् ।
रुजद्रोधाꣳसि कृत्रिमाण्येषाꣳ सोमस्य ता मद इन्द्रश्चकार ' इति ॥ [v]बुध्नात् [v]अग्रं [२०]कर्मोपक्रममारभ्य
[२१]कर्मसमाप्तिपर्यन्तम् [v]अङ्गिरोभिः [v]गृणानः अङ्गिरोनाम्ना मुनिना सदृशैर्ऋत्विग्भिः स्तूयमान इन्द्रः २०
[v]पर्वतस्य पर्वतवत् सर्वाधारस्य [२२]राजन्यस्य [v]दꣳहितानि समानैरन्यैः क्रियमाणान् द्रोहविशेषान् [v]व्यैरत्
[२३v]विफलानकरोत् । किं कुर्वन् ? [v]एषां समानानां [v]कृत्रिमाणि बलात् संपादितानि [v]रोधांसि श्रैष्ठ्यप्रति-
बन्धकान्यवरोधनानि [v]रुजत् [२४]भञ्जयन् । कदैतत्सर्वमकरोदित्युच्यते । [v]सोमस्य [v]मदे सोमपानसंबन्धिनि
मदे सति [v]इन्द्रः [v]ता [v]चकार तानि द्रोहनिवारणादीनि कृतवान् ॥

५५. मै४– इन्द्रापवदानानि । ५६. तं१.तं२– एकवचनस्य । ५७–५७. लं– 'स्तंभितानि' २५
नास्ति । ५८. पं२– आत्मकृतानि घटयत्नेन । ५९. तं१.तं२.मै.लं– वचनस्य तृतीयैकवचनम् ।

२०. शृं–कर्मोपक्रमादारभ्य । २१. आ– समाप्ति° । २२. आ– राज्ञः । २३. क.ड.शृं.हो१–
विगतान° । २४. आ.उ.पा– जम्भयन् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बुध्नादग्रेण वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम्।
वृथाऽसृजत् पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार (५)॥

बुध्नात्। अग्रेण। वीति। मिमाय। मानैः। वज्रेण। खानि। अतृणत्। नदीनाम्।
वृथा। असृजत्। पथिभिरिति पथि-भिः। दीर्घयाथैरिति दीर्घ-याथैः।
५ सोमस्य। ता। मदे। इन्द्रः। चकार (५)॥

तत्रैव याज्या–'बुध्नादग्रेण वि मिमाय' इति त्रिष्टुप्॥ मूलादारभ्य [v]अग्रेण सह यावदग्रं [v]मानैः [६०]मानरज्जुभिरिव [v]वि [v]मिमाय विविधं परिच्छिनत्ति मेघान्। अथ तथा विमितेषु मेघेषु [v]नदीनाम् अपां, नदनान्नद्यः, [v]खानि द्वाराणि [v]वज्रेण [v]अतृणत् भिनत्ति [६१]पिहितानि विदारयति। उतृदिर् हिंसायां रौधादिकः। यद्वा–नदीनामिति चतुर्थ्यर्थे षष्ठी, नदीभ्यः। नद्यो
१० यथा प्रवहेयुः इत्येवमर्थमभिनत् भिनत्ति द्वाराणि; सामर्थ्यादुदकस्येति [६२]गम्यते। ततः [v]वृथा भित्त्वा तथा क्रीडन्निव [v]असृजत् नदीः प्रवर्तयति [v]पथिभिः [v]दीर्घयाथैः चिरप्रवृत्तैः। तादृग्विधानि कर्माणि [v]सोमस्य [v]मदे सति [v]इन्द्रः [v]चकार इति। गतम्॥

अथोपहोमादिष्वन्यत्र विनियोगा द्रष्टव्याः–'प्र यो जज्ञे' इति त्रिष्टुप्॥ वक्ष्यमाण एव बार्हस्पत्यः। आचार्येण (बौश्रौ १३·२७) तु [६३]त्यक्त्वेमामुत्तरेण बार्हस्पत्ये विनियुक्ते।
१५ [६४v]यः देवः *-[v]विद्वान् [६५]आत्माधिकारज्ञः सर्वज्ञो वा [v]अस्य मेघस्य [v]बन्धुं बन्धनं, [६६]यत्रायं

बुध्नादिति॥ तत्रैव याज्यामाह–'बुध्नादग्रेण वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम्। वृथाऽसृजत् पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार' इति॥ [v]इन्द्रः [v]नदीनां [v]बुध्नात् [v]अग्रेण [३५]मूलादग्रपर्यन्तं [३६-v]मानैः मानदण्डैः-[३६] [v]वि [v]मिमाय विशेषेण [३७-]निश्चितवान्। निश्चित्य च-[३७] नदीनां [v]खानि जलप्रवाहार्थान् अवकाशान् प्रति [v]वज्रेण [v]अतृणत् [३८]जलप्रवाहनिरोधकान् [३९]पर्वतादीन् वज्रेण
२० हिंसितवान्। [३०v]दीर्घयाथैः दीर्घाणां प्रवाहाणां गमनोपयुक्तैः [v]पथिभिः मार्गैर्युक्तान् नदीविशेषान् [v]असृजत्। न [३१]चात्रास्य भूयान् प्रयासः किं तु [v]वृथा। यथा लोके नखैस्तृणच्छेदादिव्यर्थचेष्टाम् आयासमन्तरेण जनाः कुर्वन्ति तद्वदित्यर्थः। 'सोमस्य' इत्यादि पूर्ववत्। [३२]नखालम्भनमात्रेण महतीर्नदीः सृजत इन्द्रस्य श्रैष्ठ्यप्रापणे कः प्रयास इत्यभिप्रायः॥

६०. मै–मानयित्रीभिः। ६१. तं१.तं२.मै.लं–विहितानि; मै४ पिहितानीव। ६२. तं१.तं२.
२५ मै.लं–लभ्यते। ६३. मै४–प्रथमामुत्तरे वा। ६४. तं१.तं२.मै.लं–'यः' नास्ति। *–* [तं१.तं२–'विद्वान्.....अयं हि' नास्ति।]। ६५. मै४–अधिकारज्ञः। ६६. मै.लं–यात्रायाम्।

२५. ड.शृं.हो१–मूलादारभ्याग्र°। २६–२६. इ–मानैर्दण्डैः; अ.आ.उ.क.जो.ना.पा.हा–मानदण्डैः। २७–२७. हा–निश्चित्य। २८. आ–°निरोधक।° २९. आ.हा–पर्वतान्। ३०. हा–'दीर्घयाथैः' नास्ति। ३१. इ.क.जो.ना.हा–तत्रास्य। ३२. ड.शृं–लीलालम्भन।°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

प्र यो जज्ञे विद्वाꣳ अस्य बन्धुं विश्वानि देवो जनिमा विवक्ति।
ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचादुच्चा स्वधयाऽभि प्र तस्थौ ॥

प्रेति। यः। जज्ञे। विद्वान्। अस्य। बन्धुम्। विश्वानि। देवः। जनिमा। विवक्ति।
ब्रह्म। ब्रह्मणः। उदिति। जभार। मध्यात्।
नीचा। उच्चा। स्वधयेति स्व-धया। अभि। प्रेति। तस्थौ॥ ५

बध्यते [६७]मेघेन वाऽयं बध्यते[-६७], तद्विद्वान्, यो [६८]निबन्धनमस्य [V]जज्ञे जानाति। कथं ज्ञायते निबन्धनमस्यायं जानातीति? तत्राह–[V]विश्वानि [V]जनिमा जन्मानि अयं हि[-*] [V]देवः [६९]अस्य [V]विवक्ति ब्रूते [७०]परेभ्यः कथयति, [७१-]तं जनमयं[-७१] जानातीति[७२] जानीमः। वचेः "बहुलं छन्दसि" (पा २·४·७६) इति शपः श्लुः, अभ्यासस्य [७३-]चेत्त्वम्। एवमुत्पादितं भूयिष्ठमुदकम् एतद्ब्रह्मेत्युच्यते, एतत्[-७३] एवमुत्पादितं [V]ब्रह्म परिवृढम् उदकं [V]ब्रह्मणः [७४]उपरि परिवृढाया पृथिव्याः [V७५-]उत् [V]जभार[-७५] १०
उद्धरति। [V]मध्यात् मध्यप्रदेशात् [V]नीचा [७६]नीचप्रदेशात्। पञ्चम्येकवचनस्य "सुपां सुलुक्°" (पा ७·१·३९) [७७]इत्याजादेशः। सांहितिको दकारोपजनः छान्दसः। उक्तं च प्रातिशाख्ये– "नीचापूर्वो दकार उच्चापरः" (तैप्रा ५·८) इति। [V]उच्चा उच्चात् प्रदेशात्। पूर्ववदाजादेशः। एवं [७८]सर्वस्मात् उद्धृतम् उदकं [V]स्वधया अन्नेन सह [V]अभि [V]प्र [V]तस्थौ आदित्ये अभिप्रतितिष्ठतु

**प्रेति॥ "यो ब्राह्मण आनुजावरः स्यात् तस्मा एतं बार्हस्पत्यमानुपूकं चरुं निर्वपेत्" (तैसं २·३·४) इत्यत्र पुरोनुवाक्यामाह– 'प्र यो जज्ञे विद्वाꣳ अस्य बन्धुं विश्वानि देवो जनिमा विवक्ति। ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचादुच्चा स्वधयाऽभि प्र तस्थौ' इति॥ [V]विद्वान् सर्वज्ञः [३३-V]यः बृहस्पतिः [३५-V]अस्य ब्राह्मणस्य[-३४] यजमानस्य [V]बन्धुं समानानां मध्येऽनुकूलं [V]प्र [V]जज्ञे प्रकर्षेण जानाति। तदीयमभिज्ञत्वं कथं निश्चीयत इति चेदुच्यते। यतोऽयं [V]देवः [V]विश्वानि [V]जनिमा सर्वेषां प्राणिनां सर्वाणि जन्मानि [३५-V]विवक्ति पुनः पुनः [३६]ब्रूते [३७]तस्मादभिज्ञत्वं निश्चीयते। अभिज्ञो बृहस्पतिः [V]ब्रह्मणः वेदस्य [V]मध्यात् नीचात् २०
[V]उच्चा मध्यमभागात् प्रथमभागात् उत्तमभागाच्च [V]ब्रह्म परिवृढं कर्म [V]उज्जभार उद्धृतवान्। [V]स्वधया अमृतेन श्रैष्ठ्यप्रापणलक्षणेन [V]अभि [V]प्र [V]तस्थौ, एनं यजमानमभिलक्ष्य प्रस्थानं कृतवान्। समानानां मध्ये श्रैष्ठ्यं दातुं यजमानसमीपे समागतवानित्यर्थः॥**

६७–६७. मै४– 'मेघेन वाऽयं बध्यते' नास्ति; लं– मेघे। ६८. मै– बन्धन°। ६९. मै– 'अस्य' नास्ति। ७०. मै– पद्यैः। ७१–७१. मै– न नूनमयम्। ७२. मै– जानाति किं वयम्। २५
७३–७३. तं१.तं२.मै.लं–दीर्घत्वम्। ७४. तं१.तं२.मै– 'उपरि' नास्ति। ७५–७५. तं१.तं२.मै–उज्जहार। ७६. मै४– निम्नात्। ७७. मै४– इत्याकारः। ७८. तं१.तं२.मै.लं– सर्वस्य।

३३. अ.इ.उ.ना.जो.पा.हा–'यः' नास्ति। ३४–३४. हो१– ब्रह्मणः; ड–यस्य ब्रह्मणः। ३५. अ.इ.उ.जो.ना.पा.हा– विविनक्ति। ३६. आ– कथयति। ३७. हा– एतस्माद°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

महान् मही अस्तभायद्द्वि जातो द्याꣳ सद्म पार्थिवं च रजः ।
स बुध्नादाष्ट जनुषाऽभ्यग्रं बृहस्पतिर्देवता यस्य सम्राट् ॥

महान् । मही इति । अस्तभायत् । वीति । जातः । द्याम् । सद्म । पार्थिवम् । च । रजः ।
सः । बुध्नात् । आष्ट । जनुषा । अभीति । अग्रम् ।
बृहस्पतिः । देवता । यस्य । सम्राडिति सम् - राट् ॥

आभिमुख्येन प्रकृष्टं तिष्ठतु । स्वधया [७]वा हेतुभूतया । यद्वा- स्वधया हविषा सह [८]तिष्ठतु स्थितिहेतुना आदित्ये उदकं [८१]तिष्ठत्विति यावत् । [८२-]पक्वमिति ततो वर्षति[८२] ततोऽन्नमुत्पद्यते, सोऽस्माकमभिमतं संपादयतु बृहस्पतिरिति ॥

" यो ब्राह्मण आनुजावरः स्यात् तस्मा एतं बार्हस्पत्यमानुषूकं चरुं निर्वपेत् ...बुध्नवती अग्रवती याज्यानुवाक्ये भवतः " (तैसं २·३·४) इत्यस्याः पुरोऽनुवाक्या-' महान्मही ' इति त्रिष्टुप् ॥ [v]महान् बृहस्पतिः [v]मही महत्यौ पृथिवीमन्तरिक्षं च [v]वि [v]अस्तभायत् विविधमस्तम्भयत् । [v]जातः जातमात्र एव [v]द्यां [८३]द्युलोकं व्यस्तम्भयत् इत्येव । [v]सद्म सदनं स्थानमुदकस्य [८४]मध्यमाख्यं तत्र स्थितं [v]पार्थिवं च [v]रजः उदकं व्यस्तम्भयत् । [v]सः महानुभावः [v]बृहस्पतिः [v]बुध्नात् मूलादारभ्य [v]अभ्यग्रं यावदग्रम् [v]आष्ट व्याप्नोतु । [v]जनुषा जन्मनैव अयत्नेनैव तेजस्विनं करोतु । कम्? [v]यस्य [८५]असौ [v]देवता ईश्वरः [v]सम्राट् संगतदीप्तिः तं यजमानं तेजसा व्याप्नोतु । [८६]यद्वा-[८७] यस्यायं देवता तस्यायं देवता बृहस्पतिः[८७] । [८८]यसर्वमेवमयं व्याप्तवान् तस्मात् [८९]महानुभावोऽयम्

महानिति ॥ तत्रैव याज्यामाह- ' महान् मही अस्तभायद्द्वि जातो द्याꣳ सद्म पार्थिवं च रजः । स बुध्नादाष्ट जनुषाऽभ्यग्रं बृहस्पतिर्देवता यस्य सम्राट् ' इति ॥ [v]महान् सामर्थ्येनाधिको बृहस्पतिः [v]मही प्रौढे पृथिव्यन्तरिक्षे [v]द्यां द्युलोकं [v]सद्म मनुष्याणां गृहं [v]पार्थिवं [v]रजः [v]च [v]जातः उत्पत्तिमात्रेण [v]वि [v]अस्तभायत् विविधं स्तम्भितवान् । यद्यप्येतत् सर्वमीश्वरस्यैव कर्म तथापि तदभेदेन बृहस्पतिः स्तूयते । यद्वा- परमेश्वरानुग्रहादयमेव लोकत्रयादिकं स्वस्वव्यापारक्षममकरोत् । [v]यस्य यजमानस्य [v]सम्राट् यथोक्तरीत्या साम्राज्यं प्राप्तः [v]बृहस्पतिः [v]देवता [v]सः यजमानः [v]जनुषा जन्ममात्रेणैव [v]बुध्नात् अग्रमभि आयुषोऽनुष्ठीयमानकर्मणो वा मूलादारभ्य समाप्तिपर्यन्तम् [v]आष्ट [९४]सर्वं [९५]व्याप्तवान् । ईदृशेन बृहस्पत्यनुग्रहेण युक्तो यजमानः सर्वथा श्रैष्ठ्यं प्राप्नोत्येवेत्यभिप्रायः ॥

७९. मै४-. स्वधा° । ८०. मै.लं- ' तिष्ठतु ' नास्ति । ८१. मै४-तिष्ठतीति । ८२-८२. मै- पक्वमितिते (?)। ८३. तं१.तं२.मै.लं- ' द्युलोकम् ' इत्यस्यानन्तरं ' च ' । ८४. तं१.तं२.मै.लं- मध्यं मुख्यम् । ८५. तं१.तं२.मैलं- अयम् । ८६. तं१.तं२.मै.लं- ' यद्वा ' नास्ति । ८७-८७. मै- यस्यायं देवता बृहस्पतिः । ८८. मै४-तत्सर्वमेव जयम् । ८९. तं१.तं.२- महानुभावो यत् ।

९४. आ- ' सर्वं ' नास्ति । ९५. हो१- प्राप्तवान् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

बुध्नाद्यो अग्रमभ्यर्त्योजसा बृहस्पतिमा विवासन्ति देवाः (६)।
भिनद्वलं वि पुरो दर्दरीति कनिक्रदत् सुवरपो जिगाय ॥ १४ ॥

[युवं वीतमाविवासति पन्थानो दीर्घयाथैः सोमस्य ता मदु इन्द्रश्चकार देवा नव च ।]
आदित्येभ्यो देवा वै मृत्योर्देवा वै सत्रमयन्तेऽयन्त्रिꣳशत्प्रजापतिर्देवेभ्योऽन्नाद्यं देवासुरास्तान् रजनो ध्रुवोऽसि यन्नवमैदग्निं वै प्रजापतिर्वरुणाय या वामिन्द्रावरुणा स प्रत्नवच्चतुर्दश] ५
[आदित्येभ्यस्त्वष्टुरस्मै दानकामा एवावं रुन्द्धेऽग्निं वै स प्रत्नवत् षट्पञ्चाशत्]
[आदित्येभ्यः सुवरपो जिगाय]

बुध्नात् । यः । अग्रम् । अभ्यर्तीत्यभि - अर्ति । ओजसा । बृहस्पतिम् । एति । विवासन्ति । देवाः (६)। भिनत् । वलम् । वीति । पुरः । दर्दरीति । कनिक्रदत् । सुवः । अपः । जिगाय ॥१४॥
[मैसं ..... कासं .....] १०

अस्माकम् आनुजावरत्वं निवर्त्य समानानामग्रं परिणयत्विति । अश्नोतेर्लङि " बहुलं छन्दसि " (पा २·४·७३) इति शपो लुक् ।

तत्रैव याज्या—' बुध्नाद्यो अग्रम् ' इति त्रिष्टप् ॥ [v]बुध्नात् आरभ्य यावत् [v]अग्रं [v]यः अयम् [v]ओजसा बलेन [v]अभ्यर्ति आभिमुख्येन प्राप्नोति इदं विश्वमात्मीयेन तेजसा व्याप्नोति। [९०]यद्वा—यजमानं[-९०] वा आत्मीयम् । [९१]तं तादृशं देवं [v]बृहस्पतिं [v]देवाः [९२]अपि [v]आ [v]विवासन्ति[९३], १५
परिचरन्ति, ऋत्विजो वा । स च एवं देवैः परिचर्यमाणः [v]वलं मेघं [v]भिनत् भिनत्ति वृष्ट्यर्थम् । [v]पुरः असुरनगराणि च [v]वि [v]दर्दरीति अत्यर्थं विदारयति । दृ विदारणे, यङ्लुकि " रुग्रिकौ च लुकि " (पा ७·४·९१) इति रुक्, " यङो वा " (पा ७·३·९४) इति ईडागमः । [v]कनिक्रदत् अत्यर्थं शब्दं कुर्वन् अत्यर्थं क्रन्दन् । दाधर्त्यादौ निपात्यते (पा ७·४·६५)। [९४]ततः [v]सुवः आदित्यम् [९५-v]अपः च[-९५] [v]जिगाय जयति । आदित्यादाकृष्य मध्यमस्थाने उदकं २०
[९६]वृष्ट्युन्मुखं प्रवर्तयति पर्जन्यात्मना । छान्दसे लिटि (पा ३·४·६) " सन्लिटोर्जेः " (पा ७·३·५७) इति जयतेः कुत्वम् । एवं महानुभावोऽयम् अस्मदीयं यजमानमानुजावरत्वान्मुक्त्वा समानामग्रं परिणयत्विति ॥

इति श्रीभट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये
द्वितीये काण्डे तृतीये प्रश्ने चतुर्दशोऽनुवाकः ॥ २५

९०–९०. मै४–यजमानः एकम्। ९१. मै–'तं' नास्ति। ९२. मै४–'अपि' नास्ति। ९३. तं१,तं२,लं–आविवासयन्ति। ९४. मै४ तेन। ९५. मै४–एव। ९६. पं२–वृष्ट्युदकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बुध्नादिति ॥ तत्रैव विकल्पितां याज्यामाह-'बुध्नाद्यो अग्रमभ्यर्त्योजसा बृहस्पतिमा विवासन्ति देवाः। भिनद्बलं वि पुरो दर्दरीति कनिक्रदत् सुवरपो जिगाय' इति ॥ [v]यः बृहस्पतिर्जगतो [40]देहस्य कर्मणो वा [r]बुध्नात् आरभ्य [r]अग्रम् [v]अभ्यर्ति अवसानम् [r]ओजसा स्वबलेन प्राप्नोति तं [r]बृहस्पतिम् इतरे [r]देवाः [r]आ [r]विवासन्ति आगत्य विशेषेण वासयन्ति परिचरन्तीत्यर्थः। [41]'स बृहस्पतिः [v]बलं [42]यजमानसंबन्धिनां [43]समानानां मध्ये प्रबलं पुरुषं [r]भिनत् भिनत्ति प्रातिकूल्यात् निवारयति, [r]पुरः समानानां पुराणि विशेषेण [r]ददरीति प्रातिकूल्यनिवारणाय पुनः [44]पुनर्दारितवान्। [r]कनिक्रदत् उत्साहेन शब्दं कुर्वन् [r]सुवः [45]स्वर्गसदृशं श्रैष्ठ्यम् [r]अपः तत्साधनं सर्वं जलक्षेत्रादिकं [r]जिगाय [r]जितवान् [46]यजमानार्थं संपादितवानित्यर्थः ॥

अत्र विनियोगसंग्रहः—

"यज्ञविभ्रष्टयागे तु [47]-याज्याः स प्र निकेति -[47] च।
इन्द्रमिन्द्रं चैन्द्रयागे त्वं नः सौम्यचरौ तथा ॥ १ ॥
अग्नौ कामप्रापकेऽग्नी [48]ब्रह्मवर्चसिनस्त्रयम्।
आ प्या सं ते चरौ सौम्ये गणा [49]ग्रामप्रदे त्रयम् ॥२ ॥
मरुद्यागे [50]नाशकेऽष्टावर्यमाऽऽर्यमणे चरौ।
[51]-बुध्नादैन्द्रे प्रयस्तिस्रो-[51] बार्हस्पत्यानुषूक्के।
[52]पञ्चविंशतिरत्रोक्ता अनुवाके चतुर्दशे ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे तृतीयः प्रपाठकः ॥

४०. अ.उ.ड.पा.शृं.हो१- वेदस्य। ४१. आ-'सः' नास्ति। ४२.शृं- °संबन्धिनं। ४३. आ.उ.क.जो.ना.पा- 'समानानां' नास्ति। ४४. क.हा.हो१- पुनर्वारितवान्। ४५. आ- तत्सदृशं। ४६. ड- यजमानार्थं। ४७-४७. क.हा-आद्ये याज्याः स प्रत्नके; ड-याज्या स प्रत्न नीति च; शृं.हो१- याज्या स प्रत्निकेति च। ४८. क.हा- °वर्चसगे त्रयम्। ४९. क- ग्रामवते। ५०. ड.हो१- मासिकेष्टा°। ५१-५१. हा-बुध्नादैन्द्रं त्रयस्तिस्रः। ५२. क- °तिमन्त्रोक्ताः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(अथ द्वितीयकाण्डे चतुर्थः प्रपाठकः)

हरिः ॐ ॥

देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षाꣳसि पिशाचास्तेऽन्यतस्तेषां देवानामुत यदल्पं लोहितमकुर्वन् तद्रक्षाꣳसि रात्रीभिरसुभ्नन् तान्त्सुब्धान् मृतानभि व्यौच्छत्

देवाः । मनुष्याः । पितरः । ते । अन्यतः । आसन् । असुराः । रक्षाꣳसि । पिशाचाः । ते । अन्यतः । तेषाम् । देवानाम् । उत । यत् । अल्पम् । लोहितम् । अकुर्वन् । तत् । रक्षाꣳसि । रात्रीभिरिति रात्रि - भिः । असुभ्नन् । तान् । सुब्धान् । मृतान् । अभि । वीति । औच्छत् ।

देवा मनुष्या इत्यादि ॥ [v]अन्यतः एकस्मिन् पक्षे देवादयोऽभवन् । असुरादयोऽप्येकस्मिन् [१v]आसन् । " नपुंसकमनपुंसकेन° " (पा १·२·६९) इत्येतत् व्यत्ययेन [२]न प्रवर्तते । अथ [v]तेषां [v]देवानां शरीरेषु [३]असुरादयः [v]यत् [v]अल्पम् अपि [v]लोहितम् [v]अकुर्वन् व्रणमुदपादयन् [v]तत् असुरपक्षपातीनि [v]रक्षांसि [v]रात्रिभिः [v]असुभ्नन् रात्रिष्वागम्य [४]धर्षितमकुर्वन्, येन सुम्भनेन ते मृताः स्युः । ततः [v]तान् [v]सुब्धान् विव्रणान् तेनैव हेतुना [v]मृतान् [v]अभि [v]वि [v]औच्छत् रात्रिरुपरताऽभवत्, रात्र्यवसाने मृतानपश्यन्निति यावत्, प्राणाद्युत्क्षोभस्य रक्षोहेतुत्वात् ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
प्रपाठके द्वितीये च तृतीये चेष्टयः क्रमात् ।
प्रोक्तास्तत्रावशिष्टास्तु वक्ष्यन्तेऽस्मिंश्चतुर्थके ॥ २ ॥

चतुर्थस्य प्रथमानुवाके भ्रातृव्यवतः स्पर्धमानस्य त्रिहविष्कां कांचिदिष्टिं विधातुं प्रस्तौति– ' देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षाꣳसि पिशाचास्तेऽन्यतस्तेषां देवानामुत यदल्पं लोहितमकुर्वन् तद्रक्षाꣳसि रात्रीभिरसुभ्नन् तान्त्सुब्धान् मृतानभि व्यौच्छत् ते देवा अविदुर्यो वै नोऽयं म्रियते रक्षाꣳसि वा इमं घ्नन्तीति ते रक्षाꣳस्युपामन्त्रयन्त तान्यब्रुवन् वरं वृणामहै यदसुराञ्जयाम तन्नः सहासदिति ततो वै देवा असुरानजयन् तेऽसुराञ्जित्वा रक्षाꣳस्यपानुदन्त तानि रक्षाꣳस्यनृतमकर्तेति समन्तं देवान् पर्यविशन् ते देवा अग्नावनाथन्त तेऽग्नये प्रवते पुरोडाशमष्टाकपालं निरवपन्नग्नये विबाधवतेऽग्नये प्रतीकवते यदग्नये प्रवते निरवपन् यान्येव पुरस्ताद्रक्षाꣳस्यासन् तानि तेन प्राणुदन्त यदग्नये विबाधवते यान्येवाभितो रक्षाꣳस्यासन् तानि तेन व्यबाधन्त यदग्नये प्रतीकवते यान्येव पश्चाद्रक्षाꣳस्यासन् तानि तेनापानुदन्त ततो देवा अभवन्

---

१. तं१.तं२.मै.लं– ' आसन् ' नास्ति । २. तं१.तं२– ' न ' नास्ति । ३. मै४.लं–असुराः । ४. मै४– कुपित° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते देवा अविदुर्यो वै नोऽयं म्रियते रक्षाꣳसि वा इमं घ्नन्तीति ते रक्षाꣳस्युपामन्त्रयन्त तान्यब्रुवन् वरं वृणामहै य(१)दसुराञ्जयाम तन्नः सहासदिति ततो वै देवा असुरानजयन् तेऽसुराञ्जित्वा रक्षाꣳस्यपानुदन्त तानि रक्षाꣳस्यनृतमकर्तेति समन्तं देवान् पर्यविशन् ते देवा अग्नावनाथन्त तेऽग्नये प्रवते पुरोडाशमष्टाकपालं

५ ते। देवाः। अविदुः। यः। वै। नः। अयम्। म्रियते। रक्षाꣳसि। वै। इमम्। घ्नन्ति। इति। ते। रक्षाꣳसि। उपेति। अमन्त्रयन्त। तानि। अब्रुवन्। वरम्। वृणामहै। यत्(१)। असुरान्। जयाम। तत्। नः। सह। असत्। इति। ततः। वै। देवाः। असुरान्। अजयन्। ते। असुरान्। जित्वा। रक्षाꣳसि। अपेति। अनुदन्त। तानि। रक्षाꣳसि। अनृतम्। अकर्त। इति। समन्तमिति सम्-अन्तम्। देवान्। परीति। अविशन्। ते। देवाः। अग्नौ। अनाथन्त। ते।

१० अग्नये। प्रवत इति प्र-वते। पुरोडाशम्। अष्टाकपालमित्यष्टा-कपालम्।

ते देवा इत्यादि ॥ गतम्। तन्नः सहेति। अस्मत्पक्षे युष्माभिर्वर्तितव्यमिति। [v]ततः रक्षोभिः सहायैः [v]देवाः [v]असुरान् [v]अजयन्। जयानन्तरं [v]रक्षांसि [v]अप [v]अनुदन्त ॥

अथ देवैरपनुन्नानि [v]रक्षांसि [v]देवान् [v]समन्तं [v]परि [v]अविशन्। परीत्य [५]अविशन्। सर्वत्र[-५] [६]देवानां शरीरादिष्वनुप्रविश्य अबाधन्त। किं [७]वदन्त इत्याह–[v]अनृतम् असत्यम्

१५ [v]अकर्त कृतवन्तो यूयमिति [८]अन्याय्यं ख्यापयन्तः[-८] [९]पर्यविशन्। [१०]निरुद्धयेव स्थितानि[-१०] इति वा ॥ अथैवं तैरभिभूयमानाः [v]देवाः [v]अग्नौ [v]अनाथन्त ऐश्वर्यमारोपयन् अग्निं नाथयन्ति स्मेति यावत्। यद्वा– अग्नौ याचितृत्वेनावर्तन्त। नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु। त्वया वयं रक्ष्या इति। [११]तत एतां त्रिहविष्कामिष्टिम्[-११] [v]अग्नये [v]निः [v]अवपन् देवाः। [v]प्रवते। प्रवत्,

२० पराऽसुराः' इति ॥ [१]देवादीनामसुरादीनां च सैन्यद्वयं युद्धाय संनद्धमासीत्। असुराणां रक्षसां [२]चास्त्येवावान्तरजातिभेदः। तदीये युद्धे [३]स्वल्पप्रहारेण [v]देवानां शरीरे [v]यत् [v]लोहितम् इतरे [v]अकुर्वन् [v]तत् लोहितस्थानं [v]रक्षांसि प्रतिदिनं रात्रिष्वागत्य केनचिद्विषादिप्रयोगेण [v]असुभ्नन् [४]क्षुभितं कृतवन्तः[-४]। तदानीमेव तेन क्षोभेण देवा म्रियन्ते। [v]तान् [v]मृतान् अभिलक्ष्य पश्चात् [v]व्यौच्छत् रात्रिः प्रभातं प्राप्तवती। ततः [v]देवाः रक्षसां [५]कृत्यमिदमित्यवगत्य [v]रक्षाꣳसि [v]उपामन्त्रयन्त उत्कोचं प्रतिश्रुत्य स्वाधीनानि कृतवन्तः।

२५ ५–५. मै– 'अविशन्। सर्वत्र' नास्ति; तं१.तं२.लं – सर्वत्र। ६. लं– 'देवानामपि विशन्' नास्ति। ७. तं१.तं२.मै.लं–वदन्ति। ८–८. तं१.तं२.मै.लं – अन्याय्यं ख्यापयन्ति॥ ९. मै–'पर्यविशन्। १०–१०. मै४– निरुद्धयैव स्थिताः। ११–११. मै४– त एवं त्रिहविषम्।

१. आ– देवाना°। २. आ.क– चास्त्येवान्तर°; इ– चास्त्यवान्तरभेदः; जो.ना.शृं– चास्त्यवान्तर°। ३. शृं– 'स्वल्पप्रहारेण' नास्ति। ४–४. हो१– क्षुभितवन्तः। ५. ड.शृं– °मिदमित्यवगम्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

निरवपन्नग्नये विबाधवतेऽग्नये प्रतीकवते यदग्नये प्रवते निरवपन् यान्येव पुरस्ता-द्रक्षाꣳस्या(२)सन् तानि तेन प्राणुदन्त यदग्नये विबाधवते यान्येवाभितो रक्षाꣳ-स्यासन् तानि तेन व्यबाधन्त यदग्नये प्रतीकवते यान्येव पश्चाद्रक्षाꣳस्यासन् तानि तेनापानुदन्त ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान्स्यात् स स्पर्धमान

निरिति। अवपन्। अग्नये। विबाधवत इति विबाध - वते। अग्नये। प्रतीकवत इति प्रतीक - वते। यत्। अग्नये। प्रवत इति प्र - वते। निरवपन्निति निः– अवपन्। यानि। एव। पुरस्तात्। रक्षाꣳसि (२)। आसन्। तानि। तेन। प्रेति। अनुदन्त। यत्। अग्नये। विबाधवत इति विबाध - वते। यानि। एव। अभितः। रक्षाꣳसि। आसन्। तानि। तेन। वीति। अबाधन्त। यत्। अग्नये। प्रतीकवत इति प्रतीक - वते। यानि। एव। पश्चात्। रक्षाꣳसि। आसन्। तानि। तेन। अपेति। अनुदन्त। ततः। देवाः। अभवन्। परेति। असुराः। यः। भ्रातृव्यवानिति भ्रातृव्य - वान्। स्यात्। सः। स्पर्धमानः। एतया। इष्ट्या। यजेत। अग्नये। प्रवत इति प्र - वते। पुरोडाशम्। अष्टाकपालमित्यष्टा - कपालम्।

" उपसर्गात् छन्दसि° " (पा ५·१·११८) इति वतिः। [१२]विश्लेष्य बाधो विबाधः, तद्वान् तत्समर्थः। [१३]प्रतीकव्यावृत्तिः तद्वान् प्रतीकवान्[१४]॥ पुरस्तादिति। पूर्वस्यां दिशि। " अस्तातिच " (पा ५·३·४०) इति पुरादेशः। [१५]प्रगतत्वात् तस्याः। प्राणुदन्तेति। प्रथमतः उत्पत्ता-वेवानुदन्। अभित इति। दक्षिणत उत्तरतश्च। व्यबाधन्तेति। [१६]विश्लेष्याबाधन्त दक्षिणत उत्तरतश्चेति विकृष्याबाधयन्[१६]। पश्चादिति। अपरस्यां दिशि " पश्चात् " (पा ५·३·३२) इति निपात्यते। अपानुदन्तेति। अपरस्यां दिशि [१७]अपाकृष्यानाशयन्। तत [१८]इत्यादि। रक्षः-पीडाया[१९] निर्मुक्ता भूतिमन्तः [V]अभवन् असुरानजयन्नित्यर्थः। अत एवाह–पराभूताः [V]असुराः इति॥

ततो रक्षांसि विजयफले भागं संप्रार्थ्य स्वसैन्यान्निर्गत्य देवसैन्ये प्रविष्टानि। [V]ततः [V]देवाः असुरान् [V]जित्वा [V]रक्षांसि अपनोदितवन्तः। [V]तानि [V]रक्षांसि देवाः [V]अनृतम् अकुर्वन् [V]इति निश्चित्य प्रहर्तुं परितो वेष्टन-मकुर्वन्। तदानीं [V]देवाः [V]अग्नौ स्वकार्यसिद्धिमयाचन्त। याचित्वा त्रिहविष्कामिष्टिं [V]निरवपन्। तत्र प्रथमस्य हविषः प्रवानग्निर्देवता, याज्यापुरोनुवाक्ययोः " प्रप्रायमग्निर्भरतस्य " (तैसं २·५·१२) इत्यादिकयोः [1]श्रुतः प्रशब्दो यस्याग्नेरस्ति सोऽयं प्रवान्। द्वितीयस्य हविषो विबाधवानग्निर्देवता, " वि पाजसा पृथुना " (तैसं २·५·१२) इत्यस्मिन् मन्त्रे श्रूयमाणो विबाधशब्दो यस्याग्नेरस्ति सोऽयं विबाधवान्। तृतीयस्य हविषः प्रतीकवानग्निर्देवता, " स त्वमग्ने प्रतीकेन " (तैसं २·५·१२) [V]इति मन्त्रे प्रतीकशब्दो यस्याग्नेरस्ति सोऽयं प्रतीकवान्। तत्र प्रवतोऽग्नेरिष्ट्या पूर्वस्यां दिशि [V]रक्षाꣳसि प्रणोदितवन्तः। विबाधवतोऽग्नेरिष्ट्या दक्षिणोत्तरयोः पार्श्वयोः [V]रक्षाꣳसि विबाधितवन्तः। प्रतीकवतोऽग्नेरिष्ट्या प्रतीच्यां दिशि [V]रक्षांसि अपनोदितवन्तः। [V]ततः [V]देवाः विजयिनः [V]अभवन् [V]असुराः पराजिता अभवन्॥

१२. तं१.तं२–विशेष्य। १३. मै– प्रतिकूला वृत्तिः। १४. लं– 'प्रतीकवान्' नास्ति। १५. तं१.तं२.मै– प्रहतत्वात्। १६–१६. मै – विश्लेष्यानाशयन्; तं१.तं२.पं२.लं–विकृष्यानाशयन्। १७. तं१.तं२.मै.लं– अपकृष्य। १८. मै– इति। १९. तं१.तं२– °पीडया।

६. ड.हो१– 'श्रुतः' नास्ति। ७. हो१– तं सुप्रतीकमित्यनयोः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

एतयेष्ट्या यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवते(३)ऽग्नये प्रतीकवते यदग्नये प्रवते निर्वपति य एवास्माच्छ्रेयान् भ्रातृव्यस्तं तेन प्र णुदते यदग्नये विबाधवते य एवैनेन सदृङ् तं तेन वि बाधते यदग्नये प्रतीकवते य एवास्मात् पापीयान् तं तेनाप नुदते प्र श्रेयाꣳसं भ्रातृव्यं नुदतेऽतिं सदृशं क्रामति नैनं पापीयानाप्नोति य एवं(४)विद्वानेतयेष्ट्या यजते ॥ १ ॥

[वृणामहै यत्पुरस्ताद्रक्षाꣳसि वपेदग्नये विबाधवत एवं चत्वारिं च ।] ॥

निरितिं । वपेत् । अग्नये । विबाधवत इतिं विबाध-वते (३) । अग्नये । प्रतीकवत इति प्रतीक-वते । यत् । अग्नये । प्रवत इति प्र-वते । निर्वपतीतिं निः-वपति । यः । एव । अस्मात् । श्रेयान् । भ्रातृव्यः । तम् । तेन । प्रेतिं । नुदते । यत् । अग्नये । विबाधवत इतिं विबाध-वते । यः । एव । एनेन । सदृङ्डितिं स-दृङ् । तम् । तेन । वीतिं । बाधते । यत् । अग्नये । प्रतीकवत इति प्रतीक-वते । यः । एव । अस्मात् । पापीयान् । तम् । तेन । अपेतिं । नुदते । प्रेतिं । श्रेयाꣳसम् । भ्रातृव्यम् । नुदते । अतीतिं । सदृशम् । क्रामति । न । एनम् । पापीयान् । आप्नोति । यः । एवम् (४) । विद्वान् । एतया । इष्ट्या । यजते ॥ १ ॥

[मैसं २.१.११; १०.७ कासं]

य इत्यादि ॥ गतम् । [v]श्रेयान् प्रशस्यतरः । [v]तं तावत् [v]प्र [v]नुदते स्वरूपाच्च्यावयति सदृङ्डिति । समानं पश्यतीति सदृङ् । " [c]समानान्ययोश्च[c] " (पा ३.२.६० वा १) इति [c]क्विन् । " दृक्स्ववस्स्वतवसां छन्दसि " (पा ७.१.८३) इति नुम् । वि बाधत इति । विश्लेष्य नाशयति । किं च नैनं कदाचिदपि पीडा प्राप्नोति । साम्यमस्य निवर्तयति स्वयमतिशेत इति यावत् । [v]पापीयान् पापतरः [v]तम् [v]अप [v]नुदते नाशयति यथाऽस्य न कदाचिदनुकरोति[२१] ।

अथ वेदितुः स्तुतिः—[v]श्रेयांसं [v]प्र [v]नुदते, [v]सदृशम् [v]अति [v]क्रामति, [v]न [v]एनं कदाचिदपि [२२v]पापीयान् भ्रातृव्यः [२३v]आप्नोति । गतमन्यत् ॥ इति द्वितीये चतुर्थे प्रथमोऽनुवाकः ॥

य इति ॥ इष्टिं विधत्ते—'यो भ्रातृव्यवान्स्यात् स स्पर्धमान एतयेष्ट्या यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवतेऽग्नये प्रतीकवते यदग्नये प्रवते निर्वपति य एवास्माच्छ्रेयान् भ्रातृव्यस्तं तेन प्र णुदते यदग्नये विबाधवते य एवैनेन सदृङ् तं तेन वि बाधते यदग्नये प्रतीकवते य एवास्मात् पापीयान् तं तेनाप नुदते' इति ॥ त्रिविधो हि भ्रातृव्यः । प्रबलः समानबलो हीनबलश्चेति । तेषां त्रयाणां क्रमेण त्रिभिर्हविर्भिरपाकरणं भवति ॥

प्रेति ॥ वेदनं प्रशंसति—'प्र श्रेयाꣳसं भ्रातृव्यं नुदतेति सदृशं क्रामति नैनं पापीयानाप्नोति य एवं विद्वानेतयेष्ट्या यजते' इति ॥ [v]भ्रातृव्यं [v]श्रेयाꣳसं [v]प्र [v]नुदते, [v]सदृशम् [v]अति[v]क्रामति, [v]पापीयान् तु [v]न प्राप्नोत्येव ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥

२०. मै—दृग्भावः । २१. तं१.तं२. °करोतीति । २२. तं१.तं२.मै.लं—'पापीयान्' नास्ति । २३. लं—'आप्नोति' इत्यस्यानन्तरं 'साम्यमस्य' ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

देवासुराः संयत्ता आसन् ते देवा अब्रुवन् यो नो वीर्यावत्तमस्तमनु समारभामहा इति त इन्द्रमब्रुवन् त्वं वै नो वीर्यावत्तमोऽसि त्वामनु समारभामहा इति सोऽब्रवीत् तिस्रो म इमास्तनुवो वीर्यावतीस्ताः प्रीणीताथासुरानभि भविष्यथेति ता वै ब्रूहीत्यब्रवन्नियमश्होमुगियं विमृधेयमिन्द्रियावतीत्यब्रवीत्

देवासुरा इति देव - असुराः । संयत्ता इति सं - यत्ताः । आसन् । ते । देवाः । अब्रुवन् । यः । नः । वीर्यावत्तम इति वीर्यावत् - तमः । तम् । अन्विति । समारभामहा इति सम् - आरभामहै । इति । ते । इन्द्रम् । अब्रुवन् । त्वम् । वै । नः । वीर्यावत्तम इति वीर्यावत् - तमः । असि । त्वाम् । अन्विति । समारभामहा इति सम् - आरभामहै । इति । सः । अब्रवीत् । तिस्रः । मे । इमाः । तनुवः । वीर्यावतीरिति वीर्य - वतीः । ताः । प्रीणीत । अथ । असुरान् । अभीति । भविष्यथ । इति । ताः । वै । ब्रूहि । इति । अब्रुवन् । इयम् । अश्होमुगित्यश्हः–मुक् । इयम् । विमृधेति - वि - मृधा । इयम् । इन्द्रियावतीतीन्द्रिय - वती (१) । इति । अब्रवीत् ।

देवासुरा इत्यादि ॥ गतम् । [v]वीर्यावत्तमः । " अन्येषामपि दृश्यते " (पा ६·३·१३७) इति दीर्घत्वम् । [1]तमन्विति ॥ [v]तं प्रधानभूतं [2]पुरुषमनुसरन्तो वयं संभूय कर्माण्यारभामहे । " हीने " (पा १·४·८६) इत्यनोः कर्मप्रवचनीयत्वम् । [3-]त इत्यादि[-3] । गतम् । एवं वीर्यावतीरिति । वीर्यवत्यः । पूर्ववद्दीर्घत्वम् , " वा छन्दसि " (पा ६·१·१०६) इति पूर्वसवर्णदीर्घत्वम् । ता वा इत्यादि । [v]अब्रुवन् देवाः । इयमित्यादि । [v]अब्रवीत् इन्द्रः । विमृधेति । " अच् " (पा ५·४·७५) इति योगविभागादच् समासान्तः ॥

आद्येऽनुवाके काम्येष्टिः स्पर्धमानस्य वर्णिता ॥

देवासुरा इति ॥ अथ द्वितीये [1]स्पर्धमानस्यैव विजितिसंज्ञाम् [2]इष्टिं विधातुं प्रस्तौति– 'देवासुराः संयत्ता आसन् ते देवा अब्रुवन् यो नो वीर्यावत्तमस्तमनु समारभामहा इति त इन्द्रमब्रुवन् त्वं वै नो वीर्यावत्तमोऽसि त्वामनु समारभामहा इति सोऽब्रवीत् तिस्रो म इमास्तनुवो वीर्यावतीस्ताः प्रीणीताथासुरानभि भविष्यथेति ता वै ब्रूहीत्यब्रुवन्नियमश्होमुगियं विमृधेयमिन्द्रियावतीत्यब्रवीत् त इन्द्रायाश्होमुचे पुरोडाशमेकादशकपालं निरवपन्निन्द्राय वैमृधायेन्द्रायेन्द्रियावते यदिन्द्रायाश्होमुचे निरवपन्नश्हस एव तेनामुच्यन्त यदिन्द्राय वैमृधाय मृध एव तेनापाघ्नत यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनाऽऽत्मन्नदधत त्रयस्त्रिंशत्कपालं पुरोडाशं निरवपन् त्रयस्त्रिंशद्वै देवतास्ता इन्द्र आत्मन्ननु समारम्भयत भूत्यै तां वाव देवा विजितिमुत्तमामसुरैर्व्यजयन्त' इति ॥ युद्धायोद्युक्ताः [v]देवाः परस्परमिदम् [v]अब्रुवन् [v]नः अस्माकं मध्ये [v]यः अतिशयेन वीर्यवान् [v]तम् अनुसृत्य वयं सर्वे [v]समारभामहै सम्यग्युद्धोपक्रमं कुर्मः [v]इति । ततः [v]ते [v]इन्द्रम् अतिशयेन

१. तं१.तं२.मै.लं– तमनु। २. तं१.तं२.मै.लं– 'पुरुषम्' नास्ति। ३–३. लं– इत्यादि।

१. आ–तस्यैव। २. क.हा– इष्टं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त इन्द्रायाऽहोमुचे पुरोडाशमेकादशकपालं निरवपन्निन्द्राय वैमृधायेन्द्रायेन्द्रियावते यदिन्द्रायाऽहोमुचे निरवपन्नऽहस एव तेनामुच्यन्त यदिन्द्राय वैमृधाय मृध एव तेनापाघ्नत यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनाऽऽत्मन्नदधत त्रयस्त्रिꣳशत्कपालं पुरोडाशं निरवपन् त्रयस्त्रिꣳशद्वै देवतास्ता इन्द्रं आत्मन्नु समारम्भयत भूत्यै (२)
तां वाव देवा विजितिमुत्तमामसुरैर्व्यजयन्त

ते। इन्द्राय। अऽहोमुच इत्यऽहः-मुचे। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। अवपन्। इन्द्राय। वैमृधाय। इन्द्राय। इन्द्रियावत इतीन्द्रिय-वते। यत्। इन्द्राय। अऽहोमुच इत्यऽहः-मुचे। निरवपन्निति निः- अवपन्। अऽहसः। एव। तेन। अमुच्यन्त। यत्। इन्द्राय। वैमृधाय। मृधः। एव। तेन। अपेति। अघ्नत। यत्। इन्द्राय। इन्द्रियावत इतीन्द्रिय-वते। इन्द्रियम्। एव। तेन। आत्मन्। अदधत। त्रयस्त्रिꣳशत्कपालमिति त्रयस्त्रिꣳशत्-कपालम्। पुरोडाशम्। निरिति। अवपन्। त्रयस्त्रिꣳशदिति त्रयः-त्रिꣳशत्। वै। देवताः। ताः। इन्द्रः। आत्मन्। अन्विति। समारम्भयतेति सम्-आरम्भयत। भूत्यै (२)। ताम्। वाव। देवाः। विजितिमिति वि-जितिम्। उत्तमामित्युत्-तमाम्। असुरैः। व्रीति। अजयन्त।

अथ [V]ते देवाः [४V]इन्द्राय एतां त्रिहविष्कामिष्टिं [V]निः [V]अवपन्। त्रयस्त्रिंशत्कपालमिति। त्रयाणामेकादशकपालानां त्रयस्त्रिंशत्कपाला[५] भवन्तीति भावः। [V]पुरोडाशम् इति च [६]जात्यभिधानम्। आत्मन्निति। आत्मनि गुणभूतानकरोत्, तद्देवानां [V]भूत्यै अभवत्। विजितिमिति। व्यावृत्तो जयो विजितिः। असुरेभ्यो व्यावृत्ताम् [V]उत्तमाम् [V]विजितिम् इति। [V]वि [V]अजयन्त प्राप्नुवन्, उत्तममसुरविजयमलभन्तेति, यावत्; 'गोपोषं पुष्णाति' इतिवत् [७]सामान्यविशेषविषयत्वम् उभयोः[७]। गतमन्यत्॥

वीर्यवन्तं निश्चित्य तेनोक्तास्तदीयाः [V]तिस्रः तनूर्हविर्भिस्तर्पितवन्तः। तैश्च हविर्भिः क्रमेण पापविमोकं वैर्यघातं सामर्थ्यधारणं च कृतवन्तः। [३]त्रिष्वेकादशकपालपुरोडाशेषु मिलित्वा त्रयस्त्रिंशत्कपालः पुरोडाशः संपद्यते। तेन च [४]त्रयस्त्रिंशत्संख्याकान् देवान् [V]इन्द्रः आत्माधीनान् करोति। तच्चैश्वर्याय संपद्यते। ततः [V]देवाः [V]असुरैः सह [५]युद्ध्वा [V]तां पूर्वोक्तां पापविमोकशत्रुवधेन्द्रियधारणरूपाम् [V]उत्तमां [V]विजितिं प्राप्नुवन्॥

---

४. मै४- इन्द्रादयः। ५. मै४.लं- कपालानि। ६. मै४- जात्यभिप्रायम्। ७-७. तं१.तं२. मै-सामान्यविशेषाभिप्रायत्वात्; पं२- सामान्यविशेषविषयत्वात्।

---

३. हो१- °कपालेषु पुरोडाशेषु। ४. ड- त्रयस्त्रिंशत्कपालसंख्याकान्। ५. आ-युद्धार्थं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेतेन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावतेऽꣳहसा वा एष गृहीतो यस्माच्छ्रेयान् भ्रातृव्यो यदिन्द्रायाꣳहोमुचे निर्वपत्यꣳहस एव तेन मुच्यते मृधा वा एषोऽभिषण्णो यस्मात् समानेष्वन्यः श्रेयानुता(३)भ्रातृव्यो यदिन्द्राय वैमृधाय मृध एव तैनाप हते

यः। भ्रातृव्यवानिति भ्रातृव्य-वान्। स्यात्। सः। स्पर्धमानः। एतया। इष्ट्या। यजेत। इन्द्राय। अꣳहोमुच इत्यꣳहः–मुचे। पुरोडाशम्। एकादशकपालमित्येकादश-कपालम्। निरिति। वपेत्। इन्द्राय। वैमृधाय। इन्द्राय। इन्द्रियावत इतीन्द्रिय-वते। अꣳहसा। वै। एषः। गृहीतः। यस्मात्। श्रेयान्। भ्रातृव्यः। यत्। इन्द्राय। अꣳहोमुच इत्यꣳहः–मुचे। निर्वपतीति निः–वपति। अꣳहसः। एव। तेन। मुच्यते। मृधा। वै। एषः। अभिषण्ण इत्यभि-सन्नः। यस्मात्। समानेषु। अन्यः। श्रेयान्। उत (३)। अभ्रातृव्यः। यत्। इन्द्राय। वैमृधाय। मृधः। एव। तेन। अपेति। हते।

यस्मादिति॥ [V]यस्मात् [V]भ्रातृव्यः [V]श्रेयान् प्रशस्यतरो भवति, सोऽयम् [V]अꣳहसा [V]गृहीतः, तस्मात् [V]अꣳहोमुचे निर्वपेत्। [V]तेन [V]अंहसः मुक्तो भवति। मृधा वा इत्यादि। [V]समानेषु मध्ये [V]अभ्रातृव्यः अपि नाम कश्चित् [V]यस्मात् [V]अन्यः [V]श्रेयान् प्रशस्यतरो भवति [V]एषः खलु [V]मृधा [V]अभिषण्णः संग्रामाभिभूत इव भवति। तस्मात् [V]इन्द्राय [V]वैमृधाय निर्वपेत्, मृधः संग्रामानपहन्ति॥

य इति॥ विधत्ते–'यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेतेन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावतेऽꣳहसा वा एष गृहीतो यस्माच्छ्रेयान् भ्रातृव्यो यदिन्द्रायाꣳहोमुचे निर्वपत्यꣳहस एव तेन मुच्यते मृधा वा एषोऽभिषण्णो यस्मात् समानेष्वन्यः श्रेयानुता-भ्रातृव्यो यदिन्द्राय वैमृधाय मृध एव तेनाप हते यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनात्मन् धत्ते त्रयस्त्रिꣳ-शत्कपालं पुरोडाशं निर्वपति त्रयस्त्रिꣳशद्वै देवतास्ता एव यजमान आत्मन्ननु समारम्भयते मूत्यै' इति॥ पूर्वोक्तप्रवदादिविशेषणवदंहोमुगादिविशेषणानि याज्यानुवाक्यागतशब्दाभिप्रायेण वा स्वार्थपरत्वेन वा योजनीयानि। "अꣳहोमुचे प्र भरेमा मनीषाम्" (तैसं १.६.१२) इत्यस्मिन् मन्त्रेऽस्त्यंहोमुक्शब्दः। "वि न इन्द्र मृधो जहि" (तैसं १.६.१२) इत्यस्मिन् मन्त्रेऽस्ति [1]विमृच्छब्दः। "इन्द्रियाणि शतक्रतो" (तैसं १.६.१२) इत्यस्मिन्मन्त्रेऽस्तीन्द्रियशब्दः। अर्थपरत्वं तु विस्पष्टम्। पूर्वोक्तेषु प्रवदादिष्वपि [W]प्रणोदनवत्त्वं शत्रुविबाधवत्त्वं [2]प्रत्यङ्मुखवत्त्वं चेत्यर्थपरत्वं योज्यम्। [V]यस्मात् यजमानात् [V]भ्रातृव्यः

६. आ.ड– विमृधशब्दः। ७. हो१ – प्रतुन्दनवत्वम्। ८. क.हा – प्राङ्मुख°; ड.शृं– प्रामुख्यवत्त्वं; हो१– प्रारम्भवत्वम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनाऽऽत्मन् धत्ते त्रयस्त्रिꣳशत्कपालं पुरोडाशं निर्वपति त्रयस्त्रिꣳशद्वै देवतास्ता एव यजमान आत्मन्ननु समारम्भयते भूत्यै सा वा एषा विजितिनामेष्टिर्य एवं विद्वानेतयेष्ट्या यजत उत्तमामेव विजितिं भ्रातृव्येण वि जयते ॥ २ ॥

[इन्द्रियावती भूत्या उतैकान्नपञ्चाशच्च]

यत्। इन्द्राय। इन्द्रियावत इतीन्द्रिय-वते। इन्द्रियम्। एव। तेन। आत्मन्। धत्ते। त्रयस्त्रिꣳशत्कपालमिति त्रयस्त्रिꣳशत्-कपालम्। पुरोडाशम्। निरिति। वपति। त्रयस्त्रिꣳशदिति त्रयः-त्रिꣳशत्। वै। देवताः। ताः। एव। यजमानः। आत्मन्। अन्विति। समारम्भयत इति सम्-आरम्भयते। भूत्यै। सा। वै। एषा। विजितिरिति वि-जितिः। नाम। इष्टिः। यः। एवम्। विद्वान्। एतया। इष्ट्या। यजते। उत्तमामित्युत्-तमाम्। एव। विजितिमिति वि-जितिम्। भ्रातृव्येण। वीति। जयते ॥ २ ॥

[मैसं २·२·५, १० कासं १०·१०]

विजितिर्नामेति ॥ विजयहेतुत्वात्। गतमन्यत् ॥

इति द्वितीये चतुर्थे द्वितीयोऽनुवाकः ॥

[1]श्रेयान् भवति सः [2]एषः यजमानः पाप्मना [3]गृहीतः भवति। स च प्रथमहविषा पापात् [4]मुच्यते। [5]समानेषु मध्ये [6]यस्मात् यजमानात् [7]अन्यः [8]श्रेयान् भवति सोऽन्यो यद्यपि [9]अभ्रातृव्यः तथाऽपि [10]एषः अश्रेयान् यजमानः [11]श्रेयस्त्वमात्रसंपादितवैरित्वेन तेनान्येन [12]अभिषण्णः अभिभूतो भवति, तदीयश्रेयस्त्वम् असहमानः [13]तेनाहमभिभूतोऽस्मीति क्ष्विभाति। स तु द्वितीयेन हविषा [14]मृधः तादृशान्शत्रून् [15]अपहते। तृतीयेन हविषेन्द्रियधारणं भवति। पूर्ववत् समुदितया त्रयस्त्रिꣳशत्संख्यया यजमानस्य सर्वा देवताः स्वाधीना भवन्ति। तच्च [16]भूत्यै संपद्यते ॥

सेति ॥ इष्टेः [17]नामोपदिश्य तद्वेदनं प्रशंसति-' सा वा एषा विजितिर्नामेष्टिर्य एवं विद्वानेतयेष्ट्या यजत उत्तमामेव विजितिं भ्रातृव्येण वि जयते ' इति ॥ विशेषेण जयन्त्यनयेति [18]विजितिः। एतद्वेदिता [19]भ्रातृव्येण सह युद्ध्वा तां पूर्वोक्तां पापमोक्षादिरूपाम् [20]उत्तमां [21]विजितिं प्राप्नोति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥

९ आ- एव। १०. हो१- श्रेयसि तमत्र संपादितवैरत्वेन। ११. आ.ड.शृं- सन्नहमभि°। १२-१२. ड-नामाधिक्तम्; हो१- नाम अधीत्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

देवासुराः संयत्ता आसन् तेषां गायत्र्योजो बलमिन्द्रियं वीर्यं प्रजां पशून्त्संगृह्याऽऽदायापक्रम्यातिष्ठत् तेऽमन्यन्त यतरान् वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति तां व्यह्वयन्त विश्वकर्मन्निति देवा दाभीत्यसुराः सा नान्यतराꣳश्चनोपावर्तत

देवासुरा इति देव - असुराः । संयत्ता इति सं - यत्ताः । आसन् । तेषाम् । गायत्री । ओजः । बलम् । इन्द्रियम् । वीर्यम् । प्रजामिति प्र-जाम् । पशून् । संगृह्येति सं - गृह्य । आदायेत्या-दाय । अपक्रम्येत्यप-क्रम्य । अतिष्ठत् । ते । अमन्यन्त । यतरान् । वै । इयम् । उपावर्त्स्यतीत्युप-आवर्त्स्यति । ते । इदम् । भविष्यन्ति । इति । ताम् । वीति । अह्वयन्त । विश्वकर्मन्निति विश्व - कर्मन् । इति । देवाः । दाभि । इति । असुराः । सा । न । अन्यतरान् । चन । उपावर्ततेत्युप - आवर्तत ।

देवासुरा इत्यादि ॥ [V]तेषां देवासुराणाम् ओजःप्रभृति [V]संगृह्य [V]आदाय आच्छिद्य [V]अपक्रम्य तेन सह तत्सकाशादपक्रम्य क्वापि [V]अतिष्ठत् [V]गायत्री । [V]ते [१]देवा असुराश्च[१] [V]अमन्यन्त अस्माकं मध्ये [V]यतरान् [V]इयम् [V]उपावर्त्स्यति उपावर्तिष्यते [२V]ते [V]इदं विश्वं [V]भविष्यन्ति [V]इति[३] अस्य विश्वस्य स्वामिनस्ते भविष्यन्तीति[३] । यद्वा– इदं विश्वं ते भविष्यन्ति

द्वितीये विजयार्थेष्टिः प्रोक्ता [1]विजितिनामिका ॥

देवासुरा इति ॥ अथ तृतीये [2]भ्रातृव्यवतः स्पर्धमानस्य संवर्गेष्टिं विधित्सुरादौ तदङ्गभूतं मन्त्रं पठितुं प्रस्तौति–' देवासुराः संयत्ता आसन् तेषां गायत्र्योजो बलमिन्द्रियं वीर्यं प्रजां पशून्त्संगृह्याऽऽदायापक्रम्यातिष्ठत् तेऽमन्यन्त यतरान् वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति तां व्यह्वयन्त विश्वकर्मन्निति देवा दाभीत्यसुराः सा नान्यतराꣳश्चनोपावर्तत ते देवा एतद्यजुरपश्यन् ' इति । [V]ओजः त्वगसृङ्मांसादिधातुषु[1] अष्टमो धातुः । तथा च संप्रदायविद्भिरुक्तम् – " ओजो [4]नामाष्टमी दशा " इति[4] । बलं शरीरशक्तिः । इन्द्रियं दृष्ट्यादिपाटवम् । वीर्यमुत्साहः । प्रजाः पुत्रादिकाः । पशवो गवादिकाः । देवासुरेषु [5]युद्धार्थं गतेषु[5] तदीयानोजःप्रभृतीन् षट्पदार्थान् [V]गायत्री [V]संगृह्य तदुभयेभ्यः [V]अपक्रम्य दूरे स्थितवती । तां दृष्ट्वा [V]ते देवाश्चासुराश्चैवम् [V]अमन्यन्त– उभयोर्वर्गयोर्मध्ये [V]यतरान् यद्वर्गस्थितान् [V]इयं गायत्री [6]प्राप्स्यति तद्वर्गस्थिताः [V]इदं सर्वैश्वर्यं प्राप्स्यन्तीति । तदुभयेऽपि [V]तां गायत्रीं विलक्षणेन शब्देनाऽऽहूतवन्तः । हे [V]विश्वकर्मन् [V]इति देवानामाह्वानं, हे [V]दाभि [V]इति असुराणामाह्वानं, विश्वानि कर्माणि यस्याः सा विश्वकर्मा, तत्संबोधनं हे विश्वकर्मन्निति । दभ्नोति विरोधिनो हिनस्तीति दाभी, तत्संबोधनं हे दाभीति । [V]सा गायत्री [V]अन्यतरान् उभयोर्वर्गयोः [7]मध्ये [8]कानपि पुरुषान् [V]न एव प्राप्नोत् । ततः [9V]ते [V]देवाः[9] तत्प्राप्त्युपायत्वेन [V]एतत् [V]यजुः [V]अपश्यन् ॥

१–१. तं.तं२.मै.लं– देवासुराः । २. तं१.तं२.लं– 'ते' नास्ति । ३. तं१.तं२– 'इति' नास्ति ।

१. आ.ड– नामका । २. इ.जो.ना.हा– भ्रातृव्येण । ३. आ.क– °मांसादिधातुभ्यो जातः; इ.ना– °मांसादिधातुभ्यः । ४–४. क– नामाष्टममिति; हो१– नामाष्टमो धातुरिति । ५–५. अ.ड.पा– युद्धं गतेषु; इ– युद्धार्थं संगतेषु । ६. ड.हो१– प्राप्यते । ७. इ– मध्यस्थितान् । ८. हो१– कांश्चिदपि । ९–९. ड.शृं– 'ते देवाः' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते देवा एतद्यजुरपश्यन्नोजोऽसि सहोऽसि बलमसि (१) भ्राजोऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभू-

ते। देवाः। एतत्। यजुः। अपश्यन्। ओजः। असि। सहः। असि। बलम्। असि (१)। भ्राजः। असि। देवानाम्। धाम। नाम। असि। विश्वम्। असि। विश्वायुरिति विश्व - आयुः। सर्वम्। असि। सर्वायुरिति सर्व - आयुः। अभिभूरित्यभि - भूः।

प्राप्स्यन्तीति। " वृद्भ्यः स्यसनोः " (पा १·३·९२) इति परस्मैपदम्, न वृद्भ्यश्चतुर्भ्यः (पा ७·२·५९) इतीडभावः। अथ देवासुराः [V]तां [V]वि [V]अह्वयन्त विविधमाह्वयन्निति। " निसमुपविभ्यो ह्वः " (पा १·३·३०) इत्यात्मनेपदम्। विश्वकर्मन्निति। विश्वानि कर्माण्यस्यामिति विश्वकर्मा। " मनः " (पा ४·१·११) इति ङीप्प्रतिषेधः, " आमन्त्रिताद्युदात्तत्वम् " (पा ६·१·१९८)। हे [V]विश्वकर्मन् [V]इति [V]देवाः गायत्रीमाह्वयन्। [४-]हे [V]दाभि [V]इति [V]असुराः आह्वयन्[-४], सामर्थ्यात् ह्वयत्यर्थमात्रं संबध्यते। यद्वा– व्यह्वयन्त विलक्षणमाह्वानं कृतवन्तः। [५-]वैलक्षण्यं चाह्वानपदभेदः[-५]। दभनं दाहः, [६]दभिः प्रकृत्यन्तरमस्ति, तस्मात् घञन्तात् मत्वर्थीयः अकारः, गौरादिर्द्रष्टव्यः (पा ४·१·४१), पूर्ववदामन्त्रिताद्युदात्तत्वम्, " अम्बार्थनद्योः° " (पा ७·३·१०७) इति ह्रस्वत्वम्। यद्वा–पचाद्यजन्तात् स्वार्थिकोऽण्, ततः " टिड्ढाणञ्° " (पा ४·१·१५) इति ङीप्। सेत्यादि। गतम्॥

ओजोऽसीत्यादि॥ [७-]V[-७]ओजः [V]असि तेजोऽसि[८-] [८]यशोऽसि [V]देवानाम्। सर्वत्र तद्धेतुत्वात् ताच्छब्द्यम्। [V]सहः [V]असि अभिभवसाधनमसि शत्रूणाम्। [V]बलं प्रसिद्धम्। [V]भ्राजः दीप्तिः। [V]धाम स्थानम्। [V]नाम नमनमुपकारकम्। [V]विश्वम् [V]असि अन्यदपि यद्भद्रं तदसि। [V]विश्वायुः [९]विश्वमायुर्जीवितमस्मिन्निति विश्वायुः। " बहुव्रीहौ विश्वं संज्ञायाम् " (पा ६·२·१०६) इति विश्वशब्दस्यान्तोदात्तत्वम्। [V]सर्वम् [V]असि सर्वमपि [१०-]जगत्कर्तृ त्वमसि[-१०]। [११-V]सर्वायुः

ओज इति॥ तदिदं यजुः पठति– 'ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः' इति॥ अत्र सर्वात्मकत्वेन गायत्री स्तूयते। ओजोबले व्याख्याते। [V]सहः सहिष्णुत्वं धैर्यम्। [V]भ्राजः दीप्तिः। [V]देवानां [V]धाम स्वर्गः। [V]नाम इन्द्रादिकम्। [V]विश्वम् अचेतनं कृत्स्नं जगत्। [V]विश्वायुः कृत्स्नान्नयुक्तम्। [V]सर्वं चेतनरूपं कृत्स्नं जगत्। सर्वाण्यायुष्याणि यस्य चेतनस्य जगतस्तत् [V]सर्वायुः। वैरिणोऽभिभवतीति [V]अभिभूः॥

४–४. मै४– 'हे दाभि.....आह्वयन्' नास्ति। ५–५. मै४– तत्र वैलक्षण्यं चाह्वानस्याह, हे दाभि। ६. मै४– दाभिः। ७–७. तं१.तं२.मै.लं– तेजोऽसि। ८. तं१.तं२– 'यशोऽसि' नास्ति। ९. तं१.तं२.मै.लं – विश्वायुर्जीवित°। १०–१०. तं१.तं२.मै.लं – जगतामेवासि। ११–११. तं१. तं२.मै.लं सर्वायुरसि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

-रिति वाव देवा असुराणामोजो बलमिन्द्रियं वीर्यं प्रजां पशूनवृञ्जत यद्गायत्र्यपक्रम्यातिष्ठत् तस्मादेतां गायत्रीतीष्टिमाहुः संवत्सरो वै गायत्री संवत्सरो वै तदपक्रम्यातिष्ठद्यदेतया देवा असुराणामोजो बलमिन्द्रियं वीर्यं (२) प्रजां पशूनवृञ्जत तस्मादेतां संवर्ग इतीष्टिमाहु-

इति । वाव । देवाः । असुराणाम् । ओजः । बलम् । इन्द्रियम् । वीर्यम् । प्रजामिति प्र-जाम् । पशून् । अवृञ्जत । यत् । गायत्री । अपक्रम्येत्यप-क्रम्य । अतिष्ठत् । तस्मात् । एताम् । गायत्री । इति । इष्टिम् । आहुः । संवत्सर इति सं-वत्सरः । वै । गायत्री । संवत्सर इति सं-वत्सरः । वै । तत् । अपक्रम्येत्यप-क्रम्य । अतिष्ठत् । यत् । एतया । देवाः । असुराणाम् । ओजः । बलम् । इन्द्रियम् । वीर्यम् (२) । प्रजामिति प्र-जाम् । पशून् । अवृञ्जत । तस्मात् । एताम् । संवर्ग इति सं-वर्गः । इति । इष्टिम् । आहुः ।

च असि[११] । सर्वाणि चायूंषि [१२]सर्वाण्यन्नानि अस्यामिति [१३]सर्वायुः सर्वान्नहेतुरसि । [V]अभिभूः यस्मादेवं तस्मात् त्वं [१४]सर्वस्य उपरि भवसि [१५]सर्वस्य च[१६] अभिभवित्र्यसि ॥

इति वावेत्यादि ॥ [V]इति अनेन यजुषा [V]देवाः [V]असुराणाम् अपि ओजआदिकम् [V]अवृञ्जत आवर्जयन् आत्मसात्कृतवन्तः न केवलमात्मीयमेव लब्धवन्तः ।

यदित्यादि । गायत्र्यपक्रमणहेतुत्वात् [V]एतां वक्ष्यमाणाम् [V]इष्टिं [V]गायत्री [V]इति [V]आहुः वेदार्थविदः ॥

संवत्सरो वा इत्यादि ॥ [१७]संवत्सरवत् सर्वार्थहेतुत्वात् बलसाम्यात्[१७] तदानीं [V]संवत्सरः एव देवेभ्यः [V]अपक्रम्य [V]अतिष्ठत् । यथा संवत्सरापक्रमेण[१८] ओजआदिकं नश्यति तद्वदिदमिति । यदेतयेत्यादि । [१९]संवृज्यते ओजआदिकं सर्वं सहैवानेन [२०]आवृज्यते आच्छिद्यते इति [V]संवर्गः योगः । वृजी वर्जने, घञि " चजोः कु घिण्ण्यतोः " (पा ७·३·५२) इति कुत्वम् ॥

इतीति ॥ [१०]यथोक्तं मन्त्रसाध्यं[१०] फलं दर्शयति– ' इति वाव देवा असुराणामोजो बलमिन्द्रियं वीर्यं प्रजां पशूनवृञ्जत ' इति ॥ अनेनैवोक्तेन स्तुतिरूपेण मन्त्रेण गायत्रीं प्रसाद्य तत्प्रसादात् असुराणामोजआदिषट्कं विनाश्य स्वयं तल्लब्धवन्तः ॥

यदिति ॥ अथेष्टिं विधातुं प्रस्तौति – ' यद्गायत्र्यपक्रम्यातिष्ठत् तस्मादेतां गायत्रीतीष्टिमाहुः संवत्सरो वै गायत्री संवत्सरो वै तदपक्रम्यातिष्ठद्यदेतया देवा असुराणामोजो बलमिन्द्रियं वीर्यं प्रजां

---

१२. तं१.तं२.मै.लं – अन्नानि । १३–१३. तं१.तं२.मै.मै४.लं– ' सर्वायुः ' नास्ति । १४. तं१.तं२–सूर्यस्य । १५. लं– सूर्यस्य । १६. तं१.तं२.मै.लं–' च ' नास्ति । १७–१७. मै४– संवत्सरः स्वार्थहेतुत्वात् ताद्धर्म्यात् । १८. मै४ –°क्रमेण । १९. मै– संव्रज्यते । २०. मै– आव्रज्यते ।

१०. आ– यथा मन्त्रस्यार्थम्; हो१– यथोक्तमन्त्रस्यार्थम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

-र्यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेताग्नये संवर्गाय पुरोडाशमष्टा-कपालं निर्वपेत् तꣳ शृतमासन्नमेतेन यजुषाऽभि मृशेदोज एव बलमिन्द्रियं वीर्यं प्रजां पशून् भ्रातृव्यस्य वृङ्क्ते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति ॥ ३ ॥

[बलमस्येतया देवा असुराणामोजो बलमिन्द्रियं वीर्यं पञ्चचत्वारिꣳशच्च]

५ यः । भ्रातृव्यवानिति भ्रातृव्य - वान् । स्यात् । सः । स्पर्धमानः । एतया । इष्ट्या । यजेत । अग्नये । संवर्गायेति सं - वर्गाय । पुरोडाशम् । अष्टाकपालमित्यष्टा - कपालम् । निरिति । वपेत् । तम् । शृतम् । आसन्नमित्या - सन्नम् । एतेन । यजुषा । अभीति । मृशेत् । ओजः । एव । बलम् । इन्द्रियम् । वीर्यम् । प्रजामिति प्र - जाम् । पशून् । भ्रातृव्यस्य । वृङ्क्ते । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति ॥ ३ ॥

१० [मैसं २.१.११; कासं १०.७]

यो भ्रातृव्यवानित्यादि गतम् । एतेन यजुषेत्यादि । 'ओजोऽसि' इत्यादिना । अत्राचार्येण—" सर्वायुरभिभूरस्यभिभूरहम् "अनेन हविषाऽमुं भ्रातृव्यमभिभूयासम् " (द्र. बौश्रौ १३.३५.१) इति शेषो दर्शितः ॥

इति द्वितीये चतुर्थे तृतीयोऽनुवाकः ॥

१५ **पशूनवृञ्जत तस्मादेताꣳ संवर्ग इतीष्टिमाहुः' इति ॥ विधास्यमानाया इष्टेर्गायत्री संवर्गः इति नामद्वयम् । यस्मात् ᵛगायत्री सर्वमादाय ᵛअपक्रम्य स्थित्वा मन्त्रेण स्तुता सती सर्वमानीतवती ᵛतस्मात् तेन मन्त्रेण हविरभिमृश्य क्रियमाणेष्टिः ᵛगायत्री इत्युच्यते । सा च ᵛगायत्री संवत्सररूपा तदीयाक्षरेष्वर्धमासेषु च चतुर्विंशतिसंख्यायाः समानत्वात् । अतः ᵛसंवत्सर एव तदानीं गायत्रीरूपेण ᵛअपक्रम्य ᵛअतिष्ठत् इति संवत्सरात्मकत्वात् प्रशस्तेयमिष्टिः । यस्मात् ᵛएतया इष्ट्या ᵛदेवाः ᵛअसुराणां संबन्ध्योजआदिषट्कं**

२० **वर्जितवन्तः ᵛतस्मात् सम्यग्वृज्यते विनाश्यतेऽनेनेति संवर्गनामकोऽयं यागः ।**

ओ इति ॥ इदानीं विधत्ते— 'यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेताग्नये संवर्गाय पुरोडाशमष्टाकपालं निर्वपेत्' इति ॥ "संवर्गꣳ सꣳ रयिं जय" (तैसं २.६.११) इति याज्यायां संवर्गशब्दश्रवणात् ᵘᵘवैरिसंबन्ध्योजआदिवर्जनहेतुत्वाच्चायमग्निः संवर्गः ॥

तमिति ॥ पूर्वपठितम् 'ओजोऽसि' इत्यादिमन्त्रं विनियुङ्क्ते—'तꣳ शृतमासन्नमेतेन यजुषाऽभि

१५ **मृशेदोज एव बलमिन्द्रियं वीर्यं प्रजां पशून् भ्रातृव्यस्य वृङ्क्ते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति' इति ॥ ᵛतं पुरोडाशं ᵛशृतं पक्वम् ᵛआसन्नं वेद्यामासादितम् ॥**

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥

२१. मै- तेन ।

३० ११. हो१- वैरिणां संब° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टाः पराचीरायन् ता यत्रावसन् ततो गर्मुदुदतिष्ठत् ता बृहस्पतिश्चान्ववैताꣳ सोऽब्रवीद्बृहस्पतिरनया त्वा प्र तिष्ठान्यथ त्वा प्रजा उपावर्त्स्यन्तीति तं प्रातिष्ठत् ततो वै प्रजापतिं प्रजा उपावर्तन्त

प्रजापतिरिति प्रजा-पतिः । प्रजा इति प्र-जाः । असृजत । ताः । अस्मात् । सृष्टाः । पराचीः । आयन् । ताः । यत्र । अवसन् । ततः । गर्मुत् । उदिति । अतिष्ठत् । ताः । बृहस्पतिः । च । अन्ववैतामित्यनु-अवैताम् । सः । अब्रवीत् । बृहस्पतिः । अनया । त्वा । प्रेति । तिष्ठानि । अथ । त्वा । प्रजा इति प्र-जाः । उपावर्त्स्यन्तीत्युप-आवर्त्स्यन्ति । इति । तम् । प्रेति । अतिष्ठत् । ततः । वै । प्रजापतिमिति प्रजा-पतिम् । प्रजा इति प्र-जाः । उपावर्तन्तेत्युप-आवर्तन्त ।

प्रजापतिः प्रजा असृजतेत्यादि ॥ [v]पराचीः पराचीनगतयः अपुनरावृत्ता एव [१-v]आयन् गताः[-१] [v]ताः [v]यत्र [v]अवसन् [v]ततः [v]गर्मुत् [v]उत् [v]अतिष्ठत् अकृष्टादेव प्रदेशात् स्वयमेवाजायत। १० विजातीयेन सहोत्पन्नः तृणविशेषो गर्मुत्। ओषधीनां [२]दुष्टपरिणाम इत्येके। अथ [v]ताः [३]प्रजाः [v]बृहस्पतिः [v]च[४] प्रजापतिश्च [v]अनु [v]अवैतां पश्चादनुसृत्य अवगतवन्तौ । अथ [v]सः [v]अब्रवीत् [v]बृहस्पतिः प्रजापतिम् [v]अनया गर्मुता त्वां [v]प्र [v]तिष्ठानि प्रकर्षेण स्थापयामि। [v]अथ प्रकृष्टस्थितिकं त्वां [v]प्रजाः [v]उपावर्त्स्यन्ति [v]इति। अथ [v]तं गार्मुतेन चरुणा [v]प्रातिष्ठत् [५]प्रकृष्टं स्थापितवान्।

स्पर्धमानस्य विहिता संवर्गेष्टिस्तृतीयके ॥ १५

प्रजापतिरिति ॥ अथ चतुर्थे गार्मुतं चरुं विधातुं प्रस्तौति–'प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टाः पराचीरायन् ता यत्रावसन् ततो गर्मुदुदतिष्ठत् ता बृहस्पतिश्चान्ववैताꣳ सोऽब्रवीद्बृहस्पतिरनया त्वा प्रतिष्ठान्यथ त्वा प्रजा उपावर्त्स्यन्तीति तं प्रातिष्ठत् ततो वै प्रजापतिं प्रजा उपावर्तन्त' इति ॥ [v]ताः पराङ्मुखत्वेनापगताः प्रजाः [१-v]यत्र [v]अवसन्[-१] यत्र देशे निवासं कृतवत्यस्तत्र देशे भाण्डक्षालनादि-निष्कासपातेन [v]ततः देशात् [२]गर्मुत्संज्ञकम् अकृष्टपच्यम् अरण्यमुद्गरूपं धान्यम् [v]उदतिष्ठत् तदानीं २० [v]बृहस्पतिः [v]च प्रजापतिश्च [v]ताः प्रजाः अनुगतवन्तौ ॥ अत्र चकारादनाम्नातोऽपि प्रकृतः प्रजापतिः समुच्चीयते। तदा प्रजापतिं प्रति [v]बृहस्पतिः एवम् [v]अब्रवीत्। [v]अनया गार्मुतधान्यरूपया त्वां [v]प्रतिष्ठानि धान्यवत्त्वेन प्रतिष्ठितं करोमि। ततो धान्यवन्तं त्वां तदर्थिन्यः [v]प्रजाः उपगमिष्यन्तीत्युक्त्वा [v]तं प्रजापतिं प्रति प्रतिष्ठितवान्। [v]ततः धान्यवन्तं [v]प्रजापतिं धान्यार्थिन्यः [v]प्रजाः उपगताः ॥

१–१. तं१.तं२.मै.लं– यद्गताः। २. तं१.तं२– जुष्ट°। ३. तं१.तं२.मै.लं– 'प्रजाः' नास्ति। २५
४. तं१.तं२.मै.लं– 'च' नास्ति। ५. मै४– अपकृष्य।

१. अ.आ.उ.क.ड.जो.ना.पा.शृं.हा.हो१– 'यत्रावसन्' नास्ति। २. आ– गर्मुन्नसंज्ञकम्; ड.हो१– गर्मुन्नामकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यः प्रजाकामः स्यात् तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेत् प्रजापति(१)मेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजां प्र जनयति प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टाः पराञ्च आयन् ते यत्रावसन् ततो गर्मुदुदतिष्ठत् तान् पूषा चान्ववैताꣳ सोऽब्रवीत् पूषाऽनया मा प्र तिष्ठाथ त्वा पशव उपावर्त्स्यन्तीति मां प्र तिष्ठेति सोमोऽब्रवीन्-

यः । प्रजाकाम इति प्रजा - कामः । स्यात् । तस्मै । एतम् । प्राजापत्यमिति प्राजा - पत्यम् । गार्मुतम् । चरुम् । निरिति । वपेत् । प्रजापतिमिति प्रजा - पतिम् (१) । एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । सः । एव । अस्मै । प्रजामिति प्र - जाम् । प्रेति । जनयति । प्रजापतिरिति प्रजा - पतिः । पशून् । असृजत । ते । अस्मात् । सृष्टाः । पराञ्चः । आयन् । ते । यत्र । अवसन् । ततः । गर्मुत् । उदिति । अतिष्ठत् । तान् । पूषा । च । अन्ववैतामित्यनु - अवैताम् । सः । अब्रवीत् । पूषा । अनया । मा । प्रेति । तिष्ठ । अर्थ । त्वा । पशवः । उपावर्त्स्यन्तीत्युप - आवर्त्स्यन्ति । इति । माम् । प्रेति । तिष्ठ । इति । सोमः । अब्रवीत् ।

यत्र धात्वर्थनिवृत्तौ प्रशब्दः तत्रैव " समवप्रविभ्यः स्थः " (पा १·३·२२) इति आत्मनेपदम् अकर्मकस्यैव भवति, इह तु सकर्मक एव प्रकृष्टायां स्थितौ वर्तते, तेनात्मनेपदाभावः, यथा- ' ब्रह्मन् प्रस्थास्यामः समिधमाधाय ' इति । तत्रापि हि प्रकृष्टस्थितिकर्मा तिष्ठतिः, न तु स्थिति-निवृत्तिकर्मा । ततो वा इत्यादि । गतम् ॥

पूषा चेति ॥ [V]पूषा [V]च प्रजापतिश्च, अथ [V]सः [V]अब्रवीत् [V]पूषा प्रजापतिम् [V]अनया गर्मुता [V]प्र [V]तिष्ठ ततो मयि प्रकृष्टस्थितिके सति त्वां [V]पशवः [V]उपावर्त्स्यन्ति [V]इति । अत्रान्तरे

य इति ॥ विधत्ते-" यः प्रजाकामः स्यात् तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेत् प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजां प्र जनयति ' इति ॥

प्रजापतिरिति ॥ अथ पशुकामस्य सोमापौष्णं गार्मुतं चरुं विधातुं प्रस्तौति- ' प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टाः पराञ्च आयन् ते यत्रावसन् ततो गर्मुदुदतिष्ठत् तान् पूषा चान्ववैताꣳ सोऽब्रवीत् पूषाऽनया मा प्र तिष्ठाथ त्वा पशव उपावर्त्स्यन्तीति मां प्र तिष्ठेति सोमोऽब्रवीन्मम वा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

मम वा (२) अकृष्टपच्यमित्युभौ वां प्र तिष्ठानीत्यब्रवीत् तौ प्रातिष्ठत् ततो वै प्रजापतिं पशव उपावर्तन्त यः पशुकामः स्यात् तस्मा एतꣳ सोमापौष्णं गार्मुतं चरुं निर्वपेत् सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा(३)पशून् प्र जनयति ॥ ४ ॥ ५

[वपेत् प्रजापतिं वै दधाति पूषा त्रीणि च ।]

मम । वै (२) । अकृष्टपच्यमित्यकृष्ट - पच्यम् । इति । उभौ । वाम् । प्रेति । तिष्ठानि । इति । अब्रवीत् । तौ । प्रेति । अतिष्ठत् । ततः । वै । प्रजापतिमिति प्रजा - पतिम् । पशवः । उपावर्तन्तेत्युप - आवर्तन्त । यः । पशुकाम इति पशु - कामः । स्यात् । तस्मै । एतम् । सोमापौष्णमिति सोमा - पौष्णम् । गार्मुतम् । चरुम् । निरिति । वपेत् । सोमापूषणाविति १० सोमा - पूषणौ । एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । तौ । एव । अस्मै । पशून् । प्रेति । जनयतः । सोमः । वै । रेतोधा इति रेतः—धाः । पूषा । पशूनाम् । प्रजनयितेति प्र - जनयिता । सोमः । एव । अस्मै । रेतः । दधाति । पूषा (३) । पशून् । प्रेति । जनयति ॥४॥

[मैसं २.२.४ कासं १०.११]

---

[v]सोमः अपि [v]मां [v]प्र [v]तिष्ठ [v]इति प्रजापतिम् [v]अब्रवीत् । मदीयं हि [v]अकृष्टपच्यम्, तस्मादनया १५ मां प्रतिष्ठेति । [6]अकृष्टं स्वयमेव पच्यते इति अकृष्टपच्यम् । " अकृष्टे च " (?द्र. पा ३.१.११४) इति यप्रत्ययः । अथ [v]उभौ अपि युवां [v]प्र [v]तिष्ठानि [v]इति प्रजापतिः [v]अब्रवीत् [7]सोमापूषणौ । ततः [v]तौ गार्मुतेन चरुणा [v]प्रातिष्ठत् । ततो वा इत्यादि । गतम् ॥

इति द्वितीये चतुर्थे चतुर्थोऽनुवाकः ॥

अकृष्टपच्यमित्युभौ वां प्र तिष्ठानीत्यब्रवीत् तौ प्रातिष्ठत् ततो वै प्रजापतिं पशव उपावर्तन्त ' इति ॥ पशु- २० निवासस्थानेऽपि भक्षिततृणशेषगोमयादिपातेन [3]गर्मुत उत्पत्तिः । [4]तया [5]गर्मुता प्रजापतिः पूषणं सोमं च प्रतिष्ठाप्य पशून् प्राक्षवान् ॥

य इति ॥ अथेष्टिं विधत्ते– ' यः पशुकामः स्यात् तस्मा एतꣳ सोमापौष्णं गार्मुतं चरुं निर्वपेत् सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून् प्र जनयति ' इति ॥ २५

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥

---

६. तं१.तं२.मै.लं– अकृष्टः । ७. तं१.तं२– सोमापौष्णौ ।

३. हा– गार्मुतः; ड– गरुत्मतः । ४. ड– तथा । ५. हा–गार्मुता; ड–गरुत्मता ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्ने गोभिर्न आ गहीन्दो पुष्ट्या जुषस्व नः । इन्द्रो धर्ता गृहेषु नः ॥
सविता यः सहस्रियः स नो गृहेषु रारणत् । आ पूषा एत्वा वसु ॥

अग्ने । गोभिः । नः । एति । गहि । इन्दो इति । पुष्ट्या । जुषस्व । नः । इन्द्रः । धर्ता । गृहेषु । नः ॥
सविता । यः । सहस्रियः । सः । नः । गृहेषु । रारणत् । एति । पूषा । एतु । एति । वसु ॥

---

५ अथ चित्रायागो वक्ष्यते । [1]तस्यैते उपहोममन्त्राः सप्त । तत्राद्याश्चतस्रो गायत्र्यः । पञ्चमी [2]सतोबृहती । ततो द्वे यजुषी ॥

तत्र प्रथमा– ' अग्ने गोभिः ' इति ॥ हे [V]अग्ने, [V]गोभिः[3] [V]नः अस्मान् [V]आ [V]गहि आगच्छ । शपो लुक् । हे [V]इन्दो, [V]पुष्ट्या पशुपुष्ट्या अस्माकं [V]जुषस्व सेवस्व प्रीणय वा । [V]इन्द्रः च [V]गृहेषु अस्माकं [V]धर्ता धारको भवितुमर्हतीति । " अर्हे कृत्यतृचश्च " (पा ३·३·
१० १६९) इति तृच् ॥

द्वितीया– ' सविता ' इति ॥ [V]यः [V]सविता [V]सहस्रियः सहस्रेण संमितः । " सहस्रेण संमितौ घः " (पा ४·४·१३५) । [V]सः अस्माकं [V]गृहेषु [V]रारणत् रमताम् । रमतेर्लेटि शपः श्लुः (पा २·४·७६), तुजादित्वादभ्यासस्य दीर्घत्वम् (पा ६·१·७), लेटोऽडागमः (पा ३·४·९४), वर्णव्यत्ययेन [V]णत्वम् । [V]पूषा चास्मद्गृहेषु [V]आ [V]एतु आगच्छतु । [V]वसु
१५ पशुलक्षणं धनं च अस्मद्गृहेषु [V]आगच्छतु ॥

प्रजापश्वर्थिनोरुक्तश्चतुर्थे गार्मुतश्चरुः ॥

अथ व्यवहितेन षष्ठेन चित्रायागं विधित्सुरादौ पञ्चमेनानुवाकेनोपहोममन्त्रान् पठति ॥

अग्न इति ॥ कल्पः– " चित्रापौर्णमासे चित्रामिष्टिं निर्वपेदाग्नेयादीनि सप्त । अग्ने गोभिर्न आ गहि [1]इत्युपहोमाः " (आपश्रौ १९·२५·१४-१५) इति ॥ तत्र प्रथममन्त्रपाठस्तु– ' अग्ने गोभिर्न आ
२० गहीन्दो पुष्ट्या जुषस्व नः । इन्द्रो धर्ता गृहेषु नः ' इति ॥ हे [V]अग्ने, [V]गोभिः सह [V]नः अस्मान् प्रति [V]आ [V]गहि आगच्छ । हे [V]इन्दो, पशुपुष्ट्या [V]नः अस्मान् [V]जुषस्व प्रीणय । [V]इन्द्रः [V]नः अस्माकं [V]गृहेषु [V]धर्त्ता पशूनां धारयिता भवतु ॥

सवितेति ॥ द्वितीयमन्त्रपाठस्तु– ' सविता यः सहस्रियः स नो गृहेषु रारणत् । आ पूषा एत्वा वसु ' इति । पशूनां सहस्रं यस्यास्त्यसौ [V]सहस्रियः । तादृशः [V]यः [V]सविता [V]नः अस्माकं [2V]गृहेषु [V]रारणत्
२५ भृशं [1]रमताम् । पशुपोषकश्च देव आगच्छतु । [V]वसु धनमपि आगच्छतु ॥

---

१. तं१.तं२.मै.लं– तस्यामेते । २. तं१.तं२.मै– बृहती । ३. मै४–पशुभिः ।

---

१. आ.हा– इत्येतेनानुवाकेनोपहोमाः । २. ड– ' गृहेषु ' नास्ति । ३. ड– रमतात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

धाता ददातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत् ॥
त्वष्टा यो वृषभो वृषा स नो गृहेषु रारणत् । सहस्रेणायुतेन च ॥

धाता । ददातु । नः । रयिम् । ईशानः । जगतः । पतिः । सः । नः । पूर्णेन । वावनत् ॥
त्वष्टा । यः । वृषभः । वृषा । सः । नः । गृहेषु । रारणत् । सहस्रेण । अयुतेन । च ॥

तृतीया– ' धाता ' इति ॥ [V]धाता सर्वस्य विधाता देवोऽस्मभ्यं [V]रयिं धनं पशुलक्षणं [५] [V]ददातु [V]ईशानः दातुं समर्थः [V]जगतः [V]पतिः पालयिता । " षष्ठ्याः पतिपुत्र° " (पा ८·३·५३) इति सत्वम् । किं च– [V]सः देवोऽस्मान् [V]पूर्णेन [४]अस्मदभिमतैः आप्यायितेन धनेन [V]वावनत् संभजताम् अस्मान् परिगृह्णातु । वन षण संभक्तौ, लेटि शपः श्लुः, अडादि पूर्ववत् ॥

अथ चतुर्थी– ' त्वष्टा ' इति ॥ [V]यः [V]त्वष्टा [V]वृषभः वर्षिता कामानां [V]वृषा प्रधानभूतः सेक्ता वा, [V]सः अस्माकं [V]गृहेषु [V]रारणत् रमताम् । व्याख्यातम् । [V]सहस्रेण [५]पशूनां दशभिः [१०] शतैः रमताम् । [V]अयुतेन[६] दशभिः सहस्रैः [V]च रमताम् ॥

धातेति ॥ तृतीयमन्त्रपाठस्तु– ' धाता ददातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत् ' इति ॥ सर्वस्य विधाता [V]जगतः पालक ईश्वरः [V]नः अस्मभ्यं [V]रयिं धनं [V]ददातु । [V]स ईश्वरः [V]नः अस्मान् [V]पूर्णेन धनेन [V]वावनत् भृशं [४]भजतु [५]रक्षतु ॥

त्वष्टेति ॥ चतुर्थमन्त्रपाठस्तु–' त्वष्टा यो वृषभो वृषा स नो गृहेषु रारणत् । सहस्रेणायुतेन च ' [१५] इति ॥ [V]यः [V]त्वष्टा [V]वृषभः श्रेष्ठः [V]वृषा कामानां [६]वर्षिता [V]सः अस्माकं [V]गृहेषु पशूनां [V]सहस्रेण [V]अयुतेन [V]च सह [V]रारणत् भृशं रमताम् ॥

४. तं१.तं२.मै.लं–सर्वाभिमतैः । ५. तं१.तं२.मै.लं–पशुना । ६. मै४–' अयुतेन ' इत्यस्यानन्तर° ' च ' ।

४. शृं–संभजतु । ५. शृं.हो१– ' रक्षतु ' नास्ति । ६. ड.हो१– वर्षयिता ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

येनं देवा अमृतं (१) दीर्घꣳ श्रवो दिव्यैरयन्त ।
रायस्पोष त्वमस्मभ्यं गवां कुल्मिं जीवस आ युवस्व ॥
अग्निर्गृहपतिः सोमो विश्ववनिः सविता सुमेधाः स्वाहा ॥

येनं । देवाः । अमृतम् (१) । दीर्घम् । श्रवः । दिवि । ऐरयन्त ॥
रायः । पोष । त्वम् । अस्मभ्यमित्यस्म - भ्यम् । गवाम् । कुल्मिम् । जीवसे । एति । युवस्व ॥
अग्निः । गृहपतिरिति गृह - पतिः । सोमः । विश्ववनिरिति विश्व - वनिः ।
सविता । सुमेधा इति सु - मेधाः । स्वाहा ॥

अथ पञ्चमी– 'येन' इति ॥ हे [V]रायस्पोष धनपुष्ट, [V]येन त्वया [V]देवाः [V]अमृतम् अमृतत्वं [V]दीर्घम् अविच्छिन्नं [V]श्रवः अन्नं च [V]दिवि [V]ऐरयन्त द्युलोके प्राप्नुवन्। सः [V]त्वम् [V]अस्मभ्यं [V]गवां [V]कुल्मिं संघातं संतानं वा [V]आ [V]युवस्व अस्माभिर्मिश्रय, देहीति यावत्। यौतेर्व्यत्ययेनात्मनेपदम्, विकरणव्यत्ययेन शः। [V]जीवसे अस्मान् जीवयितुम्। तुमर्थे असेप्रत्ययः (पा ३.४.९) ॥

अथ षष्ठो मन्त्रः– 'अग्निः' इति। गृहाणां पतिः पाता [V]अग्निः [V]सोमः सर्वस्य धनस्य संभक्ता संविभक्ता। "छन्दसि वनसन°" (पा ३.२.२७) इतीन्प्रत्ययः। [V]सविता [V]सुमेधाः शोभनमतिः सदा सानुग्रहबुद्धिः। तस्मादेतेभ्यो[७] महानुभावेभ्यः इदं स्वाहुतमस्त्विति ॥

येनेति ॥ पञ्चममन्त्रपाठस्तु– 'येन देवा अमृतं दीर्घꣳ श्रवो दिव्यैरयन्त । रायस्पोष त्वमस्मभ्यं गवां कुल्मिं जीवस आ युवस्व' इति ॥ हे [V]रायस्पोष धनपोषक, [V]येन त्वया [V]देवाः [V]अमृतं पीयूषं [V]दीर्घं [८]संपूर्णं [V]श्रवः [९]कीर्तिहेतुभूतमन्नं [V]दिवि [V]ऐरयन्त [९]स्थापितवन्तः, तादृशः [V]त्वम् अस्मदर्थं [V]गवां [V]कुल्मिं संघं [V]जीवसे जीवनार्थम् [V]आ [V]युवस्व आनीय मिश्रय ॥

अग्निरिति ॥ षष्ठमन्त्रपाठस्तु– 'अग्निर्गृहपतिः सोमो विश्ववनिः सविता सुमेधाः स्वाहा' इति ॥ [V]अग्निः अस्मद्गृहस्याधिपतिः। [V]सोमः विश्वं वनते भजत इति [V]विश्ववनिः। [V]सविता शोभना मेधा यस्येति [V]सुमेधाः। एतेभ्य इदं [१०-V]स्वाहा हुतमस्तु[-१०] ॥

७. मै४– °देभ्यो।

७. आ सुपूर्णम्। ८. ड–कीर्तिहेतुमन्नम्। ९. इ– 'स्थापितवन्तः' इत्यस्यानन्तरं 'तादृशस्ते इदं स्वाहुतमस्तु'। १०–१०. ड.शृ–स्वाहुतम् अस्तु।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

अग्ने गृहपते यस्ते घृत्यो भागस्तेन सह ओज आक्रममाणाय धेहि श्रैष्ठ्यात् पथो मा योषं मूर्धा भूयासꣳ स्वाहा ॥ ५ ॥

[अमृतमष्टात्रिꣳ शच्च ।]

अग्ने । गृहपत इति गृह - पते । यः । ते । घृत्यः । भागः । तेन । सहः । ओजः । आक्रममाणायेत्या - क्रममाणाय । धेहि । श्रैष्ठ्यात् । पथः । मा । योषम् । ५
मूर्धा । भूयासम् । स्वाहा ॥ ५ ॥
[मैसं ... कासं ...]

अथ सप्तमः– ' अग्ने ' इति । हे [v]अग्ने [v]गृहपते गृहाणां [८]पालयितः । "नामन्त्रिते समानाधिकरणे[०]" (पा ८·१·७३) इति [९]पूर्वपदस्य अविद्यमानवत्त्वाभावात्[१०] इदं निहन्यते । [v]यः [v]ते [v]घृत्यः घृतार्हः, छान्दसो यत् (पा ५·१·६७) । [v]भागः एकदेशोऽङ्गभेदः [v]तेन कर्मणा १०
[v]आक्रममाणाय शत्रूनभिभवते [११]अन्यग्भूताय मह्यं [v]सहः बलम् [v]ओजः तेजश्च [v]धेहि देहि । यद्वा– यः ते भागः हविर्भागः घृत्यः घृते भवः घृतप्रकृतिर्वा, तेनानेन हेतुना शत्रून् आक्रममाणाय मह्यं सह ओजश्च देहि । [v]श्रैष्ठ्यात् [v]पथः मार्गात् [v]मा [v]योषम् अपहृतो मा भूवम् । यौतेर्लिङि वृद्ध्यभावश्छान्दसः, इडभावश्च । अपि च [v]मूर्धा प्रधानभूतः [v]भूयासम् । स्वाहुतं चेदं घृतं तुभ्यमस्तु ॥ १५

इति द्वितीये चतुर्थे पञ्चमोऽनुवाकः ॥

**अग्न इति ॥ सप्तममन्त्रपाठस्तु– ' अग्ने गृहपते यस्ते घृत्यो भागस्तेन सह ओज आक्रममाणाय धेहि श्रैष्ठ्यात् पथो मा योषं मूर्धा भूयासꣳ स्वाहा ' इति ॥ हे [v]गृहपते [v]अग्ने, घृतमर्हतीति [v]घृत्यः [v]यः [v]ते [v]भागः [v]तेन [v]सह [v]ओजः अष्टमधातुरूपं शरीरसारम् [v]आक्रममाणाय [११]कर्मे अनुतिष्ठते यजमानाय [v]धेहि स्थापय । यजमानोऽहं [v]श्रैष्ठ्यात् [v]पथः श्रेष्ठानां [१२]यागकर्तॄणां संबन्धिनोऽस्मादनुष्ठानमार्गात् [v]मा [v]योषं २०
वियुक्तो मा भूवं [v]मूर्धा यजमानानां मध्ये शिरोवदुत्तमः [v]भूयासं, तुभ्यमिदं [v]स्वाहा हुतमस्तु ॥**

अत्र विनियोगसंग्रहः—

अग्ने गोभिस्तूपहोमाश्चित्रायागे हि सप्त ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ २५

---

८. तं१.मै.लं– पातः । ९. मै४.लं– पूर्वस्य । १०. तं१.तं२.मै.लं – विद्यमानत्वाभावात् । ११. मै४– अन्यहृताय सह्यम् (?) ।

---

११. आ.शृं– कर्म ' नास्ति । १२. आ– मार्गकर्तॄणाम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

चित्रया यजेत पशुकाम इयं वै चित्रा यद्वा अस्यां विश्वं भूतमधि प्रजायते तेनेयं चित्रा य एवं विद्वाꣳश्चित्रया पशुकामो यजते प्र प्रजया पशुभिर्मिथुनैर्जायते प्रैवाऽऽग्नेयेन वापयति रेतः सौम्येन दधाति रेत एव हितं त्वष्टा रूपाणि वि करोति

चित्रया । यजेत । पशुकामम इति पशु - कामः । इयम् । वै । चित्रा । यत् । वै । अस्याम् । विश्वम् । भूतम् । अधीति । प्रजायत इति प्र - जायते । तेन । इयम् । चित्रा । यः । एवम् । विद्वान् । चित्रया । पशुकामम इति पशु - कामः । यजते । प्रेति । प्रजयेति प्र - जया । पशुभिरिति पशु - भिः । मिथुनैः । जायते । प्रेति । एव । आग्नेयेन । वापयति । रेतः । सौम्येन । दधाति । रेतः । एव । हितम् । त्वष्टा । रूपाणि । वीति । करोति ।

चित्रया यजेतेत्यादि॥ चित्रापूर्णमासे चित्राम् [1]इष्टिं निर्वपेत्। इयं वा इति। [V]विश्वं [2V]भूतं जनाधिकरणतया [3]चायनीयत्वादिष्टिपृथिव्योरभेदोपचारः। य एवमित्यादि। गतम्॥

आग्नेयोऽष्टाकपालः, सौम्यश्चरुः, त्वाष्ट्रोऽष्टाकपालः, सरस्वत्यै चरुः, सरस्वते चरुः, सिनीवाल्यै चरुः, ऐन्द्रः एकादशकपालः, [V]सप्त [V]एतानि [V]हवींषि [V]भवन्ति। प्रैवेति। [V]आग्नेयेन [V]प्र [V]वापयति प्रजनने [V]रेतः सिञ्चति सेचयति पुम्भिः स्त्रीषु, तत्सिक्तं [V]सौम्येन [V]दधाति धारयति। तत्र [4-V]हितं धारितं[-4], [V]त्वष्टा [V]रूपाणि [V]वि [V]करोति विविधेन रूपेण परिणतं

चित्रायागस्योपहोममन्त्राः पञ्चम ईरिताः ॥

चित्रयेति ॥ अथ षष्ठे तं यागं विधत्ते–' चित्रया यजेत पशुकाम इयं वै चित्रा यद्वा अस्यां विश्वं भूतमधि प्रजायते तेनेयं चित्रा य एवं विद्वाꣳश्चित्रया पशुकामो यजते प्र प्रजया पशुभिर्मिथुनैर्जायते ' इति ॥ चित्रेति यागस्य नामधेयम्। सा च [V]चित्रा भूमिस्वरूपा। [V]यत् यस्मात् कारणात् [V]अस्यां भूमौ सर्वं [V]भूतं प्राणिजातमाधिक्येनोत्पद्यते [V]तेन चित्रप्राण्युत्पादनेन [V]इयं भूमिः [V]चित्रा। तद्वद्विचित्रप्रजापशुहेतुत्वात् यागोऽपि चित्रेत्युच्यते ॥

प्रेति ॥ चित्रायाः स्वरूपभूतान् सप्त यागविशेषान् विधातुं तद्विधिं क्रमेणोन्नयति– 'प्रैवाऽऽग्नेयेन वापयति रेतः सौम्येन दधाति रेत एव हितं त्वष्टा रूपाणि वि करोति सारस्वतौ भवत एतद्वै दैव्यं मिथुनं दैव्यमेवास्मै मिथुनं मध्यतो दधाति पुष्ट्यै प्रजननाय सिनीवाल्यै चरुर्भवति वाग्वै सिनीवाली पुष्टिः खलु वै वाक् पुष्टिमेव वाचमुपैत्यैन्द्र उत्तमो भवति तेनैव तन्मिथुनम् ' इति ॥ अत्र [V]आग्नेयेन हविषा [V]प्र [V]वापयति प्रकर्षेण पशूत्पत्तिबीजं प्रक्षिपति। [V]सौम्येन हविषा व्रीह्यादिबीजेषु गोमयमिव प्रजादिबीजेषु पोषकं [V]रेतः धारयति। तृतीयहविर्देवता [1-V]त्वष्टा च [V]हितं[-1] [V]रेतः नानाविधरूपाकारेण [V]वि [V]करोति।

---

१. तं१.तं२.मै.लं– 'इष्टिं' नास्ति। २. मै.लं.भूत°। ३. तं१.तं२.मै.लं– चयनीय°। ४. मै४– निहतं धारयति।

१–१. इ.क.ड.जो.ना.शृं.हा.हो१– त्वष्टानिहितं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

सारस्वतौ भवत एतद्वै दैव्यं मिथुनं दैव्यमेवास्मै (१) मिथुनं मध्यतो दधाति पुष्ट्यै प्रजननाय सिनीवाल्यै चरुर्भवति वाग्वै सिनीवाली पुष्टिः खलु वै वाक् पुष्टिमेव वाचमुपैत्यैन्द्र उत्तमो भवति तेनैव तन्मिथुनꣳ सप्तैतानि हवीꣳषि भवन्ति सप्त

सारस्वतौ । भवतः । एतत् । वै । दैव्यम् । मिथुनम् । दैव्यम् । एव । अस्मै (१) । मिथुनम् । मध्यतः । दधाति । पुष्ट्यै । प्रजननायेति प्र-जननाय । सिनीवाल्यै । चरुः । भवति । वाक् । वै । सिनीवाली । पुष्टिः । खलु । वै । वाक् । पुष्टिम् । एव । वाचम् । उपेति । एति । ऐन्द्रः । उत्तम इत्युत्-तमः । भवति । तेन । एव । तत् । मिथुनम् । सप्त । एतानि । हवीꣳषि । भवन्ति । सप्त । ग्राम्याः । पशवः । सप्त । आरण्याः ।

करोति त्वाष्ट्रेण । सारस्वताभ्यां [V]दैव्यं [V]मिथुनं, [4]सरस्वत्सरस्वतीसंबन्धिभ्यां [V]दैव्यं [V]मिथुनं गर्भस्थस्य जन्तोः पुष्ट्यर्थं काले प्रजननार्थं च [V]मध्यतः अन्तः [V]दधाति [6]स्थापयति । ततो वाक्प्रवृत्ति- १०
हेतुभूतायाः सिनीवाल्याः चरुणा वाचश्च पुष्टिविशेषत्वात् [V]पुष्टिं [V]वाचं च प्राप्नोति गर्भस्थो जीवः । उत्तमस्यैन्द्रस्य भावात् सिनीवाल्या हि तदपरं मिथुनम् अन्ते भवति । ततस्तदपि [V]पुष्ट्यै [V]प्रजननाय च संपद्यते इति भावः । सप्तेति । [7]गोऽश्वाजाविपुरुषगर्दभोष्ट्राः [V]सप्त [V]ग्राम्याः [V]पशवः । द्विखुरश्चापदपक्षिसरीसृपहस्तिमर्कटनादेयाः [V]सप्त [V]आरण्याः गायत्र्युष्णिगनुष्टुब्बृहती-
पङ्क्तित्रिष्टुब्जगत्यः [V]सप्त [V]छन्दांसि प्रधानानि (द्र. बौश्रौ २४.५) । उभयस्येति । पशूनां छन्दसां च । १५

[2]अतः [3]सरस्वतीदेवताकः सरस्वद्देवताकश्चेत्युभौ [V]सारस्वतौ [V]भवतः । [V]एतत् च द्वयं स्त्रीपुरुषरूपत्वात् देवतासंबन्धि [V]मिथुनं, तस्य हविषां मध्येऽनुष्ठानेन यजमानार्थं [V]दैव्यं [V]मिथुनं गृहमध्ये संपादितवान् भवति । तच्चोत्पन्नानां प्रजानां पशूनां च [V]पुष्ट्यै संपद्यते, [4-]अनुत्पन्नानां च [V]प्रजननाय[-4] उत्पत्तये संपद्यते । तत्र [V]सिनीवाल्यै [V]चरुः कर्तव्यः । सिनीवाल्या वाक्त्वमर्थवादान्तरे द्रष्टव्यम् (शब्रा ६.५.१.९) । वाचः पुष्टिहेतुत्वं [5]सभामध्ये पण्डितेष्ववलोक्यते । तस्मादनेन चरुणा पुष्टिहेतुं [V]वाचं प्राप्नोति । २०
[V]ऐन्द्रः यागश्चरमः कर्तव्यः । [V]तेन [V]एव इन्द्रस्य पुरुषत्वेन सिनीवाल्याः स्त्रीत्वेन च [V]तत् उभयं मिलित्वा [V]मिथुनं भवति । अत्र द्रव्यविशेषाः शाखान्तरे द्रष्टव्याः ॥

सप्तेति ॥ पाठप्राप्तां हविःसंख्यां प्रशंसति– 'सप्तैतानि हवीꣳषि भवन्ति सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै' इति ॥ [1]गोपुरुषाश्वाजाविगर्दभोष्ट्रा [V]ग्राम्याः ।

५. मै– [3]सरस्वतीतिसंबन्धाभ्याम्; मं१.तं२.लं–सरस्वत्यैति (?) संबन्धाभ्याम् । ६. तं१.तं२–'स्थाप- २५
यति' नास्ति । ७. तं१.तं२.मै.लं– गोजाविकपुरुषगर्दभाश्वोष्ट्राः ।

२. इ.क.ड.जो.ना.शृं.हा.हो१– ततः । ३. अ.उ.जो.ना.पा.हा– स्त्रीसरस्वती° । ४–४. आ– प्रजानां पशूनां च प्रजननाय; ड.हो– अनुत्पन्नानां च जननाय । ५. शृं– सतां मध्ये । ६. इ.क.जो. ना.हा.हो– गोमहिष्याश्वा° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्या अथैता आहुतीर्जुहोत्येते वै देवाः पुष्टिपतयस्त एवा(२)स्मिन् पुष्टिं दधति पुष्यति प्रजया पशुभिरथो यदेता आहुतीर्जुहोति प्रतिष्ठित्यै ॥ ६ ॥

[अस्मै त एव द्वादश च ।]

सप्त । छन्दाꣳसि । उभयस्य । अवरुद्धया इत्यव - रुद्ध्यै । अथ । एताः । आहुतीरित्या - हुतीः । जुहोति । एते । वै । देवाः । पुष्टिपतय इति पुष्टि - पतयः । ते । एव । (२) अस्मिन् । पुष्टिम् । दधति । पुष्यति । प्रजयेति प्र - जया । पशुभिरिति पशु - भिः । अथो इति । यत् । एताः । आहुतीरित्या - हुतीः । जुहोति । प्रतिष्ठित्या इति प्रति - स्थित्यै ॥ ६ ॥

[मैसं ... कासं ...]

अथैताः इति ॥ प्रधानयागादनतरं पुरस्तात् स्विष्टकृतः । " अग्ने गोभिर्न आ गहि " (तैसं २.४.५) इत्याद्याः सप्त [v]आहुतीः [v]जुहोति । [८-v]एते [v]वै [v]देवाः अग्न्यादयः । [v]अथो[-८] अपि च [v]एताः आहुतयः [v]प्रतिष्ठित्यै च भवन्ति एतेषां देवानां प्रतिष्ठाया अपि हेतुत्वात् ।

इति द्वितीये चतुर्थे षष्ठोऽनुवाकः ॥

द्विखुरश्वापदपक्षिसरीसृपहस्तिमर्कटनादेयाः[७] [v]सप्त [v]आरण्याः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यः [v]छन्दांसि (द्र. बौश्रौ २४.५) । [v]उभयस्य पशुसंघस्य छन्दःसंघस्य च ॥

अथेति ॥ " अग्ने गोभिर्न आ गहि " (तैसं २.४.५) इत्यादिभिर्मन्त्रैरुपहोमान् विधत्ते–' अथैता आहुतीर्जुहोत्येते वै देवाः पुष्टिपतयस्त एवास्मिन् पुष्टिं दधति पुष्यति प्रजया पशुभिरथो यदेता आहुतीर्जुहोति प्रतिष्ठित्यै ' इति ॥ [v]एते [v]वै मन्त्रोक्ता अग्नीन्द्रादयः ॥

अत्र मीमांसा ॥ प्रथमाध्यायस्य चतुर्थपादे चिन्तितम्—

" यच्चित्रया यजेतेति तद्गुणो नाम वा भवेत् ।
चित्रस्त्रीत्वगुणो रूढेरग्नीषोमीयके पशौ ॥
द्वयोर्विधौ वाक्यभेदो वैशिष्ट्ये गौरवं ततः ।
स्यान्नाम पृष्टाज्यवहिष्पवमानेषु तत्तथा " ॥ (जैन्या १.४.६-७) ॥

" चित्रया यजेत पशुकामः " (तैसं २.४.६) इत्याम्नायते । तत्र [८-]चित्राशब्दो नोद्भिच्छब्दवत् यौगिकः[-८], किं तु रूढया चित्रस्त्रीत्वमभिधत्ते । ततो न पूर्वन्यायेन नामत्वम् । तथा सति " अग्नीषोमीयं पशुमालभेत " (तैसं ६.१.११) इति विहितं पशुयागमत्र यजेतेत्यनेन पदेनानूद्य तस्मिन् पशौ चित्रस्त्रीत्वगुणो विधीयत इति प्राप्ते ब्रूमः – चित्रत्वं स्त्रीत्वं चेति द्वावेतौ गुणौ, [९]तयोर्द्वयोर्विधाने वाक्यं भिद्येत । तथा चोक्तम्– " प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः । [१०-]अप्राप्ते तु[-१०] विधीयन्ते बहवोऽप्येकयत्नतः " (तन्त्रवार्तिक २.२.६) इति । अथ वाक्यभेदपरिहाराय [११]गुणद्वयविशिष्टपशुद्रव्यरूपं [१२]कर्म विधीयते तदा गौरवं स्यात् । तस्माच्चित्राशब्दः पूर्ववद्यजिसामानाधिकरण्येन यागनामधेयं भवति । चित्रत्वं च तस्य

८–८. तैं१,तैं२,मै.लं– एते वा इति । अग्न्यादयः । अथो इति ।

७. ड.हो१–नामधेयाः । ८–८. ड.हो१– चित्राशब्देन उद्भिच्छब्द° । ९. ड– तयोर्विधाने । १०–१०. ड– अप्राप्तेषु । ११. ड. हो१– °पशुप्राप्तिरूपं । १२. हा– कर्मकारकं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

विलक्षणद्रव्यद्वारेणोपपद्यते। " दधि मधु घृतमापो धानास्तण्डुलास्तत्संसृष्टं प्राजापत्यम् " (द्र. तैसं २·३·२, मैसं २·३·६) इति दध्यादीनि विचित्राणि प्रदेयद्रव्याणि षडाम्नातानि। तदेतच्चित्रानामकस्य यागस्योत्पत्तिवाक्यं, यागस्वरूपभूतयोर्दध्यादिद्रव्यप्रजापतिदेवतयोस्तत्रोपदिश्यमानत्वात्। उत्पन्नस्य तस्य यागस्य ' चित्रया यजेत पशुकामः ' इत्येतत् [१३]फलवाक्यम्। [१४]एवं सति प्रकृतार्थो लभ्येत। [१५]अग्नीषोमीयपश्वनुवादेन गुणविधाने प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येयाताम्। [१६-]लिङ्प्रत्ययस्य चानुवादत्वाङ्गीकारात् मुख्यविध्यर्थो ५
बाध्येत-[१६]। [१७-]तस्माच्चित्रापदं नामधेयम्-[१७]। यथा चित्राशब्दे नामधेयत्वं तथा बहिष्पवमानशब्दे [१८]आज्यशब्दे पृष्ठशब्दे च तत्तत्कर्मनामधेयत्वं योजनीयम्॥

चतुर्थाध्यायस्य तृतीयपादे चिन्तितम्—

" चित्रया पशवोऽमुष्मिन्नेव स्युर्नियता न वा।
आद्यः स्वर्गेण तुल्यत्वाद्देहस्योत्पादकत्वतः॥ १०
चित्रोत्पत्तौ तु नियमो न श्रुतो नापि कल्पकम्।
[१९]पुंस्प्रवृत्त्यादिनापेते प्रतिबन्धे भवेत् फलम् " ॥ (जैन्या ४·३·१६-१७)॥

काम्यकर्मण्येवं श्रूयते–"चित्रया यजेत पशुकामः" (तैसं२·४·६), "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः" (तैसं २·२·१) इति। तत्र यथा स्वर्गफलस्याऽऽमुष्मिकत्वं नियतम्, एवं पश्वादिफलस्यापि। यदि स्वर्गहेतुर्ज्योतिष्टोमो देहान्तरस्योत्पादकः, तर्हि चित्रादिरपि तथाऽस्तिवति चेत्। मैवम्। वैषम्यात्। १५
अस्मिन् देहे स्वर्गस्य भोक्तुमशक्यत्वाद्श्रुताऽप्यन्यदेहोत्पत्तिरर्थापत्त्या कल्प्यते। चित्रया त्वन्यदेहोऽवश्यमुत्पाद्यत इति नियमो न श्रुतो नापि किंचित् तस्य कल्पकमस्ति, [२०]अनेनापि देहेन पश्वादिफलस्य भोक्तुं शक्यत्वात्। अस्मिन् देहे प्रतिग्रहादिदृष्टोपायमन्तरेण [२१]पश्वाद्यलाभाद्वैधं चित्रादिफलमामुष्मिकमेवेति चेत्। न। प्रतिग्रहादेः प्रतिबन्धनिवृत्तावुपयुक्तत्वात्। तस्मादसति [२२]प्रतिबन्धे फलमैहिकं, सति त्वामुष्मिकम्॥ २०

पञ्चमाध्यायस्य प्रथमपादे चिन्तितम्—

" स्त्रीपुंसदेवकौ सारस्वतौ तद्धर्मगः क्रमः।
नास्त्यस्ति वाऽत्र नास्त्येष तन्नियामकवर्जनात्॥
याज्यानुवाक्यापाठेन स्त्रीप्राथम्यं हि मुख्ययोः।
मुख्यार्थत्वेन धर्माणां स्यान्मुख्यक्रमतः क्रमः " ॥ (जैन्या ५·१·१४-१५)॥ २५

चित्रायागे सप्तानां हविषां मध्ये चतुर्थपञ्चमे इत्थमाम्नायेते– " सारस्वतौ भवत एतद्वै दैव्यं मिथुनम् " इति॥ सरस्वती च सरस्वांश्चेति विगृह्य समासे कृते " पुमान् स्त्रिया " (पा १·२·६७) इति सूत्रेणैकशेषात् [२३]सरस्वन्ताविति भवति। [२४]तौ देवते ययोर्यागयोस्तौ सारस्वतौ यागौ। एतच्च मिथुनमिति वाक्यशेषादवगम्यते। तयोर्यागयोर्निर्वापादयो धर्माः [२५]चोदकतः प्राप्ताः। तत्र स्वेच्छया स्त्रीयागस्य पुंयागस्य वा प्रथमं निर्वापः [२६]कार्यः। कुतः? श्रुत्यर्थपाठप्रवृत्तिस्थानानामन्यतमस्य नियामकस्याभावादिति प्राप्ते ब्रूमः– हौत्रकाण्डे स्त्रीदेवतायाः पूर्वं याज्यानुवाक्ये आम्नाते। " प्र णो देवी सरस्वती ", " आ नो दिवः " (तैसं ३·१·११) इति। पश्चात्पुंदेवतायाः " पीपिवाꣳसꣳ सरस्वतः ", " ये ते सरस्व ऊर्मयः " (तैसं ३·१·११) इति। अनेन याज्यानुवाक्याक्रमेण मुख्ययोर्द्वयोर्यागयोर्मध्ये स्त्रीयागस्य प्राथम्यमवगम्यते। ततो धर्माणां मुख्ययागार्थत्वान्मुख्यक्रमेणैव क्रमे नियते सति स्त्रीयागस्यैव प्रथमं निर्वापः कार्यः॥ ३५

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे चतुर्थप्रपाठके षष्ठोऽनुवाकः॥

---

१३. अ.उ.ड.पा.शृं.हा१– पशुवाक्यं। १४. अ.उ.ड.पा.शृं– एवं च। १५. अ.उ.जो.ना.पा.हा– अग्नीषोमीयस्य पश्व°। १६–१६. अ.उ.ड.पा.शृं.हो१– ' लिङ्प्रत्ययस्य.....बाध्येत ' नास्ति। १७–१७. आ.क–तस्माच्चित्रापदं कर्मनामधेयम्; अ.उ.जो.पा.हा–तस्माच्चित्रा पशुनामधेयं; ड–तथा चित्रशब्दे नामधेयत्वम्। १८. अ.उ.जो.ना.पा.हा–' आज्यशब्दे ' नास्ति। १९. ड.शृं– पुंप्रवृत्त्या°। २०. शृं– ' अपि ' नास्ति। २१. अ.उ.पा– पश्वादिलाभाच्चैवं; जो.हा–पश्वादिलाभाद्द्वैधं। २२. ड.हो१–प्रतिबन्धके। २३. क.ड– सारस्वताविति। २४. अ.उ.ड.पा– ते। २५. आ– चोदक°। २६. ड– कर्तव्यः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मारुतमसि मरुतामोजोऽपां धारां भिन्द्धि

मारुतम्। असि। मरुताम्। ओजः। अपाम्। धाराम्। भिन्द्धि।

अथ कारीरीमन्त्राः। तत्र यजमानः कृष्णं वासः कृष्णतूषं परिधत्ते– 'मारुतमसि' इति यजुषा॥ अत्राहुः–'होतृन्[१] प्रवर्ग्यकाण्डं च याश्चोपनिषदो[१] विदुः।

अरुणाम्नायविधिश्चैव काठके परिकीर्तितौ॥
[२]रुद्रा नारायणश्चैव मेधो यश्चैव पित्रियः।
एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति॥
कारीर्यश्चापि पित्र्याश्च दिवाकीर्त्येति येषु च।
रुद्राः संततिरित्येतावनुवाकौ च सात्रिकौ[२]॥
होतृविध्यवसाने चाप्यनुवाकचतुष्टयम्।
[३]सूक्तेषु सूक्तं यत्सौयं मेधो यश्चैव पित्रियः॥
काठकानि च सर्वाणि सर्वाण्यारण्यकानि च।
दिवाकीर्त्यानि शाखायामेतावन्तीह धारणा॥
कल्पे पितृविधिश्चैव प्रवर्ग्यविधिरेव च।
काठकानां विधिश्चैव कारीरीविधिरेव च।
अरुणाम्नायविधिश्चैव शतरुद्रविधिस्तथा॥
कल्पेषु च य आम्नाता मन्त्रास्तानप्यतन्द्रितः।
यथाव्रतमुपाकृत्य अधीयीतेति चोच्यते'॥ (काण्डानुक्रमणी ३·१-७) इति॥

वास आमन्त्र्योच्यते– हे वासः, [v]मारुतं मरुतां संबन्धि त्वम् [v]असि, [v]मरुताम् [v]ओजः बलं त्वमसि; [४]त्वदधीनबलत्वात् तेषाम्। अतः [v]अपाम् [v]धारां [v]भिन्द्धि पातय। यद्वा– अपां धारयितारं मेघं भिन्द्धि। लिङ्व्यत्ययः। अपां धारयित्रीं वा मेघपङ्क्तिं भिन्द्धि॥

पशुकामस्य चित्राख्यो यागः षष्ठे निरूपितः[१]॥

अथ सप्तममारभ्य दशमान्तैश्चतुर्भिरनुवाकैः कारीरीष्टिः प्रतिपाद्यते। तत्र तावत् सप्तमेऽनुवाके केचिन्मन्त्राः पठ्यन्ते॥

मारुतमिति॥ कल्पः–"कारीर्यां वृष्टिकामो यजेत। अग्नीनन्वाधायापरेणाऽऽहवनीयं दक्षिणाऽतिक्रम्य [१]उपविश्य यजमानो मारुतमसि मरुतामोज इति कृष्णं वासः कृष्णतूषं परिधत्ते" (आपश्रौ १९·२५·

१–१. तं१.तं२.लं– °काण्डे च त्रयोपनिषदो। २–२. मै४– 'रुद्रा नारायणश्चैव..... सात्रिकौ' नास्ति। ३. तं१.तं२.लं– सूक्ते च। ४. लं– अधीन°।

१. ड.हो१– समीरितः। २. इ– 'उपविश्य' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

रमयत मरुतः श्येनमायिनं मनोजवसं वृषणꣳ सुवृक्तिम् ॥
येन शर्ध उग्रमवसृष्टमेति तदश्विना परि धत्तꣳ स्वस्ति ।

रमयत । मरुतः । श्येनम् । आयिनम् । मनोजवसमिति मनः-जवसम् । वृषणम् ।
सुवृक्तिमिति सु - वृक्तिम् ॥
येन । शर्धः । उग्रम् । अवसृष्टमित्यव - सृष्टम् । एति । तत् । अश्विना । परीति । धत्तम् । स्वस्ति । ५

पश्चाद्वातं प्रतिमीवति [1]निवर्तयति– 'रमयत' इति जगत्या ॥ हे [v]मरुतः, [v]रमयत उपरमयत निवर्तयत [v]श्येनं श्येनगतिमपि पश्चाद्वातं निवर्तयत । यद्वा– उदकस्य श्यातारम् अपगमयितारं [6]तनूकर्तारं वा [v]आयिनम् आगमनवन्तम् [8]आयन्तं निवर्तयत । अथ तन्निवर्त्य अन्यं [v]मनोजवसं महावेगं [v]वृषणं वर्षितारमुदकस्य [v]सुवृक्तिं शोभनशक्तिं पुरोवातं रमयतेत्येव । सामर्थ्यात् प्रवर्तयत *-इत्यर्थस्य गतिः । यद्वा– श्येनं प्रशस्तगमनम्-* आयिनम् उदकानयनकुशलं १०
मनोजवसं वृषणं शोभनशक्तिं च पुरोवातं रमयत-* प्रवर्तयत । सामर्थ्याद्विपरीतस्वभावं पश्चाद्वातं निवर्तयतेति गम्यते । एवं श्रुत्यर्थाभ्यां लब्धमुभयं ब्राह्मणं प्रतिपादयति– "पश्चाद्वातं प्रति मीवति पुरोवातमेव जनयति" (तैसं २.४.९) इति । [v]येन प्रकारेण कृते [v]शर्धः उदकं

१६-१७) इति । पाठस्तु–'मारुतमसि मरुतामोजोऽपां धारां भिन्द्धि' इति । हे कृष्णवासः, त्वं मरुत्संबन्धि [v]असि, वस्त्रे प्रक्षिप्तस्य [3]कृष्णद्रव्यमिश्रस्य जलस्य मरुद्भिः शोषणीयत्वात् । अत एव [v]मरुताम् १५
[v]ओजः बलमसि, मेघेषु प्रतिबद्धानाम् [v]अपां [v]धाराम् उद्दिश्य प्रतिबन्धरूपं मेघं [v]भिन्द्धि ॥

रमयतेति ॥ कल्पः– "रमयत मरुतः श्येनमायिनमिति पश्चाद्वातं प्रति मीवति । पुरोवातमेव जनयति" (आपश्रौ १९.२५.१८-१९) इति । प्रतिमीवति प्रतिबध्नाति ॥ पाठस्तु– 'रमयत मरुतः श्येनमायिनं मनोजवसं वृषणꣳ सुवृक्तिम् । येन शर्ध उग्रमवसृष्टमेति तदश्विना परि धत्तꣳ स्वस्ति' इति ॥
हे [v]मरुतः, [v]श्येनं श्येनवत् प्रबलगतिं पुरोवातं [v]रमयत क्रीडयत । कीदृशम्? [v]आयिनम् आगच्छन्तं, २०
[v]मनोजवसं मनस इव जवो वेगो यस्य तादृशं, [v]वृषणम् उदकस्य वर्षयितारं [v]सुवृक्तिं सुष्ठु [4]पश्चाद्वातस्य वर्जयितारम् । [v]येन पुरोवातेन [v]अवसृष्टं मेघेभ्यो मोचितं जलम् [v]उग्रं तीव्रधारारूपं भूत्वा [v]शर्धः शीर्णम् [5]अतिशोषेण हिंसितम् [1v]एति प्राप्नोति । तादृशं पुरोवातं रमयतेति पूर्वत्रान्वयः । हे [v]अश्विनौ देवभिषजौ, [v]तत् जलं [v]स्वस्ति क्षेमकरं यथा भवति तथा परितो धारयतम् ॥

५. लं– निवर्तते । ६. तं१.तं२.पं२.लं– निकर्तारम् । ७. तं१.तं२.मै.लं– आवन्तम् । ८. २५
मै४– 'प्रशस्तगमनम्' इत्यस्यानन्तरं 'तनूकर्तारं वा' । [*–* लं– 'इत्यर्थस्य गतिः ... रमयत' इत्ययं भागो नास्ति ।] ।

३. ड.हो१ – कृष्णद्रव्यस्य । ४. अ.आ.क.ना.जो.पा.हा – पाश्चात्यवातस्य । ५. ड.शृं– अतिशोषणेन । ६. इ.क.जो.ड.ना.शृं.हो१–क्षेत्रमिति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

पुरोवातो वर्षञ्जिन्वरावृत् स्वाहा वातावद्वर्षन्नुग्ररावृत् स्वाहा स्तनयन् वर्षन् भीमरावृत् स्वाहाऽनशन्यवस्फूर्जन् दिद्युद्वर्षन् त्वेषरावृत् स्वाहाऽतिरात्रं वर्षन् पूर्तिरावृत् (१) स्वाहा

पुरोवात इति पुरः-वातः । वर्षन् । जिन्वः । आवृदित्या - वृत् । स्वाहा । वातावदिति वात - वत् । वर्षन् । उग्रः । आवृदित्या - वृत् । स्वाहा । स्तनयन् । वर्षन् । भीमः । आवृदित्या - वृत् । स्वाहा । अनशनि । अवस्फूर्जन्नित्यव - स्फूर्जन् । दिद्युत् । वर्षन् । त्वेषः । आवृदित्या - वृत् । स्वाहा । अतिरात्रमित्यति - रात्रम् । वर्षन् । पूर्तिः । आवृदित्या - वृत् (१) । स्वाहा ।

बलहेतुर्वा मरुतां बलकृतं वा । [V]उग्रम् उद्गूर्णम् [V]अवसृष्टं मुक्तम् [V]एति आगच्छति तथा रमयतेति । हे [V]अश्विनौ, युवामपि [V]तत् उदकं [V]परि [V]धत्तं परितो धारयतं [V]स्वस्ति अविनाशार्थं लोकस्य उदकस्यैव वा अक्षयाय ॥

वातनामानि जुहोति- ' पुरोवातः ' इत्यष्टौ ॥ [V]पुरोवातः [९]पूर्वस्या दिशः[९] आगतः [V]पुरोवातः [V]वर्षन् [V]जिन्वः प्रीणयिता लोकस्य, पुरोवातस्य प्रीणनत्वात् । जिवि प्रीणने, इदित्वान्नुम् (पा ७·१·५८), पचाद्यच् (पा ३·१·१३४) । छान्दसः [१०]सांहिति-कोऽस्य रेफः, उक्तं च प्रातिशाख्ये- " आवृत्परः " (तैप्रा ८·१०) इति । [V]आवृत् आवर्तमानः अस्त्विति शेषः । आवर्ततामिति यावत् । स्वाहुतं चेदमस्तु तस्मा इति । [V]वातावत् वातेन युक्तं [V]वर्षन् । छान्दसं दीर्घत्वम् । [V]उग्र उद्गूर्णः । आवृत्परण्यं [रत्वाद्रेफः] वातयुक्त-स्योद्गूर्णत्वात् । समानमन्यत् । [V]स्तनयन् शुष्कं गर्जन् [V]वर्षन् [V]भीमः भीतिहेतुः प्रजानां, तस्य [११]तत्स्वभावत्वात् । [V]अनशनि अविद्यमानाशनिपातम् [V]अवस्फूर्जन् अवसेचनेन शब्दयन् [V]दिद्युत्

पुरोवात इति ॥ कल्पः- " पुरोवातो वर्षन्नित्यष्टा वातनामानि हुत्वा " (आपश्रौ १९·२६·१) इति । पाठस्तु- ' पुरोवातो वर्षञ्जिन्वरावृत् स्वाहा वातावद्वर्षन्नुग्ररावृत् स्वाहा स्तनयन् वर्षन् भीमरावृत् स्वाहाऽनशन्यवस्फूर्जन् दिद्युद्वर्षन् त्वेषरावृत् स्वाहाऽतिरात्रं वर्षन् पूर्तिरावृत् स्वाहा बहु हायमवृषादिति श्रुतरावृत् स्वाहाऽऽतपति वर्षन् विराडावृत् स्वाहाऽवस्फूर्जन् दिद्युद्वर्षन् भूतरावृत् स्वाहा ' इति ॥ यः [V]पुरोवातः सः[७] [V]वर्षन् वृष्टिं प्रवर्तयन् [V]जिन्वः प्रजाः प्रीणयन् [V]आवृत् आवर्ततां तस्मै [८-V]स्वाहा हुतमस्तु[-८] । [V]वातावत् प्रवातेन युक्तः [V]उग्रः तीव्रधारायुक्तः । [V]स्तनयन् गर्जन् [V]भीमः [९]गर्जनाधिक्येन भयंकर इव । [V]अन-शनि [१०]प्राणघातकः अशनिर्यथा न पतति तथा [V]अवस्फूर्जन् [V]अवसेचनेन शब्दयन्, [V]दिद्युत् विद्युल्लक्षणेन प्रकाशनेन युक्तः [V]त्वेषः वर्षधारया सस्यक्षेत्रादेर्दीपकः । [V]अतिरात्रिम् रात्रिमतीत्य दिवारात्रमित्यर्थः, [V]पूर्तिः महीतलं पूरयिता । [V]अयं वातः [V]बहु यथा भवति तथा [V]अवृषात् [V]ह [११]अवर्षयत् [V]किल इति [V]श्रुतः

९-९. पं२. मै४- पूर्वस्यां दिशि । १०. मै४ - सांहितिकस्य । ११. मै४- तादृक्स्वभावत्वात् ।

७. आ.क.ड- ' सः ' नास्ति । ८-८. आ.इ.उ.क.जो.ड.पा.श्रं - स्वाहुतमस्तु । ९. अ.उ.जो.पा- गर्जनाधिक्यः । १०. हो१- प्रविघातकः; ड- प्रविघातुकाः; श्रं- प्राणिघातकः । ११. इ- अवर्षत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

बहु ह्ायमवृषादिति श्रुतरावृत् स्वाहाऽऽतर्पति वर्षन् विराडावृत् स्वाहाऽवस्फूर्जन् दिद्युद्वर्षन् भूतरावृत् स्वाहा मान्दा वाशाः शुन्ध्यूर्जिराः ।

बहु । ह । अयम् । अवृषात् । इति । श्रुतः । आवृदित्या - वृत् । स्वाहा । आतपतीत्या - तर्पति । वर्षन् । विराडिति वि - राट् । आवृदित्या - वृत् । स्वाहा । अवस्फूर्जन्नित्यव - स्फूर्जन् । दिद्युत् । वर्षन् । भूतः । आवृदित्या - वृत् । स्वाहा । मान्दाः । वाशाः । शुन्ध्यूः । अर्जिराः । ५

दीप्तिमत् विद्युत्संबन्धेन प्रकाशयन् [१२-]आयुधवानिव वर्तमानो [-१२] वा । अत एव [v]त्वेषः दीप्यमानः । [v]अतिरात्रं रात्रिमप्यतीत्य सर्वमप्यहोरात्रं, न रात्रिमात्रम् । " अहः सर्वैक° " (पा ५·४·८७) इत्यच् समासान्तः । [v]पूर्तिः पर्याप्तिमान् [१३]पूरयन् वा महीतलं सर्वम् । [१४-]क्तिच्क्तौ च " (पा ३·३·१७४) इति क्तिच् [-१४] ॥ [v]बहु प्रभूतम् । [v]ह इत्यवधारणे । बह्वेव [v]अयम् [v]अवृषात् अवर्षत् देवः [v]इति एवं [v]श्रुतः [१५]सर्वविख्यातिं गच्छन् । [v]आतपति[१६] सति, ईषत् तपति वा सूर्ये [v]वर्षन् [v]विराट् प्रशस्ततया विराजमानः । [v]अवस्फूर्जन् [v]दिद्युत् [v]वर्षन् [v]भूतः प्रभूतः सर्वलोक-धारणक्षमः[१७] पुनः पुनरित्थं वर्षन्निति प्रतिपादनार्थम् अवस्फूर्जन्नित्यादेः पुनराम्नानम् ।

अन्तर्वेदि कृष्णाजिने कृष्णेन मधुषा करीरसक्तून् संयौति– ' मान्दा वाशाः ' इति तिसृभिः ॥ प्रथमा एकपदा गायत्री । परे द्वे द्विपदे गायत्र्यौ । मान्दादीत्येतान्यपां नामानि एकादश । सर्वाण्यप्यामन्त्रिताद्युदात्तानि (पा ६·१·१९८), पूर्वपूर्वाविद्यमानतया (पा. ८·१·७२) उत्तरोत्तरनिघाताभावः । [१८]मन्दयन्ति मोदयन्ति प्रजा इति [v]मान्दाः । [१९]ण्यन्तात् पचाद्यच् (पा. ३·१·१३४) । व्यत्ययेनानुपधाभूतस्याप्याकारस्य णिचि वृद्धिः ।

जनेषु ख्यातः । [v]आतपति आतपे स्थिते सति [v]विराट् विशेषेण राजमानः । [v]अवस्फूर्जन् [v]दिद्युत् इति शब्दौ व्याख्यातौ । आदरार्थं पुनर्वचनम् । [१२v]भूतः इत्थंभूतः यथोक्तगुणैर्युक्तः सन् सर्वलोकधारणक्षम इत्यर्थः ॥

मान्दा इति ॥ कल्पः– " अन्तर्वेदि कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तीर्य तस्मिन् खर्जूर-सक्तून् करीरसक्तून वा मान्दा वाशा इति कृष्णमधुषा [१३]संयुत्य तिस्रः पिण्डीः कृत्वा पुष्करपलाशैः संवेष्टय " (आपश्रौ १९·२६·१) इति ॥ पाठस्तु–' मान्दा वाशाः शुन्ध्यूरजिराः । ज्योतिष्मतीस्तमस्वरीरुन्दतीः सुफेनाः । मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह माऽवत ' इति । मान्दादीन्येकादशापां नामानि संबुध्यन्तानि ।

१२–१२. मै४–युद्धान्निवर्तमान एव । १३. तं१.तं२.मै.लं–पूरयत् । १४–१४. तं१.तं२.मै.लं–क्तिच् । १५. लं – सर्वख्यातिम् । १६. मै – ' आतपति ' इत्यस्यानन्तरम् ' आतपे ' । १७. लं– °धारणे क्षमः । १८. मै४– मदयन्ति । १९–१९. तं१.तं२.मै– ' ण्यन्तात् ' नास्ति ।

१२. आ– ' भूतः ' नास्ति । १३. आ– संयुज्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्योतिष्मतीस्तमस्वरीरुन्दतीः सुफेनाः ।
मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह माऽवत ॥

ज्योतिष्मतीः । तमस्वरीः । उन्दतीः । सुफेना इति सु-फेनाः ॥
मित्रभृत इति मित्र-भृतः । क्षत्रभृत इति क्षत्र-भृतः । सुराष्ट्रा इति सु-राष्ट्राः ।
५ इह । मा । अवत ।

वाशयन्ति शब्दयन्ति प्रजा इति [V]वाशाः । वाशृ शब्दे । वष्टेर्वा घञ् । काम्याः । [V]शुन्ध्यूः शोधयित्र्यः । औणादिकः क्विप्रत्ययः, "वा छन्दसि" (पा ६·१·१०६) इति पूर्वसवर्णदीर्घत्वम् । [V]अजिराः अजनशीला जनन्यादि(?)रूपेण परिणामात् ॥

ज्योतिष्मत्यः [२०]शुक्लच्छायाः [२१]दुर्ज्ञानयाथात्म्याः । [V]तमस्वरीः दौर्दिन्यकरिण्यः[-२१] ।
१० उन्दत्यः क्लेदयन्त्यः[२२] भुवः । [V]सुफेनाः अलंकारभूतफेनाः उपर्युपरि वर्धमानाः । [V]मित्रभृतः दुःखात् त्रायकाणाम् [२३]ओषध्यादीनां भर्त्र्यः । [V]क्षत्रभृतः बलस्य पोषयित्र्यः । [V]सुराष्ट्राः शोभनराष्ट्रं कर्तुं समर्थाः । ईदृश्यो यूयम् [V]इह अस्मिन् कर्मणि माम् [V]अवत अविघ्नेन प्रवर्तयत । यद्वा--कर्मफल-प्रदानेन मां तर्पयत ।

तादृश्यो हे आपः, यूयम् [V]इह अस्मिन् कर्मणि माम् [V]अवत फलप्रदानेन रक्षत । [V]मान्दाः हर्षहेतवः ।
१५ **[V]वाशाः शब्देन वर्षणजन्येन युक्ताः । [V]शुन्ध्यूः शुद्धिहेतवः । [V]अजिराः प्रवाहरूपेण गमनशीलाः । [V]ज्योतिष्मतीः शुक्लरूपयुक्ताः । [V]तमस्वरीः सूर्यप्रकाशाच्छादनेन तमो यथा भवति तथा स्वरन्त्यो गच्छन्त्यः । [V]उन्दतीः भूमिं क्लेदयन्त्यः । [V]सुफेनाः जलप्रवाहबाहुल्येन बहुफेनयुक्ताः । जगन्मित्रभूता ओषधीर्बिभ्रति पोषयन्तीति [V]मित्रभृतः । क्षत्रं [१४]देशाधिपतिं राजानं सुवृष्टिजन्यसंतोषेण बिभ्रति पोषयन्तीति [V]क्षत्रभृतः । सुष्ठु शोभनं [१५]सस्यैः संपूर्णं राष्ट्रं यासां ताः [V]सुराष्ट्राः ।**

२० २०. तं१.तं२.मै.लं- सच्छायाः । २१-२१. मै४ - तमस्वत्यः मूर्तज्ञानयाथार्थ्याः ओदन्यक्या-रिण्यो वा । २२. तं१.तं२.मै.लं- क्लेदयित्र्यः । २३. मै४- ओषधीनाम् ।

१४. हो१- देवाधिपतिम् । १५. आ- सस्येन; अ.इ.उ.पा- अस्यै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामि ॥ ७ ॥

[पूर्तिरावृद् द्विचत्वारिंशच्च ।]

वृष्णः । अश्वस्य । संदानमिति सं - दानम् । असि । वृष्ट्यै । त्वा । उपेति । नह्यामि ॥ ७ ॥

[मैसं २·४·७, कासं ११·९]

अथ कारीरसक्तून् तिस्रः पिण्डीः कृत्वा [४] समुद्धृत्य कृष्णाजिनस्यान्तान्[५] कृष्णेन संदाने- ५
नोपनह्यति—' वृष्णः ' इति ॥ [V]वृष्णः वर्षितुः [V]अश्वस्य व्यापकस्य [V]संदानं बन्धनम् [V]असि । अतः [V]वृष्ट्यै वृष्ट्यर्थं त्वाम् [V]उप [V]नह्यामि बध्नामि, त्वयोपनह्यामि वा ॥

इति द्वितीये चतुर्थे सप्तमोऽनुवाकः ॥

वृष्ण इति ॥ कल्पः— " समुद्यस्य [१६]कृष्णाजिनस्यान्तान् वृष्णो अश्वस्य संदानमसीति कृष्णेन दाम्नोपनह्यति " (आपश्रो १९·२६·१) इति ॥ पाठस्तु—' वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामि ' १०
इति ॥ हे रज्जो, त्वं [V]वृष्णः [V]अश्वस्य सेचनसमर्थस्य [१७]पुमश्वस्यैवास्य कृष्णाजिनस्य [V]संदानं दृढबन्धन-साधनम् [V]असि । अतो वृष्टिसिद्ध्यर्थमनेन संदानेन हे कृष्णाजिन, त्वाम् [V]उप [V]नह्यामि बध्नामि ॥

अत्र विनियोगसंग्रहः—

" कारीर्यां मारुतं कृष्णं स्वामी धारयते पटम् ।
रमेति पश्चिमं वातं [१८]पुरोवातं करोति हि[१८] ॥ १ ॥ १५
पुरोऽष्टावाहुतीर्हुत्वा मान्दाः संयौति सक्तुकम् ।
वृष्णः संनह्यते सक्तुं मन्त्रा द्वादश वर्णिताः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

२४. पं२.मै४ – समुचित्य । २५. तं१.तं२– °जिनस्यान्तात् । २०

१६. आ– °नस्यान्तौ । १७. आ– अश्वमुख्यस्यैवास्य । १८–१८. अ– पुरोवक्ति करोति; उ.जों.ना.पा.हा– पुरोवक्ति करोति हि; ड– पुरोवाति करोति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवा वसव्या अग्ने सोम सूर्य ॥

देवाः । वसव्याः । अग्ने । सोम । सूर्य ॥

अथोत्करे प्रागीषं त्रिगधमनोऽवस्थितं भवति पादत्रयप्रतिष्ठितं[1] त्रिच्छदिष्कम् । तत्र तिसृषु गधासु त्रिभिर्मन्त्रैः प्रतिदिशम् आबध्नाति पिण्डीः । तत्र पूर्वस्यां गधायां छदिष्कमपि कृष्णाजिनमाबध्नीयात् 'देवा वसव्याः' इति । तच्च [2]अहोरात्रावसक्तं भवति । यदि वर्षेत् पिण्डीरेव जुहुयात्, यदि न वर्षेत् '[3-]देवाः शर्मण्याः' इति मध्यमायामाबध्नीयात्, तत्र चाहोरात्रावसक्तं भवति । यदि वर्षेत् पिण्डीरेव जुहुयात् यदि न वर्षेत् 'देवाः सपीतयः' इति जघन्यायामाबध्नीयात्, अहोरात्रावसक्तं भवति । यदि वर्षेत् पिण्डीरेव जुहुयात्, यदि न वर्षेत्[-3] श्वोभूते धामच्छदादीनि त्रीणि हवींषि निर्वपति । एते च त्रयः पङ्क्तिप्रकाराः । 'उद्नो दत्त' इत्यादिकं च [v]त्रिष्वप्यनुषज्यते ॥

तत्र प्रथमः— हे [v]देवाः [v]वसव्याः । स्वार्थिको यत् । जगतां वासहेतवो वसवः, वसुसमूहो वा वसव्यं, तद्वन्तः । मत्वर्थीयो लुप्यते । "वसोः समूहे च" (पा ४·४·१४०) इति यत् । वृष्टिहेतुत्वेन वसुसमूहवन्तः वासयितारश्च प्रजानाम् । वसुभ्यो वा हिता वसव्याः, वसूनि धनानि । तेषु च कांश्चिद्दर्शयति—[v]अग्ने [v]सोम [v]सूर्य एवमादयो हे वसव्याः देवाः यूयं [v]उद्नः उदकं [v]दत्त । पदन्नादिना (पा ६·१·६३) उदकस्य उदन्भावः । पूर्ववत् कर्मणि षष्ठी, उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । [4-]तदर्थम् [v]उदधिं मेघं [v]भिन्त विदारयत यथोदकं पतेत् । उदकं धीयतेऽस्मिन्निति उदधिः । "कर्मण्यधिकरणे च" (पा ३·३·९३) इति किः, "पेषंवासवाहनधिषु च" (पा ६·३·५८) इत्युदभावः, पूर्ववत् कर्मणि षष्ठी, उदात्तनिवृत्तिस्वरेण विभक्तेः उदात्तत्वम्[-4] । [v]दिवः द्युलोकात् [v]अन्तरिक्षात् [v]पृथिव्याः । ल्यब्लोपे पञ्चमी । द्युलोकमन्तरिक्षं

[1]प्राच्याङ्गमन्त्राः कारीर्यां सप्तमे समुदीरिताः ।

देवा इति ॥ अथावशिष्टमन्त्रा अष्टमे वर्ण्यन्ते । कल्पः— "उत्करे प्रागीषं त्रिगधमनोवस्थितं भवति । [2]छदींषीत्यर्थः । देवा वसव्या इति पूर्वस्यां गधायां कृष्णाजिनमाबध्नीयात् । अहोरात्रावासक्तं भवति । यदि वर्षेत् पिण्डीरेव जुहुयात् । यदि न वर्षेत् देवाः शर्मण्या इति मध्यमायामाबध्नीयात् अहोरात्रावसक्तं भवति । यदि वर्षेत् पिण्डीरेव जुहुयात् । यदि न वर्षेत् देवाः सपीतय इति जघन्यायामाबध्नीयात् । अहोरात्रावसक्तं भवति । यदि वर्षेत् पिण्डीरेव जुहुयात् । यदि न वर्षेच्छ्वोभूते धामच्छदादीनि त्रीणि हवींषि निर्वपति (आपश्रौ १९·२६·२-१३) इति ॥ पाठस्तु—'देवा वसव्या अग्ने सोम सूर्य । देवाः शर्मण्या मित्रावरुणाऽर्यमन् । देवाः सपीतयोऽपां नपादाशुहेमन् । उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात्

१. तं१.तं२.मै.लं- °प्रतिष्ठित°। २. तं१.तं२- अहोरात्रावसिक्तम्। ३-३. तं१.तं२- 'देवाः शर्मण्या ..... न वर्षेत्' इत्येतावान् भागो नास्ति। ४. मै - त्रिष्टुबनु°; तं१.तं२.लं - त्रिष्टुप्यनुषज्यते। ५-५. लं-'तदर्थमुदधिम् .....उदात्तत्वम्' इत्ययं भागो नास्ति।

१. इ.जो.ना.हा-प्राग्घोममन्त्राः। २. जो.हा-छन्दांसीत्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

देवाः शर्मण्या मित्रावरुणाऽर्यमन् ॥ देवाः सपीतयोऽपां नपादाशुहेमन् ।
उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्याऽवत ॥

देवाः । शर्मण्याः । मित्रावरुणेति मित्रा - वरुणा । अर्यमन् ॥
देवाः । सपीतय इति स - पीतयः । अपाम् । नपात् । आशुहेमन्नित्याशु - हेमन् ॥
उद्नः । दत्त । उदधिमित्युद - धिम् । भिन्त । दिवः । पर्जन्यात् । अन्तरिक्षात् । पृथिव्याः । ततः । ५
नः । वृष्ट्या । अवत ॥

पृथिवीं च व्याप्य या वृष्टिः [v]पर्जन्यात् प्रवर्तते तया [v]वृष्ट्या [v]नः अस्मान् [v]अवत रक्षत तर्पयत वा । अत्र " विभाषितं विशेषवचने बहुवचनम् " (पा ८·१·७४) इति ' देवाः ' इत्यस्याविद्यमानवत्त्वनिषेधात् ' वसव्याः ' इति निहन्यते, " आमन्त्रितं पूर्वमविद्यमानवत् " (पा ८·१·७२) इति द्वयोरामन्त्रितयोः अविद्यमानवत्त्वात् ' अग्ने ' इति न निहन्यते । अथ यदा १०
'[६-]अयं मे प्राणाः[-६] ' [७-]इति तद्वचनभेदेऽपि[-७] सामान्यविशेषभावमात्रेण सामानाधिकरण्यं भवति तदा उपात्तदेवविशेषत्वात् अग्न्यादीनां यद्यपि " नामन्त्रिते समानाधिकरणे " (पा ८·१·७३) इत्यविद्यमानवत्त्वप्रतिषेधात् ' अग्ने ' इत्यस्यापि निघातः प्राप्नोति, तथापि " विभाषितं विशेषवचने [८]बहुवचनम् " (पा ८·१·७४) इति पक्षे अविद्यमानवत्त्वान्निघाताभावः । पक्षे विद्यमानवत्त्वात् उत्तरयोः निघातः प्रवर्तते । ननु ' अग्ने ' इत्यनेन विशेषवचने व्यवधानं न १५
स्यात् । नैष दोषः, " आमन्त्रितं पूर्वमविद्यमानवत् " (पा ८·१·७२) इति तस्याविद्यमानवत्त्वात्, तेन स्यात् व्यवधानम् ॥

अथ द्वितीयः— [v]देवाः [v]शर्मण्याः शरण्याः शरणभावे साधवः शर्मणे सुखाय वा गृहाय वा [९]हिताः । हे [१०-]मित्रावरुणौ हे [v]अर्यमन्[-१०] । पूर्ववत् स्वरः । 'उद्नो दत्त' इत्यादि समानम् ॥

अथ तृतीयः— हे [v]देवाः [v]सपीतयः समानपानाः परस्परतः अस्माभिश्च सह हे [v]अपां २०
[v]नपात् अपां चतुर्थ । " सुबामन्त्रिते[०] " (पा २·१·२) इति पराङ्गवद्भावात् षष्ठ्यामन्त्रित-

पृथिव्यास्ततो नो वृष्ट्याऽवत ' इति ॥ अत्र ' उद्नो दत्त ' [३]इत्येष त्रयाणां मन्त्राणां [४]शेषत्वेनानुषज्यते । हे [v]देवाः, [v]उद्नः [v]दत्त उदकानि प्रयच्छत । कीदृशा देवाः ? [v]वसव्याः प्रजानां वासयितारः । क एते देवा इति [५]तदुच्यते– [v]अग्ने [v]सोम [v]सूर्य इति । एवमादिका हे देवा इति पूर्वत्रान्वयः । उदकदाने क उपाय इति तदुच्यते– [v]उदधिं [v]भिन्त, उदकं धीयतेऽस्मिन्नित्युदधिर्मेघस्तं विदारयत । केभ्यो निमित्तेभ्यः ? [v]दिवः २५

६–६. मै.लं–अयने प्राणः । ७–७. तं१.तं२.मै.लं– इतिवत् वचनविशेषेऽपि । ८. तं१.तं२.मै.लं– 'बहुवचनं' नास्ति । ९. तं१.तं२.मै.लं– गृहीताः । १०–१०. मै४.लं– मित्रावरुणा अर्यमन् ।

३. क.–इत्येषां; ड–इत्येतेषां । ४. अ.उ.पा–शैषिकत्वेना°; ड.हो–°त्वेनानुयुज्यते । ५. आ–उच्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिवा चित् तमः कृण्वन्ति पर्जन्येनोदवाहेन ।
पृथिवीं यद्व्युन्दन्ति ॥

दिवा । चित् । तमः । कृण्वन्ति । पर्जन्येन । उदवाहेनेत्युद - वाहेन ॥
पृथिवीम् । यत् । व्युन्दन्तीति वि - उन्दन्ति ॥

समुदायस्यामन्त्रिताद्युदात्तत्वम् । हे [v]आशुहेमन् शीघ्रगते । हि गतौ, "अन्येभ्योऽपि दृश्यन्ते" (पा ३·२·७५) इति [११]मनिन्प्रत्ययः । प्रदर्शनार्थं द्वयोरुपादानम् । 'उद्नो दत्त' इत्यादि । गतम् ॥

पिण्डीर्जुहोति–'दिवा चित्' इत्यादिभिस्तिसृभिः ॥ प्रथमा गायत्री । द्वितीयाऽस्तार-पङ्क्तिः, अयुजो [१२]द्वादशाक्षरत्वात् । तृतीया बृहती ॥

तत्र प्रथमा– [v]दिवा [v]चित् दिवाऽपि [v]तमः दुर्दिनान्धकारं [v]कृण्वन्ति कुर्वन्ति, किं पुनर्नक्तम् ? [v]पर्जन्येन [v]उदवाहेन उदकस्य वाहकेन अनवरतवर्षिणा सह दिवाऽप्यन्धकारितमिव रोदोन्तरं दर्शयति [१३]घनपटलाच्छादितदिगन्ता नक्तंदिनं वर्षयन्तीति यावत् । कदेति ? आह– [v]यत् । "सुपां सुलुक्°" (पा ७·१·३९) इति सप्तम्या लुक् । यदा [v]पृथिवीं [v]व्युन्दन्ति विशेषेण क्लेदयन्ति । उन्दी क्लेदने । एते च पूर्वोक्ता अग्न्यादयो वक्ष्यमाणा मरुतो वा द्रष्टव्याः । अस्माकमप्येतत् [१५-१५]वृष्टिं प्रवर्तयन्विति[-१५] ॥

[v]अन्तरिक्षात् [v]पृथिव्याः, लोकत्रयं निमित्तीकृत्येत्यर्थः । [v]ततः मेघविदारणादूर्ध्वं [v]पर्जन्यात् आगतया [v]वृष्ट्या [v]नः [v]अस्मान् [v]अवत रक्षत । द्वितीयमन्त्रे तु [v]मित्रावरुणा [v]अर्यमन् इत्येवमादयो हे [v]देवाः [v]शर्मण्याः सुखप्रदा इति व्याख्येयम् । तृतीयमन्त्रे तु [v]अपां [v]नपात् उदकानामविनाशयितः [v]आशुहेमन् शीघ्रगते इत्येवमादयो हे [v]देवाः [v]सपीतयः समाना पीतिः सोमपानं येषां ते तादृशा इति व्याख्येयम् ॥

दिवेति ॥ कल्पः–"उपहोमकाले दिवा चित् तमः [६]कृण्वन्तीत्येतैः प्रतिमन्त्रं पिण्डीरावधनाति । जुहोतीत्येके" (आपश्रौ १९·२६·१७-१८) इति ॥ तत्र प्रथममन्त्रपाठस्तु– 'दिवा चित् तमः कृण्वन्ति पर्जन्येनोदवाहेन । पृथिवीं यद्व्युन्दन्ति' [७]इति ॥ यदा देवाः [v]पृथिवीं विशेषेण क्लेदयन्ति तदानीमुदकं वहता [v]पर्जन्येन [v]दिवा [८v]चित् [v]तमः [v]कृण्वन्ति किमुत रात्रौ ॥

११. तं१.तं२.मै.लं– 'प्रत्ययः' नास्ति । १२. तं१.तं२–द्वादशाक्षरात् । १३. तं१.तं२.मै.लं– °पटलसंछादित° । १४–१४. तं१.तं२.मै.लं– वृष्टीः निवर्तयन्विति ।

६. अ.आ.उ.पा– कृण्वन्तीति; क.जो.ना.हा–कृण्वन्तीति तैः । ७. इ.क.जो.ना.हा – 'इति' इत्यस्यानन्तरं– 'दिवा चिद्दिनेऽपि तमो दुर्दिनान्धकारं कृण्वन्ति कुर्वन्ति पर्जन्येन मेघेनोदकपरिपूर्णेन मरुतः पृथिवीं यदा व्युन्दन्ति क्लेदयन्ति मेघा वा वृष्ट्योदकप्रवाहरूपं दुर्दिनं कुर्वन्तु भूक्लेदनार्थं' । ८. आ-अपि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
वि पर्जन्याः सृजन्ति रोदसी अनु धन्वना यन्ति (१) वृष्टयः ।
उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ॥

एति । यम् । नरः । सुदानव इति सु - दानवः । ददाशुषे । दिवः । कोशम् । अचुच्यवुः ॥ ५
वीति । पर्जन्याः । सृजन्ति । रोदसी इति । अन्विति । धन्वना । यन्ति (१) । वृष्टयः ॥
उदिति । ईरयथ । मरुतः । समुद्रतः । यूयम् । वृष्टिम् । वर्षयथ । पुरीषिणः ।
न । वः । दस्राः । उपेति । दस्यन्ति । धेनवः । शुभम् । यातम् । अन्विति । रथाः । अवृत्सत ॥

अथ द्वितीया– ' आ यं नरः ' इति ॥ [V]नरः ऋत्विजः [V]सुदानवः शोभनहविषां दातारः । [१५V]ददाशुषे यजमानाय हविषां दात्रे । तादर्थ्ये चतुर्थी । [१६]यजमानार्थं [V]यं [V]कोशम् उदकस्याधारं १०
मेघं [V]दिवः द्युलोकात् [V]अचुच्यवुः आच्यावयन्ति स्थानात् । यद्वा– दिवः आदित्यात् गृहीतं रश्मिषु नरो नेतारः मरुतः च्यावयन्ति । ततः कोशात् [V]पर्जन्याः[१७] उदकं [V]वि [V]सृजन्ति मुञ्चन्ति [V]रोदसी [V]अनु द्यावापृथिव्यौ लक्षयित्वा । विसर्जनानन्तरं [V]धन्वना अनुदकेन देशेन । विभक्तिव्यत्ययो वा । निरुदके देशे । [V]वृष्टयः वृष्टानि जलानि [V]यन्ति नद्यो भूत्वा प्रवहन्ति । च्यवतेर्लेटि शपः श्लुः (पा २·४·७६), "[१८-]सिजभ्यस्तविदिभ्यश्च" (पा. ३·४·१०९) १५
इति जुस्, "जुसि च" (पा ७·३·८३) इति गुणः[-१८], "मन्त्रे वृष°" (पा ३·३·९६) इति वृषेः क्तिन उदात्तत्वम् ॥

अथ तृतीया– हे [V]मरुतः, [V]यूयम् [V]उत् [V]ईरयथ प्रेरयथ [V]वृष्टिं [V]समुद्रतः समुन्दनात् मेघात् । ततः [V]वर्षयथ पर्जन्यात् । हे [V]पुरीषिणः उदकवन्तः, उदकेन हि सर्वं पूर्यते । [V]न हि

एति ॥ द्वितीयमन्त्रपाठस्तु–' आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः । वि २०
पर्जन्याः सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ' इति ॥ [V]नरः मनुष्या ऋत्विजः [V]सुदानवः सुष्टु [V]हविषां दातारः [V]ददाशुषे हविर्दत्तवते [१०]यजमानाय यजमानार्थं [V]यं [V]कोशम् उदकधारकं मेघं [V]दिवः सकाशात् [V]आ [V]अचुच्यवुः समन्तात् [११]च्यावितवन्तः प्रसारितवन्त इत्यर्थः । स मेघः पूर्वमेकोऽपि [V]पर्जन्याः बहवो मेघा भूत्वा [V]रोदसी [V]अनु द्यावापृथिव्यावनुलक्ष्य विविधां वृष्टिं [V]सृजन्ति । बहुपर्जन्यभावाभिप्रायेण बहुवचनम् । ताश्च [V]वृष्टयः [V]धन्वना मरुभूमावुदकरहितायां [V]यन्ति प्रवर्तन्ते ॥ २५

उदीरयथेति ॥ तृतीयमन्त्रपाठस्तु–' उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः । न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ' इति ॥ हे [V]मरुतः, [V]यूयं समुद्रसदृशात्

१५. मै.मै४– दाशुषे । १६. तं१.तं२.लं– ' यजमानार्थं ' नास्ति । १७. मै४–पर्जन्यात् । १८–१८. [संभावितोऽयं पाठः]; तं१.तं२.मै.लं– ' समविप्रविभ्यश्च ' इति जुस्, ' जुसि च ' इति गुणः; मै४– सिजभ्यस्तविदिभ्यश्चेति गुणः । ३०

९. अ.आ.उ ड.पा.शृं.हो–हविषः । १०. इ.क.जो.ना.हा–' यजमानाय ' नास्ति । ११. इ.क.जो.ना.हा–स्रावित° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सृजा वृष्टिं दिव आऽद्भिः समुद्रं पृण ॥
अब्जा असि प्रथमजा बलमसि समुद्रियम् ॥

सृज । वृष्टिम् । दिवः । एति । अद्भिरित्यत्-भिः । समुद्रम् । पृण ॥
अब्जा इत्यप्-जाः । असि । प्रथमजा इति प्रथम-जाः । बलम् । असि । समुद्रियम् ॥

[V]वः युष्मदीयाः [V]धेनवः प्रीणनहेतवः अपः [V]उपदस्यन्ति उपक्षीयन्ते, हे [V]दस्राः दंसनशीला दानशीला वा । अतो वर्षयतेति । किं च [V]रथाः रंहणशीलाः [19]यूयं [V]यातां कालानुकूलप्रवृत्तां [V]शुभं शोभाम् । [20]शुभेः संपदादिलक्षणः क्विप् (पा ३·३·१०८ वा ९) । ताम् [V]अनु [V]अवृत्सत अनुवर्तध्वम् । यद्वा—यातां गतिं शुभमनुवर्तध्वं सुष्ठु [21]अविछेदेन कुरुध्वम् । [22]पूर्वप्रवृत्तं मार्गं मा मुञ्चत, यस्मात् इदानीमपि रंहणाः स्थ, तस्माच्छक्तत्वात् स्वभावो न त्याज्यः इति । वृतेः छान्दसे लुङि व्यत्ययेन क्सः (पा ३·१·४५), " द्युद्भ्यो लुङि " (पा १·३·९१) इति व्यत्ययेन परस्मैपदं, " न वृद्भ्यश्चतुर्भ्यः " (पा ७·२·५९) इतीडभावः ॥

अथ कृष्णामां कुम्भीमद्भिः पूरयति— ' सृजा वृष्टिम् ' इति द्विपदया गायत्र्या ॥ ' आ ' इति प्रथमपादान्तः । [V]सृज [V]वृष्टिं [V]दिवः द्युलोकात् द्योतनवतो मेघाद्वा आदित्याद्वा[23] । ततः [V]अद्भिः [V]समुद्रं तमेव समुन्दनं मेघम् [V]आ [V]पृण पूरय पुनःपुनर्वृष्ट्यर्थम् ॥

अथ कृष्णां व्रीहिभिर्जुहोति—' अब्जा असि ' इति द्विपदया गायत्र्या ॥ [V]अब्जा [V]असि इति अद्भ्यो [24]जायत इति[25] । " जनसन° " (पा ३·२·६७) इति विट्, " विड्वनोरनुनासिकस्यात् "

मेघात् [V]वृष्टिम् [V]उदीरयथ उत्पादयत । ततः [V]पुरीषिणः पांसुयुक्तान् भूप्रदेशान् [V]वर्षयथ आप्लावयथ । हे [V]दस्रा भूमिशोषम् [12]उपक्षपयितारः मरुतः, [V]वः युष्माकं [V]धेनवः धेनुसदृशा मेघाः [V]न [V]उप [V]दस्यन्ति नैवोपक्षीयन्ते । किं कुर्वतां युष्माकम्? [V]शुभं [V]यातां [13]जगदनुग्रहरूपं मङ्गलकार्यं प्राप्नुवताम् । किं च इतरेषां देवानां [V]रथाः [V]अन्ववृत्सत भवदीयान् रथाननुवर्तन्तां, वृष्टिं दातुमस्मदीये कर्मणि रथानारुह्य युष्मासु समागच्छत्सु पृष्ठतः सर्वेऽप्यन्ये देवा रथानारुह्य समागच्छन्त्वित्यर्थः ॥

सृजेति ॥ कल्पः— " उत्करे कृष्णाम् आमपक्वां[14] स्थालीमद्भिः पूरयति सृजा वृष्टिमिति । यदि भिद्येत वर्षिष्यतीति विद्यात् " (आपश्रौ १९·२७·२-३) इति ॥ पाठस्तु— ' सृजा वृष्टिं दिव आऽद्भिः समुद्रं पृण ' इति । हे मरुत्संघ, [V]दिवः सकाशात् [V]वृष्टिं [V]सृज । [15]आभिः [V]अद्भिः समुद्रसदृशं वह्निदाहमन्तरेणाऽऽतपेन शुष्कमिमं कुम्भम् [V]आ [V]पृण समन्तात् पूरय ॥

अब्जेति ॥ कल्पः— " [11]अनसः उपस्तम्भने शङ्कौ वा कृष्णाऽविर्बद्धा भवति । अब्जा असीति तां [17]प्रोक्षति " (आपश्रौ १९·२७·४-५) इति ॥ पाठस्तु—' अब्जा असि प्रथमजा बलमसि समुद्रियम् '

---

१९. मै— ' यूयम् ' नास्ति । २०. मै—' शुभेः ' नास्ति । २१. तं१.तं२.मै.लं—अविच्छेदम् । २२. तं१.तं२.मै.लं—°प्रवृत्त° । २३—२३. मै.लं—' आदित्याद्वा ' नास्ति । २४—२४. मै४—जायन्त इत्यब्जाः ।

१२. क.ड.हो१—उपक्षयितारः । १३. आ—°रूपमिदं । १४. क.ड.हो१—अपक्वाम् । १५. इ—ताभिः । १६. आ—अन° । १७. अ, उ.जो.ना.पा.हा—अभिक्रन्देत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उन्नम्भय पृथिवीं भिन्द्धीदं दिव्यं नभः।
उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिम्।

उदिति। नम्भय। पृथिवीम्। भिन्द्धि। इदम्। दिव्यम्। नभः॥
उद्नः। दिव्यस्य। नः। देहि। ईशानः। वीति। सृज। दृतिम्॥

(पा ६·४·४१) इत्याकारः। [V]प्रथमजाः च [V]असि, प्रथमः प्रजापतिः तस्माज्जात इति। ५
पूर्ववत् प्रत्ययः, आकारश्च। यथोक्तं– "राजन्यो मनुष्याणामविः पशूनाम्" (तैसं ७·१·१)
इति। [V]बलम् [V]असि [V]समुद्रियं समुद्रे मेघे भवम्। [२५]समुद्रात् अभ्रात् मेघतः ईदृशं बलहेतुरुदकं
त्वमसि ईदृशोदकहेतुरसि॥

अथ वर्षाभूस्तम्भमभिजुहोति– 'उन्नम्भय' इत्यनुष्टुभा॥ हे वर्षाभूस्तम्भ; [V]उन्नम्भय
उच्छ्वासय। नभिः गतिकर्मा, छान्दसो नुम्। [V]पृथिवीं वृष्ट्या। तदर्शयति– [V]इदं [V]दिव्यं दिवि १०
स्थितं [V]नभः मेघं [V]भिन्द्धि। नहेरसुनि (उ ६६०) नभः। गत्वरम्। तथा कृत्वा [V]उद्नः
उदकस्य [V]दिव्यस्य [V]नः अस्मभ्यं [V]देहि। कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। [V]ईशानः उदकं
दातुं समर्थः त्वं [V]वि [V]सृज विमुञ्च [V]दृतिं दृतिस्थानीयं मेघं क्षारय। "दद्यचोऽतस्तिङः"
(पा ६·३·१३५) इति दीर्घत्वम्। पूर्ववदुदकस्योदन्भावः, उदात्तनिवृत्तिस्वरश्च। उद्नः ईशान इति वा।
"अधीगर्थ°" (पा २·३·५२) इति षष्ठी॥ १५

इति॥ हे [१८]अबे, [V]अब्जा [१९]त्वम् उदकाज्जाता [V]असि। [२०]मातृपित्र्युदकात् रेतोरूपेण परिणतादुत्पन्नाऽसि।
किं च [V]प्रथमजा असि सुवर्भानुप्रसारितादादित्यावरकतमोभागात् प्रथममपहतादुत्पन्नाऽसि। "तस्य यत् प्रथमं
तमोऽपाघ्नन्त्सा कृष्णाऽविरभवत्" (तैसं २·१·२) इति श्रुतेः। [V]समुद्रियं समुद्रसदृशमेघसंबन्धि
[V]बलं वृष्ट्युत्पादनसामर्थ्यम् [V]असि। त्वय्याक्रन्दन्त्यां वृष्टिर्भविष्यतीति ज्ञातुं शक्यत्वादित्यर्थः॥

उन्नम्भयेति॥ कल्पः– "उत्करे वर्षाहूस्तम्बं प्रतिष्ठाप्योन्नम्भय पृथिवीमिति वर्षाह्वां जुहोति" २०
(आपश्रौ १९·२७·७) इति। वर्षाहूः पुनर्नवा॥ पाठस्तु– 'उन्नम्भय पृथिवीं भिन्द्धीदं दिव्यं नभः।
उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिम्' इति। हे पुनर्नवे, [V]पृथिवीम् उन्नम्भय उत्कर्षेण क्लेदय, तदर्थं
[V]दिव्यं दिवि भवमिदं [V]नभः आकाशवद्व्याप्तं मेघमण्डलं [V]भिन्द्धि विदारय। विदार्य च [V]दिव्यस्य दिवि
भवस्य [V]उद्नः उदकस्य वर्षणं [V]नः अस्मभ्यं [V]देहि। पुनर्नवाया ओषध्या उत्पादक हे देव, त्वम् ईशानः
सन् [V]दृतिं [V]विसृज उदकपूर्णदृतिसमानं मेघं वर्षणाय विसृष्टद्वारं कुरु॥ २५

२५. लं – आ समुद्रात्।

१८. शृं– अम्बे। १९. अ.आ.इ.उ.पा– 'त्वम्' नास्ति। २०. शृं–मातापितृपीतादुदकात्; ड– मातृपितादिपीतादुदकात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ये देवा(२)दिविभागा येऽन्तरिक्षभागा ये पृथिविभागाः ।
त इमं यज्ञमवन्तु त इदं क्षेत्रमा विशन्तु त इदं क्षेत्रमनु वि विशन्तु ॥ (८)॥
[यन्ति देवा विंश्शतिश्च ।]

ये । देवाः (२) । दिविभागा इति दिवि - भागाः । ये । अन्तरिक्षभागा इत्यन्तरिक्ष - भागाः ।
ये । पृथिविभागा इति पृथिवि - भागाः ॥
ते । इमम् । यज्ञम् । अवन्तु । ते । इदम् । क्षेत्रम् । एति । विशन्तु ।
ते । इदम् । क्षेत्रम् । अनु । वीति । विशन्तु ॥ ८ ॥
[मैसं २.४.७ कासं ११.९]

अन्तर्वेदि तिष्ठन् कृष्णाजिनमवधूनोति– 'ये देवाः' इति जगत्या षट्पदया ॥ [V]ये [V]देवाः [V]दिविभागाः दिवि भागो येषाम् । "हलदन्तात्०" (पा ६.३.९) इति सप्तम्या अलुक् । [V]ये [V]अन्तरिक्षभागाः, [V]ये च [V]पृथिविभागाः [V]ते सर्वे [V]इमं [V]यज्ञम् [V]अवन्तु रक्षन्तु फलप्रदानसमर्थं कुर्वन्तु । [V]ते [V]इदं [V]क्षेत्रम् [V]आ [V]विशन्तु वर्षरूपेण विशन्तु, वर्षितृरूपेण वा परिगृह्णन्तु, [V]ते [V]इदं [V]क्षेत्रम् [V]अनु [V]वि [V]विशन्तु [१६]अनुपूर्वं विविधं च विशन्तु[१६] ओषध्यादिरूपेण व्याप्य तिष्ठन्तु, मा कदाचिदपीदं शुष्कं भूत् ॥

इति द्वितीये चतुर्थे अष्टमोऽनुवाकः ॥

य इति ॥ कल्पः–" ये देवा दिविभागा इत्युपर्याहवनीये कृष्णाजिनमवधूनोत्यूर्ध्वग्रीवं बहिष्टाद्विशसनम् " (आपश्रौ १९.२७.११) इति ॥ पाठस्तु–'ये देवा दिविभागा येऽन्तरिक्षभागा ये पृथिविभागाः । त इमं यज्ञमवन्तु त इदं क्षेत्रमा विशन्तु त इदं क्षेत्रमनु वि विशन्तु' इति ॥ लोकत्रयभाजः [r]ये [r]देवाः [V]ते प्रथमं [r]यज्ञं प्रविश्य सस्यनिष्पादकं [r]क्षेत्रं सामान्येनाऽविश्य ततः [२१]प्रतिकेदारम् [r]अनु[२१] विशेषेण [r]विशन्तु ॥

अत्र विनियोगसंग्रहः–

वृष्टिप्रदायां कारीर्यां देवा इत्यादिकैस्त्रिभिः ।
दिनत्रये चर्मबन्धः शकटस्थे छदिस्त्रये ॥ १ ॥
उद्नो दत्तेति वाक्यं तु त्रयाणां शेष इष्यते ।
दिवा त्रिभिः सक्तुहोमः सृजेत्युत्करसंस्थिताम् ॥ २ ॥
स्थालीमद्भिः पूरयित्वा ह्यब्जाः प्रोक्षत्यविं स्थिताम् ।
उन्नं पुनर्नवाहोमो ये चर्माग्नौ तु धूयते ॥
अष्टमे त्वनुवाकेऽस्मिन् दश मन्त्रा उदीरिताः ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठकेऽष्टमोनुवाकः ॥

२६–२६. पं२–अनुपूर्वं विशन्तु; तं१.तं२–अनुप्रविशन्तु; लं–अनुप्रविशन्तु अनुपूर्वं विशन्तु ।

२१–२१. अ.आ.उ.क.पा– प्रतिक्षेमनु च; जो.ना.हा– प्रतिक्षेत्रं प्रतिकेदारमनु च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

मारुतमसि मरुतामोज इति कृष्णं वासः कृष्णतूषं परि धत्त एतद्वै वृष्टयै रूपꣳ सरूप एव भूत्वा पर्जन्यं वर्षयति रमयत मरुतः श्येनमायिनमिति पश्चाद्वातं प्रति मीवति पुरोवातमेव जनयति वर्षस्यावरुद्धयै वातनामानि जुहोति वायुर्वै वृष्ट्या ईशे

मारुतम्। असि। मरुताम्। ओजः। इति। कृष्णम्। वासः। कृष्णतूषमिति कृष्ण-तूषम्। परीति। धत्ते। एतत्। वै। वृष्टयै। रूपम्। सरूप इति स-रूपः। एव। भूत्वा। पर्जन्यम्। वर्षयति। रमयत। मरुतः। श्येनम्। आयिनम्। इति। पश्चाद्वातमिति पश्चात्-वातम्। प्रतीति। मीवति। पुरोवातमिति पुरः–वातम्। एव। जनयति। वर्षस्य। अवरुद्धया इत्यव-रुद्धयै। वातनामानीति वात-नामानि। जुहोति। वायुः। वै। वृष्ट्याः। ईशे।

अथ 'मारुतमसि' (तैसं २.४.७) इत्यादीनां कारीरीमन्त्राणां ब्राह्मणम्–'मारुतमसि' इत्यादि॥ [V]कृष्णतूषं [1]कृष्णदशान्तं [V]कृष्णं [V]वासः यजमानः [V]परि [V]धत्ते। [2V]एतत् कृष्णं वासः [V]वृष्टयै वृष्ट्या [V]रूपं, ततश्च [3]पर्जन्यसमानरूपः [V]भूत्वा [V]पर्जन्यं [V]वर्षयति॥

रमयतेत्यादि। [V]पश्चाद्वातम् अपरस्यां दिशि [4]-आगच्छन्तं वातं-[4] [V]प्रति [V]मीवति [5]प्रति-निवर्तयति वर्षप्रतिकूलमपि [V]पुरोवातं [6]-पूर्वस्या दिशः-[6] आगच्छन्तं [7]-वातं वर्षानुकूलं-[7] [V]जनयति [V]एव। [8]तच्च [V]वर्षस्य [V]अवरुद्धयै भवति। मीव स्थौल्ये। प्रतिमीवति [9]प्रक्षीयमाणं करोतीति यावत्॥

वातनामानीति॥ "पुरोवातो वर्षन्" (तैसं २.४.७) इत्यादीन्यष्टौ। ईश इति। "लोपस्त आत्मनेपदेषु" (पा ७.१.४१) इति तलोपः॥

कारीर्युत्तरभागस्था मन्त्रा अष्टम ईरिताः॥

मारुतमिति॥ अथ नवमे पूर्वभागस्थाः सप्तमानुवाकोक्तमन्त्रा व्याख्यायन्ते। [1]तत्र यजमानस्य वस्त्रपरिधानं विधत्ते–'मारुतमसि मरुतामोज इति कृष्णं वासः कृष्णतूषं परिधत्त एतद्वै वृष्टयै रूपꣳ सरूप एव भूत्वा पर्जन्यं वर्षयति' इति॥ तूषा वस्त्रस्य दशाः, ताः कृष्णा यस्य तत् [V]कृष्णतूषम्। जलपूरितैर्मेघैः आदित्यप्रकाशे सर्वत आवृते सति वृष्टेः स्वरूपं कृष्णं [2]भाति। यजमानोऽपि [3]कृष्णवस्त्रप्रावरणात् वृष्टि-समानरूपः सन् [V]पर्जन्यं वर्षयितुं प्रभुर्भवति॥

रमयतेति॥ मन्त्रान्तरं विनियुङ्क्ते–'रमयत मरुतः श्येनमायिनमिति पश्चाद्वातं प्रति मीवति पुरोवातमेव जनयति वर्षस्यावरुद्धयै' इति॥ [V]प्रति [V]मीवति प्रतिबध्नाति॥

वातनामानीति॥ 'पुरोवातो वर्षन्' इत्यादिमन्त्राणां विनियोगं दर्शयति–'वातनामानि जुहोति वायुर्वै वृष्ट्या ईशे वायुमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यं वर्षयति' इति॥ 'जिन्वरुग्रः' इत्यादीनि वायोर्नामानि तदुद्देशेन होमे सति यः [V]वायुः वृष्टेरीश्वरः [4-V]स तुष्टः-[4] सन् [V]वर्षयति॥

१. तं१.तं२.मै.लं– 'कृष्णदशान्तम्' इत्यस्यानन्तरम् 'उदकम्'। २. मै४– तत्। ३. मै४– °समानः। ४–४. मै४– गन्छन्तम्। ५. तं१.तं२– प्रवर्तयति; लं– प्रतिप्रवर्तयति। ६–६. मै४– पूर्वस्यां दिशि। ७–७. मै४– वर्षवातं वा अनुकूलम्। ८. मै.लं– तस्य। ९. तं१.तं२.मै.लं– क्षीयमाणम्।

१. ड– अत्र। २. इ– भवति। ३. इ.क.जो.ना.शृं.हा–°प्रावरणः। ४–४. क– स संतुष्टः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

वायुमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यं वर्षयत्यष्टौ (१) जुहोति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव वृष्टिꣳ सं प्र च्यावयति कृष्णाजिने सं यौति हविरेवाकरन्तर्वेदि सं यौत्यवरुद्ध्यै यतीनामद्यमानानाꣳ शीर्षाणि पराऽपतन्

वायुम्। एव। स्वेन। भागधेयेनेति भाग-धेयेन। उपेति। धावति। सः। एव। अस्मै। पर्जन्यम्। वर्षयति। अष्टौ (१)। जुहोति। चतस्रः। वै। दिशः। चतस्रः। अवान्तरदिशा इत्यवान्तर-दिशाः। दिग्भ्य इति दिक्-भ्यः। एव। वृष्टिम्। सम्। प्रेति। च्यावयति। कृष्णाजिन इति कृष्ण-अजिने। समिति। यौति। हविः। एव। अकः। अन्तर्वेदीत्यन्तः—वेदि। समिति। यौति। अवरुद्ध्या इत्यव-रुद्ध्यै। यतीनाम्। अद्यमानानाम्। शीर्षाणि। परेति। अपतन्।

अष्टावित्यादि। गतम्। कृष्णाजिने सं यौतीति[१०]। [v]अन्तर्वेदि [v]कृष्णाजिने मधुषा करीरसक्तून् [v]संयौति इति। [v]हविः [v]एव [v]अकः अकार्षीत्। [११]करोतेः छान्दसो लुङ्, "मन्त्रे घस°" (पा २.४.८०) इति च्लेर्लुक्। अन्तर्वेदि संयवनं वर्षस्यावरोधनाय भवति। यतीनामिति। प्राणिनां यातयितारो रक्षोविशेषाः यतयः, तेषां सालावृकैः [v]अद्यमानानाम्। यदाह—

अष्टाविति॥ पाठप्राप्तां मन्त्रसंख्यां प्रशंसति— 'अष्टौ जुहोति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव वृष्टिꣳ सं प्र च्यावयति' इति॥

कृष्णाजिन इति॥ 'मान्दा वाशाः' इति मन्त्रेण सक्तूनां संयवनं यद्विधास्यते तस्याऽऽधारं विधत्ते— 'कृष्णाजिने सं यौति हविरेवाकः' इति॥ प्रकृतौ कृष्णाजिने हविःस्वरूपान् [५-व्रीहीनव हन्ति-५] तण्डुलान् पिनष्टि च। अतोऽत्रापि [v]कृष्णाजिने [६]संयवनेन [v]हविः कृतं भवति॥

अन्तर्वेदीति॥ देशविशेषं विधत्ते — 'अन्तर्वेदि सं यौत्यवरुद्ध्यै' इति॥ वेदेर्बहिः संयवने यज्ञभूमिमप्रविश्य [७]हविर्नावरुध्यते॥

यतीनामिति॥ करीराणि विधातुं प्रस्तौति—'यतीनामद्यमानानाꣳ शीर्षाणि पराऽपतन् ते खर्जूरा अभवन् तेषाꣳ रस ऊर्ध्वोऽपतत् तानि करीराण्यभवन्त्सौम्यानि वै करीराणि सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति' इति॥ [८]पारमहंस्यरूपं चतुर्थाश्रमं प्राप्तानां येषां यतीनां मुखे ब्रह्मात्मप्रतिपादको वेदान्तशब्दो नास्ति तान् यतीनिन्द्र आरण्येभ्यः [९]श्वभ्यः प्रायच्छत्। तथा [१०]च कौपीतकिब्राह्मणोपनिषदीन्द्रस्य प्रतिज्ञा [११]समाम्नायते— "अरुन्मुखान् यतीन्त्सालावृकेभ्यः प्रायच्छम्" (कौउ ३.१) इति। पतितत्वात् तेषां तथात्वं युक्तम्। तथा च स्मर्यते— "नित्यकर्म परित्यज्य वेदान्तश्रवणं विना। वर्तमानस्तु संन्यासी पतत्येव न संशयः" इति॥ तेषां च सालावृकैर्भक्षणं षष्ठकाण्डे समाम्नायते— "इन्द्रो यतीन्त्सालावृकेभ्यः प्रायच्छत् तान् दक्षिणत उत्तरवेद्या आदन्" (तैसं ६.२.७) इति। वेदान्तश्रवणवाञ्छां विना नित्यकर्म परित्यक्तवतां भवतामपीदृशी गतिरिति दर्शयितुं वेदिसमीपे [१२]भक्षणम्।

१०. मै४— 'इति' नास्ति। ११. तं१.तं२.मै.लं— करोति।

५-५. इ— व्रीहियवान्। ६. आ.इ.उ.जो.ना.पा.हा— संयवने वा। ७. हा— °वरुध्यति; हो१— °वरुध्येत। ८. अ.उ.ड.पा — परम°। ९. हो१— सालावृकेभ्यः। १०. अ.आ.उ.क.जो.ना.पा.हा— 'च' नास्ति। ११. अ.उ.पा—समाम्नाये; शृं— समाम्नायेत। १२. क.जो.ना.हा— भक्षणमेव; इ.ड. शृं.हो१— भक्षणम् एवम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

ते खर्जूरा अभवन् तेषाꣳ रस ऊर्ध्वोऽपतत् तानि करीराण्यभवन्त्सौम्यानि वै करीराणि सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति यत् करीराणि भवन्ति (२) सौम्यैवाऽऽहुत्या दिवो वृष्टिमव रुन्द्धे मधुषा सं यौत्यपां वा एष ओषधीनाꣳ रसो यन्मध्वद्भ्य एवौषधीभ्यो वर्षत्यथो अद्भ्य एवौषधीभ्यो वृष्टिं नि नयति मान्दा वाशा

ते। खर्जूराः। अभवन्। तेषाम्। रसः। ऊर्ध्वः। अपतत्। तानि। करीराणि। अभवन्। सौम्यानि। वै। करीराणि। सौम्या। खलु। वै। आहुतिरित्या - हुतिः। दिवः। वृष्टिम्। च्यावयति। यत्। करीराणि। भवन्ति (२)। सौम्यया। एव। आहुत्येत्या - हुत्या। दिवः। वृष्टिम्। अवेति। रुन्द्धे। मधुषा। समिति। यौति। अपाम्। वै। एषः। ओषधीनाम्। रसः। यत्। मधु। अद्भ्य इत्यत् - भ्यः। एव। औषधीभ्य इत्योषधि - भ्यः। वर्षति। अथो इति। अद्भ्य इत्यत् - भ्यः। एव। ओषधीभ्य इत्योषधि - भ्यः। वृष्टिम्। नीति। नयति। मान्दाः। वाशाः।

"इन्द्रो यतीन् सालावृकेभ्यः" (तैसं ६·२·७) इत्यादि। [V]खर्जूराः महातालाः, तत्फलानि [V]करीराणि। सौम्यानीति। रसपरिणामत्वात्। सौम्येति। [V]सौम्या एव हि [V]दिवः [V]वृष्टिं च्यावयितुं शक्नोति। गतमन्यत्॥

मधुषेति॥ कृष्णेन। मधुशब्दपर्यायो मधुःशब्दः उसिप्रत्ययान्तः। [V]अद्भ्यः [V]ओषधीभ्यः च हेतुभ्यः [V]वृष्टिं प्रवर्तयति मधुषा संयवनेन। अथो इति। अपि च [V]अद्भ्यः [V]ओषधीभ्यः अपि उपादानेभ्यः [V]वृष्टिम् उत्पादयति॥

नामधेयैरिति॥ मान्दादिभिरेकादशभिर्नामभिः[१२] (तैसं २·४·७)। [V]अच्छैति आभिमुख्येन प्राप्नोति, अभिमन्त्रणेनाभिमुख्यकरणात्[१३]। अथो इति। असाविति। नामविशेषार्थं

सालावृकैः [V]अद्यमानानां [V]यतीनां यानि [१३-V]शीर्षाणि कपालास्थीनि[-१३] भूमौ [V]अपतन्, तानि खर्जूरवृक्षत्वेन उदभवन्। ये तालाभिधाना महाखर्जूराः तेषां फलानि शिरःकपालसदृशानि लक्ष्यन्ते। [V]तेषां फलानां [V]रसः ऊर्ध्वमुत्क्रम्य भूमौ [V]अपतत्। पतित्वा च सोमलतासदृशीनां लतानां सोमप्रतिनिधिभूतानामङ्कुररूपाणि करीरशब्दवाच्यानि [१४-V]अभवन्। अत एव सोमाङ्कुरसदृशत्वात् [V]सौम्यानि [V]करीराणि तदाहुतिश्च [V]सौम्या सती [V]दिवः सकाशात् [V]वृष्टिं प्र [V]च्यावयति। "अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते। आदित्यात् जायते वृष्टिः" (मनुस्मृ ३·७६) इति स्मृतेः॥

यदिति॥ सक्तूनां प्रकृतिद्रव्यं विधत्ते– 'यत्करीराणि भवन्ति सौम्ययैवाऽऽहुत्या दिवो वृष्टिमव रुन्द्धे' इति॥

मधुषेति॥ संयवनसाधनं माक्षिकद्रव्यं विधत्ते– 'मधुषा सं यौत्यपां वा एष ओषधीनाꣳ रसो यन्मध्वद्भ्य एवौषधीभ्यो वर्षत्यथो अद्भ्य एवौषधीभ्यो वृष्टिं नि नयति' इति॥ मक्षिका हि नानाविधेभ्यः पुष्पेभ्यो रसानादाय मधु कुर्वन्ति। तेषां च रसानामोषधिजन्यत्वात् [१५]द्रवत्वाच्चोभयसारत्वम्॥

१२. तं१.तं२.मै.लं– 'नामभिः' नास्ति। १३. तं१.तं२.लं– °करणत्वात्।

१३–१३. अ.उ.पा.शृं – शिरःकपालास्थीनि; ड.हो१– शिरः कपालान्यस्थीनि। १४. ड– अभूवन्। १५. शृं–रसत्वा°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

इति सं यौति नामधेयैरेवैना अच्छैत्यथो यथा ब्रूयादसावेहीत्येवमेवैना नामधेयैरा (३) च्यावयति वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामीत्याह वृषा वा अश्वो वृषा पर्जन्यः कृष्ण इव खलु वै भूत्वा वर्षति रूपेणैवैनꣳ समर्धयति वर्षस्यावरुद्ध्यै ॥ ९ ॥

[अष्टौ भवन्ति नामधेयैरेकान्नत्रिꣳशच्च ।]

इति । समिति । यौति । नामधेयैरिति नाम - धेयैः । एव । एनाः । अच्छ । एति । अथो इति । यथा । ब्रूयात् । असौ । एति । इहि । इति । एवम् । एव । एनाः । नामधेयैरिति—नाम - धेयैः । एति (३) । च्यावयति । वृष्णः । अश्वस्य । संदानमिति सं - दानम् । असि । वृष्ट्यै । त्वा । उपेति । नह्यामि । इति । आह । वृषा । वै । अश्वः । वृषा । पर्जन्यः । कृष्णः । इव । खलु । वै । भूत्वा । वर्षति । रूपेण । एव । एनम् । समिति । अर्धयति । वर्षस्य । अवरुद्ध्या इत्यव-रुद्ध्यै ॥९॥

[मैसं २.४.८, कासं ११.१०]

सामान्यपदम् । [v]यथा कश्चिदामन्त्रयमाणः [v]ब्रूयात्--दत्त [v]एहि, गुप्त एहि [v]इति [v]एवम् [v]एव अपोऽपि [v]नामधेयैः आत्मसमीपे [१७]आनयति ॥

वृष्ण इति ॥ तिस्रः पिण्डीः कृत्वा समुच्चित्यानेन मन्त्रेण कृष्णाजिनस्यान्तान् [१५]कृष्णेन संदानेनोपनह्यति । वृषेति । वर्षिता [v]अश्वः पर्जन्यः वा[१६] वर्षिता । तस्मात् वृषत्वेन पर्जन्य-सदृशाश्वसंकीर्तनं वृष्ट्यै भवति । किं च — [v]कृष्णः [v]इव [v]भूत्वा पर्जन्यः वर्षति । तस्मात् कृष्णाजिनसंबन्धः रूपसमृद्ध्या वृष्टिहेतुर्भवति ॥

इति द्वितीये चतुर्थे नवमोऽनुवाकः ॥

मान्दा इति ॥ मन्त्रेण संयवनं विधत्ते– 'मान्दा वाशा इति सं यौति नामधेयैरेवैना अच्छैत्यथो यथा ब्रूयादसावेहीत्येवमेवैना नामधेयैरा च्यावयति' इति ॥ मान्दादीन्यपां नामानि तैः [v]एनाः अभिमुखत्वेन प्राप्नोति । किं च हे देवदत्त, समागच्छ [v]इति [v]यथा लोके [v]ब्रूयात् [v]एवम् [v]एव [v]एनाः अपः स्वनामभिः [v]आ [१६v]च्यावयति ॥

वृष्ण इति ॥ कृष्णाजिनबन्धनमन्त्रं व्याचष्टे– 'वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामीत्याह वृषा वा अश्वो वृषा पर्जन्यः कृष्ण इव खलु वै भूत्वा वर्षति रूपेणैवैनꣳ समर्धयति वर्षस्याव-रुद्ध्यै' इति ॥ यथा [v]अश्वः [v]वृषा सेचनसमर्थ एवं [v]पर्जन्यः अपि सेचनसमर्थः [१७]सन्नुदकपूरणेन [v]कृष्णः एव [v]भूत्वा पश्चात् [v]वर्षति । अतः कृष्णेन रज्जुरूपेण [v]एनं पर्जन्यं समृद्धं करोति । [१८]तच्च वर्षस्यावरोधाय संपद्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके नवमोऽनुवाकः ॥

१४. तं१.तं२.मै.लं–आगमयति । १५. तं१.तं२.मै.लं–'कृष्णेन' नास्ति । १६–१६. मै४–अपि ।
१६. ड.शृं.हो१– ह्वयति । १७. आ– सन्नुदकपूर्णेन । १८. ड.हो१– 'तच्च' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

देवा वसव्या देवाः शमण्या देवाः सपीतय इत्या बध्नाति देवताभिरेवान्वहं वृष्टिमिच्छति यदि वर्षेत् तावत्येव होतव्यं यदि न वर्षेच्छ्वो भूते हविर्निर्वपेदहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षति नक्तं वा हि दिवा वा वर्षति

देवाः । वसव्याः । देवाः । शर्मण्याः । देवाः । सपीतय इति स-पीतयः । इति । एति । बध्नाति । देवताभिः । एव । अन्वहमित्यनु - अहम् । वृष्टिम् । इच्छति । यदि । वर्षेत् । तावति । एव । होतव्यम् । यदि । न । वर्षेत् । श्वः । भूते । हविः । निरिति । वपेत् । अहोरात्रे इत्यहः–रात्रे । वै । मित्रावरुणाविति मित्रा - वरुणौ । अहोरात्राभ्यामित्यहः– रात्राभ्याम् । खलु । वै । पर्जन्यः । वर्षति । नक्तम् । वा । हि । दिवा । वा । वर्षति ।

"देवा वसव्याः" (तैसं २·४·८) इत्यादिभिः त्रिभिर्मन्त्रैः तिसृषु गधासु त्रिषु दिनेषु अन्वहम् Vआ Vबध्नाति पिण्डीः । यदि वर्षेदिति । तत्र 'अन्वहम्' इति वचनात् त्रिषु दिनेषु पिण्डीहोमः । श्वो भूते चतुर्थेऽहनि हविः निर्वपेत् । तत्रायं क्रमः– Vयदि प्रथमे दिने Vवर्षेत् Vतावति तस्मिन् Vएव अहनि Vहोतव्यं पिण्डीलक्षणं हविः । अथ यदि तत्र न वर्षेत् द्वितीये दिने मध्यमायां कृष्णाजिनमाबध्नीयात् । यदि तस्मिन् दिने वर्षेत् तावत्येव होतव्यम् । यदि तस्मिन्नपि न वर्षेत् तृतीये दिने तृतीयस्यां कृष्णाजिनमाबध्नीयात् । यदि तस्मिन् दिने वर्षेत्, यदि च न वर्षेत् उभयथाऽपि तृतीये दिने पिण्डीर्जुहुयात् । अथ Vयदि Vन Vवर्षेत् Vश्वोभूते चतुर्थेऽह्नि प्राप्ते Vहविः निर्वपेत् ॥ हविरिति जातावेकवचनम् । धामच्छदादीनि त्रीणि हवींषि निर्वपेत् कृष्णानां

प्राच्याङ्गमन्त्राः कारीर्या व्याख्याता नवमे स्फुटम् ॥

अथोत्तरभागस्थमन्त्रा दशमे [1]व्याख्यायन्ते ॥

देवा इति ॥ तत्र त्रिषु दिनेषु क्रमेण छदिस्थये [2]सक्तुबन्धनार्थान् मन्त्रान् विनियुङ्क्ते– 'देवा वसव्या देवाः शर्मण्या देवाः सपीतय इत्या बध्नाति देवताभिरेवान्वहं वृष्टिमिच्छति' इति ॥ तत्तन्मन्त्रोक्ताभिः [3]देवताभिः अनुगृहीतः प्रतिदिनं [4]वृष्टिम् [4]इच्छति ॥

यदीति ॥ तत्र वर्षावर्षपक्षयोर्व्यवस्थया सक्तुहोमं पुरोडाशनिर्वापं च विधत्ते – 'यदि वर्षेत् तावत्येव होतव्यं यदि न वर्षेच्छ्वो भूते हविर्निर्वपेत्' इति ॥ [4]तावति [4]एव सक्तुबन्धने [3]एव कृते सति वर्षणपक्षे पुरोडाशनिर्वापमन्तरेण पिण्डीर्जुहुयात् । प्रथमदिने [4]वृष्टौ सत्यां पिण्डत्रयहोमेनैव कर्मसमाप्तिः । तथा द्वितीयतृतीययोर्दिनयोः । त्रिष्वपि दिनेषु वृष्ट्यभावे चतुर्थदिने पुरोडाशनिर्वापं कुर्यात् ॥

अहोरात्रे इति ॥ "अहोरात्रावासक्तं भवति" (आपश्रौ १९·२६·५) इति वदता सूत्रकारेण अत्यन्तसंयोगवाचिनीं द्वितीयां (पा २·३·५) प्रयुञ्जानेनाहोरात्रयोर्निरन्तरं बन्धनं यदुक्तं तद्विधिमर्थवादेनोन्नयति– 'अहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षति नक्तं वा हि दिवा वा वर्षति मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अहोरात्राभ्यां पर्जन्यं वर्षयतः' इति । अह्नः

१. अ– व्याख्यास्यन्ते । २. अ.आ.उ.क.जो.ना.पा.हा– °बन्धनार्थं । ३. अ.आ.क.जो.ना.पा– 'एव' नास्ति । ४. हो१– वृष्ट्याम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा(१)अहोरात्राभ्यां पर्जन्यं वर्षयतोऽग्नये धामच्छदे पुरोडाशमष्टाकपालं निर्वपेन्मारुतꣳ सप्तकपालꣳ सौर्यमेककपालमग्निर्वा इतो वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति यदा खलु वा असावादित्यो न्यङ्ङ्रश्मिभिः पर्यावर्ततेऽथ वर्षति धामच्छदिव खलु वै भूत्वा वर्षत्येता वै देवता

मित्रावरुणाविति मित्रा - वरुणौ । एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । तौ । एव । अस्मै (१)। अहोरात्राभ्यामित्यहः—रात्राभ्याम् । पर्जन्यम् । वर्षयतः । अग्नये । धामच्छद इति धाम - च्छदे । पुरोडाशम् । अष्टाकपालमित्यष्टा - कपालम् । निरिति । वपेत् । मारुतम् । सप्तकपालमिति सप्त - कपालम् । सौर्यम् । एककपालमित्येक - कपालम् । अग्निः । वै । इतः । वृष्टिम् । उदिति । ईरयति । मरुतः । सृष्टाम् । नयन्ति । यदा । खलु । वै । असौ । आदित्यः । न्यङ् । रश्मिभिरिति रश्मि - भिः । पर्यावर्तत इति परि - आवर्तते । अथ । वर्षति । धामच्छदिति धाम - च्छत् । इव । खलु । वै । भूत्वा । वर्षति । एताः । वै । देवताः ।

व्रीहीणाम् । [v]अहोरात्रे इत्युक्तम् । एकैकस्यां गधायामहोरात्रावसक्तं भवति । सति वर्षे [१-]तत्र तत्रैव[-१] होमः, असति श्रोभूते हविर्निर्वप्तव्यमिति[२]। तत्राहोरात्रावसक्ते वृष्टिहेतुत्वं तावत् समर्थयते[३]—[v]नक्तं [v]वा [v]दिवा [v]वा [v]अहोरात्राभ्याम् एव [v]पर्जन्यः [v]वर्षति । तयोश्च मित्रावरुणात्मकत्वात् तावेव [v]पर्जन्यं [v]वर्षयतः, अहोरात्रावसञ्जनलक्षणस्वभागोपहृतत्वात् ॥

अथ हवींषि विदधाति— 'अग्नये धामच्छदे' इत्यादि ॥ धामानि स्थितानि तेजांसि वा छादयति वृष्टिकाल इति धामच्छत् । "बहुलं संज्ञाछन्दसोः" (उ १९०) इति णिलुक् । अग्निर्वा इति । आहुतिद्वारेण [v]अग्निः [v]वृष्टिम् उदकम् [v]उत् [v]ईरयति ऊर्ध्वं गमयति आदित्यं प्रापयति, तस्मादग्नये निरुप्यते । तां वृष्टिं [v]सृष्टाम् अवसृष्टां [v]मरुतः [v]नयन्ति देशान्तरं प्राप-यन्ति, तस्मान्मरुद्भ्यो निरुप्यते । [v]यदा [v]खलु [v]आदित्यः [v]रश्मिभिः [v]न्यङ् [v]-अवाक्वृष्टिः त्रिः[-v]

सूर्यप्रकाशयुक्तत्वान्मित्रत्वम् । रात्रेरन्धकारेण [५]अवरुद्धत्वात् वरुणत्वम् । [v]पर्जन्यः च [v]अहोरात्राभ्यां अन्तरेण वर्षितुं न [६]क्षमते । कालान्तरस्याभावात् । तथा सति रात्रौ दिवसे [v]वा [७]कदा वर्षिष्यतीति ज्ञातुम् अशक्यत्वान्निरन्तरं बन्धनीयम् । तेन तुष्टौ मित्रावरुणौ [v]वर्षयतः ॥

अग्नय इति ॥ 'हविर्निर्वपेत्' इति सामान्येन यदुक्तं तदेव विशेषतः प्रपञ्चयति— 'अग्नये धामच्छदे पुरोडाशमष्टाकपालं निर्वपेन्मारुतꣳ सप्तकपालꣳ सौर्यमेककपालमग्निर्वा इतो वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति यदा खलु वा असावादित्यो न्यङ्ङ्रश्मिभिः पर्यावर्ततेऽथ वर्षति धामच्छदिव खलु वै

१-१. तं१.तं२.मै.लं- तत्रैव तत्रैव । २. मै४- °र्निर्वप्स्यामीति । ३. मै४- 'समर्थयते' इत्यस्यानन्तरं 'नक्तं वा दिवा वा अहोरात्राभ्यामासक्तं भवति' इति । ४-४. तं१.तं२. मै.लं- अवाक् प्रवृत्तिः ।

५. आ.क.ना- लीनत्वात्; अ.उ.जो.पा.हा- लीनकत्वात्; शं.हो१- आवरकत्वात् । ६. अ. आ.उ.क.जो.ना.पा.हा.हो१- क्षमः कुतः; इ- शक्तः कुतः । ७. आ.उ.ड.जो.पा.हा.हो१- सर्वदा; ना- स कदा; अ- 'कदा' नास्ति; क- सदा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

वृष्ट्या ईशते ता एव स्वेन भागधेयेनोप धावति ता (२) एवास्मै पर्जन्यं वर्षयन्त्युतावर्षिष्यन् वर्षत्येव सृजा वृष्टिं दिव आऽद्भिः समुद्रं पृणेत्याहेमाश्चैवामूश्चापः

वृष्ट्याः । ईशते । ताः । एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । ताः (२) । एव । अस्मै । पर्जन्यम् । वर्षयन्ति । उत । अवर्षिष्यन् । वर्षति । एव । सृज । वृष्टिम् । दिवः । एति । आद्भिरित्यत् - भिः । समुद्रम् । पृण । इति । आह । इमाः । च । एव । अमूः । च । अपः । ५

[V]पर्यावर्तते [5]इतोमुखं प्रवर्तते [V]अथ [6V]वर्षति रश्मिषु पक्वमुदकं पर्जन्यः [7]स्रावयति, तस्मात् सूर्याय निरुप्यते इति । अनेन त्रिहविष्केण यागेन पर्जन्यः [V]धामच्छत् [V]इव [V]भूत्वा [V]वर्षति भूयिष्ठं वर्षतीति यावत् । एता वा इत्यादि । गतम् ॥

कुम्भीमद्भिः पूरयति–'सृजा वृष्टिम्' इति ॥ [V]इमाः [8]भूमिष्ठाः [V]अमूः दिविष्ठाः मेघस्था वा [V]अपः समृद्धाः करोति । अपि च [9V]आभिः [V]एव करणभूताभिः [V]अमूः आभिमुख्येन १०
प्राप्नोति । 'सृजा वृष्टिम्' इति वचनात् वर्षेण इमाः समृद्धा भवन्ति । आभिरद्भिः समृद्धस्य मेघस्थस्य उदकस्यापूरणात् अमूः समृद्धा भवन्ति ॥

भूत्वा वर्षत्येता वै देवता वृष्ट्या ईशते ता एव स्वेन भागधेयेनोप धावति ता एवास्मै पर्जन्यं वर्षयन्त्युतावर्तिष्यन् वर्षत्येव' इति ॥ "धामा ह यत् ते अजर" (तैसं ३·१·११) इति याज्यानुवाक्ययोर्धामशब्दोपेतत्वाद्धामच्छदग्निः । तदर्थस्तु–धामान्यस्मद्गृहादीनि [8]अन्धकारापादिकया [9]वृष्ट्याऽऽच्छादयतीति धामच्छत्, १५
तस्मै निर्वापः । "अग्नौ प्रास्ताऽऽहुतिः" (मनु ३·७६) इति स्मृत्यनुसारेण [V]अग्निः अस्माल्लोकादाहुत्याऽऽदित्यद्वारा [V]वृष्टिम् उत्पादयति । [10V]सृष्टाम् उत्पादितां तां वृष्टिं [V]मरुतः यत्र तत्र [V]नयन्ति । यस्मिन् काले [V]असौ [V]आदित्यः न्यग्भूतैः [11]तीव्रैः [V]रश्मिभिः परित आवर्ततेऽतिशयेन संतापं करोति तदा पर्जन्यद्वारा [V]वर्षति । [12]वर्षश्च धामानि गृहादीन्याच्छादयन् इव बहुलमेघयुक्तः [V]भूत्वा [V]वर्षति । तथा सत्यग्निर्मरुत आदित्य इति [V]एताः एव [V]देवताः [13]वृष्टेर्नियमनाय समर्थाः । [V]ताः च हविर्भिस्तुष्टा यजमानार्थं [V]वर्षयन्ति । यद्यपि पर्जन्यः २०
[14]-स्वयमेव [V]अवर्षिष्यन्-[14] इव पूर्वं [15]स्थितस्तथाऽप्येताभिर्देवताभिः प्रेरितः क्षणमात्रेण पुरोवातादिसामग्रीं संपाद्य सर्वथा [V]वर्षति [V]एव ॥

सृजेति ॥ आमस्थालीपूरणमन्त्रं व्याचष्टे–'सृजा वृष्टिं दिव आऽद्भिः समुद्रं पृणेत्याहेमाश्चैवामूश्चापः समर्धयत्यथो आभिरेवामूरच्छैति' इति ॥ 'अद्भिः पृण' इत्यनेन [V]इमाः भूलोकस्थाः [V]अपः [V]समर्धयति । 'सृजा वृष्टिम्' इत्यनेन [V]अमूः [11]स्वर्गस्थाः अपः समर्धयति । किं च [V]आभिः [V]एव २५
भूलोकस्थाभिरद्भिः [V]अमूः [V]अच्छ [V]एति स्वर्गस्था अपः प्राप्तुं गच्छति ॥

अञ्जेति ॥ कृष्णाविप्रोक्षणमन्त्रस्य स्पष्टार्थतां दर्शयति–'अञ्जा असि प्रथमजा बलमसि समुद्रियमित्याह यथायजुरेवैतत्' इति ॥

५. मै४– इत्यमूश्च । ६. तं१.तं२.मै.लं– वर्षिष्ठ° । ७. मै४ – स्थापयति । ८. तं१.तं२.मै४. लं– भूयिष्ठाः । ९–९. तं१.तं२– अमूभिः । ३०

८. क– अन्धकारादिकया । ९. अ.उ.पा– दृष्ट्या । १०. अ.उ.ना.जो.पा.हा– वृष्टिम् । ११. हो१–स्वीयैः । १२. आ–वर्षन् सः; ड.हो१– वर्षन् । १३. आ.क.ना– वृष्टिनिय° । १४–१४ .क.हा–स्वयमेव वर्षिष्यन्; ड.शृं.हो१–स्वयम् अवर्षिष्यन् । १५. ड.हो१– स्थितवान् तथा° । १६. ड.शृं.हो१– स्वर्गलोकस्थाः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समर्धयत्यथो आभिरेवामूरच्छैत्यब्जा असि प्रथमजा बलमसि समुद्रियमित्याह यथायजुरेवैतदुन्नम्भय पृथिवीमिति वर्षाह्वां जुहोत्येषा वा (३) ओषधीनां वृष्टिवनिस्तयैव वृष्टिमा च्यावयति ये देवा दिविभागा इति कृष्णाजिनमव धूनोतीम एवास्मै लोकाः प्रीता अभीष्टा भवन्ति ॥ १० ॥

[अस्मै धावति ता वा एकविंशतिश्च ।]

समिति । अर्धयति । अथो इति । आभिः । एव । अमूः । अच्छ । एति । अब्जा इत्यप्-जाः । असि । प्रथमजा इति प्रथम-जाः । बलम् । असि । समुद्रियम् । इति । आह । यथायजुरिति यथा-यजुः । एव । एतत् । उदिति । नम्भय । पृथिवीम् । इति । वर्षाह्वामिति वर्ष-ह्वाम् । जुहोति । एषा । वै (३) । ओषधीनाम् । वृष्टिवनिरिति वृष्टि-वनिः । तया । एव । वृष्टिम् । एति । च्यावयति । ये । देवाः । दिविभागा इति दिवि-भागाः । इति । कृष्णाजिनमिति कृष्ण-अजिनम् । अवेति । धूनोति । इमे । एव । अस्मै । लोकाः । प्रीताः । अभीष्टा-इत्यभि-इष्टाः । भवन्ति ॥ १० ॥

[मैसं २.४.८; ११.१० कासं]

अब्जा इति । अविमभिजुहोति । यथायजुरिति । मेघोदकस्य बलहेतुस्त्वम् [v]असि इति [v]एतत् [१०-v]यथायजुः भवति [v]एव । उन्नम्भयेति ॥ [११-v]वर्षाह्वां [v]जुहोति[-११] । वर्षम् आह्वयतीति वर्षाह्वः । क्विपि संप्रसारणं, सांहितिकं पूर्वपदस्य दीर्घत्वं छान्दसं, कृदुत्तरपदस्य प्रकृतिस्वरत्वे " उदात्तयणो [१२]हल्पूर्वात् " (पा ६.१.१७४) इति विभक्तेरुदात्तत्वम् । पुनर्नविकोच्यते । ' वृष्टिवनिः ' इति । [v]ओषधीनां मध्ये [v]एषा वृष्टेः संविभक्तिः । "छन्दसि वनसन°" (पा ३.२.२७) इतीन्प्रत्ययः । गतमन्यत् ॥

इति द्वितीये चतुर्थे दशमोऽनुवाकः ॥

उन्नम्भयेति ॥ पुनर्नवायां होमं विधत्ते–' उन्नम्भय पृथिवीमिति वर्षाह्वां जुहोत्येषा वा ओषधीनां वृष्टिवनिस्तयैव वृष्टिमा च्यावयति ' इति ॥ [v]एषा [r]वै पुनर्नवैव [v]ओषधीनां सर्वासां मध्ये [v]वृष्टिवनिः वृष्टिभाक् वर्षतीं [१७]बहुलतरसमुद्भवात् ॥

य इति ॥ मन्त्रान्तरं विनियुङ्क्ते– ' ये देवा दिविभागा इति कृष्णाजिनमव धूनोतीम एवास्मै लोकाः प्रीता अभीष्टा भवन्ति ' इति ॥ [v]दिविभागाः अन्तरिक्षभागाः पृथिविभागा इत्युक्तत्वात् [v]लोकाः [v]प्रीताः सन्तो [१८]यजमानायाभीष्टप्रदा [v]भवन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके दशमोऽनुवाकः ॥

१०. लं–यथायजुर्वेदति यथा तत् । ११–११. तं१.तं२.मै.लं– ' वर्षाह्वां जुहोति ' नास्ति । १२. तं१.तं२.मै – ' हल्पूर्वात् ' नास्ति ।

१७. ड.शं.हो१–बहुलं तदुद्भवात् । १८. ड.हो१– यजमानाभीष्ट° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

सर्वाणि छन्दाꣳस्येतस्यामिष्ट्यामनूच्यानीत्याहुस्त्रिष्टुभो वा एतद्वीर्यं यत् ककुदुष्णिहा जगत्यै यदुष्णिहककुभावन्वाह तेनैव सर्वाणि छन्दाꣳस्यव रुन्द्धे गायत्री वा एषा यदुष्णिहा

सर्वाणि । छन्दाꣳसि । एतस्याम् । इष्ट्याम् । अनूच्यानीत्यनु - उच्यानि । इति । आहुः । त्रिष्टुभः । वै । एतत् । वीर्यम् । यत् । ककुत् । उष्णिहा । जगत्यै । यत् । उष्णिहककुभावित्युष्णिह - ककुभौ । अन्वाहेत्यनु - आह । तेन । एव । सर्वाणि । छन्दाꣳसि । अवेति । रुन्द्धे । ५

गायत्री । वै । एषा । यत् । उष्णिहा ।

सर्वाणि छन्दांसीत्यादि ॥ अस्ति त्रैधातवीयेष्टिः । तां विधास्यन् प्रथमं तद्गतान् कांश्चित् विशेषान् विदधाति । [V]एतस्याम् [V]इष्ट्यां सामिधेनीषु [V]सर्वाणि, [१-]नैकैव गायत्री अपि तु बहूनि[-१] [V]छन्दांसि [V]अनूच्यानि [V]इति यज्ञविदः [V]आहुः । वचेः छान्दसः क्विप् । तत् कथमित्याह– 'त्रिष्टुभः' इत्यादि । [V]ककुत् नाम [V]त्रिष्टुभः [V]वीर्यं वीर्यपरिणामः कार्य इत्यर्थः । [V]उष्णिहा १०
नाम जगत्या वीर्यम् । उष्णिक्पर्याय उष्णिहाशब्दः । तस्मादुष्णिहककुभोः [१]यत् अनुवचनं लोके समिध्यमानवतीसमिद्धवत्योर्मध्ये निधानं [V]तेन सर्वच्छन्दोऽवरोधः । प्रकृतिं गायत्रीं, वैकृत्यौ चोष्णिक्ककुभौ, तत्कारणे च त्रिष्टुब्जगत्याविति । तत्र " प्र सो अग्ने तवोतिभिः ", " प्र होत्रे पूर्व्यं वचः " (तैसं ३·२·११) इत्येते उष्णिक्ककुभौ वेदितव्ये । तत्र प्रथमा ककुप्, मध्यमस्य पादस्य द्वादशाक्षरत्वात् । द्वितीया परोष्णिक्, [२-]तृतीयस्य पादस्य द्वादशाक्षरत्वात्[-२] । अत्र १५
ककुदुष्णिहाविति वक्तव्ये उष्णिहककुभाविति विपर्यासश्छान्दसः ॥

गायत्री वा इत्यादि ॥ [V]गायत्री [V]वै [V]एषा[३] । इयमुष्णिक्त्वादुष्णिग्ग्रहणमेव कृतम् । तत्र चतुर्विंशत्यक्षरा गायत्री, अष्टाविंशत्यक्षरोष्णिक्, तत् कथमनयोरेकत्वमित्यत आह–' यानि ' इति ।

अनुवाके तु दशमे कारीरीष्टिः समापिता ॥

अथैकादशे त्रैधातवीयेष्टिर्विधातव्या[१] ॥ २०

**सर्वाणीति ॥ तत्राऽऽदौ सामिधेनीषु द्वे धाय्ये विधत्ते–' सर्वाणि छन्दाꣳस्येतस्यामिष्ट्यामनूच्यानीत्याहुस्त्रिष्टुभो वा एतद्वीर्यं यत् ककुदुष्णिहा जगत्यै यदुष्णिहककुभावन्वाह तेनैव सर्वाणि छन्दाꣳस्यव रुन्द्धे' इति ॥ [V]एतस्यां त्रैधातवीयेष्टौ सामिधेनीरूपेण [V]सर्वाणि अपि [V]छन्दांसि अनुवक्तव्यानि [V]इति अभिज्ञाः [V]आहुः । तत् तु सर्वच्छन्दोनुवचनं कथं घटत इति तदुच्यते । ककुच्छन्दः [V]त्रिष्टुभः सारम्, उष्णिक्छन्दो जगत्याः सारम् । अतस्तदुभयानुवचनेन सर्वच्छन्दोनुवचनं संपद्यते । " प्र सो अग्ने तवोतिभिः " (तैसं २५
३·२·११) इत्येषा ककुत्, तदीयेषु त्रिषु पादेषु मध्यमपादस्य द्वादशाक्षरत्वात् । " प्र होत्रे पूर्व्यं वचः " (तैसं ३·२·११) इत्येषोष्णिक्, तदीयेषु त्रिषु पादेष्वन्तिमपादस्य द्वादशाक्षरत्वात् ॥**

१–१. तं१.तं२.मै.लं – 'नैकैव गायत्री अपि तु बहूनि' नास्ति । २. मै४– वीर्यवत् ।
३–३. तं१.तं२.लं– 'तृतीयस्य पादस्य..... गायत्री वै एषा' नास्ति ।

१. अ.आ.उ.पा.हो१– °र्विधीयते । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यानि चत्वार्यध्यक्षराणि चतुष्पाद एव ते पशवो यथा पुरोडाशे पुरोडाशोऽध्येवमेव तद्यदृच्यध्यक्षराणि यज्ञगत्या (१) परिदध्यादन्तं यज्ञं गमयेत् त्रिष्टुभा परि दधाती-

यानि । चत्वारि । अधीति । अक्षराणि । चतुष्पाद् इति चतुः-पादः । एव । ते । पशवः । यथा । पुरोडाशे । पुरोडाशः । अधीति । एवम् । एव । तत् । यत् । ऋचि । अधीति । अक्षराणि । यत् । जगत्या (१) । परिदध्यादिति परि-दध्यात् । अन्तम् । यज्ञम् । गमयेत् । त्रिष्टुभा । परीति । दधाति ।

अयमभिप्रायः—गायत्र्या एव पशुसाधनं रूपं यदुष्णिङ्नाम, तस्मात् ᵛयानि ᵛचत्वारि ᵛअक्षराणि अभ्यधिकानि तानि ᵛचतुष्पादः ᵛपशवः । तद्धेतुत्वात् ताच्छब्द्यम् । तस्मादुष्णिक्प्रवेशव्याजेन गायत्रीमेव प्रकृतिं पशुसाधनभूतां कुर्म इति ॥

एवं सर्वच्छन्दोऽवरोधहेतुत्वेन पशुलाभहेतुत्वेन च उष्णिक्ककुभोः प्रवेशं स्तुत्वा इदानीम् इष्टिस्वभावसुलभं [४]दुर्बोधं चेदमक्षराधिक्यमिति दृष्टान्तेन दर्शयति—'यथा' इति ॥ 'उत्तर उत्तरो ज्यायान् भवति' इति ᵛयथा ᵛपुरोडाशे प्रथमे ᵛअधि उपरि मध्यमः, तस्मिन्नपि तृतीयो भवति, ᵛएवम् ᵛएव एतत् द्रष्टव्यं, ᵛयत् ᵛऋचि गायत्र्याम् ᵛअधि उपरि चत्वारि ᵛअक्षराणि भवन्ति । यद्वा—पुरोडाशे पुरोडाशान्तरमधिकप्रमाणं तिष्ठति तद्वदिदमृचि गायत्र्या अधिकाक्षरा उष्णिक्त्रिष्टुबिति ॥

यज्ञगत्येति ॥ उक्तं जगत्या वीर्यमुष्णिगिति । उक्तं च 'गायत्री वा एषा यदुष्णिहा' इति । तस्मादेवं जगतीभाववत्या "आ जुहोत" (तैब्रा ३·५·२) इति गायत्र्या परिधानं यज्ञस्य मध्ये अन्तगमनाय [५]विनाशाय स्यात्, जगत्याः छन्दसामन्त्यत्वात् । यद्वा—गायत्र्येव

गायत्रीति ॥ एतदुभयवचनेन त्रिष्टुब्जगत्योर्लाभेऽपि गायत्र्या अलाभशङ्कां वारयितुमन्तर्भावं दर्शयति—'गायत्री वा एषा यदुष्णिहा यानि चत्वार्यध्यक्षराणि चतुष्पाद एव ते पशवो यथा पुरोडाशे पुरोडाशोऽध्येवमेव तद्यदृच्यध्यक्षराणि' इति ॥ उष्णिक्च्छन्दसोऽष्टाविंशत्यक्षराणि । तत्र [२]चतुर्विंशत्यक्षरैर्गायत्र्यन्तर्भूता । ᵛयानि अधिकाक्षराणि ᵛचत्वारि सन्ति ᵛते [३]चतुष्पात्पशुस्वरूपा एव । पूर्वस्मिन् प्रपाठके ᵛत्रिधातविष्टौ (तैसं २·३·६) पुरोडाशस्योपरि पुरोडाशान्तरस्थापनं विहितम् । एवमत्रापि विधास्यते । एवं सति ᵛयथा ᵛपुरोडाशे ᵛअधि उपरि अन्यः ᵛपुरोडाशः स्थाप्यते, ᵛएवम् ᵛएव उष्णिक्छन्दस्कायाम् ᵛऋचि गायत्रीछन्दोक्षरसंख्याया अधिकाक्षराणि चत्वारीति ᵛयत् ᵛतत् अवगन्तव्यम् । अतः पुरोडाशसाम्यायाक्षराधिक्यं [५]युक्तमित्यभिप्रायः ॥

यदिति ॥ [६]प्रकृतौ—'आ जुहोत दुवस्यत' (तैब्रा ३·५·२) इति गायत्री सामिधेनीषु परिधानीया भवति । तामत्रापवदितुं[६] त्रिष्टुभं विधत्ते—'यज्जगत्या परिदध्यादन्तं यज्ञं

४. मै.लं—'दुर्बोधं' नास्ति । ५. मै.लं—नाशाय ।

२. ड.हो१—चतुर्विंशैर° । ३. ड.हो१—°त्पशुरूपाः । ४. इ—त्रैधातवीयेष्टौ । ५. हो१—उक्तमि° । ६-६. अ.आ.उ.क.जो.ना.पा.हा.हो१—प्रकृतौ द्वे ऋचावुक्ते आ जुहोत दुवस्यतेति गायत्री सामिधेनी त्वं वरुण इति जगती भवति, ते अपवदितुं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

-न्द्रियं वै वीर्यं त्रिष्टुगिन्द्रिय एव वीर्यं यज्ञं प्रति ष्ठापयति नान्तं गमयत्यग्ने त्री ते वजिना त्री षधस्थेति त्रिवत्या परि दधाति सरूपत्वाय सर्वो वा एष यज्ञो यत् त्रैधातवीयं कामायकामाय प्र युज्यते सर्वेभ्यो हि कामेभ्यो यज्ञः प्रयुज्यते

इन्द्रियम्। वै। वीर्यम्। त्रिष्टुक्। इन्द्रिये। एव। वीर्ये। यज्ञम्। प्रतीति। स्थापयति। न। अन्तम्। गमयति। अग्ने। त्री। ते। वाजिना। त्री। सधस्थेति सध-स्था। इति। त्रिवत्येति त्रि-वत्या। परीति। दधाति। सरूपत्वायेति सरूप-त्वाय। सर्वः। वै। एषः। यज्ञः। यत्। त्रैधातवीयम्। कामायकामायेति कामाय-कामाय। प्रेति। युज्यते। सर्वेभ्यः। हि। कामेभ्यः। यज्ञः। प्रयुज्यत इति प्र-युज्यते।

वर्धमानाक्षरा उष्णिहादिभावमापद्यमाना उपर्युपरि गच्छतीति [6]जगतीत्युच्यते। त्रिष्टुगिति। "अग्ने त्री ते वाजिना" इत्येतया। त्रिवत्येति। त्रिष्टुबन्ताद्वैलक्षण्यमस्यां दर्शयति। "छन्दसीरः" (पा ८.२.१५) इति मतुपो वत्वम्। सरूपत्वायेति। त्रित्वान्वयात् त्रैधातवीयं सारूप्यमिति॥

सर्वो वा इत्यादि॥ त्रैधातवीयाख्यं [v]यत् इदं कर्म [v]एषः [v]सर्वः [v]यज्ञः सर्वयज्ञतुल्य इति यावत्। 'यत् त्रिः प्रायच्छत् त्रिः प्रत्यगृह्णात्' इति त्रिषु लोकेषु [7]भवः इन्द्राविष्णवोः संबन्धी

गमयेत् त्रिष्टुभा परि दधातीन्द्रियं वै वीर्यं त्रिष्टुगिन्द्रिय एव वीर्ये यज्ञं प्रति ष्ठापयति नान्तं गमयति' इति॥ उष्णिक्छन्दसो जगतीवीर्यत्वेन निरूपितत्वात् तदेवात्र जगतीशब्देन विवक्ष्यते। तस्मिंश्चोष्णिक्छन्दसि गायत्र्यन्तर्भावस्योक्तत्वाल्लक्षितलक्षणया जगतीशब्दो गायत्रीं ब्रूते। तथा सति प्रकृतिवद्गायत्र्या परिधानं यत् तदेवात्र जगतीपरिधानमिति [v]विवक्षितत्वात् तत्र [8]बाध इत्युच्यते[8]। अथवा शाखान्तरानुसारेण मुख्ययैव जगत्याऽत्र प्राप्तं परिधानं दृष्यते। तत्परिधाने हि [r]यज्ञं नाशितवान् भवति। [s]अथ [r]त्रिष्टुभा परिदध्यात् सामिधेनीः समापयेदित्यर्थः। त्रिष्टुभ इन्द्रियसामर्थ्यरूपत्वात् यज्ञं सामर्थ्ये प्रतिष्ठापितवान् भवति। ततो यज्ञं [r]न नाशयति॥

अग्न इति॥ तां त्रिष्टुभं दर्शयति– 'अग्ने त्री ते वाजिना त्री षधस्थेति त्रिवत्या परि दधाति सरूपत्वाय' इति॥ त्रिशब्दा बहवो यस्यां सन्तीति त्रिवती। सेयं तृतीयकाण्डस्य द्वितीयप्रपाठके समाम्नास्यमानत्वात् तत्रैव (तैसं ३.२.११) व्याख्यास्यते॥ [10]यथाऽस्यामृचि त्रिशब्दस्तथा त्रैधातवीय-कर्मनामन्यपि त्रिशब्दोऽस्तीति सारूप्यम्॥

सर्व इति॥ सर्वकामसाधनत्वेन यागं विधत्ते–'सर्वो वा एष यज्ञो यत् त्रैधातवीयं कामायकामाय प्र युज्यते सर्वेभ्यो हि कामेभ्यो यज्ञः प्रयुज्यते' इति॥ सर्वेषु यज्ञेषु यानि छन्दांसि प्रयोक्तव्यानि तानि सर्वाण्यत्रोष्णिक्कुद्धयामेवावरुध्यानीत्युक्तम्। अतोऽयं सर्वयज्ञस्वरूपत्वाद्यस्य यः कामोऽस्ति तेन तदर्थं प्रयोक्तव्यः। यस्माज्ज्योतिष्टोमादिरखिलः [v]यज्ञः सर्वकामार्थं [r]प्रयुज्यते तस्मात् सर्वयज्ञस्वरूपस्यास्य सर्वकामार्थत्वं युक्तम्॥

६. तं२– 'जगती' नास्ति। ७. तं१.तं२.लं– भवतः; मै भवतः [वतोः]।

७. इ–वर्णितत्वात्। ८–८. हो१–दोषः उच्यते। ९. ड–अतः। १०. अ.उ.पा–यथान्यामृचि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रैधातवीयेन यजेताभिचरन्त्सर्वो वा (२) एष यज्ञो यत् त्रैधातवीयꣳ सर्वेणैवैनं यज्ञेनाभि चरति स्तृणुत एवैनमेतयैव यजेताभिचर्यमाणः सर्वो वा एष यज्ञो यत् त्रैधातवीयꣳ सर्वेणैव यज्ञेन यजते नैनमभिचरन्त्स्तृणुत एतयैव यजेत सहस्रेण यक्ष्यमाणः प्रजातमेवैनद्ददात्ये-

त्रैधातवीयेन । यजेत । अभिचरन्नित्यभि - चरन् । सर्वैः । वै (२) । एषः । यज्ञः । यत् । त्रैधातवीयम् । सर्वेण । एव । एनम् । यज्ञेन । अभीति । चरति । स्तृणुते । एव । एनम् । एतया । एव । यजेत । अभिचर्यमाण इत्यभि - चर्यमाणः । सर्वैः । वै । एषः । यज्ञः । यत् । त्रैधातवीयम् । सर्वेण । एव । यज्ञेन । यजते । न । एनम् । अभिचरन्नित्यभि - चरन् । स्तृणुते । एतया । एव । यजेत । सहस्रेण । यक्ष्यमाणः । प्रजातमिति प्र - जातम् । एव । एनत् । ददाति ।

वीर्यविशेषः त्रैधातवः । तत्प्राप्तिहेतुत्वेन तत्संबन्धि कर्म [v]त्रैधातवीयम् इष्टिलक्षणम् । [v]कामायकामाय सर्वस्मै कामाय स्वर्गपशुप्रजादिकामाय [v]प्र [v]युज्यते । हेतुमाह–' सर्वेभ्यः हि ' इति । सामान्य-विवक्षयैकवचनम् । सर्वकामसंपत्तिः यज्ञैर्भवति । [८]अयं च यागः सर्वयज्ञात्मा, तस्मात् [v]सर्वेभ्यः [९v]कामेभ्यः प्रयोक्तव्य इति ॥

सर्वेणैवैनमिति ॥ अस्य [१०]सर्वयज्ञात्मकत्वात् अनेन यजमानः [v]सर्वेण [११]अभिचारिकेण [v]यज्ञेन [v]एनम् अभिचरितव्यम् [v]अभि [v]चरति । ततः [v]एनं [v]स्तृणुते हिनस्ति [v]एव । [१२]सर्वेणै-वेति । अस्य सर्वयज्ञात्मकत्वात् । [v]सर्वेण अभिचारादिदोषनिघातार्थेनापि [१३v]यज्ञेन अयं यजमानो भवति । [१४]ततः [v]एनम् [v]अभिचरन् [v]न [v]स्तृणुते ॥

प्रजातमिति ॥ [v]प्रजातं संतानवत् अविच्छिन्नम् [v]एव सहस्रं [v]ददाति । उत्तरोत्तर-प्रभूतमिति यावत् । सर्वयज्ञत्वेन अस्य धनाभिवृद्धिहेतुत्वात् । ईजान इति । इष्टवान् [v]सहस्रेण

त्रैधातवीयेनेति ॥ सामान्येन सर्वकामार्थत्वं विधाय विशेषतोऽभिचारहेतुत्वं विधत्ते–' त्रैधात-वीयेन यजेताभिचरन्त्सर्वो वा एष यज्ञो यत् त्रैधातवीयꣳ सर्वेणैवैनं यज्ञेनाभि चरति स्तृणुत एवैनम् ' इति ॥

एतयेति ॥ अभिचारपरिहारार्थत्वं विधत्ते– ' एतयैव यजेताभिचर्यमाणः सर्वो वा एष यज्ञो यत् त्रैधातवीयꣳ सर्वेणैव यज्ञेन यजते नैनमभिचरन्त्स्तृणुते ' इति ॥ [v]एतया [v]एव त्रैधातवीयेष्टयैव ॥

एतयेति ॥ सहस्रदक्षिणाकस्य [११]ज्योतिर्विश्वज्योतिरसोर्याममहाव्रतादेरनुष्ठानसिद्धिं प्रति [१२]साधनत्वं विधत्ते– ' एतयैव यजेत सहस्रेण यक्ष्यमाणः प्रजातमेवैनद्ददाति ' इति ॥ यस्तु सहस्रदक्षिणा-

८. तं१.तं२.मै.लं– यः । ९. तं१.तं२– ' कामेभ्यः ' नास्ति । १०. तं१.तं२– यज्ञ (?) यज्ञा° ११. तं१.तं२– अभिचारिणा । १२. मै४– सर्वेणैव वेति । १३. तं१.तं२– यज्ञः । १४. तं१.तं२.लं–ते ।

११. इ–सर्वज्योति° । १२. ड.हो१– साधनम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

-तयैव यजेत सहस्रेणेजानोऽन्तं वा एष पशूनां गच्छति (३) यः सहस्रेण यजते प्रजापतिः खलु वै पशूनसृजत ताꣳस्त्रैधातवीयेनैवासृजत य एवं विद्वाꣳस्त्रैधातवीयेन पशुकामो यजते यस्मादेव योनेः प्रजापतिः पशूनसृजत तस्मादेवैनान्त्सृजत उपैनमुत्तरꣳ सहस्रं नमति देवताभ्यो वा एष आ वृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत ५

एतया । एव । यजेत । सहस्रेण । ईजानः । अन्तम् । वै । एषः । पशूनाम् । गच्छति (३) । यः । सहस्रेण । यजते । प्रजापतिरिति प्रजा-पतिः । खलु । वै । पशून् । असृजत । तान् । त्रैधातवीयेन । एव । असृजत । यः । एवम् । विद्वान् । त्रैधातवीयेन । पशुकाम इति पशु-कामः । यजते । यस्मात् । एव । योनेः । प्रजापतिरिति प्रजा-पतिः । पशून् । असृजत । तस्मात् । एव । एनान् । सृजते । उपेति । एनम् । उत्तरमित्युत्-तरम् । सहस्रम् । नमति । देवताभ्यः । १० वै । एषः । एति । वृश्च्यते । यः । यक्ष्ये । इति । उक्त्वा । न । यजते । त्रैधातवीयेन । यजेत ।

[v]पशूनाम् [v]अन्तं समाप्तिं [v]गच्छति अपशुरेव स्यात् । यस्मादिति । [15]त्रैधातवीयेनोत्सृजते । उपैनमुत्तरमिति । यागप्रभावात् सहस्रान्तरम् [v]एनम् [v]उप [v]नमति ॥

यो यक्ष्य इत्युक्त्वेति ॥ यज्ञार्थं कृतसंकल्पः तेन यज्ञेन अनिष्टवानपि सर्वयज्ञात्मकेनानेन यजमानः तेनापीष्टवान् भवति । तस्मादयागदोषाभावात् [v]देवताभ्यः [v]न [v]वृश्च्यते न [15]हीयते ॥ १५

केन यागेन [13]यष्टुमसमर्थः सन्नहं तेन यक्ष्य इति कामयते सोऽयम् [v]एतया [14]-इष्ट्या [v]यजेत[14] । पश्चात् तत्र [v]प्रजातं प्रभूतं बहुविधं सहस्रं दातुं शक्तो भवत्येव । ततस्तादृशकर्मानुष्ठानं सिध्यति ॥

एतयेति ॥ अथ सहस्रदक्षिणाकेन यागेनेष्टवत [15]उपरितनबहुविधयज्ञसाधनद्रव्यार्थं विधत्ते- ' एतयैव यजेत सहस्रेणेजानोऽन्तं वा एष पशूनां गच्छति यः सहस्रेण यजते प्रजापतिः खलु वै पशूनसृजत ताꣳस्त्रैधातवीयेनैवासृजत य एवं विद्वाꣳस्त्रैधातवीयेन पशुकामो यजते यस्मादेव योनेः प्रजापतिः १० पशूनसृजत तस्मादेवैनान्त्सृजत उपैनमुत्तरꣳ सहस्रं नमति ' इति ॥ [v]यः पुमान् गोसहस्रदक्षिणाकेन यागेनेष्टवान् भवति स [v]एषः [v]पशूनाम् अवसानं प्राप्नोति । तेनोत्तरक्रतूननुष्ठातुमसमर्थो भवति । अतस्तत्सामर्थ्याय [v]पशुकामः सन् प्रजापतिवत् [16]एतया इष्ट्वा पशुयोनेरस्मादेव यागात् पशून् प्राप्नोति । [17-]तत उत्तरक्रतुषु[-17] दातव्यं गोसहस्रम् [v]एनं यजमानं प्राप्नोति ॥

देवताभ्य इति ॥ यज्ञं संकल्प्याननुष्ठातुः संकल्पभ्रंशपरिहारार्थं विधत्ते- ' देवताभ्यो वा एष १५ आ वृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत सर्वो वा एष यज्ञो यत् त्रैधातवीयꣳ सर्वेणैव यज्ञेन यजते न देवताभ्य आ वृश्च्यते ' इति ॥ [18]आवश्चनं सर्वथा विच्छेदो देवताद्रोह इति यावत् ॥

१५. मै४- त्रैधातवीयाख्यात । १६. तं१.तं२.पं२.लं- स्थीयते ।

१३. इ-°मशक्तः । १४-१४. शृं.हो१- इष्ट्वा । १५. ड.हो१- ' उपरितनबहुविध° ' नास्ति । १६. आ.ड- एतेन । १७-१७. आ- तदुत्तर° । १८. अ.आ.उ.क.जो.ड.ना.पा.शृं.हा.हो१- आवृश्चनं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वो वा एष यज्ञो (४) यत् त्रैधातवीयꣳ सर्वेणैव यज्ञेन यजते न देवताभ्य आ वृश्च्यते द्वादशकपालः पुरोडाशो भवति ते त्रयश्चतुष्कपालास्त्रिष्षमृद्धत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्या उत्तरउत्तरो ज्यायान् भवत्येवमिव हीमे लोका यवमयो मध्य एतद्वा अन्तरिक्षस्य रूपꣳ समृद्ध्यै

५ सर्वः। वै। एषः। यज्ञः (४)। यत्। त्रैधातवीयम्। सर्वेण। एव। यज्ञेन। यजते। न। देवताभ्यः। एति। वृश्च्यते। द्वादशकपाल इति द्वादश-कपालः। पुरोडाशः। भवति। ते। त्रयः। चतुष्कपाला इति चतुः-कपालाः। त्रिष्षमृद्धत्वायेति त्रिष्षमृद्ध-त्वाय। त्रयः। पुरोडाशाः। भवन्ति। त्रयः। इमे। लोकाः। एषाम्। लोकानाम्। आप्त्यै। उत्तरउत्तर इत्युत्तरः-उत्तरः। ज्यायान्। भवति। एवम्। इव। हि। इमे। लोकाः। यवमय इति यव-मयः। मध्ये। एतत्।
१० वै। अन्तरिक्षस्य। रूपम्। समृद्ध्या इति सम्-ऋद्ध्यै।

द्वादशकपाल इति॥ चतुरो मुष्टीन् व्रीहीणां निरुप्य चतुरो यवानां निरुप्य पुनश्चतुरो व्रीहीणां निर्वपेत्। गार्हपत्ये द्वादशकपालान्युपदधाति। सर्वत्रेन्द्राविष्णुभ्यामेव निर्वापादि। ते त्रय इति। अवयुत्य संख्यास्तुतिः। त्रिष्षमृद्धत्वं तिसृभिरावृत्तिभिर्योगः। त्रैधातवीयानुरूपत्वम्। त्रय इति। उपर्युपर्यवस्थिताः। [v]उत्तरउत्तरः पूर्वस्मात् पूर्वस्मात् [v]ज्यायान् वृद्धतरः। [v]इमे खलु
१५ [v]लोकाः पृथिव्यादय उत्तरमुत्तरं ज्यायांसः। यवमय इति। "द्वयचश्छन्दसि" (पा ४·३·१५०) इति विकारे मयट्। एतद्वा इति। यौतिः [१७]पृथग्भावे। [१८-]पृथग्भूतं वा सर्वपदार्थेभ्योऽन्तरिक्षम्[-१८]।

द्वादशकपाल इति॥ अस्मिन् कर्मणि द्रव्यं विधत्ते- 'द्वादशकपालः पुरोडाशो भवति ते त्रयश्चतुष्कपालास्त्रिष्षमृद्धत्वाय' इति॥ समूहाकारेण [१९]गणनायां द्वादशकपालत्वेऽप्यनुष्ठाने त्रिसंख्याकाः [v]चतुष्कपालाः कर्तव्याः। [२०]तया त्रिसंख्यया यजमानस्य त्रिवारं समृद्धत्वं संपद्यते॥

२० **त्रय इति॥** पुरोडाशसंख्यां प्रशंसति- 'त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्यै' इति॥

उत्तर उत्तर इति॥ [२१]पूर्वप्रपाठकोक्तत्रिधातावित्र (तैसं २·३·६) प्रमाणवैषम्यं विधत्ते- 'उत्तरउत्तरो ज्यायान् भवत्येवमिव हीमे लोकाः' इति॥

यवमय इति॥ चोदकप्राप्तं व्रीहिमयत्वमपवदितुं [२२]यवमयं विधत्ते- 'यवमयो मध्य एतद्वा
२५ अन्तरिक्षस्य रूपꣳ समृद्ध्यै' इति॥ भूलोकवर्तिनो मनुष्याः स्वर्गलोकवर्तिनः सूर्यचन्द्रादयश्च विस्पष्टम्

१७. तं१.तं२.मै.लं- पृथग्भावः। १८-१८. तं१.तं२.मै.लं- पृथग्भूतश्च सर्वपदार्थोऽन्तरिक्षस्य।

१९. हो१- गणनया। २०. आ.क.ड.शृं.हो१- तथा। २१. इ- एवं प्रपा°; हा- °त्रिधातौ च। २२. ड.शृं- 'यवमयं' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

सर्वेषामभिगमयन्नव द्यत्यछम्बट्कारꣳ हिरण्यं ददाति तेज एवाव(५)व रुन्द्धे तार्प्यं ददाति पशूनेवाव रुन्द्धे धेनुं ददात्याशिष एवाव रुन्द्धे साम्नो वा

सर्वेषाम् । अभिगमयन्नित्यभि - गमयन् । अवेति । द्यति । अछम्बट्कारमित्यछम्बट् - कारम् । हिरण्यम् । ददाति । तेजः । एव (५) । अवेति । रुन्द्धे । तार्प्यम् । ददाति । पशून् । एव । अवेति । रुन्द्धे । धेनुम् । ददाति । आशिष इत्या - शिषः । एव । अवेति । रुन्द्धे । साम्नः । वै । ५

सर्वेषामभिगमयन्नित्यादि । व्याख्यातम् (तैसं २·३·६) ॥

हिरण्यमिति ॥ अन्वाहार्यमासाद्य सहस्रं [v]हिरण्यं [v]ददाति । तार्प्यं घृताक्तं वासः, तत् घृतसंबन्धात् पशुलाभहेतुः । धेनुः प्रत्यग्रप्रसवा गौः । [१९-]सा प्रीणनहेतुत्वात्[-१९] तत आशिषां लाभः । साम्नो वा इति । तस्य तैजसत्वात् " सर्वं तेजः सामरूप्यम् " (तैब्रा ३·१२·९)

उपलभ्यन्त इत्यस्ति तयोरेकविधत्वम् । अन्तरिक्षवर्तिनस्तु यक्षगन्धर्वादयो नोपलभ्यन्त इति वैलक्षण्यम् । १०
एवं [२३]यवमयस्य [२४]इतरवैलक्षण्यादन्तरिक्षरूपत्वम् । तच्च [r२५]समृद्ध्यै संपद्यते ॥

सर्वेषामिति ॥ [१६]त्रिधातुवत् (तैसं २·३·६) त्रिष्वपि पुरोडाशेषु सकृदेव हस्तस्पर्शेनावदानं विधत्ते— ' सर्वेषामभिगमयन्नव द्यत्यछम्बट्कारम् ' इति ॥

हिरण्यमिति ॥ यदुक्तं सूत्रकारेण—" हिरण्यं तार्प्यं धेनुरिति दक्षिणा " (आपश्रौ १९·२७·२१) इति तदेतद्विधत्ते —' हिरण्यं ददाति तेज एवाव रुन्द्धे तार्प्यं ददाति पशूनेवाव रुन्द्धे धेनुं ददात्याशिष १५
एवाव रुन्द्धे साम्नो वा एष वर्णो यद्धिरण्यं यजुषां तार्प्यमुक्थामदानां धेनुरेतानेव सर्वान् वर्णानव रुन्द्धे ' इति ॥ हिरण्यस्य [१७]तेजस्वित्वात् तद्दानेन तेजःप्राप्तिः । तार्प्यस्य [२८]घृताक्तवस्त्रत्वात् तद्दानेन पशुप्राप्तिः । धेनोः कामधेनुत्वसाम्यात् तद्दानेनाऽऽशिषां प्राप्तिः । " सर्वं तेजः सामरूप्यꣳ ह शश्वत् " (तैब्रा ३·१२·९) इत्यामनानाद्धिरण्यस्य सामवर्णत्वम् । " यजुर्वैदं क्षत्रियस्याऽऽहुर्योनिम् " (तैब्रा ३·१२·९) इत्यामनातत्वात्, तार्प्यस्य च राजसूये *क्षत्रियेण परिहितत्वादीदृशं संबन्धमभिप्रेत्य तार्प्यं यजुषां [r]वर्णः स्वरूपमित्युच्यते । २०

१९–१९. मै– संप्रीणनहेतुत्वात् ।

२३. इ – यवमानस्य । २४. अ – वैलक्षण्यात्; उ.पा – इह वैलक्षण्यात् । २५. हा– समृद्ध्यैव । २६. हो१– त्रिधाताविव । २७. ड– तेजस्त्वात्° । २८. हो१– °वस्तुत्वात्° । *[द्र. तैब्रा १·७·६–" क्षत्रस्योल्बमसि क्षत्रस्य योनिरसीति तार्प्यं चोष्णीषं च प्रयच्छति सयोनित्वाय "; आपश्रौ १८·१४·१] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एष वर्णो यद्धिरण्यं यजुषां तार्प्यमुक्थामदानां धेनुरेतानेव
सर्वान् वर्णानव रुन्द्धे ॥ ११ ॥

[जगत्याऽभिचरन्त्सर्वो वै गच्छति यज्ञस्तेज एव त्रिश्च ।]

एषः । वर्णः । यत् । हिरण्यम् । यजुषाम् । तार्प्यम् । उक्थामदानामित्युक्थ-मदानाम् । धेनुः ।
५ एतान् । एव । सर्वान् । वर्णान् । अवेति । रुन्द्धे ॥ ११ ॥

[मैसं २·४·४,५; कासं १२·४]

इति दर्शनाच्च । [v]यजुषां वर्णः [v]तार्प्यम्, द्वयोः क्षत्रसंबन्धित्वात् । क्षत्रं द्वितीयो वर्णः, [v]धेनुः च [v]उक्थामदानां शस्त्राणामृचामित्यर्थः । तासां वर्णो धेनुः, [२०]प्रीणनहेतुत्वात् ॥

इति द्वितीये चतुर्थे एकादशोऽनुवाकः ॥

१० उक्थैः शस्त्रैर्देवतानां जायमाना मदा यास्वृक्षु ता ऋच उक्थामदास्तासां नवप्रसूतधेनुवत् [२९]हर्षहेतुत्वात् धेन्वा ऋग्वर्णत्वम् । उक्तद्रव्यत्रयदानेनोक्तान् [r]वर्णान् प्राप्नोति ॥

अत्र मीमांसा ॥ षष्ठाध्यायस्य द्वितीयपादे चिन्तितम्—

" असमाप्यं समाप्यं वा [३०]काम्यं [३१]-कामे निवर्तिते-[३१] ।
आद्यः प्रयोजनाभावादन्त्यो [३२]निन्दादिसंश्रवात् " ॥ (जैन्या ६·२·४) ॥

१५ " चित्रया यजेत पशुकामः " (तैसं २·४·६), " कारीर्या वृष्टिकामो यजेत " (आपश्रौ १९·२५·१६) इत्यादिषु कामप्रेरितेन पुरुषेण [३३]-कर्मोपक्रान्तम् । तस्य-[३३] च समाप्तेः प्रागेव केनचिन्निमित्तेन तत्फलप्राप्तौ दोषदर्शनेन वा कामो निवर्तते तदानीं कर्मानुष्ठाने प्रयोजनाभावान्न समापनीयमिति चेत् । मैवम् । प्रक्रान्तस्य कर्मणोऽसमाप्तौ निन्दाप्रायश्चित्तयोः श्रवणात् । 'देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत " इति [३४]यदुभयं श्रुतं, तस्मात्समापनीयम् ॥

२० इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठक एकादशोऽनुवाकः ॥

२०. तं१.तं२.पं२.लं– प्रीणनत्वात् ।

२९. आ.ड– वर्षणहेतु° । ३०. डे– काम्ये । ३१. अ.उ.पा– कामे निवर्ततः; जो.हा– कर्मे (?) निवर्ततः ; ड– कामे निवर्तते । ३२. अ.ना–°संश्रयात् । ३३. ड– कर्मोपक्रान्तस्य । ३४. आ.
२५ ड.शृं.हो१– तदुभयं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

त्वष्टा हतपुत्रो वीन्द्रꣳ सोममाऽऽहरत् तस्मिन्निन्द्रे उपहवमैच्छत तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टाऽऽहवनीयमुप प्रावर्तयत् स्वाहेन्द्रशत्रुर्वर्धस्वेति स यावदूर्ध्वः

त्वष्टा । हतपुत्र इति हत - पुत्रः । वीन्द्रमिति वि - इन्द्रम् । सोमम् । एति । अहरत् । तस्मिन् । इन्द्रे । उपहवमित्युप - हवम् । ऐच्छत । तम् । न । उपेति । अह्वयत । पुत्रम् । मे । अवधीः । इति । सः । यज्ञवेशसमिति यज्ञ - वेशसम् । कृत्वा । प्रासहेति प्र - सहा । सोमम् । अपिबत् । तस्य । यत् । अत्यशिष्यतेत्यति - अशिष्यत । तत् । त्वष्टा । आहवनीयमित्या - हवनीयम् । उप । प्रेति । अवर्तयत् । स्वाहा । इन्द्रशत्रुरितीन्द्र - शत्रुः । वर्धस्व । इति । सः । यावत् । ऊर्ध्वः ।

त्वष्टा हतपुत्र इत्यादि ॥ इन्द्रेण [V]हतपुत्रः [V]त्वष्टा इन्द्रविरहितं [V]सोमम् [V]आ [V]अहरत् । [१-]तत एवैनं क्रुद्धः इन्द्रं यज्ञे [V]न [V]उप [V]अह्वयत[-१] । अथ [V]सः इन्द्रः यज्ञहिंसां [V]कृत्वा [V]प्रासहा [२]प्रसह्य [V]सोमम् [V]अपिबत् तेनाननुज्ञातो बलेनैवापिबत् । सहतेः क्विपि "नहिवृतिवृषि°" (पा ६·३·११६) इति पूर्वपदस्य दीर्घत्वम् । अथ [V]त्वष्टा [३]इन्द्रपीतो यः तं सोमं[-३] गृहीत्वा तेन [V]आहवनीयम् उपेत्य अग्निं [V]प्र [V]अवर्तयत् उददीपयत् उदीर्णज्वालमकरोत् । [४-]उत्थापना प्रवर्तना[-४] । यथा—"यत् प्रावर्तत । तत् प्रवर्ग्यस्य प्रवर्ग्यत्वम्" (तैआ ५·१) इति । [V]स्वाहा

[१]त्रैधातवीयतद्द्रव्ये एकादश उदीरते ॥

त्वष्टेति ॥ अथ द्वादशे तस्य [२]द्रव्यस्येन्द्राविष्णुदेवताकत्वं सहस्रदक्षिणां च विधास्यन्नादौ कर्मनाम्नि त्रिधातुत्वसंपादनायोपाख्यानं दर्शयति– 'त्वष्टा हतपुत्रो वीन्द्रꣳ सोममाऽहरत् तस्मिन्निन्द्र उपहवमैच्छत तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्' इति ॥ विश्वरूपनाम्नः त्वष्टृपुत्रस्येन्द्रेण [३]कृतो वध उपरितनप्रपाठकस्य प्रथमानुवाके स्पष्टीभविष्यति । सः च [V]हतपुत्रः [V]त्वष्टा कोपात् इन्द्ररहितं [४]सोमयागं कर्तुमुद्यतः । [V]तस्मिन् यागे मामाह्वयेत्येवम् [V]इन्द्रः अब्रवीत् । स तु [५]त्वष्टा [V]पुत्रं [V]मे [V]अवधीः इति [६]वदन् [V]तम् इन्द्रं [V]न [V]उपाह्वयत । [V]सः चेन्द्रो यज्ञस्य विघातं [V]कृत्वा बलात्कारेण [V]सोमम् [७V]अपिबत् ।

तस्येति ॥ अथ त्वष्टुरभिचारहोमेनेन्द्रवधहेतोः पुरुषस्योत्पत्तिं दर्शयति– 'तस्य यदत्यशिष्यत तत् त्वष्टाऽऽहवनीयमुप प्रावर्तयत् स्वाहेन्द्रशत्रुर्वर्धस्वेति स यावदूर्ध्वः पराविध्यति तावति स्वयमेव

१–१. तं१.तं२– तत एव क्षत्रं यज्ञे नोपाह्वयत; मै.लं–तत एव तं यज्ञे नोपाह्वयत । २. तं१– असह्यम्; तं२– प्रसह्य असह्यम्; मै४– 'प्रसह्य' नास्ति । ३–३. पं२– इन्द्रपीतशेषसोमम्; मै४– इन्द्रपीतं सोमम्; तं१.तं२.लं– इन्द्रपीतये तं सोमम् । ४–४. मै४– उत्थापनं प्रवर्तनाय ।

१. अ.उ.जो.ना.पा– त्रैधातवीया तद्द्रव्ये । २. अ.उ.क.जो.ना.पा.हा– द्रव्यस्य ऐन्द्राविष्णु°; इ– द्रव्यस्य ऐन्द्रादिविष्णु°; ड.थ्रं.हो१– इन्द्राविष्णू° । ३. अ.उ.ना.जो.पा.हा– वृत्रस्य कृतः । ४. अ– सोमपानं; हा– सोमयोगं । ५. आ–त्वष्टा तं । ६. आ–अवदत् । ७. अ.आ.उ.क.जो.ना.पा.हा–पीतवान् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परा॒विध्य॑ति ताव॑ति स्व॒यमे॒व व्य॑रमत॒ यदि॑ वा ताव॑त् प्र॒व॒ण(१)मासी॒द्यदि॑ वा ताव॒दध्य॒ग्नेरासी॑त् स सं॑भव॒न्नग्नी॑षोमा॒व॒भि सम॑भवत्

परा॒विध्य॒तीति॑ परा - विध्य॑ति । ताव॑ति । स्व॒यम् । ए॒व । वीति॑ । अ॒र॒म॒त॒ । यदि॑ । वा । ताव॑त् । प्र॒व॒णमिति॑ प्र - व॒नम् (१) । आसी॑त् । यदि॑ । वा । ताव॑त् । अधीति॑ । अ॒ग्नेः । आसी॑त् । सः ।
५ सं॑भव॒न्निति॑ सं - भव॑न् । अ॒ग्नीषो॒मा॒वित्य॒ग्नी - सोमौ॑ । अ॒भि । समिति॑ । अ॒भ॒व॒त् ।

---

[v]स्वाहुतमिदं तवास्तु, हे अग्ने, इन्द्रस्य शत्रुः शातयिता भूत्वा[६] [v]वर्धस्व [v]इति । एवमिन्द्रस्य विनाशमाशासानः ग्लानबुद्धिः [७]अग्निं प्रार्थयत । अथ [v]सः अग्निः तेनोद्दीपितः [v]यावत् उर्ध्वं गत्वा [v]परा [v]विध्यति [८]पराहन्ति इन्द्रं बाधते [v]तावति ततः प्रागेव अग्निः [v]स्वयम् [v]एव [v]वि [v]अरमत निवृत्तोद्योगोऽभवत् त्वष्टुरभिमतं नाकरोत् । केचिदाहुः— सोऽग्निस्त्वष्टा उद्दीपितो
१० यावदूर्ध्वः पराविध्यति यावत्याकाशप्रदेशे ऊर्ध्वो गत्वा पराविध्यति पराहन्ति तावति ततः प्रागेव तदीयोद्दीपनप्रयत्नानुरूपमुर्ध्वगतिं कृत्वैव अकस्माज्ज्वटिति स्वयमेव व्यरमत विलुप्ततेजा अभवत् । अयमभिप्रायः— इन्द्रस्य शत्रुः शातयिता नाशयिता अस्येत्यर्थः स्यात्, ततश्च इन्द्रेण

व्यरमत यदि वा तावत्प्रवणमासीद्यदि वा तावदध्यग्नेरासीत् स संभवन्नग्नीषोमावभि समभवत् ' इति । [r]तस्य इन्द्रेण बलात् पीतस्य सोमस्य संबन्धि [८-८]रसरूपं [r]यत् अल्पम्[८-८] [r]अत्यशिष्यत [r]तत् गृहीत्वा [r]त्वष्टा अभिचारं
१५ कर्तुम् [v]आहवनीयम् उपेत्य होमेन अग्निं वैर्युत्पादनाय प्रवृत्तमकरोत् । तस्मिन् होमे मन्त्रमिममुच्चारितवान् —' स्वाहेन्द्रशत्रुर्वर्धस्व ' इति । तस्यायमर्थः—हेऽग्ने, तुभ्यमिदं स्वाहुतं, पुनरिन्द्रस्य शातयिता कश्चित् पुरुषो भूत्वा [r]वर्धस्व इति । [v]सः अग्निर्यावता कालेन [९]ऊर्ध्वज्वालारूपो भूत्वा पराभूतमिन्द्रं कर्तुं [१०]विध्यामीत्युद्यतो भवति [r]तावति काले वह्निः [v]स्वयम् [r]एव विरतोऽभूत् ज्वाला शान्तेत्यर्थः । तत्र मन्त्रगतस्वरापराधो निमित्तम् । तथा हि, इन्द्रस्य शातयितेन्द्रशत्रुरिति विवक्षायां तत्पुरुषसमासस्यान्तोदात्तत्वेन भवितव्यम्।
२० आद्युदात्तस्त्वयं शब्दः प्रयुक्तः । स च [११]बहुव्रीहितां द्योतयति । "बहुव्रीहौ प्रकृत्या पूर्वपदम्" (पा ६·२·१) इति [१२]पूर्वपदाद्युदात्तत्वविधानात् । सति बहुव्रीहाविन्द्रः शातयिता यस्येत्यर्थो भवति । सोऽयं मन्त्रगतः स्वरापराधः । अपराधाभावे सत्युन्नतया ज्वालया यजमानस्य [१३]कार्यसिद्धिः सूचिता भवति । अपराधे त्ववनतया ज्वालया यजमानस्य कार्यसिद्ध्यभावः सूच्यते । [r]यदि अत्र [१४-कार्यसिद्ध्यभावसूचनाय [r]अग्नेः-१४] [v]प्रवणम् [१५]अवनतिरभूत् । [r]यदि [r]वा कार्यसिद्धेः सूचनार्थम् [१६-अग्नेः ज्वालाया[१६-] अधिका वृद्धिरभूत्।
२५ तद्यथा तथा वा तिष्ठतु । [r]सः त्वग्निः पुरुषरूपेण [r]संभवन् एव [r]अग्नीषोमौ अभिव्याप्य समुत्पन्नो

---

५. तं१.तं२.लं– हुतमिदं। ६. मै– 'भूत्वा' नास्ति। ७. तं१.तं२.मै.लं– 'अग्निं' नास्ति। ८. तं१.तं२.लं– 'पराहन्ति' नास्ति।

८–८. ड.हो१–बलरूपं यत्; शृं–रसरूपं यद्बलम्। ९. अ.उ.पा–ऊर्ध्वरूपो; इ–उर्ध्वज्वालनरूपो। १०. डा– आविध्या°। ११. ड.शृं– बहुव्रीहित्वम्। १२. ड– पूर्वपदोदात्तत्व°। १३. हो१– स्वकार्य°
३० १४–१४. अ.आ.उ.क.जो.ना.पा.हा– °सूचनायाग्निः; इ.शृं.हो१– सूचनयाग्नेः। १५. आ– अवनतमासीत्। १६–१६. आ– अग्निज्वालया।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

स इ॒षुमात्रमि॑षुमात्रं॒ विष्वङ्ङ॑वर्धत॒ स इ॒माँल्लो॒कान॑वृणोद्यदि॒माँल्लो॒कान॑वृणोत् तद्वृ॒त्रस्य॑ वृत्र॒त्वं

सः । इ॒षु॒मा॒त्रमि॒षु॒मा॒त्रमिती॑षुमात्रम् - इ॒षु॒मा॒त्रम् । विष्वङ् । अ॒व॒र्ध॒त॒ । सः । इ॒मान् । लो॒कान् । अ॒वृ॒णो॒त् । यत् । इ॒मान् । लो॒कान् । अ॒वृ॒णो॒त् । तत् । वृ॒त्रस्य॑ । वृ॒त्र॒त्वमिति॑ वृत्र-त्वम् ।

नाशयितव्यो वर्धस्वेति प्रार्थितत्वात् इन्द्रेण [९]नाशयितव्यः कश्चिदस्या आहुतेर्जायेतेति तदनुरूप- ५
मेव अग्निना चेष्टितम् [१०]आगामि इन्द्रेणास्य निपातनमिति सूचयितुमिति[१०]। एवं स्वरापराधेन मन्त्रप्रयोगोऽभिमतविघातहेतुरासीत्। यथोक्तम्—

" दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् " ॥ (द्र. पाशि ५२) इति ।

अयं च शत्रुशब्दः इदानीं क्रियाशब्दो द्रष्टव्यः । [११]शातयिता शत्रुः । जातिशब्दस्य बहुव्रीहिः, १०
तत्पुरुषवृत्त्योः फलविशेषाभावात्[११] । योऽस्माज्जायते [१२]यज्ञात्, इन्द्रस्य वा शातयिता, इन्द्रेण वा शातयितव्यः, तस्यैव उद्भवो [१३]वा स्यात् अभिभवो वा । अग्नेः किमायातमित्याह— ' यदि वा ' इत्यादि ॥ यजमानस्य [V]यदि [V]वा [V]प्रवणम् अवनतिर्भवति, [V]यदि [V]वा आधिक्यमुच्छ्रायो भवति तदानीम् अग्नेः एव [V]तावत् प्रवणं भवति, आधिक्यं चाग्नेरेव तावत् भवति । छान्दसो लुक् । " निपार्तयैद्यदिहन्त° " (पा ८·१·३०) इति निघाताभावः । स संभवन्नित्यादि । [V]सः १५
इन्द्रशत्रुत्वेन वर्धमानोऽग्निजन्मा पुरुषः [V]संभवन् विश्वं जगद्व्याप्नुवन् [V]अग्नीषोमौ [१५]अपि आक्रम्य[१४] [V]समभवत् अग्नीषोमावप्यभिव्याप्तवान् । [१५]प्रमाणेनातिरेकः संभवः[१५] । [१६]ततो वशीकृत्याग्नीषोमाविषुप्रमाणया वृद्ध्या वर्धमानः[१६] दिनेदिने [V]विष्वङ् नानागतिः [V]अवर्धत क्रमेण [V]इमान् सर्वानपि [V]लोकान् [V]अवृणोत व्याप्तवान् । ततश्च [१७]संवरणात् वृत्र इत्युच्यते[१७] ॥

होमाधाराङ्गाराभिमानिनमग्निदेवं हूयमानरसाभिमानिनं सोमदेवं च स्वमुखे प्रक्षिप्य उभयोः [१७]पार्श्वयोः २०
उर्ध्वाधोदन्तपङ्क्तिभ्यां दष्टवानित्यर्थः । एतच्चोपरितनप्रपाठके " तावब्रूतामभि संदष्टौ वै स्वः " (तैसं २·५·२) इत्यत्र स्पष्टीभविष्यति ॥

स इति ॥ एतस्योत्पन्नस्य पुरुषस्य वृत्रत्वं दर्शयति— ' स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमाँल्लोकानवृणोद्यदिमाँल्लोकानवृणोत् तद्वृत्रस्य वृत्रत्वम् ' इति ॥ इषुपातो यावति देशे भवति तावन्तं देशं सर्वासु दिक्षु व्याप्य प्रतिदिनमयम् [V]अवर्धत, तेन सर्वलोकावरणादस्य [V]वृत्रत्वम् ॥ २५

९. मै४—' नाशयितव्यः ' इत्यस्यानन्तरं ' वर्धयितव्यः '। १०. मै४—माहमिन्द्रेणास्य निघातनं सूचितमिति। ११–११. तं१.तं२.मै.लं— ' शातयिता शत्रुः...विशेषाभावात् ' नास्ति । १२. तं१.तं२.लं— ' यज्ञात् ' नास्ति। १३. तं१.तं२.मै.लं— ' वा ' नास्ति। १४–१४. मै४— अत्याक्रम्य। १५–१५. मै४— प्रमाणानतिरेकः संभवः। १६–१६. मै४—ततः सोऽग्नीषोमाविषुमात्रप्रमाणया वृद्ध्या वर्धमानः, मै—'वर्धमानः' नास्ति। १७–१७. मै.लं— स वरणाद्वृत्र उच्यते। ३०

१७. अ.इ.उ.जो.ना.पा.हा— ' पार्श्वयोः ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मादिन्द्रोऽबिभेदपि त्वष्टा तस्मै त्वष्टा वज्रमसिञ्चत् तपो वै स वज्रं आसीत् तमुद्यन्तुं नाशक्नोदथ वै तर्हि विष्णु(२)रन्या देवताऽऽसीत् सोऽब्रवीद्विष्णवेहीदमा हरिष्यावो येनायमिदमिति

तस्मात्। इन्द्रः। अबिभेत्। अपीति। त्वष्टा। तस्मै। त्वष्टा। वज्रम्। असिञ्चत्। तपः। वै। सः। वज्रः। आसीत्। तम्। उद्यन्तुमित्युत्-यन्तुम्। न। अशक्नोत्। अथ। वै। तर्हि। विष्णुः (२)। अन्या। देवता। आसीत्। सः। अब्रवीत्। विष्णो। एति। इहि। इदम्। एति। हरिष्यावः। येन। अयम्। इदम्। इति।

---

[v]तस्मात् [v]इन्द्रः [v]अबिभेत्। [१८-v]त्वष्टा [v]अपि अबिभेत्[-१८], यस्तस्य प्रवर्तयिता सोऽप्यबिभेत् इति अपिशब्दस्यार्थः॥

तस्मा इत्यादि॥ अथ [v]त्वष्टा [v]तस्मै वृत्राय तं वृत्रं निग्रहीतुम्। यद्वा—तस्मै इन्द्राय युद्धार्थिने [v]वज्रम् आयुधम् [v]असिञ्चत् उदपादयत्। तपोविशेषस्तेनोत्पादितः [v]सः स्वयं [v]वज्रः एवाभवत्, यद्वा—तदीयं तपो वज्रत्वेनातिष्ठत्। अथेन्द्रः केवलः [v]तम् उद्धर्तुं [v]न [v]अशक्नोत्। [v]अथ [v]तर्हि तदानीं [v]विष्णुः नाम [v]अन्या [v]देवता [v]आसीत् इन्द्राय विषीदते आविरासीत्। अथेन्द्रस्तम् [v]अब्रवीत्—हे [v]विष्णो, [v]एहि [v]इदम् अस्य वीर्यम् [v]आ [v]हरिष्यावः [v]येन वीर्येण [v]अयम् [v]इदम् विश्वम् अभूत् [v]इति॥

तस्मादिति॥ अथास्य वृत्रस्य वधाय साधनभूतस्य [१८]वज्रस्योत्पत्तिं दर्शयति— 'तस्मादिन्द्रोऽबिभेदपि त्वष्टा तस्मै त्वष्टा वज्रमसिञ्चत् तपो वै स वज्र आसीत्' इति॥ [v]तस्मात् सर्वलोकावरकाद्वृत्रात् [v]इन्द्रः [v]अबिभेत्। यथेन्द्रस्तथा [v]त्वष्टा [v]अपि अबिभेत्। त्रिष्वपि लोकेष्वनेनाऽऽवृतेषु त्वष्टुरिन्द्रस्य चोभयोः समान एव स्थानाभावः। ततः [v]त्वष्टा तं वृत्रं हन्तुं [१९-]तेनेन्द्रेण सह मैत्रीं कृत्वा[-१९] [v]तस्मै इन्द्राय [v]वज्रम् [v]असिञ्चत्, अस्त्ररूपत्वायाभिमन्त्रितेन जलेन तदीयं वज्रं प्रक्षाल्य तस्मै दत्तवानित्यर्थः। [v]सः अयमिन्द्रसंबधी [v]वज्रः अभिमन्त्रितत्वात् तपोरूप एव [v]आसीत्॥

तमिति॥ तपोरूपस्य [२०]तस्य वज्रस्योद्यमनाय [२१]विष्णुसाहाय्यापेक्षामिन्द्रस्य दर्शयति— 'तमुद्यन्तुं नाशक्नोदथ वै तर्हि विष्णुरन्या देवताऽऽसीत् सोऽब्रवीद्विष्णवेहीदमा हरिष्यावो येनायमिदमिति' इति॥ यदेन्द्र उद्यमने शक्तो नाभूत् तदानीं तस्येन्द्रस्य पुरतः [v]विष्णुः नाम काचित् [v]देवता [v]आसीत्, तं विष्णुमेवं प्रार्थितवान्—वृत्रस्य वीर्यं स्मृत्वा भयमापन्नस्य मम हस्तो वज्रमुद्यन्तुं न प्रभवति। [v]येन वीर्येण [v]अयं वृत्रः [v]इदं जगद्व्याप्तवान्, [२२-]तत् इदं[-२२] वीर्यम् आवाम् उभावस्मात् वृत्रात् [v]आ [v]हरिष्यावः। अतो हे विष्णो, मम सहकारित्वमागच्छेति॥

१८–१८. तं१.तं२– 'त्वष्टा अपि अबिभेत्' नास्ति।

१८. अ.उ.पा–अन्योत्पतिं; इ–वृत्रस्योत्पतिं। १९–१९. हो१–'तेनेन्द्रेण सह मैत्रीं कृत्वा' नास्ति। २०. ड–'तस्य' नास्ति। २१. आ.क–विष्णुसहकार्यपेक्षा; हा–विष्णुसहकार्यापेक्षा। २२. ड.हो१–तदीयम्; आ–तादृशम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स विष्णुस्त्रेधाऽऽत्मानं वि न्यधत्त पृथिव्यां तृतीयमन्तरिक्षे तृतीयं दिवि तृतीयमभिपर्यावर्ताद्व्यबिभेद्यत् पृथिव्यां तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं (३) मयि वीर्यं तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्यगृह्णादधा मेति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति ५

सः। विष्णुः। त्रेधा। आत्मानम्। वि। नीति। अधत्त। पृथिव्याम्। तृतीयम्। अन्तरिक्षे। तृतीयम्। दिवि। तृतीयम्। अभिपर्यावर्तादित्यभि - पर्यावर्तात्। हि। अबिभेत्। यत्। पृथिव्याम्। तृतीयम्। आसीत्। तेन। इन्द्रः। वज्रम्। उदिति। अयच्छत्। विष्वङनुस्थित इति विष्णु - अनुस्थितः। सः। अब्रवीत्। मा। मे। प्रेति। हाः। अस्ति। वै। इदम् (३)। मयि। वीर्यम्। तत्। ते। प्रेति। दास्यामि। इति। तत्। अस्मै। प्रेति। १०
अयच्छत्। तत्। प्रतीति। अगृह्णात्। अधाः। मा। इति। तत्। विष्णवे। अति। प्रेति। अयच्छत्। तत्। विष्णुः। प्रतीति। अगृह्णात्। अस्मासु। इन्द्रः। इन्द्रियम्। दधातु। इति।

स विष्णुरित्यादि। गतम्। अभिपर्यावर्तादिति। अभितः परित सर्वतः आक्रमणम् अभिपर्यावर्तः, तत्परिहारार्थं तं वृत्रो मा कार्षीदिति लोकत्रयेऽपि Vआत्मानं Vत्रेधा विभज्य स्थापितवान्॥

यत्पृथिव्यामित्यादि॥ Vतेन तृतीयेन सह Vविष्वङनुस्थितः विष्णुना गुणभावेन धारितः, १५
सारथिनेव राजा गुणभावेन। अनोः कर्मप्रवचनीयत्वम् (पा १.४.८४), उपसर्गत्वाभावात् "उपसर्गात् सुनोति°" (पा ८.३.६५) इत्यादिना षत्वाभावः, कर्मप्रवचनीयत्वेऽपि व्यत्ययेन समासः। अथ Vसः Vअब्रवीत् वृत्रः Vमा मां Vप्र Vहाः प्रहार्षीः। सिचि वृद्धौ (पा ७.२.१), "बहुलं छन्दसि" (पा ७.३.९७) इतीडभावः। अस्ति वा इत्यादि। गतम्। अथ

स इति॥ [२३]प्रार्थितस्य विष्णोः साहाय्याचरणप्रकारं दर्शयति–'स विष्णुस्त्रेधाऽऽत्मानं वि न्यधत्त पृथिव्यां तृतीयमन्तरिक्षे तृतीयं दिवि तृतीयमभिपर्यावर्ताद्व्यबिभेत्' इति॥ Vविष्णुः मूर्तित्रयं संपाद्य [२४]रक्षणाय लोकत्रये स्थापितवान्। यस्मादस्य वृत्रस्य Vअभिपर्यावर्तात् सर्वदिग्व्यापिरूपाया वृद्धेरयमिन्द्रः Vअबिभेत् तस्मादिन्द्रभीतिनिवारणाय मूर्तित्रयस्थापनं [२५]युक्तमित्यभिप्रायः॥

यदिति॥ मूर्तित्रयस्थापनादूर्ध्वं प्रवृत्तमिन्द्रव्यापारं दर्शयति–'यत् पृथिव्यां तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्रहारस्ति वा इदं मयि वीर्यं तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्यगृह्णादधा मेति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति' इति॥ विष्णुना स्वकीयवक्ष्यमाणद्वयापेक्षया Vतृतीयं शरीरं Vपृथिव्यां Vयत् स्थापितम् Vआसीत् Vतेन युक्तः

२३. हा–प्रापितस्य। २४. ड– आचरणाय; हो१– चरणानि। २५. इ– कृतमि°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्या इष्टयः

यदन्तरिक्षे तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं (४) मयि वीर्यं तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्यगृह्णाद्द्विर्मोऽधा इति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति

५ यत्। अन्तरिक्षे। तृतीयम्। आसीत्। तेन। इन्द्रः। वज्रम्। उदिति। अयच्छत्। विष्णवनुस्थित इति विष्णु-अनुस्थितः। सः। अब्रवीत्। मा। मे। प्रेति। हाः। अस्ति। वै। इदम् (४)। मयि। वीर्यम्। तत्। ते। प्रेति। दास्यामि। इति। तत्। अस्मै। प्रेति। अयच्छत्। तत्। प्रतीति। अगृह्णात्। द्विः। मा। अधाः। इति। तत्। विष्णवे। अति। प्रेति। अयच्छत्। तत्। विष्णुः। प्रतीति। अगृह्णात्। अस्मासु। इन्द्रः। इन्द्रियम्। दधातु। इति।

१० वृत्रेण दत्तं वीर्यम् [१९-]इन्द्रः [V]प्रति [V]अगृह्णात्[-१९], [V]तत् [V]विष्णवे आत्मानमतीत्य [V]प्रायच्छत्। यद्वा– प्रतिग्रहानन्तरं तस्यान्यस्मै [२०]प्रदानमतिप्रदानम्। किं ब्रुवन्? अधा मेति। माम् [V]अधाः धारितवान् [२१]त्वमसीति विष्णुं वदन्। [V]विष्णुः च [V]तत् [V]प्रति [V]अगृह्णात्, कथं मन्यमानः? [V]इन्द्रः [V]अस्मासु [V]इन्द्रियं [V]दधातु आस्थापयतु इन्द्रार्थमेव मयि तिष्ठतु [V]इति[२२]॥

यदन्तरिक्ष इत्यादि समानम्॥ [V]द्विः [V]मा [V]अधाः [V]इति विशेषः द्वौ वारौ मां १५ धारितवानिति॥

स [V]इन्द्रः तस्य विष्णोः पृष्ठतः स्थितस्तं [V]वज्रम् [V]उदयच्छत्। तदानीं [V]सः वृत्रो भीतः सन्निन्द्रम् [२६V]अब्रवीत्– हे [V]इन्द्र, [V]मे शरीरं [V]मा [२७V]प्रहाः, [V]अस्ति [२८V]वा [V]इदं किंचित् [V]मयि [V]वीर्यं पृथिवीव्यासिक्षमं [V]तत् सर्वं तुभ्यं [V]दास्यामि [V]इति उक्त्वा [V]तत् इन्द्राय दत्तवान्। स चेन्द्रः [V]तत् स्वीचकार, स्वीकृत्य च मां धारय [V]इति ब्रुवन् [V]विष्णवे [V]तत् वीर्यमत्यादरेण [V]प्रायच्छत्। स च [V]विष्णुः [V]अस्मासु मध्येऽयम् [V]इन्द्रः वीर्यं २० धारयतु [V]इति अभिप्रेत्येन्द्रार्थं [V]तत् वीर्यं [V]प्रत्यगृह्णात्॥

यदिति॥ ईदृशमिन्द्रकृत्यं [२९]द्वितीयपर्याये दर्शयति– 'यदन्तरिक्षे तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्रहारस्ति वा इदं मयि वीर्यं तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्यगृह्णाद्द्विर्मोऽधा इति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति' इति। हे विष्णो, पूर्वं सकृद्वीर्यग्रहणेन मां [३०]धारितवानसि, तदपेक्ष्य [V]द्विः मां धारय [V]इति २५ ब्रुवन् वीर्यं [V]प्रायच्छत्॥

१९–१९. तं१.तं२.मै.लं– 'इन्द्रः प्रत्यगृह्णात्' नास्ति। २०. तं१.तं२.मै.लं – प्रदानमिति। २१. तं१. तं२.मै.लं– त्वमिति। २२. मै४– इति भावः।

२६. आ.ड– इदमब्रवीत्। २७. इ– प्रहर। २८. क– एव; ना– च। २९. इ.क.जो. ना.हा.हो१– °पर्यायेण। ३०. इ.क.जो.ना.हा– धृतवानसि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

यद्दिवि तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्ण्वनुस्थितः सोऽब्रवीन्मा मे प्र हार्येनाह(५)मिदमस्मि तत् ते प्र दास्यामीति त्वी३ इत्यब्रवीत् संधां तु सं दधावहै त्वामेव प्र विशानीति यन्मां प्र विशेः किं मा भुञ्ज्या इत्यब्रवीत् त्वामेवेन्धीय

यत्। दिवि। तृतीयम्। आसीत्। तेन। इन्द्रः। वज्रम्। उदिति। अयच्छत्। विष्ण्वनुस्थित इति विष्णु-अनुस्थितः। सः। अब्रवीत्। मा। मे। प्रेति। हाः। येन। अहम् (५)। इदम्। अस्मि। तत्। ते। प्रेति। दास्यामि। इति। त्वी३। इति। अब्रवीत्। संधामिति सं-धाम्। तु। समिति। दधावहै। त्वाम्। एव। प्रेति। विशानि। इति। यत्। माम्। प्रविशेरिति प्र-विशेः। किम्। मा। भुञ्ज्याः। इति। अब्रवीत्। त्वाम्। एव। इन्धीय।

यद्दिवीत्यादि ॥ गतम्। येनाहमिदमिति। पूर्वं वीर्यैकदेश [३२]एव वृत्रेणेन्द्राय दत्तः, इदानीं कृत्स्नप्रदानमभ्युपगच्छति – [V]येन वीर्येण [V]अहम् [V]इदं विश्वम् [V]अस्मि [V]तत् सर्वं [V]ते [V]दास्यामि [V]इति। अब्रवीत् इन्द्रः बाढमितीत्यर्थः। अभ्युपगमे प्लुतः। अथ वृत्रोऽब्रवीत्– [३४]सन्धां त्विति। त्वं चाहं च एकत्वं प्रतिपद्यावहा[३४] इत्यर्थः। यद्वा– [V]त्वी इति पर्यनुयोगे विस्मृतस्मरणे वा। सर्वं वीर्यं ते प्रदास्यामीत्युक्तम्, अत्र किंचिद्विस्मृतं तदिदानीं [२५]स्मृतमिति स्मृतिम्[२५] अभिनीयाब्रवीत् [२६]वृत्र एवं[२६]–संधां त्विति तुशब्दो विशेषमाह। सर्वं वीर्यं ते प्रदास्यामि, किं तु आवां [V]संदधावहै, [V]त्वाम् [V]एव अहं [२७-V]प्र [V]विशानि[२७] [२८]यदीदं लभ्यते ततो वीर्यं दास्यते इति। 'गोपोषं पुष्णाति' इतिवत् एकः संदधातिः सामान्यवचनो द्रष्टव्यः। अथेन्द्रः [V]अब्रवीत् यदा त्वं [V]मां [V]प्रविशेः [V]किम् इदानीं मां प्रविश्य त्वं [V]मा [V]भुञ्ज्याः? यद्वा–किं

यदिति ॥ [३१]तृतीयपर्याये तस्येन्द्रस्य कृत्यं दर्शयति–'यद्दिवि तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्ण्वनुस्थितः सोऽब्रवीन्मा मे प्र हार्येनाहमिदमस्मि तत् ते प्र दास्यामीति त्वी३ इत्यब्रवीत्' इति। [V]येन वीर्येण [r]अहम् [V]इदं जगद्व्याप्तवान् [V]अस्मि [r]तत् सर्वं [r]ते [V]प्र [r]दास्यामि [३२r]इति उक्त इन्द्रोऽङ्गीचकार। अङ्गीकारार्थोऽयं त्वीशब्दः, अस्तु तथेत्यर्थः ॥

संधामिति ॥ तस्य वीर्यस्य प्रदानात् प्रागेवेन्द्रवृत्रयोः संधिं दर्शयति– 'संधां तु सं दधावहै त्वामेव प्र विशानीति यन्मां प्रविशेः किं मा भुञ्ज्या इत्यब्रवीत् त्वामेवेन्धीय तव भोगाय त्वां प्र विशेयमित्यब्रवीत् तं वृत्रः प्राविशदुदरं वै वृत्रः क्षुत् खलु वै मनुष्यस्य भ्रातृव्यो य एवं वेद हन्ति क्षुधं भ्रातृव्यम्' इति ॥ तुशब्दो वक्तव्यशेषसद्भावद्योतनार्थः। तत्सर्वं [३३]वीर्यं तुभ्यं [३४]दास्यामि, किं त्वन्यच्छेषं वक्तव्यमस्ति। [३५]आवामुभौ संधानं करवाव। कीदृशं संधानमिति तदुच्यते। हे इन्द्र, [r]त्वाम् [r]एव अहं

२३. मै.लं– 'एव' नास्ति। २४–२४. तं१.तं२.पं२– वृत्र एव शब्दो विशेषः। एकत्वं प्रतिपाद्यावहा। २५–२५. मै४– स्मृतम्। २६–२६. तं१.तं२.मै–वृत्रे एव। २७–२७. तं१.तं२–प्रविशामि। २८. तं१.तं२.मै.लं– यदिदम्।

३१. क.जो.ना.हा– °पर्यायेण। ३२. इ.क.जो.ना.हा– इत्युक्तवान्। ३३. ड.हो१– 'वीर्यम्' ।।रित। ३४. आ– दास्यामीति। ३५. आ – तावदुभौ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तव भोगाय त्वां प्र विशेयमित्यब्रवीत् तं वृत्रः प्राविशदुदरं वै वृत्रः क्षुत् खलु वै मनुष्यस्य भ्रातृव्यो य (६) एवं वेद हन्ति क्षुधं भ्रातृव्यं तदस्मै प्रायच्छत् तत् प्रत्यगृह्णात् त्रिर्माऽधा इति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यत् त्रिः प्रायच्छत् त्रिः प्रत्यगृह्णात् तत् त्रिधातोस्त्रिधातुत्वं

तव । भोगाय । त्वाम् । प्रेति । विशेयम् । इति । अब्रवीत् । तम् । वृत्रः । प्रेति । अविशत् । उदरम् । वै । वृत्रः । क्षुत् । खलु । वै । मनुष्यस्य । भ्रातृव्यः । यः (६) । एवम् । वेद । हन्ति । क्षुधम् । भ्रातृव्यम् । तत् । अस्मै । प्रेति । अयच्छत । तत् । प्रतीति । अगृह्णात् । त्रिः । मा । अधाः । इति । तत् । विष्णवे । अति । प्रेति । अयच्छत् । तत् । विष्णुः । प्रतीति । अगृह्णात् । अस्मासु । इन्द्रः । इन्द्रियम् । दधातु । इति । यत् । त्रिः । प्रेति । अयच्छत् । त्रिः । प्रत्यगृह्णादिति प्रति-अगृह्णात् । तत् । त्रिधातोरिति त्रि-धातोः । त्रिधातुत्वमिति त्रिधातु-त्वम् ।

मां प्रविश्य [३३]मामेव भुञ्ज्याः, किं मामेव भोक्तुमारभसे ? अथ वृत्रः [V]अब्रवीत् मैवं मन्तव्यं [V]त्वाम् [V]एव [V]इन्धीय दीपयेयम् अतः [V]तव एव भोगार्थं [V]त्वां [V]प्र विशेयम् [V]इति । भुञ्जेर्लोट्याडागमः, छान्दसोऽकारलोपः लुग्विकरणत्वेन वा अयम् । अथ इन्द्रेण [३४]अनुमतः स्थितः यत्र क्षुदुपजायते, जाठराग्निरूपेणान्तः [३५V]प्राविशत् इत्यर्थः । स च क्षुद्रूपो दिने दिने सर्वैर्हन्यते । क्षुत्खल्वित्यादि । वेदितुः फलम् । अथ वृत्रः [V]तत् चात्मीयं वीर्यं कृत्स्नम् इन्द्राय [V]प्रायच्छत् तत्प्रवेशेन [३६]सर्वशक्तिरिन्द्रोऽभवत्[-३६] । इन्द्रश्च [V]तत् प्रतिगृह्य [V]विष्णवे [V]प्र [V]अयच्छत् [V]त्रिः [V]मा [V]अधाः त्रीन् वारान् मां धारितवानसि [V]इति । विष्णुरित्यादि । गतम् ॥

[V]प्रविशानि [V]इति, तत इन्द्र [३६]एनम् [V]अब्रवीत् यदि त्वं [V]मां [V]प्रविशेः तदा [V]किं मामेव भोक्ष्यस इति । ततो वृत्र [३७]इन्द्रम् [V]अब्रवीत् नाहं त्वां भोक्ष्ये किं तु [V]त्वाम् [V]इन्धीय उदराग्निपाटवेन प्रकाशयेयं दीपयेयं तच्च तव बहुविधान्नभोगायोपयुज्येत, ततस्त्वां प्रविशामीत्युक्त्वा [V]तम् इन्द्रं [V]वृत्रः [V]प्राविशत् । [३८-]प्रविष्टश्च [V]वृत्रः[-३८] बह्वन्नपूरणक्षममवकाशरूपम् [V]उदरम् अभवत् । लोकेऽपि [V]मनुष्यस्य उदरे वर्तमाना [V]क्षुत् एवात्यन्तबाधकत्वात् सहजः [V]भ्रातृव्यः । [३९]एतद्वेदनस्य [४०]क्षुदुपघातः फलम् ॥

तदिति ॥ तस्य वृत्रस्य प्रवेशात् पूर्वं द्युलोकगतवीर्यदानं यदस्ति तदिदानीं दर्शयति– 'तदस्मै प्रायच्छत् तत् प्रत्यगृह्णात् त्रिर्माऽधा इति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति' इति ॥ [४१-]इदं च[-४१] पूर्ववद्व्याख्येयम् ॥

यदिति ॥ इदानीं त्रिधातुनिर्वचनं दर्शयति – 'यत् त्रिः प्रायच्छत् त्रिः प्रत्यगृह्णात् तत् त्रिधातोस्त्रिधातुत्वम्' इति ॥ वृत्रस्य त्रिवारप्रदानेनेन्द्रस्य [४२]त्रिवारप्रतिग्रहेण च वीर्यरूपस्य पुरोडाशयस

२९. तं१.तं२.पं.लं– त्वामेव । ३०–३०. लं– अनुभूत्वा; मै. अनु [नुमतो] भूत्वा; मै४–'अनुमतः' इत्यस्यानन्तरं 'वृत्रः तमब्रवीदुदरं'। ३१. मै–प्रविशति। ३२–३२. तं१.तं२.–'सर्वशक्तिरिन्द्रोऽभवत्' नास्ति।

३६. आ.ड– एवम्। ३७. आ.श्रं– इदम्। ३८–३८. ड– प्रविष्टे वृत्रे। ३९. अ.उ.पा.श्रं– तद्वेदनस्य। ४०. आ.ड.श्रं– क्षुदुपघातः। ४१–४१. आ.ड.श्रं.हो१– 'इदं च' नास्ति। ४२. ड– °प्रतिग्रहणे; हो१– °प्रतिग्रहणेन; क.हा– त्रिवारं प्रति°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

यद्विष्णुरन्वतिष्ठत विष्णवेऽति प्रायच्छत् तस्मादैन्द्राविष्णवꣳ हविर्भवति (७) यद्वा इदं किं च तदस्मै तत् प्रायच्छदृचः सामानि यजूꣳषि सहस्रं वा अस्मै तत् प्रायच्छत् तस्मात् सहस्रदक्षिणम् ॥ १२ ॥

[प्रवृणं विष्णुर्वा इदमिदमहं यो भवत्येकविꣳशतिश्च ।]

यत्। विष्णुः। अन्वतिष्ठतेत्यनु - अतिष्ठत। विष्णवे। अति। प्रेति। अयच्छत्। तस्मात्। ५
ऐन्द्राविष्णवमित्यैन्द्रा - विष्णवम्। हविः। भवति (७)। यत्। वै। इदम्। किम्। च। तत्। अस्मै। तत्। प्रेति। अयच्छत्। ऋचः। सामानि। यजूꣳषि। सहस्रम्। वै। अस्मै। तत्। प्रेति। अयच्छत्। तस्मात्। सहस्रदक्षिणमिति सहस्र - दक्षिणम् ॥ १२ ॥

[मैसं २.४.३; कासं १२.३]

यत् त्रिरित्यादि ॥ दानप्रतिग्रहयोस्त्रिरावृत्त्या [V]त्रिधातुत्वं, वृत्रो दाता इन्द्रः प्रतिग्रहीता। १०
त्रयो धातवः दानानि [३३]धारणानि वा अस्येति त्रिधातुर्वीर्यविशेषः, तत्संबन्धी यागः त्रैधातवीयम्, इह त्वभेदेनोच्यते। यद्विष्णुरित्यादि। यस्मात् [V]विष्णुः इन्द्रम् [V]अन्वतिष्ठत, यस्माच्च [V]विष्णवे इन्द्रः [V]अति [V]प्र [V]अयच्छत् [V]तस्मात् [V]ऐन्द्राविष्णवं [V]हविः [V]भवति ॥

यद्वा इति ॥ [V]यत् किंचिदात्मनि वीर्यं विद्यते [V]ऋचः [V]सामानि [V]यजूꣳषि च, [३४]ऋगादिनिमित्तमिति यावत्, [V]तत् सर्वम् [V]अस्मै इन्द्राय तदानीं वृत्रः [V]प्रायच्छत्। अत एव १५
पूर्वानुवाके दक्षिणाभूतानां हिरण्यादीनां सामादिरूपेण वर्णना कृता। सहस्रं वा इति। [V]सहस्रं वीर्याणि सहस्रप्रकारं वीर्यं तदा [V]प्रायच्छत्। [V]तस्मात् सहस्रहिरण्यदक्षिणत्वमस्य पूर्वमुक्तम् ॥

इति द्वितीये चतुर्थे द्वादशोऽनुवाकः ॥

हविषस्त्रिधा भिन्नस्य त्रिधातु नाम संपन्नम्। त्रयो धातवश्चतुष्कपालरूपा भेदा यस्य द्वादशकपाल-पुरोडाशस्य [४३]-सोऽयं त्रिधातुः ॥ २०

यदिति ॥ तस्य-[४३] हविषो व्यासक्तदेवतां विधत्ते – ' यद्विष्णुरन्वतिष्ठत विष्णवेऽति प्रायच्छत् तस्मादैन्द्राविष्णवꣳ हविर्भवति ' इति ॥ [४४]यस्मात् [V]विष्णुः अनुकूलत्वेन स्थितस्तस्मै च [V]विष्णवे अयमिन्द्रोऽत्यादरेण [V]प्रायच्छत् [V]तस्मात् व्यासक्तयोरिन्द्राविष्णवोस्तत्र देवतात्वम् ॥

यदिति ॥ त्रिवारं [४५]-प्रत्तं तद्वीर्यरूपं हविर्वैदत्रयरूपेण-[४५] प्रशंसति– ' यद्वा इदं किं च तदस्मै तत् प्रायच्छदृचः सामानि यजूꣳषि ' इति ॥ २५

सहस्रमिति ॥ अत्र च या हिरण्यदक्षिणा पूर्वमुक्ता तस्याः संख्याविधिमुन्नयति– ' सहस्रं वा अस्मै तत् प्रायच्छत् तस्मात् सहस्रदक्षिणम् ' इति ॥ यस्मात् सहस्रभेदभिन्नं वीर्यं दत्तवान् [४६-V]तस्मात् सहस्रदक्षिणाकम् इदं-[४६] कर्म द्रष्टव्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥ ३०

३३. तं१.तं२.मै.लं– वारणानि। ३४. तं२– स्वर्गादिनिमित्तम्।

४३–४३. आ.उ.पा–सोऽयं त्रिधातुः त्रिसंख्यातस्य; इ.शृं–सोऽयं त्रिधातुः तस्य; जो.ना– सोऽयं त्रिधातुः यज्ञः संख्यातस्य; क–त्रिधातुर्यज्ञसंख्या तस्य हा–त्रिधातुयज्ञः संख्या तस्य; अ– ' सोऽयं त्रिधातुः त्रिसंख्या-तस्य ' नास्ति; ड–सोऽयं त्रितयस्य; हो१–त्रितयस्य। ४४. इ.क.जो.ड.ना.शृं.हा.हो१–यस्मात् कारणात्। ४५–४५. ड.हो१–यत्तदीयं रूपं हविर्भेदत्रयरूपेण। ४६. ड.शृं.हो–अतस्तस्मात् सहस्रहिरण्यदक्षिणाकम्। ३५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवा वै राजन्याज्जायमानादबिभयुस्तमन्तरेव सन्तं दाम्नाऽपौम्भन्त्स वा एषोऽपोब्धो जायते यद्राजन्यो यद्वा एषोऽनपोब्धो जायेत वृत्रान् घनꣳश्चरेद्यं कामयेत

देवाः । वै । राजन्यात् । जायमानात् । अबिभयुः । तम् । अन्तः । एव । सन्तम् । दाम्ना । अपेति । औम्भन् । सः । वै । एषः । अपोब्ध इत्यप - उब्धः । जायते । यत् । राजन्यः । यत् । वै । एषः । अनपोब्ध इत्यनप - उब्धः । जायेत । वृत्रान् । घ्नन् । चरेत् । यम् । कामयेत ।

देवा वा इत्यादि ॥ [v]अन्तः गर्भः [v]एव [v]सन्तं [v]दाम्ना [v]अप [v]औम्भन् अपरुद्धशक्तिकम्[1] अबध्नन् । उभ उम्भ पूरणे ॥

त्रैधातवीययागस्य द्वादशे देवतेरिता[1] ॥

देवा इति ॥ अथ त्रयोदशेऽनुवाक ऐन्द्राबार्हस्पत्यं [2]चरुं विधातुं प्रस्तौति– 'देवा वै राजन्याज्जायमानादबिभयुस्तमन्तरेव सन्तं दाम्नाऽपौम्भन्त्स वा एषोऽपोब्धो जायते यद्राजन्यो यद्वा एषोऽनपोब्धो जायेत वृत्रान् घनꣳश्चरेत्' इति ॥ [3]राजन्यस्याप्रतिबद्धशक्तित्वेनेतरवैरिवद्देवानपि हनिष्यतीति मत्वा [v]देवाः भीताः सन्तो गर्भमध्य एव स्थितं [v]सन्तं राजन्यं शक्तिप्रतिबन्धलक्षणेन [v]दाम्ना अपगतशक्तिको यथा भवति तथा [v]औम्भन् [4-4]शक्तिप्रतिबन्धं पूरितवन्तः[4-4]। अत एव सर्वत्र लोके [v]राजन्यः प्रतिबद्धशक्तिक एव [v]जायते। यद्यप्रतिबद्धशक्तिकः [v]जायेत गर्भनिर्गमनमारभ्य वैरिणो [5]मारयन्नेव लोके [v]चरेत् ॥

यमिति ॥ इदानीं विधत्ते– 'यं कामयेत राजन्यमनपोब्धो जायेत वृत्रान् घ्नꣳश्चरेदिति तस्मा एतमैन्द्राबार्हस्पत्यं चरुं निर्वपेदैन्द्रो वै राजन्यो ब्रह्म बृहस्पतिर्ब्रह्मणैवैनं दाम्नोऽपोम्भनान्मुञ्चति' इति ॥ [v]यं [v]राजन्यं प्रत्यध्वर्युरेवं [v]कामयेत देवैरप्रतिबद्धशक्तिकोऽयं जायतां, सर्वत्र निवारकान् वैरिणो मारयन्नेव चरतिवति तस्येयमिष्टिः। देवेष्विन्द्रस्य क्षत्रियत्वं बृहदारण्यके समाम्नातम् — "यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः" (बृउ १.४.११) इति । तस्मान्मनुष्येषु [v]राजन्यः [v]ऐन्द्रः । "ब्रह्म वै

१. तं१.तं२.मै.लं– °शक्तिकाङ्गम् ।

१. ड– देव ईरितः । २. अ.इ.उ.जो.ना.पा.हा– 'चरुं' नास्ति । ३. इ– °तिहतशक्ति°; शृं–°तिबन्धशक्ति°; हो१– °शक्तित्वेऽन्यतर्; ड– °तिबन्धशक्तित्वेनेतर° । ४–४. इ– शक्तिप्रतिबन्धि कारितवन्तः । ५. अ.आ.उ.जो.पा.हा– मारयन्निव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्या इष्टयः]

राजन्यमनपोब्धो जायेत वृत्रान् घनꣳश्चरेदिति तस्मा एतमैन्द्राबार्हस्पत्यं चरुं निर्वपेदैन्द्रो वै राजन्यो ब्रह्म बृहस्पतिर्ब्रह्मणैवैनं (१) दाम्नोऽपोम्भनान्मुञ्चति हिरण्मयं दाम दक्षिणा साक्षादेवैनं दाम्नोऽपोम्भनान्मुञ्चति ॥ १३ ॥

[एनं द्वादश च ।]

राजन्यम्। अनपोब्ध इत्यनप - उब्धः। जायेत। वृत्रान्। घनन्। चरेत्। इति। तस्मै। एतम्। ऐन्द्राबार्हस्पत्यमित्यैन्द्रा - बार्हस्पत्यम्। चरुम्। निरिति। वपेत्। ऐन्द्रः। वै। राजन्यः। ब्रह्म। बृहस्पतिः। ब्रह्मणा। एव। एनम् (१)। दाम्नः। अपोम्भनादित्यप-उम्भनात्। मुञ्चति। हिरण्मयम्। दाम। दक्षिणा। साक्षादिति स - अक्षात्। एव। एनम्। दाम्नः। अपोम्भनादित्यप-उम्भनात्। मुञ्चति ॥ १३ ॥

[मैसं २.१.१२; कासं १२.४]

वृत्रानिति । वारकान् शत्रून् ॥

अन्वाहार्यमासाद्य [v]हिरण्मयं [2v]दाम दद्यात् ॥

इति द्वितीये चतुर्थे त्रयोदशोऽनुवाकः ॥

इति काम्या इष्टयः समाप्ताः

देवानां बृहस्पतिः" (तैसं २.२.९) [1]इत्यन्यत्र श्रवणाद्बृहस्पतेर्ब्राह्मणजातित्वम्। अत ऐन्द्राबार्हस्पत्यचरौ निरुप्ते सति [v]एनम् ऐन्द्रं राजन्यं [v]ब्रह्मणा बृहस्पतिसामर्थ्येन [3]दैविकाच्छक्तिप्रतिबन्धात् मोचयति ॥

हिरण्मयमिति ॥ [4-]अत्रोचितां दक्षिणां[-4] विधत्ते–'हिरण्मयं दाम दक्षिणा साक्षादेवैनं दाम्नोऽपोम्भनान् मुञ्चति' इति ॥ [v]दाम रज्जुः। बन्धके दामनि दत्ते सति प्रत्यक्षत एव बन्धमोक्षो भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे चतुर्थप्रपाठके त्रयोदशोऽनुवाकः

---

२. तं१.तं२– 'दाम' नास्ति।

---

६. इ.जो.ना.–इत्यत्र; अ.आ.उ.क.पा.हा– इत्यस्य। ७. हो– दैवशक्तिप्रति°; शृं– दैविकोक्ति°; ड– देवी शक्तिः प्रतिबन्धात्। ८–८. हा– अत्रोचिताः दक्षिणाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे ।
भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तिरति दीर्घमायुः ॥

नवोनव इति नवः-नवः । भवति । जायमानः । अह्नाम् । केतुः । उषसाम् । एति । अग्रे । भागम् । देवेभ्यः । वीति । दधाति । आयन्नित्या-यन् । प्रेति । चन्द्रमाः । तिरति । दीर्घम् । आयुः ॥

५ अथ याज्याकाण्डं वैश्वदेवम् । " यः पापयक्ष्मगृहीतः स्यात् तस्मा एतमादित्यं चरुं निर्वपेत् " (तैसं २.३.५) इत्यस्याः पुरोऽनुवाक्या — ' नवोनवः ' इति त्रिष्टुप् ॥ अत्र चन्द्रगुणकीर्तनेन आदित्य एव स्तूयते, [1]तेषां चन्द्रगुणानामादित्याधीनत्वात् । तथा हि चन्द्रो नामायं [2]भास्वरः सलिलकटाहात्मा । यथाहुः—

" सूर्योऽग्निमयो गोलः चन्द्रोऽम्बुमयः स्वभावतः स्वच्छः " ॥ इति ॥ तस्मादस्य
१० [3]दिवसकरमरीचिसमाश्लेषेण [4]भास्वरत्वं भवति । यथाहुः—

" भूग्रहभानां गोलार्धानि स्वच्छायया विवर्णानि ॥
अर्धानि यथासारं सूर्याभिमुखानि दीप्यन्ते " ॥ (आभ गोलपाद ५) ॥ इति ॥

तस्माच्चन्द्रमसो [5]बिम्बं गोलार्धं सूर्याभिमुखं [6]सदा चकास्ति । किं सर्वदा चकास्ति ? [7]यदि चकास्ति[7] किमिति नोपलभ्यते ? श्रूयताम्—अमावास्यायां चन्द्रमस उपर्यादित्यः, तदा [8]तस्य

१५ **त्रयोदशे चरुः प्रोक्तः शक्तिस्तम्भनिवारकः ॥**

इत्थं काम्येष्टयः [1]समापिताः । अथान्तिमानुवाके चतुर्दशे याज्यानुवाक्या वक्तव्याः ॥

नवोनव इति ॥ तत्र—" यः पापयक्ष्मगृहीतः स्यात् तस्मा एतमादित्यं चरुं निर्वपेत् " (तैसं २.३.५) इत्यत्र पुरोनुवाक्यामाह- ' नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे । भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तिरति दीर्घमायुः ' इति ॥ आदित्यस्य [2]चन्द्रदीप्तिकारणत्वात् चन्द्रा-
२० भेदेनाऽऽदित्य इह स्तूयते । [3]चन्द्रमाः [4]जायमानः प्रतिदिनमुदयं गच्छन् [5]नवोनवः [6]भवति । शुक्लप्रतिपद्येककलायुक्तः, द्वितीयायां कलाद्वययुक्तः, इत्येवं कलावृद्धिक्षयाभ्यां प्रतिदिनं नूतनत्वम् । चन्द्रवत् [7]तद्दीप्तिकारणभूतः आदित्योऽपि प्रतिदिनं नूतनो भवति । स्वरूपे [8]वृद्धिक्षयाभावेऽपि दक्षिणोत्तरगतिभ्यां नूतनत्वम् । स च [9]अह्नां [10]केतुः चिह्नं, तस्मिन्नुदिते सत्यहरिदमिति ज्ञायमानत्वात् । [11]उषसां प्रभात-
कालानाम् [12]अग्रे उपक्रमे प्राच्यामुदयम् [13]एति, तदनुरोधेन प्रातरग्निहोत्रादीनां प्रवृत्तेः [14]देवेभ्यः [15]भागं [16]वि
२५ [17]दधाति । तादृशश्चन्द्रकलावृद्धिक्षयहेतुरादित्य इह [18]कर्मण्यागच्छन् [19]दीर्घम् [20]आयुः [21]प्र [22]तिरति प्रकर्षेण [23]ददातु ॥

१. लं-एषाम् । २. मै४- भास्करः । ३. मै- °करर्चि° । ४. मै४- भास्करत्वम् । ५. तं१.तं२.लं- ' बिम्बं ' नास्ति । ६. तं१.तं२.लं- यदा । ७-७. तं१.तं२.मै.लं- ' यदि चकास्ति ' नास्ति । ८. मै.लं- ' तस्य ' नास्ति ।

३० १. आ- समाप्ताः । २. ड.हो१- चन्द्रदीप्तेरावरणत्वात् । ३. आ- दीप्तिकारणमभूत्; हो१- दीप्तिकारणभूतः । ४. हो१- वृद्ध्यपक्षयाभावेऽपि । ५. ड- ' कर्मणि ' नास्ति । ६. ड- दधातु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चन्द्रमस उपरि यद्विम्बार्धं तदशेषमवभासयति सविता। [९]-अथ चन्द्रमस-[९] अमावास्योपलक्षितो-परिबिम्बे[१०] केन्द्राद्यथायथा पश्चादादित्योऽवलम्बते तथातथा चन्द्रमसो बिम्बं [११]-केन्द्रस्य परतोऽ-लम्बते-[११]। तत्केन्द्रवशात् चन्द्रमसो बिम्बार्धशेषमाभासयति[१२] सविता। यावदेवास्योपलक्षित-बिम्बपरिध्यवधेरधोऽवलम्बते तावत् चन्द्रमसो [१३]बिम्बमस्माभिरुपलक्ष्यते, [१४]शेषमुपरिस्थितत्वात् नोपलभ्यते सूर्याभिमुखं भास्वरमपि, भूगोलविशेषवर्तिभिरस्माभिरुपलब्धुमयोग्यत्वात्। तस्माद्यावत् यावत् सवितृकराश्लिष्टमवलम्बते तावत् तावत् तिथिभेदेन शुक्लचन्द्र उपलभ्यते। तेनामी ज्योत्स्ना-वितानावभासिनश्चन्द्रकराः तत्तत्क्षितितलावभासिनो भवन्ति। यथा दर्पणोदरे जले वा दिवाकरकराः संमूर्च्छिताः सन्तो गृहान्तर्गतं तमः क्षपयन्ति एवं सवितृमरीचयोऽम्बुमये स्वभावश्यामेऽपि चन्द्रबिम्बे संमूर्छिता नैशं ध्वान्तमपध्वंसयन्ति। तत्रायं विशेषः– [१५]योऽयं चन्द्रबिम्बप्रदेशः सवितृमार्गे ऋजुत्वेन व्यवस्थितः स एव शुक्लः उपलभ्यते; तेन दक्षिणोत्तरयोः शृङ्गयोः कालविशेषेणोन्नतिविशेषः। तत्र यावद्यावत् सवित्रा विश्लिष्टो भवति तावत्तावच्छुक्ल-प्रतिपत्प्रभृति चन्द्रमसि सितिमा संवर्धते। कृष्णप्रतिपत्प्रभृति असितिमा संवर्धते। एतावता जायमान आप्यायमानः क्षीयमाणः चन्द्रमा उपलभ्यते। उक्तं च निरुक्ते–"तस्यैको रश्मिश्चन्द्र-मसं प्रति दीप्यते" (निरुक्त २.६) इति। श्रूयते च– "सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वः" (तैसं ३.४.७) इति। ननु कथम् अस्तमिते सवितरि चन्द्रश्चकास्ति? नैष दोषः– भूमेर्दूरेण सूर्यमार्गः, तेनोपरिमुखानां सूर्यमरीचीनां न व्यवधात्री भूतधात्री भवति। कृष्णपक्षप्रतिपदादिषु चन्द्रमसो बिम्बपूर्वभागं प्रत्यासन्नः सवितेति [१६]पुरस्ताच्छुक्लमुपपद्यते। अत्र यदुक्तं सौगतैः– स्वत एव शुक्लस्य चन्द्रमसः [१७]सवितृसंनिकर्षाद्वैवर्ण्यं भवतीति, तदयुक्तं, [१८]यतः स्वभावतः शुक्लस्य [१९]-सूर्यसंनिकर्षः स्याच्चेत्-[१९] तदा शुक्लप्रतिपदादिषु चन्द्रमसो बिम्बस्यापरभागे वैवर्ण्यं स्यात्, संनिकृष्टत्वात् तस्यापरभागस्य। ततश्चावाङ्मुखं[२०] चन्द्रबिम्बमुपलभ्येतेत्यलं विस्तरेण[२१] ॥

एवं यश्चन्द्रमाः [v]जायमानः प्रादुर्भवन् शुक्लप्रतिपदादिषु आदित्यस्यार्चिषा प्रकाशमानः [v]नवोनवः [v]भवति पुनःपुनः अभिनव एव भवति प्रजानामाह्लादहेतुर्भवति। "अनुदात्तं च" (पा ८.१.३) इति द्वितीयो नवशब्दः अनुदात्तः। किं च– [v]अह्नां तिथीनां [v]केतुः तद्वत् केतयिता ज्ञापयिता। कित ज्ञाने। तिथिविभागहेतुत्वात्। [v]उषसां रात्रीणाम् [v]अग्रे गच्छति अग्रणीः भवति, रजनीनां कर्तृत्वात्। यद्वा– अह्नां केतुः अहरवसाने शुक्लपक्षे प्रतीच्यां दृश्यते, कृष्णपक्षे

९–९. तं१.तं२.मै.लं – चन्द्रस्य। १०. मै४– °लक्षणबिम्ब°। ११–११. लं– केन्द्रम-°यपरतोऽवलम्बते। १२. लं– °शेषमवभासयति। १३. मै– बिम्बस्यार्धमस्मा°। १४. लं– शेषमुप-स्थित°। १५. मै – यो यः। १६ तं१.तं२.मै – परमुच्छुक्लमुपलभ्यते। १७. मै – सूर्यसंनि°। १८. मै– 'यतः' नास्ति। १९–१९. मै४– सूर्यसंनिकर्षात् वैवर्ण्यं स्यात्। २०–२०. तं१.तं२.मै– °मुखः। २१. तं१.तं२.मै– अतिप्रसङ्गेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यमादित्या अꣳशुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति ।
तेन नो राजा वरुणो बृहस्पतिरा प्याययन्तु भुवनस्य गोपाः ॥

यम् । आदित्याः । अꣳशुम् । आप्याययन्तीत्या-प्याययन्ति । यम् । अक्षितम् । अक्षितयः । पिबन्ति ॥ तेन । नः । राजा । वरुणः । बृहस्पतिः । एति । प्याययन्तु । भुवनस्य । गोपा इति गो - पाः ॥

तु रात्रीणामवसाने प्राच्यां दृश्यते । एवम् [V]आयन् आगच्छन् अयं [V]देवेभ्यः [V]भागं [V]वि [V]दधाति तिथिविशेषनिबन्धनत्वात् सर्वयागानाम्, आदित्यसंनिकर्षविप्रकर्षनिबन्धनत्वात् सर्वतिथीनाम् । सूर्याचन्द्रमसोर्हि परस्परसंनिकर्षः अमावास्या, विप्रकर्षः पौर्णमासीति । इत्थं [२३]महानुभावोऽयं [V]चन्द्रमाः [V]दीर्घम् [V]आयुः अस्य [V]प्र [V]तिरति वर्धयतु ॥ यद्वा – आदित्य एव चन्द्रमा उच्यते, चन्द्रस्य माता निर्माता उत्पादक इति । " गतिकारकयोरपि° " (उ ६७६) इति असिः, डित्वात् टिलोपः । स जायमानो दिनेदिने प्राच्याम् उद्यन् नवोनवो भवति सदोद्यन्नप्यपूर्व इव भवति । अह्नां केतुः दिवसकरत्वात् । उषसां रात्रीणाम् अग्रे अग्रतो गच्छति रात्रयः एनमनुधावन्ति । एवमायन् उद्यन् देवेभ्यो भागं विदधाति, आदित्यगत्यधीनत्वात् सर्वकर्मणाम् । एवंमहानुभावश्चन्द्रमसोऽप्युक्तवन्निर्माता आदित्यः दीर्घमायुर्वर्धयत्विति ॥

तत्रैव याज्या ' यम् ' इति त्रिष्टुप् ॥ [V]यम् [V]अंशुम् रश्मिम् आत्मीयरश्मिभूतं सोमम् [V]आदित्याः [V]आ [V]प्याययन्ति [२३]वर्धयन्ति, [V]यं च सोमम् [V]अक्षितम् अविच्छिन्नं सर्वेष्वपि पर्वसु [V]अक्षितयः अक्षीणाः पित्रादयः [V]पिबन्ति, [V]तेन सोमेन सह [V]राजा देवराजः [V]वरुणः च [V]बृहस्पतिः च [V]आ [V]प्याययन्तु [२४]हीयमानं यजमानं वर्धयन्तु [V]भुवनस्य भूतजातस्य [V]गोपाः प्रवृत्तिप्रदाः ॥

यामिति ॥ तत्रैव याज्यामाह–' यमादित्या अꣳशुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति । तेन नो राजा वरुणो बृहस्पतिरा प्याययन्तु भुवनस्य गोपाः ' इति ॥ [V]यं चन्द्रमसम् [V]अंशुं स्थिरभूतैककलामात्रावशिष्टम् [V]आदित्याः शुक्लपक्षे प्रतिदिनमेकैककलाप्रदानेन [V]आ [V]प्याययन्ति । [७-७]किं च[७-७] [V]यम् [V]अक्षितं पौर्णमास्याम् [८]अक्षीणबिम्बं कृष्णपक्षे प्रतिदिनं [९]वह्निरव्यादयो देवाः स्वयम् [V]अक्षितयः क्षयरहिताः [१०]सन्तः [V]पिबन्ति एकैकां कलामपक्षयन्ति । अत एव सोमोत्पत्तौ स्मर्यते–' प्रथमां पिबते वह्निः [११-११]द्वितीयां पिबते रविः[११-११] ' [१२]इति । ज्योतिःशास्त्रप्रक्रियया [१३]त्वादित्यरश्मय एव स्वयमक्षितय एवैकैकां कलां पिबन्त्याच्छादयन्ति । [V]तेन [१४]चान्द्रेण अमृतेन [V]राजा दीप्यमान आदित्यः [V]वरुणः [V]बृहस्पतिः इत्येवमादयः [V]भुवनस्य गोप्तारो देवाः [V]नः अस्मान् रोगग्रस्तान् रोगं निवार्य [V]आ [V]प्याययन्तु ॥

२२. तं१.तं२.मै– महाप्रभावोऽयं । २३. तं.१.तं२– ' वर्धयन्ति ' नास्ति । २४. तं१.तं२.मै – इममक्षीणम् ।

७–७. क– कीदृशं । ८. आ. क– अक्षीणचन्द्रं । ९. आ.ड– वह्न्यादयः । १०. आ– ' सन्तः ' नास्ति । ११–११. आ– ' द्वितीयां पिबते रविः ' नास्ति । १२. ड.शृं–इत्यादि । १३. हा–त्वादित्यादयः । १४. अ.आ.उ.पा– चन्द्रेण ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राच्यां दिशि त्वमिन्द्रासि राजोतोदीच्यां वृत्रहन् वृत्रहाऽसि ।
यत्र यन्ति स्रोत्यास्तज्(१)जितं ते दक्षिणतो वृषभ एधि हव्यः ॥

प्राच्याम्। दिशि। त्वम्। इन्द्र। असि। राजा।
उत। उदीच्याम्। वृत्रहन्निति वृत्र-हन्। वृत्रहेति वृत्र-हा। असि।
यत्र। यन्ति। स्रोत्याः। तत्(१)। जितम्। ते। दक्षिणतः। वृषभः। एधि। हव्यः॥ ५

"यं कामयेतान्नादः स्यादिति तस्मा एतं त्रिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे" (तैसं २·३·६) इत्यस्याः प्रथमस्याः पुरोनुवाक्या, तृतीयस्याश्च याज्या– 'प्राच्याम्' इति त्रिष्टुप्॥ 'जितं ते' इति तृतीयपादान्तः। हे [v]इन्द्र, [v]त्वम् [v]प्राच्यां [v]दिशि [v]राजा स्वामी [v]असि। [२५v-२५]उत अपि[-२५] च [v]उदीच्याम् अपि अधिराज इत्येव। यतस्त्वं [v]वृत्रहा वृत्रस्य मेघस्य [*-]हन्ता [v]असि मेघं हत्वा उदकेन जीवयसि [२६]जन्तून्, हे [v]वृत्रहन् वृत्रासुरस्य हन्तः। प्रदर्शनार्थं च दिग्द्वयोरुपादानं, सर्वास्वपि दिक्षु त्वमेव राजेति। कथं ज्ञायते इति? आह– [v]यत्र [v]स्रोत्याः नद्यः [v]यन्ति[-*] गच्छन्ति [v]तत् सर्वं त्वया [v]जितं [२७]तत्र सर्वं [v]ते जितं जयः। सर्वत्र च नद्यो यन्ति, तस्मात् सर्वासु दिक्षु त्वं राजासीति। "स्रोतसो विभाषा ङ्यङ्ङ्यौ" (पा ४·४·११३) इति ङ्यः। किं च– [v]वृषभः वर्षयिता कामानाम्। [v]हव्यः हविषा आराध्यः। एवं महानुभावस्त्वं [v]दक्षिणतः [v]एधि भोक्तुं भव। [२८-]हवमर्हतीति हव्यः[-२८]। यद्वा– हविरर्हसि त्वं हविः प्रतिग्रहीतुं दक्षिणतो भव, दक्षिणतो हि स्थापयित्वा [२९]अन्वाहार्यादि दीयते, यथा– "दक्षिणत एत" (आपश्रौ ३·४·२) इति, तद्वदिदं द्रष्टव्यम्॥

प्राच्यामिति॥ "यं कामयेतान्नादः स्यादिति तस्मा एतं त्रिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे" (तैसं २·३·६) इत्यत्र राजेन्द्रहविषः पुरोनुवाक्यारूपां स्वराडिन्द्रहविषो याज्यारूपामुभयाकारामृचं पठति– 'प्राच्यां दिशि त्वमिन्द्रासि राजोतोदीच्यां वृत्रहन् वृत्रहाऽसि। यत्र यन्ति स्रोत्यास्तज्जितं ते दक्षिणतो वृषभ एधि हव्यः' इति॥ हे [v]इन्द्र, [v]त्वं [v]प्राच्यां [v]दिशि [v]राजा अधिपतिः [v]असि। अपि च, हे [v]वृत्रहन्, [v]उदीच्यां [v]वृत्रहा वैरिघातकः [v]असि। किं च [v]स्रोत्याः नद्यः [v]यत्र [v]यन्ति [v]तत् सर्वं [v]ते [v]जितम्। नद्यो हि सर्वासु दिक्षु प्रवहन्ति। अतः सर्वत्र तव विजय इत्यर्थः। किं च त्वं [v]वृषभः कामानां वर्षयिता [v]हव्यः होमयोग्यः सन् [v]दक्षिणतः [v]एधि आहवनीयस्य दक्षिणभागे स्थितो भव। तत्र स्थित्वा हि ऋत्विग्भिर्हविर्दीयते॥

२५–२५. तं१तं२.मै– अपि च। *–* [तं१.तं२– 'हन्तासि.....नद्यः यन्ति' इत्ययं भागो नास्ति।]। २६. तं१तं२.मै–'जन्तून्' नास्ति। २७. मै– यत्र यत्र तत्। २८–२८. मै–हविः भान्ति (१) हव्यः; तं१.तं२.पं२–'हवमर्हतीति हव्यः' नास्ति। २९. तं१.तं२.मै– आहार्यादि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्रो॑ जयाति॒ न परा॑ जयाता अधि॒राजो॒ राज॑सु राजयाति।
विश्वा॒ हि भूयाः॑ पृत॒ना अ॒भिष्टी॑रु॒पसद्यो॑ नम॒स्यो॑ यथाऽस॑त्॥

इन्द्रः॑। ज॒या॒ति॒। न। परा॑। इति॑। ज॒या॒तै॒। अ॒धि॒राज॒ इत्य॑धि-राजः॑। राज॑स्विति॒ राज॑-सु। रा॒ज॒या॒ति॒। विश्वाः॑। हि। भूयाः॑। पृ॒त॒नाः॑। अ॒भिष्टीः॑। उ॒पसद्य॒ इत्यु॑प-सद्यः॑। न॒म॒स्यः॑। यथा॑। अस॑त्॥

५ अथ प्रथमस्य याज्या, द्वितीयस्य पुरोऽनुवाक्या– 'इन्द्रः' इति त्रिष्टुप्॥ [V]इन्द्रः सर्वदा [V]जयाति जयति [V]न तु कदाचिदपि [V]परा [V]जयातै पराजयं न प्रतिपद्यते। लेट्याडागमः (पा ३·४·९४), "विपराभ्यां जेः" (पा १·३·१९) इत्यात्मनेपदम्, "वैतोऽन्यत्र" (पा ३·४·९६) इत्यैकारः। अपि च [V]अधिराजः अधिकं राजमानः, अधिकदीप्तिः। [V]राजसु दीप्तिमत्सु चन्द्रादिषु मध्ये यो नाम कश्चिद्राजति तं [V]राजयाति तस्मादयं जयतीति। ण्यन्तात् १० लेटि पूर्ववदाडागमः (पा ३·४·९४)। किं च– [V]विश्वाः [V]पृतनाः संग्रामान् [V]अभिष्टीः आभिमुख्येनागच्छन्तीः। इषेर्गत्यर्थत्वात् कर्तरि क्तिन्, "मन्त्रे वृष°" (पा ३·३·९६) इति क्तिन उदात्तत्वम्, शकन्ध्वादित्वात् पररूपत्वम् (पा ६·१·९४ वा ४)। इच्छतेर्वा, आभिमुख्येन आगन्तुमिच्छन्तीः। ईदृशीः सर्वाः पृतनाः [V]उपसद्यः [V]भूयाः भूयात्। [३०]प्रथमत्वेन नतिः[३०]। उपसीदतीत्युपसद्यः। "कृत्यल्युटो बहुलम्" (पा ३·३·११३) इति कर्तरि यत्। उपसदनम् १५ उपरोधनम्। षष्ठ्यभावश्छान्दसः। [V]यथा अयमिन्द्रः सर्वैः [V]नमस्यः नमस्कार्यः [V]असत् भवेत्। लेट्यडागमः, पूर्वत्र "हि च" (पा ८·१·३४) इति निघाताभावः। उत्तरत्र [३१]यद्वृत्तयोगात् (पा ८·१·६६)। [३२]नमःशब्दयोगात् "नमोवरिवश्चित्रङः°" (पा ३·१·१९) इति क्यच्। तदन्तात् "अचो यत्" (पा ३·१·९७)। यद्वा– नमस्यः नमस्कारार्हः। "तदर्हति" (पा ५·१·६३) इति छान्दसो यत्। तथा विश्वाः पृतनाः अभिभवत्विति। यद्वा– यथा[३३] विश्वाः

२० **इन्द्र इति॥ राजेन्द्रहविषो याज्या, अधिराजेन्द्रहविषः पुरोनुवाक्येत्युभयरूपामृचं पठति– 'इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयाति। विश्वा हि भूयाः पृतना अभिष्टीरुपसद्यो नमस्यो यथाऽसत्' इति॥ [V]इन्द्रः सर्वत्र जयत्येव [V]न तु क्वापि पराजयते, सर्वेषु [V]राजसु अधिको राजा भूत्वा सर्वानन्यान् [V]राजयाति, अराज्ञामपि [V]राज्यप्रदानेन राजत्वं संपादयति। किं च सर्वेषां राज्ञाम् [V]उपसद्यः शरण्यो नमस्कारार्हश्च [V]यथा [V]असत् येन प्रकारेणासि तथा [V]विश्वाः [V]पृतनाः परकीयसेनाः [V]अभिष्टीः २५ अभिभवितुं समर्थः [V]भूयाः॥**

३०–३०. तं१,तं२,पं२–प्रथमत्वेन नतीः; [मै–तलटिप्पण्याम्–'प्रथमत्वेनानुतीः]; मै४–'प्रथमत्वेन नतिः' नास्ति। ३१. तं१,तं२,मै–यच्छब्दयोगात्। ३२–३२. मै४– नमःशब्दात्। ३३. तं१,तं२, मै– 'यथा' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

अस्येदेव प्र रिरिचे महित्वं दिवः पृथिव्याः पर्यन्तरिक्षात् ।
स्वराडिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥

अस्य । इत् । एव । प्रेति । रिरिचे । महित्वमिति महि - त्वम् ।
दिवः । पृथिव्याः । परीति । अन्तरिक्षात् ॥
स्वराडिति स्व - राट् । इन्द्रः । दमे । एति । विश्वगूर्त इति विश्व - गूर्तः । ५
स्वरिः । अमत्रः । ववक्षे । रणाय ॥

पृतनाः अभिभूयात् । विध्यादिलिङि (पा ३·३·१६१) शपो लुक् । तथा च सर्वैर्नमस्यो भवेत्, तदनुरूपं जयति, न च पराजयते, सोऽयस्मान् अन्नादान् करोत्विति ॥

अथ तत्रैव द्वितीयस्य याज्या, तृतीयस्य पुरोऽनुवाक्या—' अस्येत् ' इति त्रिष्टुप् ॥ [v]अस्य [v]एव इन्द्रस्य । [v]इत् इति पादपूरणे । [v]महित्वं महत्त्वं [v]प्र [v]रिरिचे [३४]प्ररिच्यते । प्रशब्दो धात्वर्थस्य १०
निवृत्तिमाचष्टे, यथा प्रस्मरणं प्रस्थानमिति । एवं रेकनिवृत्तिः प्ररेकः पूरणम् । कुतः प्ररिरिचे ? [v]दिवः [v]पृथिव्याः [v]अन्तरिक्षात् च । [v]परि उपरि । अध्यर्थे परिशब्दः । दिवं पृथिवीम् अन्तरिक्षं च अतीत्य प्र रिरिचे । छान्दसो लिट् (पा ३·४·६) । [v]स्वराट् स्वायत्तदीप्तिः, स्वयं राजतीति स्वराट्, [v]दमे दमविषये दमयितव्ये स्वराट् । दमेः घञि " नोदात्तोपदेशस्य° " (पा ७·३·३४) इति वृद्ध्यभावः । [v]विश्वगूर्तः सर्वस्मिन् काले उद्गूर्णः । दासीभारादिर्द्रष्टव्यः १५
(पा ६·२·४२), बहुव्रीहिस्वरस्योपलक्षणत्वात् " बहुव्रीहौ विश्वं संज्ञायाम् " (पा ६·२·१०६) इत्येतद्भवति । यद्वा— विश्वमायुधादिकं गूर्तमुद्यतं यस्येति बहुव्रीहिः । " नसत्तनिषत्त° " (पा ८·२·६१) इत्यत्र गूर्तशब्दो निपातितः । [v]स्वरिः स्वरणीयः कीर्तनीयः । स्वृ शब्दे, " अच इः " (उ ५८८) इतीप्रत्ययः । [३५]शोभनारिरित्यवग्रहः नेष्यते । [v]अमत्रः अमनकुशलः शत्रुभङ्ग-

अस्येति ॥ अधिराजेन्द्रहविषो याज्या, स्वराडिन्द्रहविषः पुरोनुवाक्येत्युभयरूपामृचं पठति— २०
**' अस्येदेव प्र रिरिचे महित्वं दिवः पृथिव्याः पर्यन्तरिक्षात् । स्वराडिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ' इति ॥ इदेवेत्युभयं मिलित्वाऽवधारणे वर्तते । अपि च ननु चेत्यादिवन्निपातसमुदायस्यै-कार्थत्वम् । प्र रिरिच इत्यत्र प्रशब्दोऽतिशब्दार्थे वर्तते । [r]अस्य [r]इत् [v]एव अस्येन्द्रस्यैव [v]महित्वं महिमा परितः [v]दिवः [v]पृथिव्याः [v]अन्तरिक्षात् च [r]प्र [v]रिरिचे सर्वतो लोकत्रयमतिरिच्य वर्तत इत्यर्थः । किं च [r]इन्द्रः [r]रणाय युद्धार्थम् [v]आ [v]ववक्षे आभिमुख्येन वहति सेनां प्रापयति । कीदृश इन्द्रः ? [r]स्वराट् स्वयमेव २५
राजा न तु परतन्त्रः । [r]दमे गृहे [r]विश्वगूर्तः विश्वानि सर्वाण्यायुधानि गूर्तान्युद्यतानि येनासौ विश्वगूर्तः । युद्धार्थं त्वरया निर्गन्तुं गृहेऽप्युद्यतायुध एव वर्तते, किमु वक्तव्यं रणभूमाविति भावः । स्वरितुं परकीयसेना-नामुपरि गन्तुं शीलमस्येति [r]स्वरिः । [r]अमत्रः अमाद्रोगात् क्षुद्रपादन्नदानेन त्रायत इत्यमत्रः ॥**

३४. मै– प्ररिरिच्यते । ३५. मै.लं– शोभनारिरित्वं नवग्रहः; पं२–शोभनारित्वमनवहात् (?) ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः सुवर्दृशमीशानमिन्द्र तस्थुषः ॥

अभीति । त्वा । शूर । नोनुमः । अदुग्धाः । इव । धेनवः ॥
ईशानम् (२) । अस्य । जगतः । सुवर्दृशमिति सुवः - दृशम् । ईशानम् । इन्द्र । तस्थुषः ॥

५ नादिकुशलः । मात्रारहितोऽमत्रो महानित्येके । अत्र पृषोदरादित्वात् स्वरूपस्वरादिसिद्धिः[३६] (पा ६·३·१०९) । एवं महानुभावोऽयम् [V]इन्द्रः [V]रणाय [V]आ [V]ववक्षे आभिमुख्येन वहति । उक्तं कर्मणः संप्रदानत्वम् । वहेर्लेटि " सिब्बहुलं लेटि " (पा ३·१·३४) इति सिप्, " लोपस्त आत्मनेपदेषु " (पा ७·१·४१) इति तलोपः, " बहुलं छन्दसि " (पा २·४·७६) इति शपः श्लुः । मेघानां संग्रामोत्पादनेन वृष्टिमुत्पाद्य प्रभूतान्नादिना अस्मानन्नादान् करोत्विति ॥

१० अथ " य इन्द्रियकामो वीर्यकामः स्यात् तमेतया सर्वपृष्ठया याजयेत् " (तैसं २·३·७) इत्यस्यां सर्वपृष्ठायामिष्टयां प्रथमस्य " यदिन्द्राय राथन्तराय निर्वपति " (तैसं २·३·७) इत्यस्य प्रथमस्य हविषः पुरोऽनुवाक्या, षष्ठस्य च याज्या—' अभि त्वा ' इति पथ्याबृहती, तृतीयपादस्य द्वादशाक्षरत्वात् ॥ हे [V]शूर विक्रान्त, इन्द्र त्वाम् [V]अभि [V]नोनुमः आभिमुख्येनात्यर्थं नुमः स्तुमः । नौतेर्यङ्लुगन्तात् लट् । [V]अदुग्धाः [V]धेनवः [V]इव यथा तावत् [३७]वत्से आभिमुख्येन १५ शब्दयन्ति । कीदृशम् ? [V]ईशानम् ईश्वरम् [V]अस्य [V]जगतः जङ्गमस्य [V]तस्थुषः स्थावरस्य च [V]सुवर्दृशं स्वर्गाख्यस्य परमसुखस्य द्रष्टारम् । स त्वमिन्द्रियं वीर्यं चास्मभ्यं देहीति ॥

अथ तस्यैव प्रथमस्य याज्या, " इन्द्राय बार्हताय " (तैसं २·३·७) इत्यस्य च पुरोऽनुवाक्या— ' त्वामिद्धि ' इति पूर्ववत् पथ्याबृहती ॥ ' नरः ' इति तृतीयपादान्तः । हे [V]इन्द्र, [V]त्वाम् [V]इत् त्वामेव [V]हवामहे आह्वयामः । [V]वाजस्य अन्नस्य [V]साता सातौ [३८]तन्निमित्तम् २० [३९-]अस्मभ्यं देहि वाजमिति[-३९] त्वामेवाह्वयामः । [V]कारवः स्तोतृत्वेन शिल्पिनः । " कृवापाजि° " (उ १) इत्युणप्रत्ययः । सनेः क्तिनि " जनसनखनां° " (पा ६·४·४२) इत्यात्वम्, " सुपां

अभीति ॥ " य इन्द्रियकामो वीर्यकामः स्यात् तमेतया सर्वपृष्ठया याजयेत् " (तैसं २·३·७) इत्यत्र राथन्तरेन्द्रहविषः पुरोनुवाक्या, रैवतेन्द्रहविषो याज्येत्युभयरूपामृचं पठति— ' अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतः सुवर्दृशमीशानमिन्द्र तस्थुषः ' इति । [V]अदुग्धाः
२५ **[V]धेनवः यथा वत्सान् प्रत्यादरेण हम्भारवं कुर्वन्ति तथा हे [V]शूर इन्द्र, त्वामभितः [V]नोनुमः पुनः पुनः स्तुमः । कीदृशं त्वाम् ? [V]अस्य [V]जगतः जङ्गमस्य प्राणिजातस्य [V]ईशानं [V]तस्थुषः स्थावरस्यापि [V]ईशानं [V]सुवर्दृशं स्वर्गस्य प्रदर्शयितारम् ॥**

३६–३६. मै४– रूपसिद्धिः । ३७. तं१.तं२–वत्सेऽपि, लं–वत्सोऽपि । ३८. मै.मै४–सातिनिमित्तम् । ३९–३९. तं१.तं२.लं–देहि वाजमस्मभ्यमिति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

त्वामिद्धि हवामहे साता वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥
यद्द्यावः इन्द्र ते शतꣳ शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रꣳ सूर्या अनु न जातमष्ट रोदसी ॥

त्वाम् । इत् । हि । हवामहे । साता । वाजस्य । कारवः ॥ ५
त्वाम् । वृत्रेषु । इन्द्र । सत्पतिमिति सत् - पतिम् । नरः । त्वाम् । काष्ठासु । अर्वतः ॥
यत् । द्यावः । इन्द्र । ते । शतम् । शतम् । भूमीः । उत । स्युः । न । त्वा । वज्रिन् । सहस्रम् ।
सूर्याः । अन्विति । न । जातम् । अष्ट । रोदसी इति ॥

सुलुक्° " (पा ७·१·३९) इति सप्तम्या आकारः, " ऊतियूति° " (पा ३·३·९७) इत्यादिना क्तिन उदात्तत्वम् । " हि च " (पा ८·१·३४) इत्याख्यातस्य निघाताभावः । [v]हि १०
यस्मात् वाजस्य [v]लाभाय [v]त्वाम् एवाह्वयामः, [v]यस्माच्च [v]वृत्रेषु अरिषु उपस्थितेषु [v]सत्पतिं सतां पातारं विदुषां पालयितारं [v]त्वाम् एवाह्वयामः [v]नरः सर्वेऽपि वयं मनुष्याः, यस्माच्च [v]त्वां [v]काष्ठासु दिक्षु [v]अर्वतः अरणवतः उदकस्य च सात्यर्थं त्वामेवाह्वयामः, तस्मात् सर्वस्मादभिमत-संपादनेन इन्दियं वीर्यं चास्मभ्यं देहीति ॥

अथ द्वितीयस्य याज्या, तृतीयस्य पुरोऽनुवाक्या— " इन्द्राय वैरूपाय " (तैसं २·३· १५
७) इत्यस्य । ' यद् द्यावः ' इति पूर्ववत् पथ्याबृहती । ' अनु ' इति तृतीयपादान्तः ॥ हे [v]इन्द्र,

---

त्वामिति ॥ राथन्तरेन्द्रहविषो याज्या, बार्हतेन्द्रहविषः पुरोनुवाक्येत्युभयरूपामृचं पठति— ' त्वामिद्धि हवामहे साता वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ' इति ॥ हे [v]इन्द्र, [v]कारवः कर्तारो वयं [v]त्वाम् [v]इत् त्वामेव [v]हवामहे आह्वयामः । किंनिमित्तम् ? [v]वाजस्य [v]साता अन्नस्य दाननिमित्तम् । अत एव सातावितिं सप्तम्यन्ततया छन्दोगाः (सासं १·३·१·५·२) अधीयते । [v]वृत्रेषु वैरिषु २०
प्राप्तेषु [v]सत्पतिं सन्मार्गपालकं [v]त्वाम् आह्वयामः । [v]नरः मनुष्या वयं [v]काष्ठासु सर्वासु दिक्षु [v]अर्वतः शत्रुसेनागतानश्वान् दृष्ट्वा [v]त्वाम् आह्वयामः । हि यस्मादेवं तस्माद्वीर्यप्रदानेनास्मान् पालयेत्यर्थः ॥

यदिति ॥ बार्हतेन्द्रहविषो याज्या, वैरूपेन्द्रहविषः पुरोनुवाक्येत्युभयरूपामृचं पठति—' यद्द्याव इन्द्र ते शतꣳ शतं भूमीरुत स्युः । न त्वा वज्रिन्त्सहस्रꣳ सूर्या अनु न जातमष्ट रोदसी ' इति ॥ हे [v]इन्द्र यद्यपि [v]शतं [v]द्यावः [v]स्युः द्युलोकाः शतसंख्याका भवेयुः, अपि च भूमयोऽपि शतसंख्याका भवेयुः, २५
तथाऽपि शतसंख्याकैरवान्तरविशेषैर्युक्ते [v]ते द्यावापृथिव्यौ [v]जातं त्वाम् [v]अनु [v]न [v]अष्ट जातमात्रं त्वाम् ऐश्वर्येणानुकर्तुं न व्याप्नुतो न शक्नुत इत्यर्थः । तथा यद्यपि [v]सूर्याः सहस्रसंख्याकाः स्युस्तथाऽपि हे [v]वज्रिन् तेजसा त्वामनुकर्तुं [v]न क्षमन्त इत्यभिप्रायः ॥

---

४०. तं१.तं२.लं– ' लाभाय ' नास्ति। ४१–४१. मै– यस्माच्चारिषूपस्थितेषु; मै४–' यस्माच्च वृत्रेषु अरिषु उपस्थितेषु ' नास्ति। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः (३)।
सोतुर्बाहुभ्याꣳ सुयतो नार्वा ॥

पिब। सोमम्। इन्द्र। मन्दतु। त्वा। यम्। ते। सुषाव। हर्यश्वेति हरि - अश्व। अद्रिः (३)।
सोतुः। बाहुभ्यामिति बाहु - भ्याम्। सुयत इति सु - यतः। न। अर्वा ॥

५ [V]ते तव। [V]यत् यद्यपि [V]द्यावः द्युलोकाः [V]शतं [V]स्युः [V]उत अपि च [V]भूमीः भूमयोऽपि यद्यपि [V]शतं स्युः, तथापि [१५]हे [V]वज्रिन्, [V]रोदसी द्यावापृथिव्यौ त्वां [V]जातम्[४३] जातमात्रमपि [V]न [V]अनु [V]अष्ट नाश्नुवाते नानुव्याप्नुतः तवैश्वर्याधारत्वाय न पर्याप्नुतः। तथा यद्यपि [V]सहस्रं [V]सूर्याः स्युः, तथापि ते त्वां तेजसा नान्वश्नुते। अश्नोतेः छान्दसे लङि वचनव्यत्ययेनैकवचनम्, शपो लुक्, "बहुलं छन्दस्यमाङ्योगेऽपि" (पा ६.४.७५) [४४]इत्यडभावः। यद्यपि शतं द्यावः स्युः
१० भूमयश्च, सूर्याश्च सहस्रं, ये रोदसी ये च सूर्याः त इन्द्रं नान्वष्ट। "नपुंसकमनपुंसकेन" (पा १.२.६९) इति नपुंसकस्य शेषः, एकवचनं च ॥

अथ तृतीयस्य याज्या, चतुर्थस्य "इन्द्राय वैराजाय" (तैसं २.३.७) इत्यस्य पुरोऽनुवाक्या– 'पिबा सोमम्' इति विराट् त्रिपदा। हे [V]इन्द्र, [V]सोमं [V]पिब, पीतश्चायं सोमः त्वां [V]मन्दतु तर्पयतु। मदि स्तुतिमोदमदस्वप्नगतिषु; व्यत्ययेन परस्मैपदम्। हे [V]हर्यश्व
१५ हरिततुरङ्ग, [V]ते त्वदर्थं [V]यं सोमम् [V]अद्रिः ग्रावा [V]सुषाव अभिषुतवान्। किं स्वयमेव? नेत्याह– [V]सोतुः अभिषोतुः ऋत्विजः। साधुकारिणि तृन् (पा ३.२.१३४, १३५)। तस्य [V]बाहुभ्यां

वैरूपेन्द्रस्य याज्या, वैराजेन्द्रस्य पुरोनुवाक्येत्युभयरूपा 'कदा चन स्तरीरसि' इत्येषा नात्राऽऽम्नाता किं तु शाखान्तरवशात् [१५]व्याहर्तव्या। सा च प्रथमकाण्डे (तैसं १.४.२२) एव व्याख्याता॥

पिबेति॥ वैराजेन्द्रस्य याज्या, शाक्करेन्द्रस्य पुरोनुवाक्येत्युभयरूपामृचं पठति – 'पिबा
२० सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः। सोतुर्बाहुभ्याꣳ सुयतो नार्वा' इति॥ हे [r]इन्द्र, त्वं [r]सोमं [r]पिब। स च पीतः सोमः [r]त्वा [r]मन्दतु त्वां हर्षयतु। [१६-]हरिनामका अश्वा[-१६] यस्यासौ हर्यश्वः, हे [r]हर्यश्व, [r]ते त्वदर्थम् [r]अद्रिः उपांशुसवनादिरूपः पाषाणः [r]यं सोमं [r]सुषाव अभिषुतवान् तं[१७] पिबेति पूर्वत्रान्वयः। कीदृशोऽद्रिः? [r]सोतुः अभिषोतुर्ऋत्विजः [r]बाहुभ्यां [r]सुयतः सुष्ठु नियमितः। अत एव [r]नार्वा न [१८]त्ववाचीनो नियमनरहितः सोमं यत्र तत्र पातयित्वा विनाशयति। तादृशं सोमं पीत्वा वीर्यं
२५ देहीत्यभिप्रायः॥

४२. मै–'हे' नास्ति। ४३. तं१.तं२.मै.लं– 'जातं' नास्ति। ४४. तं१.तं२.मै.लं–इत्यडागमः।

१५. क.ड – अध्याहर्तव्या। १६–१६. अ.इ.उ.जो.ना.पा.शृं.हा – °नामकावश्वौ। १७. अ,आ.इ.उ.जो.पा– त्वम्। १८. क.ड.शृं.हो१– त्ववाचीनः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥
उदग्ने शुचयस्तव ❀ वि ज्योतिषो ❀–

रेवतीः । नः । सधमाद इति सध - मादः । इन्द्रे । सन्तु । तुविवाजा इति तुवि - वाजाः ।
क्षुमन्तः । याभिः । मदेम ॥
उदिति । अग्ने । शुचयः । तव ॥ वीति । ज्योतिषा ॥ ५

सह अभिषुषाव[४५]। यद्वा– सोतुर्बाहुभ्यां [v]सुयतः सुष्ठु यन्त्रितः, अत एव [v]नार्वा नारणशीलः स्वकार्यकरणे सुप्रतिष्ठितः । यद्वा–अतः न अर्वा न पापः, कार्यविरोधित्वमेव पापम् । अर्तेः "अन्येभ्योऽपि दृश्यन्ते" (पा ३·२·७५) इति वनिप् । ततस्तुष्टस्त्वमस्मभ्यम् अभिमतं देहीति ॥

अथ चतुर्थस्य याज्या, 'कदा चन' इति सूत्रकारवचनात् (द्र. आपश्रौ १९·२३·२; बौश्रौ १३·२९); सैव पञ्चमस्य च "इन्द्राय शाक्वराय" (तैसं २·३·७) इत्यस्य १०
पुरोनुवाक्या । पञ्चमस्य याज्या– 'रेवतीर्नः' इति गायत्री; इयमेव षष्ठस्य च "इन्द्राय रैवताय" (तैसं २·३·७) इत्यस्य पुरोऽनुवाक्या । व्याख्याता चेयम्–"अन्वह मासाः" (तैसं १·७·१३) इत्यत्र । रेवत्यो धनवत्यः, [v]सधमादः[४६] सह माद्यन्त्यः । [v]तुविवाजाः बह्वन्नाः समृद्धान्ना वा अस्माकं [v]सन्तु अस्मदीया वा [v]इन्द्रे सन्तु, ईदृश्यः सन्तु आपो गावो वा । [v]याभिः वयं [v]क्षुमन्तः कीर्तिमन्तः [v]मदेम माद्येमेति ॥ १५

"यश्चक्षुष्कामः स्यात् तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालं सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालं" (तैसं २·३·८) इत्यत्र 'अग्नये भ्राजस्वते' इत्यस्य पुरोनुवाक्या– 'उदग्ने शुचयस्तव' इति गायत्री ॥ व्याख्यातेयं "त्वमग्ने रुद्र" (तैसं

रेवतीरिति ॥ शाक्करेन्द्रस्य याज्या, रैवतेन्द्रस्य पुरोनुवाक्येत्युभयरूपामृचं पठति– 'रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम' इति ॥ रेवत्यो धनवत्यः, [r]सधमादः अस्माभिः २०
सह मादयन्त्यो हर्षयुक्ताः, [r]तुविवाजाः बह्वन्नोपेता आपः [r]नः अस्माकं स्वामिनि [r]इन्द्रे [r]सन्तु अस्माकं सुखाय तिष्ठन्तु । [r]याभिः अद्भिः सह वयं [r]क्षुमन्तः शब्दयन्त इन्द्रं स्तुवन्तः [r]मदेम [१९]हृष्याम ॥

उदिति ॥ "यश्चक्षुष्कामः स्यात् तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपाल[४५] सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालम्" (तैसं २·३·८) इत्यत्राऽऽग्नेये कर्मणि याज्यानुवाक्ययोः प्रतीके दर्शयति– 'उदग्ने शुचयस्तव, वि ज्योतिषा' इति ॥ 'उदग्ने शुचयस्तव शुक्रा' २५
इत्येषा पुरोनुवाक्या । सा च प्रथमकाण्डस्य तृतीयप्रपाठके (तैसं १·३·१४) व्याख्याता । 'वि ज्योतिषा बृहता भात्यग्निः' इत्येषा याज्या । सा तु प्रथमकाण्डस्य द्वितीयप्रपाठके (तैसं १·२·१४) व्याख्याता ॥

४५–४५. तं१.तं२.मै.लं– अद्रिः सुषाव; पं२– अद्रिः त्वां सुषाव । ४६. तं१.तं२.लं– 'सधमादः' नास्ति ।
१९. ड– हृष्यासः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

–दु त्यं जातवेदसꣳ॰

सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥

उदिति । उ । त्यम् । जातवेदसमिति जात - वेदसम् ॥
सप्त । त्वा । हरितः । रथे । वहन्ति । देव । सूर्य ।
शोचिष्केशमिति शोचिः–केशम् । विचक्षणेति वि - चक्षण ।

१·३·१४) इत्यत्र । तस्याः[४७] इह प्रतीकग्रहणम् । हे [v]अग्ने, ते [v]तव [v]शुक्राः निर्मलाः [v]शुचयः रश्मयः [v]भ्राजन्तः राजन्तः [v]उत् [v]ईरते उद्गच्छन्ति तव । किं च [v]तव [v]अर्चयः तेजांसि [v]ज्योतींषि ग्रहनक्षत्राणि भवन्ति । यद्वा– तवार्चयितारः ज्योतींषि भवन्तीति ॥

तत्रैव याज्या 'वि ज्योतिषा' इति त्रिष्टुप् ॥ इयमपि "कृणुष्व पाजः" (तैसं १·२·१४) इत्यत्र व्याख्याता । [४८]प्रतीकमात्रमत्रास्या गृह्यते । अयम् [v]अग्निः [v]बृहता [v]ज्योतिषा [v]वि [v]भाति विविधं भाति, [v]विश्वानि च [v]महित्वा माहात्म्यानि [v]आविः [v]कृणुते आविष्करोति । [v]अदेवीः अदेवनशीलाश्च [v]दुरेवाः दुःखेन गन्तव्याः [v]मायाः [v]प्र [v]सहते प्रकर्षेणाभिभवतु । किं च– [v]शृङ्गे गोशृङ्गस्थानीये ज्वाले [v]शिशीते निशितीकरोति । किमर्थम् ? रक्षसो विनाशार्थमिति ॥

अथ [४९]सौर्यस्य चरोः पुरोऽनुवाक्या– 'उदु त्यम्' इति गायत्री ॥ व्याख्याता [५०]चेयं [५१]ग्रहप्रश्ने (तैसं १·४·४३) । प्रतीकग्रहणमिदम् । [v]देवं [v]सूर्यं [v]जातवेदसं जातानां वेदितारं देवं [v]केतवः रश्मयः [v]उत् [v]वहन्ति विश्वस्य लोकस्य [v]दृशे दर्शनार्थमिति ॥

[५२]तत्रैव पुरोऽनुवाक्या विकल्प्यते–'सप्त त्वा' इति गायत्री ॥ हे [v]देव [v]सूर्य, त्वां [v]सप्त सर्पणशीलाः [v]हरितः रसभरणाः रश्मयः [v]रथे रंहसो रमन्तेऽस्मिन् आप इति वा, रथे मण्डले [v]वहन्ति । [v]शोचिष्केशं दीप्तरश्मिं केशस्थानीया रश्मयः केशाः । हे [v]विचक्षण प्रकाशक ।

उदिति ॥ सौर्ये कर्मणि पुरोनुवाक्यायाः प्रतीकं दर्शयति–'उदु त्यं जातवेदसम्' इति ॥ सेयं प्रथमकाण्डस्य चतुर्थप्रपाठके व्याख्याता (तैसं १·४·४३) ॥

सप्तेति ॥ तत्रैव याज्यामाह– 'सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण' इति ॥ हे [v]सूर्य [v]देव, त्वां [v]सप्त [v]हरितः अश्वाः [v]रथे [v]वहन्ति । कीदृशं त्वाम् ? [v]शोचिष्केशं शोचींषि दीप्यमानाः केशस्थानीया रश्मयो यस्य तादृशम् । हे [v]विचक्षण इति सूर्यविशेषणम् ॥

४७. मै– तस्य । ४८. मै– प्रतीकग्रहणमत्रास्याः; मै४ – प्रतीकमात्रमस्याः । ४९. तं१.तं२. मै.लं– सौम्यस्य । ५०. तं१.तं२– इयम् । ५१. मै४– ग्रहप्रकरणे । ५२. तं१.तं२– अत्रैव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषꣳ(४)श्च ॥

चित्रम् । देवानाम् । उदिति । अगात् । अनीकम् । चक्षुः । मित्रस्य । वरुणस्य । अग्नेः ॥
एति । अप्राः । द्यावापृथिवी इति द्यावा - पृथिवी । अन्तरिक्षम् ।
सूर्यः । आत्मा । जगतः । तस्थुषः (४) । च ॥ ५

चष्टिर्दर्शनकर्मा । विविधं चष्टे पश्यतीति विचक्षणः । " अनुदात्तेतश्च हलादेः " (पा ३·२·१४९) इति युच् । स त्वमस्मभ्यं चक्षुर्देहीति ॥

तत्रैव याज्या– ' चित्रम् ' इति त्रिष्टुप् ॥ [v]चित्रं चायनीयं सर्वलोकपूजितं [v]देवानां रश्मीनामिन्द्रादीनां [५३]-वा ऋत्विजाम् [-५३] [v]अनीकं मुखस्थानीयं समूहस्थानीयं वा [v]उत् [v]अगात् उद्गच्छति सर्वात्मकसमष्टिरूपत्वात् । किं च– चक्षुःस्थानीयं ख्यातिकरं वा मित्रादीनाम् । अयं देवः [v]द्यावापृथिवी द्यावापृथिव्यौ [v]अन्तरिक्षं च [v]आ [v]अप्राः [५४]आपूरयति तेजसा । प्रा पूरणे, पुरुषव्यत्ययः । [v]जगतः जङ्गमस्य सर्वस्य [v]तस्थुषः स्थावरस्य सर्वस्य [v]आत्मा [v]सूर्यः एकः प्रेरको वा सर्वस्य तस्मादात्मा; सर्वोपकारकत्वात् । यद्वा– " यश्चायं पुरुषे । यश्चासावादित्ये । स एकः " (तैउ २·८) इति दर्शनात् आत्मा सर्वस्य । अत्राचार्येण " समानी याज्यानुवाक्ये भवत " (तैसं २·३·८) इत्येतदनुसारेण [५५]उक्तम्– " उदग्ने शुचयस्तव, वि ज्योतिषा, उदु त्यं जातवेदसं, चित्रं देवानाम्, [५६]-उदग्ने शुचयस्तव, वि ज्योतिषा-[५६] " (द्र. बौश्रौ १३·३०) इति हविषां याज्यानुवाक्याः; " उदु त्यं जातवेदसं, सप्त त्वा हरितो रथे, चित्रं देवानाम् इति पिण्डान् प्रयच्छति " (बौश्रौ १३·३०) इति ॥

चित्रमिति ॥ तत्रैव विकल्पितां याज्यामाह – ' चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ' इति ॥ [v]चित्रं रक्तश्वेतादि-विविधवर्णं [v]देवानां रश्मीनाम् [v]अनीकं सैन्यसदृशं मण्डलम् [v]उदगात् उदेति । कीदृशम् ? मित्रादिदेवोपलक्षितस्य कृत्स्नस्य प्राणिजातस्येन्द्रियाधिष्ठातृत्वाच्चक्षुःस्थानीयम् । तन्मण्डलस्थः [v]सूर्यः [v]जगतः जङ्गमस्य [v]तस्थुषः स्थावरस्य [v]च [v]आत्मा । स लोकत्रयम् [v]आऽप्राः सर्वतः पूरितवान् ॥

५३–५३. मै४– ऋत्विजां वा । ५४–५४. पं२.मै४– आऽप्रात् आपूरयति; मै– आ (प्रागाः) पूरयति । ५५. तं१.तं२.मै.लं–' उक्तम् ' नास्ति । ५६–५६. मै– ' उदग्ने शुचयस्तव वि ज्योतिषा ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[काम्येष्टियाज्यापुरोनुवाक्याः

विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः ॥

विश्वे । देवाः । ऋतावृध इत्यृत - वृधः । ऋतुभिरित्यृतु - भिः । हवनश्रुत इति हवन - श्रुतः । जुषन्ताम् । युज्यम् । पयः ॥

अथ " वैश्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकामः " (तैसं २·३·९) [५७]इत्यस्याः पुरोऽनुवाक्या– ' विश्वेदेवा ऋतावृधः ' इति गायत्री ॥ [V]विश्वे [V]देवाः [V]ऋतावृधः ऋतस्य यज्ञस्य सत्यस्य वा वर्धयितारः । ण्यन्तात् क्विप्, " बहुलमन्यत्रापि° " (उ १९०) इति णिलुक्, " अन्येषामपि दृश्यते " (पा ६·३·१३७) इति पूर्वपदस्य दीर्घत्वम् । [V]हवनश्रुतः आह्वानस्य श्रोतारः आह्वानप्रयोजनस्य कर्तार इति [५८]यावत् । ह्वयतेर्लेटि " बहुलं छन्दसि " (पा ६·१·३४) इति संप्रसारणम् । ते [V]ऋतुभिः कालावयवैः पर्वादिभिः सह [V]जुषन्तां सेवन्तां [V]युज्यं [५९]योग्यं [V]पयः पयसि [६०]चरुम् ; अव एव वचनादिति ॥

तत्रैव याज्या– ' विश्वे देवाः शृणुत ' इति त्रिष्टुप् ॥ हे [V]विश्वे [V]देवाः, [V]मे मम [V]इमं [V]हवम् आह्वानं [V]शृणुत । [V]ये यूयम् [V]अन्तरिक्षे [V]स्थ, [V]ये च [V]उप समीपे पृथिव्यां स्थ, ये च दिवि द्युलोके स्थ । [V]ये च [V]अग्निजिह्वाः[६१] अग्नेः जिह्वायां स्थिताः [६२]हविर्भागार्हाः । तात्स्थ्यात् ताच्छब्द्यम् । यद्वा– अग्निर्जिह्वास्थानीयो येषाम् । छान्दसमन्तोदात्तत्वम् । [V]उत [V]वा अपि वा ये

विश्व इति ॥ " वैश्वदेवीꣳ सांग्रहणीं निर्वपेद्ग्रामकामः " (तैसं २·३·९) इत्यत्र पुरोनुवाक्यामाह– ' विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः ' इति ॥ [V]विश्वे [V]देवाः [V]युज्यं योग्यं [३०V]पयः क्षीरवत् सारभूतं हविः [V]जुषन्ताम् । कीदृशा देवाः ? [V]ऋतावृधः ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारः, [V]ऋतुभिः [V]हवनश्रुतः तैस्तैर्ऋतुभिरुपलक्षिते कर्मण्याह्वानस्य श्रोतारः ॥

विश्वे इति ॥ तत्रैव याज्यामाह– ' विश्वे देवाः शृणुतेमꣳ हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ । ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम् ' इति ॥ हे [V]विश्वे [V]देवाः, [V]मे मदीयम् [V]इमं [V]हवम् आह्वानं [V]शृणुत । [V]ये यूयम् [V]अन्तरिक्षे [V]स्थ अन्तरिक्षलोके स्थिताः [V]ये [३१]च [V]उप समीपे पृथिव्यां [३२]स्थिता ये च [V]द्यवि द्युलोके स्थ, [V]ये च [V]अग्निजिह्वाः अग्निरेव जिह्वाः येषां ते अग्निजिह्वाः [३३]-अग्निद्वारेण हविषः स्वीकर्तारः-[३३] [२४-V]उत [V]वा अन्येऽपि वा [V]यजत्राः यष्टव्याः ते सर्वेऽपि [V]अस्मिन् [V]बर्हिषि यज्ञे [V]आसद्य उपविश्य [V]मादयध्वं हृष्टा भवत यजमानं हर्षयध्वम्-[२४] ॥

५७. तं१.तं२– इत्यस्य । ५८. तं१.तं२.मै.लं – ' यावत् ' नास्ति । ५९. मै४ – ' योग्यं ' इत्यस्यानन्तरं ' युजि साधु ' । ६०. मै४– चरुः । ६१. तं.१.तं२.मै– ' अग्निजिह्वाः ' इत्यस्यानन्तरं ' ये च ' । ६२. मै– हविर्भाजः ।

२०. ड–' पयः ' नास्ति । २१. ड.हो१– च यूयम् । २२. ड–स्थ । २३–२३. हो१–अग्निद्वारा हविः स्वीकुर्वन्तु; शृं–अग्निद्वारा हविः स्वीकुर्वन्ति । २४–२४. ड.शृं–किं तु कालान्तरे यष्टव्याः ते सर्वेऽपि यूयं हवं शृणुतेति पूर्वत्रान्वयः । श्रुत्वा च अस्मिन् बर्हिषि यज्ञे आसद्य उपविश्य मादयध्वं यजमानं हर्षयध्वम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

विश्वे देवाः शृणुतेमꣳ हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम् ॥ १४ ॥

[तदीशानमद्रिस्तस्थुषश्चि ।] [देवा मनुष्या देवासुरा अब्रुवन् देवासुरास्तेषां गायत्री प्रजापतिस्ता यत्राग्ने गोभिश्चियत्रा मारुतं देवा वसव्या अग्ने मारुतमिति देवा वसव्या देवाः शर्मण्याः सर्वाणि त्वष्टा हतपुत्रो देवा वै राजन्यान्नवोनवश्चतुर्दश ॥] [देवा मनुष्याः ५
प्रजां पशून् देवा वसव्याः परिदध्यादिदमस्म्यष्टाचत्वारिꣳशत् ॥] [देवा मनुष्या मादयध्वम् ॥]

विश्वे । देवाः । शृणुत । इमम् । हवम् । मे । ये । अन्तरिक्षे । ये । उपेति । द्यवि । स्थ ॥
ये । अग्निजिह्वा इत्यग्नि-जिह्वाः । उत । वा । यजत्राः । आसद्येत्या-सद्य । अस्मिन् । बर्हिषि ।
मादयध्वम् ॥ १४ ॥
[मैसं ..... कासं .....] १०

[v]यजत्राः [६३]यजनीयाः पूजामात्रभाजः। ते सर्वेऽपि यूयम् [v]अस्मिन् [v]बर्हिषि यज्ञे [v]आसद्य आसित्वा [v]मादयध्वं तृप्यत। मद तृप्तियोगे चौरादिकः, अनुदात्तेत्, तृप्ताश्चास्माकं ग्रामं साधयतेति ॥

इति श्रीभट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये द्वितीये काण्डे
चतुर्थे प्रश्ने चतुर्दशोऽनुवाकः समाप्तः ॥ १५
समाप्तश्च प्रपाठकः ॥

अत्र विनियोगसंग्रहः—

" आदित्येष्टौ नवो द्वे तु प्राच्यामित्यादिकं त्रय (चाष्टक) म्।
[२५]राजादिगुणकेन्द्रस्य पुरोडाशसमूहके ॥ १ ॥
आग्नेय उदवित्र्यो द्वे उदु त्यं जातवेदसम्।
सप्त चित्रं त्रयं सौर्ये सांग्रहण्या उभे इमे ॥ २०
विश्वे देवा इति प्रोक्ता मन्त्राः [२६]सप्तदशैव हि ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे चतुर्थप्रपाठके चतुर्दशोऽनुवाकः ॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ २५
इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन
माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

६३. मै४– पूजनीयाः ।

२५. अ.उ.जो.पा.हा– सामादिगुण°। २६. ड.शृं–सप्तदशेह।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(अथ द्वितीयकाण्डे पञ्चमः प्रपाठकः)

हरिः ॐ ।

विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत् स्वस्रीयोऽसुराणां

विश्वरूप इति विश्व-रूपः । वै । त्वाष्ट्रः । पुरोहित इति पुरः-हितः । देवानाम् । आसीत् । स्वस्रीयः । असुराणाम् ।

अथ दर्शपूर्णमासब्राह्मणं प्राजापत्यं काण्डं, विश्वरूप इत्यादयः षडनुवाकाः । तत्राग्नीषोमीयमेकादशकपालं पूर्णमासे विधास्यन् तदर्थमर्थवादं प्रस्तौति— [v]विश्वरूपः नाम त्वष्टुः पुत्रः [v]देवानां [v]पुरोहितः [v]आसीत् । " पुरोऽव्ययम् " (पा १·४·६७) इति गतित्वात् " गतिरनन्तरः " (पा ६·२·४९) इति गतेः प्रकृतिस्वरत्वम् । [v]असुराणां [v]स्वस्रीयः स्वसुः पुत्रः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
द्वितीयादिचतुर्थान्तैस्त्रिभिरेतैः प्रपाठकैः ।
[१]-उक्ताः काम्येष्टयस्तासां प्रकृतिस्त्वथ वर्ण्यते ॥ २ ॥
पौरोडाशिककाण्डे तु मन्त्रव्याख्यानमीरितम्[-२] ।
विधयो मन्त्रसंबद्धा बहवः प्रतिपादिताः ॥ ३ ॥
[२]तच्छेषविधयो वाच्या व्याख्येया हौत्रमन्त्राकाः ।
*अतोऽनुब्राह्मणं त्वत्र वर्ण्यते पाठकद्वये ॥ ४ ॥
प्रपाठके पञ्चमेऽनुवाका द्वादश संस्थिताः ।
आध्वर्यवं पूर्वषट्के [३]-विधिशेषो विविच्यते[-३] ॥ ५ ॥
[४]-व्याख्यानं हौत्रमन्त्राणां तद्विधिः प्राय उत्तरे[-४] ।
अग्नीषोमीयहविषो[५] [६]विधिस्तन्नाऽऽद्ययोर्द्वयोः ॥ ६ ॥

विश्वरूप इति ॥ [७]तत्र द्वितीयानुवाके पौर्णमासीगतमग्नीषोमीयपुरोडाशं विधित्सुस्तदुपोद्घातत्वेन प्रथमानुवाके कांचिदाख्यायिकामाह— ' विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत् स्वस्रीयोऽसुराणां तस्य त्रीणि शीर्षाण्यासन्त्सोमपानꣳ सुरापानमन्नादनꣳ स प्रत्यक्षं देवेभ्यो भागमवदत् परोक्षमसुरेभ्यः सर्वस्मै वै प्रत्यक्षं भागं वदन्ति यस्मा एव परोक्षं वदन्ति तस्य भाग उदितस्तस्मादिन्द्रोऽबिभेदीद्दङ्वै राष्ट्रं वि पर्यावर्तयतीति तस्य वज्रमादाय शीर्षाण्यच्छिनद्यत् सोमपानमासीत् स कपिञ्जलोऽभवत् यत् सुरापानꣳ स कलविङ्को यदन्नादनꣳ स तित्तिरिः ' इति ॥ विश्वानि [८]बहूनि रूपाणि यस्यासौ [v]विश्वरूपः । त्रिभिः शिरोभिरुपेतत्वात्

१. आ— उक्ताः काम्येष्टयः काण्डे द्वितीये परतस्तु यत् । आद्ये दर्शपूर्णमासमन्त्रव्याख्यानमीरितम् ।
२. शृं— तत् केषां विधयो; ड—तच्छेषा विधयो । * ['प्रकृतब्राह्मणम्' इति कलकत्तामुद्रितपुस्तके पाठान्तरम्] ।
३–३. आ— याज्या उत्तम ईरिताः । ४–४. आ— हौत्रमन्त्रविधिव्याख्याधारादिप्रायमन्तरे । ५. °मीयपुरोडाश° । ६. ड.शृं.हो— विधिरत्रा° । ७. ड.शृं.हो— अत्र । ८. आ.ड— बहुविधानि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्य त्रीणि शीर्षाण्यासन्त्सोमपानꣳ सुरापानमन्नादनꣳ स प्रत्यक्षं देवेभ्यो भागमवदत् परोक्षमसुरेभ्यः सर्वस्मै वै प्रत्यक्षं भागं वदन्ति यस्मा एव परोक्षं वदन्ति तस्य भाग उदितस्तस्मादिन्द्रोऽबिभेदीदृङ् वै राष्ट्रं वि पर्यावर्तयतीति

तस्य। त्रीणि। शीर्षाणि। आसन्। सोमपानमिति सोम-पानम्। सुरापानमिति सुरा-पानम्। अन्नादनमित्यन्न-अदनम्। सः। प्रत्यक्षमिति प्रति-अक्षम्। देवेभ्यः। भागम्। अवदत्। परोक्षमिति परः–अक्षम्। असुरेभ्यः। सर्वस्मै। वै। प्रत्यक्षमिति प्रति-अक्षम्। भागम्। वदन्ति। यस्मै। एव। परोक्षमिति परः–अक्षम्। वदन्ति। तस्य। भागः। उदितः। तस्मात्। इन्द्रः। अबिभेत्। ईदृङ्। वै। राष्ट्रम्। वीति। पर्यावर्तयतीति परि-आवर्तयति। इति।

"स्वसुश्छः" (पा ४.१.१४३) इति छः, ईयादेशश्च (पा ७.१.२)। [v]तस्य सोमपानादीनि [v]त्रीणि [v]शीर्षाणि [v]आसन्। "शीर्षच्छन्दसि" (पा ६.१.६०) इति शीर्षादेशः। सोमः [1]पीयते अनेन इति करणे ल्युट्। एवं सर्वत्र। [v]सः [v]देवेभ्यः [v]प्रत्यक्षं [v]भागम् [v]अवदत् यूयमेव भागार्हा इति देवानां संनिधौ देवानवदत्। प्रत्यक्षपरोक्षशब्दौ व्याख्यातौ (तैसं १.७.३)। [v]असुरेभ्यः तु [v]परोक्षं भागमवदत्, स्वस्रीयत्वात् तेषामसंनिधावेवासुरा भागार्हा इत्यवदत्। अथैवं कुर्वतोऽस्य दुष्टाभिप्रायत्वमस्तीत्याह– सर्वस्मा इति। यस्मै भागं दास्यन् भवति तस्मै [v]सर्वस्मै [v]*प्रत्यक्षं [v]भागं [2-v]वदन्ति लौकिकाः[-2]। त्वमेव सर्वमर्हसि इति संनिधौ [3]अपहृदया एव वदन्ति। तस्मात् [v]यस्मै [v]एव [v]परोक्षं [v]वदन्ति असंनिधौ स्वयमेव [4]भागभोक्तृत्वेन बहु मन्यते [4v]तस्य [v]भाग [v]उदितः उक्तः उद्भूतः सुनिश्चितः इति यावत्, अन्योऽनुक्तप्रायः। यद्वा– हस्तस्थप्रायः। "कर्षात्वतो घञोऽन्त उदात्तः" (पा ६.१.१५९) इति भागशब्दः अन्तोदात्तः। [v]तस्मात् तथा कुर्वतो विश्वरूपात् [v]इन्द्रः [v]अबिभेत् [v]ईदृक् ईदृशमाचरन् [5-v]राष्ट्रम् अपि[-5] अस्माकमपि [v]वि [v]पर्यावर्तयति [6]अस्मत्तोऽपहृत्य असुरेभ्यो दास्यतीति ॥

---

[v]बहुरूपत्वम्। यो विश्वरूपनामकस्त्वष्टुः पुत्रः सः [v]देवानां [v]पुरोहितः न तु शरीरसंबन्धी, [v]असुराणां तु भागिनेयः। स च [10]सात्त्विकेन शिरसा सोमं पिबति। [11]राजसेन अन्नमत्ति। [12]तामसेन सुरां पिबति। [v]सः च यज्ञमण्डपेषु गत्वा सर्वेषां श्रोत्रप्रत्यक्षं यथा भवति तथा [v]देवेभ्यः हविर्भागो युक्त इति [13]वदति। सर्वेषां [v]परोक्षं यथा भवति तथा रहस्ये ऋत्विग्भिः सह अयं हविर्भागः [v]असुरेभ्यः [14]एव युक्तः

---

१. मै– प्रीयते। * [संभावितः पाठः, मै-मुद्रितपुस्तके लिखितपुस्तकेषु 'अप्रत्यक्षम्' इति।]। २५
२–२. मै– वदति लौकिकः। ३. मै.– अहृदया। ४. तं१.तं२.तै.मै.लं– भागभाक्त्वेन। ५. पं२. लं– तस्मात्। ६–६. तं१.तं२.तं३– राष्ट्रमभि विट्। ७–७. तं१.तं२.तं३– अस्मात् तां प्रापयित्वा।

९. आ.ड– विश्वरूपत्वम्। १०. ड – सात्विक°। ११. ड.शृं.हो१ – राजस°। १२. ड.शृं.हो१– तामस°। १३. शृं– वक्ति। १४. आ– 'एव' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्य वज्रमादाय शीर्षाण्यच्छिनद्यत् सोमपान(१)मासीत् स कपिञ्जलोऽभवद्यत् सुरापानꣳ स कलविङ्को यदन्नादनꣳ स तित्तिरिस्तस्याञ्जलिना ब्रह्महत्यामुपागृह्णात् ताꣳ संवत्सरमबिभस्तं भूतान्यभ्यक्रोशन् ब्रह्महन्निति

तस्य। वज्रम्। आदायेत्या - दाय। शीर्षाणि। अच्छिनत्। यत्। सोमपानमिति सोम - पानम्
५ (१)। आसीत्। सः। कपिञ्जलः। अभवत्। यत्। सुरापानमिति सुरा - पानम्। सः। कलविङ्कः। यत्। अन्नादनमित्यन्न - अदनम्। सः। तित्तिरिः। तस्य। अञ्जलिना। ब्रह्महत्यामिति ब्रह्म - हत्याम्। उपेति। अगृह्णात्। ताम्। संवत्सरमिति सं - वत्सरम्। अबिभः। तम्। भूतानि। अभीति। अक्रोशन्। ब्रह्महन्निति ब्रह्म - हन्। इति।

तस्येत्यादि ॥ गतम्। [v]कपिञ्जलः [c]अपाश्याति (?)। [१v]कलविङ्कः चटकविशेषः।
१० [v]तित्तिरिः [१c]चिच्चिदिति [११]कटुकरावीति। अञ्जलिनेति। [१२]बुद्धिपूर्वकृतत्वख्यापनार्थम् अञ्जलिग्रहणम्। [v]तस्य इति संबन्धसामान्ये षष्ठी, तत्संबन्धेन [१३]उत्थिता ब्रह्महत्येति। तस्य वधेनेति वा सामर्थ्याल्लभ्यते। " हनस्त च " (पा ३·१·१०८) इति हन्तेः क्यप्। तामिति। अकृतप्रायश्चित्त एव [v]तां [v]ब्रह्महत्यां [v]संवत्सरं भूतवान्। [v]ब्रह्महन् [v]इति ब्राह्मणं हतवानिति, किंरूपमिदं तवेति [v]तं [v]भूतानि भूतजातान्यनिन्दन्। यद्वा– तस्याभिमुखे स्थित्वा भूतानि
१५ ब्रह्महन्नित्याक्रोशमकुर्वन्। ततः [v]सः इन्द्रः [v]पृथिवीम् [v]उप [v]असीदत् [१४c]उपसन्न आह[-१४] अस्या

[१५]अतस्तानेवोद्दिश्य प्रयच्छत [११]इत्येवं वदति। तेषामृत्विजां तस्मिन् परोक्षवादे विश्वास उत्पन्नः। तस्य परोक्षवादस्य हृदयपूर्वकत्वात्। लोकेऽपि तवायं भाग इति [v]सर्वस्मै पुरुषाय प्रीतिमुत्पादयितुं तत्समीपे सर्वे [v]वदन्ति। हृदयपूर्वकत्वाभावान्न [१७c]स उदितो भवति[-१७]। [v]परोक्षं यदर्थं तु भाग उच्यते [v]तस्य एव [v]भागः [१८]हृदयपूर्वकत्वात् [v]उदितः भवति। एवं वृत्तान्तं श्रुत्वा [v]तस्मात् विश्वरूपात् [v]इन्द्रः [v]अबिभेत्।
२० किमिति ? [१९c]ईदृशः स्वामिद्रोही सर्वथा कालान्तरे[-१९] [v]राष्ट्रं वि [v]पर्यावर्तयति [v]इति। अस्मत्तोऽपनीयासुरेभ्यः समर्पणं विपर्यावृत्तिः। ततः तस्य द्रोहिणः शिरःसु छिन्नेषु तानि शिरांसि पक्षित्रयरूपेणोत्पन्नानि॥

तस्येति ॥ तस्येन्द्रस्य प्रत्यवायं जनापवादं च दर्शयति–' तस्याञ्जलिना ब्रह्महत्यामुपागृह्णात् ताꣳ संवत्सरमबिभस्तं भूतान्यभ्यक्रोशन् ब्रह्महन्निति ' इति॥ [v]तस्य [१०]असुरस्य वधेन निष्पन्ना या ब्रह्महत्या ताम् [v]अञ्जलिना स्वीचकार। पापिनां शिक्षायामीश्वरेण नियुक्तानां यमचित्रगुप्तादीनां पुरतोऽञ्जलिं कृत्वा

२५ ८. मै४– अपाक्याती (?)। ९. तं१.तं२.तं३– कलपिङ्गलः। १०. मै.लं– तिरश्चिदीनि (?)। ११. मै४– कटुकं रावी। १२. मै४ – बुद्धिपूर्वकतत्त्व°; तं१.तं२.तं३ – °कृतत्वज्ञापनार्थम्; तं२.तं३– °ज्ञापनार्थम्। १३. मै– आत्मनः; लं– आत्मने। १४–१४. तं३– ' उपसन्न आह ' नास्ति।

१५. इ–इति तत्स्थाने चोद्दिश्य; अ.उ.पा–इति तत्स्थाने वोदिश्य; जो. ना.हा– इत्यतस्ताने°। १६. आ–इति स एवं। १७–१७. ड.शृं.हो१– तत्सत्यम्। १८. ड.शृं.हो१– हृदयपूर्वकम्। १९–१९.
३० आ– ईदृक्स्वामिद्रोहं सर्वथा कृत्वा; ड.ड१.हो– ईदृशस्त्वयं द्रोही...। २०. क.ड.शृं.हो१– विश्वरूपस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स पृथिवीमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृहाणेति साऽब्रवीद्वरं वृणै खातात् पराभविष्यन्ती मन्ये ततो मा परा भूवमिति पुरा ते (२) संवत्सरादपि रोहादित्यब्रवीत् तस्मात् पुरा संवत्सरात् पृथिव्यै खातमपि रोहति वारेवृतꣳ ह्यस्यै

सः । पृथिवीम् । उपेति । असीदत् । अस्यै । ब्रह्महत्याया इति ब्रह्म-हत्यायै । तृतीयम् । प्रतीति । गृहाण । इति । सा । अब्रवीत् । वरम् । वृणै । खातात् । पराभविष्यन्तीति परा-भविष्यन्ती । मन्ये । ततः । मा । परेति । भूवम् । इति । पुरा । ते (२) । संवत्सरादिति सं-वत्सरात् । अपीति । रोहात् । इति । अब्रवीत् । तस्मात् । पुरा । संवत्सरादिति सं-वत्सरात् । पृथिव्यै । खातम् । अपीति । रोहति । वारेवृतमिति वारे-वृतम् । हि । अस्यै ।

ब्रह्महत्यायाः [v]तृतीयं भागं [v]प्रति [v]गृहाण [v]इति । "पूरणाद्भागे तीयादन्" (पा ५·३·४८) इति स्वार्थिकोऽन्प्रत्ययः । षष्ठ्यर्थे चतुर्थी (पा २·३·६२ वा १) । सेत्यादि । किं वृणै । प्राप्तकाले लोट् (पा ३·३·१६३) । [१५-v]खातात् भूमेः[-१५] यत्र मृदं खनति, पराभवो विनाशः पराभविष्यामीति [v]मन्ये, [v]ततः निमित्तात् अहं [v]मा [v]परा [v]भूवम् [v]इति । अथेन्द्रः [v]अब्रवीत्– संवत्सरसमाप्तेः प्राक् तत्र खातम् [v]अपि [v]रोहात् विरोहति । "लेट्यडागमः" (पा ३·४·९४) तस्मादित्यादि । गतम् । [१६]वारोऽभिमतवरलाभः । ततः [v]तृतीयं [v]प्रति [v]अगृह्णात् पृथिवी ब्रह्महत्यायाः ॥

निर्भयः सन् ब्रह्महत्या मया बुद्धिपूर्वकमेव कृतेत्येवमङ्गीचकारेत्यर्थः । प्रायश्चित्तमकृत्वा [v]संवत्सरं निरन्तरं [२१]तां ब्रह्महत्यामङ्गीकृत्यैव तस्थौ । आत्मतत्त्वज्ञानेन पापलेपाभावाद्भीत्यभावस्तस्य युक्तः । अत एव कौषीतकिन इन्द्रवाक्यम् [२२]एवम् आमनन्ति – "यन्मां विजानीयात् । त्रिशीर्षाणं त्वाष्ट्रमहनम् । अरुर्मुखान् यतीन्त्सालावृकेभ्यः प्रायच्छम्" (कौउ ३·१) इत्यादि । दुरितभावेऽपि सर्वप्राणिनः [r]तम् इन्द्रं [r]ब्रह्महन् [r]इति एवं संबोध्याभितस्तस्याऽऽक्रोशं कृतवन्तः ॥

स इति ॥ ततस्तस्य जनापवादस्य परिहारायेन्द्रेणानुष्ठितम् [२३]उपायविशेषं दर्शयति– 'स पृथिवीमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृहाणेति साऽब्रवीद्वरं वृणै खातात् पराभविष्यन्ती मन्ये ततो मा परा भूवमिति पुरा ते संवत्सरादपि रोहादित्यब्रवीत् तस्मात् पुरा संवत्सरात् पृथिव्यै खातमपि रोहति वारेवृतꣳ ह्यस्यै तृतीयं ब्रह्महत्यायै प्रत्यगृह्णात् तत् स्वकृतमिरिणमभवत् तस्मादाहिताग्निः श्रद्धादेवः स्वकृत इरिणे नाव स्येद्ब्रह्महत्यायै ह्येष वर्णः' इति ॥ [r]उपासीदत् उपेत्य प्रार्थितवान् । [r]खातात् [v]पराभविष्यन्ती [v]मन्ये, जनाः स्वेच्छया तत्र तत्र भूमिं खनन्ति तदुपद्रवात् पराभूता पीडिता भविष्यामीति मनसा चिन्तयामि। खातप्रदेशः [२४]संपूरणमन्तरेण पांसुप्रक्षेपात् तृणाद्युत्पत्तेर्वा [r]अपि [r]रोहात् पूरितो भूयादिति वरः । तदिदम्

१५–१५. मै४– खातं श्वभ्रः; तं३– खातात् भूः । १६–१६. तं१.तं२.तं३.मै.लं– वरे हितः वरणकालः । २१. आ– 'ताम्' नास्ति । २२. आ.ड– एतत् । २३ ड – उपायम् । २४. शृं– संवत्सरमात्रे, क.ड.हो१– संवत्सरमात्रेण ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयं ब्रह्महत्यायै प्रत्यगृह्णात् तत् स्वकृतमिरिणमभवत् तस्मादाहिताग्निः श्रद्धादेवः स्वकृत इरिणे नाव स्येद्ब्रह्महत्यायै ह्येष वर्णः स वनस्पतीनुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति तेऽब्रुवन् वरं वृणामहै वृक्णात् (३) पराभविष्यन्तो मन्यामहे ततो मा परा भूमेत्याव्रश्चनाद्वो भूयाꣳस उत्तिष्ठानित्यब्रवीत्

तृतीयम् । ब्रह्महत्याया इति ब्रह्म - हत्यायै । प्रतीति । अगृह्णात् । तत् । स्वकृतमिति स्व - कृतम् । इरिणम् । अभवत् । तस्मात् । आहिताग्निरित्याहित - अग्निः । श्रद्धादेव इति श्रद्धा - देवः । स्वकृत इति स्व - कृते । इरिणे । न । अवेति । स्येत् । ब्रह्महत्याया इति ब्रह्म - हत्यायै । हि । एषः । वर्णः । सः । वनस्पतीन् । उपेति । असीदत् । अस्यै । ब्रह्महत्याया इति ब्रह्म-हत्यायै । तृतीयम् । प्रतीति । गृह्णीत । इति । ते । अब्रुवन् । वरम् । वृणामहै । वृक्णात् (३) । पराभविष्यन्त इति परा - भविष्यन्तः । मन्यामहे । ततः । मा । परेति । भूम । इति । आव्रश्चनादित्या - व्रश्चनात् । वः । भूयाꣳसः । उदिति । तिष्ठान् । इति । अब्रवीत् ।

तदित्यादि ॥ स्वेनैव कृतेन कारणान्तरेण कृतं [v]स्वकृतम् । "तृतीया कर्मणि" (पा ६·२·४८) इति पूर्वपदप्रकृतिस्वरत्वम् । [v]इरिणम् ऊषरम् । [v]श्रद्धादेवः धार्मिकः [v]न [v]अव [v]स्येत् न वसेत् । कश्चिदाह– श्रद्धावान् [17]यष्टुकः श्रद्धादेवः सः [v]स्वकृते [v]इरिणे देवयजनाध्यवसानं न कुर्यादिति । अत्रैव हेतुः– [v]ब्रह्महत्यायै [v]हि [v]एषः [v]वर्णः इति ॥

स वनस्पतीनित्यादि ॥ गतम् । [18]वृक्णादिति । छिन्नात् तदवयवात् । वृश्चतेः निष्ठायाम् "ओदितश्च" (पा ८·२·४५) इति निष्ठानत्वं, तस्यासिद्धत्वात् "स्कोः संयोगाद्योरन्ते च" (पा ८·२·२९) इति सलोपः, "खरि च" (पा ८·४·५५) इति चर्त्वम् ॥

[v]अस्यै [v]वारेवृतम् अस्याः पृथिव्याः खातपूरणं वरेण लब्धम् । पृथिव्या स्वीकृतस्तृतीयो ब्रह्महत्याया भागः [v]स्वकृतम् [v]इरिणम् [v]अभवत्, इतस्तत आनीय [25]प्रक्षिप्तं न [26]भवतीति स्वतः सिद्धमूषरक्षेत्रमासीत् । यस्मादिरिणं ब्रह्महत्यायाः स्वरूपं [v]तस्मात् [v]आहिताग्निः [v]श्रद्धादेवः तस्मिन् [v]इरिणे कदाचिदपि [v]न तिष्ठेत् । यद्वा – [27]-देवयजनत्वेन नाध्यवस्येत्-[27] । श्रद्धैव देवो यस्यासौ श्रद्धावानित्यर्थः ॥

स इति ॥ एकस्य ब्रह्महत्याभागस्य परिहारोपायमुक्त्वा [28]भागान्तरस्य तं दर्शयति– 'स वनस्पतीनुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति तेऽब्रुवन् वरं वृणामहै वृक्णात् पराभविष्यन्तो मन्यामहे ततो मा परा भूमेत्याव्रश्चनाद्वो भूयाꣳस उत्तिष्ठानित्यब्रवीत् तस्मादाव्रश्चनाद्वृक्षाणां भूयाꣳस

१७. तं१.तं२– यष्टकः । १८. तं१.तं२.लं– प्रकरणादिति ।

२५. अ.इ.उ.पा.हा– प्रक्षिप्ते २६. ड–भवतीति किन्तु । २७–२७. हो१– अदेवयजनत्वेन नावस्येत् । २८. आ– अपरस्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मादाव्रश्चनाद्वृक्षाणां भूयाꣳस उत्तिष्ठन्ति वारेवृतꣳ ह्येषां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्त्स निर्यासोऽभवत् तस्मान्निर्यासस्य नाश्यं ब्रह्महत्यायै ह्येष वर्णोऽथो खलु य एव लोहितो यो वाऽऽव्रश्चनान्निर्येषति तस्य नाऽऽश्यं (४) काममन्यस्य स स्त्रीषꣳसादमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णातीति ता अब्रुवन् वरं वृणामहा ऋत्वियात् प्रजां विन्दामहै काममा विजनितोः सं भवामेति तस्माद्दत्वियात् स्त्रियः प्रजां ५

तस्मात्। आव्रश्चनादित्या-व्रश्चनात्। वृक्षाणाम्। भूयाꣳसः। उदिति। तिष्ठन्ति। वारेवृतमिति वारे-वृतम्। हि। एषाम्। तृतीयम्। ब्रह्महत्याया इति ब्रह्म-हत्यायै। प्रतीति। अगृह्णन्। सः। निर्यास इति निः-यासः। अभवत्। तस्मात्। निर्यासस्येति निः–यासस्य। न। आश्यम्। ब्रह्महत्याया इति ब्रह्म-हत्यायै। हि। एषः। वर्णः। अथो इति। खलु। यः। एव। लोहितः। यः। वा। आव्रश्चनादित्या-व्रश्चनात्। निर्येषतीति निः–येषति। तस्य। न। आश्यम् १० (४)। कामम्। अन्यस्य। सः। स्त्रीषꣳसादमिति स्त्री-सꣳसादम्। उपेति। असीदत्। अस्यै। ब्रह्महत्याया इति ब्रह्म-हत्यायै। तृतीयम्। प्रतीति। गृह्णीत्। इति। ताः। अब्रुवन्। वरम्। वृणामहै। ऋत्वियात्। प्रजामिति प्र-जाम्। विन्दामहै। कामम्। एति। विजनितोरिति वि-जनितोः। समिति। भवाम। इति। तस्मात्। ऋत्वियात्। स्त्रियः। प्रजामिति प्र-जाम्।

---

[v]अथो [v]खलु। अस्ति पक्षान्तरं, [v]लोहितः लोहितवर्णः [v]यः [v]वा [v]आव्रश्चनात् [v]निर्येषति १५ निर्गच्छति। येषृ प्रयत्ने, अनुदात्तेत्, व्यत्ययेन परस्मैपदम्। अन्यस्येति। अलोहितस्य अनाव्रश्चनान्निर्गतस्य [१९]तस्य निर्यासस्य [v]काममम् आश्यं न आश्यं वा। काम्यत इति कामम्॥

स स्त्रीषꣳसादमित्यादि॥ स्त्रियः सह सीदन्त्यस्मिन्निति [v]स्त्रीषꣳसादं स्त्रीसमूहः। छान्दसं सांहितिकं षत्वम्। ऋत्वियादिति। ऋतुः प्राप्तोऽस्येति ऋत्वियम् आर्तवम् उच्यते। " छन्दसि

उत्तिष्ठन्ति वारेवृतꣳ ह्येषां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्त्स निर्यासोऽभवत् तस्मान्निर्यासस्य नाऽऽश्यं ब्रह्महत्यायै २० ह्येष वर्णोऽथो खलु य एव लोहितो यो वाऽऽव्रश्चनान्निर्येषति तस्य नाऽऽश्यं काममन्यस्य ' इति॥ [v]वृक्णात् छेदनात्। [v]आव्रश्चनात् छिन्नप्रदेशात् [v]भूयांसः बह्वङ्कुरा उत्तिष्ठन्तीति वरः। वृक्षान्निर्गत्य घनीभूतो रसः [v]निर्यासः। ब्रह्महत्यायाः स्वरूपत्वात् [v]निर्यासस्य स्वरूपं [v]न भोज्यं भवति। अपि च पक्षान्तरमस्ति, न सर्वोऽपि निर्यासो निषिद्धः किं तु [२९v]यः लोहितवर्णः [v]यः च [३०]छिन्नात् वृक्षप्रदेशान्निर्गतस्तदेवोभयं निषिद्धम्। [v]अन्यस्य तु निर्यासस्य स्वरूपं [३१v]काममम् आश्यम् इच्छायां सत्यामशितुं योग्यम्॥ २५

स इति॥ त्रिषु ब्रह्महत्याभागेषु द्वयोः परिहारमुक्त्वा [३२]अवशिष्टस्य परिहारं दर्शयति–'स स्त्रीषꣳसादमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णातीति ता अब्रुवन् वरं वृणामहा ऋत्वियात् प्रजां

---

१९. मै–'तस्य' नास्ति ; तं३–तस्य अस्ति च।
२९. क.हा–'यः' नास्ति। ३०. आ–छिन्न°। ३१. आ.हा–'काममम्' नास्ति। ३२. आ–तृतीयस्याव°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विन्दन्ते काममा विजनितोः सं भवन्ति वारेवृतꣳ ह्यासां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्त्सा मलवद्वासा अभवत् तस्मान्मलवद्वाससा न सं वदेत (५) न सहाऽऽसीत नास्या अन्नमद्याद्ब्रह्महत्यायै ह्येषा वर्ण प्रतिमुच्याऽऽस्तेऽथो खल्वाहुरभ्यञ्जनं वाव स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्यं काममन्यदिति

५ विन्दन्ते । कामम् । एति । विजनितोरिति वि-जनितोः । समिति । भवन्ति । वारेवृतमिति वारे-वृतम् । हि । आसाम् । तृतीयम् । ब्रह्महत्याया इति ब्रह्म-हत्यायै । प्रतीति । अगृह्णन् । सा । मलवद्वासा इति मलवत्-वासाः । अभवत् । तस्मात् । मलवद्वाससेति मलवत्-वाससा । न । समिति । वदेत (५) । न । सह । आसीत । न । अस्याः । अन्नम् । अद्यात् । ब्रह्महत्याया इति ब्रह्म-हत्यायै । हि । एषा । वर्णम् । प्रतिमुच्येति प्रति-मुच्य । आस्ते । अथो इति । खलु । १० आहुः । अभ्यञ्जनमित्यभि-अञ्जनम् । वाव । स्त्रियाः । अन्नम् । अभ्यञ्जनमित्यभि-अञ्जनम् । एव । न । प्रतिगृह्यमिति प्रति-गृह्यम् । कामम् । अन्यत् । इति ।

घस्" (पा ५·१·१०६) इति घस्प्रत्ययः, वृषादिः (पा ६·१·२०३) द्रष्टव्यः । विजननं प्रसवः । " भावलक्षणे स्थेण्° " (पा ३·४·१६) इति जनेः स्तोसुन्प्रत्ययः । संभवः संयोगः । प्रथमसंयोगे गर्भो भवतीति यद्यपि द्वितीयादिप्रवृत्तिः [२०]अप्रजार्था, तथापि कामानुरूपम् [V]आ १५ [V]विजनितोः [V]सं [V]भवाम; गर्भः सुखं वर्धताम् [V]इति ॥

[V]मलवद्वासाः रजस्वला । वासोग्रहणं वाससि रजःस्पर्शात् प्रभृति अज्ञातेऽप्यप्रायत्य(?)-मस्तीति सूचनार्थम् । तेन वासस्यस्पृष्टे [२१]ज्ञानादूर्ध्वमेवाशुद्धिः । तस्मादिति । सहभाषणं संवादः । तस्य प्रतिषेधः पुरुषार्थः प्रासङ्गिकः । एवं सर्वत्र । नास्या इति । अनया स्पर्शादिना दूषितं [V]न [V]अद्यात् । अनया वा दत्तं न [२२]गृह्णीयात् । [V]एषा [V]हि [V]ब्रह्महत्यायाः [V]वर्णं [V]प्रति [V]मुच्य देहे बद्ध्वा २० [V]आस्ते । [V]अथो अपि [V]खलु [V]आहुः तद्विदः । अभ्यज्यते परिष्क्रियते शरीरमनेनेति [V]अभ्यञ्जनं तैलादि । तच्च [V]अन्नं स्त्रीणां प्रियतमत्वात्, तस्मात् तत् [V]एव तस्या अन्नं [V]न [२३]प्रतिग्राह्यम् । केचिदाहुः— तया अभ्यञ्जनं न कर्तव्यमिति । ब्रह्महत्यात्मिकायास्तस्या अभिमततमं सर्वदा वर्ज्यमिति विवक्षितम् ॥

विन्दामहै काममा विजनितोः संभवामेति तस्माद्दत्वियात् स्त्रियः [२०]प्रजां विन्दन्ते काममा विजनितोः सं २५ भवन्ति वारेवृतꣳ ह्यासां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्त्सा मलवद्वासा अभवत् तस्मान्मलवद्वाससा न सं वदेत न सहाऽऽसीत नास्या अन्नमद्याद्ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्याऽऽस्तेऽथो खल्वाहुरभ्यञ्जनं वाव स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्यं काममन्यदिति ' इति । स्त्रियः सम्यक् सीदन्ति विश्रम्भेणोपविशन्ति यस्यां सभायामिति स्त्रीसभाविशेषः स्त्रीषꣳसादः । [V]ऋत्वियात् ऋतुसंबन्धाद्वीर्यात् प्रथमसंभोगादेव गर्भे

२०. तं१.तं२.लं– प्रजार्था । २१. तं३– ज्ञानादूर्ध्वमित्येवा° । २२. तं३.मै४.लं– प्रतिगृह्णीयात् । ३० २३. तं३– प्रतिगृह्यम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यां मलवद्वाससꣳ संभवन्ति यस्ततो जायते सोऽभिशस्तो यामरण्ये तस्यै स्तेनो यां परांचीं तस्यै ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको या(६)ऽभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी याऽऽङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि निकृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो

याम्। मलवद्वाससमिति मलवत्-वाससम्। संभवन्तीति सं-भवन्ति। यः। ततः। जायते। सः। अभिशस्त इत्यभि-शस्तः। याम्। अरण्ये। तस्यै। स्तेनः। याम्। परांचीम्। तस्यै। ह्रीतमुखीति ह्रीत-मुखी। अपगल्भ इत्यप-गल्भः। या। स्नाति। तस्याः। अप्स्वित्यप्-सु। मारुकः। या (६)। अभ्यङ्क्त इत्यभि-अङ्क्ते। तस्यै। दुश्चर्मेति दुः—चर्मा। या। प्रलिखत इति प्र-लिखते। तस्यै। खलतिः। अपमारीत्यप-मारी। या। आङ्क्त इत्या-अङ्क्ते। तस्यै। काणः। या। दतः। धावते। तस्यै। श्यावदन्निति श्याव-दन्। या। नखानि। निकृन्तत इति नि-कृन्तते। तस्यै। कुनखी। या। कृणत्ति। तस्यै। क्लीबः।

यामित्यादि॥ [V]अभिशस्तः मिथ्यारोपितपातकेन दूषितः गृहे अभिशस्तः। [V]अरण्ये [V]स्तेनः चोरः। [V]परांचीं स्वापाशनादिना अन्यपराम्। अवाङ्मुखं शयानामित्येके। [V]ह्रीतमुखी लज्जावनतवदनः। कर्मधारयादिनिः। अपगल्भोऽपगतगल्भः। [V]अप्सु [३४V]मारुकः अप्सु मरणशीलः। छान्दस उकञ्। [V]दुश्चर्मा कुष्ठी। [V]खलतिः केशशून्यमस्तकः। [V]अपमारी अपमृत्युमान्। यद्वा--कुत्सितमरणः। [३५]काणः कुण्ठिताक्षः। [V]श्यावदन् व्याध्यापन्नदन्तः, मलिनदन्तो वा। "विभाषा श्यावारोकाभ्याम्" (पा ५.४.१३४) इति दतृभावः। [V]कुनखी कुत्सितनखः। कृणत्ति कटं सृजति। विकरण-

जातेऽपि [V]कामम् उद्दिश्य [V]आ [V]विजनितोः आ प्रसवात् पुरुषेण संगच्छेमहि। गर्भोपद्रवः प्रत्यवायश्च निषिद्धदिनकृतोऽस्माकं मा भूदिति वरः। अत एव याज्ञवल्क्यस्मृतिः—"[३३]यथाकामी भवेद्वाऽपि स्त्रीणां वरमनुस्मरन्" (याज्ञस्मृ १.८१) इति। यो ब्रह्महत्यायाः तृतीयो भागः [V]सा [V]मलवद्वासा रजस्वला योषित् [V]अभवत्। यस्मादियं ब्रह्महत्याया रूपं शरीरे कञ्चुकवत् [V]प्रतिमुच्य [V]आस्ते तस्मात् तया सह संभाषणं [V]न कुर्यात्। तया [V]सह एकस्मिन् गृहे वासः [V]न कर्तव्यः। तत्स्वामिकं तत्स्पृष्टं वा [V]अन्नं [V]न [३४V]अद्यात्, अपि च [३५]अभिज्ञाः केचिदेवम् [V]आहुः—[V]स्त्रियाः [३६]शृङ्गारप्रियत्वेन [V]अभ्यञ्जनम् एवान्नस्थानीयं, तदीयं तैलादिकमेव [V]न गृह्णीयात्, तया वा [३७]स्वशरीराभ्यञ्जनं न कारयेत्। [V]अन्यत् अन्नं सत्यामिच्छायां भोक्तव्यमिति॥

यामिति॥ प्रसङ्गाद्रजस्वलाव्रतानि विधत्ते—'यां मलवद्वाससꣳ संभवन्ति यस्ततो जायते सोऽभिशस्तो यामरण्ये तस्यै स्तेनो यां परांचीं तस्यै ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको याऽभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी याऽऽङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि निकृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुꣳ सृजति तस्या उद्बन्धुको या पर्णेन

३३. हा—याथाकामी। ३४. आ.ड. अश्नीयात्। ३५. ड.शृं—'अभिज्ञाः' नास्ति। ३६. आ—शृङ्गारोपयोगित्वेन। ३७. ड.हो१—स्वशरीरस्य अभ्य°; शृं—अन्यः स्वशरीरस्य अभ्य°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

या रज्जुꣳ सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पिबेदखर्वेण वा (७) पात्रेण प्रजायै गोपीथाय ॥ १ ॥

[यत् सोमपानं ते वृक्णात् तस्य नाऽऽश्यं वदेत् मारुको याऽखर्वेण वा त्रीणि च ।]

या । रज्जुम् । सृजति । तस्याः । उद्बन्धुक इत्युत्-बन्धुकः । या । पर्णेन । पिबति । तस्याः । उन्मादुक इत्युत्-मादुकः । या । खर्वेण । पिबति । तस्यै । खर्वः । तिस्रः । रात्रीः । व्रतम् । चरेत् । अञ्जलिना । वा । पिबेत् । अखर्वेण । वा (७) । पात्रेण । प्रजाया इति प्र-जायै । गोपीथाय ॥१॥

[मैसं २·४·१; कासं १२·१०; शब्रा १·६·३·१-१५; ५·५·४·२-६]

व्यत्ययेन श्नम् (पा ३·१·८१) । [v]क्लीबः यो न स्त्री न पुमान् । [v]उद्बन्धुकः यो रज्ज्वा उद्बध्य आत्मानं व्यापादयति । [v]पर्णेन पद्मदलादिना । [v]उन्मादुकः उन्मदनशीलः । पूर्ववदुकञ् । [v]खर्वः खरैनसोर्वर्तते (?) खण्डिताङ्गः खर्वः इति केचित् । व्रतं यथोक्तस्वरूपं प्रजाया रक्षणार्थम् । औणादिकस्थप्रत्ययः (उ १७४), इडागमश्च ॥

इति द्वितीये पञ्चमे प्रथमोऽनुवाकः ॥

पिबति तस्या उन्मादुको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पिबेदखर्वेण वा पात्रेण प्रजायै गोपीथाय' इति ॥ [v]अभिशस्तः मिथ्यापवादयुक्तः । [v]याम् [v]अरण्ये, 'मलवद्वाससꣳ संभवन्ति' इत्यनुवर्तते । [३८v]पराचीम् [३९]इच्छाराहित्यात् लज्जया [४०]वा [४१]पराङ्मुखीम् । सभायामवाङ्मुखो वक्तुमशक्तः [v]ह्रीतमुखी [v]अपगलभः इत्युच्यते । [v]मारुकः मरणशीलः । [v]दुश्चर्मा कुष्ठी । [v]प्रलिखते [४२]भित्तौ चित्रादिकं करोति । [v]खलतिः केशशून्यः । [v]अपमारी दुर्मरणयुक्तः । [v]काणः [४३]कुण्ठिताक्षः । [v]श्यावदन् मलिनदन्तः । [v]कृणत्ति तृणादि छिनत्ति । [v]उद्बन्धुकः रज्जुं बद्ध्वा मरणशीलः । [४४-]पर्णेन पानं भोजनस्याप्युपलक्षणम् । उन्मादुकः उन्मादशीलः-[४४] । [v]खर्वेण वह्निपक्वेन शरावादिना । [v]खर्वः वामनः । यस्मादुक्ता दोषा [४५]वर्तन्ते तस्मात् तत्परिहाराय रजस्वलाव्रतं संभवादिवर्जनरूपं नियममाचरेत् । भोजनेऽञ्जलिरदग्धशरावादिर्वा साधनमस्तु । [४६]एतच्च व्रताचरणमुत्पत्स्यमानायाः प्रजाया रक्षणार्थं भवति ॥

अत्र मीमांसा ॥ तृतीयाध्यायस्य चतुर्थपादे चिन्तितम्—

"न संवदेत मलवद्वाससेत्यपि पूर्ववत् ।
पुमर्थः स्यात् क्रतौ क्वापि संवादस्याप्रसक्तितः" ॥ (जैन्या ३·४·२०) ॥

दर्शपूर्णमासप्रकरणे श्रूयते- "मलवद्वाससा न सं वदेत" (तैसं २·५·१)इति । अस्य निषेधस्य प्रकरणात् क्रत्वङ्गत्वमिति चेत् । न । अप्रसक्तप्रतिषेधप्रसङ्गात् । "यस्य व्रत्येऽहन् पत्न्यनालम्भुका भवति । तामपरुध्य यजेत" (तैब्रा ३·७·१) इति रजस्वलाया निःसारणान्न क्रतौ संवादप्रसक्तिः । तस्मात् [४७]केवल-पुरुषार्थस्यास्य प्रकरणादुत्कर्षः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥

३८. हा-पराची । ३९. आ-उच्चारणभीत्या । ४०. ड- 'वा' नास्ति । ४१. हा-पराङ्मुखी । ४२. ना- भूमौ । ४३. अ.इ.उ.जो.ना.पा.हा- कुणिताक्षः । ४४-४४. आ.ड- 'पर्णेन पानं...शीलः' नास्ति । ४५. ड.शृं.हो१-विद्यन्ते । ४६. आ- 'एतच्च' नास्ति । ४७. अ.इ.उ.जो.ना.पा.हा- केवलं पुरुषार्थत्वं स्यादस्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्वष्टा हतपुत्रो वीन्द्रꣳ सोममाऽहरत् तस्मिन्निन्द्र उपहवमैच्छत तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टाऽऽहवनीयमुप प्रावर्तयत् स्वाहेन्द्रशत्रुर्वर्धस्वेति यदवर्तयत् तद्वृत्रस्य वृत्रत्वं यदब्रवीत् स्वाहेन्द्रशत्रुर्वर्धस्वेति तस्मादस्ये(१)न्द्रः शत्रुरभवत् स संभवन्नग्नीषोमावभि समभवत्

त्वष्टा । हतपुत्र इति हत - पुत्रः । वीन्द्रमिति वि - इन्द्रम् । सोमम् । एति । अहरत् । तस्मिन् । इन्द्रः । उपहवमित्युप - हवम् । ऐच्छत । तम् । न । उपेति । अह्वयत । पुत्रम् । मे । अवधीः । इति । सः । यज्ञवेशसमिति यज्ञ - वेशसम् । कृत्वा । प्रासहेति प्र - सहा । सोमम् । अपिबत् । तस्य । यत् । अत्यशिष्यतेत्यति - अशिष्यत । तत् । त्वष्टा । आहवनीयमित्या - हवनीयम् । उप । प्रेति । अवर्तयत् । स्वाहा । इन्द्रशत्रुरितीन्द्र - शत्रुः । वर्धस्व । इति । यत् । अवर्तयत् । तत् । वृत्रस्य । वृत्रत्वमिति वृत्र - त्वम् । यत् । अब्रवीत् । स्वाहा । इन्द्रशत्रुरितीन्द्र - शत्रुः । वर्धस्व । इति । तस्मात् । अस्य (१) । इन्द्रः । शत्रुः । अभवत् । सः । संभवन्निति सं - भवन् । अग्नीषोमावित्यग्नी - सोमौ । अभि । समिति । अभवत् ।

त्वष्टा हतपुत्र इत्यादि ॥ व्याख्यातम् (तैसं २.४.१२) । यदिति । यस्मादेनम् vआहवनीयं vत्वष्टा vअवर्तयत् vउप vप्रावर्तयत्, पीतशेषेण सोमेनादीपयत् तस्मात् ततो जातः वृत्रः, 1वृत्र इति 2व्यपदेश्यः भवति । वृतेर्ण्यन्तादौणादिकः कर्मणि रक्प्रत्ययः (उ १७८), "बहुलमन्यत्रापि०" (उ १९०) इति णिलुक् ॥

यदब्रवीदिति ॥ इन्द्रस्य शत्रुः vवर्धस्व vइति विवक्षन् अन्तोदात्तम् इन्द्रशत्रुशब्दम् आद्युदात्तं *-प्रयुक्तवान् vतस्मात् vअस्य वृत्रस्य vइन्द्रः एव vशत्रुः शातयिता संजातः । बहुव्रीहिपूर्वपदप्रकृतिस्वरत्वेन इन्द्रशत्रुशब्दः आद्युदात्तो भवति । इन्द्रोऽस्य शत्रुः शातयितेति ।

उपोद्घाते विश्वरूपवधः 1आद्ये समीरितः ॥

त्वष्टेति ॥ अथ द्वितीयानुवाकेऽग्नीषोमीयपुरोडाशं विधित्सुरादौ तस्योपोद्घातस्य विध्युपयोगं दर्शयति– 'त्वष्टा हतपुत्रो वीन्द्रꣳ सोममाऽहरत् तस्मिन्निन्द्र उपहवमैच्छत तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टाऽऽहवनीयमुप प्रावर्तयत् स्वाहेन्द्रशत्रुर्वर्धस्वेति यदवर्तयत् तद्वृत्रस्य वृत्रत्वं यदब्रवीत् स्वाहेन्द्रशत्रुर्वर्धस्वेति तस्मादस्येन्द्रः शत्रुरभवत् स संभवन्नग्नीषोमावभि समभवत् स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमाँल्लोकानवृणोत् यदिमाँल्लोकानवृणोत् तद्वृत्रस्य वृत्रत्वं तस्मादिन्द्रोऽबिभेत्' इति । यस्मात् कारणादस्योत्पत्त्यर्थमाहुतिम् vअवर्तयत् तस्मात्

---

१. तं३– अत्र । २. लं– व्यपदेशम् । *–* तं३.मै–'प्रयुक्तवान्...इति तत्त्वम्' इति नास्ति ।

---

१. आ.ड– सम्यक् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमाँल्लोकानवृणोद्यदिमाँल्लोकानवृणोत् तद्वृत्रस्य वृत्रत्वं तस्मादिन्द्रोऽबिभेत् स प्रजापतिमुपाधावच्छत्रुर्मेऽजनीति तस्मै वज्रꣳ सिक्त्वा प्रायच्छदेतेन जहीति तेनाभ्यायत तावब्रूतामग्नीषोमौ मा(२) प्र हारावमन्तः स्व इति

सः। इषुमात्रमिषुमात्रमितीषुमात्रम् - इषुमात्रम्। विष्वङ्। अवर्धत। सः। इमान्। लोकान्। अवृणोत्। यत्। इमान्। लोकान्। अवृणोत्। तत्। वृत्रस्य। वृत्रत्वमिति वृत्र - त्वम्। तस्मात्। इन्द्रः। अबिभेत्। सः। प्रजापतिमिति प्रजा - पतिम्। उपेति। अधावत्। शत्रुः। मे। अजनि। इति। तस्मै। वज्रम्। सिक्त्वा। प्रेति। अयच्छत्। एतेन। जहि। इति। तेन। अभीति। आयत। तौ। अब्रूताम्। अग्नीषोमावित्यग्नी-सोमौ। मा (२)। प्रेति। हाः। आवम्। अन्तः। स्वः। इति।

ततश्च शत्रुशब्दस्य क्रियाशब्दत्वात् वृत्रस्यैव इन्द्रः नाशयिता तेन होमेन बभूव। शदॢ शातने। णिचि "शदेरगतौ तः" (पा ७·३·४२) इति तत्त्वम्* । ततः औणादिके क्रुन्प्रत्यये (उ ५५३) "बहुलमन्यत्रापि°" (उ १९०) इति णिलुक्। उक्तं च– "यथेन्द्रशत्रुः स्वरतोऽपराधात्" (पाशि ५२) इति। स संभवन्नित्यादि। व्याख्यातम् (तैसं २·४·१२)। वृत्रत्वमिति। वृणोतेः त्रप्रत्ययः। इदं द्वितीयं [३]वृत्रत्वमस्य ॥

स प्रजापतिमित्यादि ॥ गतम्। [४]सिक्त्वा तीक्ष्णं कृत्वा। [४]उत्पाद्येत्येके। अथेन्द्रः [५]तेन वज्रेण सह वृत्रमभ्यागच्छत्। [५]अथ यदग्नीषोमौ, पूर्वं [५]सः [५]संभवन् वृत्रः [४]अभि [५]समभवत् [४]तौ [५]अग्नीषोमौ [६-६]प्रहर्तुकामम् [४]अब्रूतां [५]मा त्वमावां[६-६] प्रहार्षीः, [७]यं त्वं प्रहर्तुमारभसे अत्रान्तर्भूतौ [५]स्वः आवाम्

कारणात् वर्तयति एतदर्थमिति व्युत्पत्त्या [१]वृत्रत्वं संपन्नम्। यस्मात् कारणात् [२]षष्ठीसमासस्वरं [३]विस्मृत्य बहुव्रीहिस्वरमुच्चारितवान्, [४५]तस्मात् इन्द्रः [५]शातयिता यस्येति व्युत्पत्त्या वृत्रस्य [६]अस्य [७]इन्द्रः घातकः [४५]अभवत्। [८]अवशिष्टं पूर्वप्रपाठके व्याख्यातम् ॥

स इति ॥ तस्य वधोपायं दर्शयति– 'स प्रजापतिमुपाधावच्छत्रुर्मेऽजनीति तस्मै वज्रꣳ सिक्त्वा प्रायच्छदेतेन जहीति तेनाभ्यायत' इति ॥ [९५]सः इन्द्रो मम कश्चित् [७]शत्रुः जातः [७]इति वदन् [७]प्रजापतिम् असेवत। [७]तस्मै इन्द्राय स प्रजापतिः [४]वज्रं [१०७]सिक्त्वा वृत्रमुद्दिश्य कृत्याभिमन्त्रितजलेन प्रोक्ष्य [७]एतेन [७]जहि [४]इति वदन् [४]प्रायच्छत्। जहि मारयेत्यर्थः ॥ [७]तेन वज्रेण सहितः स इन्द्र एनं वृत्रं हन्तुमभिलक्ष्य [४]आयत [११]आगतवान् ॥

तावितीति ॥ इत्थमुपोद्घातं तदुपयोगं चोक्त्वाऽग्नीषोमीयपुरोडाशविधिमर्थवादेनोन्नयति– 'तावब्रूतामग्नीषोमौ मा प्र हारावमन्तः स्व इति मम वै युवꣳ स्थ इत्यब्रवीन्मामभ्येतमिति तौ भागधेय-

३. लं– वृत्रमस्य। ४. लं– उत्पाद्येके। ५. तं३– 'अथ' नास्ति। ६–६. तं३–प्रहर्तुकामौ अब्रूतां मा मावाम्। ७. तं३– यः।

२. शृं–°स्वरितं। ३. आ–विसृज्य। ४. आ–तस्मात् कारणात्। ५. अ.इ.उ.जो.पा.हा–शाता। ६. ड.हो१–'अस्य' नास्ति। ७. आ– अभूत्। ८. आ–शेषम्। ९. आ– 'सः' नास्ति। १०. इ.उ.जो.पा.हा– 'सिक्त्वा' नास्ति; ड.शृं– सिक्त्वा तीक्ष्णीकृत्वा। ११. ड– हन्तुमागत°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मम वै युवꣳ स्थ इत्यब्रवीन्मामभ्येतमिति तौ भागधेयमैच्छेतां ताभ्यामेतमग्नीषोमीय-मेकादशकपालं पूर्णमासे प्रायच्छत् तावब्रूतामभि संदष्टौ वै स्वो न शक्नुव ऐतुमिति स इन्द्र आत्मनः शीतरूरावजनयत्

मम। वै। युवम्। स्थः। इति। अब्रवीत्। माम्। अभि। एति। इतम्। इति। तौ। भागधेयमिति भाग-धेयम्। ऐच्छेताम्। ताभ्याम्। एतम्। अग्नीषोमीयमित्यग्नी-सोमीयम्। एकादशकपालमित्येकादश-कपालम्। पूर्णमास इति पूर्ण-मासे। प्रेति। अयच्छत्। तौ। अब्रूताम्। अभीति। संदष्टाविति सं-दष्टौ। वै। स्वः। न। शक्नुवः। ऐतुमित्या-एतुम्। इति। सः। इन्द्रः। आत्मनः। शीतरूराविति शीत-रूरौ। अजनयत्।

[V]इति। हरतेर्लुङि (पा ३.२.११०), सिचि वृद्धौ (पा ७.२.१) "बहुलं छन्दसि" (पा ७.३.९७) इतीडभावः। अथेन्द्रः [V]अब्रवीत् मदीयौ सुहृदौ युवां [V]स्थः। इतिकरणो हेतौ। यस्मादेवं तस्मात् [V]माम् एव [V]अभ्येतं त्यज्यतामयं जाल्मः [V]इति। अथाग्नीषोमौ [V]भागधेयं किंचिदात्मीयं भागम् इन्द्राल्लब्धुं [V]ऐच्छेताम्। अथ विदिताभिप्राय इन्द्रः [<V]ताभ्याम् [V]एतम् [V]अग्नीषोमीयम् [V]एकादशकपालं *-[V]पूर्णमासे आग्नेयस्य अनुनिर्वाप्यं [V]प्र [V]अयच्छत् प्रादात्। "द्यावापृथिवी-शुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च" (पा ४.२.३२) इति छः। तस्मादग्नीषोमीयमेकादशकपालं पूर्णमासे प्रधानमेव-* कुर्यादिति विधिरनुमीयते ॥

अथाग्नीषोमौ लब्धभागावपि पुनरपि [V]अब्रूताम्— आवामत्र [V]वृत्रभोगे [V]अभि [V]संदष्टौ [V]स्वः लग्नाविव भवावः। तस्मादिमं हित्वा त्वाम् [V]ऐतुम् आगन्तुं [V]न [V]शक्नुवः न क्षमावह

मैच्छेतां ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्' इति॥ हे इन्द्र, [V]मा [V]प्र [V]हाः, वृत्रं मा प्रहर। [V]आवम् [V]अन्तः [V]स्वः, आवामुभावेतस्य [१२]मुखमध्ये तिष्ठावः। [१३]तच्छ्रुत्वा स इन्द्रः [V]अब्रवीत् युवां [१४]मम [V]स्थः [१५-V]वै खलु [V]इति, तस्मात् [V]माम् [V]अभ्येतं मामभिलक्ष्याऽऽगच्छतम्-[१५] [V]इति। ततोऽग्नीषोमौ [१६]त्वत्सकाशमागतयोः [१७]आवयोः किं [V]भागधेयम् इति पप्रच्छतुः। स चेन्द्रः [१८V]पूर्णमासे योऽग्नीषोमीयपुरोडाशः स युवयोर्भाग इति दत्तवान्। 'अग्नीषोमीयमेकादशकपालं [१९]निर्वपेत्' इति विधिरत्र द्रष्टव्यः॥

ताविति॥ अग्नीषोमयोर्निर्गमनप्रकारं दर्शयति— 'तावब्रूतामभि संदष्टौ वै स्वो न शक्नुव ऐतुमिति स इन्द्र आत्मनः शीतरूरावजनयत् तच्छीतरूरयोर्जन्म य एवꣳ शीतरूरयोर्जन्म वेद नैनꣳ

८. लं— ताम्। *—* लं— 'पूर्णमासे आग्नेयस्य...प्रधानमेव' नास्ति। ९. मै४— वृत्रभागे; पं२—वृत्रभेदे।

१२. आ— मुखे। १३. आ— तज्ज्ञात्वा। १४. ड.शृं.हो१— मदीयौ। १५—१५. शृं हो१— तस्मान्मामभिलक्ष्यागतम्; ड— तस्मान्मामभिलक्ष्यागच्छतम्। १६. ड.शृं.हो१ त्वत्समीपमा°। १७. ड— 'आवयोः' नास्ति। १८. ड.शृं हो१— पूर्णमासयागे। १९. ड— कुर्यात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तच्छीतरूरयोर्जन्म य एवꣳ शीतरूरयोर्जन्म वेद (३) नैनꣳ शीतरूरौ हतस्ताभ्यामेनमभ्यनयत् तस्माज्जङ्घभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहितां प्राणो वै दक्षोऽपानः क्रतुस्तस्माज्जङ्घभ्यमानो ब्रूयान्मयि दक्षक्रतू इति

तत्। शीतरूरयोरिति शीत-रूरयोः। जन्म। यः। एवम्। शीतरूरयोरिति शीत-रूरयोः। जन्म। वेद (३)। न। एनम्। शीतरूराविति शीत-रूरौ। हतः। ताभ्याम्। एनम्। अभीति। अनयत्। तस्मात्। जङ्घभ्यमानात्। अग्नीषोमावित्यग्नी-सोमौ। निरिति। अक्रामताम्। प्राणापानाविति प्राण-अपानौ। वै। एनम्। तत्। अजहिताम्। प्राण इति प्र-अनः। वै। दक्षः। अपान इत्यप-अनः। क्रतुः। तस्मात्। जङ्घभ्यमानः। ब्रूयात्। मयि। दक्षक्रतू इति दक्ष-क्रतू। इति।

[v]इति। अथ [v]इन्द्रः [v]आत्मनः शीतरूराख्यौ रोगविशेषौ [१०]आलस्यजृम्भणकारिणौ [v]अजनयत्। देहस्यायासकरौ यत्नविशेषावित्येके। तदित्यादि। गतम्। अथ इन्द्रः [v]ताभ्यां शीतरूराभ्याम्, [v]एनं वृत्रम् [v]अभ्यनयत् अभिसंप्राप्तमकरोत्। यद्वा- अन्येनाविष्टस्य तन्मयत्वं प्रतिपन्नस्य तदात्मतया चेष्टा अभिनयः, तत्कारिणं वृत्रमकरोत्। शीतरूरावावेश्य तद्भावापन्नं वृत्रमभिनयति स्म। ततः [v]तस्मात् [v]जङ्घभ्यमानात् शीतरूरावेशनेन आस्यं व्यादाय जृम्भमाणगात्रात् वृत्रात् [v]अग्नीषोमौ [v]निः [v]अक्रामतां निष्क्रान्तौ। "लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्" (पा ३·१·२४) इति यङ्॥

अथ प्रसङ्गात् इदं परमुच्यते। यदाऽग्नीषोमौ वृत्रमत्यजतां [v]तत् तदा [v]प्राणापानौ एव खलु [११v]एनं वृत्रम् [v]अजहिताम् अत्यजताम्। किं च [v]प्राणः [v]दक्षः दक्षयिता। [v]अपानः [v]क्रतुः [११]कारयिता। [v]तस्मात् [v]जङ्घभ्यमानः [v]ब्रूयात् [v]मयि [v]दक्षक्रतू [v]इति, न निष्क्रान्ता-

२० **शीतरूरौ हतस्ताभ्यामेनमभ्यनयत् तस्माज्जङ्घभ्यमानादग्नीषोमौ निरक्रामताम्' इति॥ वृत्रस्य मुखे दन्तपङ्क्तिभ्यामभितः सम्यग्दष्टावेव वर्तावहे। तस्मादागन्तुं [v]न [v]शक्नुवः [v]इति उक्तः [v]इन्द्रः तयोरागमनाय स्वात्मन सकाशाच्छीतज्वरं तदनन्तरभाविसंतापं चोभावुत्पादितवान्। तदानीं शीतरूरशब्दाभिधेययोर्ज्वरतापयोः [v]जन्म समुत्पन्नम्। तज्जन्मवेदिनं [२०-v]न [v]शीतरूरौ [v]हतः न मारयतः[-२०]। ततः स इन्द्रः [v]ताभ्यां शीतरूराभ्यामायुधसदृशाभ्याम् [v]एनं वृत्रमभिलक्ष्य प्रयुक्ताभ्याम् [v]अनयत् एनं वृत्रं संयोजितवान्। तदा शीतज्वरसंतापाभ्यां [v]जङ्घभ्यमानात् मुखविदारणं कुर्वतः तस्मात् वृत्रात् [v]अग्नीषोमौ निर्गतौ॥**

प्राणापानाविति॥ प्रसङ्गान्मन्त्रं [११]कंचिदुत्पाद्य विनियुङ्क्ते- **'प्राणापानौ वा एनं तदजहितां प्राणो वै दक्षोऽपानः क्रतुस्तस्माज्जङ्घभ्यमानो ब्रूयान्मयि दक्षक्रतू इति प्राणापानावेवाऽऽत्मन् धत्ते सर्वमायु-**

१०. तं३.मै- मूलस्य जृम्भण°; पं२.लं- कुलस्य जृम्भण°। ११. तं३.मै.लं- एतम्। १२. मै४ कामयिता।

२०-२०. तौ शीतरूरौ न मारयतः। २१. आ.इ- 'कंचित्' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राणापानावेवाऽऽत्मन् धत्ते सर्वमायुरेति स देवता वृत्रान्निर्हूय वार्त्रघ्नꣳ हविः पूर्णमासे निरवपद्घ्नन्ति वा एनं पूर्णमास आ(४)ऽमावास्यायां प्याययन्ति तस्माद्वार्त्रघ्नी पूर्णमासेऽनूच्येते

प्राणापानाविति प्राण - अपानौ । एव । आत्मन् । धत्ते । सर्वम् । आयुः । एति । सः । देवताः । वृत्रात् । निर्हूयेति निः–हूय । वार्त्रघ्नमिति वार्त्र - घ्नम् । हविः । पूर्णमास इति पूर्ण - मासे । निरिति । अवपत् । घ्नन्ति । वै । एनम् । पूर्णमास इति पूर्ण - मासे । एति (४) । अमावास्यायामित्यमा - वास्यायाम् । प्याययन्ति । तस्मात् । वार्त्रघ्नी इति वार्त्र - घ्नी । पूर्णमास इति पूर्ण - मासे । अन्विति । उच्येते इति ।

विति । एवं ब्रुवन् [v]प्राणापानौ आत्मनि [13]स्थापयति । ततः [v]सर्वम् [v]आयुः प्राप्नोति । इदं च क्रत्वङ्गमेवेति राद्धान्तितम्– "अहीनवत् पुरुषधर्मस्तदर्थत्वात्" (द्र. मीसू ३·४-१४) इत्यत्र ॥ १०

अथाज्यभागयोर्विशेष उच्यते– अथेन्द्रः [v]देवताः [14]अग्नीषोमादीन् [v]वृत्रात् [v]निर्हूय निर्गतान् कृत्वा हन्तुं योग्यं वृत्रं कृत्वा [v]पूर्णमासे [v]वार्त्रघ्नं [15]वृत्रहणः संबन्धि [v]हविः आज्यभाग-लक्षणं [16][v]निरवपत्। यद्वा–वृत्रहन्त्रर्थं हविराज्यं निरवपत् स्याल्यां [17]पृथक् कृतवान्। हेतुमाह– [v]एनं हि वृत्रं [v]पूर्णमासे देवाः [v]घ्नन्ति तमोरूपत्वात् [18]विनाशोपायस्तदा भवति । तस्मात् [v]वार्त्रघ्नी वृत्रहन्तुः संबन्धिन्यौ तल्लिङ्गवत्यौ ऋचौ [v]पूर्णमासे [v]अनु [v]उच्येते आज्यभागयोः १५

रेति' इति। अग्नीषोमौ यदा निर्गतौ तदानीं [v]प्राणापानौ एव [v]एनं वृत्रं त्यक्तवन्तौ। तयोश्च प्राणापानयोः क्रमेण [v]दक्षः [v]क्रतुः [22]इत्येते नामनी। यस्मात् कारणात् एते तयोर्नामनी [v]तस्मात् कारणात् क्रतुकाले [v]जज्ञभ्यमानः मुखविदारणरूपं गात्रविनामं कुर्वन् यजमानः '[v]मयि [v]दक्षक्रतू' [v]इति मन्त्रं [v]ब्रूयात्। तिष्ठेतामिति मन्त्रवाक्यशेषस्याध्याहारः। तेन मन्त्रपाठेन [v]प्राणापानौ [v]एव स्वात्मनि [23]स्थिरौ धारितवान् भवति। ततोऽपमृत्युपरिहारेण [v]सर्वम् [v]आयुः प्राप्नोति ॥ २०

स इति ॥ अथानेन वृत्रवधप्रसङ्गेनाऽऽज्यभागमन्त्रयुगलयोः कालभेदेन व्यवस्थां विधत्ते– 'स देवता वृत्रान्निर्हूय वार्त्रघ्नꣳ हविः पूर्णमासे निरवपद्घ्नन्ति वा एनं पूर्णमास आऽमावास्यायां प्याययन्ति तस्माद्वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायाम्' इति॥ [v]सः इन्द्रोऽग्नीषोमप्रमुखा वृत्रमुखे स्थिताः सर्वाः [v]देवताः [v]वृत्रात् [v]निर्हूय निःसार्य वृत्रहननहेतुभूतं [v]हविः आज्यभागद्रव्यरूपं [v]पूर्णमासे संपादितवान्। लोकेऽपि [v]एनं वृत्रम् [24]आवरणात्मकान्धकाररूपेणावस्थितं शत्रुं पूर्णिमादिने ज्योत्स्नया २५

१३. तं३.लं– स्थापयते। १४. तं३. लं – अग्नीषोमादिभिः। १५. मै – वृत्रहःसंबन्धि।
१६. मै.लं– 'निरवपत्' नास्ति। १७. तं३.मै.लं– प्रथमम्। १८. तं३–विनष्ट उपायस्तदा।

२२. आ–इत्येव; हो१–इत्येते तयोः। २३. ड.हो१– स्थितौ। २४. आ– आवरणात्मकं वृत्रान्धकार°; ड–आवरणात्मकमन्धकारेणावस्थितम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृधन्वती अमावास्यायां तत्सꣳस्थाप्य वार्त्रघ्नꣳ हविर्वज्रमादाय पुनरभ्यायत ते अब्रूतां द्यावापृथिवी मा प्र हारावयोर्वै श्रित इति ते अब्रूतां वरं वृणावहै

वृधन्वती इति वृधन् - वती । अमावास्यायामित्यमा - वास्यायाम् । तत् । सꣳस्थाप्येति सं - स्थाप्य । वार्त्रघ्नमिति वार्त्र - घ्नम् । हविः । वज्रम् । आदायेत्या - दाय । पुनः । अभीति । आयत । ते इति । अब्रूताम् । द्यावापृथिवी इति द्यावा - पृथिवी । मा । प्रेति । हाः । आवयोः । वै । श्रितः । इति । ते इति । अब्रूताम् । वरम् । वृणावहै ।

पुरोऽनुवाक्ये *कार्ये । ते च " अग्निर्वृत्राणि ", " त्वं सोमासि " इत्येते (तैब्रा ३·५·६) । हविर्ग्रहणं निर्वपति । ग्रहणं च हविर्धर्मविशेषप्राप्त्यर्थम् । vअमावास्यायाम् एनम् vआ vप्याययन्ति । प्रवृद्ध इव भवति, तदानीं तमोपावृद्ध्या । तस्मात् vवृधन्वती वृधिक्रियालिङ्गवत्यौ ऋचौ vअमावास्यायाम् अनूच्येते, आज्यभागयोः पुरोनुवाक्ये* क्रियेते– " अग्निः प्रत्नेन "; " सोम गीर्भिः " (तैब्रा ३·५·६) इत्येते । वृधेरौणादिके कनिन्प्रत्यये मतुप्, " अनो नुट् " (पा ८·२·१६) च । [१]वार्त्रघ्न्योः वृत्रस्यैव [२]वृद्धिः शब्देनोच्यते । स एव पौर्णमासे हन्यते । वृधन्वत्योस्तु सोमस्य वृद्धिः शब्देनोच्यते । तद्वृद्ध्या वृत्रस्य वृद्धिरित्यर्थात् गम्यते । वृत्रश्च तदानीं वर्धते इति [२]प्रसिद्धिः । उभयत्रापि " वा छन्दसि " (पा ६·१·१०६) इति पूर्वसवर्ण-दीर्घत्वम् ॥

तत्सꣳस्थाप्येत्यादि । गतम् । ते इत्यादि । पूर्वं वर्धमानो वृत्रो ये द्यावापृथिव्यौ अभिसम-भवत् vते vअब्रूताम्– vमा आवां vप्र vहाः प्रहार्षीः vआवयोः खल्वसौ वृत्रः vश्रितः, तस्मात्

विनाशयन्ति । vअमावास्यायां ज्योत्स्नाया अभावात् वृत्ररूपमन्धकारम् vआ vप्याययन्ति [२५]–सर्वतो वर्धयन्ति–[२५] । यस्मादेवं vतस्मात् वृत्रहननशब्दलाञ्छिते ऋचावाज्यभागयोः vपूर्णमासे पुरोनुवाक्ये कर्तव्ये । वृधिधातुयुक्ते ऋचौ vअमावास्यायां पुरोनुवाक्ये कर्तव्ये । " अग्निर्वृत्राणि जङ्घनत् ", " त्वꣳ राजोत वृत्रहा ", (तैब्रा ३·५·६) इत्यनयोर्वृत्रहननप्रतीतेरेते ऋचौ वार्त्रघ्न्यौ । " कविर्विप्रेण वावृधे ", " वर्धयामो वचोविदः " (तैब्रा ३·५·६) इत्येते ऋचौ, वृधिधातुयुक्तत्वाद्वृधन्वत्यौ ॥

तदिति ॥ प्रासङ्गिकीमाज्यभागमन्त्रव्यवस्थां[२६] विधाय प्रकृतं वृत्रवधप्रकारं दर्शयति– ' तत्सꣳस्थाप्य वार्त्रघ्नꣳ हविर्वज्रमादाय पुनरभ्यायत ते अब्रूतां द्यावापृथिवी मा प्र हारावयोर्वै श्रित इति ते अब्रूतां वरं वृणावहै नक्षत्रविहिताऽहमसानीत्यसावब्रवीच्चित्रविहिताऽहमितीयं तस्मान्नक्षत्रविहिताऽसौ चित्रविहितेयं य एवं द्यावापृथिव्योर्वरं वेदैनं वरो गच्छति स आभ्यामेव प्रसूत इन्द्रो वृत्रमहन् ' इति ॥

– तैꣳ३.मै.लं–' कार्ये.....पुरोनुवाक्ये ' नास्ति । १९. तैꣳ३–वार्त्रघ्न्यौ । २०. तैꣳ३–वृद्धि° । २१. तैꣳ३.मै.लं– समृद्धिः ।

२५–२५. शृं– ' सर्वतो वर्धयन्ति ' नास्ति । २६. आ– °भागव्यवस्थां ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नक्षत्रविहिताऽहमसानीत्यसावब्रवीच्चित्रविहिताऽहमितीयं तस्मान्नक्षत्रविहिताऽसौ चित्रविहितेयं य एवं द्यावापृथिव्यो(५)र्वरं वेदैनं वरो गच्छति स आभ्यामेव प्रसूत इन्द्रो वृत्रमहन् ते देवा वृत्रꣳ हत्वाऽग्नीषोमावब्रुवन् हव्यं नो वहतमिति

नक्षत्रविहितेति नक्षत्र - विहिता । अहम् । असानि । इति । असौ । अब्रवीत् । चित्रविहितेति चित्र - विहिता । अहम् । इति । इयम् । तस्मात् । नक्षत्रविहितेति नक्षत्र - विहिता । असौ । चित्रविहितेति चित्र - विहिता । इयम् । यः । एवम् । द्यावापृथिव्योरिति द्यावा - पृथिव्योः (५)। वरम् । वेद । एति । एनम् । वरः । गच्छति । सः । आभ्याम् । एव । प्रसूत इति प्र - सूतः । इन्द्रः । वृत्रम् । अहन् । ते । देवाः । वृत्रम् । हत्वा । अग्नीषोमावित्यग्नी - सोमौ । अब्रुवन् । हव्यम् । नः । वहतम् । इति ।

अस्मदाश्रयं प्रहर्तुं नार्हसि [V]इति । पुनश्च ते [V]अब्रूताम्– वरमित्यादि । [V]नक्षत्रविहिता नक्षत्रैर्विविधं [११]हिता स्थापिता[१३] नक्षत्राधीनस्थितिः । यद्वा— नक्षत्रैः विशिष्टावस्थानशरीरा । [V]चित्रविहिता चित्रैः नानाविधैः पूजितैर्वा [२४]कुलशैलैः समुद्रादिभिः विहिता तदधीनस्थितिः, तद्विशिष्टावस्थाना वा । उभयत्रापि " तृतीया कर्मणि " (पा ६·२·४८) इति पूर्वपदप्रकृतिस्वरत्वम् । स इत्यादि । [२५]ततः [२६V]इन्द्रः द्यावापृथिवीभ्यां [V]प्रसूतः अनुज्ञातः [V]वृत्रं हतवान् । अथ [V]ते [V]देवाः इन्द्रेण राज्ञा

स इन्द्रो वृत्रहननहेतुभूतमाज्यभागरूपं [V]हविः संपूर्णं कृत्वा पूर्ववत् [V]वज्रम् [V]आदाय [V]पुनः अपि वृत्रमभिलक्ष्य हन्तुमागतवान् । तदानीं [V]द्यावापृथिवी [V]अब्रूताम्– अयं वृत्रो भूमिमारभ्य द्युलोकपर्यन्तं व्याप्य [V]आवयोः आश्रितो वर्तते तस्मान्मदीयमेनं [V-७]मा प्रहर [V]इति । तत इन्द्रस्यानङ्गीकारमवलोक्य प्रहारमभ्यनुज्ञातुमुत्कोचत्वेन [V]वरं वृतवत्यौ । नक्षत्रैर्विहिताऽलंकृता स्याम् [V]इति दिवो वरः । [२८]मनुष्यपशु-वृक्षनगनदीसमुद्रादिरूपेण [२९]विचित्रेण विहिताऽलंकृता स्याम् [V]इति पृथिव्याः वरः । तेन वरेण ते तथैव स्याताम् । एतद्वराभिज्ञोऽपि स्वाभीष्टं वरं प्राप्नोति । ततः [V]सः इन्द्रो द्यावापृथिवीभ्यामनुज्ञातः [V]वृत्रं हतवान् ॥

त इति ॥ [३०]अथाभिहितस्याग्नीषोमीयपुरोडाशस्य [३१]वेदनं प्रशंसति– ' ते देवा वृत्रꣳ हत्वाऽग्नीषोमावब्रुवन् हव्यं नो वहतमिति तावब्रूतामपतेजसौ वै त्यौ वृत्रे वै त्ययोस्तेज इति तेऽब्रुवन् क इदमच्छैतीति गौरित्यब्रुवन् गौर्वाव सर्वस्य मित्रमिति साऽब्रवीद्वरं वृणै मय्येव सतोभयेन भुनजाध्वा इति तद्गौराऽहरत् तस्माद्गवि सतोभयेन भुञ्जत एतद्वा अग्नेस्तेजो यद्घृतमेतत् सोमस्य यत् पयो य एवमग्नीषोमयोस्तेजो वेद तेजस्व्येव भवति ' इति ॥ इन्द्रयुक्ताः पार्श्ववर्तिनः सर्वे [V]देवाः [V]वृत्रं [V]हत्वा तन्मुखान्निःसृतौ [V]अग्नीषोमौ प्रति [V]हव्यम् अस्मदर्थे [V]वहतम् [V]इति [V]अब्रुवन् । ततः [V]तौ अग्नीषोमौ तान् देवान् प्रत्येवम् [V]अब्रूताम्–[V]त्यौ

२२. तं३.मै.लं– विहिता । २३. मै४– ' स्थापिता ' इत्यस्यानन्तरं ' विदं विज्ञाप्यते ता ' । २४. मै४– कुशलैः । २५. मै.लं– तत्र । २६. लं–' इन्द्रः ' नास्ति ।
२७. हो१– न । २८. ड.शृं.हो१– °वृक्षगिरिनदी° । २९. ड– चित्रेण । ३०. क.ड.शृं. हो१– अथ विहितस्या° । ३१. आ.शृं–देवौ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तावब्रूतामपतेजसौ वै त्यौ वृत्रे वै त्ययोस्तेज इति तेऽब्रुवन् क इदमच्छैतीति गौरित्यब्रुवन् गौर्वाव सर्वस्य मित्रमिति साऽब्रवीत् (६) वरं वृणै मय्येव सतोभयेन भुनजाध्वा इति तद्गौराऽहरत् तस्माद्गविं सतोभयेन भुञ्जत एतद्वा अग्नेस्तेजो यद्घृतमेतत् सोमस्य यत् पयो य एवमग्नीषोमयोस्तेजो वेद तेजस्व्येव भवति

५ तौ । अब्रूताम् । अपतेजसावित्यपं - तेजसौ । वै । त्यौ । वृत्रे । वै । त्ययोः । तेजः । इति । ते । अब्रुवन् । कः । इदम् । अच्छ । एति । इति । गौः । इति । अब्रुवन् । गौः । वाव । सर्वस्य । मित्रम् । इति । सा । अब्रवीत् (३)। वरम् । वृणै । मयि । एव । सता । उभयेन । भुनजाध्वै । इति । तत् । गौः । एति । अहरत् । तस्मात् । गवि । सता । उभयेन । भुञ्जते । एतत् । वै ।
अग्नेः । तेजः । यत् । घृतम् । एतत् । सोमस्य । यत् । पयः । यः । एवम् ।
१० अग्नीषोमयोरित्यग्नी - सोमयोः । तेजः । वेद । तेजस्वी । एव । भवति ।

[V]वृत्रं [V]हत्वा । अग्नीषोमाविति । गतम् । त्याविति । ताविमौ वामपगततेजस्कौ स्वः [V]वृत्रे खलु [V]त्ययोः [*-[V]तेजः [V]इति । [V]ते देवाः अब्रुवन् [V]कः नाम [V]इदं तेज आसुं गच्छति [V]इति-* ।] पुनः स्वयमेव देवाः [V]अब्रुवन् ननु [V]गौः [V]सर्वस्य [V]मित्रं भवति तस्मात् सर्वत्र गच्छन्तीमिमां न कश्चिन्निवारयति तस्मादियमेव गत्वा तत्तेज आहरत्विति ॥

१५ साऽब्रवीदित्यादि ॥ यथाऽऽज्ञापितं देवैः तदिदं क्रियत एव मया, अहमपि किंचित् [V]वरं [V]वृणै वरितुं प्राप्तकालाऽहम् । किं तदिति चेत् ? इदं विज्ञाप्यते– [V]मयि [V]एव [V]सता [V]उभयेन घृतेन पयसा च [V]भुनजाध्वै सुहिता भवितुमर्हथ । भोगेन सौहित्यं लक्ष्यते । लेटि आडागमः, (पा ३·४·९४) " वैतोऽन्यत्र " (पा ३·४·९६) इत्यैकारः, " छन्दस्युभयथा " (पा ३·४·११७) इति लेटि आर्धधातुकत्वेन डित्त्वाभावात् " श्नसोरल्लोपः " (पा ६·४·१११) इति न
२० प्रवर्तते । तदित्यादि । गतम् ॥

तथाविधौ वृत्रेण चिरं दंशनादपगततेजस्कावेव संपन्नौ । [V]त्ययोः तथाविधयोः आवयोः[३२] [V]तेजः सामर्थ्यं [V]वृत्रे एव स्थितम् [V]इति । [३३V]ते देवाः परस्परम् [V]अब्रुवन्–[V]कः नाम [V]इदं तेज आसुं गच्छति [V]इति । तत्र बुद्धिमन्तः [३४-]केचन गोः[-३४] सर्वमित्रत्वेन वैराभावात् [V]गौः एव वृत्रशरीरे गत्वा तेजः समानेष्यति [V]इति उक्तवन्तः । [V]सा [३५]च [३६]गौरुत्कोचरूपं [३७]वरमेवमयाचत–अनयोः संबन्धि घृतपयोरूपं तेजो वृत्रशरीरादानेष्यामि, आनीतं
२५ च तत् मयि एव सर्वदा तिष्ठतु, [V]मयि [V]एव स्थितेन तेन [V]उभयेन तदा तदा स्वीकृतेन [३८]यूयं भोजनं निर्वर्तयध्वम् [V]इति । तमिमं वरं लब्ध्वा [V]तत् तेजः [V]गौः आनयत् । [V]तस्मात् वरवृतत्वाल्लोकेऽपि निरन्तरं [V]गवि

– [लिखितपुस्तकेषु एतावानंश नोपलभ्यते; मै–मुद्रितपुस्तकमनुसृत्य पूरितोऽयं भागः ।]।

३२. आ.ड– 'आवयोः' नास्ति। ३३. ड–ततो। ३४–३४. जो.ना– केचन; अ.आ.इ. उ.पा– गोः। – ३५. आ.हो१– अपि। ३६. आ– °त्कोचरूपत्वेन। ३७. शृं– वरमेनम°। ३८.
३० आ.ड– 'यूयं' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मवादिनो वदन्ति किंदेवत्यं पौर्णमासमिति प्राजापत्यमिति ब्रूयात् तेनेन्द्रं ज्येष्ठं पुत्रं निरवसाययदिति तस्मा(७)ज्ज्येष्ठं पुत्रं धनेन निरवसाययन्ति ॥ २ ॥

[अस्य मा वेदा द्यावापृथिव्योरब्रवीदिति तस्माच्चत्वारि च]

ब्रह्मवादिन इति ब्रह्म-वादिनः । वदन्ति । किंदेवत्यमिति किं-देवत्यम् । पौर्णमासमिति पौर्ण-मासम् । इति । प्राजापत्यमिति प्राजा-पत्यम् । इति । ब्रूयात् । तेन । इन्द्रम् । ज्येष्ठम् । पुत्रम् । निरवसाययदिति निः–अवसाययत् । इति । तस्मात् । ज्येष्ठम् । पुत्रम् । धनेन । निरवसाययन्तीति निः–अवसाययन्ति ॥ २ ॥

[मैसं ... कासं ... कपिसं ..]

आज्यभागयोर्विधिः– ' ब्रह्मवादिनः ' इत्यादि ॥ कस्यै देवतायै इदम् । " देवतान्तात् तादर्थ्ये यत् " (पा ५.४.२४) । पौर्णमास्यां कार्यं कर्म vपौर्णमासम् । तदिदं vकिंदेवत्यम् vइति [३७]यदा vब्रह्मवादिनः पृच्छेयुः तदा vब्रूयात् उत्तरं– vप्राजापत्यम् vइति । प्रदर्शनार्थत्वात् आमावास्यमपि गृह्यते । यदुक्तं–" परमेष्ठिनो वा एष यज्ञोऽग्र आसीत् " (तैसं १.६.९) इति, तदेव[३८] स्मारयति । इन्द्रग्रहणं चोपलक्षणं तत्रोक्तानां त्रयाणाम् इन्द्राग्निसोमानाम् । एतदुक्तं भवति –प्रशस्ततमान् पुत्रान् इन्द्राग्निसोमान् प्रजापतिरनेन कर्मणा vनिः vअवासाययत् [३९]देवतान्तरेभ्यो व्यावृत्तानकरोत्, प्रशस्ततमान् [३०]एतान् मन्यमानो ज्येष्ठभागमिन्द्राग्न्यादिभ्यः कर्मैतदुक्तवानिति । तस्मादित्यादि । वयसा विद्यादिना[३१] वा प्रशस्यतमं vपुत्रं vधनेन vनिरवसाययन्ति पुत्रान्तरेभ्यो व्यावृत्तमधिकधनं कुर्वन्ति पितरः । " शाछासाह्वाव्यावेषां° " (पा ७.३.३७) इति युक्, " गतिर्गतौ " (पा ८.१.७०) इति पूर्वस्य निघाताभावः । " उदात्तवता तिङा " (द्र. पाभा २.२.१८ वा ४) इति समासः ॥

इति द्वितीये पञ्चमे द्वितीयोऽनुवाकः ॥ २०

[३९-तिष्ठतैव तेजसा घृतपयोरूपेण-३९] vउभयेन तदा तदा स्वीकृतेन सर्वे भोजनं निष्पादयन्ति। तत्र vयत् vघृतम् vएतत् एव vअग्नेः vतेजः, vयत् vपयः vएतत् एव vसोमस्य तेजः, तदुभयवेदनेन vतेजस्वी vभवति इति ॥

ब्रह्मवादिन इति ॥ तदिदमग्नीषोमीयपुरोडाशरूपं पौर्णमासकर्म प्रजापतिसंबन्धित्वेनेन्द्रसंबन्धित्वेन च प्रशंसति– ' ब्रह्मवादिनो वदन्ति किंदेवत्यं पौर्णमासमिति प्राजापत्यमिति ब्रूयात् तेनेन्द्रं ज्येष्ठं पुत्रं

२७. तं३.मै.लं– यावत् । २८. तं३.मै.लं– तदवसरे । २९. तं३.मै– देवान्तरेभ्यः ३०. तं३.मै.लं– ' एतान् ' नास्ति । ३१. तं३– वित्त्यादिना (?) ।

३९–३९. शृं– तिष्ठता तेजःपयो° ; ड.हो१– तिष्ठति तेजःपयो° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निरवासाययदिति तस्माज्जेष्ठं पुत्रं धनेन निरवसाययन्ति ' इति ॥ नात्र प्रजापतेः हविर्भाक्त्वेन[४०] पौर्णमास-देवतात्वं किं [४१]तु तत्कर्मस्रष्टृत्वेन। तच्च पूर्वकाण्ड उदाहृतम्– " प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं च " (तैसं १·६·९) इत्यादि। स च प्रजापतिः [r]तेन पौर्णमासकर्मणा स्वकीयं [v]ज्येष्ठं [v]पुत्रम् [v]इन्द्रं [v]निरवासाययत् निःशेषवित्तदानेन स्थिरनिवासमकरोत्। एतदपि पूर्वकाण्ड एव स्पष्टमुदाहृतम् –" तेनेन्द्रं निरवासाययत् तेनेन्द्रः परमां काष्ठामगच्छत् " (तैसं १·६·९) इति। यथा प्रजापतिर्यज्ञान् ससर्ज तथेन्द्रोऽप्यग्नीषोमौ वृत्रान्निःसार्य ताभ्यामिमं पुरोडाशं दत्तवानिति अस्ति प्रजापतेरिवेन्द्रस्यापि संबन्धः। यस्मात् प्रजापतिरिन्द्रं निरवासाययत् [v]तस्मात् लोकेऽपि [v]ज्येष्ठं [r]पुत्रं [v]धनेन [v]निरवसाययन्ति निःशेष-मायुषोऽवसानं धनेन युक्तो यथा प्राप्नोति तथा कुर्वन्तीत्यर्थः ॥

[४२]अत्र मीमांसा ॥ पञ्चमाध्यायस्य प्रथमपादे चिन्तितम्—

" अग्नीषोमीय आग्नेयात् पूर्वो नो वाऽस्तु पूर्वता ।
ब्राह्मणक्रमतो मैवं मन्त्रक्रमबलत्वतः ॥
स्मृतिक्रमादनुष्ठानं मन्त्राणां स्मारकत्वतः ॥
[४३]प्राबल्यं ब्राह्मणस्यास्ति विधिनाऽपि कृतार्थता " ॥ (जैन्या ५·१·१८-१९) ॥

अग्नीषोमीययागस्तैत्तिरीयब्राह्मणे[४४] पञ्चमप्रपाठके द्वितीयानुवाके समाम्नातः–"ताभ्यामेतमग्नीषोमीय-मेकादशकपालं पूर्णमासे प्रायच्छत्" (तैसं २·५·२) इति। आग्नेययागस्तु षष्ठप्रपाठके तृतीयानुवाक आम्नातः– " यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति " (तैसं २·६·३) इति। [४५]तत्रानुष्ठानस्य ब्राह्मणोक्तविध्यधीनत्वादग्नीषोमीयस्य प्रथममनुष्ठानमिति-[४५] प्राप्ते ब्रूमः– मन्त्रकाण्डे पूर्वं पठिता आग्नेय-मन्त्राः। तथा हि–हौत्रकाण्ड आज्यभागमन्त्रानुवाकादुत्तरस्मिन्ननुवाके प्रथमम् " अग्निर्मूर्धा " (तैब्रा ३·५·७) इत्यादिके आग्नेय्यौ, याज्यानुवाक्ये आम्नाते। ततः–" प्रजापते न त्वदेतानि " (तैब्रा ३·५·७) इत्यादिके प्राजापत्ये। ततः – " अग्नीषोमा सवेदसा " (तैब्रा ३·५·७) इत्यादिके अग्नीषोमीये। [४६]आध्वर्यवकाण्डे– " अग्नये जुष्टं निर्वपाम्यग्नीषोमाभ्याम् " (तैसं १·१·४) इत्याग्नेयः पूर्वमाम्नातः। [४७]याजमानकाण्डेऽपि– " अग्नेरहं देवयज्ययाऽन्नादो भूयासम् " (तैसं १·६·२) इत्याम्नाय[४८] पश्चात् " अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासम् " (तैसं १·६·२) इत्याम्नायते। मन्त्रक्रमश्च प्रबलः। [४९]मन्त्रैः स्मृत्वा पश्चादनुष्ठेयत्वात्। ब्राह्मणं त्वप्राप्तपदार्थविधिनाऽपि चरितार्थम्। अतोऽनुष्ठानस्मरणायैवोत्पन्नान् मन्त्रान् बाधितुं नालमिति मन्त्रक्रमेणाऽऽग्नेयस्यैव [५०]प्रथममनुष्ठानम् ॥

तृतीयाध्यायस्य चतुर्थपादे चिन्तितम्—

" जक्षभ्यमानमन्त्रोक्तिः पुंसो धर्मः क्रतोरुत ।
वाक्यादाद्यः प्रक्रियया द्वितीयस्त्वविरुद्धया " ॥ (जैन्या ३·४·१७) ॥

दर्शपूर्णमासप्रकरणे श्रूयते– " प्राणो वै दक्षोऽपानः क्रतुस्तस्माज्जक्षभ्यमानो ब्रूयात् मयि दक्षक्रतू इति प्राणापानावेवाऽऽत्मन् धत्ते सर्वमायुरेति " इति। गात्रविनामेन विदारितमुखः पुरुषो जक्षभ्यमानः,

---

४०. आ.ड– हविर्भोक्तृत्वेन। ४१. शृं.हो१– तर्हि। ४२. आ– अथ। ४३. अ.इ.उ. जो.ना.पा.हा– प्राबल्यात्। ४४. अ.इ.उ.जो.हा– °रीये तु ब्राह्मणेन; ना– °रीये तु ब्राह्मणे; क– °रीये ब्राह्मणे। ४५–४५. अ.इ.उ.पा–तत्रानुष्ठानस्योक्तविध्यधीनत्वादग्नीषोमीयस्य पूर्वत्वे; ड.हो१–अत्रानुष्ठानोक्त-विध्यधीनत्वादग्नीषोमीयस्य प्रथममनुष्ठानमिति; जो.ना.हा– तत्रानुष्ठानस्य. . .प्रथममनुष्ठाने। ४६. अ.इ.उ. जो.पा.हा– यथाध्वर्यं°; ना.हो१– तथाध्वर्यं°। ४७. आ.हा.हो१– यजमानं°। ४८. क.ना.जो.हा– इत्याग्नेयस्य; हो१–इत्याम्नाय तत्°। ४९. हा– मन्त्रैश्च। ५०. ड– प्रथमानु°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्य वाक्यात् मन्त्रोक्तिः प्रतीयते। वाक्यं च प्रकरणाद्बलीयः। तस्मात् केवलं पुंधर्मः इति चेत्। मैवम्। क्रतावपि जङ्घन्यमानपुरुषसंभवेन वाक्यप्रकरणयोर्विरोधाभावे सत्युभाभ्यां क्रतुयुक्तपुरुषसंस्कारत्वावगमात् [५१] ॥

तत्रैव प्रथमपादे चिन्तितम्—

" [५२]वार्त्रघ्न्यौ पौर्णमासे स्तो वृधन्वत्यौ तु दर्शगे। ५
इति [५३]-प्रधानशेषत्वमुक्तं किं-[५३] वा व्यवस्थितिः ॥
क्रमेण प्रापिता [५४]मन्त्राश्चत्वारोऽप्याज्यभागयोः।
क्रमाद्वाक्यं बलीयोऽत एषां दर्शादिशेषता ॥
न मुख्ये सोम एकोऽस्ति नाऽऽधारत्वादिकालयोः।
दर्शादेरव्यवस्थित्याऽप्राप्तौ वाक्याद्व्यवस्थितिः " ॥ (जैन्या ३.१.२९-३१) ॥ १०

दर्शपूर्णमासप्रकरणे श्रूयते—" तस्माद्वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायाम् " (तैसं २.५.६) इति। तत्रेदं वार्त्रघ्नीयुगलं वृधन्वतीयुगलं च हौत्रकाण्ड आज्यभागयोः क्रमे " अग्निर्वृत्राणि जङ्घनत् " (तैब्रा ३.५.६) इत्यनुवाकेनाऽऽम्नातम् [५५]। उदाहृतेन तु ब्राह्मणवाक्येन दर्शपूर्णमासयागयोस्तद्विधिरवगम्यते। तत्र वाक्यस्य प्रबलत्वादेषां मन्त्राणां दर्शपूर्णमासयागाङ्गत्वं [५६]-न त्वाज्यभागाङ्गत्वम् -[५६] इति प्राप्ते ब्रूमः—" अग्निर्वृत्राणि जङ्घनत् " (तैब्रा ३.५.६) इत्याग्नेयी प्रथमा वार्त्रघ्नी। " त्वं सोमासि सत्पतिः " १५
(तैब्रा ३.५.६) इति सौम्या द्वितीया वार्त्रघ्नी। " अग्निः प्रत्नेन जन्मना " (तैब्रा ३.५.६) इत्याग्नेयी प्रथमा वृधन्वती। " सोम गीर्भिष्ट्वा वयम् " (तैब्रा ३.५.६) इति सौम्या द्वितीया वृधन्वती। तत्र मुख्ययोः [५७]दर्शपूर्णमासयोराग्नेयपुरोडाशसद्भावादाग्नेयीद्वयस्य विकल्पेन पुरोनुवाक्यात्वं [५८] कथंचित् [५८]भवतु। सौम्ययोस्तु तन्न संभवति। सोमदेवताया अभावात्। न ह्यग्नीषोमीयेऽपि केवलः सोमो विद्यते। किं च [५९]-पूर्णमासे, अमावास्यायामिति-[६०] [६१]सप्तमीभ्याम् आधारत्वं गम्यते। [६२]तच्च यागवाचित्वे यागस्य २०
मुख्यत्वान्न संभवति। कालस्य तूपसर्जनत्वात् तद्वाचित्वं युक्तम्। किं च प्रयाजमन्त्रानुवाकस्यानन्तरमेवायमनुवाकः पठितः। स चाऽऽज्यभागयोरङ्गयोः क्रमो न तु मुख्ययोर्दर्शपूर्णमासयोः। तस्मान्न मन्त्रचतुष्टयस्य मुख्ययागाङ्गत्वं [६३]-किं तु आज्यभागाङ्गत्वम् -[६३]। नन्वेतत् क्रमेणैव लब्धं तत्राप्याग्नेये प्रथम आज्यभागे मन्त्रोऽप्याग्नेयः। सौम्ये द्वितीये सौम्य इत्येषा व्यवस्था लिङ्गेनैव लभ्यते। [६४]-बाढम्। तथाऽपि-[६४] वार्त्रघ्नीयुगलं पूर्णमासे वृधन्वतीयुगलममावास्यायामित्येषा व्यवस्था पूर्वमप्राप्ता ब्राह्मणवाक्येन २५
[६५]विधीयते इति न [६६]वैयर्थ्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥

---

५१. अ.इ.उ.जो.ना.पा.हा- °त्वाभ्युपगमात्। ५२. अ.इ.उ.ड.पा - वार्त(?)घ्नी; जो.शृं.हो१- वार्त्रघ्नौ। ५३-५३. अ.इ.उ.पा- °शेषत्वमुतास्मिन् वा। ५४ अ.इ.उ.पा-मन्त्राः श्रुत्या नोप्याज्य°। ३०
५५. अ.इ.पा- इत्यादिनानुवाकेनाम्नातम्। ५६-५६. अ.उ.ड.पा.हो१- 'न त्वाज्यभागाङ्गत्वम्' नास्ति। ५७. क.जो.ना.हा- °मासयागयोराग्नेय°। ५८. हा- पुरोनुवाक्यार्थत्वम्। ५९. अ.इ.उ.पा.हो१- भवति। ६०-६०. आ.क.जो.ना- पौर्णमास्याममावा°; अ.इ.उ.पा-पौर्णमासे अमावास्या°। ६१. अ.इ.पा-सप्तम्या। ६२. शृं-तत्र। ६३-६३. अ.इ.उ.पा.शृं.हो१- 'किं तु आज्यभागाङ्गत्वं' नास्ति। ६४-६४. अ.इ.उ.पा- 'बाढम् तथापि' नास्ति; ड.हो१- बाढं तत्रापि। ६५. क.हो१- अभिधीयते। ३५
६६. क.ड.जो.ना.हा.हो१- तद्वैयर्थ्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्रं वृत्रं जघ्निवाꣳसं मृधोऽभि प्रावेपन्त स एतं वैमृधं पूर्णमासेऽनुनिर्वाप्यमपश्यत् तं निरवपत् तेन वै स मृधोऽपाहत यद्वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति मृध एव तेन यजमानोऽप हत इन्द्रो वृत्रꣳ हत्वा देवताभिश्चेन्द्रियेण च व्यार्ध्यत स एतमाग्नेयमष्टाकपालममावास्यायामपश्यदैन्द्रं दधि (१)

५ इन्द्रम्। वृत्रम्। जघ्निवाꣳसम्। मृधः। अभि। प्रेति। अवेपन्त। सः। एतम्। वैमृधम्। पूर्णमासे इति पूर्णमासे। अनुनिर्वाप्यमित्यनु - निर्वाप्यम्। अपश्यत्। तम्। निरिति। अवपत्। तेन। वै। सः। मृधः। अपेति। अहत। यत्। वैमृधः। पूर्णमासे इति पूर्ण - मासे। अनुनिर्वाप्य इत्यनु - निर्वाप्यः। भवति। मृधः। एव। तेन। यजमानः। अपेति। हते। इन्द्रः। वृत्रम्। हत्वा। देवताभिः। च। इन्द्रियेण। च। वीति। आर्ध्यत। सः। एतम्। आग्नेयम्। १० अष्टाकपालमित्यष्टा - कपालम्। अमावास्यायामित्यमा - वास्यायाम्। अपश्यत्। ऐन्द्रम्। दधि

इन्द्रं वृत्रमित्यादि॥ वैमृधस्यैकादशकपालस्य विधिः। [v]वृत्रं हतवन्तम् [v]इन्द्रं [v]मृधः संग्रामाभिमुख्येन आगत्य प्रकर्षेणावेपयन्। स एतमित्यादि। विमृदिन्द्रः, तस्येदं कर्म [v]वैमृधं प्रधानानन्तरम् [1v]अनुनिर्वाप्यम्। गतमन्यत्॥

इन्द्रो वृत्रं हत्वेत्यादि॥ ऐन्द्राग्नस्य विधिः, ऐन्द्रस्य च दध्नः॥

१५ [1]द्वितीयेऽग्नीषोमयागोऽभिहितः पूर्णमादिने॥

अथ तृतीयेऽमावास्यायां सांनाय्ययागो वक्तव्यः।

इन्द्रमिति॥ तत्र प्रथमं तावत् पौर्णमास्यामनुनिर्वाप्यं वैमृधं विधित्सुः[2] प्रस्तौति- 'इन्द्रं वृत्रं जघ्निवाꣳसं मृधोऽभि प्रावेपन्त स एतं वैमृधं पूर्णमासेऽनुनिर्वाप्यमपश्यत् तं निरवपत् तेन वै स मृधोऽपाहत' इति॥ अथ य इन्द्रः [v]वृत्रं हतवांस्तम् [v]इन्द्रं [v]मृधः वृत्रपक्षपातिनो वैरिणोऽभितः समागत्य प्रकर्षेण २० भयमुत्पाद्याकम्पयन्त। विनाशिता मृधो वैरिणो येन देवेनासौ [3]विमृत्। स देवो यस्यैकादशकपालस्य पुरोडाशस्य सोऽयं वैमृधः। तं पुरोडाशं [v]पूर्णमासयागे [v]अनुनिर्वाप्यं प्रधानकर्मणः पश्चान्निर्वापयोग्यम् [v]अपश्यत्॥

यदिति॥ अथ विधत्ते- 'यद्वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति मृध एव तेन यजमानोऽप हते' इति॥

२५ इन्द्र इति॥ अथ सांनाय्यनामकमैन्द्रं दधि विधातुं प्रस्तौति- 'इन्द्रो वृत्रꣳ हत्वा देवताभिश्चेन्द्रियेण च व्यार्ध्यत स एतमाग्नेयमष्टाकपालममावास्यायामपश्यदैन्द्रं दधि तं निरवपत् तेन वै स देवताश्चेन्द्रियं

१. मै४- निर्वाप्यम् अनु°।

१. अ.इ.उ.पा.हो१- °ग्नीषोमीययागो°। २. क.हो१- विधातुं। ३. हो१- इति विमृत्। ४, ड- पूर्णमासयोः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पौर्णमास्यां वैमृधपुरोडाशः, अमावास्यायां सांनाय्यादियागः]

तं निरवपत् तेन वै स देवताश्चेन्द्रियं चावारुन्द्ध यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवत्यैन्द्रं दधि देवताश्चैव तेनेन्द्रियं च यजमानोऽव रुन्द्ध इन्द्रस्य वृत्रं जघ्नुष इन्द्रियं वीर्यं पृथिवीमनु व्यार्छत् तदोषधयो वीरुधोऽभवन्तस्य प्रजापतिमुपाधावद्वृत्रं मे जघ्नुष इन्द्रियं वीर्यं (२) पृथिवीमनु व्यारत् तदोषधयो

(१)। तम्। निरिति। अवपत्। तेन। वै। सः। देवताः। च। इन्द्रियम्। च। अवेति। अरुन्द्ध। यत्। आग्नेयः। अष्टाकपाल इत्यष्टा - कपालः। अमावास्यायामित्यमा - वास्यायाम्। भवति। ऐन्द्रम्। दधि। देवताः। च। एव। तेन। इन्द्रियम्। च। यजमानः। अवेति। रुन्द्धे। इन्द्रस्य। वृत्रम्। जघ्नुषः। इन्द्रियम्। वीर्यम्। पृथिवीम्। अनु। वीति। आर्छत्। तत्। ओषधयः। वीरुधः। अभवन्। सः। प्रजापतिमिति प्रजा - पतिम्। उपेति। अधावत्। वृत्रम्। मे। जघ्नुषः। इन्द्रियम्। वीर्यम् (२)। पृथिवीम्। अनु। वीति। आरत्। तत्। ओषधयः। १०

'इन्द्रस्य वृत्रं जघ्नुषः' इत्यादिना सांनाय्यादीनामुत्पत्तिक्रमं दर्शयति– Vवृत्रं हतवतः Vइन्द्रस्य Vइन्द्रियं Vवीर्यं च[२] Vपृथिवीम् अनुप्रविश्य Vवि Vआर्च्छत् विविधं व्याप्तमभवत्। अर्तेः "पाघ्रा°" (पा ७·३·७८) इत्यादिना ऋच्छादेशः। Vतत् च पृथिवीमनुप्रविष्टम् इन्द्रियं वीर्यं च Vओषधयः Vवीरुधः च Vअभवन् तदात्मना परिणतमभूत्। "ओषध्यः फलपाकान्ता *लता गुल्माश्च वीरुधः* " (द्र. अको २·४·६-९) इति। अथेन्द्रः Vप्रजापतिम् १५ Vउपाधावत्, 'Vवृत्रं Vजघ्नुषः' इत्यादि वदन्। अथ तच्छ्रुत्वा Vप्रजापतिः Vपशून् Vअब्रवीत्

चावारुन्द्ध' इति॥ [५V]इन्द्रः वृत्रवधेन भीतो दूरे पलायमानः स्वकीयाभिः Vदेवताभिः [६V]च स्वकीयेन सामर्थ्येन Vच [७V]व्यार्धयत वियुक्तोऽभूत्॥

यदिति॥ अथ विधत्ते – 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवत्यैन्द्रं दधि देवताश्चैव तेनेन्द्रियं च यजमानोऽव रुन्द्धे' इति॥ अत्राऽऽग्नेयो न विधीयते। षष्ठे प्रपाठके–"यदाग्नेयोऽष्टाकपालोऽमावास्यायां च २० पौर्णमास्यां चाच्युतो भवति" (तैसं २·६·३) इति कालद्वये विधानात्। अत एव [८]'ऐन्द्राग्नैकादशकपाल-विध्युन्नयनाय अयमर्थवादः – यदा केवलेनाप्याग्नेयेन देवतानामिन्द्रियस्य चावरोधो भवति तदानीमैन्द्राग्नेन तदवरोध इति किमु वक्तव्यमिति। [९-]अनया श्रुत्या[-९] तद्विधिरुन्नीयते। शाखान्तरे समानप्रकरणे स्पष्टं तद्विधानात्। ऐन्द्रदधिविधिस्त्वसंदिग्ध एव॥

इन्द्रस्येति॥ तमेतं विधिं स्तोतुं सांनाय्यनिर्वचनं दर्शयति– 'इन्द्रस्य वृत्रं जघ्नुष इन्द्रियं वीर्यं २५ पृथिवीमनु व्यार्छत् तदोषधयो वीरुधोऽभवन्तस्य प्रजापतिमुपाधावद्वृत्रं मे जघ्नुष इन्द्रियं वीर्यं पृथिवीमनु व्यारत् तदोषधयो वीरुधोऽभूवन्निति स प्रजापतिः पशूनब्रवीदेतदस्मै सं नयतेति तत् पशव ओषधीभ्योऽ-

२. तं३– 'च' इत्यस्यानन्तरं 'न'। *–* ["प्रतानैर्वीरुधः स्मृताः" इति चरक–संहितायां सूत्रस्थाने (१·७२)]

५. ड.शृं.हो१– 'इन्द्रः' नास्ति। ६. अ.इ.उ.जो.ना.पा.हा– 'च' नास्ति। ७. आ.क. ३० हो१– व्यृद्धो; शृं– व्यर्धो। ८. आ.हा– ऐन्द्राग्निविध्युन्नयनाय। ९–९. आ.ड–अनयोः स्तुत्या।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[पौर्णमास्यां वैमृधपुरोडाशः, अमावास्यायां सांनाय्यादियागः

वीरुधोऽभूवन्निति स प्रजापतिः पशूनब्रवीदेतदस्मै सं नयतेति तत् पशव ओषधीभ्यो-ऽध्यात्मन्त्समनयन् तत्प्रत्यदुहन् यत् समनयन् तत्सांनाय्यस्य सांनाय्यत्वं यत् प्रत्य-दुहन् तत् प्रतिधुषः प्रतिधुक्त्वꣳ समनैषुः प्रत्यधुक्षन् न तु मयि श्रयत इत्यब्रवीदेतदस्मै

वीरुधः। अभूवन्। इति। सः। प्रजापतिरिति प्रजा - पतिः। पशून्। अब्रवीत्। एतत्। अस्मै। समिति। नयत। इति। तत्। पशवः। ओषधीभ्य इत्योषधि - भ्यः। अधीति। आत्मन्। समिति। अनयन्। तत्। प्रतीति। अदुहन्। यत्। समनयन्निति सम् - अनयन्। तत्। सांनाय्यस्येति सां - नाय्यस्य। सांनाय्यत्वमिति सांनाय्य - त्वम्। यत्। प्रत्यदुहन्निति प्रति - अदुहन्। तत्। प्रतिधुष इति प्रति - धुषः। प्रतिधुक्त्वमिति प्रतिधुक् - त्वम्। समिति। अनैषुः। प्रतीति। अधुक्षन्। न। तु। मयि। श्रयते। इति। अब्रवीत्। एतत्। अस्मै (३)।

[v]एतत् इन्द्रियादिकम् [v]अस्मै इन्द्राय [v]संनयत सम्यगिमं प्रापयत [v]इति। [v]पशवः च [v]ओषधीभ्यः ओषधीनां सकाशात् [3]तृणादिभक्षणद्वारेण [v]तत् इन्द्रियादिकम् [v]आत्मनि [v]अधि [v]समनयन् आत्मनि सम्यगानीतवन्तः। [v]तत् च अनुनीतं संजातं [v]प्रति [v]अदुहन् ओषधीभ्यः आत्मनि [4]दुग्धं प्रत्यदुहन् इन्द्राय पुनरदुहन्। एवं संनयनात् [v]सांनाय्यत्वं, प्रतिदोहनात् [v]प्रति-धुक्त्वं पयसः। प्रतिदुह्यत इति *-प्रतिधुक्, छान्दसो वर्णविकारः। नयतेर्ण्यति " पाय्यसांनाय्य° " (पा ३·१·१२९) इति निपात्यते, निपातनादेवाभिमतस्वरसिद्धिः ॥

अथेन्द्रः प्रजापतिम् [v]अब्रवीत् मदीयमिन्द्रियादिकं पशवः-* ओषधीभ्यः आत्मनि [v]सम् [v]अनैषुः। मह्यं च [v]प्रति [v]अधुक्षन्। " शल इगुपधादनिटः क्सः " (पा ३·१·४५)।

ध्यात्मन्त्समनयन् तत् प्रत्यदुहन् यत् समनयन् तत् सांनाय्यस्य सांनाय्यत्वं यत् प्रत्यदुहन् तत् प्रतिधुषः प्रति-धुक्त्वम् ' इति ॥ [v]जघ्नुषः हतवतः। [v]व्याछैत् विविधत्वेन प्राप्नोत्। ओषधिवीरुधोर्भेदः पूर्वाचार्यैर्दर्शितः —" ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः* " (द्र. अको २·४·६-९) इति। तदेतदिन्द्रियसामर्थ्यस्यौष-ध्यादिरूपत्वं प्रजापतेरग्रे कथितवान्। [v]सः च [v]प्रजापतिः [v]एतत् इन्द्रियसामर्थ्यमिन्द्रार्थं सम्यक् प्रापयतेति [v]पशून् [v]अब्रवीत्। [v]तत् सामर्थ्यं [v]पशवः [10]ओषधिसकाशादानीय स्वात्मन् [v]अधि [11]स्वशरीरे सम्यक् स्थापितवन्तः। पुनः स्वनिष्ठं [v]तत् वीर्यं क्षीरादिरूपमिन्द्रं प्रति दुग्धवन्तः। यस्मात् पशवः [v]समनयन् तस्मात् [12v]सांनाय्यस्य सम्यक् [13]नयनेन संपन्नम् इति व्युत्पत्त्या सांनाय्यनाम भवति। [14-]यस्मादिन्द्रं प्रति[-14] दुग्धवन्तस्तस्मात् [v]प्रतिधुषः प्रतिदिनं दुह्यमानस्य क्षीरस्य प्रतिधुगिति नाम संपन्नम् ॥

समिति ॥ अथ शतनामनिर्वचनं दर्शयति– ' समनैषुः प्रत्यधुक्षन्न तु मयि श्रयत इत्यब्रवीदेत-दस्मै शृतं कुरुतेत्यब्रवीत् तदस्मै शृतमकुर्वन्निन्द्रियं वावास्मिन् वीर्यं तदश्रयन् तच्छृतस्य शृतत्वम् ' इति ॥

३. तं३.लं– तृणादि च लक्षण°। ४. तं३– अदुग्धम्। *–* [लं– ' प्रतिधुक्...इन्द्रियादिकं पशवः ' इत्ययं भागो नास्ति]।

* (द्र. चरकसंहिता–सूत्रस्थान १·७२)। १०. आ–ओषधीभ्यः सका°। ११. ड.हो१– स्वशरीरमध्ये; शृं– स्वशरीरस्य मध्ये। १२. आ–सांनाय्यस्य गोरसस्य। १३.आ–आनययेन। १४–१४. अ.उ.जो.ना.पा–पुनः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पौर्णमास्यां वैमृधपुरोडाशः, अमावास्यायां सांनाय्यादियागः]

(३) शृतं कुरुतेत्यब्रवीत् तदस्मै शृतमकुर्वन्निन्द्रियं वावास्मिन् वीर्यं तदश्रयन् तच्छृतस्य शृतत्वꣳ समनैषुः प्रत्यधुक्षञ्छृतमक्रन् न तु मा धिनोतीत्यब्रवीदेतदस्मै दधि कुरुतेत्यब्रवीत् तदस्मै दध्यकुर्वन् तदेनमधिनोत् तद्दध्नो दधित्वं

शृतम्। कुरुत। इति। अब्रवीत्। तत्। अस्मै। शृतम्। अकुर्वन्। इन्द्रियम्। वाव। अस्मिन्। वीर्यम्। तत्। अश्रयन्। तत्। शृतस्य। शृतत्वमिति शृत-त्वम्। समिति। अनैषुः। प्रतीति। अधुक्षन्। शृतम्। अक्रन्। न। तु। मा। धिनोति। इति। अब्रवीत्। एतत्। अस्मै। दधि। कुरुत। इति। अब्रवीत्। तत्। अस्मै। दधि। अकुर्वन्। तत्। एनम्। अधिनोत्। तत्। दध्नः। दधित्वमिति दधि-त्वम्।

[5]तत् [v]तु [v]मयि[5] [v]न [v]श्रयते न पच्यते न मयि प्रीतिं करोति। श्रिञ् पाके, व्यत्ययेन शप्। अथ प्रजापतिः पशून् [v]अब्रवीत्। [v]एतत् [v]अस्मै इन्द्राय [v]शृतं पक्वं [v]कुरुत। यद्वा–न तु मयि श्रयते स्थितिं न करोति। श्रीञ् सेवायाम्। एवमिन्द्रेणोक्ते प्रजापतिरब्रवीत् एतदस्मै शृतं पक्वं कुरुत यथाऽस्मिन् श्रयत इति। शृतेति "शृतं पाके" (पा ६·१·२७) इति निपात्यते। यद्वा–शृणातेः शृतमिति छान्दसं संप्रसारणम्॥ [6]आह च–[v]तत् [v]अश्रयन्, [v]तत् [v]शृतस्य [v]शृतत्वम् इति। अथेन्द्र आह– [v]सम् [v]अनैषुः [v]प्रति [v]अधुक्षन् [v]शृतम् [v]अक्रन् अकार्षुः। [v]न [v]तु मां [v]धिनोति प्रीणयति [v]इति। करोतेः[6] लुङि "मन्त्रे घस°" (पा २·४·८०) इति च्लेर्लुक्। धिवि

भोः प्रजापते, त्वदाज्ञया पशवः [v]समनैषुः [v]प्रत्यधुक्षन् च क्षीररूपं तद्वीर्यं [v]मयि [v]न [v]श्रयते पाकाभावात् मदुदरे तन्न जीर्यति [15v]इति उक्तवान्। ततः प्रजापतिः [16]पाककर्तॄन् प्रति [v]शृतं पक्वं [v]कुरुत [v]इति [v]अब्रवीत्। तथा कृते सति [17]तदिन्द्रियसामर्थ्यरूपं पक्वं पयोऽस्मिन्निन्द्रोदरे सम्यगाश्रितमभूत्। [18]तस्मात् श्रा पाक इत्यस्मात् श्रिञो वा शृतमिति नाम [19]निष्पन्नम्॥

समिति॥ अथ दधिनामनिर्वचनं दर्शयति– 'समनैषुः प्रत्यधुक्षञ्छृतमक्रन्न तु मा धिनोतीत्यब्रवीदेतदस्मै दधि कुरुतेत्यब्रवीत् तदस्मै दध्यकुर्वन् तदेनमधिनोत् तद्दध्नो दधित्वम्' इति। संनयनप्रतिदोहनशृतत्वानि संपन्नान्येव, किंतु तच्छृतं मां [v]तु [v]न [v]धिनोति न प्रीणयतीत्युक्तः[20] प्रजापतिरातञ्चनकर्तॄन् प्रति [v]दधि [v]कुरुत [v]इति [v]अब्रवीत्। [v]तत् च दधिकृतं सत् [v]एनम् इन्द्रम् [v]अधिनोत् अप्रीणयत्। तस्मात् [21]धिनोतीति व्युत्पत्त्या[21] दधिनाम संपन्नम्। अत्र 'ऐन्द्रं दधि' इति विधिर्विस्पष्ट एव दृश्यते[22]। शृतनामनिर्वचनार्थवादेन 'ऐन्द्रं पयः' इत्यपि[23] विधिमुन्नयेत्। अन्यथा वक्ष्यमाणशृतावदानविचारानुदयप्रसङ्गात्॥

५–५. तं३.मै.लं– कर्तुमपि। ६–६. तं३.मै.लं– अक्रन्।

१५. आ.क– इत्यर्थम्। १६. आ.हा– पशून्; हो१– शाककर्तॄन्। १७. अ.आ.इ.उ.जो.ना.पा.हा– °सामर्थ्यं। १८–१८. अ.आ.इ.उ.जो.पा.हा–यस्मात्; ड.हो१.शृं – यस्मात् पक्वमाश्रितं च। १९. ड– संपन्नम्। २०. आ– °तीत्युक्ते। २१–२१. आ– 'धिनोतीति व्युत्पत्त्या' नास्ति। २२. आ.शृं– 'दृश्यते' नास्ति। २३. आ– 'अपि' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[पौर्णमास्यां वैसृधपुरोडाशः, अमावास्यायां सांनाय्यादियागः

ब्रह्मवादिनो वदन्ति दध्नः पूर्वस्यावदेयं (४) दधि हि पूर्वं क्रियत इत्यनादृत्य तच्छृतस्यैव पूर्वस्यावद्येदिन्द्रियमेवास्मिन् वीर्यꣳ श्रित्वा दध्नोपरिष्टाद्धिनोति यथापूर्वमुपैति यत् पूतीकैर्वा पर्णवल्कैर्वाऽऽतञ्च्यात् सौम्यं तद्यत् क्लैले राक्षसं तद्यत् तण्डुलैर्वैश्वदेवं

ब्रह्मवादिन इति ब्रह्म-वादिनः। वदन्ति। दध्नः। पूर्वस्य। अवदेयमित्यव-देयम् (४)। दधि। हि। पूर्वम्। क्रियते। इति। अनादृत्येत्यना-दृत्य। तत्। शृतस्य। एव। पूर्वस्य। अवेति। द्येत्। इन्द्रियम्। एव। अस्मिन्। वीर्यम्। श्रित्वा। दध्ना। उपरिष्टात्। धिनोति। यथापूर्वमिति यथा-पूर्वम्। उपेति। एति। यत्। पूतीकैः। वा। पर्णवल्कैरिति पर्ण-वल्कैः। वा। आतञ्च्यादित्या-तञ्च्यात्। सौम्यम्। तत्। यत्। क्लैलैः। राक्षसम्। तत्। यत्। तण्डुलैः। वैश्वदेवमिति वैश्व-देवम्।

१० प्रीणने, इदित्वान्नुम् (पा ७·१·५८), "धिन्विकृण्व्योर च" (पा ३·१·८०) इत्युप्रत्ययः। अथ प्रजापतिः [v]अब्रवीत् पशून् [v]एतत् [v]अस्मै [v]दधि प्रीणनं [v]कुरुत [v]इति। ते च [v]अस्मै प्रीणनम् [v]अकुर्वन्। तदेनमित्यादि। गतम्। धिनोतीति दधि। धिनोतेः किः, द्विर्वचनादि। दधातिर्वा प्रीणने, इदित्वान्नुम् (?), "आदृगमहन°" (पा ३·२·१७१) इति किन्प्रत्ययः। दध्न इत्यनङादेशस्योदात्तत्वादुदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्॥

१५ ब्रह्मवादिन इत्यादि॥ [७]अतीतायामेव रजन्यां [v]दधि उत्पाद्यते उत्तरेद्युः प्रातर्दोहः [v]इति दध्नः पूर्वत्वमिति। एतद्दूषयति– अनादृत्येत्यादि। यदिन्द्रस्येन्द्रियादिकमोषधीभ्य आनीय इन्द्राय प्रतिदुग्धं तदिन्द्रे प्रथमं [v]श्रित्वा सेवितं पक्वं [८]वा कृत्वा [v]उपरिष्टात् उत्तरकालं [९]दधिभागेन इन्द्रं [v]धिनोति तस्माच्छ्रितस्यैव पूर्वत्वम्। गतमन्यत्॥

यदित्यादि॥ पूतीकः सोमसदृशो लताविशेषः। पर्णवल्कः पलाशवृन्तम्। आतञ्चनं २० द्रव्यान्तरसंप्रयोगेन पयसो घनीभावः। तञ्चू संकोचने। क्वलः ह्रस्वहृदः। तण्डुलाः गताः।

ब्रह्मवादिन इति॥ तमेव विचारमभिप्रेत्य पूर्वपक्षमुपन्यस्यति– 'ब्रह्मवादिनो वदन्ति दध्नः पूर्वस्यावदेयं दधि हि पूर्वं क्रियत इति' इति॥ यस्मात् पूर्वदिने रात्रौ [v]दधि [v]क्रियते तस्माज्जुह्वामवदान-कालेऽपि[२४] [v]दध्नः स्वरूपमेव पूर्वम् [v]अवदेयम्॥

अनादृत्येति॥ तमेवं पूर्वपक्षं [२५]दूषयित्वा सिद्धान्तं विधत्ते– 'अनादृत्य तच्छृतस्यैव पूर्वस्याव २५ **द्येदिन्द्रियमेवास्मिन् वीर्यꣳ श्रित्वा दध्नोपरिष्टाद्धिनोति यथापूर्वमुपैति' इति। [v]तत् पूर्वं दध्यवदानम् [v]अनादृत्य क्षीरस्य [v]एव स्वरूपं पूर्वमवदेयम्। तथा सति [v]अस्मिन् यजमान [२६]इन्द्रियरूपं क्षीरं [२७]प्रथमम् अवस्थाप्य [v]उपरिष्टात् [v]दध्ना प्रीणयति। क्षीरं पूर्वभावि दधि पश्चाद्भावीत्येवमुत्पत्तिक्रममपि प्राप्तवान् भवति॥**

७. तं३.मै.लं– अन्तिमायाम्। ८. तं३–'वा' नास्ति। ९. तं३.पं२.लं– दधिलाभेन; मै४–दधिभावेन।
३० २४. आ– °दानेऽवदीयमाने; क.हो१–'अपि' नास्ति। २५. आ– दर्शयित्वा। २६. आ–°रूपमेव।
२७. आ– 'प्रथमम्' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पौर्णमास्यां वैमृधपुरोडाशः, अमावास्यायां सांनाय्यादियागः]

तद्यदातञ्चनेन मानुषं तद्यद्दध्ना तत् सेन्द्रं दध्नाऽऽतनक्ति (५) सेन्द्रत्वायाग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संतत्या इन्द्रो वृत्रꣳ हत्वा परां परावतमगच्छदपाराधमिति मन्यमानस्तं देवताः प्रैषमैच्छन्त्सोऽब्रवीत् प्रजापतिर्यः प्रथमोऽनुविन्दति

तत्। यत्। आतञ्चनेनेत्या-तञ्चनेन। मानुषम्। तत्। यत्। दध्ना। तत्। सेन्द्रमिति स-इन्द्रम्। दध्ना। एति। तनक्ति (५)। सेन्द्रत्वायेति सेन्द्र-त्वाय। अग्निहोत्रोच्छेषणमित्यग्निहोत्र-उच्छेषणम्। अभ्यातनक्तीत्यभि-आतनक्ति। यज्ञस्य। संतत्या इति सं-तत्यै। इन्द्रः। वृत्रम्। हत्वा। पराम्। परावतमिति परा-वतम्। अगच्छत्। अपेति। अराधम्। इति। मन्यमानः। तम्। देवताः। प्रैषमिति प्र-एषम्। ऐच्छन्। सः। अब्रवीत्। प्रजापतिरिति प्रजा-पतिः। यः। प्रथमः। अनुविन्दतीत्यनु-विन्दति।

आतञ्चनद्रव्यं दधि प्रसिद्धम्। [V]सेन्द्रम् इन्द्रेण देवतया सहितम्। अग्निहोत्रोच्छेषणम् [१०]अग्निहोत्र-होमशेषः यवागूशेषः। तत् [V]अभि [V]आतनक्ति दध्ना आतच्य उपरि आ तनक्ति, [V]यज्ञस्य अविच्छेदाय ॥

इन्द्रो वृत्रं हत्वेति ॥ पितृयज्ञविधिः। परां परावतमिति। दूरदेशम् [V]अगच्छत्। "उपसर्गाच्छन्दसि धात्वर्थे" (पा ५·१·११८) इति वतिः। [V]अप [V]अराधम् [११]अपारात्सम्। छान्दसः सिज्लुक्। वृत्रं हतवान् [V]इति सापराधमात्मानं [V]मन्यमानः दूरात् गन्तुं श्रेय इति निश्चित्यागच्छत्। अथ [१२V]देवताः [V]तं [V]प्रैषं प्राप्तुम् [V]ऐच्छन्। इष गतौ, [१३-]छान्दसः सिज्लुक्[-१३]। सोऽब्रवीदित्यादि।

यदिति ॥ अथाऽऽतञ्चनं विधत्ते–"यत् पूतीकैर्वा पर्णवल्कैर्वाऽऽतञ्च्यात् सौम्यं तद्यत् क्लैं राक्षसं तद्यत् तण्डुलैर्वैश्वदेवं तद्यदातञ्चनेन मानुषं तद्यद्दध्ना तत् सेन्द्रं दध्नाऽऽतनक्ति सेन्द्रत्वाय" इति ॥ सोमवल्लीसमानाया लतायाः खण्डाः पूतीकाः। [२८]पलाशवृक्षस्यांशाः पर्णवल्काः। प्रौढबदरफलानि क्लाः। ईषदम्लतक्रमातञ्चनम्। पूतीकादिभिरातञ्चनं सोमादीनां प्रियम्। तथा सति [२९]अत्र इन्द्रप्रीत्यै [V]दध्ना आतञ्च्यात् ॥

अग्निहोत्रोच्छेषणमिति ॥ दध्नाऽऽतञ्चनस्योपर्यग्निहोत्रार्थयवागूशेषेणातञ्चनं विधत्ते–'अग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संतत्यै' इति ॥ दर्शयागस्याग्निहोत्रेण सहाविच्छेदः संततिः ॥

इन्द्र इति ॥ अथ पिण्डपितृयज्ञं विधत्ते–'इन्द्रो वृत्रꣳ हत्वा परां परावतमगच्छदपाराधमिति मन्यमानस्तं देवताः प्रैषमैच्छन्त्सोऽब्रवीत् प्रजापतिर्यः प्रथमोऽनुविन्दति तस्य प्रथमं भागधेयमिति तं पितरोऽन्वविन्दन् तस्मात् पितृभ्यः पूर्वेद्युः क्रियते' इति। वृत्रवधेनासुराणामपराधं कृतवान् अस्मि [V]इति

१०. तं३.मै.लं– °होत्रशेषः। ११. तं३– अपाराद्धम्। १२. मै– देवाः। १३–१३. मै– 'छान्दसः सिज्लुक्' नास्ति; मै४– छान्दसो णमुल्।

२८. क.हो१– °शकाष्ठस्यांशाः। २९. शृं.हो१– 'अत्र' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[पौर्णमास्यां वैमृधपुरोडाशः, अमावास्यायां सांनाय्यादियागः

तस्य प्रथमं भागधेयमिति तं पितरोऽन्वविन्दन् तस्मात् पितृभ्यः पूर्वेद्युः क्रियते सोऽमावास्यां प्रत्याऽगच्छत् तं देवा अभि समगच्छन्तामा वै नो(६)ऽद्य वसु वसतीतीन्द्रो हि देवानां वसु तदमावास्याया अमावास्यत्वं

तस्य। प्रथमम्। भागधेयमिति भाग - धेयम्। इति। तम्। पितरः। अन्विति। अविन्दन्। तस्मात्। पितृभ्य इति पितृ - भ्यः। पूर्वेद्युः। क्रियते। सः। अमावास्यामित्यमा - वास्याम्। प्रति। एति। अगच्छत्। तम्। देवाः। अभि। समिति। अगच्छन्त। अमा। वै। नः (६)। अद्य। वसु। वसति। इति। इन्द्रः। हि। देवानाम्। वसु। तत्। अमावास्याया इत्यमा - वास्यायाः। अमावास्यत्वमित्यमावास्य - त्वम्।

गतम्। [V]अनु [V]विन्दति अनुक्रमेण लभते। [V]पूर्वेद्युः पूर्वस्मिन्नह्नि। "सद्यः परुत्° " (पा ५· १० ३·२२) इत्यादिना निपात्यते।

[V]अमावास्यां [V]प्रति, लक्षणे कर्मप्रवचनीयत्वम् (पा १·४·८४), अमावास्यया गमनं लक्ष्यते इति। अथामावास्यायां [V]देवाः [V]तम् इन्द्रम् [V]अभि [V]समगच्छन्त आभिमुख्येन संगता अभवन्। कथं [१५]वदन्तः ? [V]अद्य अस्मिन्नह्नि [V]नः अस्माकं [V]वसु अस्मदीयं धनम् इन्द्रोऽयम् [V]अमा सहास्माभिः [V]वसति [V]इति। एवं [१५]देवाः वदन्तः [१६]एनमिन्द्रमभितः समागताः। इन्दो हीति। [१७][V]वसु वरिष्ठं १५ [१८]द्रव्यम्। अमावास्यत्वमिति। अमा [१९]सह वसन्त्यस्यामिन्द्रो देवताश्चेत्यमावास्या। अधिकरणे (पा ३· १·१२२) ण्यत्। इदं च व्युत्पत्त्यन्तरम्, अमा वसतः सूर्याचन्द्रमसावस्याम् इति [२०]व्युत्पत्तिदर्शनात्॥

[V]मन्यमानः [V]इन्द्रः भीतोऽत्यन्तं दूरम् [V]अगच्छत्। [V]तम् इन्द्रं प्रति [V]देवताः आह्वानम् [V]ऐच्छन्। [३०]देवतानां मध्ये [V]यः अन्विष्य प्रथमम् इन्द्रं लभते [V]तस्य [V]प्रथमम् भागो दीयते [V]इति प्रजापतिनोक्ताः [V]पितरः प्रथमम् इन्द्रं यस्मादलभन्त, [V]तस्मात् [V]पितृभ्यः [V]पूर्वेद्युः पिण्डपितृयज्ञं कुर्यात्। दर्शयागदेवतानाममावास्या- २० यामारम्भः प्रतिपदि तद्यागः। पितॄणां त्वमावास्यायामेव पिण्डदानम्॥

ननु ब्राह्मणग्रन्थे प्रथमकाण्डस्य तृतीयप्रपाठकेऽन्त्यानुवाके महता प्रपञ्चेन पिण्डपितृयज्ञो विहितः। बाढम्। एवं तर्हि सांनाय्यप्रशंसार्थमत्र तदनुवादोऽस्तु॥

स इति॥ तामेव स्तुतिं द्योतयितुममावास्यानिर्वचनं दर्शयति– 'सोऽमावास्यां प्रत्याऽगच्छत् तं देवा अभि समगच्छन्तामा वै नोऽद्य वसु वसतीतीन्द्रो हि देवानां वसु तदमावास्याया अमा- २५ वास्यत्वम्' इति॥ पितृभिरन्विष्य लब्धः [V]सः इन्द्रः अमावास्यायां पलायनदेशात् [३१]प्रतिनिवृत्य

---

१४. तं३– 'वदन्तः' इत्यस्यानन्तरम् 'आहुः'। १५. मै४– तृप्त्या। १६. तं३.मै.लं– °मभिगताः। १७. तं३– 'वसु' नास्ति। १८. मै४– द्रव्यं वसु। १९. तं३.लं– 'सह' नास्ति २०. तं३– °दर्शनार्थम्।

---

३०. जो.ना–देवानां; पा– 'देवतानां' नास्ति। ३१. अ.इ.उ.जो.पा.हा– प्रतिपदि निर्वर्त्य; ना– ३० प्रतिनिवर्त्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पौर्णमास्यां वैमृधपुरोडाशः, अमावास्यायां सांनाय्यादियागः]

ब्रह्मवादिनो वदन्ति किंदेवत्यꣳ सांनाय्यमिति वैश्वदेवमिति ब्रूयाद्विश्वे हि तद्देवा भागधेयमभि समगच्छन्तेत्यथो खल्वैन्द्रमित्येव ब्रूयादिन्द्रं वाव ते तद्भिषज्यन्तोऽभि समगच्छन्तेति ॥ ३ ॥

[दधि मे जघ्नुष इन्द्रियं वीर्यमित्यब्रवीदेतदस्मा अवदेयं तनक्ति नो द्विचत्वारिꣳशच्च] ॥

ब्रह्मवादिन इति ब्रह्म-वादिनः । वदन्ति । किंदेवत्यमिति किं-देवत्यम् । सांनाय्यमिति सां-नाय्यम् । इति । वैश्वदेवमिति वैश्व-देवम् । इति । ब्रूयात् । विश्वे । हि । तत् । देवाः । भागधेयमिति भाग-धेयम् । अभीति । समगच्छन्तेति सम्-अगच्छन्त । इति । अथो इति । खलु । ऐन्द्रम् । इति । एव । ब्रूयात् । इन्द्रम् । वाव । ते । तत् । भिषज्यन्तः । अभि । समिति । अगच्छन्त । इति ॥ ३ ॥

[शब्रा १.६.४]

वैश्वदेवमिति ॥ [२१]वृत्रवधादनन्तरम् [२२-२२]इन्द्रियं वीर्यं च[-२२] दूरतरं गतम् । पितृभिः प्रत्यानीतमिन्द्रममावास्यायां सांनाय्येन प्रवृद्धेन्द्रियवीर्यं कर्तुं [v]विश्वे [v]देवाः [v]तत् सांनाय्य एव ऐन्द्रम् [v]भागधेयम् [v]अभि [v]समगच्छन्त । तस्माद्वैश्वदेवं भवितुं युक्तमिति ॥

[२३]दूषयति– अथो इति । तदानीं देवाः [v]इन्द्रं [v]भिषज्यन्तः एव [v]अभि [v]सम् [v]अगच्छन्त न [२४-]त्वात्मभागलब्धये । तल्लाभहेतौ[-२४] शतृप्रत्ययः (पा ३.२.१२६), इन्द्रभैषज्यार्थमेव अभिसमगच्छन्त । तस्माद्विश्वे देवा [२५]अप्रसक्ता [२६]एवेति [v]ऐन्द्रम् [v]इति [v]एव उत्तरं समीचीनामिति । भिषज्यतिः कण्ड्वादिर्यगन्तः (पा ३.१.२७) ॥

इति द्वितीये पञ्चमे तृतीयोऽनुवाकः ॥

समागतः । [३२]तदा [v]देवाः [v]तम् इन्द्रम् अभिमुखीकर्तुं संप्राप्ताः परस्परमिदमब्रुवन्– [३३v]अद्य [v]नः अस्माकं [v]वसु श्रेष्ठं धनम् [v]अमा [v]वसति सह तिष्ठति, सर्वेषां साधारणत्वेन वर्तत इत्यर्थः । किं तद्वस्विति चेत्[३४] तदुच्यते–[v]इन्द्रः खलु सर्वेषां [v]देवानां [v]वसु श्रेष्ठं धनं, तस्मिन् वर्तमाने सति स्वामिलाभात् । यस्माद्देवा एवमुक्तवन्तस्तस्मादमा वसत्यद्येति व्युत्पत्त्या [३५-]अमावास्या नाम[-३५] संपन्नम् ॥

२१. मै४–वृत्रवधानन्तरम् । २२–२२. मै४–इन्द्रियवीर्यहीनम् । २३. मै४–एतद्दूषयति–अथो खल्विति । ऐन्द्रमित्येव उत्तरं ब्रूयात् । हेतुमाह इन्द्रं वा इति । यद्यपि विश्वेऽपि देवा अभिसमगच्छन्त तथापि भिषजि व्यत्ययेन इन्द्रस्यैव प्राधान्यात् ऐन्द्रमेव भवितुमर्हतीति । यद्वा तदानीं विश्वेदेवा भागधेयं वयमपि भागिनो भूयास्मेति । एवमात्मीयभागभूतमेव तत् समगच्छन्त । तस्मात् वैश्वदेवं भवितुं युक्तमिति दूषयति । २४–२४. मै४–°भागलिप्सया हेतौ । २५. तं३.मै.लं – प्रसक्ता चेति । २६. मै४–'एवेति' । इत्यस्यानन्तरम् 'ऐन्द्रमिति' ।

३२. आ.ड.ते; हो१ – तदा ते । ३३. अ.इ.उ.जो.ना.पा.हा.हो१ – अथ । ३४. आ. – 'चेत्' नास्ति । ३५–३५. ड.शृं– तन्नाम ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[पौर्णमास्यां वैमृधपुरोडाशः, अमावास्यायां सांनाय्यादियागः

ब्रह्मवादिन इति॥ 'ऐन्द्रं दधि' इति विधिवाक्ये सांनाय्यस्य यदैन्द्रत्वमुक्तं तदेव पूर्वोत्तरपक्षाभ्यां द्रढयति– 'ब्रह्मवादिनो वदन्ति किंदेवत्यꣳ सांनाय्यमिति वैश्वदेवमिति ब्रूयाद्विश्वे हि तदेवा भागधेयमभि समगच्छन्तेत्यथो खल्वैन्द्रमित्येव ब्रूयादिन्द्रं वाव ते तद्भिषज्यन्तोऽभि समगच्छन्तेति' इति॥ पितृभिरानीयमानमिन्द्रमभिमुखीकर्तुं सर्वेऽपि [r]देवाः यदा समागच्छंस्तदा[३६] तत्सांनाय्यलक्षणं [३७]भागमभिलक्ष्यैव समागच्छन्निति [३८-r]सांनाय्यं [v]वैश्वदेवम्-[३८] [r]इति केषांचित् पक्षः। अथोशब्दः पक्षान्तरार्थः। भीत्या दूरदेशं गतम् [r]इन्द्रम् [r]भिषज्यन्तः एव भयनिवारणेन समाधित्सन्त एव [r]ते [३९]देवास्तत्र समागताः, न तु सांनाय्यलिप्सया। तस्मात् सांनाय्यम् [r]ऐन्द्रम् [r]इति [r]एव बुद्धिमान् [v]ब्रूयात्॥

अत्र मीमांसा॥ चतुर्थाध्यायस्य तृतीयपादे चिन्तितम्—

"संस्थाप्य पौर्णमासीं तामनु वैमृध ईरितः।
द्वयोरङ्गमुतैकस्य द्वयोः स्यात् प्रक्रियावशात्॥
उत्पत्तिवाक्यतः पूर्णमाससंयोगभासनात्।
तस्यैवाङ्गं न दर्शस्य प्रक्रिया वाक्यबाधिता"॥ (जैन्या ४·३·२०-२१)॥

दर्शपूर्णमासप्रकरणे श्रूयते–"सꣳस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपति" (द्र. आपश्रौ ३·१५·१) इति। तत्रेयं वैमृधेष्टिः प्रकरणबलात् प्रयाजादिवदुभयोरपि दर्शपूर्णमासयोरङ्गमिति चेत्। न। वाक्यस्य प्रबलत्वात्। न च 'संस्थाप्य' इति [४०]पौर्णमास्याः समाप्त्यभिधानात् [४१-]तदङ्गत्वमयुक्तमिति वाच्यम्-[४१]। दर्शसाधारणाङ्गसमाप्त्यभिप्रायेण [४२]तदुपपत्तेः। तस्मादुत्पत्तिवाक्यादेककर्तृकत्ववाचिक्त्वाप्रत्ययाच्च पूर्णमासस्यैवाङ्गम्॥

द्वितीयाध्याये तृतीयपादे चिन्तितम्—

"[४३-]दर्शपूर्णमयोः प्रोक्तः-[४३] आग्नेयः [४४]केवलोऽप्यसौ।
दर्शे यदिति वाक्याभ्यां कर्मान्यद्वाऽनुवादगीः॥
अभ्यासादन्यकर्मत्वं द्विर्दर्शेऽसौ प्रयुज्यताम्।
एकत्वं प्रत्यभिज्ञानादनूक्त्यैन्द्राग्नसंस्तुतिः"॥ (जैन्या २·३·३३-३४)॥

"यदाऽऽग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति" (तैसं २·६·३) इति कालद्वये विहितम्, "यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवति" (तैसं २·५·३) इति एकस्मिन् काले पुनर्विहितम्। [४५]तत्राविशेषपुनःश्रुतिलक्षणेनाभ्यासेन प्रयाजानामिव भेदः। तथा सति आग्नेययागस्य दर्शकाले द्विः प्रयोग इति चेत्। न। प्रत्यभिज्ञानादाग्नेयस्यैकत्वे सत्येककालवाक्यस्यानुवादकत्वात्[४६]। न चानुवादो व्यर्थः। विधेयैन्द्राग्नस्तुत्यर्थत्वात्। यद्यप्याग्नेयोऽष्टाकपालोऽमावास्यायां भवति, तथाऽपि न केवलेनाग्निना साधुर्भवति[४७]। इन्द्रसहितोऽग्निः समीचीनतरः। तस्मादैन्द्राग्नः कर्तव्य इति विधेयस्तुतिः। प्रयाजवैषम्यं तूक्तमेवानुसंधेयम्। तस्मादनुवादः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः॥ ३॥

---

३६. ड.शृं.हो१ – °स्तदानीम्। ३७. ड.शृं.हो१– भागधेयम°। ३८–३८. ड.शृं.हो१– सांनाय्यस्य वैश्वदेवत्वम्। ३९. आ– देवास्त्विन्द्रं। ४०. क– पौर्णमासस्य। ४१–४१. हो१– अङ्गत्वमुक्तमिति वाक्यम्। ४२. आ.ड– उपपतेः। ४३–४३. जो.ना– यो दर्शपूर्णमासोक्तः, ड.हो१– दर्शपूर्णमासयोः प्रोक्तः। ४४. अ.उ.ड.पा.शृं– केवलेऽप्यसौ। ४५. क– तत्राविशेषे पुनः°; हा– तत्र विशेषपुनः°। ४६. आ– °स्यानुवादत्वात्। ४७. शृं– °र्भवतीति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आतृण्यवतः पशुकामस्य च पौर्णमास्याम् अनुनिर्वाप्यौ]

ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासौ यजेत य एनौ सेन्द्रौ यजेतेति वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति तेन पूर्णमासः सेन्द्र ऐन्द्रं दध्यमावास्यायां तेनामावास्या सेन्द्रा य एवं विद्वान् दर्शपूर्णमासौ यजते सेन्द्रावेवैनौ यजते श्वःश्वोऽस्मा ईजानाय वसीयो भवति देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता(१)मिष्टिमपश्यन्नाग्नावैष्णव-

---

ब्रह्मवादिन इति ब्रह्म-वादिनः। वदन्ति। सः। तु। वै। दर्शपूर्णमासाविति दर्श-पूर्णमासौ। यजेत। यः। एनौ। सेन्द्राविति स-इन्द्रौ। यजेत। इति। वैमृधः। पूर्णमास इति पूर्ण-मासे। अनुनिर्वाप्य इत्यनु-निर्वाप्यः। भवति। तेन। पूर्णमास इति पूर्ण-मासः। सेन्द्र इति स-इन्द्रः। ऐन्द्रम्। दधि। अमावास्यायामित्यमा-वास्यायाम्। तेन। अमावास्येत्यमा-वास्या। सेन्द्रेति स-इन्द्रा। यः। एवम्। विद्वान्। दर्शपूर्णमासाविति दर्श-पूर्णमासौ। यजते। सेन्द्राविति स-इन्द्रौ। एव। एनौ। यजते। श्वश्व इति श्वः–श्वः। अस्मै। ईजानाय। वसीयः। भवति। देवाः। वै। यत्। यज्ञे। अकुर्वत। तत्। असुराः। अकुर्वत। ते। देवाः। एताम् (१)। इष्टिम्। अपश्यन्। आग्नावैष्णवमित्याग्ना-वैष्णवम्। एकादशकपालमित्येकादश-कपालम्।

ब्रह्मवादिन इत्यादि॥ गतम्। य एनावित्यादि। अविदुषो नार्थः। [v]पूर्णमासे वैमृधेन [v]अमावास्यायाम् ऐन्द्रेण दध्ना च इत्येवं विदित्वेष्टवते यजमानायोत्तरमुत्तरं दिनं प्रशस्ततरं [v]भवति॥

देवा वा इत्यादि॥ गतम्। एतामिष्टिमिति। वक्ष्यमाणां त्रिहविष्कां पौर्णमासीसमाप्य-नन्तरं तस्या [1]अनुनिर्वाप्याम् अकुर्वन्। पौर्णमास्येवानुनिर्वाप्यसहिता फलं ददाति॥

उक्ते वैमृधसांनाय्ये द्वितृतीयानुवाकके॥

अथ चतुर्थ आग्नावैष्णवादयो वक्तव्याः॥

ब्रह्मवादिन इति॥ तत्राऽऽदौ तावत् [1]पूर्वानुवाकोक्तयोः दर्शपूर्णमासयोः प्रशंसामाह– 'ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासौ यजेत य एनौ सेन्द्रौ यजेतेति वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति तेन पूर्णमासः सेन्द्र ऐन्द्रं दध्यमावास्यायां तेनामावास्या सेन्द्रा य एवं विद्वान् दर्शपूर्णमासौ यजते सेन्द्रावेवैनौ यजते श्वःश्वोऽस्मा ईजानाय वसीयो भवति' इति॥ [2-v]यः [v]एनौ-[2] दर्शपूर्णमासयागौ [3]इन्द्रसहितौ [4v]यजेत [v]सः एव दर्शपूर्णमासयाजी न त्वन्यः। तयोश्च यागयोः [5]सेन्द्रत्वं वैमृधसांनाय्याभ्यां संपद्यते। [v]एवं विदुषः सेन्द्रयागेनो(णो)त्तरोत्तरदिने धनाधिक्यं [v]भवति॥

देवा इति॥ अथ पौर्णमास्यां काम्यमनुनिर्वाप्यमिष्ट्यन्तरं विधातुं प्रस्तौति– 'देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतामिष्टिमपश्यन्नाग्नावैष्णवमेकादशकपालꣳ सरस्वत्यै चरुꣳ सरस्वते चरुं तां पौर्णमासꣳ सꣳस्थाप्यानु निरवपन् ततो देवा अभवन् पराऽसुराः' इति॥ देवानां यज्ञं दृष्ट्वा

---

१. पं२– अभिव्याप्त्याम्; लं– अभिव्याप्याम्।

१. आ– पूर्वोक्तानुवाकयोः। २–२. आ.शृं– एतौ; ड– य एतौ। ३. आ.शृं– 'ºसहितौ' इत्यस्यानन्तरं 'यः'। ४. आ–यज़ते। ५. अ.इ.उ.पा. हा– श्रैष्ठ्यत्वं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मेकादशकपालꣳ सरस्वत्यै चरुꣳ सरस्वते चरुं तां पौर्णमासꣳ सꣳस्थाप्यानु निरवपन् ततो देवा अभवन् पराऽसुरा यो आतृव्यवान्त्स्यात् स पौर्णमासꣳ सꣳस्थाप्यैतामिष्टिमनु निर्वपेत् पौर्णमासेनैव वज्रं आतृव्याय प्रहृत्याऽऽग्नावैष्णवेन देवताश्च यज्ञं च आतृव्यस्य वृङ्क्ते मिथुनान् पशून्त्सारस्वताभ्यां यावदेवास्यास्ति तत्(२)सर्वं वृङ्क्ते पौर्णमासीमेव यजेत आतृव्यवान्नामावास्याꣳ हत्वा आतृव्यं नाऽऽप्याययति

सरस्वत्यै। चरुम्। सरस्वते। चरुम्। ताम्। पौर्णमासमिति पौर्ण - मासम्। सꣳस्थाप्येति सं - स्थाप्य। अनु। निरिति। अवपन्। ततः। देवाः। अभवन्। परेति। असुराः। यः। आतृव्यवानिति आतृव्य - वान्। स्यात्। सः। पौर्णमासमिति पौर्ण - मासम्। सꣳस्थाप्येति सं - स्थाप्य। एताम्। इष्टिम्। अनु। निरिति। वपेत्। पौर्णमासेनेति पौर्ण - मासेन। एव। वज्रम्। आतृव्याय। प्रहृत्येति प्र - हृत्य। आग्नावैष्णवेनेत्याग्ना - वैष्णवेन। देवताः। च। यज्ञम्। च। आतृव्यस्य। वृङ्क्ते। मिथुनान्। पशून्। सारस्वताभ्याम्। यावत्। एव। अस्य। अस्ति। तत् (२)। सर्वम्। वृङ्क्ते। पौर्णमासीमिति पौर्ण - मासीम्। एव। यजेत। आतृव्यवानिति आतृव्य - वान्। न। अमावास्यामित्यमा - वास्याम्। हत्वा। आतृव्यम्। न। एति। प्याययति।

[१]आह च– ' पौर्णमासेनैव ' इत्यादि[२]। [५]वृङ्क्ते वर्जयति स्वयं गृह्णाति। यस्मादेवं तस्मात् [५]यावत् किंचित् आतृव्यस्य विद्यते [५]तत् [५]सर्वम् अनयेष्टया [५]वृङ्क्ते ॥

नामावास्यामिति ॥ तत्र पितृयज्ञ एव क्रियते। [३]हत्वेत्यादि। उक्तम्–" घ्नन्ति वा एनं पूर्णमास आऽमावास्यायां प्याययन्ति " (तैसं २·५·२) इति[३]। *[*]तत्राप्यायितस्य वधादनाप्यायनमेव श्रेयः

[६]तथैवानुचरतामसुराणां देवसमानं विजयं दृष्ट्वा [५]देवाः तानसुरान् वञ्चयित्वाऽनुष्ठितेनानुनिर्वाप्येण स्वयं विजयं प्राप्ताः [५]असुराः च पराभूताः ॥

य इति ॥ अथ विधत्ते– ' यो आतृव्यवान्त्स्यात् स पौर्णमासꣳ सꣳस्थाप्यैतामिष्टिमनु निर्वपेत् पौर्णमासेनैव वज्रं आतृव्याय प्रहृत्याऽऽग्नावैष्णवेन देवताश्च यज्ञं च आतृव्यस्य वृङ्क्ते मिथुनान् पशून्त्सारस्वताभ्यां यावदेवास्यास्ति तत् सर्वं वृङ्क्ते ' इति ॥ [५]पौर्णमासेन प्रधानयागेन वज्रप्रहारः। " अग्निः सर्वा देवता विष्णुर्यज्ञः " (तैसं २·३·११) इत्युक्तत्वात् तदीयहविषा वैरिणः [५]देवताः [७८]यज्ञं [५]च [८]विनाशयति। सारस्वतयोः स्त्रीपुरुषदेवत्वात् [९]तदीयहविर्भ्यां मिथुनानां पशूनां वर्जनम्। एतावता आतृव्यस्य [५]यावत् वित्तम् [५]अस्ति [५]तत् [५]सर्वं नाशितं भवति ॥

पौर्णमासीमेव इति ॥ यदुक्तं सूत्रकारेण– ' पौर्णमासीमेव यजेत आतृव्यवान्नामावास्याम्। पितृयज्ञमेवामावास्यायां [१०]कुरुते " (आपश्रौ ३·१६·६-७) इति, तदेतद्विधत्ते– ' पौर्णमासीमेव यजेत

२. मै– (कूग [कूहू] श्च। पौर्ण°; लं°– कूगश्च पौर्णमासेनैवैत्यादिकम्। ३–३. मै.मै३.– ' हत्वेत्यादि। उक्तम्...प्याययन्तीति ' नास्ति। *–* [मै४–' तत्राप्यायितस्य...प्याययन्तीति ' नास्ति।]।

६. ड.श्रं.हो१– °वानुतिष्ठताम°। ७. इ– यज्ञक्रतुं; अ.उ.क.जो.ना.पा.हा– यज्ञं क्रतुं। ८. अ.इ.उ.जो.ना.पा.हा– विनाशयन्ति। ९. ड–°हविषा। १०. आ.हा– क्रियते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आतृव्यवतः पशुकामस्य च पौर्णमास्याम् अनुनिर्वाप्यौ]

साकंप्रस्थायीयेन यजेत पशुकामो यस्मै वा अल्पेनाऽऽहरन्ति नाऽऽत्मना तृप्यति नान्यस्मै ददाति यस्मै महता तृप्यत्यात्मना ददात्यन्यस्मै महता पूर्णꣳ होतव्यं तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति

साकंप्रस्थायीयेनेति साकं - प्रस्थायीयेन। यजेत। पशुकाम इति पशु - कामः। यस्मै। वै। अल्पेन। आहरन्तीत्या - हरन्ति। न। आत्मना। तृप्यति। न। अन्यस्मै। ददाति। यस्मै। ५
महता। तृप्यति। आत्मना। ददाति। अन्यस्मै। महता। पूर्णम्। होतव्यम्। तृप्तः। एव। एनम्। इन्द्रः। प्रजयेति प्र - जया। पशुभिरिति पशु - भिः। तर्पयति।

इति लुप्यते, अमावास्यायां प्याययन्ति इति*। तद्वत् पौर्णमास्या; पौर्णमासे भ्रातृव्यं हत्वा [v]अमावास्यालोपेन आप्यायनम् अस्य निवर्तयति। यावदमावास्यामाप्यायितस्य वृद्ध्या वृत्रस्य अमावास्याया ऊर्ध्वं वधः क्रियते। तत्राप्यायितस्य वधादनाप्यायनमेव श्रेय इति लुप्यते अमावास्या॥ १०

साकंप्रस्थायीयेनेति॥ साकं सह ब्राह्मणैः प्रतिष्ठते होतुमिति साकंप्रस्थायी अध्वर्युः। तस्य संबन्धी साकंप्रस्थायीयो यागः, [v]यत्र द्वौ सायंदोहौ द्वौ प्रातर्दोहौ। तत्र ब्राह्मणाः पूर्णपात्रैः अध्वर्युं जुह्वन्तमनुजुह्वति। [v]अमावास्यैव विक्रियते। यस्मै वेति। [v]यस्मै [v]अल्पेन प्रमाणेन धनादिकम् [v]आहरन्ति [v]यथा सः [v]न [v]आत्मना [v]तृप्यति। येनात्मनि तृप्तिर्नास्ति

आतृव्यवान्नामावास्याꣳ हत्वा आतृव्यं नाऽऽ प्याययति ' इति॥ द्वितीयानुवाके वृत्रप्रसङ्ग इदमुक्तम्–" घ्नन्ति वा एनं पूर्णमास आऽमावास्यायां प्याययन्ति " (तैसं २.५.२) इति। तस्मादत्रापि पूर्णमासानुष्ठानेन [v]आतृव्यं [v]हत्वा दर्शयागपरित्यागेन आतृव्यस्याऽऽप्यायनं परित्यक्तवान् भवति॥

साकंप्रस्थायीयेन इति॥ अथ [११]दर्शस्य गुणविकृतिरूपं कंचिद्यागं विधत्ते– ' साकंप्रस्थायीयेन यजेत पशुकामो यस्मै वा अल्पेनाऽऽहरन्ति नाऽऽत्मना तृप्यति नान्यस्मै ददाति यस्मै महता तृप्यत्यात्मना ददात्यन्यस्मै महता पूर्णꣳ होतव्यं तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति ' इति॥ दधिक्षीरपूर्णाभिश्चतसृभिः कुम्भीभिः [१२-]ब्राह्मणात् हृताभिः-[१२] साकमध्वर्योः प्रस्थानं होमस्थानं प्रति प्रस्थानं यस्मिन् [१३]यागे सोऽयं साकंप्रस्थायीयो [१४]यागः, तेन [v]पशुकामः [v]यजेत। [१५]तत्र [v]महता [११]दधिक्षीरद्रव्येण [v]पूर्णं हविः [v]होतव्यम्। लोके च [१७v]यस्मै [१८]राज्ञे करप्रदायिन्यः प्रजाः [v]अल्पेन प्रमाणेन धनम् [v]आहरन्ति स राजा [v]न स्वयं [v]तृप्यति [v]न अपि [v]अन्यस्मै दातुं शक्नोति। [v]यस्मै तु [१९v]महता प्रमाणेन धनमाहरन्ति स राजा [२०-]स्वयं [v]तृप्यति च [v]अन्यस्मै दातुमपि च-[२०] प्रभवति। तस्मादत्रापि महता[२१] प्रमाणेन पूर्णस्य द्रव्यस्य होमे सति स्वयं

४. मै४–अमावास्यालोपेन पुनरेनं नाप्याययति। ५. मै– तत्र। ६. मै४– अमा वा सैव। ७. मै–अथ सः।

११. आ– दर्शपूर्णमासस्य॥ १२–१२. ड– ब्राह्मणधृताभिः। १३. ड.शृं– यागे सोऽस्ति। १४. ड– 'यागः' नास्ति। १५. क– अन्यत्र। १६. आ–क्षीरद्रव्येण। १७. ड–यस्मिन्। १८. ड–राज्ञि। १९. अ.इ.उ.जो.पा– महता द्रव्येण। २०–२०.ड– स्वयमपि च तृप्यति अन्यस्मै च दातुम्। २१. हा– महता द्रव्येण।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[आतृव्यवतः पशुकामस्य च पौर्णमास्याम् अनुनिर्वाप्यौ

दारुपात्रेण जुहोति न हि मृन्मयमाहुतिमानशे औदुम्बरं(३)भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्द्धे

दारुपात्रेणेति दारु - पात्रेण। जुहोति। न। हि। मृन्मयमिति मृत् - मयम्। आहुतिमित्या - हुतिम्। आनशे। औदुम्बरम् (३)। भवति। ऊर्क्। वै। उदुम्बरः। ऊर्क्। पशवः। ऊर्जा। एव। अस्मै। ऊर्जम्। पशून्। अवेति। रुन्द्धे।

५

[a]–[a]असौ धनान्तरं च [v]न [v]अन्यस्मै[a] *–दातुं शक्नोति–*। यदि [v]महता प्रमाणेन अस्मा आहरन्ति, स स्वयं च [v]तृप्यति, [v]अन्यस्मै चायं महता प्रमाणेन [v]ददाति, [१]तस्याप्यति-तृप्तिर्भवतीति भावः॥

दारुपात्रेणेति॥ औदुम्बरैश्चतुर्भिः (द्र. आपश्रौ ३·१६·१५) पात्रैः। न हीति। [v]मृन्मयं

१० [१]कुम्भादिकं [v]न हि [v] आहुतिम् [v]आनशे अश्नुते आहुतिसाधनं न भवति। मृन्मयेन हुता आहुतिरेव न स्यादिति यावत्। "एकाचो नित्यं मयटमिच्छन्ति" (पा काशिका वा ४·३·१४४) इति मयट्॥

औदुम्बरमित्यादि॥ गतम् (तैसं २·१·१)। "अनुदात्तादेरञ्" (पा ४·२·४४)॥

[v]तृप्तः [v]इन्द्रः [v]प्रजया [v]पशुभिः [२२–२२]च [v]एनं[२३] [२३]यजमानं [v]तर्पयति। [२४]एतद्यागप्रकारः सूत्रकारेण स्पष्टीकृतः–

१५ "साकंप्रस्थायीयेन यजेत पशुकामः इत्यमावास्या विक्रियते। द्वौ सायंदोहावेवं प्रातः। सायं सायंदोहाभ्यां प्रचरन्ति प्रातः प्रातर्दोहाभ्याम्। सर्वैर्वा प्रातः" (आपश्रौ ३·१६·११-१४) इति॥

दारुपात्रेणेति॥ क्षीरश्रपणपात्राणां मृन्मयत्वाद्धोमेऽपि तत्प्रसक्तिं वारयितुं विधत्ते– 'दारु-पात्रेण जुहोति न हि मृन्मयमाहुतिमानशे' इति॥ [२५]यस्मात् मृन्मयपात्रम् [v]आहुतिं व्याप्तुं [v]न अर्हति तस्मात् [v]दारुपात्रेण होमः। न ह्यत्र जुह्वामवदानमस्ति, पूर्णस्य होतव्यत्वात्। अतो हविष्पूरणक्षमेण[२६]

२० जुहुयात्॥

औदुम्बरमिति॥ दारुविशेषं विधत्ते– 'औदुम्बरं भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्द्धे' इति॥ [२७]प्रथमप्रपाठकस्याद्यानुवाके "औदुम्बरो यूपो भवति" (तैसं २·१·१) [२८–२८]इत्यत्र वाक्यमेतत् व्याख्यातम्। अत्र सूत्रम्–"पात्रसंसादनकाले [२९]चत्वार्यौदुम्बरपात्राणि प्रयुनक्ति। तेषां जुहूवत् कल्पः" (आपश्रौ ३·१६·१५-१६) इति; "यावत्यः कुम्भ्यस्तावन्तो ब्राह्मणा दक्षिणत

२५ उपवीतिन उपोत्थाय कुम्भीभ्यः पात्राणि पूरयित्वा [३०]तैरेवाध्वर्युं जुह्वतमनु जुह्वति। स्विष्टकृदृक्षाश्च न विद्यन्ते" (आपश्रौ ३·१७·१-२) इति च॥

८–८. मै४– असाधनात् न चान्यस्मै। *–* मै४–ददाति। अन्यस्मै मित्राय दातुमपर्याप्तं भवति तथा अल्पं यस्मै आहरन्ति राज्ञा वा सुहृदो वा स वा पशुकामो वाऽनेन पशुकामो यजेत यस्मै महतेत्या-दिना यष्टुः फलमाह यस्मै महता प्रमाणेन धनादिकमाहरन्ति स्वल्पं दातुं न पश्यति तृप्यत्यात्मना येन

३० लब्धेनात्मनो महती तृप्तिर्भवति ददाति च अन्यस्मै महता प्रमाणेन धनादिकं तादृशोऽयं साकंप्रस्थायीययाजी भवति। पात्राणि पूरयित्वा सर्वहुतं होतव्यं तर्पयतीति।]। ९. तं३– तदप्यति°। १०. तं३–कुम्भ्यादिकम्।

२२–२२. ड.शृं.हो१ – 'चैनम्' नास्ति। २३. हा– 'यजमानं' नास्ति। २४. आ– तद्याग°। २५. ना– यद्यस्मात्। २६. शृं– °पूरणक्रमेण। २७. आ– प्रथमप्रपाठके। २८–२८. आ– इत्यत्रैतत्। २९. शृं– चत्वार्यौदुम्बराणि पात्राणि। ३०. ड–तैरध्वर्युं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आतृण्यवतः पशुकामस्य च पौर्णमास्याम् अनुनिर्वाप्यौ]

नागतश्रीर्महेन्द्रं यजेत त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यस्तेषां महेन्द्रो देवता यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवति

न। अगतश्रीरित्यगत - श्रीः। महेन्द्रमिति महा - इन्द्रम्। यजेत। त्रयः। वै। गतश्रिय इति गत - श्रियः। शुश्रुवान्। ग्रामणीरिति ग्राम - नीः। राजन्यः। तेषाम्। महेन्द्र इति महा - इन्द्रः। देवता। यः। वै। स्वाम्। देवताम्। अतियजत इत्यति - यजते। प्रेति। स्वायै। देवतायै। च्यवते। न। पराम्। प्रेति। आप्नोति। पापीयान्। भवति। ५

नागतश्रीरित्यादि ॥ [v]शुश्रुवान् षडङ्गवेदत्रयवेदी श्रुतसंपन्नः। स च प्राप्तश्रीः, "सा हि श्रीरमृता सताम्" (तैब्रा १·२·१) इति श्रीत्वाद्वेदानाम्। [v]ग्रामणीः ग्रामाध्यक्षः। राज्ञोऽपत्यं [v]राजन्यः। "राजश्वशुराद्यत्" (पा ४·१·१३७), "राज्ञोऽपत्ये जातिग्रहणम्" (पा ४·१·१३७ वा १) इति क्षत्रिय उच्यते। *स्पष्टमेतयोर्गतश्रीत्वं, यतो हीन्द्र (हि [v]महेन्द्रः) एषां [v]देवता। तस्मादेभ्योऽन्योऽगतश्रीः महेन्द्रं यष्टुं नार्हति ॥ १०

यो वा इत्यादि ॥ आत्मीयदेवतातिक्रमेण [v]यः अन्यां देवतां यजते स स्वायाः देवतायाः* तावत् [v]प्र [v]च्यवते [११]-तस्या अनुग्राह्यो न भवति-[११]। ततश्च [v]पापीयान् पापतरः [v]भवति। [१२]अयष्टुरस्यापापत्वमेव। यष्टुः पापतरत्वं स्यात्, [१३]देवतावत्त्वाभावात् ॥

नेति ॥ अधिकारिभेदेन सांनाय्यस्य देवताव्यवस्थां विधत्ते– 'नागतश्रीर्महेन्द्रं यजेत त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यस्तेषां महेन्द्रो देवता यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवति' इति ॥ [v]शुश्रुवान् वेदत्रयाभिज्ञः। वेदत्रयस्य च श्रीरूपत्वात् तदभिज्ञः प्राप्तश्रीर्भवति। श्रीरूपत्वं चैवमाम्नायते– "अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रयिविदा विदुः। ऋचः सामानि यजूंषि। सा हि श्रीरमृता सताम्" (तैब्रा १·२·१) इति। ग्रामाध्यक्षः [v]ग्रामणीः। राज्ञः पुत्रः [v]राजन्यः। तयोः प्राप्तश्रीकत्वं प्रसिद्धम्। [v]तेषाम् एव त्रयाणां [v]महेन्द्रः [v]देवता। एवं सति [v]यः पुरुषः स्वकीयां [v]देवताम् अतिक्रम्य यजते, एतेषु कश्चिदिन्द्रं यजति, अन्यो वा महेन्द्रं यजति। तादृशः [३१]स्वकीयदेवतायाः प्रच्युतः सन् [३२]-परकीयां देवतां-[३२] [३३v]न [v]प्राप्नोति। तद्देवताशापेन [v]पापीयान् दरिद्रश्च [v]भवति ॥

– [लं – 'स्पष्टमेतयोर्गत.....देवतायाः' नास्ति।]। ११–११. तं३.मै४.लं – ..... भवति पारंपराकीयां देवताम् अनात्मीयदेवतात्वेन प्राप्नोति। तस्यानुग्राह्यो न भवति। पं२– परां परकीयां देवतामात्मीयदेवतात्वेन प्राप्नोति। तस्या अनुग्राह्यो न भवति। १२. मै४– यष्टुरस्य पापत्वमेव। १३. मै४– देवतात्वा°।

३१. ड– स्वकीयायाः देवतायाः। ३२–३२. ड.शृं – परां स्वदेवताम्। ३३. अ.इ.उ.जो. ना.पा.हा– च न।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संवत्सरमिन्द्रं यजेत संवत्सरꣳ हि व्रतं नाति स्वै(४)वैनं देवतेज्यमाना भूत्या इन्द्रे वसीयान् भवति संवत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत् संवत्सरमेवैनं वृत्रं जघ्निवाꣳसमग्निर्व्रतपतिर्व्रतमा लम्भयति ततोऽधि कामं यजेत ॥४॥

[एतां तदौदुम्बरꣳ स्वा त्रिꣳशच्च] ॥

---

५ संवत्सरमिति सं - वत्सरम्। इन्द्रम्। यजेत। संवत्सरमिति सं - वत्सरम्। हि। व्रतम्। न। अतीति। स्वा (४)। एव। एनम्। देवता। इज्यमाना। भूत्यै। इन्द्रे। वसीयान्। भवति। संवत्सरस्येति सं - वत्सरस्य। परस्तात्। अग्नये। व्रतपतय इति व्रत - पतये। पुरोडाशम्। अष्टाकपालमित्यष्टा - कपालम्। निरिति। वपेत्। संवत्सरमिति सं - वत्सरम्। एव। एनम्। वृत्रम्। जघ्निवाꣳसम्। अग्निः। व्रतपतिरिति व्रत - पतिः। व्रतम्। एति। लम्भयति। ततः। अधीति। १० कामम्। यजेत ॥ ४ ॥

[कासं ३०·४, ३१·२ कपिसं ४६·७]

संवत्सरमित्यादि ॥ संवत्सरातिक्रमे [V]व्रतं [V]न अस्ति। तस्मात् गतश्रीत्वाय संवत्सरं व्रतं चरन्तं [V]स्वा आत्मीया [V]देवता इन्द्रः [V]इज्यमाना [V]एनम् [१७]अगतश्रियं भूत्यर्थम् [V]इन्द्रे दीपयति। ततः [V]वसीयान् वसुमत्तरः [V]भवति, महेन्द्रयागार्हो गतश्रीरेव भवति, गता श्रीः आत्मीया देवता १५ अनेनेति कृत्वा ॥

ततः समाप्ते संवत्सरे गते [V]अग्नये [V]व्रतपतये [V]पुरोडाशम् [V]अष्टाकपालं [V]निः [V]वपेत्, सः [V]अग्निः [V]व्रतपतिः तृप्तः [V]एनं व्रतफलम् [V]आ [V]लम्भयति गतश्रीत्वमस्योत्पादयति स्वयमप्यनुज्ञाय स्थिरीकरोति। कीदृशमित्याह [V]संवत्सरं व्रतं चरित्वा [१५V]वृत्रं वारकं पापं महेन्द्रयागानर्हत्वलक्षणं [V]जघ्निवाꣳसम् अभिभवन्तं तत्फलं [१६]प्रापयति। यथा इन्द्रो वृत्रं [१७]हत्वा महेन्द्रोऽभवत्, २० एवमयमपि [१८]तु अयोग्यतालक्षणवृत्रवधेन महेन्द्रयागयोग्यो भवति। ततः उपरि [V]कामं यथेष्टं महेन्द्रमेव [V]यजेत ॥

इति द्वितीये पञ्चमे चतुर्थोऽनुवाकः ॥

---

१४. तं३.मै.लं-अवगत°। १५. तं३.लं-'वृत्रं' नास्ति। १६. लं-प्रापयन्ति। १७. तं३.मै.लं-'हत्वा' इत्यस्यानन्तरम् 'इन्द्रः'। १८ मै४-'तु' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भ्रातृव्यवतः पशुकामस्य च पौर्णमास्याम् अनुनिर्वाप्यौ]

संवत्सरमिति ॥ अगतश्रियः [३४]सर्वदेन्द्रप्राप्तौ विशेषं विधत्ते– ' संवत्सरमिन्द्रं यजेत संवत्सरꣳ हि व्रतं नाति स्वैवैनं देवतेज्यमाना भूत्या इन्द्वे वसीयान् भवति ' इति ॥ [र]संवत्सरम् अतिक्रम्य यस्मात् [र]व्रतं [र]न अनुष्ठेयं भवति [३५]तस्मादगतश्रीः [र]संवत्सरम् [र]इन्द्रं [र]यजेत । एवं सति स्वकीया [र]एव [र]देवता अन्यस्मिन् संवत्सरे [र]इज्यमाना सती भूत्यर्थं यजमानं प्रकाशयति । ततोऽयं धनवत्तरः [र]भवति ॥

संवत्सरस्येति ॥ अगतश्रियः कांचिदिष्टिं विधत्ते– ' संवत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत् संवत्सरमेवैनं वृत्रं जघ्निवाꣳसमग्निर्व्रतपतिर्व्रतमा लम्भयति ' इति ॥ व्रतपालकः [र]अग्निः महेन्द्रयागाधिकारनिवारकं पापरूपं [र]वृत्रं संवत्सरेन्द्रानुष्ठानेन हतवन्तम् [३६र]एनं यजमानं महेन्द्र-यागानुष्ठानरूपं [र]व्रतं प्रापयति ॥

तत इति ॥ व्रतपतेष्टेरूर्ध्वमगतश्रिय इन्द्रमहेन्द्रयोरैच्छिकत्वं विधत्ते – ' ततोऽधि कामं यजेत ' इति ॥

[३७]अत्र मीमांसा ॥ तृतीयाध्यायस्य पञ्चमपादे चिन्तितम्—

" आक्रामन् सह [३८]कुम्भीभिरस्ति शेषक्रिया न वा ।
जुह्वावदानात् प्रकृताविव शेषक्रियोचिता ॥
कुम्भीषु शेषासंसिद्धेः साकंप्रस्थाय्यकर्मणि ।
न स्विष्टकृदिडं [३९]-कार्यमग्नीधे स्रुक्प्रदानत[-३९] " ॥ (जैन्या ३.५.३-४) ॥

" साकंप्रस्थायीयेन यजेत पशुकामः " (तैसं २.५.४; आपश्रौ ३.१६.११) इति विहिते कर्मणि श्रूयते– " सह [४०]कुम्भीभिरभिक्रामन् " (आपश्रौ ३.१६.१७) [४१]इति । तत्र चतसृभिः [४२]दधिपयःकुम्भीभिः सहाऽऽहवनीयदेशेऽभिक्रमणमात्रं श्रुतम् । न तु [४३]-तत्र कुम्भीभिर्होमः-[४३] श्रुतः । तथा सत्यस्य कर्मणः सांनाय्यविकृतित्वात् [४४]जुह्वां कुम्भीभ्योऽवदाय [४५]जुहुयात् । [४६]हुतशेषेण च स्विष्टकृदादिकं सांनाय्यशेषेणेव कर्तव्यमिति प्राप्ते ब्रूमः– नात्र कुम्भीषु [४७]हुतशेषः सिध्यति [४८]-सांनाय्य इव जुह्वावदानाभावात्-[४८] । " अग्नीधे स्रुचौ प्रदाय सह [४९]कुम्भीभिरभिक्रामन् " (आपश्रौ ३.१६.१७) इत्युक्तत्वात् जुहूपभृतोः प्रत्तत्वादभिक्रमणस्य होमार्थत्वाच्च कुम्भीभिरेव दधिपयसोर्होमे सति कुम्भीमात्रमवशिष्यते, न [५०]तु हविःशेषः । तत्र कुतः [५१]शेषकार्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥

---

३४. ड– सर्वदेन्द्रदेवताप्राप्तौ । ३५. हो१– तस्मादेवाग° । ३६. आ– ' एनम् ' नास्ति । ३७. शृं– अथ । ३८. आ.हा – °भिरस्मिन् । ३९–३९. अ.इ.उ.जो.पा.हा– कार्यमखिलस्य प्रदानतः; क.ना– कार्यमाग्नीध्रस्रुक्प्रदानतः; शृं.हो१– कार्यमसिद्धिः स्रुक्प्रदानतः । ४०. अ.इ.उ.जो.ना.पा.हा– °रभिक्रामन्ती; क–°रभिक्रामन् जुहोति; ड.शृं– °भिरतिक्रामन्नाह । ४१. उ– ' इति ' नास्ति । ४२. शृं– कुम्भीभिः; ड–' दधिपयःकुम्भीभिः ' नास्ति । ४३–४३. अ.इ.उ.जो.ना.पा.हा–तत्कुम्भी° । ४४. आ. क.ड.हो१– जुह्वा । ४५. ड.शृं.हो१ होतव्यम् । ४६. ड.शृं– हुतशेषे । ४७. आ– ' हुतशेषः ' नास्ति । ४८–४८ ना.शृं– सांनाय्य इव जुह्वा तदव°; क.ड.हो१– सांनाय्यवज्जुह्वा तदव°; हा– सांनाय्यवज्जुह्वाव° । ४९. अ.इ.उ.ड.जो.ना.पा.हा–°रतिक्रामन् । ५०. आ– हुत° । ५१. आ.हा– शेषकर्म कार्यम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नासोमयाजी सं नयेदनागतं वा एतस्य पयो योऽसोमयाजी यदसोमयाजी संनयेत् परिमोष एव सोऽनृतं करोत्यथो परैव सिच्यते सोमयाज्येव सं नयेत् पयो वै सोमः पयः सांनाय्यं पयसैव पय आत्मन् धत्ते

न। असोमयाजीत्यसोम - याजी। समिति। नयेत्। अनागतमित्यना - गतम्। वै। एतस्य। पयः। यः। असोमयाजीत्यसोम - याजी। यत्। असोमयाजीत्यसोम - याजी। संनयेदिति सं - नयेत्। परिमोष इति परि - मोषः। एव। सः। अनृतम्। करोति। अथो इति। परेति। एव। सिच्यते। सोमयाजीति सोम - याजी। एव। समिति। नयेत्। पयः। वै। सोमः। पयः। सांनाय्यमिति सां - नाय्यम्। पयसा। एव। पयः। आत्मन्। धत्ते।

नासोमयाजी सं नयेदित्यादि ॥ दधिपयोभ्यां यागः संनयनम्। अनागतमिति। असोम-
१० याजिनः पयःसंबन्धो नास्ति, सर्वरसकारणेन सोमेन संबन्धाभावात्। तस्मात् [V]असोमयाजी यदि [V]सं [V]नयेत् [V]सः [V]परिमोषः चौर्यम् [V]एव, अस्वेन यष्टुं प्रवृत्तत्वात्। तस्मादयम् [V]अनृतं [V]करोति व्रतचारिणो यत् प्रतिषिद्धं तदेवानृतं करोति। [V]अथो अपि च [V]परा [V]एव [V]सिच्यते एतद्यष्टव्यं परा सिच्यते अस्थाने विनाश्यत एव। तस्मात् [V]सोमयाजी [V]एव [V]सं [V]नयेत् इति ॥

पयो वा इत्यादि ॥ उभयोः पयस्त्वात् [V]पयसा सोमेन स आत्मनि [V]पयः सांनाय्यं
१५ [V]धत्ते स्थापयति ॥

द्विधा चतुर्थे पुंभेदात् प्रोक्ता सांनाय्यदेवता ॥

अथ [1]पञ्चमे अभ्युदयेष्ट्यादयो वक्तव्याः ॥

नेति ॥ [2]आदौ तावत् सांनाय्याधिकारिणं विविनक्ति— 'नासोमयाजी सं नयेदनागतं वा एतस्य पयो योऽसोमयाजी यदसोमयाजी संनयेत् परिमोष एव सोऽनृतं करोत्यथो परैव सिच्यते सोमयाज्येव
२० **सं नयेत् पयो वै सोमः पयः सांनाय्यं पयसैव पय आत्मन् धत्ते' इति। सोमयागात् पुरा [3]दर्शयाजी सांनाय्यं [V]न अनुतिष्ठेत्। असोमयाजिनः [V]पयः [V]अनागतम् अप्राप्तम्। सोमस्यौषधिरसत्वेन तदभावे सत्योषधिरसविशेषस्य पयसः सुतरामभावात्। एवं सति यदि [V]असोमयाजी [V]संनयेत् तर्ह्यसौ [V]परिमोषः [4][V]एव तस्कर एव सन् [5][V]अनृतम् अन्याय्यं [6][V]करोति। अपि च वह्नौ सिच्यमानं तत् सांनाय्यम् [7]अशास्त्रीय-त्वात् [V]परा [V]एव [V]सिच्यते विनाश्यत एव। तस्मात् [V]सोमयाजी [V]एव [V]सं [V]नयेत्। न चास्येतरवत्**
२५ **पयोऽनागतं, सोमस्यौषधिरसत्वेन पयोरूपत्वात्। [V]सांनाय्यम् अपि तथाविधम्। अतः सोमयाजी सोमरूपेण [V]पयसा सह सांनाय्यरूपं [V]पयः [8]आत्मनि धारयति ॥**

---

१. शृं पञ्चमानुवाके; ड.हो१— पञ्चमेऽनुवाके। २. आ— तत्र। ३. आ.हा— °थागी। ४. अ.इ.उ.जो.ना.पा.हा— 'एव' नास्ति। ५. आ— अनृतं करोति। ६. अ.इ.उ.जो.ना.पा.हा— करोति च। ७. आ— अन्याय्यत्वात्। ८. ड.शृं— स्वात्मनि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा (१) अभ्युदेति

वीति। वै। एतम्। प्रजयेति प्र-जया। पशुभिरिति पशु-भिः। अर्धयति। वर्धयति। अस्य। भ्रातृव्यम्। यस्य। हविः। निरुप्तमिति निः–उप्तम्। पुरस्तात्। चन्द्रमाः (१)। अभीति। उदेतीत्युत्-एति। ५

वि वा एतमित्यादि ॥ [V]यस्य [V]निरुप्तं [V]हविः अभिलक्ष्य निर्वापे कृते [V]पुरस्तात् पूर्वस्यां दिशि [V]चन्द्रमाः [V]उदेति एनं [V]प्रजया [V]पशुभिः च [V]वि [V]अर्धयति। [१V]वर्धयति च [V]अस्य [V]भ्रातृव्यं शत्रुं, [२]तथोद्यंश्चन्द्रमाः। विनष्टचन्द्रायां हि तिथौ [३]कर्मैतदर्शाख्यं क्रियते। अनेन

वीति ॥ अथाभ्युदयेष्टिं विधत्ते– 'वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् वि भजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाश- १०
मष्टाकपालं कुर्याद्ये स्थाविष्ठास्तानिन्द्राय प्रदात्रे दधश्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमग्नि-
रेवास्मै प्रजां प्र जनयति वृद्धामिन्द्रः प्र यच्छति यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रति
तिष्ठति' इति। चतुर्दश्याममावास्येयमिति भ्रान्त्या संदिहानो रात्रावेव हवींषि निर्वपेत्। तथा च श्रुत्यन्तरम्
[४]एवमाम्नायते– "[५]यदि बिभीयादभि मोदेष्यतीति[५] महारात्रे हवींषि निर्वपेत् फलीकृतैस्तण्डुलैरुपा-
सीतार्धं दधि हविरातञ्चनस्य [६]निदध्यादर्धं न[६] [७]यद्युदियात् [७]तेनाऽऽतञ्च्य प्रचरेद्यदि नाभ्युदियात् १५
तेन[७] ब्राह्मणान् भोजयेत्" (द्र. मीसू ६.५.४ शाभा) इति ॥ अयमर्थः–यदि चतुर्दश्यां प्रातरग्निहोत्रादूर्ध्वम्
अमावास्याभ्रान्त्या वत्सानपाकृत्य सायं दुग्ध्वा [८]दध्यर्थमातञ्चनं विधाय पश्चात् तिथौ संदिहानो[९] भां प्रति
चन्द्रोऽभ्युदेष्यतीति भीतो भवेत् तदा रात्रिमध्ये हवींषि निरुप्य फलीकरणान्तं विधाय तादृशैः तण्डुलैर्युक्तः
चन्द्रोदयं [१०]प्रतीक्षेत। [११]पूर्वातञ्चनेन निष्पन्नस्य दध्नोऽर्धमुत्तरस्यां रात्रौ पुनरातञ्चनार्थमवस्थापयेत्। [१८]इतरं
त्वर्धं[१८] न पृथगवस्थापयेत्, किं तु तण्डुलैः सह पुरतोऽवस्थाप्य चन्द्रोदयं [१५]प्रतीक्षेत। यदि चन्द्रोऽभ्यु- २०
दियात् तदानीं पृथगवस्थापितेनार्धेन परेद्युर्मुख्यामावास्यायां रात्रौ सायंदोहमातञ्च्य निष्पन्नेन दध्ना प्रतिपदि
प्रातः प्रचरेत्। यदि तु न चन्द्रोऽभ्युदियात् तदा तण्डुलैर्दध्यर्धेन च दर्शकर्म निष्पाद्य [१९]पृथगवस्थापिताधा-
न्तरेण ब्राह्मणान् भोजयेदिति। एवं स्थिते सति [V]यस्य यजमानस्य रात्रावेव [२०]फलीकृततण्डुलपर्यन्तं [V]हविः
[V]निरुप्तं संपादितं भवति। ततः प्रतीक्ष्यमाणः [V]चन्द्रमाः पूर्वस्यां दिशि [२१V]अभ्युदेति। चन्द्रः [V]एतं यजमानं

१. मै४– व्यथयति; लं– व्यवर्धयति। २. तं३– तथोद्यच्चन्द्रमाः। ३. मै४– कर्मेदं दर्शाख्यं। २५

९. आ.क.जो.ना.हा– 'एवम्' नास्ति। १०–१०. अ.इ.उ.जो.पा.हा– 'यदि.....तीति' नास्ति। ११–११. अ.इ.उ.जो.पा.हा– निदध्यादर्धोनं; शृं– निदध्यादर्धेन। १२. शृं– यदाभ्युदियात्; ड.हो१– यद्यभ्युदियात्। १३–१३. अ.इ.उ.जो.पा.हा– तमनातञ्च्य प्रचरेद्यद्यु न। १४. हो१–दध्यातञ्चनं। १५. अ.इ.उ.ना.पा – इमां। १६. अ.इ.उ.जो.ना.पा.हा– प्रतीक्षते। १७. आ– तत्पूर्वा°। १८–१८. आ– इतस्त्वर्धं; अ.इ.उ.क.जो.ना.पा.हा– इतरत्वर्धं। १९. इ– पृथगुपस्था°; शृं.हो१–°स्थापि- ३० तेनार्धा°। २०. अ.इ.उ.जो.ना.पा.हा– फलीकृतं तण्डुल°; शृं–°तण्डुलपर्यन्ते। २१. शृं– 'अभ्युदेति' इत्यनन्तरं 'स चाभ्युदितः'।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रेधा तण्डुलान् वि भजेद्ये मध्यमाः स्युस्तान्नग्नये दात्रे

त्रेधा । तण्डुलान् । वीति । भजेत् । ये । मध्यमाः । स्युः । तान् । अग्नये । दात्रे ।

चेष्ट्वा प्रजावान् पशुमान् [४]भ्रातृव्यहा च संपद्यते । हविरभ्युद्यंश्चायं विपरीतफलः स्यात् । तस्मान्निर्वापयागयोर्मध्ये यथा चन्द्रमसः पुरस्तात् उदयो न भवति तथा कालो ग्राह्यः ॥

५ अत्र ब्रूमः– अस्य चन्द्रमसो द्वादश दृश्यादृश्यकला अंशाः, एतैरंशैरयं दृश्यश्चादृश्यश्च भवति । तत्र [५]स्फुटजिज्ञासायां खखाग्निभिः[-५] शतत्रयेण द्वादशभागान् संगणय्य पूर्वस्यां दिशि उदयेऽस्तमये[६] च विचार्यमाणे कर्मद्वयसंस्कृतेनोदयराशिना विभज्य लब्धेन अंशादिना युक्तः स्फुटोऽर्क उदयार्को भवति । तद्युक्तो यावान् स्फुटोऽर्कः तावान् यदा गणितानीतोऽर्को भवति तदा चन्द्रमा उदेति, अथ तेनैव [७]अंशादिना [८]रहितः स्फुटोऽर्को [*-]वा अस्तमयार्को वा भवति । तावान्

१० यदा स्फुटोऽर्को भवति तदा चन्द्रमा अस्तमेति । यदा पुनः [९]प्राच्यां दिश्युदयोऽस्तमयो वा विचार्यते तदा पूर्ववत् संगुणितान् द्वादशभागान् [१०]चन्द्रकर्मद्वयसंस्कृतेऽस्तमयराशिना विभज्य लब्धेनांशादिना स्फुटोऽर्क [११]उदययुक्त उदयार्को[-*] भवति । तद्रहितोऽस्तमयार्कः । तत्र चन्द्रस्य उदयार्केणास्तमयार्केण वा सह यदन्तरं तस्मिन्नन्तरे यावान् कालः तेन कालेन घटिकादिना उदितोऽस्तं गतो वा भवति । तत्र द्वेधा चन्द्रस्योदयास्तमयौ यथा प्रतिदिनं च भवतः गोलकाप्राप्तिपरित्यागाभ्यां

१५ सूर्यस्येव । तथाऽऽदित्यस्यैव संनिकर्षाद्विप्रकर्षात्[१२] च अस्योदयास्तमयौ भवतः । तदपि कथ्यते–अयं चन्द्रः शीघ्रगतित्वात् प्रत्यहमर्कसमीपमागच्छति [१३]यावान् प्राच्यामस्तं व्रजति । अस्तं [१४]गतश्च ततः शीघ्रगतित्वात् आदित्यमनुदिनं परित्यजति यावत् प्रतीच्यामुदेति । एवमस्यादित्यसंनिकर्षात् विप्रकर्षाच्च प्राच्यामस्तमयः प्रतीच्यामुदयः । तच्चन्द्रार्कयोर्भुक्त्यन्ताः द्वादशमहाभागाः अंशाः । तेन गोलार्धभागानामशीतिशतसंख्यभागे हृते लब्धं पञ्चदश प्रतिपदादयस्तिथयः । तिथिभागघटिके

२० द्वे, दृश्यगोलार्धभागस्य त्रिंशद्घटिकात्वात् । तत्र चन्द्रार्कयोः परो विप्रकर्षः पौर्णमासी, परः संनिकर्षः [*-]अमावास्या । तत्राभीष्टकाले स्फुटभुक्त्यन्तरं स्फुटकालांशादधिकं वा भवेत् तदन्यूनं वा; अधिकत्वे पञ्चदश्यामपि चन्द्रो दृश्यः स्यात् । न्यूनत्वे तु चतुर्दश्यामपि न दृश्येत । तस्मात् तादृशः सूक्ष्मगणनाकौशलशालिना कालोऽन्वेष्यः[-*] ॥

प्रमादाच्चेद्दुष्टः काल आपतेत् तदा [१५]त्रेधा [१५]तण्डुलान् इत्यादि [१५]कर्माचरेत् ।

२५ तत्र निरुप्तमनिरुप्तं वा प्रवृत्तं हविर्यदाऽभ्युदेति तदेदं कर्म कर्तव्यमिति [१६]मीमांसकाः;

४. मै.लं– भ्रातृव्यवान् । ५–५. तं३.मै.लं– °जिज्ञासायां वखाग्निभिः (?); मै४– °जिज्ञासाश उदग्निभिः (?)। ६. लं– 'अस्तमये' नास्ति। ७. मै४.लं– आंशिना । ८. लं– अभितः । *–* तं३.लं– 'वा अस्तमयार्को ..... उदयार्को' नास्ति । ९. मै४– प्रतीच्याम् । १०–१०. मै४–°द्वयं सत्वेनास्तमय° । ११. मै४– उदय उक्तः । १२. तं३.मै४– वा । १३. तं३.मै.लं – यावत् । १४. मै४ – गच्छतश्च । *–* तं३.लं– 'अमावास्या । तत्रा ..... कालोऽन्वेष्यः' इत्ययं भागो नास्ति । १५. तं३– कर्माणि चरेत् । १६. पं२–मीमांसायाम्; मै४– 'मीमांसकाः' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभ्युदयेष्टिः, दाक्षायणयज्ञः]

पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधञ्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमग्निरेवास्मै प्रजां प्रजनयति वृद्धामिन्द्रः प्र यच्छति यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतिं तिष्ठति

पुरोडाशम् । अष्टाकपालमित्यष्टा - कपालम् । कुर्यात् । ये । स्थविष्ठाः । तान् । इन्द्राय । प्रदात्र इति प्र - दात्रे । दधन् । चरुम् । ये । अणिष्ठाः । तान् । विष्णवे । शिपिविष्टायेति शिपि-विष्टाय । शृते । चरुम् । अग्निः । एव । अस्मै । प्रजामिति प्र - जाम् । प्रजनयतीति प्र - जनयति । वृद्धाम् । इन्द्रः । प्रेति । यच्छति । यज्ञः । वै । विष्णुः । पशवः । शिपिः । यज्ञे । एव । पशुषु । प्रतीति । तिष्ठति ।

यथोक्तम्—" निरुप्ते स्यात् तत्संयोगात् " (मीसू ६·५·१२) इत्यत्र । तथा हि " अभिरभागे " (पा १·४·९१) इत्यभेदलक्षणे कर्मप्रवचनीयत्वम् । लक्षणं च ज्ञापकम् । तथा प्रवृत्तं ज्ञापकमिति यस्य निरुप्तं हविरभ्युदेतीति विधीयते । तदा [17]निरुप्तमिति यागावयवानामुपलक्षणं [18]वाक्यम्, उभयविधाने [19]वाक्यभेदप्रसङ्गात् । ततश्चाग्न्यन्वाधानप्रभृति यावद्ब्राह्मणभोजनमुदयोऽस्य परिहर्तव्यः इत्युक्तं भवति । तत्र च— " अभ्युदये [20]कालापराधादिज्याचोदना स्यात् यथा पञ्चशरावे " (मीसू ६·५·१) इति त्रेधेत्यादिकं न कर्मान्तरविधानम्, अपि तु अपनीतदेवताकं तदेव प्राकृतं [21-]शूर्पे राशीकृतं[-21] हविर्देवतान्तरैः संयुज्यत इति राद्धान्तितम् । तत्राप्यनिरुप्तेऽभ्युदिते प्राकृतीभ्य एव देवताभ्यो निर्वापः कार्यः, *[-]तण्डुलभूतेषु देवतापनयस्य विधानादिति सिद्धान्तिम्— " अनिरुप्तेऽभ्युदिते प्राकृतीभ्यो निर्वपेत् " (मीसू ६·५·१६) इत्यादौ ॥

[v]स्थविष्ठाः स्थूलराशिगताः । " स्थूलदूर° " (पा ६·४·१५६) इति लोपो गुणश्च । [v]अणिष्ठाः अणुराशिगताः । " टेः " (पा ६·४·१४३) इति टिलोपः । एवं दातृत्वादिगुणेभ्योऽन्यादिभ्यो मध्यमादिभिरिष्टाकपालादयः कार्याः । [v]दधन् इति " सुपां सुलुक्°-* " (पा ७·१·३९) इति सप्तम्या लुक् । अनङादेशे " विभाषा ङिश्योः " (पा ६·४·१३६) इति लोपाभावः । शृतं पक्वं पयः ॥

अग्निरेवेत्यादि ॥ गतम् । पशवः शिपिरिति । शिपयो रश्मय, तैः [22]विष्टः [23]प्रविष्टः शिपिविष्टः । निर्वेष्टितशेपः शिपिविष्टः इत्यन्ये । तत्र पशुहेतुत्वात् ताच्छब्द्यम् । [v]यज्ञे [v]पशुषु च प्रतिष्ठितो [24]भवतीत्येव ॥

---

१७. तं३— प्रवृत्तमिति । १८. तं३— त्याज्यम् । १९. तं३.लं— वाक्यशेषप्र° । २०. तं३— कालापराभिधा इज्या° । २१–२१. तं३.पं२.लं— स्थूलराशिगताः; मै४— स्थूलराशिगतम् । *–* तं३.लं— 'तण्डुलभूतेषु ..... सुपां सुलुक्' इत्ययं भागो नास्ति । २२. मै— विशिष्टः । २३. लं— 'प्रविष्टः' नास्ति । २४. मै४— भवत्येव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न द्वे (२) यजेत यत् पूर्वया संप्रति यजेतोत्तरया छम्बट्कुर्याद्यदुत्तरया संप्रति यजेत पूर्वया छम्बट्कुर्यान्नेष्टिर्भवति न यज्ञस्तदनु ह्रीतमुख्यपगल्भो जायत एकामेव यजेत प्रगल्भोऽस्य जायते-

न। द्वे इति (२)। यजेत। यत्। पूर्वया। संप्रतीति सं - प्रति। यजेत। उत्तरयेत्युत् - तरया। छम्बट्। कुर्यात्। यत्। उत्तरयेत्युत् - तरया। संप्रतीति सं - प्रति। यजेत। पूर्वया। छम्बट्। कुर्यात्। न। इष्टिः। भवति। न। यज्ञः। तत्। अन्विति। ह्रीतमुखीति ह्रीत - मुखी। अपगल्भ इत्यप - गल्भः। जायते। एकाम्। एव। यजेत। प्रगल्भ इति प्र - गल्भः। अस्य। जायते।

[25]अथ शाखान्तरे ऋद्धिकाममधिकृत्योक्तम्– "द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत यः [26]कामयेत" (आपश्रौ ३·१४·१४)*। तत्र च यावदेवमुपपद्यते तावान् प्रकर्षः सोप्य (?) इति चतुर्थोऽशो दुष्टः। 'तत्र यदीष्ट्या यदि पशुना यदि सोमेन यजेतामावास्यायां पौर्णमास्यां वा यजेत' इत्युच्यते। तथा– 'पक्षान्तेऽन्वाधानं पक्षादौ यागः, 'पूर्वेद्युरन्वाधानमुत्तरेद्युर्यागः'

ᵛप्रजया ᵛपशुभिः च ᵛन्यर्धयति एव ᵛअस्य ᵛभ्रातृव्यं च [22-ᵛ]वर्धयति। अतोऽभ्युदयं-[22] [23]निमित्तीकृत्यैव ᵛतण्डुलान् मध्यमस्थविष्टाणिष्टरूपैः ᵛत्रेधा भिन्नांस्तान् पूर्वदेवताभ्यः ᵛवि ᵛभजेत्। विभज्य च दात्रादिगुण-कान्न्यादिदेवताभ्यो हविः ᵛकुर्यात्॥

नेति॥ [24]यदुक्तं सूत्रकारेण– "द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत यः कामयेतर्ध्नुयामित्युक्त्वाऽऽहैकामेव यजेत" (आपश्रौ ३·१४·१४) इति। अस्यायमर्थः– पौर्णमास्यामन्वाधाय प्रतिपदि पौर्णमासयागं कृत्वा तदानीमेवान्वाधाय द्वितीयायां पुनः पौर्णमासयागं कुर्यात्। एवममावास्यायामपि। सेयमृद्धिकामस्येष्टिः सुमना इत्यभिधीयते। तामेतां सुमनसमिष्टिं पूर्वोत्तरपक्षाभ्यां विचार्य विधातुमादौ पूर्वपक्षी सिद्धान्तं निराकृत्य स्वपक्षं विधत्ते– 'न द्वे यजेत यत् पूर्वया संप्रति यजेतोत्तरया छम्बट्कुर्याद्यदुत्तरया संप्रति यजेत पूर्वया छम्बट्कुर्यान्नेष्टिर्भवति न यज्ञस्तदनु ह्रीतमुख्यपगल्भो जायत एकामेव यजेत प्रगल्भोऽस्य जायते' इति॥ सिद्धान्तिना यदुच्यते 'द्वे यजेत' इति तन्न युक्तम्। यदि तत्र ᵛपूर्वया पौर्णमास्या ᵛसंप्रति ᵛयजेत सम्यगनुतिष्ठेत् तदानीम् ᵛउत्तरया ᵛछम्बट् ᵛकुर्यात् [25ᵛ]व्यर्थमेव कुर्यात्-[25]। यदुत्तरा सम्यगनुष्ठिता तदा पूर्ववैयर्थ्यम्। तथा सति द्विरनुष्ठिता सेयम् ᵛइष्टिः इत्यपि वक्तुं ᵛन शक्यते। इष्टावधिकावृत्तेरविहितत्वात्। ᵛन अप्यग्निष्टोमादियज्ञ[26] इति वक्तुं शक्यतेऽधिकप्रयोगे सत्यपि प्रातःसवनादीनामभावात्। अत उभयभ्रष्टत्वात् तदनुष्ठाता यजमानः सभायां ᵛह्रीतमुखी भवति। तैः पृष्टः सन्नुत्तरं वक्तुं न प्रगल्भो भवेत्। तस्माद्द्विकाम्यावृत्तिं परित्यज्य ᵛएकाम् ᵛएव पौर्णमासीममावास्यां च ᵛयजेत। तथा सति ᵛअस्य यजमानस्य [27ᵛ]पुत्रोऽपि सभायां ᵛप्रगल्भः ᵛजायते, किमु वक्तव्यमयं [28]प्रगल्भ इति॥

२५. तं३– 'अथ' नास्ति। २६. मै– 'कामयेत' इत्यस्यानन्तरं 'भवतः'। * [अत्रत्यो ग्रन्थस्त्रुटित इवाभाति।]।

२२–२२. जो.हा– वर्धयतोऽभ्युदयं; क–वर्धयति। अभ्युदयं। २३. आ.ड– °कृत्यैतत्°। २४. शृ– तदुक्तं। २५–२५. आ.क–'व्यर्थमेव कुर्यात्' नास्ति। २६. क–°यज्ञवदिति। २७. हो१–पुत्रादिः। २८. आ– 'प्रगल्भः' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभ्युदयेष्टिः, दाक्षायणयज्ञः]

ऽनादृत्य तद्द्वे एव यजेत यज्ञमुखमेव पूर्वयाऽऽलभते यजत उत्तरया देवता एव पूर्वयाऽवरुन्द्ध इन्द्रियमुत्तरया देवलोकमेव (३) पूर्वयाऽभिजयति मनुष्यलोकमुत्तरया भूयसो यज्ञक्रतूनुपैत्येषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवास्मै लोकेऽर्धुकं भवति

अनादृत्येत्यनाऽ-दृत्य । तत् । द्वे इति । एव । यजेत । यज्ञमुखमिति यज्ञ-मुखम् । एव । पूर्वया । आलभत इत्याऽ-लभते । यजते । उत्तरयेत्युत्-तरया । देवताः । एव । पूर्वया । अवरुन्द्ध इत्यव-रुन्द्धे । इन्द्रियम् । उत्तरयेत्युत्-तरया । देवलोकमिति देव-लोकम् । एव (३) । पूर्वया । अभिजयतीत्यभि-जयति । मनुष्यलोकमिति मनुष्य-लोकम् । उत्तरयेत्युत्-तरया । भूयसः । यज्ञक्रतूनिति यज्ञ-क्रतून् । उपेति । एति । एषा । वै । सुमना इति सु-मनाः । नाम । इष्टिः । यम् । अद्य । ईजानम् । पश्चात् । चन्द्रमाः । अभीति । उदेतीत्युत्-एति । अस्मिन् । एव । अस्मै । लोके । अर्धुकम् । भवति ।

इति च । अन्वाधानादियावदिष्टयन्तं चन्द्रोदयेऽभ्युदयेष्ट्या भाव्यम् । तथा पर्वसन्धेः पूर्वमिष्टिसमाप्तौ पुनर्यष्टव्यमित्याहुः । तत्र पर्वणः सूक्ष्मत्वात् प्रत्यासन्नतिथिद्वयलक्षणायां [१७]पञ्चदशीप्रतिपदौ पर्वणी उच्येते । तस्मात् स्फुटीकरणेन तिथिदृश्यांश एवानीय कालोऽन्वेष्टव्यः । तत्र पञ्चदश्यां प्रथमेंऽशे तिथिदृश्यांशक्षये चन्द्रोदयसंभावना[१८] । तत्रोत्तरयोश्चांशयोः संधेः पूर्वं यागसमाप्तिः स्यात् । चतुर्थे तु दोषद्वयाप्रसङ्गः । प्रतिपदाद्यंशे सर्वदोषाभावः । चतुर्थे तु तिथिदृश्यांशे श्वश्वाय[२९] चन्द्रोदयसंभावना । अथ यदि पूर्वेद्युश्च पञ्चदशघटिका चतुर्दशी उत्तरेद्युरष्टौ घटिकाः पर्व, यदा च पूर्वेद्युरष्टादश घटिकाः पर्व उत्तरेद्युर्दश घटिकाः प्रतिपत् तत्र गत्यभावात् यष्टव्यमित्येके । ननु ' यमद्येजानम् ' इत्यादिदर्शनात् द्वितीयायामपि तत्संभवात् यागोऽनुमीयते । मैवम् । [२०]चतुर्दश्यां क्षये प्रतिपद्येवोदयसंभवाकाङ्क्षासंभवात् । एवं पश्चादिष्वपि निपुणं निरूपणीयमिति ग्रन्थविस्तरभयादुपरम्यते ॥

अनादृत्येति ॥ तमिमं पूर्वपक्षं निराकृत्य सिद्धान्तं विधत्ते—' अनादृत्य तद्द्वे एव यजेत यज्ञमुखमेव पूर्वयाऽऽलभते यजत उत्तरया देवता एव पूर्वयाऽवरुन्द्ध इन्द्रियमुत्तरया देवलोकमेव पूर्वयाऽभिजयति मनुष्यलोकमुत्तरया भूयसो यज्ञक्रतूनुपैत्येषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवास्मै लोकेऽर्धुकं भवति ' इति ॥ एकामेवेति यदुक्तं [५]तत् [६]अनादृत्य [७]द्वे [८]एव [९]यजेत, तत्र [१०]पूर्वया इष्ट्या सम्यगनुष्ठितया [११]यज्ञोपक्रमस्य [१२]संपादनं [१३]देवतावरोधो देवलोकजयश्चेति प्रयोजनत्रयं संपद्यते । [१४]उत्तरया

२७. पं२–पञ्चदशी प्रतिपच्च । २८. तं३–°संभवात् । २९. तं३.पं२.लं–खखाय (?); मैभिभाय [श्व एव] । ३०. तं३.मै.मै४.लं– श्वो द्रष्टव्याम् ।

२९. आ.क.जो.ना.हा– यज्ञमुखरूपयज्ञो°; अ.इ.उ.पा– यज्ञमुखरूपयशोप° । ३०. आ.क.ना–आलम्भनं; अ.इ.उ.पा– सम्यगछदनं (?) । ३१. अ.इ.उ.जो.पा.हा– देवरोधो ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अभ्युदयेष्टिः, दाक्षायणयज्ञः

दाक्षायणयज्ञेन सुवर्गकामो यजेत पूर्णमासे सं नयेन्मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजेत पूर्णमासे वै देवानाꣳ सुतस्तेषामेतमर्धमासं प्रसुतस्-

दाक्षायणयज्ञेनेति दाक्षायण - यज्ञेन । सुवर्गकाम इति सुवर्ग - कामः । यजेत । पूर्णमास इति पूर्ण - मासे । समिति । नयेत् । मैत्रावरुण्येति मैत्रा - वरुण्या । आमिक्षया । अमावास्यायामित्यमा - वास्यायाम् । यजेत । पूर्णमास इति पूर्ण - मासे । वै । देवानाम् । सुतः । तेषाम् । एतम् । अर्धमासमित्यर्ध - मासम् । प्रसुत इति प्र - सुतः ।

दाक्षायणयज्ञेनेति ॥ येन दाक्षायणा यजन्ते । दक्षात् " अत इञ् " (पा ४·१·९५), " यञिञोश्च " (पा ४·१·१०१) इति फक् । पूर्णमास इति । द्वे [३१]पूर्णमास्यौ द्वे अमावास्ये यजेत । तत्र पौर्णमास्यां पूर्वेद्युराग्नेयोऽष्टाकपालः [-[३२]अग्नीषोमीय एकादशकपालः । आग्नेयोऽष्टा- कपालः-[३२]] ऐन्द्रं [३३]दध्युत्तरेद्युः । अमावास्यायां पूर्वेद्युराग्नेयोऽष्टाकपालः ऐन्द्राग्न एकादशकपालः आग्नेयोऽष्टाकपालः, मैत्रावरुण्यामिक्षा द्वितीयोत्तरेद्युः ॥

पूर्णमासे वा इत्यादि ॥ देवानां सोमयागत्वेनायं स्तूयते । तत्र यो देवानां सोमयागः तत्स्वरूपं तावदाह । देवा येन सोमेन यजन्ते तत्र [V]पूर्णमासे [V]सुतः अभिषुतः सोमः [V]तेषां

सम्यगनुष्ठितया प्रकृतयज्ञसंपूर्तिरिन्द्रियावरोधो मनुष्यलोकजयश्चेति[३२] [३३-]संपद्यन्ते त्रीणि प्रयोजनानि-[३३]। अतो नैकस्या अपि वैयर्थ्यम्। नापीष्टियज्ञत्वयोरभावः प्रत्येकमिष्टित्वेऽपि [३४]समुदितस्य प्रौढयज्ञत्वात् अत [३५-]एव तदनुष्ठानेन-[३५] [V]भूयसः [३६]बहूनेकाहाहीनसत्ररूपान् [V]यज्ञक्रतून् [V]उपैति । किं चाद्य द्वितीयाया- मिष्टवन्तं [३७]यजमानमभिलक्ष्य [V]पश्चात् [V]चन्द्रमाः [V]अभ्युदेति तस्येयमिष्टिर्नाम्ना [V]सुमनाः इत्युच्यते वर्धिष्णुचन्द्रोदयस्य सौमनस्यहेतुत्वात् । ततः [V]अस्मिन् [V]एव [V]लोके तस्य [३८]समृद्धिर्धनं [V]भवति ॥

दाक्षायणयज्ञेनेति ॥ यथेयं सुमना नामेष्टिर्दर्शपूर्णमासयोर्गुणविकृतिस्तथैवान्यां गुणविकृतिं विधत्ते– ' दाक्षायणयज्ञेन सुवर्गकामो यजेत ' इति । एतस्य यज्ञस्य स्वरूपं सूत्रकारेण स्पष्टीकृतम्– " दाक्षायणयज्ञेन सुवर्गकामः । द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत । आग्नेयोऽष्टाकपालोऽग्नीषोमीय एकादश- कपालः पूर्वस्यां पौर्णमास्याम् । आग्नेयोऽष्टाकपाल ऐन्द्रं दध्युत्तरस्याम् । आग्नेयोऽष्टाकपाल ऐन्द्राग्न एकादश- कपालः पूर्वस्याममावास्यायाम् । आग्नेयोऽष्टाकपालो मैत्रावरुण्यामिक्षा द्वितीयोत्तरस्याम् " (आपश्रो ३·१७· ४-६) इति ॥

पूर्णमास इति ॥ तत्रोत्तरस्यां पौर्णमास्यामुत्तरस्याममावास्यायां चैकैकं विधत्ते– ' पूर्णमासे सं नयेन्मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजेत ' इति ॥

पूर्णमास इति ॥ तत्रैन्द्रं दधिरूपं यदुत्तरस्मिन् पौर्णमासे सांनाय्यं तत् प्रशंसति– ' पूर्णमासे वै देवानाꣳ सुतस्तेषामेतमर्धमासं प्रसुतः ' इति । यदैन्द्रं दध्यनुष्ठितं तेन [३९]पूर्णमासे एव [V]देवानां

३१. पं२.मै४– पौर्णमास्यौ । ३२–३२. [मै– मुद्रितपुस्तकमनुसृत्य पूरितोऽयमंशः । लिखित- पुस्तकेषु नास्ति ।]। ३३. लं– ' दध्युत्तरेद्युः ' नास्ति ।

३२. अ.इ.उ.जो.ना.पा– ' चेति ' नास्ति । ३३–३३. ड.शृं.हो१–प्रयोजनत्रयं संपद्यते । ३४. आ–समूहितस्य; ड–समाहितस्य । ३५–३५. आ.क.जो.ना.हा–एतदनुष्ठानेन । ३६. ड.शृं.हो१–बहुलानें° । ३७. हा– यज्ञयजमानं । ३८. ड.शृं– समृद्धिशीलं । ३९. आ.ड–पौर्णं° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तेषां मैत्रावरुणी वशाऽमावास्यायामनूबन्ध्या यत् (४) पूर्वेद्युर्यजते वेदिमेव तत् करोति यद्वत्सानपाकरोति सदोहविर्धाने एव सं मिनोति यद्यजते देवैरेव सुत्याꣳ सं पादयति स एतमर्धमासꣳ सधमादं देवैः सोमं पिबति

तेषाम् । मैत्रावरुणीति मैत्रा - वरुणी । वशा । अमावास्यायामित्यमा-वास्यायाम् । अनूबन्धेत्यनु-बन्ध्या । यत् (४) । पूर्वेद्युः । यजते । वेदिम् । एव । तत् । करोति । यत् । वत्सान् । अपाकरोतीत्यप - आकरोति । सदोहविर्धाने इति सदः– हविर्धाने । एव । समिति । मिनोति । यत् । यजते । देवैः । एव । सुत्याम् । समिति । पादयति । सः । एतम् । अर्धमासमित्यर्ध - मासम् ॥ सधमादमिति सध - मादम् । देवैः । सोमम् । पिबति ।

[v]देवानां सोमः [v]एतम् अनन्तरभाविनम् [v]अर्धमासं सर्वः [v]प्रसुतः भवति । तस्य प्रकृष्टा गतिर्यागः । यद्वा– प्रकर्षेणानुज्ञातः प्रसुतः हुतो भवति । अथ [v]तेषां देवानाम् [v]अमावास्यायां [v]मैत्रावरुणी [v]वशा [v]अनूबन्ध्या भवति । एवम् देवा अयजन्त इति ॥

इदानीं दाक्षायणयज्ञं तद्भावेन रूपयति– यदिति ॥ [३५]पूर्वस्मिन्नहनि [v]यत् अग्नीषोमाभ्यां [v]यजते उत्तरवेदिकरणस्थानीयं [v]तत् । [v]यत् वत्सापाकरणं सदोहविर्धानयोः संमितिस्थानीयं तत् । [v]यत् उत्तरस्मिन्नह्नि सांनाय्येन [v]यजते तत् [v]देवैः सहेन्द्रस्य [v]सुत्यां यागं [v]संपादयति, सुत्या-स्थानीयोऽर्धमासः । यस्मादेवं तस्मात् [v]सः इन्द्रः [v]एतम् आगामिनम् [v]अर्धमासं सर्वं [v]देवैः

सोमोऽभिषुतो भवति । ' पयो वै सोमः पयः सांनाय्यम् ' (तैसं २.५.५) इति [४०]पूर्वमुक्तत्वात् । [४१-]किं च[-४१] तेषां देवानां पौर्णमासीमारभ्यामावास्यापर्यन्तम् [v]अर्धमासं नैरन्तर्येण सोमः प्रकर्षेण सुतो भवति । प्रतिदिनमनुष्ठिताभिः सोमविकृतिभिर्या प्रीतिः सा तेन सांनाय्येन संपद्यत इत्यर्थः ॥

तेषामिति ॥ अथोत्तरस्यामामावास्यायां विहितामामिक्षां प्रशंसति– ' **तेषां मैत्रावरुणी वशाऽमावास्यायामनूबन्ध्या यत् पूर्वेद्युर्यजते वेदिमेव तत् करोति यद्वत्सानपाकरोति सदोहविर्धाने एव सं मिनोति यद्यजते देवैरेव सुत्याꣳ सं पादयति स एतमर्धमासꣳ सधमादं देवैः सोमं पिबति यन्मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजते यैवासौ देवानां वशाऽऽनूबन्ध्या सो एवैषतस्य** ' इति ॥ येयम् [v]अमावास्यायाम् अनुष्ठिता [v]मैत्रावरुणी आमिक्षा सा [v]तेषां देवानां [v]वशा [v]अनूबन्ध्या संपद्यते । तत् कथमिति तदुच्यते– [v]पूर्वेद्युः [४२]शुक्लप्रतिपदि [v]यजते इति [v]यत् तेन सौमिकीं [v]वेदिम् [v]एव कृतवान् भवति । तस्मिन्नेव दिने [४३]पुनरपि [v]वत्सान् [v]अपाकरोति इति [v]यत् तेन [v]सदोहविर्धाने [४४-]द्वे यागमण्डपे[-४४] संपादितवान् भवति । द्वितीयायां प्रातराग्नेयेनाष्टाकपालेन [v]यजते इति [v]यत् तेन [v]देवैः इष्यमाणां [v]सुत्याम् एव संपादितवान् भवति । [v]सः तादृशो यजमानः [v]एतम् [v]अर्धमासं शुक्लपक्षं नैरन्तर्येण [v]देवैः [v]सधमादं सहर्षोपेतं [v]सोमं पीतवान्

३४. तं३.मै.लं– पूर्वस्मिन् दिने ।

४०. आ.ड– ' पूर्वम् ' नास्ति । ४१–४१. आ– ' किं च ' नास्ति । ४२. उ.जो.ना.हा–शुद्धप्रति° । ४३. आ– पुनरेव । ४४–४४. क–द्वौ यागमण्डपौ; आ.इ.उ.पा–द्वौ मण्डपौ; ना.जो–मण्डपौ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यन्मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजते यैवासौ देवानां वशाऽनूबन्ध्या सो एवैषैतस्य साक्षाद्वा एष देवानभ्यारोहति य एषां यज्ञ(५)मभ्यारोहति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान्

यत्। मैत्रावरुण्येति मैत्रा-वरुण्या। आमिक्षया। अमावास्यायामित्यमा-वास्यायाम्। यजते। या। एव। असौ। देवानाम्। वशा। अनूबन्ध्येत्यनु-बन्ध्या। सो इति। एव। एषा। एतस्य। साक्षादिति स-अक्षात्। वै। एषः। देवान्। अभ्यारोहतीत्यभि-आरोहति। यः। एषाम्। यज्ञम् (५)। अभ्यारोहतीत्यभि-आरोहति। यथा। खलु। वै। श्रेयान्। अभ्यारूढ इत्यभि-आरूढः। कामयते। तथा। करोति। यदि। अवविध्यतीत्यव-विध्यति। पापीयान्।

[V]सधमादं [V]सोमं [V]पिबति। देवैः सह मादयति इति सधमात्। "सधमादस्थयोः°" (पा ६·३·९६) इति सधादेशः। यद्वा– सह मदित्वा। [३५-]या मैत्रावरुण्यामिक्षा[-३५] सा [V]देवानाम् अनूबन्ध्यास्थानीया॥

साक्षाद्वा इत्यादि॥ इत्थमयमव्यवधानेन [V]देवान् [V]अभि [V]आरोहति देवसमूहमनुप्रविशति [V]यः [V]एषां देवानां [V]यज्ञम् [V]अभ्यारोहति अनुष्ठानेनाक्रामति[३६]। यथेत्यादि। [V]यथा लोके [V]श्रेयान् [३७]अश्रेयांसमभ्यारूढमात्मानं [V]कामयते इतोऽप्यहं श्रेयान् भूयासमिति [V]तथा अयं दाक्षायणयज्ञयाजी [V]करोति॥

इदानीं यज्ञान्तरेभ्योऽस्य वैलक्षण्यं दर्शयितुमाह– यदीति॥ यागान्तरेषु [३८-V]यदि [V]अव-विध्यति[-३८] विकलानुष्ठायी स्यात्, [V]पापीयान् पापतरः [V]भवति। [V]यदि वा [V]न [V]अवविध्यति

भवति। तस्मादाग्नेयादूर्ध्वं तस्मिन् द्वितीयामावास्याकर्मणि [V]मैत्रावरुण्या [V]आमिक्षया [V]यजते इति [V]यत् [V]सो [V]एव आमिक्षा यजमानस्य [४५V]एषा वशा [४६]संपद्यते। काऽसौ वशेति तदुच्यते– सोमयागावसाने [V]देवानाम् अर्थ एव [V]या [V]वशा [V]अनूबन्ध्या क्रियते सैवेयमामिक्षेत्यर्थः॥

साक्षादिति॥ दाक्षायणयज्ञानुष्ठानं प्रशंसति– 'साक्षाद्वा एष देवानभ्यारोहति य एषां यज्ञ-मभ्यारोहति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति' इति॥ [V]यः [V]यजमानः [V]एषां विधि-वाक्योक्तानामग्न्यादीनां देवानां [V]यज्ञम् [V]अभ्यारोहति सम्यगनुतिष्ठति [V]एषः [V]साक्षात् एव तानग्न्यादिदेवान् [V]अभ्यारोहति प्राप्नोति। बहुकालव्यवधानमन्तरेणैव देवसदृशं [४७]भोगं प्राप्नोतीत्यर्थः। प्राप्य च [V]यथा लोके [V]श्रेयान् राजामात्यादिरुत्तमं पदम् [V]अभ्यारूढः [४८-]स्वकीयभृत्यानामग्रे ममेदं[-४८] भोगसाधनमानयेति पुनः पुनः [V]कामयते [V]तथा अयं यजमान [४९]आवृत्तयाजी पुनः पुनः फलसंपादनं [V]करोति॥

यदीति॥ पूर्वं स्वर्गकामस्यायं यज्ञ उक्तः, इदानीं [५०]व्यावृत्कामस्य स एवोच्यते– 'यद्यवविध्यति पापीयान् भवति यदि नावविध्यति सदङ्ङ्व्यावृत्काम एतेन यज्ञेन यजेत क्षुरपविर्ह्येष यज्ञस्ताजक्पुण्यो

३५–३५.तं३.मै.लं– मैत्रावरुण्यामिक्षा या। ३६. तं३.मै.लं– °नाक्रमति। ३७. तं३–°समात्मारूढ°। ३८–३८. लं– यद्यपि सिध्यति।

४५. आ–'एषा' नास्ति। ४६. ड–संपाद्यते। ४७. इ–भागं। ४८–४८. हो१–°नामग्रमेवेदं। ४९. इ.उ.ड.पा.हो१– आवृत्तयज्ञे; जो.हा– आवृत्तये आवृत्तयज्ञे। ५०. ड.शृं.हो१– व्यावृत्तिकामस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभ्युदयेष्टिः, दाक्षायणयज्ञः]

भवति यदि नावविध्यति सदृङ्व्यावृत्कामं एतेन यज्ञेन यजेत क्षुरपविर्ह्येष यज्ञस्ताजक् पुण्यो वा भवति प्र वा मीयते तस्यैतद्व्रतं नानृतं वदेन्न माꣳसमश्नीयान्न स्त्रियमुपेयान्नास्य पल्पूलनेन वासः पल्पूलयेयु(६)रेतद्धि देवाः सर्वं न कुर्वन्ति ॥५॥

[चन्द्रमा द्वे देवलोकमेव यद्यज्ञं पल्पूलयेयुः षट् च ।]

भवति । यदि । न । अवविध्यतीत्यव - विध्यति । सदृङ्डिति स - दृङ् । व्यावृत्कामम् इति व्यावृत् - कामः । एतेन । यज्ञेन । यजेत । क्षुरपविरिति क्षुर - पविः । हि । एषः । यज्ञः । ताजक् । पुण्यः । वा । भवति । प्रेति । वा । मीयते । तस्य । एतत् । व्रतम् । न । अनृतम् । वदेत् । न । माꣳसम् । अश्नीयात् । न । स्त्रियम् । उपेति । इयात् । न । अस्य । पल्पूलनेन । वासः । पल्पूलयेयुः (६) । एतत् । हि । देवाः । सर्वम् । न । कुर्वन्ति ॥ ५ ॥

[शब्रा १·६·४·१०]

[V]सदृङ् सदृश एव यजमानान्तरैः स्यात् न [३९-]तु विशेषैश्वर्यः स्यात्[-३९]। तस्मादन्येभ्यो यजमानेभ्यः [V]व्यावृत्कामः [V]एतेन [V]यजेत । व्यावृत्तिर्व्यावृत् । संपदादिलक्षणः क्विप् (पा ३·३·१०८ वा ९)। कोऽस्य विशेष इत्याह—[V]क्षुरपविः [४०-]निश्चितफलः [४१]यथाऽक्षुरच्छेदेन [४२]पर्विवज्रं [४३]सद्यः [४४]प्रत्ययकृत् एवमयं [V]यज्ञः । [V]ताजक् तदानीमेव [V]प्र [V]मीयते । तस्येत्यादि । गतम् । अनृतौ [V]स्त्रियम् [V]न [V]उपेयात् इति एके । [४५-]पल्पूलनं शोधनम् ऊषादि[-४५], तेन [V]अस्य [V]वासः [V]न [V]पल्पूलयेयुः । [४६]अनेनाश्मपीडनादिकमपि निषिध्यत इत्येके । पल्पूलयतिः स्नानकर्मा ॥

इति द्वितीये पञ्चमे पञ्चमोऽनुवाकः ॥

वा भवति प्र वा मीयते' इति ॥ अन्येषु यज्ञेषु [V]यदि [V]अवविध्यति किंचिद्वैकल्यं करोति [५१-]तदानीं [V]पापीयान् [V]भवति अन्ययजमानापेक्षया[-५१] [५२]अतिनिकृष्टो भवति। [V]यदि [V]न [V]अवविध्यति वैकल्यं न करोति तदानीमन्यैः [५३V]सदृङ् समान एव भवति न तु तेभ्यः [५४]आधिक्यलक्षणा व्यावृत्तिः सिध्यति। अतः [V]व्यावृत्कामः [V]एतेन दाक्षायणयज्ञेन [V]यजेत। यस्मात् [V]एषः [V]यज्ञः क्षुरवद्वज्रवच्चातितीक्ष्णः [५५]तस्मादेतदनुष्ठायी [V]ताजक् [V]पुण्यः [V]वा [V]भवति, तदानीमेवेतरेभ्यो व्यावृत्त एव भवति। [५६]तद्विरोधी ताजक् [५७V]प्रमीयते एव। अथवा यजमान एव सम्यगनुष्ठानादुत्तमो भवति वैकल्यात् प्रमीयते वा ॥

३९–३९. तं३ – 'तु विशेषैश्वर्यः स्यात्' नास्ति। ४०. तं३.पं२.लं – ततफलः। ४१. तं३– यथा क्षुर°। ४२. तं३– नवर्वीर्यज्ञः। ४३. लं– यज्ञः सद्यः। ४४. तं३.पं२.लं– प्रत्यक्षकृत; मै४– प्रत्यसकृत् (?)। ४५–४५. तं३– पल्पूलनं शोभनं दूषणादि; लं– पवनं शोभनदूरादि (?)। ४६. पं२– रक्तस्य विधानादि°; लं– नक्तस्य विधानादि°।

---

५१. ड.हो१– तदा पापीयान् इतरयजमानेभ्यो। ५२. ड.शृं.हो१– अत्यन्तनिकृष्टो; अ.इ.उ.जो.पा.हा– अतिकृष्टो। ५३. अ.इ.उ.जो ना.पा.हा– सदृशः। ५४. ड– आदिलक्षणा। ५५. ड.शृं– अतस्तदनुष्ठायी; हो१– अतस्तदनुष्ठाय। ५६. आ.ड– एतद्विरोधी। ५७. अ.उ.जो.ना.पा.हा– म्रियते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्येति ॥ अतो वैकल्यपरिहाराय व्रतविशेषान् विधत्ते– 'तस्यैतद्व्रतं नानृतं वदेन्न माꣳसमश्नीयान्न स्त्रियमुपेयान्नास्य पल्पूलनेन वासः पल्पूलयेयुरेतद्धि देवाः सर्वं न कुर्वन्ति' इति॥ पल्पूलनं [५८]वस्त्रशुद्धिसाधनमूषादि, तेन [र]अस्य [र]वासः [र]न शोधयेयुः। यस्मात् [र]देवाः पूज्याः [५९-र]एतत् [र]सर्वम् अनृतवदनादि-[५९ र]न [र]कुर्वन्ति, तस्मादयमपि न कुर्यात्। अस्य दाक्षायणयज्ञस्याऽऽधानादूर्ध्वं दर्शपूर्णमासाभ्यां सह विकल्पो द्रष्टव्यः। तथा च सूत्रकार आह– "[६०]सोऽयं दर्शपूर्णमासयोः [६१]प्रक्रमे [६२]विकल्पः, [६३]अनेन दर्शपूर्णमासाभ्यां वा [६४-]यजेत। तेन-[६४ ६५]पञ्चदशवर्षाणीष्ट्वा विरमेद्यजेत वा। संतिष्ठते दाक्षायणयज्ञः" (आपश्रौ ३·१७·९-११) इति॥

अत्र मीमांसा॥ षष्ठाध्यायस्य पञ्चमपादे चिन्तितम्—

"इष्टिरभ्युदये दर्शात् कर्मान्यदुत देवताः।
पूर्वास्त्याज्या विशिष्टस्य विधानादन्यकर्मता[६६] ॥
प्रकृतप्रत्यभिज्ञानान्न कर्मान्तरचोदना।
देवताः [६७]प्राकृतास्त्यक्त्वा द्रव्यमन्याभ्य उच्यते" ॥ (जैन्या ६·५·१-२)॥

दर्शपूर्णमासयोः श्रूयते– "यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेद्यो मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधꣳश्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय श्रते चरुम्" इति॥ [६८]अयमर्थः– दर्शभ्रान्त्या केनचिच्चतुर्दश्यां हविर्निरुप्तं भवति। ततः प्रत्यूषे पूर्वस्यां दिशि चन्द्रमा अभ्युदेति तदा निरुप्तास्तण्डुलास्त्रेधा [६९]विभक्तव्याः। अखण्डिता ईषत्खण्डिता अतिसूक्ष्मकणाश्चेति त्रैविध्यम्। ते च त्रिविधा दात्रादिगुणविशिष्टेभ्योऽग्न्यादिभ्यो देवेभ्य इति। तत्रेदं प्रक्रान्तदर्शकर्मणोऽन्यत् [७०]कर्म। कुतः? कालापराधप्रायश्चित्तार्थं द्रव्यदेवताविशिष्टस्य कर्मणो विधीयमानत्वात्। तत इदं प्रायश्चित्तं कृत्वा परेद्युः [७१-]दर्शकर्म नानुष्ठेयमिति-[७१] प्राप्ते ब्रूमः– हविर्निरुप्तमिति [७२]प्रकृतं यद्दर्शकर्म तत्परित्यज्य कर्मान्तरविधिकल्पने [७३]प्रकृतहानाप्रकृतागमौ प्रसज्येयाताम्। अतस्तस्मिन्नेव प्रकृते कर्मणि निरुप्तस्य हविषः पूर्वदेवताभ्यो [७४]दर्शसंबन्धिनीभ्योऽपनयोऽत्राभिधीयते। तण्डुलोपलक्षितं यद्धविर्दधिरूपं व्रीहिरूपं च पूर्वेद्युर्निरुप्तं तद्धविः पूर्वदेवतात्मनोऽग्नेरिन्द्राच्च विभजेदिति [७५]देवताहविषोः परस्परविभागोऽत्र [७६]विधीयते, न तु तण्डुलानां स्थविष्ठमध्यमाणिष्ठरूपस्त्रिविधो विभागो विधीयते, तस्य प्राप्तत्वात्। ये मध्यमाः स्युरिति [७७]विनियोगभेदादर्थप्राप्तः स विभागः। ततः पूर्वदेवतास्त्यक्त्वा दातृत्वादिगुणयुक्ताभ्यो [७८]वह्न्यादिदेवताभ्यः पूर्वं निरुप्तं हविः प्रदातव्यम्। तनु प्रतिपदि प्रातर्निर्वापकालो न तु

---

५८. ड.शृं– °मूषादिकं; हो१ – °मूषरादिकं; अ.इ.उ.जो.ना.पा.हा – °साधनं मद्रकादि। ५९–५९. ड.शृं.हो१– अनृतवदनादिकं; क–एतत्सर्वमनृतवदनादिकं; अ.इ.उ.जो.ना.पा.हा–एतत्सर्वं। ६०. आ.क–'सोऽयं' नास्ति। ६१. उ.ड.हो१– प्रक्रमो; हा–प्रक्रम्य। ६२. आ.क.उ.ना.हा– विकल्पते; अ–विकल्पेते। ६३. आ.क– एतेन। ६४–६४. आ– यजते एतेन; ना– यजते तेन; क.जो.हा– यजते न। ६५. आ.क– °णीष्ट्वा वा। ६६. आ.क.ना– °दन्यकर्म तत्; अ.इ.उ.जो.पा.हा– °दन्यकर्मतः। ६७. ड.शृं–प्रकृतीस्त्यक्त्वा। ६८. ड.हो१–अस्यायमर्थः। ६९. अ.इ.उ.जो.पा.हा–विभज्य कर्तव्याः। ७०. अ.इ.उ.पा–'कर्म' नास्ति। ७१–७१. अ.आ.इ.उ.क.जो.पा.शृं.हा.हो१–अनुष्ठेयमिति। ७२. शृं–कृतम्। ७३. ड.शृं.हो१– °हानाप्रकृतक्रियेव। ७४. अ.इ.उ.जो.ना.पा.हा– °संबन्धिभ्योऽ°। ७५. अ.इ.उ.जो.ना.पा.हा– °हविषः। ७६. शृं– गीयते। ७७. क– °दर्थप्राप्तेः; अ.इ.उ.जो.पा.हा– °दर्थप्राप्तोऽपि। ७८. ड–अग्न्यादि°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभ्युदयेष्टिः, दाक्षयणयज्ञः]

[७९]दर्शे, तथा [८०]सति दर्शभ्रान्त्याऽपि[८१] चतुर्दश्यां निर्वापाभावान्निर्वापादूर्ध्वं चन्द्रोदयो न प्राप्नोति। नैष दोषः। दध्नो द्रव्यहकालीनत्वेनार्थसिद्धे[८२] [८३]पूर्वेद्युर्दोहातञ्चने, तदभिप्रायेण निरुप्तमित्युच्यते। यद्वा– व्रीहि-निर्वापोऽपि पूर्वेद्युर्विकल्पितः। तथा च श्रूयते– " यदि बिभीयादभि मोदेष्यतीति महारात्रे हवींषि निर्वपेत् " (द्र. मीसू ६.५.४ शाभा) इति। अयमर्थः– भ्रान्त्या [८४]प्रमादेन वा दर्शोऽयमित्यभिनिश्चितवतो मां प्रति चन्द्रोऽभ्युदेष्यतीति भीतिरस्ति तदा तस्मिन्नेव दिने महारात्रे सर्वाणि निर्वपेदिति। अतो निरुप्तस्यैव हविषोऽस्मिन्नेव कर्मणि कालव्यत्यासं निमित्तीकृत्य देवतान्तरसंयोगरूपः प्रयोगप्रकारभेद उपदिश्यते। ततो दर्शस्यैवार्थं नैमित्तिकः प्रयोगो न तु [८५]दर्शलोपप्रायश्चित्तमिति नैमित्तिकं दर्शप्रयोगमनुष्ठाय पश्चात् स्वकाले नित्योऽपि दर्शप्रयोगोऽनुष्ठातव्यः ॥

तत्रैवान्यच्चिन्तितम्—

" ऊर्ध्वं चन्द्रोदये [८६]सेष्टिर्निर्वापात् [८७]पूर्वमप्युत।
उक्तेराद्योऽन्तिमः पक्षो निरुप्तेत्यविवक्षया " ॥ (जैन्या ६.५.४) ॥

सा पूर्वोक्ताऽभ्युदयेष्टिर्हविर्निर्वापादूर्ध्वं चन्द्रोदये सति कर्तव्या, 'निरुप्तं हविरभ्युदेति' (द्र. तैसं २.५.५) इत्युक्तत्वादिति चेत्। मैवम्। हविरभ्युदयस्य [८८]निमित्तत्वे [८९]तद्विशेषणस्य निर्वापस्या-विवक्षितत्वात्। अन्यथा वाक्यभेदापत्तेः। यस्य हविरभ्युदेति तत्र हविर्निरुप्तमित्येवं वाक्यभेदः। [९०]तस्मात् निर्वापात् प्रागपि चन्द्रोदये सत्यविहितकाले कर्मोपक्रममात्रेणेयमिष्टिः कर्तव्या ॥

तत्रैवान्यच्चिन्तितम्—

" [९१-]प्राक् प्राकृतीभ्यो-[९१] निर्वापो वैकृतीभ्योऽथवाऽग्रिमः।
तण्डुलोक्तेर्वैकृतीभ्यो हविर्मात्रोपलक्षणात् " ॥ (जैन्या ६.५.५) ॥

निर्वापात् प्राग्यदा चन्द्रोदयस्तदा चन्द्रोदयादूर्ध्वं क्रियमाणो निर्वापः प्राकृतीभ्यो देवताभ्यो युक्तः। कुतः? तण्डुलान् विभजेदिति वाक्येन [९२]तण्डुलीभावादूर्ध्वं [९३]प्राकृतदेवतापनयनश्रवणात्। निर्वापस्तु व्रीहीणामेवेति तस्मिन् काले प्राकृताग्न्यादिदेवता नापनीता इति प्राप्ते ब्रूमः– [९४]वैकृतीभ्यो दातृत्वादिगुण-युक्ताभ्यो [९५]अग्न्यादिदेवताभ्यः निर्वापः कर्तव्यः। कुतः? तण्डुलशब्देन [९६]हविर्मात्रस्योपलक्षणात्। अन्यथा दधिपयसोरतण्डुलत्वेन देवतापनयो न स्यात्। हविर्मात्रविवक्षायां तु व्रीहीणामपि हविष्ट्वेन [९७]प्राकृत-देवतासंबन्धम् अपनीय देवतान्तरसंबन्धस्य कर्तुं युक्तत्वाद्वैकृतीभ्यो निर्वपेत् ॥

---

७९. अ.इ.उ.जो.ना.पा.हा.हो१ – दर्शः। ८०. अ.इ.उ.ड.जो.पा.शृं.हा.हो१ – अपि। ८१. अ.इ.उ.जो.ना.पा.हा– 'अपि' नास्ति। ८२. अ.इ.उ.क.ड.जो.पा.शृं.हा.हो१– °सिद्धेः। ८३. अ.इ.उ.पा– पूर्वेद्युर्दोहनान्तरं; ड.शृं.हो१– पूर्वेद्युर्दोहनातञ्चने। ८४. शृं.हो१–प्रमाणेन। ८५. ड– दर्शप्राय°। ८६. अ.इ.उ.जो.पा.हा–वेष्टिर्निर्वापात्; हो१–सेष्टिनिर्वापः। ८७. अ.इ.उ.जो.ना.पा.हा–पूर्वमिष्यते। ८८. आ–निमित्तत्वेन। ८९. अ.इ.उ.जो.पा– तद्विशेषस्य। ९०. आ– तस्मिन्। ९१–९१. ड.हो१– प्राकृती-भ्योऽथ;क.हा–प्राक्प्राकृताभ्यो। ९२. अ.इ.उ.ड.जो.शृं.हा–तण्डुलाभावा°; हो१– तण्डुलभावार्थं°। ९३. शृं– °पनयश्रवणात्। ९४. हा– वैकृताभ्यः। ९५. आ.क–'अग्न्यादिदेवताभ्यः' नास्ति। ९६. ना.शृं– °पलक्षणत्वात्। ९७. अ.इ.उ.जो.पा.हा– प्रकृतसंबन्धम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्रैवान्यच्चिन्तितम्—

" [९८]प्राकृतीभ्योऽल्पनिर्वापेऽभ्युदये शिष्टतण्डुलान् ।
प्राकृतीभ्यो वैकृतीभ्यस्तूष्णीं वा निर्वपेदिह ॥
प्राकृतीभ्यः प्रवृत्तत्वाद्वैकृतीभ्यो निमित्ततः ।
शिष्टांशस्यापदार्थत्वादसंयोगादिहान्तिमः[९९] " ॥ (जैन्या ६·५·६-७) ॥

यदा प्राकृतीभ्यो मुष्टिमात्रे निरुप्ते सति चन्द्रोऽभ्युदेति तदा मुष्टित्रयरूपोऽवशिष्टांशः प्राकृतीभ्य एव [१००]निर्वप्तव्यः । कुतः ? [१०१]प्राकृतीनां प्रवृत्तत्वात्[१०१], इत्येकः पक्षः । चन्द्रोदये [१०२]निमित्ते सति नैमित्तिकस्य पूर्वदेवतापनयस्यावश्यंभावात् [१०३]वैकृतीभ्योऽवशिष्टांशनिर्वाप इति द्वितीयः पक्षः । अस्तु प्राकृतदेवतापनयो निमित्ताधीनः । अन्यदेवतासंयोगस्त्वंशस्य न संभवति । अन्याश्च देवताः प्राकृतदेवतास्थाने निवेशनीयाः । [१०४]प्राकृतदेवानां च निर्वापपदार्थसंबन्धः क्लृप्तो न तु पदार्थांशेन । ततस्तत्स्थानपतिनानां वैकृतीनां च नांशसंयोगो युक्त इत्यस्यांशस्य प्राकृतीभ्योऽपनीतत्वाद्वैकृतीभिरसंयोगाच्च तूष्णीमेव निर्वाप इति राद्धान्तः ॥

तत्रैवान्यच्चिन्तितम्—

" सेष्टिः सांनाय्यिनो वा स्यादन्यस्यापि दधिश्रुतेः ।
[१०५]नान्यस्येत्यग्निमोऽन्त्यः स्यात्[१०५] देवमात्रविधानतः " ॥ (जैन्या ६·५·८) ॥

न हि सांनाय्यरहितस्य दधिपयसी विद्येते, तदभावे च ' दधश्चरुं, शृते चरुम् ' (द्र. तैसं २·५·५) इति विधिर्न [१०६]संगच्छेत । तस्मात् सांनाय्यिन एव सा पूर्वोक्ताऽभ्युदयेष्टिरिति चेत् । मैवम् । [१०७]अप्राप्ता देवता [१०८]एवात्र विधीयन्ते[१०८] । दधिपयसोरपि विधाने वाक्यं भिद्येत । [१०९]ततः तण्डुलवत् [११०]प्राप्तयोर्दधिशृतयोरनूद्यमानतया विध्यभावादुदके चरुश्रपणसंभवाच्च [१११]सांनाय्यिवदन्यस्यापि सेष्टिरस्ति ॥

नवमाध्यायस्य द्वितीयपादे चिन्तितम्—

" शृतदध्नोः प्रणीतानां न धर्माः सन्ति वा न हि ।
अपाकार्थत्वतः, सन्ति पाकहेतुत्वसाम्यतः " ॥ (जैन्या ९·२·२२) ॥

[११२]अभ्युदयेष्ट्यां ' शृते चरुं दधनि चरुम् ' (द्र. तैसं २·५·५) इति श्रूयतदधिनी [११३]आम्नाते । तयोः प्रणीताधर्मा न कर्तव्याः । हविःश्रपणार्थमुत्पन्ना उत्पवनादिधर्मसंस्कृता आपः [११४]प्रणीताः । दधिपयसी तु श्रपणार्थं नोत्पन्ने । किं तु हविष्ट्वेन प्रदानार्थमुत्पन्ने । [११५]ततः साम्याभावान्नोत्पवनादयो धर्मास्तयोरिति[११५] चेत् । मैवम् । अन्यार्थमुत्पन्नयोरपि दधिपयसोरत्र चन्द्रोदयं निमित्तीकृत्य चरुश्रपणहेतुत्वं वाचनिकम् । ततः समानत्वात् तद्धर्माः सन्ति ।

९८. हो१– प्रकृतिभ्यो°; शृं– °तीभ्य ऊर्ध्वंनि°; अ.इ.उ.जो.ना.पा.हा– °निर्वापेऽप्युदये, क– °भ्योन्यनि° । ९९. अ.इ.उ.जो.पा–°दसंदेहदिहान्तिमः । १००. ड–निर्वपेत् । १०१–१०१. अ.इ.उ.जो.पा.हा– प्राकृतानां प्रकृतत्वात् ; क.ना– प्राकृतानां प्रवृत्तत्वात् । १०२. शृं– निरुप्ते । १०३. अ.इ.जो.ना.पा – वैकृताभ्यो° । १०४. आ – प्राकृतीनां; हा – प्रकृतानां; अ.इ.उ.क.जो.ना – प्राकृतानां । १०५–१०५. अ.इ.उ.जो.पा.हा–°मोऽन्यस्य । १०६. आ.क.ड– संगच्छते । १०७. हो१–अप्राप्तावेव; ड–अप्राप्ते एव । १०८–१०८. ड–अत्राभिधीयन्ते । १०९. अ.इ.उ.जो.ना.पा.हा– न । ११० आ– °र्दधिपयसोरनू°; ना– °र्दधिपयसोरत्रानू ; अ.इ.उ.जो.पा.हा– °र्दधिपयसोरत्राविद्यमान° । १११. क.ड.हा.हो१– °वदस्यापि । ११२. हा – अभ्युदयेष्ट्यां श्रूयते । ११३. आ.क– आम्नायेते । ११४. आ– प्रणीता उच्यन्ते । ११५–११५. अ.उ.जो.हा–न तत्साम्याभावात् न उत्पवनादयो धर्मास्तयोरिति; पा–न तत्साम्याभावात् न उत्पवनादयोरिति; इ– तत्साम्याभावात् न उत्पवनादयो धर्मास्तयोरिति; ना– ततः साम्याभावादुत्पवनादयो धर्मास्तयोर्नेति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभ्युदयेष्टिः, दाक्षायणयज्ञः]

द्वितीयाध्यायस्य तृतीयपादे चिन्तितम्—

" यद्दाक्षायणयज्ञेन स्वर्गकामो यजेत तत् ।
कर्मान्तरं गुणो वोक्तदर्शादौ फलसिद्धये ॥
गुणस्यास्याप्रसिद्धत्वात् कर्मभेदोऽत्र संज्ञया ।
गुणो व्युत्पत्तिशेषाभ्यामावृत्त्याख्यो[११६] न नाम तत् " ॥ (जैन्या २·३·१०-११) ॥ ५

दर्शपूर्णमासप्रकरणे श्रूयते– ' दाक्षायणयज्ञेन सुवर्गकामो यजेत ' (तैसं २·५·५) इति। तत्र दाक्षायणशब्दवाच्यस्य कस्यचित् [११७]गुणस्य लोके प्रसिद्धयभावादुद्भिदादिवद्यजिसामानाधिकरण्येन कर्मनामत्वात् ' अथैष ज्योतिः ' इत्यादिवदपूर्वसंज्ञया [११८]कर्मान्तरविधिरिति चेत्। न। दाक्षायण-शब्दस्याऽऽवृत्तिवाचकत्वात्। [११९]तच्च शब्दनिर्वचनाद्वाक्यशेषाच्चावगम्यते। तथा हि– अयनमित्या-वृत्तिरुच्यते। [१२०]दक्षस्यैते दाक्षास्तेषामयनमिति तन्निर्वचनम्। दक्ष उत्साही पुनः पुनरावृत्तावनलस इत्यर्थः। १० तदीयानां प्रयोगाणामावृत्तिर्दाक्षायणशब्दार्थः। तथा चाऽऽवृत्त्या युक्तः प्रकृतो दर्शपूर्णमासात्मको यज्ञो दाक्षायणयज्ञः। [१२१]आवृत्तिप्रकारस्तु– " द्वे पौर्णमास्यौ द्वे अमावास्ये " (आपश्रौ ३·१७·४) इत्यादि-वाक्यशेषादवगम्यते। ततो दध्यादिवत् [१२२]प्रसिद्धार्थत्वात् दर्शपूर्णमासयोः प्रकृतयोरयं[१२३] स्वर्गफलसिद्ध्यर्थ-मावृत्याख्यस्य[१२४] गुणस्य विधिर्न तूद्भिदादिवत् कर्मनामधेयम्। एवं " साकंप्रस्थायीयेन यजेत पशुकामः " (तैसं २·५·४ आपश्रौ ३·१६·११) इत्यत्रापि द्रष्टव्यम्। अमावास्यायागे द्वौ द्वौ दोहौ संपाद्य चतसृणां १५ दधिपयसोः कुम्भीनां सह [१२५]प्रस्थापनं साकंप्रस्थायस्तद्युक्तो [१२६]दर्शयागः साकंप्रस्थायीयः। तथा सति प्रकृते दर्शयागे पशुफलाय [१२७]साकंप्रस्थायाख्यो गुणो विधीयते ॥

तृतीयाध्यायस्य चतुर्थपादे चिन्तितम्—

" अनृतं न [१२८]वदेद्वैधः [१२९-]पुंधर्मो वाऽनुवादगीः-[१२९]।
सक्रतौ पुंसि शुद्धे वा क्रतौ यद्वा विधिः क्रतौ ॥ २०
अनृतोक्तेः पुमर्थत्वात् तन्निषेधे [१३०-]तथा विधिः-[१३०]।
स्मार्तानुवादः पुंस्कत्वोः [१३१]श्रुतिप्रक्रिययोर्वशात् ॥
नाऽऽख्याते [१३२]पुरुषस्योक्तिः क्रतावेव प्रयाजवत्।
[१३३]स्मार्तोक्तनियमादन्यः [१३४]संयोगोऽतः क्रतौ विधिः " ॥ (जैन्या ३·४·१४-१६) ॥

---

११६. अ.इ.उ.क.जो.पा.हा– °वृत्या स्यात्। ११७. आ.क– ' गुणस्य ' नास्ति। ११८. क. २५ हा– कर्मविधि°। ११९. आ.क. तत्र। १२०. ड– दक्षस्येमे। १२१. अ.इ.जो.ना.पा.हा– °प्रकारश्च। १२२. आ.क – प्रसिद्धत्वात्। १२३. अ.इ.उ.जो.ना.पा.हा – ' अयं ' नास्ति। १२४. ड.हो१ – °र्थमावर्तनाख्यस्य। १२५. अ.इ.उ.पा– प्रप्रदनं। १२६. आ.क.हो– यागः। १२७. अ.इ.उ.जो. पा.हा– साकंप्रस्थानाख्यो। १२८. आ– वदेदेषः। १२९–१२९. शृं– पुंधर्मोऽथानु°। १३०–१३०. आ.ना– तथाविधः १३१. ड– स्मृति°। १३२. क– पुरुषानूक्तिः। १३३. ड.हो१– सत्योक्त°; ३० शृं – सत्योक्ति°। १३४. क.ड–संयोगेऽतः; हो१ – संयोगे तु।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दर्शपूर्णमासप्रकरणे श्रूयते– " नानृतं [१३५]वदेत् " (तैसं २·५·५) इति। तत्र पुरुषधर्मत्वेनायं प्रतिषेधो विधीयते। कुतः? प्रतियोगिनोऽनृतवदनस्य [१३६]पुरुषधर्मत्वात् तन्निषेधस्यापि पुरुषधर्मत्वेनैव विधातव्यत्वात्। 'वदेत्' इत्येतदाख्यातं तावत् कर्तृवाचकं, तेन [१३७]आख्यातेन कर्तुः प्रतीयमानत्वात्। पुरुषस्य [१३८]आख्यातप्रत्ययवाच्यत्वे सति प्रकृत्यर्थस्य वदनस्य पुरुषधर्मत्वं युक्तम्। [१३९-]प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोस्तु प्रत्ययः प्राधान्येन ' इति शाब्दिकैरुद्घोषणात्। वदनस्य पुरुषधर्मत्वे तन्निषेधस्यापि पुरुषधर्मत्वं युक्तम्[-१३९]। अन्यथा भिन्नविषयत्वेन [१४०]बाधकत्वं न स्यात्। तस्मात् पुरुषवाचकाख्यातश्रुत्या प्रकरणं बाधित्वा पुरुषार्थोऽयं [१४१]प्रतिषेधो विधीयते। [१४२]अस्त्येव स्मार्तः प्रतिषेध इति चेत्। तर्हि [१४३]तस्यैतत् श्रुतिवाक्यं मूलमस्तु। तस्मात् पुरुषार्थ इत्येकः पूर्वः पक्षः[१४४]। आख्यातश्रुतेः प्रकरणस्य चाविरोधाय क्रतुयुक्तपुरुषधर्मोऽस्तु। न ह्येतद्वाक्यं [१४५]स्मृतेर्मूलं, भिन्नविषयत्वात्। स्मृतिश्चोपनयनमारभ्याऽऽमरणं[१४६] पुरुषस्याऽनृतं प्रतिषेधति। तन्मध्यपातित्वात् क्रतावपि स्मार्तो निषेधः प्राप्त एव। [१४७-]तत उभयार्थोऽप्ययं[-१४७] प्रतिषेधो न विधीयते किं त्वनूद्यत इति द्वितीयः पूर्वः पक्षः। आख्यातेन भावनाऽभिधीयते। कर्ता तु तदविनाभूतोऽर्थात्[१४८] प्रतीयते। [१४९]अतः श्रुत्यभावात् केवलेन प्रकरणेन प्रजायादिवदारादुपकारकः क्रतावेव निविशते। न च तत्रापि विधीयते, किं तु सार्वत्रिकस्य निषेधस्य क्रतावपि प्राप्तत्वादनूद्यते[१५०] एवेति तृतीयः पूर्वपक्षः। 'सत्यमेव वदेन्नानृतम्' इति योऽयं स्मार्तनियमरूपः पुरुषार्थः संयोगस्तस्मादन्यः क्रत्वर्थः संयोगः। अतोऽप्राप्तत्वाद्विधीयते। एतद्विध्यतिक्रमे क्रतोरेव वैगुण्यं न तु पुरुषस्य प्रत्यवायः। अतोऽत्र क्रतुगामि प्रायश्चित्तम्। पुरुषार्थनियमातिक्रमे तु [१५१]पुरुषस्यैव प्रत्यवायो न तु क्रतोर्वैगुण्यम्। तत्र स्मार्तप्रायश्चित्तमिति विशेषः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः॥

---

१३५. हा–वद। १३६. आ.हा–पुंधर्मत्वात्; क–पुंधर्मतया। १३७. हा–'आख्यातेन' नास्ति। १३८. अ.इ.उ.जो.ना.पा.हा– आख्यातवाच्यत्वे। १३९–१३९. आ.क– 'प्रकृतिप्रत्ययौ...युक्तम्' नास्ति। १४०. अ.इ.उ.जो.ना.पा.हा– बाधकं। १४१. आ.क– निषेधः। १४२. अ.इ.उ.जो.ना.पा.हा–अस्त्येवं। १४३. अ.इ.उ.जो.ना.पा.हा– तस्यैव। १४४. आ.क– 'पक्षः' इत्यस्यानन्तरं– 'आख्यातभिन्नविषयत्वेन बाधकत्वं न स्यात्'। १४५. अ.इ.उ.क.जो.पा.हा–श्रुतेर्मूलं। १४६. ड.हो१–°मरणपर्यन्तं। १४७–१४७. आ.क– तदुभ°। १४८. हो१– 'अर्थात्' नास्ति। १४९. ड– अथ। १५०. ड– °दनूद्यते। १५१. क–तत्पुरुषस्यैव।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दर्शपूर्णमासयोः सोमयागेन सह पौर्वापर्यम्]

एष वै देवरथो यद्दर्शपूर्णमासौ यो दर्शपूर्णमासाविष्ट्वा सोमेन यजते रथस्पष्ट एवावसाने वरे देवानामव स्त्येतानि वा अङ्गापरूꣳषि संवत्सरस्य यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते-

---

एषः। वै। देवरथ इति देव-रथः। यत्। दर्शपूर्णमासाविति दर्श-पूर्णमासौ। यः। दर्शपूर्णमासाविति दर्श-पूर्णमासौ। इष्ट्वा। सोमेन। यजते। रथस्पष्ट इति रथ-स्पष्टे। एव। अवसान इत्यव-सानें। वरें। देवानाम्। अवेति। स्यति। एतानि। वै। अङ्गापरूꣳषीत्यङ्गा-परूꣳषि। संवत्सरस्येति सं-वत्सरस्य। यत्। दर्शपूर्णमासाविति दर्श-पूर्णमासौ। यः। एवम्। विद्वान्। दर्शपूर्णमासाविति दर्श-पूर्णमासौ। यजते।

एष वा इत्यादि ॥ [v]देवरथः देवानां रथस्थानम्। [v]रथस्पष्टः रथेन [1]प्रकाशितः क्षुण्णः। "तृतीया कर्मणि" (पा ६·२·४८) इति पूर्वपदप्रकृतिस्वरत्वम्। तत्र [v]देवानां [v]वरे उत्कृष्टे [2v]अवसाने देवानां स्वभूते देवानां गृहे [v]अव [v]स्यति देवयजनमध्यवस्थाति। तादृशे देवैः स्वभ्यस्ते देवयजनेऽनेनेष्टं भवति ॥

पञ्चमेऽभ्युदयेष्ट्याद्यास्तिस्र इष्टय ईरिताः ॥

एष इति ॥ अथ षष्ठे दर्शपूर्णमासयोः सोमयागेन सह पौर्वापर्यं [1]विधत्ते—'एष वै देवरथो यद्दर्शपूर्णमासौ यो दर्शपूर्णमासाविष्ट्वा सोमेन यजते रथस्पष्ट एवावसाने वरे देवानामव स्यति' इति ॥ [v]दर्शपूर्णमासौ इति [v]यत् अस्ति [v]एषः एव देवानां [2]रथः रथसदृशः। तथा सति प्रथमतः [v]दर्शपूर्णमासौ [v]इष्ट्वा पश्चात् [v]सोमेन [v]यः [v]यजते तस्यानुष्ठाने महत् सौकर्यं भवति। यथा लोके भूयो रथसंचरणेन [3]मार्गस्थकण्टकपाषाणादिषु क्षुण्णेषु [4]सः मार्गो विस्पष्टो [5]भवति, अयमस्य ग्रामस्य मार्ग इति सुखेन [6]अध्यवसातुं शक्यते, कण्टकाद्यभावात् वरः श्रेष्ठश्चासौ भवति। तादृशे मार्गे मनुष्या अनायासेन गन्तुं शक्नुवन्ति। तथा [v]देवानां संबन्धिना दर्शपूर्णमासरथेन स्पष्टे सुखेनाध्यवसातुं शक्ये श्रेष्ठे मार्गे यजमानः सोमेन यष्टुमध्यवस्यति। दर्शपूर्णमासयोरिष्टिप्रकृतित्वात् तयोः प्रयोगे स्वाधीने सति तद्विकृतिभूताः सोमाङ्गभूताः प्रायणीयाद्याः साङ्गाः सुखेनानुष्ठातुं शक्यन्ते। अननुष्ठितयोस्तु दर्शपूर्णमासयोः सोमप्रकरणे दीक्षणीयादिकर्मस्वरूपमात्रस्योपदिष्टत्वात् तदङ्गानि प्रयाजादीन्यनुष्ठातुं न शक्यन्ते। तस्मादिष्टिपूर्वत्वम् ॥

एतानीति ॥ [7]-अथ दर्शपूर्णमासौ बहुधा प्रशंसति-[7]। तत्र प्रथमं संवत्सरावयवत्वेन प्रशंसति—'एतानि वा अङ्गापरूꣳषि संवत्सरस्य यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजतेऽङ्गापरुꣳष्येव

---

१. पं२— स्पाशनः (?); मै४— स्याशित्रः(?); तं३.लं— स्पाशिनः (?)। २. तं३.लं— अवस्थाने।

---

१. अ.इ.उ.क.जो.ना.पा.हा— विधीयते। २. ड.श्रं.हो१— रथः' नास्ति। ३. आ.क. ड— महामार्ग°। ४. आ.क—'सः' नास्ति। ५. हो१— भवतीति। ६. ना— अध्यवसितुं; ड— अनुष्ठातुम्। ७-७. आ.क— दर्शपूर्णमासयोर्बहुधा प्रशस्यते; अ.इ.उ.जो.ना.पा.हा— दर्शपूर्णमासौ प्रशस्येते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऽङ्गापरूꣳष्येव संवत्सरस्य प्रति दधात्येते वै संवत्सरस्य चक्षुषी यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते ताभ्यामेव सुवर्गं लोकमनु पश्यत्ये(१)षा वै देवानां विक्रान्तिर्यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते देवानामेव विक्रान्तिमनु वि क्रमत एष वै देवयानः पन्था यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते

५ अङ्गापरूꣳषीत्यङ्गा - परूꣳषि। एव। संवत्सरस्येति सं - वत्सरस्य। प्रतीति। दधाति। एते इति। वै। संवत्सरस्येति सं - वत्सरस्य। चक्षुषी इति। यत्। दर्शपूर्णमासाविति दर्श - पूर्णमासौ। यः। एवम्। विद्वान्। दर्शपूर्णमासाविति दर्श - पूर्णमासौ। यजते। ताभ्याम्। एव। सुवर्गमिति सुवः—गम्। लोकम्। अन्विति। पश्यति (१)। एषा। वै। देवानाम्। विक्रान्तिरिति वि - क्रान्तिः। यत्। दर्शपूर्णमासाविति दर्श - पूर्णमासौ। यः। एवम्। विद्वान्। दर्शपूर्णमासाविति दर्श - पूर्णमासौ।
१० यजते। देवानाम्। एव। विक्रान्तिमिति वि - क्रान्तिम्। अनु। वीति। क्रमते। एषः। वै। देवयान इति देव - यानः। पन्थाः। यत्। दर्शपूर्णमासाविति दर्श - पूर्णमासौ। यः। एवम्। विद्वान्। दर्शपूर्णमासाविति दर्श - पूर्णमासौ। यजते।

[v]अङ्गापरुꣳषि अङ्गानि च परूंषि पर्वाणि च संवत्सरस्थितिहेतुत्वात्। "परादिश्छन्दसि°" (पा ६·२·१९९) इत्युत्तरपदाद्युदात्तत्वम्। प्रतिधानम् [३]अविचलितस्थापनम्॥

१५ संवत्सरनिबन्धनाश्च सर्वेऽर्थाः। संवत्सरात्मनः चक्षुःस्थानीयाख्यां साक्षादव्यवधानेन स्वर्गम् अनुक्रमेण [v]पश्यति स्वर्गोऽस्य प्रकाशितो भवति।

[v]विक्रान्तिः विशिष्टं क्रमणम्। आभ्यां देवा हि विक्रमवन्तो वीरा भवन्ति धारकत्वात् तेषाम्। अनु वि क्रमते इति। यत्रयत्र देवा विक्रमन्ते तत्रतत्रायमप्रतिबन्धेन [v]विक्रमते।

संवत्सरस्य प्रति दधाति'। यथा मनुष्यस्य हस्तपादादीन्यङ्गानि मणिबन्धकूर्परकक्षादिसंधिरूपाणि परूंषि
२० पर्वाणि तथा [v]संवत्सरस्य द्वादश दर्शा अङ्गानि दादश पौर्णमास्यः परूंषि, तद्विदित्वा [८]-अनुष्ठाने तदुभयं-[८] प्रति [v]दधाति [९]सम्यगनुष्ठापयति॥

एत इति॥ अथ चक्षुष्ट्वेन प्रशंसति– 'एते वै संवत्सरस्य चक्षुषी यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते ताभ्यामेव सुवर्गं लोकमनु पश्यति' इति॥

एषेति॥ अथ [१०]पराक्रमरूपेण प्रशंसति– 'एषा वै देवानां विक्रान्तिर्यद्दर्शपूर्णमासौ य एवं
२५ विद्वान् दर्शपूर्णमासौ यजते देवानामेव विक्रान्तिमनु वि क्रमते' इति॥ 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इति शाखान्तरे श्रुतत्वात् युद्धजयहेतुत्वमप्यस्तीति [११]पराक्रमरूपत्वम्॥

३. तं३– °स्थानम्।

८–८. जो.ना – अनुष्ठानेन तदुभये; अ.इ.उ.ड.पा.हा.हे१ – अनुष्ठाने तदुभये। ९. शृ–
सम्यगवस्थापयति। १०. आ.क.हा– इन्द्रपरा°; अ.इ.उ.पा– इन्द्रं परा°; जो.ना– इदं परा°। ११. अ.
३० इ.उ.जो.ना.पा.हा–पराक्रमहेतुत्वं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दर्शपूर्णमासयोः सोमयागेन सह पौर्वापर्यम्]

य एव देवयानः पन्थास्तꣳ समारोहत्येतौ वै देवानाꣳ हरी यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते यावेव देवानाꣳ हरी ताभ्यां(२)मेवैभ्यो हव्यं वहत्येतद्वै देवानामास्यं यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते

यः । एव । देवयान इति देव - यानः । पन्थाः । तम् । समारोहतीति सम् - आरोहति । एतौ । वै । देवानाम् । हरी इति । यत् । दर्शपूर्णमासाविति दर्श - पूर्णमासौ । यः । एवम् । विद्वान् । दर्शपूर्णमासाविति दर्श - पूर्णमासौ । यजते । यौ । एव । देवानाम् । हरी इति । ताभ्याम् (२) । एव । एभ्यः । हव्यम् । वहति । एतत् । वै । देवानाम् । आस्यम् । यत् । दर्शपूर्णमासाविति दर्श - पूर्णमासौ । यः । एवम् । विद्वान् । दर्शपूर्णमासाविति दर्श - पूर्णमासौ । यजते ।

लक्षणेऽनोः कर्मप्रवचनीयत्वम् (पा १·४·९०) । " वृत्तिसर्गतायनेषु क्रमः " (पा १·३·३८) इति वृत्तावात्मनेपदम् । १०

देवयान इति ॥ देवा येन यान्ति स देवप्रयातो मार्गः [v]देवयानः । देवैः सदा मुक्तमार्ग एवेति ॥

देवा येन प्राप्यन्ते देवप्राप्तिहेतुत्वात् [v]हरी अश्वौ हविषां वाहनस्थानीयत्वात् ॥

आस्यमिति ॥ अभ्यवहर्तव्याधारत्वात् । [v]साक्षात् अव्यवधानेन [v]देवानाम् [v]आस्ये हुतं भवति ॥ १५

हविर्धानी ॥ सोमस्य हविराधारदर्शपूर्णमासवत्त्वात् [v]दर्शपूर्णमासयाजी [v]हविर्धानी । [v-]किं च[-v]– यदयं [v]सायंप्रातः [v]अग्निहोत्रं [v]जुहोति [v]दर्शपूर्णमासौ एव [v]अहरहः [v]यजते, तस्मादयं

एष इति ॥ अथ [१२]स्वर्गमार्गत्वेन प्रशंसति– ' एष वै देवयानः पन्था यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते य एव देवयानः पन्थास्तꣳ समारोहति ' इति ॥ देवा यान्ति गच्छन्ति [१३]यस्मिन् मार्गे सोऽयं [v]देवयानः ॥ २०

एताविति ॥ अथाश्वरूपेण प्रशंसति– ' एतौ वै देवानाꣳ हरी यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते यावेव देवानाꣳ हरी ताभ्यामेवैभ्यो हव्यं वहति ' इति ॥ [v]एभ्यः अग्न्यादिदेवेभ्यः [v]ताभ्याम् [v]एव दर्शपूर्णमासाभ्यां यजमानः पुरोडाशं [v]वहति ॥

एतदिति ॥ अथ देवमुखत्वेन प्रशंसति– ' एतद्वै देवानामास्यं यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते साक्षादेव देवानामास्ये जुहोति ' इति ॥ [१४v]साक्षात् व्यवधानमन्तरेण [v]एव, यथा २५ ब्राह्मणाय दत्तमन्नं पात्रहस्तव्यवधानेन मुखं [१५-]प्रविशति, तद्वन्नेत्यर्थः[-१५] ॥

४–४. तं३– ' किं च ' नास्ति ।

१२. अ.इ.उ.जो.पा.हा– स्वर्गत्वेन; ड.शृं.हो१– स्वर्गलोकमार्गत्वेन । १३. आ.क.ड– अस्मिन् । १४. शृं– साक्षादेव । १५–१५. हो१– प्रतिदिशन्ति तद्वन्न भवतीत्यर्थः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

साक्षादेव देवानामास्ये जुहोत्येष वै हविर्धानी यो दर्शपूर्णमासयाजी सायंप्रातरग्निहोत्रं जुहोति यजते दर्शपूर्णमासावहरहर्हविर्धानिनाꣳ सुतो य एवं विद्वान् दर्शपूर्णमासौ यजते हविर्धान्यस्मीति सर्वमेवास्य बर्हिष्यं दत्तं भवति

साक्षादिति स - अक्षात्। एव। देवानाम्। आस्ये। जुहोति। एषः। वै। हविर्धानीति हविः– धानी। यः। दर्शपूर्णमासयाजीति दर्शपूर्णमास - याजी। सायंप्रातरिति सायं - प्रातः। अग्निहोत्रमित्यग्नि - होत्रम्। जुहोति। यजते। दर्शपूर्णमासाविति दर्श - पूर्णमासौ। अहरहरित्यहः– अहः। हविर्धानिनामिति हविः– धानिनाम्। सुतः। यः। एवम्। विद्वान्। दर्शपूर्णमासाविति दर्श - पूर्णमासौ। यजते। हविर्धानीति हविः– धानी। अस्मि। इति। सर्वम्। एव। अस्य। बर्हिष्यम्। दत्तम्। भवति।

[V]हविर्धानिनां [V]सुतः अपि हविर्धानीभिः सुन्वानैः अनुज्ञातः। हविर्धानित्वं पर्वणि पर्वणि असुन्वानत्वमस्यानुमन्यते। पर्वणि सुन्वानः अहरहर्दर्शपूर्णमासयाजी भवति ॥

य एवमित्यादि ॥ [V]एवं [V]हविर्धानी [V]अस्मि [V]इति [V]विद्वान् [V]यः एतौ [V]यजते [V]अस्य संबन्धि यत् [V]दत्तं यावान् कश्चिदस्य धनव्ययः स सर्वो बर्हिषि यज्ञे विनियुक्तो [V]भवति। सहविर्धानत्वात् सर्वो व्ययो यज्ञे व्ययो भवतीति ॥

एष इति ॥ अथ सोमयाजित्वसंपादनेन [16]स्तौति– 'एष वै हविर्धानी यो दर्शपूर्णमासयाजी सायंप्रातरग्निहोत्रं जुहोति यजते दर्शपूर्णमासावहरहर्हविर्धानिनाꣳ सुतो य एवं विद्वान् दर्शपूर्णमासौ यजते हविर्धान्यस्मीति सर्वमेवास्य बर्हिष्यं दत्तं भवति' इति ॥ हवींषि सोमग्रहरूपाणि [17]धीयन्त आसाद्यन्ते यस्मिन् मण्डपे तदिदं हविर्धानं, तदस्यास्तीति [V]हविर्धानी सोमयाजी। दर्शपूर्णमासयाजिनः सोमयाजित्वं कथमिति [18]तदुच्यते– आधानानन्तरमेव [19]प्रवृत्तं यत् [V]अग्निहोत्रं तत्प्रतिदिनं [V]सायंप्रातः [V]अनुतिष्ठति, पर्वणि पर्वणि च [V]दर्शपूर्णमासौ [V]यजते। तदुभयानुष्ठानेन [V]हविर्धानिनां सोमदेवानां प्रतिदिनं सोमोऽभिषुतो भवति। [20]सोमाभिषवेण या प्रीतिः सा देवानामत्र संपद्यते। [21]अग्निहोत्रदर्शपूर्णमासप्रवृत्त्या तदनन्तरभाविनि सोमयागेऽपि प्रवर्तिष्यत [22]इत्येवं तैर्निश्चेतुं शक्यत्वात् ॥ तत्प्रवृत्तिक्रमश्च [23]सूत्रकारेण दर्शितः– "अथैकेषाम्-अग्नीनाधाय हस्तावनिज्य संवत्सरमग्निहोत्रं [24]हुत्वा दर्शपूर्णमासावारभते। ताभ्यां संवत्सरमिष्ट्वा सोमेन पशुना वा यजते। तत ऊर्ध्वमन्यानि कर्माणि [25]कुरुते" (आपश्रौ ५·२३·२) इति। [V]यः यजमानः [V]एवं देवानां भविष्यत्सोमयागविषयां प्रीतिं [V]विद्वान् अहं [V]हविर्धानी सोमयाजी भवामि [V]इति बुद्ध्वा [V]दर्शपूर्णमासौ [V]यजते, [26V]अस्य यजमानस्य बर्हिषि सोमयागे दातव्यं [27]यद्यद्विद्यते तत् [V]सर्वं [28V]बर्हिष्यं [V]दत्तम् [29V]एव

१६. क.ड.श्रं.हो१– प्रशंसति। १७. श्रं.हो१– निधीयन्ते। १८. आ– उच्यते। १९. अ.इ.उ.जो पा– प्रयुक्तं वृत्तं; हा– प्रत्युक्तं वृत्तं। २०. आ.क– °भिषवणे। २१. क– °मासप्रवृत्तौ। २२. आ.क– इत्येव। २३. ड.हो१– सूत्रकृता। २४. अ.इ.उ.जो.ना.पा.हा– 'हुत्वा' नास्ति। २५. हो१–कुर्वते। २६. आ.क–तत ऊर्ध्वमस्य। २७. ड– यद्धविः। २८. अ.इ.उ.जो.ना.पा.हा– 'बर्हिष्यं' नास्ति। २९. आ.क– 'एव' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दर्शपूर्णमासयोः सोमयागेन सह पौर्वापर्यम्]

देवा वा अहर्(३)र्यज्ञियं नाविन्दन् ते दर्शपूर्णमासावपुनन् तौ वा एतौ पूतौ मेध्यौ यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते पूतावेवैनौ मेध्यौ यजते नामावास्यायां च पौर्णमास्यां च स्त्रियमुपेयाद्यदुपेयान्निरिन्द्रियः स्यात्

देवाः । वै । अहः (३) । यज्ञियम् । न । अविन्दन् । ते । दर्शपूर्णमासाविति दर्श - पूर्णमासौ । अपुनन् । तौ । वै । एतौ । पूतौ । मेध्यौ । यत् । दर्शपूर्णमासाविति दर्श - पूर्णमासौ । यः । एवम् । विद्वान् । दर्शपूर्णमासाविति दर्श - पूर्णमासौ । यजते । पूतौ । एव । एनौ । मेध्यौ । यजते । न । अमावास्यायामित्यमा - वास्यायाम् । च । पौर्णमास्यामिति पौर्ण - मास्याम् । च । स्त्रियम् । उपेति । इयात् । यत् । उपेयादित्युप - इयात् । निरिन्द्रिय इति निः– इन्द्रियः । स्यात् ।

देवा वा इत्यादि ॥ [५-५]यज्ञाहं [५]यज्ञियम्[-५] । " यज्ञत्विग्भ्यां घखञौ " (पा ५·१·७१)। दर्शपूर्णमासाविति । कालवचनाविमाविदानीम् । य एवमिति । एवं वेदितुरेव एतौ [६V]पूतौ भवतः ॥ १०

[३०V]भवति ॥ [३१]स्वल्पेऽपि [३२]कर्मण्यधिककर्मसंपादनवेदनेन फलाधिक्यप्राप्तिः पूर्वकाण्डे– " प्रजापतिर्यज्ञान-सृजत " (तैसं १·६·९) इत्यनुवाके प्रपञ्चिता ॥

देवा इति ॥ अथ दर्शपूर्णमासकर्मणोस्तिथिविषयविधिमर्थवादेनोन्नयति– ' देवा वा अहर्यज्ञियं नाविन्दन् ते दर्शपूर्णमासावपुनन् तौ वा एतौ पूतौ मेध्यौ यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते पूतावेवैनौ मेध्यौ यजते ' इति ॥ एतौ दर्शपूर्णमासौ, यज्ञावर्हतीति [५]यज्ञियं, तादृशमेकमपि [५]अहः [५]देवाः [३३-५]न [५V]अविन्दन्[-३३] न लेभिरे । ततो विचार्य [६]दर्शपूर्णमासौ अमावास्यां पौर्णमासीं च दिनद्वयम् [६]अपुनन् शोधितवन्तः [३४]यज्ञियं निश्चितवन्त इत्यर्थः । यस्मिन् दिने सूर्य एव दृश्यते चन्द्रमास्तु [३५]लेशतोऽपि न दृश्यते सोऽयं दर्शः । अमावास्या च तादृशी । तस्यां तिथौ सूर्येण सहैव वसतश्चन्द्रमसो द्रष्टुमशक्यत्वात् । अतः सा तिथिः [३६-]सूर्यमात्रदर्शनात् दर्शनामाङ्कितस्य कर्मणो योग्या[-३६] । यस्यां तिथौ चन्द्रमण्डलं संपूर्णं दृश्यते सा पौर्णमासी । सा चन्द्रमसः पूर्तेः पूर्णनामाङ्कितस्य कर्मणो योग्या । प्रतिपदादिषु चतुर्दश्यन्तासु तिथिषु चन्द्रमा लेशतो दृश्यते न [३७-]तु संपूर्णः[-३७] नाप्यत्यन्तमदृष्टः । अतस्तयोः कर्मणोर्योग्या न भवन्ति । तस्मात् [६]तौ एव [६]एतौ उक्तौ तिथिविशेषौ देवैरुक्तरीत्या शोधितौ सन्तौ यज्ञयोग्यौ संपन्नौ । अत्र दर्शपूर्णमासशब्दस्तिथिपरो न [३८]तु कर्मपरः । [५V]यः तु [६V]एवं तिथ्योः शुद्धिं [६]विद्वान् कर्मद्वयं कुरुते सोऽयं शोधितौ यज्ञयोग्यौ तिथिविशेषावेव प्राप्य कृतवान् भवति । तस्मात् तयोस्तिथ्योः कुर्यादिति तात्पर्यार्थः ॥

नेति ॥ प्रसङ्गात् पुरुषार्थं कंचिन्नियमं विधत्ते– ' नामावास्यायां च पौर्णमास्यां च स्त्रियमुपेयाद्यदुपेयान्निरिन्द्रियः स्यात् ' इति ॥

५–५. मै४– यज्ञियं यज्ञार्हम् । ६. तं३– पूर्वेण ।

३०. अ.इ.उ.जो.ना.पा.हा – ' भवति ' इत्यस्यानन्तरं ' बर्हिष्यं ' । ३१. हो१ – सत्त्वेऽपि । ३२. अ.इ.उ.जो.ना.पा.हा – °संपादनं वेदनेन । ३३–३३. आ– ' न अविन्दन् ' नास्ति । ३४ आ.क– यज्ञियत्वं । ३५. आ.क– ' लेशतोऽपि ' नास्ति । ३६–३६. ड– सूर्यनामाङ्कितस्य कर्मणो योग्यता; हो१– सूर्यदर्शनामाङ्कितस्य कर्मणः योगतः; शृं– सूर्यमात्रे दर्शनामाङ्कितस्य कर्मणः योग्या । ३७. आ.क– पूर्णः । ३८. आ.क– ' तु ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन् तासाममावास्यां च पौर्णमासीं च नोपैत्(४)ते एनमभि समनह्येतां तं यक्ष्म आर्छद्राजानं यक्ष्म आरदिति तद्राज-यक्ष्मस्य जन्म यत् पापीयानभवत् तत् पापयक्ष्मस्य यज्जायाभ्यामविन्दत् तज्जाये-न्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एते एव
५ नमस्यन्नुपाधावत् ते अब्रूतां वरं वृणावहा आवं देवानां भागधे असाव(५)वदधि

सोमस्य । वै । राज्ञः । अर्धमासस्येत्यर्ध - मासस्य । रात्रयः । पत्नयः । आसन् । तासाम् । अमावास्यामित्यमा - वास्याम् । च । पौर्णमासीमिति पौर्ण - मासीम् । च । न । उपेति । ऐत् (४) । ते इति । एनम् । अभि । समिति । अनह्येताम् । तम् । यक्ष्मः । आर्छत् । राजानम् । यक्ष्मः । आरत् । इति । तत् । राजयक्ष्मस्येति राज - यक्ष्मस्य । जन्म । यत् । पापीयान् ।
१० अभवत् । तत् । पापयक्ष्मस्येति पाप - यक्ष्मस्य । यत् । जायाभ्याम् । अविन्दत् । तत् । जायेन्यस्य । यः । एवम् । एतेषाम् । यक्ष्माणाम् । जन्म । वेद । न । एनम् । एते । यक्ष्माः । विन्दन्ति । सः । एते इति । एव । नमस्यन् । उपेति । अधावत् । ते इति । अब्रूताम् । वरम् । वृणावहै । आवम् । देवानाम् । भागधे इति भाग - धे । असाव (५) । आवत् । अधीति ।

नामावास्यायां चेति ॥ गतम् ॥ रात्रय इति ॥ पञ्चदश तिथयः । ᵛपत्नयः इति छान्दसो
१५ वर्णविकारः । अभि समनह्येतामिति । सोमेन राज्ञा अनुपेते त्यक्ते एते तिथी ᵛएनम् अभिभूय आभिमुख्येन वा भोक्तृत्वेन गृहीतवत्यौ । ततः ᵛतं तथा ताभ्यां भुज्यमानं ᵛयक्ष्मः क्षयरोगः ᵛᵛआर्छत् आर्तमकरोत् ॥ राजानं यक्ष्म आरदित्यादि । व्याख्यातम् । अमावास्यायामिति शेषः ॥

स एते इत्यादि ॥ गतम् । भागधे इति । भागानां हविषां धात्र्यौ आवाम् ᵛअसाव । भवाव । [८-८]ᵛआवत् ᵛअधि आवयोरेव उपरिष्टात्[८-८] ᵛदेवाः ᵛइज्यान्ता ᵛइति । [९]पूर्ववल्लेटि
२० ऐकारादि[९] । तस्मादित्यादि ॥ गतम् ॥

भूतानीत्यादि ॥ सर्वाणि ᵛभूतानि ᵛक्षुधं बुभुक्षां घ्नन्ति तदुपघातहेतुभिरुपशमयन्ति । ᵛसद्यः समानेऽह्नि एकस्मिन्नहनि सकृदुपघातहेतुशमनं कृत्वा क्षुधं हन्ति । ᵛअर्धमासे ᵛदेवाः

सोमस्येति ॥ पूर्वोक्तयोस्तिथ्योर्यज्ञियत्वमाख्यायिकया प्रपञ्चयति– ' सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन् तासाममावास्यां च पौर्णमासीं च नोपैत् ते एनमभि समनह्येतां तं यक्ष्म आर्छद्राजानं
२५ **यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत् पापीयानभवत् तत् पापयक्ष्मस्य यज्जायाभ्यामविन्दत् तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एते एव नमस्यन्नुपाधावत् ते अब्रूतां वरं वृणा-वहा आवं देवानां भागधे असावाऽऽवदधि देवा इज्यान्ता इति तस्मात् सदृशीनाꣳ रात्रीणाममावास्यायां च पौर्णमास्यां च देवा इज्यन्त एते हि देवानां भागधे भागधा अस्मै मनुष्या भवन्ति य एवं वेद ' इति ॥**

७. तं३– आगच्छत् । ८–८. मै४– आवयोरेव अधि उपरि । ९. तं३.मै.लं–पूर्ववत् लेट् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवा इज्यान्ता इति तस्मात् सदृशीनाꣳ रात्रीणाममावास्यायां च पौर्णमास्यां च देवा इज्यन्त एते हि देवानाꣳ भागधे भागधा अस्मै मनुष्या भवन्ति य एवं वेद भूतानि क्षुधमघ्नन्त्सद्यो मनुष्या अर्धमासे देवा मासि पितरः संवत्सरे वनस्पतयस्तस्मादहरहर्मनुष्या अशनमिच्छन्तेऽर्धमासे देवा इज्यन्ते मासि पितृभ्यः क्रियते संवत्सरे वनस्पतयः फलं (६) गृह्णन्ति य एवं वेद हन्ति क्षुधं भ्रातृव्यम् ॥(६)॥ ५

[पश्यति ताभ्यामहरैदसाव् फलꣳ सप्त च ।]

देवाः । इज्यान्ते । इति । तस्मात् । सदृशीनाम् । रात्रीणाम् । अमावास्यायामित्यमा - वास्यायाम् । च । पौर्णमास्यामिति पौर्ण - मास्याम् । च । देवाः । इज्यन्ते । एते इति । हि । देवानाम् । भागधे इति भाग - धे । भागधा इति भाग - धाः । अस्मै । मनुष्याः । भवन्ति । यः । एवम् । वेद । भूतानि । क्षुधम् । अघ्नन् । सद्यः । मनुष्याः । अर्धमास इत्यर्ध - मासे । देवाः । मासि । १०
पितरः । संवत्सर इति सं - वत्सरे । वनस्पतयः । तस्मात् । अहरहरित्यहः– अहः । मनुष्याः । अशनम् । इच्छन्ते । अर्धमास इत्यर्ध - मासे । देवाः । इज्यन्ते । मासि । पितृभ्य इति पितृ - भ्यः । क्रियते । संवत्सर इति सं - वत्सरे । वनस्पतयः । फलम् (६) । गृह्णन्ति । यः । एवम् । वेद । हन्ति । क्षुधम् । भ्रातृव्यम् ॥ ६ ॥ [मैसं ...कासं ... कपिसं ...]

क्षुधं घ्नन्ति हविर्भिर्यागप्रभवैः । [v]मासि [v]पितरः श्राद्धेन । [v]वनस्पतयः [v]संवत्सरे फलग्रहणेन १५
तृप्ताः क्षुधं घ्नन्ति । [v]तस्मात् पर्वणिपर्वणि यष्टव्या देवा इति ॥

इति द्वितीये पञ्चमे षष्ठोऽनुवाकः ॥

[v]अर्धमासस्य शुक्लपक्षस्य [v]रात्रयः एको वर्गः, कृष्णपक्षस्य रात्रयः [३९]अपरो वर्गः । [v]ते अमावास्यापौर्णमास्यौ [v]एनं सोमम् [v]अभि [v]समनह्येताम् आभिमुख्येन संभोगाय गृहीतवत्यौ। बलात्कारेण [४०]भुज्यमानं [v]तं सोमम् अतिव्यवायेन क्षयव्याधिः प्राप्तवान्। एतच्च "प्रजापतेस्त्रयस्त्रिꣳशद्दुहितर [४१]आसन्" (तैसं २.३.५) १०
इत्यत्र [४२]यथा व्याख्यातं, [४३-]तद्वदत्रापि व्याख्यातव्यम्[-४३] । आवामुभे एव [v]देवानां हविर्भागधारिण्यौ भवाव, [४४]आवयोरधिश्रित्यान्यादयो [v]देवाः इज्यन्ताम् [v]इति अनयोर्वरः । एतयोर्भागधारित्वं जानते। [v]मनुष्याः सर्वेऽपि भागं धारयित्वा प्रयच्छन्ति ॥

भूतानीति ॥ अथ मनुष्यादिसाम्योपन्यासेनोक्तार्थमेव पुनः प्रशंसति– 'भूतानि क्षुधमघ्नन्त्सद्यो मनुष्या अर्धमासे देवा मासि पितरः संवत्सरे वनस्पतयस्तस्मादहरहर्मनुष्या अशनमिच्छन्तेऽर्धमासे देवा १५
इज्यन्ते मासि पितृभ्यः क्रियते संवत्सरे वनस्पतयः फलं गृह्णन्ति य एवं वेद हन्ति क्षुधं भ्रातृव्यम्' इति ॥
[v]भूतानि मनुष्याद्याः प्राणिनः । [v]वनस्पतयः [४५]पनसाम्राद्याः । तेषां फलग्रहणमेव क्षुन्निवारणरूपां तृप्तिं सूचयति । [४६-v]एवं क्षुधो हननं [v]यः[-४६] [v]वेद [४७]सोऽप्यन्नसमृद्धया क्षुद्रूपं शत्रुं सर्वदा [v]हन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ३०

३९. आ– परः । ४०. ड.हो१– नियुज्यमानं । ४१. आ.क– 'आसन्' नास्ति । ४२. आ. हा– 'यथा' नास्ति । ४३–४३. आ.क- तथैव व्याख्येयम् । ४४. ड– आवदधि श्रि° । ४५. ड.शृं.हो१– पनसचूताद्याः । ४६. शृं–य एतं क्षुधो हननं; ड–एवं क्षुधो हननं । ४७. आ–°समृद्धः; ड.शृं.हो१–सोऽन्न° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवा वै नर्चि न यजुष्यश्रयन्त ते सामन्नेवाश्रयन्त हिं करोति सामैवाकर्हिं करोति

देवाः । वै । न । ऋचि । न । यजुषि । अश्रयन्त । ते । सामन् । एव । अश्रयन्त । हिम् । करोति । साम । एव । अकुः । हिम् । करोति ।

अतः [1]परमग्निहोत्रस्य ब्राह्मणं प्राजामत्यमेव काण्डम् ॥ देवा वा इत्यादि ॥ [v]ऋचि [v]यजुषि च [v]न [v]अश्रयन्त नासेवन्त इति च स्तुतिः । यजनं च नानीयन्त [1-v]सामन् [v]एव [v]अश्रयन्त[1] । साम सान्त्वने । तस्मात् [v]हिं [v]करोति हिंकारं प्रयुङ्क्ते सामिधेनीनामनुवचनारम्भे

अनुवाकैः षड्भिरेतैराध्वर्यवमुदीरितम् ॥

अथोत्तरैरनुवाकैर्होत्रं विवक्षुरस्मिन् सप्तमेऽनुवाके [1]तदनन्तरभाविन्यष्टमे च सामिधेनीमन्त्रा व्याख्यायन्ते । ते च ब्राह्मणग्रन्थे तृतीयकाण्डे पञ्चमप्रपाठके समाम्नाताः । कल्पः(ल्पे) "पुरस्तात् सामिधेनीनाꣳ होता" इत्युपक्रम्य "अन्तराऽऽहवनीयमुत्करं च प्रतीचीनं गच्छन्नपति कं प्रपद्ये तं प्रपद्ये" इत्यादिकमुक्त्वा "सत्यं प्रपद्य इति वा" (आपश्रौ २४.११.१-२) इति पक्षान्तरमुक्तम् ॥ तत्पाठस्तु–"सत्यं प्रपद्ये । ऋतं प्रपद्ये । अमृतं प्रपद्ये । प्रजापतेः प्रियां तनुवमनातां प्रपद्ये । इदमहं पञ्चदशेन वज्रेण । द्विषन्तं भ्रातृव्यमव क्रामामि । योऽस्मान् द्वेष्टि । यं च वयं द्विष्मः । भूर्भुवः सुवः । हिम्" (तैब्रा ३.५.१) इति । सत्यं यथार्थभूतमिदं कर्म प्रपद्ये प्रारभे । अस्मिन् कर्मणि वाचिकोऽपराधो मा भूदित्यर्थः । मनसा [2]चिन्त्यमानमप्यृतं यथा भवति तथा प्रपद्ये । मानसोऽप्यपराधो मा भूदित्यर्थः । अमृतत्वहेतुभूतमिदं कर्म प्रपद्ये । अनेन कर्मणा देवत्वं प्राप्यतामित्यर्थः । देवेष्वप्यार्तिरहितां प्रजापतेः प्रियां तनुवं [3]प्रजापति-शरीरसदृशमिदं कर्म प्रपद्ये । इदमिति हस्तेनाभिनयः । अहं होता पञ्चदशस्तोमसदृशेन वज्ररूपेणानेन कर्मणा द्विषन्तं शत्रुमवष्टभ्य पीडयामि । यः शत्रुरस्मान् मनसा द्वेष्टि यं च शत्रुं वयं मनसा द्विष्मस्तमुभय-विधमवक्रामामीति पूर्वत्रान्वयः । भूर्भुवः सुवरित्येतन्नामका [4]लोकास्तान् हिनोमि प्रीणयामीत्यर्थः[5] ॥ कल्प– "व्याहृतीरुक्त्वा त्रिरभिहिंकृत्यानवानमभिहिंकारादचमुपसंदधाति प्र वो वाजा अभिद्यव इत्येकादशेमाः सामिधेन्यः" (द्र. बौश्रौ ३.२७) इति ॥ अनवानमनुच्छ्वसन् ॥ तत्र प्रथमायाः पाठस्तु–"प्र वो वाजा अभिद्यवः । हविष्मन्तो घृताच्या । देवाञ्जिगाति सुम्नयुः" (तैब्रा ३.५.२) इति । हे देवाः, वो युष्मदीया ऋत्विग्यजमानाः प्रवर्तन्ते । वाजा गमनशीला मासा अभिद्यवोऽभितः पूर्वपक्षरूपेणोत्तरपक्षरूपेण च दीप्यमाना अर्धमासा हविष्मन्तो हविर्भाजो देवाश्च घृताच्या यागसाधनभूतघृतप्रदया गवा सहानुकूलाः प्रवर्तन्तामित्यध्याहारः । [6-]किं चायं[-6] यज्ञो देवाञ्जिगाति प्राप्नोतु । यजमानस्य सुम्नयुः सुखेच्छुर्भवतु ॥

देवा इति ॥ [7-]यदुक्तं 'त्रिरभिहिंकृत्य[-7]' इति तदेतद्विधत्ते– 'देवा वै नर्चि न यजुष्यश्रयन्त ते सामन्नेवाश्रयन्त हिं करोति सामैवाकर्हिं करोति यत्रैव देवा अश्रयन्त तत एवैनान् प्र युङ्क्ते हिं करोति वाच एवैष योगो हिं करोति प्रजा एव तद्यजमानः सृजते' इति ॥ [v]देवाः पूर्वम् [v]ऋचि [v]न [v-8]अश्रयन्त [v]यजुषि अपि [v]न [8]अश्रयन्त न संतुष्टा इत्यर्थः । किं तु [9]सामनि[v] एव संतुष्टाः । ततः [v]हिम् इति शब्दमुच्चारयेत् ।

१. पं२.मै४– परमिष्टिहौत्रस्य । २–२. तं३.लं– समन्तो वा श्रयते, मै– सामन्येवाश्रयन्त ।

१. आ.क–°भाव्यष्टमे । २. ड–चिन्त्यमप्यृतं । ३. आ.क.ड–°शरीरमिदं । ४. क.ड.हो१–ये लोकास्तान् । ५. ड–'इत्यर्थः' नास्ति । ६–६. ड.शृं.हो१– 'किं च' नास्ति । ७.आ– यदेतदुक्तं त्रिर्हिंकरोति; ड– यदुक्तं त्रिभिरभिहिंकृत्य । ८. ड.शृं.हो१– आश्रिताः । ९. ड.हो१– साम्नैव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यत्रैव देवा अश्रयन्त तत एवैनान् प्र युङ्क्ते हिं करोति वाच एवैष योगो हिं करोति प्रजा एव तद्यजमानः सृजते त्रिः प्रथमामन्वाह त्रिरुत्तमां यज्ञस्यैव तद्बर्सं(१) नह्यत्यप्रस्रꣳसाय

यत्र। एव। देवाः। अश्रयन्त। ततः। एव। एनान्। प्रेति। युङ्क्ते। हिम्। करोति। वाचः। एव। एषः। योगः। हिम्। करोति। प्रजा इति प्र-जाः। एव। तत्। यजमानः। सृजते। ५
त्रिः। प्रथमाम्। अन्विति। आह। त्रिः। उत्तमामित्युत्-तमाम्। यज्ञस्य। एव। तत्।
बर्सम् (१)। नह्यति। अप्रस्रꣳसायेत्यप्र-स्रꣳसाय।

होता। हिनोति प्रीणयति वा सर्वमिति हिम्। हि गतौ, हिवि प्रीणने, ब्रह्मणो नामेदं, छान्दसी [3]रूपसिद्धिः। [v]साम [v]एव [v]अकः कृतं भवति, सामभक्तित्वाद्धिंकारस्य। छान्दसो लुङ्, "मन्त्रे घस°" (पा २·४·८०) इति च्लेर्लुक्। असकृद्विधानं हिंकारस्य फलभेदप्रदर्शनार्थम्। यत्रैवेति। १०
[v]यत्र स्थिताः [v]देवाः [v]ततः [v]एव [v]एनान् देवानानीय इह [v]प्रयुङ्क्ते॥

वाच इति॥ वाग्योगः खल्वयम्। [4]वाक् सामिधेनीलक्षणा अनेन युज्यते। प्रजा एवेति। *[-]एतेन हिंकारस्य पशव्यत्वमाह॥

त्रिः प्रथमामित्यादि॥ "प्र वो वाजाः" (तैब्रा ३·५·२) इत्याद्या एकादशर्चः। आद्यन्तयोः पुनर्वचनेन पञ्चदश सामिधेन्यः क्रियन्ते। तेन सामिधेनीनाम् आद्यन्तयोः अभ्यासेन १५
[v]यज्ञस्य [v]बर्सम् आवरणं [v]नह्यति बध्नाति। बृ आवरणे, औणादिकः सप्रत्ययः तत् यज्ञस्य अप्रस्रंसनाय भवति-*।

तेन [v]साम [v]एव कृतं भवति। [10-]पञ्चकृत्वः सप्तकृत्वो-[10] वा साम्न आदौ [11]हिंकारस्य विद्यमानत्वात्। तस्य हिमितिशब्दस्य त्रिरुच्चारणमभिप्रेत्य त्रिवारं विधिरनूद्य प्रशस्यते। [r]यत्र [r]एव [r]देवाः [r]अश्रयन्त यत्रैव सामनि देवा संतुष्टाः [r]ततः [r]एव साम्नः [r]एनान् देवान् [r]प्र [r]युङ्क्ते [12]होता हिंकुर्वन् प्रकर्षेण २०
तोषयतीत्यर्थः। प्रथमोच्चारणेन साम कृतं भवति। तथा द्वितीयोच्चारणेन [r]वाचः [r]योगः संपद्यते। सामाश्रयभूताया ऋग्रूपाया वाचः संबन्धः संपद्यत इत्यर्थः। तृतीयोच्चारणं यदस्ति तेन [r]यजमानः [r]प्रजाः [r]एव सृष्टवान् भवति॥

त्रिरिति॥ एकादशानां समिधेनीनाम् ऋचामाद्यन्तयोरावृत्तिं विधत्ते—'त्रिः प्रथमामन्वाह त्रिरुत्तमां यज्ञस्यैव तद्बर्सं नह्यत्यप्रस्रꣳसाय' इति॥ "प्र वो वाजा अभिद्यवः" (तैब्रा ३·५·२) इत्येषा २५
प्रथमा। "आ जुहोत दुवस्यत" (तैब्रा ३·५·२) इति वा, "त्वं वरुण उत मित्रः" (तैब्रा ३·५·२)

३. तं३.लं—रूपविधिः। ४. पं२—या; तं३.लं—वा। *—* [तं३.लं—'एतेन हिङ्कारस्य...भवति' नास्ति।]।

१०—१०. ड.हो१—पञ्चभक्तैः सप्तभक्तैः। ११. अ.इ.उ.जो.ना.पा.हा—हिंकारस्य' नास्ति। १२. हो१—होत्रा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संततमन्वाह प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै राथंतरीं प्रथमामन्वाह राथंतरो वा अयं लोक इममेव लोकमभि जयति त्रिर्वि गृह्णाति त्रय इमे लोका

संततमिति सं - ततम्। अन्विति। आह। प्राणानामिति प्र - अनानाम्। अन्नाद्यस्येत्यन्न - अद्यस्य। संतत्या इति सं - तत्यै। अथो इति। रक्षसाम्। अपहत्या इत्यप - हत्यै। राथंतरीमिति राथं - तरीम्। प्रथमाम्। अन्विति। आह। राथंतर इति राथं - तरः। वै। अयम्। लोकः। इमम्। एव। लोकम्। अभीति। जयति। त्रिः। वीति। गृह्णाति। त्रयः। इमे। लोकाः।

संततमिति ॥ पूर्वस्या उत्तरमर्धर्चम् उत्तरस्याश्च पूर्वं संहितं कुर्यात्। [५]प्रथमायां च हिंकारेण [६]मध्यमाया अर्धर्चमालभेत। न हिंकृत्येति केचित्। अविशेषात् सर्वेषां संततत्वम्। ऋचावन्तराऽनुच्छ्वासः संततत्वम्। श्रूयते—"नान्तरर्चौ व्यन्यात्" (द्र. आपश्रौ २४·११·१२-१३) इति। एकेनोच्छ्वासेनोच्चार्यैव क्रियमाणं [v]प्राणानाम् [v]अन्नाद्यस्य च अविच्छेदाय भवति। [v]अथो अपि च [v]रक्षसाम् [v]अपहत्यै भवति, सामिधेनीनाम् अनुच्छ्वासेन रक्षसामनुच्छ्वासः क्रियते इति। केचिदाहुः— प्रथमोत्तमयोरेवेदं संततत्वविधानमिति ॥

राथन्तरीमिति ॥ सामविशेषसंबन्धेन ऋचः स्तुतिः। रथन्तरसामसंबन्धिनी प्रथमा ऋक्, प्राथम्यात् द्वयोरुदात्तस्वरत्वाच्च। उत्सादित्वादञ्[७] (पा ४·१·८६)। [v]अयं [v]लोकः भूलोकः [v]राथन्तरः, स एव हेतुः ॥

इति वा द्वयोरन्यतरोत्तमा। [v]तत् तेन प्रथमोत्तमयोः [v]त्रिः अभ्यासेन [v]यज्ञस्य [v]बर्सम् [१३]अन्तभागं [v]नह्यति बध्नाति। यथा लोके वस्त्रेण कम्बलेन वा व्रीहीन् वोढुकामोऽन्तद्वयं बध्नाति तद्वत्। तच्च बन्धनं स्रंसनराहित्याय भवति ॥

संततमिति ॥ पूर्वस्यामृच्युत्तरार्धस्योत्तरस्यामृचि पूर्वार्धस्य च [१४]"परस्परमविश्लेषं विधत्ते- 'संततमन्वाह प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै' इति। तदेतत्संततोच्चारणं यजमानस्य [१५v]प्राणानां [v]संतत्यै [१६]भोज्यवस्तुसंतत्यै [१७]च संपद्यते। किं च राक्षसाः श्वासनिरोधेनापहता भवन्ति ॥

राथन्तरीमिति ॥ यस्याः प्रथमाया आवृत्तिर्विहिता तां स्वरूपेण विधत्ते- 'राथंतरीं प्रथमामन्वाह राथंतरो वा अयं लोक इममेव लोकमभि जयति' इति ॥ कस्मिंश्चित् सामशाखाविशेषे "प्र वो वाजाः" इत्येतस्यामृचि रथंतरसाम्नो गीतत्वादियं राथंतरी। [१८-]रथंतरसामयुक्तेन कर्मणा[-१८] संपादयितुं शक्यत्वाद्भूलोकस्य राथंतरत्वम् ॥

त्रिरिति ॥ यदुक्तं सूत्रकारेण- "तृतीयां सामिधेनीं त्रिर्विगृह्णाति" (आपश्रौ २४·११·९) इति, तदेतद्विधत्ते- 'त्रिर्वि गृह्णाति त्रय इमे लोका इमानेव लोकानभि जयति' इति ॥ तृतीयस्याः

---

५. मै४-प्रथमायाः। ६. मै४-मध्यमायाम्; तं३.लं-मध्यमया। ७. हो-'अञ्' नास्ति।

---

१३. आ- अन्तभागान्। १४. आ.क- परस्पराविश्लेषं। १५. ड- प्राण°। १६. क.ड. शृं.हो१-भोग्यवस्तु°। १७. शृं- भवति। १८-१८. शृं- रथन्तरसाम।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इमानेव लोकानभि जयति बार्हतीमुत्तमामन्वाह बार्हतो वा असौ लोकोऽमुमेव लोकमभि जयति प्र वो(२)वाजा इत्यनिरुक्तां प्राजापत्यामन्वाह यज्ञो वै प्रजापतिर्यज्ञमेव प्रजापतिमा रभते

इमान् । एव । लोकान् । अभीति । जयति । बार्हतीम् । उत्तमामित्युत् - तमाम् । अन्विति । आह । बार्हतः । वै । असौ । लोकः । अमुम् । एव । लोकम् । अभीति । जयति । प्रेति । वः (२) । वाजाः । इति । अनिरुक्तामित्यनिः– उक्ताम् । प्राजापत्यामिति प्राजा - पत्याम् । अन्विति । आह । यज्ञः । वै । प्रजापतिरिति प्रजा - पतिः । यज्ञम् । एव । प्रजापतिमिति प्रजा - पतिम् । एति । रभते ।

अस्याश्विर्विच्छेदो विग्रहः । तृतीयां [V]त्रिः [V]विगृह्णाति इत्येके । बार्हतीमिति ॥ " तं त्वा समिद्भिः " (तैब्रा ३·५·२) इति तृतीया तिसृणामुत्तमा । बृहच्छब्दोऽप्युत्सादिः । बृहत्साम- वत्त्वं पूर्ववत् संबन्धि, उभयोस्तृतीयत्वात् ।

अनिरुक्तामिति ॥ अस्पष्टदेवताकाम् अतः [V]प्राजापत्यां, नीचैःस्वरत्वाच्च बृहच्छब्द-संबन्धित्वाच्च । यज्ञात्मानं [V]प्रजापतिम् आदौ परिगृह्णाति । विशिष्टदेवतासंबन्धेन स्तुतिरेषा ।

अन्नं वै वाज इति । [C]वाजपदसंबन्धेन स्तुतिः ।

सामिधेन्याः प्रथमपादमुच्चार्य सकृद्विग्रहः कार्यः । अर्धं चैं द्वितीयो विग्रहः । तत [१९]उत्तरार्ध [२०]उपरितनमन्त्रस्य पूर्वार्धं च संयोज्य तदन्ते तृतीयो विग्रहः । एतेन विग्रहत्रयेण लोकत्रयजयो भवति ॥

बार्हतीमिति ॥ यस्यामृच्ययं त्रिविधो विग्रहस्तामृचं विधत्ते– ' बार्हतीमुत्तमामन्वाह बार्हतो वा असौ लोकोऽमुमेव लोकमभि जयति ' इति ॥ [२१]अस्यामृचि ' बृहच्छोचा यविष्ठ्य ' (तैब्रा ३·५·२) इति शब्दस्य श्रूयमाणत्वादियं बार्हती । सा च तृतीयेति कृत्वा प्रथममध्यमापेक्षयोत्तमा । तथा सति ' [V]उत्तमाम् [V]अन्वाह ' इत्युक्ते तृतीयात्वेन पठेदित्यर्थो भवति । एतन्मन्त्रोपेतकर्मसाध्यत्वात् स्वर्गलोकस्य बार्हतत्वम् ॥

प्रेति ॥ प्रथमायामृचि देवतादिविशेषाभिव्यक्त्यभावं प्रशंसति– ' प्र वो वाजा इत्यनिरुक्तां प्राजापत्यामन्वाह यज्ञो वै प्रजापतिर्यज्ञमेव प्रजापतिमा रभते ' इति ॥ कस्यापि देवविशेषस्य निरुक्तं नामविशेषकथनं तत्र नास्ति सेयमनिरुक्ता । प्रजापतिश्च सृष्टेः [२२]प्राग्रूपविशेषाभावादनिरुक्तः । अत इयं प्राजापत्या । [V]यज्ञः च प्रजापतिसृष्टत्वात् तत्स्वरूपः । तस्मात् प्राजापत्यमन्त्रस्य प्रथमपाठेन यज्ञरूपम् [V]एव [V]प्रजापतिं प्रारब्धवान् भवति ॥

---

८. तं२.लं.हो– वाजिनपद° ।

---

१९. इ.क.ड.ना.हो१ – उत्तरार्धम् । २०. ड – उपरितनस्य मन्त्रस्य । २१. आ.उ.जो– यस्यामृचि; अ.इ.क.ड.पा.हा.हो१– तस्यामृचि । २२. ड– प्राग्रूपावशिष्टाभा°; हो१– प्राग्रूपविशिष्टाभा° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्र वो वाजा इत्यन्वाहान्नं वै वाजोऽन्नमेवाव रुन्द्धे प्र वो वाजा इत्यन्वाह तस्मात् प्राचीनꣳ रेतो धीयतेऽग्न आ याहि वीतय इत्याह तस्मात् प्रतीचीः प्रजा जायन्ते प्र वो वाजा(३)इत्यन्वाह मासा वै वाजा अर्धमासा अभिद्यवो देवा हविष्मन्तो गौर्घृताची

प्रेति। वः। वाजाः। इति। अन्विति। आह। अन्नम्। वै। वाजः। अन्नम्। एव। अवेति। रुन्द्धे। प्रेति। वः। वाजाः। इति। अन्विति। आह। तस्मात्। प्राचीनम्। रेतः। धीयते। अग्ने। एति। याहि। वीतये। इति। आह। तस्मात्। प्रतीचीः। प्रजाः इति प्र-जाः। जायन्ते। प्रेति। वः। वाजाः (३)। इति। अन्विति। आह। मासाः। वै। वाजाः। अर्धमासा इत्यर्ध-मासाः। अभिद्यव इत्यभि-द्यवः। देवाः। हविष्मन्तः। गौः। घृताची।

प्राचीनमिति। उपसर्गविशेषसंबन्धेन स्तुतिः। प्रगतं ᵛप्राचीनम्। "*विभाषाऽञ्चेर-दिक्स्त्रियाम्" (पा ५·४·८) इति खः॥

'अग्न आ याहि' इति द्वितीया ऋक्॥ ᵛआयाहि ᵛइति वचनात् प्राचीनं निहितं रेतः †प्रतीचीनं-* प्रजात्वेन परिणतं निर्गच्छति। प्रतिकूलाः प्रतीच्यः। "वा छन्दसि" (६·१·१०६) इति पूर्वसवर्णदीर्घत्वम्। "चौ" (पा ६·३·१३८) इति पूर्वपदस्य दीर्घत्वम्, अन्तोदात्तत्वं च (पा ६·१·२२२)॥

मासा वा इत्यादि॥ मन्त्रपदानां सर्वेषां स्तुतिः। हे ऋत्विग्यजमानाः वाजादयो युष्माकम् अभिमतसिद्धये भवन्तु। ᵛवाजाः ᵛमासाः अन्नहेतवः; गतिमन्तो वा सर्वक्रियाणामाधाराः। ᵛअर्धमासाः ९-ᵛअभिद्यवः दिवसैरभिगतदीप्तित्वात्-९ साभिप्रायेण क्रियाप्रवर्तकाः। ᵛहविष्मन्तः

प्रेति॥ अस्मिन् मन्त्रे वाजशब्दोच्चारणं प्रशंसति– 'प्र वो वाजा इत्यन्वाहान्नं वै वाजोऽन्नमेवाव रुन्द्धे' इति॥

प्रेति॥ तथाऽत्र प्रशब्दोच्चारणं प्रशंसति– 'प्र वो वाजा इत्यन्वाह तस्मात् प्राचीनꣳ रेतो धीयते' इति॥ यस्मात् प्रशब्द उच्चारितः ᵛतस्मात् ᵛप्राचीनं प्रमुखे रेतोवर्तिनि योषिच्छरीरेऽञ्चति गच्छतीति प्राचीनं, तथाविधं ᵛरेतः ᵛधीयते गर्भाशये स्थाप्यते॥

अग्न इति॥ एतस्य मन्त्रस्य चरमपादेन २३सहोत्तरस्य मन्त्रस्य प्रथमपादोच्चारणं प्रशंसति– 'अग्न आ याहि वीतय इत्याह तस्मात् प्रतीचीः प्रजा जायन्ते' इति॥ यस्मात् 'आ याहि' इत्युक्तं ᵛतस्मात् ᵛप्रतीचीः प्रत्यङ्मुखाः सदृशाः ᵛप्रजाः उत्पद्यन्ते॥

प्रेति॥ २४-मन्त्रगतानां पदानामर्थान्-२४ दर्शयति– 'प्र वो वाजा इत्यन्वाह मासा वै वाजा अर्धमासा अभिद्यवो देवा हविष्मन्तो गौर्घृताची यज्ञो देवाञ्छिगाति यजमानः सुम्नयुः' इति॥ २५वजन्ति

- [तै३– 'विभाषाञ्चेरदिक् ..... रेतः प्रतीचीनम्' इति नास्ति।]।

†[संभावितोऽयं पाठः; मुद्रितपुस्तके लिखितपुस्तकेषु–'प्राचीनम्' इति।]। ९–९. तै३.लं.हो– 'अभिद्यवः दिवसैः' नास्ति।

२३. ड.श्रं. सहोत्तर°। २४–२४. ड– मन्त्रगतान् पदार्थान् २५. अ.इ.उ.जो.पा.हा–व्रजन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यज्ञो देवाञ्जिगाति यजमानः सुम्नयुरिदमसीदमसीत्येव यज्ञस्य प्रियं धामाव रुन्द्धे यं कामयेत सर्वमायुरियादिति प्र वो वाजा इति तस्यानूच्याग्न आ याहि वीतय इति संततमुत्तरमर्धर्चमा लभेत(४) प्राणेनैवास्यापानं दाधार सर्वमायुरेति

यज्ञः । देवान् । जिगाति । यजमानः । सुम्नयुरिति सुम्न - युः । इदम् । असि । इदम् । असि । इति । एव । यज्ञस्य । प्रियम् । धाम । अवेति । रुन्द्धे । यम् । कामयेत । सर्वम् । आयुः । इयात् । इति । प्रेति । वः । वाजाः । इति । तस्य । अनूच्येत्यनु - उच्य । अग्ने । एति । याहि । वीतये । इति । संततमिति सं - ततम् । उत्तरमित्युत् - तरम् । अर्धर्चमित्यर्ध - ऋचम् । एति । लभेत (४) । प्राणेनेति प्र - अनेन । एव । अस्य । अपानमित्यप - अनम् । दाधार । सर्वम् । आयुः । एति ।

[V]देवाः क्रियया आराध्याः । [V]घृताची घृतमञ्चतीति । घृतहेतुः [V]गौः हविःप्रदानेन क्रिया-प्रवृत्तिहेतुः । पूर्ववत् " चौ " (पा ६·३·१३८) इति दीर्घत्वम्, अन्तोदात्तत्वं च (पा ६·१·२२२)। सः [V]यज्ञः [V]देवान् [V]जिगाति गच्छति तृप्तिहेतुत्वेन । गाङ् गतौ, व्यत्ययेन परस्मैपदं, शपः श्लुः, अभ्यासस्य चेत्त्वम् (पा ७·४·७९) । [V]सुम्नयुः सुखमात्मन इच्छतीति सुम्नयुः [V]यजमानः फलभाक् । एवमेते यज्ञस्याधाराः । एभिस्ताद्रूप्येण [V]इदम् [V]असि [V]इदम् [V]असि [V]इति [10]अग्निं स्तुत्वा [V]यज्ञस्य [V]प्रियं [V]धाम स्थानं वाजादिकम् [V]अव [V]रुन्द्धे ॥

यम् इत्यादि ॥ एतेन प्रथमद्वितीययोः संतानस्य विशेषणात् [11]आयुर्हेतुत्वेन स्तुतिः क्रियते । ' प्र वो वाजाः ' इत्येताम् [V]अनूच्य [V]अस्या [V]उत्तरम् [V]अर्धर्चम् ' अग्न आ याहि वीतये '

(द्र. धापा २५२) गच्छन्ति क्रमेण प्रवर्तन्त इति चैत्रादिमासा [r]वाजाः । इदमेव ब्राह्मणवाक्यं हृदि निधाय मन्त्रार्थः पूर्वं दर्शितः ॥

इदमिति ॥ पदार्थानभिधाय मन्त्रतात्पर्यार्थमाह –' इदमसीदमसीत्येव यज्ञस्य प्रियं धामाव रुन्द्धे ' इति ॥ समिधेनीभिः समिध्यमान हेऽग्ने, त्वम् [r]इदं मासानां स्वरूपम् [r]असि, अर्धमासानां स्वरूपम् [r]असि देवानां स्वरूपमसि [r]इति [V]एव तात्पर्यार्थः । अनेन तात्पर्येण [V]यज्ञस्य [r]प्रियं [V]धाम आहुतिस्थानम् इध्यमानाग्निस्वरूपं संपादितवान् भवति ॥

यमिति ॥ यदुक्तं " संततमन्वाह [26]प्राणानामन्नाद्यस्य संतत्यै " इति, तदेवेदानीं काम्यत्वेनापि विधत्ते– ' यं कामयेत सर्वमायुरियादिति प्र वो वाजा इति तस्यानूच्याग्न आ याहि वीतय इति संततमुत्तरमर्धर्चमा लभेत प्राणेनैवास्यापानं दाधार सर्वमायुरेति ' इति ॥ [V]यं यजमानमुद्दिश्य होता [V]कामयेत । किमिति? अयं यजमानः [27]अपमृत्युरहितः [r]सर्वम् [r]आयुः प्राप्नुयात् [r]इति । [r]तस्य यजमानस्याऽऽयुष्प्राप्तये

१०. मै– यज्ञम् । ११–११. मै४– प्रयोगहेतुत्वेन; तं३.लं–प्रायोहेतुत्वेन ।

२६. अ.इ.उ.जो.ना.पा.हा– ' प्राणानामन्नाद्यस्य ' नास्ति । २७. आ.ड– मृत्युरहितः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यो वा अरत्निꣳ सामिधेनीनां वेदारत्नावेव भ्रातृव्यं कुरुतेऽर्धर्चौ सं दधात्येष वा अरत्निः सामिधेनीनां य एवं वेदारत्नावेव भ्रातृव्यं कुरुत

यः। वै। अरत्निम्। सामिधेनीनामिति साम्-इधेनीनाम्। वेद। अरत्नौ। एव। भ्रातृव्यम्। कुरुते। अर्धर्चावित्यर्ध-ऋचौ। समिति। दधाति। एषः। वै। अरत्निः। सामिधेनीनामिति साम्-इधेनीनाम्। यः। एवम्। वेद। अरत्नौ। एव। भ्रातृव्यम्। कुरुते।

(तैब्रा ३·५·२) इत्यनया [v]संततम् [v]आलभेत। ऋचोऽर्धमर्धर्चम्। "ऋक्पूः°" (पा ५·४·७४) इति समासान्तः। प्राणेनैवेति। [12]द्वयोः अर्धर्चयोः प्राणापानस्थानीयत्वात्। [v]दाधार इति छान्दसो लिट्, तुजादित्वादभ्यासस्य दीर्घत्वम् (पा ६·१·७)॥

'यो वा' इत्यादिना संतानस्य [13]फलान्तरं दर्शयति। समिधामाधानमन्त्राः सामिधेन्यः। "समिधामाधाने" (पा ४·३·१२० वा १०) इति धेण्यण् प्रत्ययः, "षिद्गौरादिभ्यश्च" (पा ४·१·४१) इति ङीष्, "यस्य°" (पा ६·४·१४८) इति लोपे "हलस्तद्धितस्य" (पा ६·४·१५०) इति यलोपः। तासाम् [14]अरत्निः [15]अरमणम्। नञ्पूर्वाद्रमेर्निप्रत्ययेऽन्त्यविकारः। यद्वा– अरणम् अरत्निः सामिधेनीनां गमनविशेषः। अर्तेरत्निप्रत्ययः। अथवा द्वौ प्रादेशौ संहितावरत्निः, प्रदेशस्थानीययोरर्धर्चयोः संधानम्। तावेवारत्निरित्युपचर्यते।

प्रथमां सामिधेनीं सर्वाम् [v]अनूच्य विच्छेदमकृत्वोत्तरमन्त्रस्य प्रथमम् [v]अर्धर्चम् उपक्रमेत। तेन सांतत्येन [v]अस्य यजमानस्य प्राणवायुना बहिर्निर्गच्छता सह [v]एव अपानवायुं पुनरप्यन्तरा गच्छन्तं धारितवान् भवति। तेन च धारणेन [v]सर्वम् आयुः प्राप्नोति॥

य इति॥ तदेव सांतत्यं पुनः प्रकारान्तरेण प्रशंसति– 'यो वा अरत्निꣳ सामिधेनीनां वेदारत्नावेव भ्रातृव्यं कुरुतेऽर्धर्चौ सं दधात्येष वा अरत्निः सामिधेनीनां य एवं वेदारत्नावेव भ्रातृव्यं कुरुते' इति॥ कूर्परमारभ्य प्रसारितकनिष्ठाङ्गुलिपर्यन्तो हस्तभागोऽरत्निः। न च तस्यारत्नेर्मध्ये विच्छेदोऽस्ति तद्वदुभयोः सामिधेन्योर्मध्ये सांतत्यमरत्नित्वेनोपचर्यते। [v]यः होता [24]तदिदं [25]सांतत्यं विदित्वाऽनुतिष्ठति स होता [v]भ्रातृव्यं यजमानस्य [v]अरत्नौ स्थापयति। चतुररत्निपरिमितस्य पुरुषस्यारत्निमात्रपरिमितो बालो यथा नीचो भवति तद्वदसुं कुरुत इत्यर्थः। [v]यः [v]एवं [v]वेद इति पुनरभिधानं प्रतिज्ञातस्य निगमनार्थम्॥

१२. तं३.लं.हो– द्वयोः अस्य। १३. मै४– फलान्तराणि। १४. तं३. लं–आर्तिः। १५. त्रि. पं२.हो– अरमणम् अविरमणं; लं– अरमणम् अपिरमणम्।

२८. हो१– तद्वदिदम्। २९. हा.हो१– सातत्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋषेर्ऋषेर्वा एता निर्मिता यत् सामिधेन्यस्ता यदसंयुक्ताः स्युः प्रजया पशुभिर्यजमानस्य वि तिष्ठेरन्नर्धर्चौ सं दधाति

ऋषेर्ऋषेरित्यृषेः— ऋषेः । वै । एताः । निर्मिता इति निः— मिताः । यत् । सामिधेन्य इति साम् - इधेन्यः । ताः । यत् । असंयुक्ता इत्यसं - युक्ताः । स्युः । प्रजयेति प्र - जया । पशुभिरिति पशु - भिः । यजमानस्य । वीति । तिष्ठेरन् । अर्धर्चावित्यर्ध - ऋचौ । समिति । दधाति । ५

प्रमाणलक्षणाद्वा [V]सामिधेनीनाम् उच्छ्वासप्रमाणं [V]यः [V]वेद इति । अरत्नाविति । संधानस्यारत्नि-शब्देनाभिधानस्येदं[१६] फलम् । अरमणे अरमणशीलत्वे प्रादेशद्वयपरिमितत्वे वा शत्रून् [V]कुरुते । कः पुनः स आसाम् [१७]अरत्निरित्याह—अर्धर्चाविति । यजमानव्यतिरिक्तवेदित्रर्थं 'य एवं वेद' इत्यादेः पुनर्वचनम् ।

ऋषीणां संबन्धिभ्य आविर्भूताः [१८V]एताः । [V]ताः यदि परस्परम् [V]असंयुक्ताः [V]स्युः तदा १० या एता ऋषिभ्यो गोत्रकृद्भ्यः [१९]भृग्वादिभ्य उत्पन्नाः प्रजाः पशवश्च; तैरपि सर्वैरेताः [V]वि [V]तिष्ठेरन् [२०]विश्लिष्टाः स्युः, [V]यजमानस्य प्रजापशुसिद्धिहेतवो न स्युरित्यर्थः । तस्मादर्धर्चसंधानेन

**ऋषेर्ऋषेरिति ॥ तदेव सांतत्यं [३०]विपक्षबाधकोपन्यासपुरःसरं [३१]पुनः प्रशंसति— 'ऋषेर्ऋषेर्वा एता निर्मिता यत् सामिधेन्यस्ता यदसंयुक्ताः स्युः प्रजया पशुभिर्यजमानस्य वि तिष्ठेरन्नर्धर्चौ सं दधाति सं युनक्त्येवैनास्ता अस्मै संयुक्ता अवरुद्धाः सर्वामाशिषं दुहे' इति ॥ [३२]ऋषिरतीन्द्रियार्थस्य द्रष्टा । तादृश १५ ऋषिरेकैकां सामिधेनीमीश्वरानुग्रहेण दृष्ट्वा तत्संप्रदायपरम्परां निर्मितवान् ॥ अत एव स्मर्यते— "युगान्ते-ऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः । लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा" (मभा १२.२०३.१७) इति ॥ तथा सति भिन्नेभ्य ऋषिभ्यः प्रवर्तिताः [V]ताः समिधेन्यः यदि [V]असंयुक्ताः भवेयुस्तदानीं [३३V]यजमानस्य [V]प्रजया [V]पशुभिः एताः सामिधेन्यः [V]वि [V]तिष्ठेरन् वियुक्तास्तिष्ठेयुः, प्रजापशुसमृद्धिहेतवो न भवेयुरित्यर्थः ।

१६. मै४— °शब्दाभिधानस्येदं । १७. लं. हो— अरत्निकेत्याह । १८. लं.हो— 'एताः' २० नास्ति । १९. लं.हो— 'भृग्वादिभ्यः' नास्ति । २०. लं.हो— विशिष्टाः ।

३०. क.ड.श्रृं.हो१— विपक्षबाधोप° । ३१. क— 'पुनः' नास्ति । ३२. ड— °तीन्द्रियस्य । ३३. अ.इ.उ.जो.ना.पा.हा— 'यजमानस्य' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सं (५) युनक्त्येवैनास्ता अस्मै संयुक्ता अवरुद्धाः सर्वामाशिषं दुहे ॥ ७ ॥
[बर्सं वो जायन्ते प्र वो वाजा लभेत दधाति सं दर्श च ।]

समिति (५)। युनक्ति। एव। एनाः। ताः। अस्मै। संयुक्ता इति सं-युक्ताः। अवरुद्धा इत्यव - रुद्धाः। सर्वाम्। आशिषमित्या - शिषम्। दुहे ॥ ७ ॥
[शत्रा १·४·१·१-२१]

एताः [V]संयुनक्ति। [V]ताः च संयुक्तवत्सा गाव इव गोष्ठे [V]अवरुद्धाः [V]अस्मै यजमानाय [V]सर्वाम् [V]आशिषम् अभिमतमर्थं [V]दुहे स्वयमेव दुहन्ते। कर्मकर्तरि "न दुहस्नुनमां°" (पा ३.१·८९) इति यगभावः, "बहुलं छन्दसि" (पा ७·१·८) इति [२१]रुट्, "लोपस्त आत्मनेपदेषु" (पा ७·१·४१) इति तलोपः, "अतो गुणे" (पा ६·१·९७) पररूपत्वम् ॥

[२२-]इति द्वितीये[-२२] पञ्चमे सप्तमोऽनुवाकः ॥

तत्परिहाराय पूर्वस्याः सामिधेन्या [३४]उत्तरार्धमुत्तरस्याः [३५]सामिधेन्याः [३६]पूर्वार्धं च संदध्यात्। तथा सति [३७r]एनाः सामिधेनीः संयोजितवानेव भवति। न चैवमेकस्यामपि सामिधेन्यां पूर्वोत्तरार्धचौ संधातव्याविति शङ्कनीयम्। तयोरेकर्षिप्रवर्तितत्वेन [३८]होतृप्रयुक्तसंधानमन्तरेणापि स्वरूपतो वियोगाभावात्। यथोक्तरीत्या [r]संयुक्ताः [r]ताः सामिधेन्यो यजमानाय [r]सर्वाम् [r]आशिषं [३९r]दुहे दुहन्ति संपादयन्ति ॥

[४०]अथ मीमांसा ॥ नवमाध्यायस्य प्रथमपादे चिन्तितम्—

"[४१-]त्रिरत्र किमृचो[-४१] धर्मः [४२]स्थानधर्मोऽथवाऽऽदिमः।
स्त्रीलिङ्गत्वान्न तत्प्रातिपदिकप्रबलत्वतः" ॥ (जैन्या ९·१·१४) ॥

दर्शपूर्णमासयोः सामिधेनीः प्रकृत्य श्रूयते- "त्रिः प्रथमामन्वाह" (तैसं २·५·७) इति। सोऽयं त्रिरभ्यास आदौ [४३]पठितस्य "प्र वो वाजाः" (तैब्रा ३·५·२) इत्यृग्विशेषस्य धर्मः। कुतः? 'प्रथमाम्' इत्यस्य [४४]पदस्य स्त्रीलिङ्गत्वात् ऋक्परत्वोपपत्तेरिति चेत्। नैतद्युक्तम्। स्त्रीलिङ्गवाचिनः [४५]टाप्-प्रत्ययादपि [४६]पूर्वं पठितस्य स्थानवाचिनः प्रथमेत्यस्य प्रातिपदिकस्य प्रबलत्वात्। अतो [४७]विकृतिष्वप्यन्यस्या अप्यृचः [४८]प्रथमस्थानपठितायास्त्रिरभ्यासः कर्तव्यः। स्थानान्तरे [४९]पठितायाः "प्र वो वाजाः" (तैब्रा ३·५·२) इत्यस्या अप्यृचो नाभ्यासः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

२१. तं३.मै- लट्; लं.हो- लुट्। २२. लं.हो- 'इति द्वितीये' नास्ति।

३४. क.ड.हो१- उत्तरार्धचं°। ३५. अ.इ.उ.पा.शृं.हा- 'सामिधेन्याः' नास्ति। ३६. ड.हो१-पूर्वार्धचम्। ३७ क.हा- एताः। ३८. ड.हो१- होतृप्रयुक्तं संधा°। ३९. अ.इ.उ.ड.पा.हो१- 'दुहे' नास्ति। ४०. ड-अत्र। ४१-४१. क.शृं.हो१- त्रिरनूक्तिर्ऋचो; ड- त्रिरनुक्ते ऋचो। ४२. ड.शृं- °धर्मो यथाग्रिमः। ४३. अ.उ.ड.ना.पा- प्रमितस्य; जो.हो१- प्रति(ती)तस्य। ४४. आ.ड- 'पदस्य' नास्ति। ४५.अ.इ.उ.जो.ना.पा.हा- स्त्रीप्रत्य°। ४६. ड- पूर्व°। ४७. क.हो१- विकृतिष्वन्य°। ४८. क.ड.शृं.हो१- प्रथमस्थाने पठि°। ४९. हो१- प्रतीतायाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामिधेनीमन्त्रव्याख्यानम्]

सप्तमे सामिधेन्याद्या व्याख्याताऽत्यन्तविस्तरात् ॥

[1]अथाऽष्टमेऽवशिष्टाः सामिधेन्यो व्याख्यायन्ते। तत्र द्वितीया सामिधेनी मन्त्रकाण्ड एव पठिता– "अग्न आ याहि वीतये। गृणानो हव्यदातये। नि होता सत्सि बर्हिषि" (तैब्रा ३·५·२) इति। हेऽग्ने, हव्यदातये यजमानस्य हविर्दानाय वीतये देवानां हविर्भक्षणाय गृणानो [2]यजमानो देवानां हविर्दास्यतीति भवद्भिर्भक्षणीयमिति वदन्नायाहि। आगत्य च होताऽऽह्वाता [3]भूत्वा बर्हिषि यज्ञे निषत्सि निषीद ॥ ५

तृतीयसामिधेनीपाठस्तु– "तं त्वा समिद्भिरङ्गिरः। घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य" (तैब्रा ३·५·२) इति। हेऽङ्गिरोऽग्ने, तं त्वा तादृशं देवानामाह्वातारं त्वां समिद्भिर्घृतेन च वर्धयामः। हे यविष्ठ्य युवतम, बृहत् ज्वालाधिक्यं यथा भवति तथा शोच दीप्यस्व ॥

[4]चतुर्थसामिधेनीपाठस्तु– "स नः पृथु श्रवाय्यम्। अच्छा देव विवाससि। बृहदग्ने सुवीर्यम्" (तैब्रा ३·५·२) इति। हेऽग्ने देव, स त्वं नोऽस्मदर्थं पृथु विस्तीर्णं श्रवाय्यं देवैः श्रोतुं योग्यमिदं कर्माच्छाभिमुखीकृत्य बृहत् सुवीर्यं च यथा भवति तथा विवाससि विभातं कुरु प्रकाशयेत्यर्थः। बृहच्छब्देन ज्वालाधिक्यं विवक्षितम्। सुवीर्यशब्देन हूयमानस्य हविषः सम्यग्दहनसामर्थ्यमुच्यते ॥ १०

पञ्चमसामिधेनीपाठस्तु– "ईडेन्यो नमस्यस्तिरः। तमाꣳसि दर्शतः। समग्निरिध्यते वृषा" (तैब्रा ३·५·२) इति। अयमग्निः सम्यगिध्यते। कीदृशः? ईडेन्यः स्तोतुं योग्यः, नमस्यो [5]नमस्कर्तुं योग्यः। तमांसि तिरस्कुर्वन् दर्शतः पदार्थानां [6]दर्शयिता, वृषा कामानां वर्षयिता ॥ १५

षष्ठसामिधेनीपाठस्तु– "वृषो अग्निः समिध्यते। अश्वो न देववाहनः। तꣳ हविष्मन्त ईडते" (तैब्रा ३·५·२) इति। अयमग्निः सम्यगिध्यते। कीदृशः? वृषः कामानां वर्षयिता। अश्वो न देववाहनोऽश्व इव देवार्थस्य हविषो वोढा। तमिममग्निं हविष्मन्तो यजमानाः स्तुवते ॥

सप्तमसामिधेनीपाठस्तु–"वृषणं त्वा वयं वृषन्। वृषाणः समिधीमहि। अग्ने दीद्यतं बृहत्" (तैब्रा ३·५·२) इति। हे वृषन्, [7]कामाभिवर्षकाग्ने, वृषणं कामानां [8]वर्षितारं त्वां वृषाणो वयमाहुतिवृष्टिं कुर्वन्तो वयं [9]समिधीमहि सम्यक् प्रकाशयामः। कीदृशं त्वां, बृहद्दीद्यतं प्रौढज्वालं यथा भवति तथा दीप्यमानम् ॥ २०

अष्टमसामिधेनीपाठस्तु– "अग्निं दूतं वृणीमहे। होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्" (तैब्रा ३·५·२) इति। इममग्निं वयं वृणीमहे प्रार्थयामहे। कीदृशम्? दूतं देवान् प्रति [10]प्रेषणार्हं होतारमाह्वातारं विश्ववेदसं विश्वान् सर्वान् देवान् वेत्तीति विश्ववेदास्तादृशम्। अस्य यज्ञस्य संबन्धिनं सुक्रतुं शोभनकर्माणम् ॥ २५

नवमसामिधेनीपाठस्तु– "समिध्यमानो अध्वरे। अग्निः पावक ईड्यः। शोचिष्केशस्तमीमहे" (तैब्रा ३·५·२) इति। योऽग्निरध्वरेऽस्मिन् कर्मणि समिध्यमानः पावकः शुद्धिहेतुरीड्यः स्तुत्यः शोचींषि दीप्तयः केशस्थानीया यस्यासौ शोचिष्केशस्तमग्निमीमहे प्राप्नुमः ॥

दशमसामिधेनीपाठस्तु– "समिद्धो अग्न आहुत। देवान् यक्षि स्वध्वर। त्वꣳ हि हव्यवाडसि" (तैब्रा ३·५·२) इति ॥ हे आहुताऽऽहुत्याराधिताग्ने, त्वं समिद्धः सन् देवान् यक्षि [11]यज। हे स्वध्वर सुष्ठुनिष्पादितयाग, हि यस्मात् त्वं हव्यवाडसि तस्माद्यजेत्यन्वयः ॥ ३०

---

१. अ.इ.उ.जो.ना.पा.हा– 'अथ' नास्ति। २. अ.इ.उ.जो.ना.पा.हा– 'यजमानो' नास्ति। ३. आ– भवन्। ४. हो१– °सामिधेन्याः पाठस्तु। ५. आ.ड– नमस्कार°। ६. आ– आदर्शयिता। ७. आ– कामानां वर्षकाग्ने; ड.हो– कामानां वर्षयितरग्ने। ८. ड.शृं.हो१– वर्षयितारं। ९. अ.इ.उ.जो.ना.पा.हा– सम्यगिधीमहि। १०. ड– प्रेरणार्थं; हो१– प्रेरणार्हम्। ११. आ– यजसि। ३५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अयज्ञो वा एष योऽसामाऽग्न आ याहि वीतय इत्याह रथंतरस्यैष वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह वामदेव्यस्यैष वर्णो बृहदग्ने सुवीर्यमित्याह बृहत एष वर्णो

अयज्ञः। वै। एषः। यः। असामा। अग्ने। एति। याहि। वीतये। इति। आह। रथंतरस्येति रथं-तरस्य। एषः। वर्णः। तम्। त्वा। समिद्भिरिति समित्-भिः। अङ्गिरः। इति। आह। वामदेव्यस्येति वाम-देव्यस्य। एषः। वर्णः। बृहत्। अग्ने। सुवीर्यमिति सु-वीर्यम्। इति। आह। बृहतः। एषः। वर्णः।

अयज्ञो वा इत्यादि॥ द्वितीयाप्रभृतेः ऋचः स्तुतिः क्रियते। रथन्तरस्येति। पूर्ववत् प्राथम्यादिना रथन्तरादिरूपत्वं तिसृणाम् ऋचाम्। "वामदेवाड्ड्यड्यौ" (पा ४·२·९)। बृहदग्न इति। बृहच्छब्दसंबन्धेन बार्हतत्वं दर्शयितुं तृतीयस्य पदस्योपादानम्॥

एकादशसामिधेनीपाठस्तु– "आजुहोत द्युवस्यत। अग्निं प्रयत्यध्वरे। वृणीध्वꣳ हव्यवाहनम्" (तैब्रा ३·५·२) इति। हे यजमानाः, [१२]इममग्निमाहुतिभिराजुहोत प्रीणयत, द्युवस्यत परिचरत, प्रयति प्रयत्नेन वर्तमानेऽस्मिन्नध्वरे यागे [१३]हव्यवाहनमग्निं वृणीध्वं प्रार्थयध्वम्। अनया सामिधेनीनां परिसमाप्यमानत्वादियं परिधानीया।

तत्र पुरुषभेदेनान्या परिधानीया [१४]विकल्प्यते। तथा च सूत्रकारः–"त्वं वरुण इति वसिष्ठराज्ञानां परिधानीया। आजुहोतेतीतरेषां गोत्राणाम्" (आपश्रौ २४·११·१५) इति॥ विकल्पितायाः पाठस्तु– "त्वं वरुण उत मित्रो अग्ने। त्वां वर्धन्ति मतिभिर्वसिष्ठाः। त्वे वसु सुषणनानि सन्तु। यूयं पात स्वस्तिभिः सदा नः" (तैब्रा ३·५·२) इति। हेऽग्ने, त्वमनिष्टनिवारकत्वाद्वरुण इष्टप्रापकत्वात् मित्रश्च। वसिष्ठगोत्रीया मतिभिर्मनीषाभिः स्तुतिभिः[१५]-त्वां वर्धन्ति वर्धयन्ति-[१५]। त्वे त्वयि वसु धनं सुषणनानि सुष्ठु दातव्यनि हवींषि च सन्तु तिष्ठन्तु। यूयं च नोऽस्मान् स्वस्तिभिः [१६]श्रेयोभिः [१७]-पात सदा-[१७] रक्षत। यूयमिति बहुवचनं पूजार्थम्॥

अयज्ञ इति॥ आसु सामिधेनीषु द्वितीयादिचतुर्थ्यन्तं तृचं प्रशंसति– 'अयज्ञो वा एष योऽसामाऽग्न आ याहि वीतय इत्याह रथंतरस्यैष वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह वामदेव्यस्यैष वर्णो बृहदग्ने सुवीर्यमित्याह बृहत एष वर्णो यदेतं तृचमन्वाह यज्ञमेव तत् सामन्वन्तं करोति' इति॥ दर्शपूर्णमासयोः सामानि न सन्ति तद्रहितश्च न मुख्ययज्ञः। अतोऽयं तृचः सामत्रयस्वरूपत्वेनाऽत्र [१८]पठ्यते। यद्यप्येता ऋचो रथंतरादीनां योनयो न भवन्ति तथाऽपि स्तुतित्वात् [१९]तद्रूपत्वम् अविरुद्धम्। शाखान्तरे वा तास्वृक्षु [२०]गीतानि सामानि द्रष्टव्यानि। [२१-२]तत् तेन-[२१] तृचपाठेन दर्शपूर्णमासयज्ञं [२२]सामयुक्तं [२]करोति। 'बृहदग्ने' इति तृतीयपादोपादानं बृहत्सामद्योतकस्य बृहच्छब्दस्य प्रदर्शनार्थम्॥

१२. क.ड.शृं.हो१– °ग्निमाजुहोताहुतिभिः। १३. ड.शृं– °वाहनं तमग्निं। १४. आ.हा– विकल्पते। १५–१५. आ–वर्धन्ति वर्धयन्ति त्वां; अ.इ.उ.जो.ना.पा.हो१–त्वां वर्धयन्ति। १६. आ–'श्रेयोभिः' नास्ति। १७. आ.क– सदा पात। १८. क– पद्यते। १९. हा– उपपद्यते तद्रूपत्वम्। २०. शृं– तानि; हो१–एतानि; अ.इ.उ.जो.पा.हा– भूतानि। २१–२१. आ– एतेन। २२. आ– सामवन्तं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदेतं तृचमन्वाह यज्ञमेव तत् सामन्वन्तं करोत्यग्निरमुष्मिँल्लोक आसीदादित्योऽस्मिन् ताविमौ लोकावशान्ता(१)वास्तां ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यग्न आ याहि वीतय इत्यास्मिँल्लोकेऽग्निमदधुर्बृहदग्ने सुवीर्यमित्यमुष्मिँल्लोक आदित्यं ततो वा इमौ

यत्। एतम्। तृचम्। अन्वाहेत्यनु - आह। यज्ञम्। एव। तत्। सामन्वन्तमिति सामन् - वन्तम्। करोति। अग्निः। अमुष्मिन्। लोके। आसीत्। आदित्यः। अस्मिन्। तौ। इमौ। लोकौ। अशान्तौ (१)। आस्ताम्। ते। देवाः। अब्रुवन्। एति। इत। इमौ। वि। परीति। ऊहाम। इति। अग्ने। एति। याहि। वीतये। इति। अस्मिन्। लोके। अग्निम्। अदधुः। बृहत्। अग्ने। सुवीर्यमिति सु - वीर्यम्। इति। अमुष्मिन्। लोके। आदित्यम्। ततः। वै। इमौ। लोकौ।

तृचमिति। तिसृणामृचां समाहारस्तृचम्। "ऋक्पूः°" (पा ५.४.७४) इति समासान्तः। त्रेः संप्रसारणम् उत्तरपदलोपश्च। सामन्वन्तमिति। "अनो नुट्" (पा ८.२.१६) इति नुट्॥

अग्निरमुष्मिन्नित्यादि॥ स्वर्लोके ᵛअग्निः ᵛआसीत्, पृथिव्याम् ᵛआदित्यः। ततः ᵛइमौ ᵛलोकौ ᵛअशान्तौ असुखौ ᵛआस्ताम् अभवताम्। अथ च ᵛते तथा पश्यन्तः ᵛदेवाः परस्परम् १-ᵛअब्रुवन् ᵛएत आगच्छत-१ २सर्वेऽपि यूयम् ᵛइमौ अग्न्यादित्यौ ᵛवि ᵛपर्यूहाम विपरिवृत्तलोकौ स्थापयाम। 'अग्न आ याहि' इति, 'बर्हिषि निषीद' इति लिङ्गं नीचैरवस्थानस्य। ऋचश्च ३प्रथमत्वात् ३प्रथमलोकपरिग्रहः। तत्र तृतीयदेशस्यापि प्रथमपादादावग्निशब्दोपादानादग्नेः प्रथमलोकावस्थानं सूच्यते। बृहदग्न इति। ४विवासनकारित्वमादित्यात्मन एव। अग्नेरिति। तस्योच्चैरवस्थानलिङ्गविशेषः। ऋचः ५तृतीयत्वात् तृतीयलोकपरिग्रहः। तत्र तृतीयदेशत्वम्॥

अग्निरिति॥ अस्मिन्नेव तृच २३-आद्यन्तौ मन्त्रौ-२३ पुनः प्रशंसति– 'अग्निरमुष्मिँल्लोक आसीदादित्योऽस्मिन् ताविमौ लोकावशान्तावास्तां ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यग्न आ याहि वीतय इत्यस्मिँल्लोकेऽग्निमदधुर्बृहदग्ने सुवीर्यमित्यमुष्मिँल्लोक आदित्यं ततो वा इमौ लोकावशाम्यतां यदेवमन्वाहानयोर्लोकयोः शान्त्यै शाम्यतोऽस्मा इमौ लोकौ य एवं वेद' इति॥ पुरा स्वर्गलोके ᵛअग्निः स्थितः ᵛआदित्यः तु भूलोके। २४तदानीं लोकद्वयमशान्तं २५क्षुब्धमासीत्। स्वर्गे हि २६अमृतसेविनां पाकापेक्षा नास्ति। प्रकाशाय केवलमादित्योऽपेक्षित एव। भूलोकवासिनां तु पाको मुख्यं प्रयोजनम्। २७तदुभयासिद्धेर्लोकयोः क्षोभः। तं क्षोभं दृष्ट्वा ᵛते ᵛदेवाः परस्परमिदमूचुः– ᵛइमौ अग्न्यादित्यौ ᵛवि ᵛपर्यूहाम विपरिवृत्तौ स्थापयाम। तस्मात् २८-ᵛएत सर्वे-२८ यूयमागच्छत ᵛइति। 'अग्न आयाहि' इत्यस्यामृचि 'बर्हिषि

१. लं.हो– 'अब्रुवन् एत आगच्छत' नास्ति। २–२ तं३.लं.हो– ते सर्वेऽपि। ३. लं.हो– प्रथमलोपः परि°। ४. तं३.लं.हो– विवासकारि°। ५. लं– 'तृतीयत्वात्' नास्ति।

२३–२३. आ– आद्यन्तौ; हो१– आद्यन्तमन्त्रौ। २४. ड.शृं.–तदा। २५. शृं–क्षुभितमसीत्। २६. हो१– अमृताशिनाम्; अ.इ.उ.जो.ना.पा.हा– °सेवनात्। २७. आ.ड– °र्लोक°। २८–२८. आ– एते सर्वे; ड.हो– एतदर्थम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लोकावशाम्यतां यदेवमन्वाहानयोर्लोकयोः शान्त्यै शाम्यतोऽस्मा इमौ लोकौ य एवं वेद पञ्चदश सामिधेनीरन्वाह पञ्चदश(२)वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते तासां त्रीणि च शतानि षष्टिश्चाक्षराणि तावतीः संवत्सरस्य रात्रयो-

---

अशाम्यताम्। यत्। एवम्। अन्वाहेत्यनु - आह। अनयोः। लोकयोः। शान्त्यै। शाम्यतः। अस्मै। इमौ। लोकौ। यः। एवम्। वेद। पञ्चदशेति पञ्च - दश। सामिधेनीरिति साम् - इधेनीः। अन्विति। आह। पञ्चदशेति पञ्च - दश (२)। वै। अर्धमासस्येत्यर्ध - मासस्य। रात्रयः। अर्धमासश इत्यर्धमास - शः। संवत्सर इति सं - वत्सरः। आप्यते। तासाम्। त्रीणि। च। शतानि। षष्टिः। च। अक्षराणि। तावतीः। संवत्सरस्येति सं - वत्सरस्य। रात्रयः।

---

[v]अर्धमासशः [अर्धमासेन] अक्षरशः अक्षरेण संवत्सरमाप्नोति। अक्षराणां रात्रीणां च समसंख्याकारेण संवत्सरावाप्तिः। पूर्ववच्छस् ॥

निषीद' इति लिङ्गाद्दचः प्राथम्याच्च प्रथमलोके स्थापनं [३१]तया संपद्यते। 'बृहदग्ने सुवीर्यम्' इत्यस्यामृचि 'विवाससि' इति विभातत्वोक्तिलिङ्गाद्दचस्तृतीयत्वाच्चास्याः [३०]तृतीयलोके [३१]स्थापनहेतुत्वं [३२]गम्यते। यद्यप्यादित्यो नास्मिन् मन्त्रे श्रुतस्तथापि [३३-]तृचस्थानवर्तित्वेन तमस्तिरस्कारित्वेन[-३३] विभातत्वेन [३४]आदित्यः [३५]सूच्यते। किं [३६]च हंसमन्त्रावसाने "ऋतं बृहत्" (तैसं १·८·१५) इत्यादित्यमण्डलपरत्वेन श्रुतो बृहच्छब्दोऽत्रापि [३७]श्रूयमाण आदित्यस्य प्रत्यभिज्ञापकः। तस्मात् तेन मन्त्रेणाऽऽदित्यस्थापनं सिध्यति। [३८]अनयोर्विपर्यावृत्त्या लोकयोः स्वस्वकार्यसिद्धेर्युक्ता शान्तिः। तस्मादनेन क्रमेण पाठो [३९]लोकद्वयशान्त्यै भवति। तद्वेदितुश्च तदुभयशान्तिर्भवति ॥

पञ्चदशेति ॥ संख्यां विधत्ते- 'पञ्चदश सामिधेनीरन्वाह पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते' इति। यद्यपि द्वादश [४०-]पठितास्तथाऽप्येकादशैव। एकस्याः पुरुषभेदेन [४१]विकल्पितत्वात्। तासु च प्रथमोत्तमयोस्त्रिरावृत्त्या पञ्चदशत्वसंपत्तिः। [v]अर्धमासस्य रात्रीणां पञ्चदशत्वात् तद्रूपत्वमपि संपद्यते। एकैकस्मिन् अर्धमासे पञ्चदशस्वन्तर्भूतासु तासामर्धमासानां चतुर्विंशतिवारमावृत्त्या संवत्सरप्राप्तिश्च संपद्यते ॥

तासामिति ॥ [४२]इदानीमक्षरसंख्यां संवत्सरसंपत्त्या प्रशंसति- 'तासां त्रीणि च शतानि षष्टिश्चाक्षराणि तावतीः संवत्सरस्य रात्रयोऽक्षरश एव संवत्सरमाप्नोति' इति। [v]तासां [४३-]पञ्चदश सामिधेनीनां[-४३] गायत्रीछन्दस्कत्वादेकैका चतुर्विंशत्यक्षरा। तथा सति मिलित्वाऽक्षरसंख्या संवत्सररात्रिसंख्या

---

२९. ड.हो१- तथा। ३०. ड- तृतीये लोके। ३१. ड.शृं- स्थापनम्। ३२. ड- तथा संपद्यते। गम्यते ३३-३३. आ-उच्चैःस्थानवृत्तित्वकारित्वेन। ३४. हो१-आदित्याः। ३५. आ- श्रूयते; हो१- सूच्यन्ते। ३६. ड-तु। ३७ अ.इ.उ.जो.ना.पा.हा-श्रूयमाण बृहच्छब्दः। ३८. ड.हो१-अनया विप°। ३९. आ- लोकयोः शान्त्यै। ४०. क.शृं- 'एकादशैव' नास्ति। ४१. ड.शृं- विकल्पितत्वात् एकादशैव। ४२. ड.शृं.हो१-°संख्ययाऽपि। ४३-४३. आ-सामिधेनीन पञ्चदशसंख्यानां; क- सामिधेनीनां पञ्चदशसंख्यकानां।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

-ऽक्षरश एव संवत्सरमाप्नोति नृमेधश्च परुच्छेपश्च ब्रह्मवाद्यमवदेतामस्मिन् दारावार्द्रेऽग्निं जनयाव यतरो नौ ब्रह्मीयानिति नृमेधोऽभ्यवदत्

अक्षरश इत्यक्षर - शः । एव । संवत्सरमिति सं - वत्सरम् । आप्नोति । नृमेध इति नृ - मेधः । च । परुच्छेपः । च । ब्रह्मवाद्यमिति ब्रह्म - वाद्यम् । अवदेताम् । अस्मिन् । दारौ । आर्द्रे । अग्निम् । जनयाव । यतरः । नौ । ब्रह्मीयान् । इति । नृमेध इति नृ - मेधः । अभीति । अवदत् । ५

[1]नृमेधश्चेत्यादि ॥ ब्रह्मवादित्वं ब्रह्मवाद्यम् । ब्रह्म वेदं वदितुमिष्टे विषये नियोक्तुं [2]सामर्थ्यं ब्रह्मवादः, तदेव ब्रह्मवाद्यम् । स्वार्थिको यत्, "परादिश्छन्दसि०" (पा ६·२·१९९) इति उत्तरपदाद्युदात्तत्वम् । यद्वा [3]ब्रह्मणो वदनसामर्थ्यं ब्रह्मवाद्यम् । "वदः सुपि क्यप् च" (पा ३·१·१०६) इति यत्, वर्णविकारश्छान्दसः, कृदुत्तरपदप्रकृतिस्वरत्वेन "यतोऽनावः" (पा ६·१·२१३) इत्याद्युदात्तत्वम् । श्यन् वा व्यत्ययेन प्रवर्तते । पूर्वं नृमेधपरुच्छेपनामानावृषी ब्रह्मवाद्ये विप्रतिपन्नावभवताम्, अहं ब्रह्मतरोऽहं ब्रह्मतर इति । तौ तथा विप्रतिपन्नौ इत्थं ब्रह्मवाद्यम् [4]अवदेतां वैमत्येन अवदताम् । "[5-5]भासन०" (पा १·३·४७) इत्यादिना [5-5]विमतावात्मनेपदम् । कथमित्याह– [6]नौ आवयोर्मध्ये [6][10]यतरः [6]ब्रह्मीयान् ब्रह्मतरः [6]अस्मिन् [6]आर्द्रे [6]दारौ [6]अग्निं [6]जनयाव अहं वा त्वं वा । तन्त्रेण द्वयोरभिधानं, यतरो नौ ब्रह्मीयान् त्वं वाऽहं वा तावावामत्राग्निं [11]जनयावेति । विशिष्टज्ञाननिमित्तत्वेन ब्रह्मशब्दस्य गुणवचनत्वात् "अजादी गुणवचनादेव" (पा ५·३·५८) इति ईयसुन्प्रत्यये [12]अलोपः । "किंयत्तदो निर्धारणे०" (पा ५·३·९२) इति यच्छब्दात् डतरच्प्रत्ययः ॥ [6]नृमेधः [6]अभि [6]अवदत् ।

च समा इति कृत्वाऽक्षरद्वारा [44]तथैव संवत्सरप्राप्तिर्भवति । यद्यपि वासिष्ठानां परिधानीयायास्त्रिष्टुप्त्वात् अधिकान्यक्षराणि तथाऽपीतरगोत्रापेक्षयाऽयमर्थवाद इत्यविरोधः ॥

नृमेध इति ॥ आसु सामिधेनीषु 'तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि' इत्येतं [45]मन्त्रविशेषं प्रशंसति–'नृमेधश्च परुच्छेपश्च ब्रह्मवाद्यमवदेतामस्मिन् दारावार्द्रेऽग्निं जनयाव यतरो नौ ब्रह्मीयानिति नृमेधोऽभ्यवदत् स धूममजनयत् परुच्छेपोऽभ्यवत् सोऽग्निमजनयदृष इत्यब्रवीद्यत् समावद्विद्व कथा त्वमग्निमजीजनो नाहमिति सामिधेनीनामेवाहं वर्णं वेदेत्यब्रवीद्यत् घृतवत् पदमनूच्यते स आसां वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह सामिधेनीष्वेव तज्ज्योतिर्जनयति' इति ॥ नृमेधपरुच्छेपनामानौ [46]उभावृषी परस्परं [6]ब्रह्मवाद्यम् [6]अवदेतां मन्त्रसामर्थ्यविषयं [47]संवादमकुरुताम् । तत्रानयोरियं प्रतिज्ञा– आवयोरुभयोर्मध्ये [6]यतरः [6]ब्रह्मीयान् ब्रह्मणि सामिधेनीमन्त्रेऽत्यन्तं कुशलस्तादृशं निश्चेतुं स्वस्वमनसि सामिधेनीमन्त्रमनु-

६. तं३.त्रि.मै.लं.हो– नृमेधश्चेत्यादिना । ७. लं.हो– असामर्थ्यम् । ८. तं३.लं.हो– ब्रह्मणा । ९–९. मै४ – भासनादिना । १०. तं३.लं.हो– यतः । ११. लं.हो–जनायेति । १२. लं.हो– 'अलोपः' नास्ति ।

४४. आ– तदेवम् । ४५. शृं– मन्त्रं विशेषेण । ४६. आ– ऋत्विजौ; क.ड.हो१– ऋषी । ४७. आ.हा– वाद० ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स धूमम॑जनयत् परु॑च्छेपोऽभ्यव॑दत् सोऽग्नि॑मजनय॒दृष॒ इत्यब्र॑वीत्(३)यत् स॒मावद्विद्व कथा त्वम॒ग्निमजीजनो॒ नाहमिति॑ सामिधे॒नीना॑मे॒वाहं वर्णं॑ वे॒देत्यब्र॑वीद्यद्घृ॒तव॑त् प॒दम॑नू॒च्यते॒ स आ॑सां॒ वर्ण॒स्तं त्वा॑ स॒मिद्भि॒राङ्गि॑र इ॒त्याह॑ सामिधे॒नीष्वे॒व तज्ज्योति॑र्जनयति

सः। धूमम्। अजनयत्। परुच्छेपः। अभीति। अवदत्। सः। अग्निम्। अजनयत्। ऋषे। इति। अब्रवीत् (३)। यत्। समावत्। विद्व। कथा। त्वम्। अग्निम्। अजीजनः। न। अहम्। इति। सामिधेनीनामिति साम्-इधेनीनाम्। एव। अहम्। वर्णम्। वेद। इति। अब्रवीत्। यत्। घृतवदिति घृत-वत्। पदम्। अनूच्यत इत्यनु-उच्यते। सः। आसाम्। वर्णः। तम्। त्वा। समिद्भिरिति समित्-भिः। आङ्गिरः। इति। आह। सामिधेनीष्विति साम्-इधेनीषु। एव। तत्। ज्योतिः। जनयति।

१० आर्द्रं दारुमभिलक्ष्य अग्निं जनयितुकामो [१३-]ब्रह्म वदन्[-१३] [V]सः [V]धूमम् एव [V]अजनयत् नाग्निम्। [V]परुच्छेपः तु [V]अग्निम् [V]अजनयत्। अथ तं दृष्टातिशयप्रतिपत्त्यर्थम् ऋषिशब्देन प्रेम्णाऽऽमन्त्र्य नृमेधः [V]अब्रवीत् [१४V]यत् यदा [V]समावत् [१५V]विद्व सममेवावयोर्वेदनं सर्वत्र [१६-]तदा [V]कथा केन[-१६] हेतुना [V]त्वम् [V]अग्निम् [V]अजीजनः [V]न [V]अहम् [V]इति। समादावतुप् स्वार्थिकः, "था हेतौ च°" (पा ५·३·२६) इति थाप्रत्ययः। अथ परुच्छेपः [V]अब्रवीत्– [V]सामि-
१५ धेनीनां [V]वर्णं स्वरूपम् [V]अहं [V]वेद जानामि न त्वमिति॥

इदानीं तं वर्णं स्वयमेव परुच्छेप आह– यदिति॥ घृतेनाभिधेयेन तद्वत्पदं [V]घृतवत् घृतशब्द एव। यद्वा– घृतशब्दवत् [V]पदं "तं त्वा समिद्भिः" (तैब्रा ३·५·२) इत्यस्याः द्वितीयः

[V]अस्मिन् [V]आर्द्रे काष्ठे मथनेन [V]अग्निं [V]जनयाव [V]इति। तदा प्रथमं [V]नृमेधः आर्द्रं काष्ठमभिलक्ष्य मन्त्रम् [V]अवदत्। [V]सः तन्मन्त्रसामर्थ्यात् [V]धूमम् उत्पादितवान्। [V]परुच्छेपः मन्त्रं पठित्वा [V]अग्निम्
२० [V]अजनयत्। [४८-]तदानीं नृमेधः परुच्छेपं प्रति हे [V]ऋषे, त्वमतीन्द्रियद्रष्टाऽसि [V]इति अभिप्रेत्य [४९-]संबोधितवान्। संबोध्य चैवं पप्रच्छ– [V]यत् यस्मात् कारणात् [V]समावत् [V]विद्व आवयोः [५०-]सामिधेनीवेदनं समानमेव[-५०], तथा सति कथं [V]त्वम् [V]अग्निम् उत्पादितवान् [V]न तु [V]अहम् [V]इति। तत्र परुच्छेप उत्तरमुवाच–यद्यप्यावयोः सामिधेनीपाठः [५१-]तदर्थविज्ञानं च समानं, तथाऽपि [V]अहं तासाम् [V]एव [V]समिधेनीनां [V]वर्णं रहस्यं तेजः [V]वेद, त्वं तु न वेत्सि। किं तत्तेज इति तदुच्यते–घृतशब्दोपेतः पादः [V]अनूच्यते इति [V]सः अयमनूच्यमानः पादः
१५ सामिधेनीनां [V]वर्णः सारभूतं तेजः। [५२-]स पादः[-५२] कस्यामृचि वर्तत इति चेत् तदुच्यते– "तं त्वा समि-

१३–१३. लं–ब्रह्मन् वदन्; हो–'ब्रह्म वदन्' नास्ति। १४. लं.हो–'यत्' नास्ति। १५. तं३.लं.हो– 'विद्व' नास्ति। १६–१६. हो– तथा कथनेन; तं३.लं– तथा कथानेन।

४८. आ– तदिदानीम्। ४९. अ.उ.पा– संतोषितवान्। ५०–५० ड–सामिधेनीपाठस्तदर्थ-विज्ञानं समानं। ५१. आ– तदर्थज्ञानं। ५२–५२. अ.इ.उ.जो.ना.पा.हा– 'स पादः' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामधेनीमन्त्रव्याख्यानम्]

स्त्रियस्तेन यदृचस्त्रियस्तेन यद्गायत्रियः स्त्रियस्तेन यत् सामिधेन्यो वृषण्वतीमन्वाह(४)तेन पुंश्चलीस्तेन सेन्द्रास्तेन मिथुना

स्त्रियः । तेन । यत् । ऋचः । स्त्रियः । तेन । यत् । गायत्रियः । स्त्रियः । तेन । यत् । सामिधेन्य इति साम् - इधेन्यः । वृषण्वतीमिति वृषण् - वतीम् । अन्विति । आह (४) । तेन । पुंश्चलीः । तेन । सेन्द्रा इति स - इन्द्राः । तेन । मिथुनाः । ५

पादः । तस्य यदनुवचनं [v]सः एव तासाम् एकः [v]वर्णः । [१७-]तमेवार्थं समर्थयते[-१७] 'तं त्वा' इति । ज्योतिष्मत्त्वमासां घृतसंबन्धेन क्रियते 'तेजो घृतम्' इति । अथ वर्णान्तराण्याह–स्त्रियस्तेनेत्यादि । ऋक्त्वेन [१८]गायत्रीत्वेन सामिधेनीत्वेन त्रिप्रकारं स्त्रीत्वमासाम् ॥

वृषण्वतीमिति ॥ "वृषणं त्वा वयं वृषन्" (तैब्रा ३·५·२) [१९]इत्येतत्संबन्धेनैताः पुंस्त्ववत्यः [v]सेन्द्राः [v]मिथुनाः च भवन्ति । वृषा सेक्ता पुमान् । "तसौ मत्वर्थे" (पा १·४·१९) इति भत्वम् । वृषा इन्द्रः प्रधानत्वाद्देवतानाम् । स्त्रीत्वात् पुंसो योगाच्च मिथुनत्वमासामस्तीति मिथुनाः । पामादित्वान्नप्रत्ययः (पा ५·२·१००) । केचिदाहुः–"स नः पृथु श्रवाय्यम्" (तैब्रा ३·५·२) इत्यन्तानां चतसृणां पूर्वं स्तुतिः कृता । "अग्निं दूतम्" (तैब्रा ३·५·२) इत्यादीनां स्तुतिः करिष्यते । "ईडेन्यः" (तैब्रा ३·५·२) इत्यादीनां तिसृणां 'वृषण्वतीमन्वाह' इत्यादिका स्तुतिः क्रियते इति । "अनो नुट्" (पा ८·२·१६) इति नुट् । अयस्मयादित्वेन (पा १·४·२०) भत्वात् पदकालेऽपि तस्य णत्वं न निवर्तते ॥

अङ्गिरसः" (तैब्रा ३·५·२) इति एतामृचं पठेत् । तस्यामृचि 'घृतेन वर्धयामसि' [५३]इत्ययं पादो वर्तते । [५४-v]तत् तेन पादपाठेन[-५४] [v]सामिधेनीषु [v]एव [v]ज्योतिः [v]जनयति । [५५]त्वमेतं पादं पठन्नपि महिमानं न जानासि । अहं तु जानामि । तस्मादार्द्रकाष्ठे मयाऽग्निरुत्पादितः ॥

स्त्रिय इति ॥ 'वृषणं त्वा वयम्' इत्येतामृचं विशेषतः प्रशंसति–'स्त्रियस्तेन यदृचः स्त्रियस्तेन यद्गायत्रियः स्त्रियस्तेन यत् सामिधेन्यो वृषण्वतीमन्वाह तेन पुंश्चलीस्तेन सेन्द्रास्तेन मिथुनाः' इति ॥ ऋग्गायत्रीसामिधेनीशब्दैः स्त्रीलिङ्गैरभिधीयमानत्वात् स्त्रीत्वमेव । अतः पुरुषत्वाय वृषञ्-शब्दवतीमृचं ब्रूयात् । [v]तेन पाठेन [v]पुंश्चलीः पुरुषवत्यः [v]सेन्द्राः इन्द्रिययुक्ताः [५५]स्त्रीपुरुषमिथुनरूपाः संपद्यन्ते । "ईडेन्यः" (तैब्रा ३·५·२) इत्येषाऽपि वृषण्वती, 'समग्निरिध्यते वृषा' इत्यन्ते पठितत्वात् । "वृषो अग्निः" (तैब्रा ३·५·२) इत्येषाऽपि वृषशब्दोपेतत्वात् वृषण्वती । [५७]तयोरप्युक्तप्रशंसा द्रष्टव्या ॥ २५

१७–१७. लं.हो– तमर्थयते; तं३. तदेव समर्थयते । १८. लं.हो– गायत्रीत्वे । १९–१९. हो– °संबन्धदेवतः; तं३. लं– °संबन्धा देवताः ।

५३. ड– इत्येवं यः । ५४–५४. आ– ततोऽनेन पठितेन पादेन; ड.हो१–तत्तेन पादेन । ५५. आ– तेन त्वं; ड– तत्तेन ५६. क.ड.हो– स्त्रीपुरुषरूपेण मिथुनरूपाः । ५७. आ–तयोरप्येषा प्रशंसा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निर्देवानाँ दूत आसीदुशनाँ काव्योऽसुराणाँ तौ प्रजापतिं प्रश्नमैताꣳ स प्रजापतिरग्निं दूतं वृणीमह इत्यभि पर्यावर्तत ततो देवा अभवन् पराऽसुरा यस्यैवं विदुषोऽग्निं दूतं वृणीमह इत्यन्वाह भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यध्वरवतीमन्वाह

अग्निः । देवानाम् । दूतः । आसीत् । उशना । काव्यः । असुराणाम् । तौ । प्रजापतिमिति प्रजा - पतिम् । प्रश्नम् । ऐताम् । सः । प्रजापतिरिति प्रजा - पतिः । अग्निम् । दूतम् । वृणीमहे । इति । अभीति । पर्यावर्ततेति परि - आवर्तत । ततः । देवाः । अभवन् । परेति । असुराः । यस्य । एवम् । विदुषः । अग्निम् । दूतम् । वृणीमहे । इति । अन्वाहेत्यनु - आह । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति । अध्वरवतीमित्यध्वर - वतीम् । अन्विति । आह ।

अग्निर्देवानामित्यादि ॥ दूतः [२०]हविषां देवसकाशं [२१]प्रापयिता । [v]देवानां [२२]यतताम् [v]अग्निः [v]दूतः अभवत् । [v]असुराणां कवेः पुत्रः [v]उशना शुक्रो दूतोऽभवत् । अवन्ती(?) छान्दसमन्तोदात्तत्वम् । "ऋदुशनस्पुरुदंसः°" (पा ७·१·९४) इत्युशनसोऽनङादेशः । अथ [v]तौ [v]प्रजापतिं [v]प्रश्नम् [v]ऐताम्-- आवयोः को यागे दूत्यमर्हतीति प्रजापतिसकाशम् [२३]अगच्छताम् । "यजयाच°" (पा ३·३·९०) इति कर्मणि नङ्प्रत्ययः । विभक्तिव्यत्ययो वा प्रश्नार्थं प्रजापतिमैतामिति । अथ पृच्छ्यमानः प्रजापतिः "अग्निं दूतं वृणीमहे" (तैब्रा ३·५·२) [v]इति इमामृचं ब्रुवन्, अग्निमेव [v]अभि [v]पर्यावर्तत अग्निमेवालक्ष्य पर्यावृत्तोऽभवत् । [v]ततः अग्नेरेव [२४]दूत्यार्हत्वात् [२५]तद्दूतका [२६v]देवाः [v]अभवन्, असुराश्च पराभूताः ॥ यस्यैवमित्यादि ॥ गतम् ॥

अग्निरिति ॥ [५८]अथ "अग्निं दूतम्" (तैब्रा ३·५·२) इत्येतामृचं विशेषतः प्रशंसति- 'अग्निर्देवानां दूत आसीदुशना काव्योऽसुराणां तौ प्रजापतिं प्रश्नमैताꣳ स प्रजापतिरग्निं दूतं वृणीमह इत्यभि-पर्यावर्तत ततो देवा अभवन् पराऽसुरा यस्यैवं विदुषोऽग्निं दूतं वृणीमह इत्यन्वाह भवत्यात्मना पराऽस्य भ्रातृव्यो भवति' इति ॥ देवाः स्वकार्येष्वग्निं दूतत्वेन प्रेषयन्ति, असुरास्तु कवेः पुत्रम् [५९]उशनसम् । [v]तौ उभावपि [v]प्रजापतिम् उपेत्य पृष्टवन्तौ । आवयोर्मध्ये [६०]संधिविग्रहादिकार्येषु कस्य दौत्यमुचितमिति[६०] । तदानीं [v]प्रजापतिः "अग्निं दूतं वृणीमहे" [v]इति अनेन मन्त्रेणोत्तरमुवाच । उक्त्वा चोशनसः सकाशात् परावृत्याग्नेरभिमुखोऽभूत् । [v]ततः देवानां विजयोऽभूदसुराश्च पराभूताः । [v]एवं [v]विदुषः यजमानस्याप्यनेन मन्त्रेण स्वविजयः शत्रुपराजयश्च भवति ॥

२०. तं३.लं हविष्मान् । २१. लं.हो- प्रापयित्वा । २२. मै- 'यतताम्' नास्ति । २३ त्रि.लं.हो- आगच्छताम् । २४. तं३.मै४.लं.हो- दूतार्ह° । २५. हो- न दूतकाः । २६. मै-एव

५८. ड- 'अथ' नास्ति । ५९. ड.शृं.हो१- शुक्रम् । ६०-६०. ड- °कार्येषु कः समुचित इति; हो१- °दिवाक्येषु कः समुचित इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामिधेनीमन्त्रव्याख्यानम्]

भ्रातृव्यमेवैतया(५)ध्वरति शोचिष्केशस्तमीमह इत्याह पवित्रमेवैतद्यजमानमेवैतया पवयति समिद्धो अग्न आहुतेत्याह परिधिमेवैतं परिं दधात्यस्कन्दाय यदत ऊर्ध्वमभ्यादध्याद्यथा बहिःपरिधि स्कन्दति तादृगेव तत्

भ्रातृव्यम्। एव। एतया (५) ध्वरति। शोचिष्केश इति शोचिः—केशः। तम्। ईमहे। इति। आह। पवित्रम्। एव। एतत्। यजमानम्। एव। एतया। पवयति। समिद्ध इति सम्-इद्धः। अग्ने। आहुतेत्या-हुत। इति। आह। परिधिमिति परि-धिम्। एव। एतम्। परीति। दधाति। अस्कन्दाय। यत्। अतः। ऊर्ध्वम्। अभ्यादध्यादित्यभि-आदध्यात्। यथा। बहिःपरिधीति बहिः—परिधि। स्कन्दति। तादृक्। एव। तत्। ५

अध्वरवतीमिति॥ "समिध्यमानो अध्वरे" (तैब्रा ३·५·२) इत्येताम्। ध्वरति हिनस्तीति। ध्वृ मूर्छने। पवित्रमिति। शोचिःसंबन्धेन शुचित्वात् पवित्रमियमृक्॥ १०

परिधिमिति॥ "समिद्धो अग्न आहुत" (तैब्रा ३·५·२) इतीयमृक् परिधिस्थानीया। परिधानं विधानसमापनम्। 'समिद्धः' इति च समाप्तिलिङ्गम्। अत एवानूयाजे वेदितव्या। [१७]परिधेर्बहिः [V]बहिःपरिधि। "अपपरिबहिरञ्चवः°" (पा २·१·१२) इत्यव्ययीभावः॥

अध्वरवतीमिति॥ "समिध्यमानो अध्वरे" (तैब्रा ३·५·२) इत्येतामृचं विशेषतः प्रशंसति—'अध्वरवतीमन्वाह भ्रातृव्यमेवैतया ध्वरति' [११]इति॥ हिनस्तीत्यर्थः॥ १५

शोचिष्केश इति॥ तस्यामृचि तृतीयपादं प्रशंसति—'शोचिष्केशस्तमीमह इत्याह पवित्रमेवैतद्यजमानमेवैतया पवयति' इति॥ [१२]मध्यपादे 'अग्निः पावक ईड्यः' इति पावकशब्देनैव पवित्रत्वं विस्पष्टम्। अत्र [१३]तु शोचिःशब्देन शुचिहेतूनां रश्मीनामुक्तिमभिप्रेत्य [V]पवित्रम् एतद्वाक्यमित्यभिधीयते। तस्मात् [V]एतया ऋचा [V]यजमानम् [V]एव [१४]शोधयति। "समिद्धो अग्न आहुत" (तैब्रा ३·५·२) इत्येषा काचिदध्वरवती। 'देवान् यक्षि स्वध्वर' [१५]इत्युक्तत्वात्। "आज्जुहोत" (तैब्रा ३·५·२) इत्यसावप्यध्वरवती। 'अग्निं प्रयत्यध्वरे' इत्युक्तत्वात्। तयोरप्यृचोरुक्तप्रशंसा योजनीया। तदेवं सर्वासामृचां सामान्यतो विशेषतश्च प्रशंसा दर्शिता॥ २०

समिद्ध इति॥ यदुक्तं सूत्रकारेण—"समिद्धो अग्न आहुतेत्यभिज्ञायैकामनूयाजसमिधमवशिष्य [११]सर्वमिध्मशेषमभ्यादधाति" (आपश्रौ २·१२·६) इति, तदेतत् हृदि निधाय "समिद्धो अग्ने" (तैब्रा ३·५·२) इति मन्त्रं पुनः प्रशंसति—'समिद्धो अग्न आहुतेत्याह परिधिमेवैतं परिदधात्यस्कन्दाय यदत ऊर्ध्वमभ्यादध्याद्यथा बहिःपरिधि स्कन्दति तादृगेव तत्' इति। 'समिद्धो अग्ने' इत्यनेन भूतार्थवाचिना [१७]क्तप्रत्ययेन सामिधेनीसाध्यस्याग्निसमिन्धनस्य समाप्तिः सूच्यते। परिसमाप्तये धीयमानः प्रक्षिप्यमाणः काष्ठविशेषः परिधिः। तथा सति 'समिद्धः' इति समाप्तिसूचनात् [V]एतं मन्त्रं [१८]परिधित्वेन स्थापितवान् भवति। स च परिधिः [१९]प्रक्षिप्यमाणानां समिधाम् [V]अस्कन्दाय २५

२७. तंब्रा.लं.हो—'बहिः' नास्ति। ३०

६१. ड—'इति' नास्ति। ६२. शृं—मध्यपादे तु। ६३. आ—'तु' नास्ति। ६४. ड.हो१—पवयति। ६५. ड.शृं—इति श्रुतत्वात्। ६६. क—°मिद्धशेष°। ६७. क.हा.हो१—उक्त°। ६८. अ.इ.उ.जो.पा.हा.हो१—परिधत्ते। ६९. आ—प्रक्षिप्यमाणं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितॄणाꣳ सहरक्षा असुराणां त एतर्ह्या शꣳसन्ते मां वरिष्यते मामि(६)ति वृणीध्वꣳ हव्यवाहनमित्याह य एव देवानां

त्रयः। वै। अग्नयः। हव्यवाहन इति हव्य - वाहनः। देवानाम्। कव्यवाहन इति कव्य - वाहनः। पितॄणाम्। सहरक्षा इति सह - रक्षाः। असुराणाम्। ते। एतर्हि। एति। शꣳसन्ते। माम्। वरिष्यते। माम् (६)। इति। वृणीध्वम्। हव्यवाहनमिति हव्य - वाहनम्। इति। आह। यः। एव। देवानाम्।

त्रयो वा इत्यादि। "हव्येऽनन्तःपादम्" (पा ३·२·६६) इत्युभयत्र ण्युट्, "कव्यपुरीषपुरीष्येषु ण्युट्" (पा ३·२·६५)। [V]त्रयः अप्येते [V]अग्नयः अस्मिन् काले [V]आ [V]शसन्ते प्रार्थयन्ते [२८-V]माम् अयं-[२९] [V]वरिष्यते [V]इति। तत्र "वृणीध्वं हव्यवाहनम्" (तैब्रा ३·५·२) [V]इति वचनेन कव्यवाहादिव्युदासेन [V]देवानाम् अग्निर्हव्यवाहन एव वृतो भवति॥

आर्षेयमिति॥ ऋषेरपत्यम् [V]आर्षेयम्। "इतश्चानिञः" (पा ४·१·१२२) इति ढक्। [३०]आत्मीयगोत्र ऋषिः। तद्धितप्रत्ययान्तानामामन्त्रितविभक्त्या यथाप्रवरं [३१-V]वृणीते सामिधेन्यनन्तरम्। यथा भृगूणाम्–"अग्ने महाꣳ असि ब्राह्मण भारत[३१]भार्गव च्यावनाप्नुवानौर्व जामदग्न्य" इति पञ्चार्षेयः [३२]प्रवरः ब्रियते। अत्र भृग्वादिभिरिष्टोऽग्निरेव तत्तदपत्यतयोपचर्यते। बन्धोरिति। बन्धुभ्यो भृग्वादिभ्य एवं वृणानः [V]न [V]एति न च्युतो भवति। [V]अथो अपि च इदमार्षेयवरणम् अविनाशाय भवति। [७०-V]यत् यतः अस्मात्-[७०] मन्त्रपाठात् [V]ऊर्ध्वम् 'आ जुहोत' इति मन्त्रे समिधः [V]अभ्यादध्यात्। [V]यथा आज्यपुरोडाशादिहाविषः परिधेर्बहिः पतनं विनाशाय संपद्यते [V]तादृग् [V]एव [V]तत् द्रष्टव्यम्। एवं [७१-च] "प्रणवे प्रणवे-[७१] समिधमादधाति" (आपश्रौ २·१२·४) इति सूत्रकारेण प्रतिमन्त्रमवसानकालीने प्रणवे समिदाधानस्योक्तत्वात् 'समिद्धः' इति मन्त्रावसाने समिदेका स्वतः प्रक्षेपणीया प्राप्ता। 'आजुहोत' इत्यस्य त्रिरावृत्त्या तिस्रः समिधस्तत्र प्रक्षेपणीयाः प्राप्ताः। तदेतच्चतुष्टयं 'समिद्धो अग्ने' इत्येतस्य पादस्य पाठकाल एव प्रक्षिपेदिति विधिरुन्नेयः॥

त्रय इति॥ चरमायामृचि [७२]हव्यवाहनमित्यग्निविशेषणं प्रशंसति–'त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितॄणाꣳ सहरक्षा असुराणां त एतर्ह्या शꣳसन्ते मां वरिष्यते मामिति वृणीध्वꣳ हव्यवाहनमित्याह य एव देवानां तं वृणीते' इति॥ देवादीनां संबन्धिनो हव्यवाहनादयः [V]अग्नयः प्रत्येकं [७३-V]माम् एव [V]वरिष्यते-[७३], [V]माम् एव वरिष्यते [V]इति एवमपेक्षन्ते। अतो [७४]देवाग्नेरेव वरणसिद्ध्यर्थं-[७४] [V]हव्यवाहनं [V]वृणीध्वम् [V]इति उच्यते॥

आर्षेयमिति॥ यदुक्तमाश्वलायनेन– "सामिधेनीनामुत्तमेन प्रणवेनाग्ने महाँ असि ब्राह्मण भारतेति निगदेऽवसाय। [७५-यजमानस्यार्षेयान् प्रवृणीते-[७५] यावन्तः स्युः। परं परं [७६]प्रथमम्" (आश्वश्रौ

२८. तं३.लं.हो– प्रमायम्। २९. लं–आत्रीयगोत्र। ३०. मै४– प्रवृणीते। ३१. हो–भार्गवच्यवन°। ३२. लं.हो– 'प्रवरः' नास्ति।

७०–७०. आ– यद्येतस्मात्। ७१–७१. ड–सति प्रणवे। ७२. अ.इ.उ.जो.पा.हा– °वाहनमित्यग्निं विशेषेण, ना–°वाहनमग्निं विशेषेण। ७३–७३. आ–'मामेव वरिष्यते' नास्ति। ७४–७४. आ.हा–देवा अग्नेरेवंगुण°। ७५–७५. ड– यजमान आर्षेयान् प्रवृणुते। ७६. क–'प्रथमम्' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तं वृणीत आर्षेयं वृणीते बन्धोरेव नैत्यथो संतत्यै परस्तादर्वाचो वृणीते तस्मात् परस्तादर्वाञ्चो मनुष्यान् पितरोऽनु प्र पिपते ॥ ८ ॥

[अशान्तावाह पञ्चदशाग्नीदन्वाहैतया वरिष्यते मामेकान्नत्रिंशच्च]

तम्। वृणीते। आर्षेयम्। वृणीते। बन्धोः। एव। न। एति। अथो इति। संतत्या इति सं-तत्यै। परस्तात्। अर्वाचः। वृणीते। तस्मात्। परस्तात्। अर्वाञ्चः। मनुष्यान्। पितरः। अनु। प्रेति। पिपते ॥ ८ ॥ [मैसं...कासं...कपिसं...] ५

अस्य पुत्रादिसंतानसमृद्धयै भवति। यद्वा– 'ऋषिणा हि देवाः पुरुषमनुबुद्धयन्ते' इति भृग्वादिभिः प्रसिद्धैः मन्त्रकृद्भिः बन्धुभिः व्रीयमाणैरयं बन्धुमान् भवति। ततो देवैरनुबुद्धो भवति, संतानवृद्धिश्च भवति।

परस्तादिति ॥ [v]परस्तात् पुरुषादारभ्य [v]अर्वाचः अधस्तादवस्थितानृषीन् [v]वृणीते यथा– भृग्वादयो [३३]जमदग्न्यन्ताः। परशब्दात् पञ्चम्यन्तात् "दिक्शब्देभ्यः०" (पा ५.३.२७) इत्यादिना अस्तातिप्रत्ययः। तस्मादिति। [v]परस्तात् [v]अर्वाञ्चः [v]पितरः [v]मनुष्यान् [v]प्रपिपते प्रकर्षेण [३४]पिण्डभागितया अनुक्रमेण रक्षन्ति। अपरे परे पुरुषान् भजन्ते, अपरे परित्यजन्ति। छान्दसः श्लुः आत्मनेपदं च ॥ १०

इति द्वितीये पञ्चमे अष्टमोऽनुवाकः ॥ १५

१.२.२७- १.३.२) इति, [७७]तदेतद्विधत्ते– 'आर्षेयं वृणीते बन्धोरेव नैत्यथो संतत्यै' इति ॥ ऋषेरपत्यम् [v]आर्षेयम् [७८]आत्मीयगोत्रर्षीन्तद्धितप्रत्ययान्तानामन्त्रितविभक्त्या यथाप्रवरं [v]वृणीते। यथा– "*अग्ने महाꣳ असि ब्राह्मण भारत। †भार्गव च्यावनाप्नवानौर्व जामदग्न्येति भृगुगोत्राणां पञ्चार्षेयः प्रवरः" इति। अनेन तत्तदपत्यतयाऽग्निः [७९]उपचर्यते। एवं वृणानः पुरुषः [v]बन्धोः भृग्वादेः सकाशात् [v]न [v]एति नापगच्छति। अपि चेदमार्षेयवरणमस्य [८०]पुत्रादिसंतानाय भवति ॥ २०

परस्तादिति ॥ [८१]अस्मिन् वरणे प्रकारविशेषं विधत्ते– 'परस्तादर्वाचो वृणीते तस्मात् परस्तादर्वाञ्चो मनुष्यान् पितरोऽनु प्र पिपते' इति ॥ वर्तमानं यजमानपेक्ष्य पूर्वभावी यो गोत्रप्रवर्तकस्तमारभ्य तदपत्यपरम्परया [v]अर्वाचः [८२]नीचान् [v]वृणीते। तथैव पूर्वमुदाहृतं– 'भृगोरपत्यं च्यवनस्तस्यापत्यमाप्नवानस्तस्यापत्यम् [८३]ऊर्वः तस्यापत्यं जमदग्निस्तस्य [८४]संततिजः यजमानः' इति। तदेतदर्वाक्त्वम्। यस्माद्धोता पूर्वभाविनमारभ्यार्वाचो वृणीते [v]तस्मात् एव कारणाल्लोकेऽपि पूर्वपूर्वभाविनः [v]पितरः उत्तरोत्तरभाविनः पुत्राननुक्रमेण पालयन्ति ॥ २५

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥

३३. तं. त्रि.हो– जमदग्न्यन्तात्; लं– जमदग्न्यान्तान्। ३४. तं३.मै.लं.हो– विद्याभागि०।

७७. हा–तदेतत् अभिधत्ते। ७८. ड–°गोत्रर्षिः तद्धितप्रत्ययान्तानामतीतविभक्त्या। *(द्र. तैब्रा. ३.५.३)। †(द्र. आपश्रौ २४.५.१२)। ७९. क.हा–उपचर्येत। ८०. अ.इ.उ.जो.ना.पा.हा–पुत्रसंतानाय। ८१. अ.इ.उ.जो.ना.पा.हा–तस्मिन्। ८२. ड–'नीचान्' नास्ति। ८३. आ.ड–और्वः। ८४. आ–संततिः। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्ने महाꣳ असीत्याह महान् ह्येष यदग्निर्ब्राह्मणेत्याह ब्राह्मणो ह्येष भारतेत्याहैष हि देवेभ्यो हव्यं भरति देवेद्ध इत्याह देवा ह्येतमैन्धत

अग्ने। महान्। असि। इति। आह। महान्। हि। एषः। यत्। अग्निः। ब्राह्मण। इति। आह। ब्राह्मणः। हि। एषः। भारत। इति। आह। एषः। हि। देवेभ्यः। हव्यम्। भरति। देवेद्ध इति देव-इद्धः। इति। आह। देवाः। हि। एतम्। ऐन्धत।

'अग्ने महाꣳ असि' इत्यादिना प्रवरमन्त्रपदानि व्याचष्टे॥ महान् ह्येष इति। स्वभावत एवेति भावः। ब्राह्मणो ह्येष इति। [v]यत् [v]अग्निः एव जात्या [v]ब्राह्मणः, ब्रह्मणो मुखात् द्वयोरपि जातत्वात्। ब्रह्मणोऽपत्यत्वेन वा स्तुतिः। "ब्राह्मोऽजातौ" (पा ६·४·१७१) इति व्यत्ययेन प्रवर्तते। एष हीति। [2]हविषां भरणात् भारतः, भरतानामृत्विजामपत्यत्वात् भारतः॥

अथ प्रवरमुक्त्वा निविदोऽन्वाह– 'देवेद्धः' इत्याद्याः॥ ता व्याचष्टे–'देवा हि' इति। [v]देवाः ऋत्विज इन्द्रादयो वा [3v]एतम् [v]ऐन्धत दीपयन्ति, तस्मात् [v]देवेद्धः। "तृतीया कर्मणि"

द्वितीयाद्याः सामिधेन्यो व्याख्याता अष्टमे स्फुटम्॥

अथ नवमे [1]प्रवरमन्त्रस्य निगदस्य स्रुगादापननिगदस्य च व्याख्यानं प्रवर्तते। ते च [2]निगदादयो मन्त्रकाण्डे (तैब्रा ३·५·३-४) समाम्नाताः। कल्पः– "अथ निवित्पदान्यन्वाह देवेद्धो मन्विद्ध इति सप्तमे स्वनिति अथ चतसृषु" (द्र. आपश्रौ २४·११·१७-२४·१२·१*) इति॥ पाठस्तु–"अग्ने महाꣳ असि ब्राह्मण भारत। असावसौ। देवेद्धो मन्विद्धः। ऋषिष्टुतो विप्रानुमदितः। कविशस्तो ब्रह्मसꣳशितो घृताहवनः। प्रणीर्यज्ञानाम्। रथीरध्वराणाम्। अतूर्तो होता। तूर्णिर्हव्यवाट्। आस्पात्रं जुहूर्देवानाम्। चमसो देवपानः। अराꣳ इवाग्ने नेमिर्देवाꣳस्त्वं परिभूरसि। आवह देवान् यजमानाय" (तैब्रा ३·५·३)॥ अत्र 'अग्ने महान्' इत्यारभ्य 'असावसौ' इत्यन्तः प्रवरमन्त्रः। अवशिष्टा निविन्मन्त्राः। तेषामर्थं [3]ब्राह्मणव्याख्यानमुखेनैव स्पष्टीकरिष्यामः॥

अग्न इति॥ [4]तत्र प्रवरमन्त्रार्थं दर्शयति–'अग्ने महाꣳ असीत्याह महान् ह्येष यदग्निर्ब्राह्मणेत्याह ब्राह्मणो ह्येष भारतेत्याहैष हि देवेभ्यो हव्यं भरति' इति॥ [v]अग्निः इति [v]यत् [v]एषः यस्मात् सर्वाहुत्याधारत्वेन [v]महान् तस्मान्मन्त्रे [v]महान् [v]असि [v]इति उच्यते। यस्माद्ब्राह्मणवर्णाभिमानी तस्मात् [v]ब्राह्मणः [v]इति संबोध्यते। यस्मात् [v]एषः [v]देवेभ्यः [v]हव्यं [v]भरति धारयति तस्मात् [v]भारत इति संबोध्यते। मन्त्रे येयम् 'असावसौ' इति वीप्सा तेन (तया) भृग्वादीनामृषीणां नामनिर्देशोऽभिप्रेतः। स च 'भार्गव च्यावन' इत्यादिना पूर्वानुवाक एवास्माभिरुदाहृतः॥

देवेद्ध इति॥ निवित्पदेषु सप्तसु [5]प्रथमपदस्यार्थं दर्शयति– 'देवेद्ध इत्याह देवा ह्येतमैन्धत इति॥ यस्मात् [v]देवाः स्वकीयेषु यागेषु [v]एतम् अग्निम् [v]ऐन्धत प्रज्वालितवन्तस्तस्मात् [v]देवेद्धः [v]इति उच्यते॥

१. तं३.लं– 'ब्राह्मणः' इत्यस्यानन्तरम् 'अग्निः'। २. हो– हविषः। ३. तं३.लं.हो– एनम्।

१. ड.शृं.हो१– निवित्पदानाम् आवाहन°। २. ड.शृं.हो१– निविदादयः। * [अत्र कौषीतकिब्राह्मणम् (३·३·१४-१७) अपि द्रष्टव्यम्।]। ३. ड– ब्राह्मणमुखेनैव। ४. क–अत्र। ५. आ– प्रथमस्यार्थं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्विद्ध इत्याह मनुर्ह्येतमुत्तरो देवेभ्य ऐन्द्धर्षिष्टुत इत्याहर्षयो ह्येतमस्तुवन् विप्रानुमदित इत्याह (१) विप्रा ह्येते यच्छुश्रुवाꣳसः कविशस्त इत्याह कवयो ह्येते यच्छुश्रुवाꣳसो ब्रह्मसꣳशित इत्याह ब्रह्मसꣳशितो ह्येष घृताहवन इत्याह घृताहुतिर्ह्यस्य प्रियतमा

मन्विद्ध इति मनु - इद्धः । इति । आह । मनुः । हि । एतम् । उत्तर इत्युत् - तरः । देवेभ्यः । ५
ऐन्द्ध । ऋषिष्टुत इत्यृषि - स्तुतः । इति । आह । ऋषयः । हि । एतम् । अस्तुवन् । विप्रानुमदित
इति विप्र - अनुमदितः । इति । आह (१) । विप्राः । हि । एते । यत् । शुश्रुवाꣳसः । कविशस्त
इति कवि - शस्तः । इति । आह । कवयः । हि । एते । यत् । शुश्रुवाꣳसः । ब्रह्मसꣳशित इति
ब्रह्म - सꣳशितः । इति । आह । ब्रह्मसꣳशित इति ब्रह्म - सꣳशितः । हि । एषः । घृताहवन इति
घृत - आहवनः । इति । आह । घृताहुतिरिति घृत - आहुतिः । हि । अस्य । प्रियतमेति प्रिय - तमा । १०

(पा ६·२·४८) इति पूर्वपदप्रकृतिस्वरत्वम् । मनुर्ह्येतमिति । [v]मनुः [v]हि [v]एतम् [v]देवतार्थम् [v]ऐन्द्ध [v]देवेभ्यः । अपि वा मनुः [v]उत्तरः एतस्मात् [v]मन्विद्धः । पूर्ववत् स्वरः । एवं सर्वत्र । [v]ऋषयः [6]दर्शनवन्तोऽपि एनम्[6] [v]अस्तुवन् । विप्रा हीति । [v]विप्राः मेधाविनः ये [v]शुश्रुवाꣳसः श्रुतार्थाः [7]गृहीतवेदार्थाः तैरप्यनुमदितः अनुमोदित अनुक्रमेण वा स्तुतः । मद तृप्तियोगे, मन्दतेर्वा छान्दसो नुमभावः । १५

कवयो हीति ॥ [v]कवयः क्रान्तदर्शनाः सूक्ष्मदृशः तेऽपि श्रुतवन्तः एव । तैरपि शस्तः स्तुतः । ब्रह्मसꣳशितो हीति ॥ ब्रह्मणा ऋगादिना मन्त्रेण परवस्तुनैव वा संशितः सम्यक् तीक्ष्णीकृतः । घृताहुतिर्हीति । [8]घृतमाहवनमाहुतिः [9]प्रीतिहेतुरस्येति [v]घृताहवनः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ।

मन्विद्ध इति ॥ [6]द्वितीयपदस्यार्थं दर्शयति– 'मन्विद्ध इत्याह मनुर्ह्येतमुत्तरो देवेभ्य ऐन्द्ध' इति ॥ [v]देवेभ्यः [v]उत्तरः देवैरिन्धनादूर्ध्वं स्वकीययागे [v]मनुः [v]ऐन्द्ध ॥ २०

ऋषिष्टुत इति ॥ उत्तरेष्वपि [7]पञ्चसु पदेषु[7] प्रसिद्धार्थतां हिशब्दो द्योतयति–'ऋषिष्टुत इत्याहर्षयो ह्येतमस्तुवन् विप्रानुमदित इत्याह विप्रा ह्येते यच्छुश्रुवाꣳसः कविशस्त इत्याह कवयो ह्येते यच्छुश्रुवाꣳसो ब्रह्मसꣳशित इत्याह ब्रह्मसꣳशितो ह्येष घृताहवन इत्याह घृताहुतिर्ह्यस्य प्रियतमा' इति ॥ [v]शुश्रुवाꣳसः श्रुताध्ययनसंपन्ना जात्या [v]विप्राः विद्यया [8]विबुधाः [v]कवयः च भवन्ति तैरयमनुमदितस्तोषितः शस्तः स्तुतश्च । ब्रह्मणा मन्त्रेण संशितस्तीक्ष्णीकृतः । घृतरूपमाहवनम् [9]आहुतिः यस्यासौ [v]घृताहवनः ॥ २५

४. तं३.लं.हो– देवार्थम् । ५. मै– उत्तरो मनुः । ६–६. मै४– हि एनम् । ७. हो– गृहीतपदार्थाः । ८. तं३.लं– घृताहवन° ९. हो– प्रीतिर्हेतु° ।

६. अ.इ.उ.जो.ना.पा.हा– °यपादस्यार्थं । ७–७. क–पञ्चपदेषु; हा–पञ्चसु पादेषु । ८. ड.शृं. हो१– 'विबुधाः' नास्ति । ९. ड– वीर्यम् । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रणीर्यज्ञानामित्याह प्रणीर्ह्येष यज्ञानाꣳ रथीरध्वराणामित्याहैष हि देवरथोऽतूर्तो होतेत्याह न ह्येतं कश्चन (२) तरति तूर्णिर्हव्यवाडित्याह सर्वꣳ ह्येष तरत्यास्पात्रं जुहूर्देवानामित्याह जुहूर्ह्येष देवानां

प्रणीरिति प्र - नीः । यज्ञानाम् । इति । आह । प्रणीरिति प्र - नीः । हि । एषः । यज्ञानाम् । रथीः । अध्वराणाम् । इति । आह । एषः । हि । देवरथ इति देव - रथः । अतूर्तः । होता । इति । आह । न । हि । एतम् । कः । चन (२) । तरति । तूर्णिः । हव्यवाडिति हव्य - वाट् । इति । आह । सर्वम् । हि । एषः । तरति । आस्पात्रम् । जुहूः । देवानाम् । इति । आह । जुहूः । हि । एषः । देवानाम् ।

प्रणीरिति । प्रकर्षेण [v]यज्ञानां नेता उत्पादयिता ॥

देवरथ इति ॥ [v]अध्वराणां देवान् प्रति रंहयिता [v]देवरथः । रंहणात् [v]रथीः । औणादिक इप्रत्ययो वर्णविकारः । न हीति । कश्चिदप्येनं [v]न [v]तरति नातिक्रमते । तरतेः कर्मणि निष्ठायां [10]छान्दसो नत्वाभावः । नञ्समासे "परादिश्छन्दसि०" (पा ६·२·१९९) इत्युत्तरपदाद्युदात्तत्वम् । केनचिदप्यतिक्रमितुं न शक्तः । [v]होता देवानामाह्वाता । सर्वं हीति । तरतेः कर्तरि औणादिको नित्प्रत्ययः (द्र. उ ५००), क्तिन्येव वा "ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवति" (पा ८·२·४४ वा १) इति निष्ठावद्भावः, "रदाभ्याम्०" इति णत्वम् । [v]सर्वं तरितुमतिक्रमितुं समर्थाः, हविषां वोढारम् । जुहूर्हीति । जुहूस्थानीयोऽयं [v]देवानां, यथा जुह्वाऽग्नौ हविः प्राप्यते एवमग्निना देवेषु हविः प्राप्स्यते इति । [11]विशेषस्त्वस्य आस्पात्रत्वम् । अयस्पात्रवत् दृढतरा अग्निलक्षणा जुहूरिति ॥

प्रणीरिति ॥ अनुच्छ्वासेन पठनीयानां ससपदानामर्थं दर्शयित्वोच्छ्वासादूर्ध्वं पठनीयानां चतसृणां निविदामर्थं दर्शयति– 'प्रणीर्यज्ञानामित्याह प्रणीर्ह्येष यज्ञानाꣳ रथीरध्वराणामित्याहैष हि देवरथोऽतूर्तो होतेत्याह न ह्येतं कश्चन तरति तूर्णिर्हव्यवाडित्याह सर्वꣳ ह्येष तरति' इति ॥ [v]यज्ञानां [10]प्रणेतृत्वमग्नौ प्रसिद्धम् । [v]रथीः देवानां हविर्वहनाय [v]अध्वराणां [11]संबन्धी रथोऽयमग्निः । यस्मादाह्वातारम् एतम् अग्निं कोऽपि देवो [v]न [v]तरति नातिक्रामति तस्मादयम् [v]अतूर्तः [v]होता [v]इति उच्यते । यस्मात् [v]सर्वम् अपि देवमयं [12]हविर्वहनात् [v]तरति प्राप्नोति तस्मात् [v]तूर्णिः [v]हव्यवाट् [v]इति उच्यते ॥

आस्पात्रमिति ॥ एताभ्यश्चतसृभ्यो निविद्भ्य ऊर्ध्वमुच्छ्वासं कृत्वा पश्चात् पठनीयानां चतसृणां [13]निविदामर्थं दर्शयति– 'आस्पात्रं जुहूर्देवानामित्याह जुहूर्ह्येष देवानां चमसो देवपान इत्याह

---

१०. तं३.लं.हो– छान्दसे । ११–११. तं३.लं.हो–विशेषस्य ।

---

१०. आ.क.ना– नेतृत्व०; अ.इ.उ.ड.जो.पा.हा.हो१ – होतृत्व० । ११. अ.इ.उ.जो.पा.हा– संवीत० । १२. ड.श्रं– °र्वहनेन । १३. अ.इ.उ.जो.ना.पा.हा– 'निविदाम्' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चमसो देवपान इत्याह चमसो ह्येष देवपानोऽराꣳ इवाग्ने नेमिर्देवाꣳस्त्वं परिभूरसीत्याह देवान् ह्येष परिभूर्यद्ब्रूयादा वह देवान् देवयते यजमानायेति भ्रातृव्यमस्मै (३) जनयेदा वह देवान् यजमानायेत्याह यजमानमेवैतेन वर्धयत्य-

चमसः। देवपान इति देव - पानः। इति। आह। चमसः। हि। एषः। देवपान इति देव - पानः। अरान्। इव। अग्ने। नेमिः। देवान्। त्वम्। परिभूरिति परि - भूः। असि। इति। आह। देवान्। हि। एषः। परिभूरिति परि - भूः। यत्। ब्रूयात्। एति। वह। देवान्। देवयत इति देव - यते। यजमानाय। इति। भ्रातृव्यम्। अस्मै (३)। जनयेत्। एति। वह। देवान्। यजमानाय। इति। आह। यजमानम्। एव। एतेन। वर्धयति।

चमसो हीति ॥ देवा येन सोमं पिबन्ति सः [v]देवपानः [v]चमसः। तत्स्थानीयोऽयमग्निः। देवान् हीति। [v]एषः हि [v]देवान् परितः सर्वतो भवति परिगृह्णाति व्याप्नोति [v]अरान् [v]इव [v]नेमिः तस्मात् [v]देवान् [v]परिभूः [v]असि [v]इति उच्यते। " अभितःपरितः° " (द्र. पाभा २·३·२ वा १) इति द्वितीया, छान्दसस्तसि लोपः ॥

[१२]यद्ब्रूयादिति ॥ " आवह देवान् यजमानाय " (तैब्रा ३·५·३) इत्यन्ता निवित्। शाखान्तरेषु तु ' आवह देवान् देवयते यजमानाय ' इति पाठः। सोऽनेन निन्द्यते। यदि [v]ब्रूयात् [v]देवयते [v]यजमानाय [v]इति [v]भ्रातृव्यम् [v]अस्मै यजमानाय [v]जनयेत्। तथा हि— [v]यजमानाय [v]देवान् [v]आवह [v]इति एव यावद्देवानामुपादाने सिद्धे पुनः देवानात्मन इच्छते यजमानायेति विशेषणोपादानं देवव्यतिरिक्तानामनिष्यमाणतया यजमानस्य [१३]भ्रातृव्यवत्त्वं [१४]सूचयेत्। ततश्च भ्रातृव्यवान् [१५]यजमानः स्यात्। तस्मात् ' देवयते ' इति पदं नोपादेयम्। ततश्च भ्रातृव्यशङ्काया अभावात् [v]यजमानं [v]वर्धयति [v]एव ऐश्वर्येण ॥

चमसो ह्येष देवपानोऽराꣳ इवाग्ने नेमिर्देवाꣳस्त्वं परिभूरसीत्याह देवान् ह्येष परिभूर्यद्ब्रूयादा वह देवान् देवयते यजमानायेति भ्रातृव्यमस्मै जनयेदा वह देवान् यजमानायेत्याह यजमानमेवैतेन वर्धयति ' इति ॥
[v]एषः अग्निः [v]देवानां जुहूसदृशो जुह्वामिवास्मिन् हविष्प्रक्षेपात्। न चास्य दारुमयजुहूवच्छैथिल्यं किं तु [v]आस्पात्रं लोहपात्रवत् [१४]दार्ढ्यमित्यर्थः। यथा मनुष्याणां सोमपानहेतुः [v]चमसः [१५]तथा देवानां पानसाधनचमसस्थानीयोऽयमग्निः। हे [v]अग्ने, त्वं यथा शकटचक्रस्थितान् कुलालचक्रस्थितान् वा तिर्यक्कीलरूपान् [v]अरान् [v]नेमिः परितो व्याप्नोति तथा देवानां [v]परिभूः परितो व्याप्तवान् [v]असि। चतुर्थ्यां निविदि ' देवयते ' इति पदं शाखान्तरे पठ्यते। तदत्र यदि [v]ब्रूयात् तदा होता यजमानस्य

१२. लं– यदि ब्रूया°। १३. लं.हो – भ्रातृव्यत्वम्। १४. मै – सूचयति। १५. मै– ' यजमान ' इत्यस्यानन्तरं ' च '।

१४. आ– दृढमि°। १५. अ.इ.उ.जो.पा– तथा त्वं; हा– तथा तथा त्वं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

-ग्निमग्न आ वह सोममा वहेत्याह देवता एव तद्यथापूर्वमुप ह्वयत

अग्निम्। अग्ने। एति। वह। सोमम्। एति। वह। इति। आह। देवताः। एव। तत्। यथापूर्वमिति यथा-पूर्वम्। उपेति। ह्वयते।

अथ निविद उक्त्वा 'अग्निमग्न आवह' इत्यादिना देवता आवाहयति– यथापूर्वमिति ॥ ५ अग्न्याद्या यागदेवता अनुक्रमेणाग्निनाऽऽवाहयति ॥

[r]भ्रातृव्यं [r]जनयेत्। देवानिच्छतीति देवयंस्तस्मै देवयते यजमानाय। एतत्पदप्रयोगेणान्यः कश्चिदेतदीयान् देवानिच्छतीति [11]प्रतिभाति। तदेतद्भ्रातृव्यस्योत्पादनम्। तस्मात् तत्पदं परित्यज्यास्मै [r]यजमानाय [r]देवान् [r]आ [r]वह [r]इति एतावदेव वाक्यशेषात् तेन [10-r]एव [r]एतेन-[10] [r]यजमानं [r]वर्धयति वृद्धिं प्रापयति ॥

अग्निमिति ॥ कल्पः– "देवतां देवतामावाह्य व्यनित्यग्निमग्न आवह सोममावहाग्निमावह १० प्रजापतिमित्युपाꣳश्वावहेत्युच्चैर्यद्देवत्यो वा भवत्यग्नीषोमावावहेन्द्राग्नी आवहेन्द्रमावह महेन्द्रमावह देवाꣳ आज्यपाꣳ आवहाग्निं होत्रायाऽऽ वह स्वं महिमानमावहेति न स्वं [18]-महिमानमावहेदा चाग्ने-[18] देवान् वह सुयजा च यज जातवेद इत्युक्त्वा" (द्र. आश्वश्रौ १·३·७-२२) इति ॥ अत्राऽऽवाहननिगदो मन्त्रकाण्डे (तैब्रा ३·५·३) समाम्नातः [19]-सर्वोऽपि सूत्रकारेण-[19] पठितः ॥

-[तस्य सर्वस्य तात्पर्यं दर्शयति– 'अग्निमग्न आवह सोममावहेत्याह देवता एव तद्यथापूर्व- १५ मुपह्वयते' इति ॥ तत् तेनाऽऽवाहननिगद आवहेति पाठेनाऽऽज्यभागादिसर्वयागदेवता अनुक्रमेण [20]-एव आह्वयति-[20]।]-।

हे आहुत्याधारभूताग्ने, प्रथमाज्यभागदेवतामग्निमावह। द्वितीयाज्यभागदेवं सोममावह। पौर्णमास्याममावास्यायां च प्रथमपुरोडाशदेवमग्निमावह। [21]पौर्णमास्यामुपांशुयागदेवं प्रजापतिमावह। प्रजापतिपदं शनैरुच्चार्याऽऽवहेतिपदमुच्चैः [22]उच्चारयेत्। पौर्णमास्यां [23]द्वितीयपुरोडाशदेवरूपावग्नीषोमावावह। २० अमावास्यायामसांनाय्यिनो द्वितीयपुरोडाशदेवत्वेनेन्द्राग्नी आवह। अगतश्रियः सांनाय्यदेवमिन्द्रमावह। गतश्रियो महेन्द्रमावह। आज्यपान् प्रयाजानूयाजदेवानावह। [24]-अग्निं होत्राय होमस्य-[24] [25]स्विष्टकृत्व-करणाय। आवाहनविषयाणामुक्तानां देवानां यो यस्य देवस्य स्वकीयो महिमा सामर्थ्यातिशयस्तं महिमान-मावह। अत्र हविर्भुज एव देवानभिप्रेत्य स्वं महिमानमित्युच्यते, न त्वावाहनकर्तुरग्नेर्महिमानं तस्याऽऽ-वाहनविषयत्वाभावात्, इति कल्पसूत्रस्यार्थः ॥ जातानि वेदांसि ज्ञानानि यस्मादसौ जातवेदाः। सर्वज्ञोऽयं २५ सर्वदेवमहिमाभिज्ञत्वादित्यर्थः। तादृश हेऽग्ने, त्वं देवानावह च सुयजा शोभनेन यज्ञेन यज च। न केवलमावाहनं कर्तव्यं, किं तु हविष्प्रापणलक्षणो यागोऽपि त्वयैव [26]कर्तव्यः। अत्र सूत्रे प्रजापतिमित्युपांश्वा-वहेत्युच्चैर्यद्देवत्यो वा भवतीत्युक्तं तच्चोपांशुयाजे प्रजापतिविष्ण्वग्नीषोमाणां विकल्पाभिप्रायेण द्रष्टव्यम्। एतस्याऽऽवाहननिगदस्य तात्पर्यं संक्षेपेण दर्शयति– 'अग्निमग्न आ वह सोममा वहेत्याह देवता एव

१६. आ.हा– प्रतिमा भवति। १७–१७. क.हो१–एव; हा– एव तेन; शृं–एव एनम्; ड– एनम्। ३० १८–१८. क– °नमावहादावग्ने। १९–१९. क– सर्वोऽन्यत्र नात्र। *–* [ग्रन्थोऽयमधिक इवाभाति।]। २०–२०. आ.क– ह्वयते। २१. हा– °यागे देवं; शृं– °याजदेवं। २२. ड– उच्चरेत्। २३. आ– °देवमग्नीषोमरूपमावह। २४–२४. हा–अग्निहोमस्य। २५. आ.हा–स्विष्टकरणाय। २६. शृं.हो१– कार्यः; ड– कार्य इत्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आ चाग्ने देवान् वह सुयजा च यज जातवेद इत्याहाग्निमेव तत् सꣳस्यति सोऽस्य सꣳशितो देवेभ्यो हव्यं वहत्य-

एति । च । अग्ने । देवान् । वह । सुयजेति सु - यजा । च । यज । जातवेद इति जात - वेदः । इति । आह । अग्निम् । एव । तत् । समिति । स्यति । सः । अस्य । सꣳशित इति सं - शितः । देवेभ्यः । हव्यम् । वहति । ५

आ चाग्न इति । [V]आ [V]वह [V]देवान् [V]सुयजा त्वम् अभिन्नेन [V]च शोभनेन च यागेन च देवान् [V]यज हे [V]जातवेदः, त्वं खलु जातानां वेदिता जातवेदा जातधनो वा इत्येवम् उपश्लोकनेन [V]अग्निं [V]सꣳस्यति सम्यक् तीक्ष्णीकरोतीत्येव । [V]सः चाग्निः [१६]तथोज्ज्वलीकृतः तुष्टो देवस्थानं प्रापयति ॥

तद्यथापूर्वमुप ह्वयते ' इति ॥ [V]तत् तेनाऽऽवाहननिगदेनाऽऽज्यभागादिस्विष्टकृदन्तदेवताः सर्वाः [२७]अपि क्रमेण १०
हूतवान् भवति । [२८]प्रथममाज्यभागदेवौ तथा प्रधानदेवता इत्यादिक्रमः ' यथापूर्वम् ' [२९]इत्यनेन उच्यते ॥

एति ॥ आवाहननिगदावसाने [३०]यदेतन्निगमनवाक्यं तस्य तात्पर्यं दर्शयति– ' आ चाग्ने देवान् वह सुयजा च यज जातवेद इत्याहाग्निमेव तत् सꣳस्यति सोऽस्य सꣳशितो देवेभ्यो हव्यं वहति ' इति ॥ [V]तत् तेन वाक्यपाठेन [V]अग्निम् [V]एव [V]सꣳस्यति [३१]तीक्ष्णीकरोति । [V]सः अग्निस्तीक्ष्णीकृतोऽप्रमत्तः सन् [३२V]अस्य यजमानस्य [V]हव्यं [V]देवेभ्यः क्रमेण [V]वहति ॥ १५

कल्पः–"अथ स्रुगादापनेन स्रुचावादापयत्यग्निर्होता वेत्त्वित्यनुवाकेनाध्वर्युर्जुहूपभृतौ स्रुचावादत्ते" (द्र. आश्वश्रौ १·४·९-१०) इति । " घृतवति शब्दे जुहूपभृतावादाय " (आपश्रौ २·१७·१) इत्याध्वर्यवसूत्रे [३३]दर्शितवान् । होता तु– " घृतवतीमध्वर्यो स्रुचमास्यस्व " (तैब्रा ३·५·४) इत्यनेन शब्देन युक्तम् अनुवाकं पठति । तदिदं स्रुचोरादापनम् । सोऽयमनुवाको मन्त्रकाण्डे (तैब्रा ३·५·४) समाम्नातः । तस्य पाठस्तु– " अग्निर्होता वेत्त्वग्निः । होत्रं वेत्तु प्रावित्रम् । स्मो वयम् । साधु ते यजमानदेवता । घृतवती- २०
मध्वर्यो स्रुचमास्यस्व । देवायुवं विश्ववाराम् । ईडामहै देवाꣳ ईडेन्यान् । नमस्याम नमस्यान् । यजाम यज्ञियान् " (तैब्रा ३·५·४) इति । अयमग्निर्होता होमस्य कर्ता । तथा चान्यत्र मन्त्रब्राह्मणे [३५]आम्नायते– " अग्ने यष्टरिदं नम इत्याह । अग्निर्वै देवानां यष्टा " (तैब्रा ३·३·७) इति । अतोऽयमग्निर्वेत्तु होमक्रमं जानातु । तदेव [३५]वेदनमुत्तरवाक्ये स्पष्टीक्रियते । प्रकृष्टमवित्रं फलदानरूपमस्मद्रक्षणं यस्मिन् होमानुष्ठाने तदिदं प्रावित्रम् । तादृशं होत्रं होमानुष्ठानं वेत्तु होमक्रमं जानातु । न केवलं दैव्यस्य होतुरस्मेरुपरि भारः प्रक्षिप्यते किं २५
तु वयं स्मो मनुष्यहोतारो [३६]वयमप्यत्र वर्तामहे । अतो वयमपि [३७]होमक्रमज्ञानवन्तः तिष्ठामः । हे यजमान,

१६. मै४– तथा स्थूलीकृतः ।

२७. आ.ड– 'अपि' नास्ति । २८. आ.क.हा.हो१– प्रथमाज्य° । २९. आ– इत्यादिना । ३०. अ.इ.उ.पा.हा– °वाच्यं । ३१. ड.शृ.हो१– °करोत्येव । ३२. आ– तस्य । ३३. ड– अभिहितवान्; शृ– अभिहितत्वात् । ३४. आ–आम्नातम् । ३५. आ– °वाक्येन (ण) । ३६. ड– वयं च । ३७. होमक्रमं जानन्तः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

-ग्निर्होते(४)त्याहाग्निर्वै देवानाꣳ होता य एव देवानाꣳ होता तं वृणीते स्मो वयमित्याहाऽऽत्मानमेव सत्त्वं गमयति साधु ते यजमान देवतेत्याहाऽऽशिषमेवैतामा शास्ते यद्ब्रूयाद्योऽग्निꣳ होतारमवृथा इत्यग्निनोभयतो यजमानं परि गृह्णीयात्

अग्निः । होता (४) । इति । आह । अग्निः । वै । देवानाम् । होता । यः । एव । देवानाम् । होता । तम् । वृणीते । स्मः । वयम् । इति । आह । आत्मानम् । एव । सत्त्वमिति सत् - त्वम् । गमयति । साधु । ते । यजमान । देवता । इति । आह । आशिषमित्या - शिषम् । एव । एताम् । एति । शास्ते । यत् । ब्रूयात् । यः । अग्निम् । होतारम् । अवृथाः । इति । अग्निना । उभयतः । यजमानम् । परीति । गृह्णीयात् ।

[१७]स्मः स्याम [v]वयं होतारः सर्वदा तव [v]इति मन्त्रार्थं दर्शयति । आशिषमिति ॥ हे [v]यजमान, इज्यमाना [v]देवता तव साधयित्री अभिमतानाम् इत्येताम् [v]आशिषम् अनेन [v]आ

ते तव हविःस्वीकर्त्री देवता साधु फलं ददात्विति शेषः । हेऽध्वर्यो, [३८-]घृतपूर्णां स्रुचं[-३८] जुहूमास्यस्वाऽऽक्षिप स्वीकुर्विल्यर्थः । कीदृशीं स्रुचम् ? देवायुवं देवान् यौति मिश्रयतीति देवायुस्तादृशीम् । [३९]विश्ववारां विश्वान् सर्वान् राक्षसकृतान् विघ्नान् वारयतीति विश्ववारा तादृशीम् । ईडेन्यान् स्तुतिप्रियान् मनुष्यान् [४०]वयं स्तुमः । नमस्यान् नमस्कारप्रियान् पितॄन् [४१]नमस्करवाम । यज्ञियान् यज्ञप्रियान् देवान् यजाम ॥

अग्निरिति ॥ अग्नेर्होतृत्वं वेदेषु प्रसिद्धमित्येतत् दर्शयति–' अग्निर्होतेत्याहाग्निर्वै देवानाꣳ होता य एव देवानाꣳ होता तं वृणीते ' इति ॥

स्म इति ॥ दैव्यस्य होतुः साहाय्यमाचरितुं मानुषस्य स्वस्य [४२]सद्भाव इत्येतत् दर्शयति– ' स्मो वयमित्याहाऽऽत्मानमेव सत्त्वं गमयति ' इति ॥

साध्विति ॥ ददात्वित्येतादृशेनाशीरर्थेन [४३-]वाक्यपूरणम् इत्यभिप्रायं[-४३] दर्शयति– ' साधु ते यजमान देवतेत्याहाऽऽशिषमेवैतामा शास्ते ' इति ॥ शाखान्तरे ' साधु ते यजमान देवता ' इत्यस्योपरि ' योऽग्निं होतारमवृथाः ' (द्र. आश्वश्रौ १·४·१०) इति किंचिद्वाक्यमाम्नातम् । तस्यायमर्थः– हे यजमान, [४४-]यस्त्वमग्निं होतारमवृथा[-४४] होतृत्वेन वृतवानसि तस्य तव साधु ददात्विति ॥

यदिति ॥ तमिमं शाखान्तरपाठं दूषयति– ' यद्ब्रूयाद्योऽग्निꣳ होतारमवृथा इत्यग्निनोभयतो यजमानं परि गृह्णीयात् प्रमायुकः स्यात् ' इति ॥ ' अग्निर्होता वेत्त्वग्निः ' इत्युपक्रमे पठितम्, ' साधु ते यजमान देवता ' इत्यस्मादप्यूर्ध्वं यदि ' अग्निꣳ होतारम् ' इति [v]ब्रूयात् तदोभयोः पार्श्वयोर्यजमानः [v]अग्निना परिगृहीतो भवेत् । ततो दाहाधिक्येन म्रियेत । तस्माच्छाखान्तरपाठो नाऽऽदर्तव्यः ॥

१७. तै३.लं– ' स्मः ' नास्ति ।

३८–३८. ड– घृतसंपूर्णां । ३९. हा– ' विश्ववारां ' नास्ति । ४० अ.इ.उ.जो.ना.पा.हा– ' वयं ' नास्ति । ४१. आ– नमस्कुर्मः । ४२. शृं– सद्भावकथनम् । ४३. आ– वाक्यपूरणाय तात्पर्यार्थं; ड.हो१– वाक्यपूरणाय । ४४–४४. ड– यस्त्वग्निं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रमायुकः स्याद्यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योपभृत् (५) यद्द्वे इव ब्रूयाद्-भ्रातृव्यमस्मै जनयेद्घृतवतीमध्वर्यो स्रुचमाऽस्यस्वेत्याह यजमानमेवैतेन वर्धयति

प्रमायुक इति प्र-मायुकः। स्यात्। यजमानदेवत्येति यजमान-देवत्या। वै। जुहूः। भ्रातृव्यदेवत्येति भ्रातृव्य-देवत्या। उपभृदित्युप-भृत् (५)। यत्। द्वे इति। इव। ब्रूयात्। भ्रातृव्यम्। अस्मै। जनयेत्। घृतवतीमिति घृत-वतीम्। अध्वर्यो इति। स्रुचम्। एति। अस्यस्व। इति। आह। यजमानम्। एव। एतेन। वर्धयति।

[v]शास्ते। भवत्येव च तत्फलमिति। अत्र 'साधु ते यजमान देवता योऽग्निं होतारमवृथाः' (द्र. आश्वश्रौ १.४.१०) इत्यध्वर्युप्रवरानुवादेन शाखान्तरीयपाठः। सोऽनेन निन्द्यते। एवं हि ब्रुवन् [v]अग्निना [v]यजमानम् [v]उभयतः [v]परि [v]गृह्णीयात्, 'अग्निर्होता वेत्वग्निः', 'अग्निं होतारमवृथाः' (द्र. आश्वश्रौ १.४.१०) इत्येतयोर्मध्ये यजमानस्य श्रवणात्; ततोऽयं [v]प्रमायुकः १० मरणशीलः [v]स्यात्। तस्मात् तथा न कर्तव्यमिति। मीयतेश्छान्दस उकञ्॥

यजमानदेवत्येत्यादि॥ अत्र "घृतवतीमध्वर्यो स्रुचम्" (तैब्रा ३.५.४) इत्येकवचनेन स्रुक् निर्दिश्यते। 'द्वे' इति जुहूपभृतौ आदीयेते। तस्मात् द्वित्वादानस्याभिप्रायं ब्राह्मणमिदमिति दर्शयति– [v]यत् द्वे [v]इव [v]ब्रूयात् [१८]सामान्यविवक्षां कृत्वा घृतवत्यौ स्रुचाविति; यदि द्वे एव जुहूपभृतौ पृथङ्निर्दिशेत् तदा भ्रातृव्यदेवत्याया उपभृतोऽप्युद्भूतरूपत्वाद्यजमानाय [v]भ्रातृव्यं १५ [v]जनयेत्। एकवचनेन निर्देशात् [v]यजमानदेवत्या [v]वै [v]जुहूः एव [१९]उद्भूतरूपा भवतीति भ्रातृव्याभावादैश्वर्येणैनं [v]वर्धयति इति। नन्वेकवचनेन सामान्यात् द्वयोरपि निर्देशात् पुनरप्युद्भूतैवोपभृत्

यजमानदेवत्या इति॥ यद्यपि जुहूपभृतौ द्वे अपि आदातव्ये तथाऽपि तयोः समं प्राधान्यं निवार्य जुह्वा एव प्राधान्यं [४५]द्योतयितुं स्रुचम् इत्येकवचनमेव [४६]पठनीयमित्येतदर्शयति– 'यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योपभृद्यद्द्वे इव ब्रूयाद्भ्रातृव्यमस्मै जनयेद्घृतवतीमध्वर्यो स्रुचमाऽस्यस्वेत्याह २० यजमानमेवैतेन वर्धयति' इति॥ स्रुचावित्येवं द्विवचनेन [r]द्वे [v]इव द्वे अपि समप्रधाने इव यदि [v]ब्रूयात् तदा यजमानसमानं [v]भ्रातृव्यम् उत्पादयेत्। तस्मादुपभृतमुपेक्षितामिव तिरस्कर्तुं जुहूप्राधान्यायैकवचनाभिधानेन [v]यजमानं वर्धितवान् भवति। न हि जुह्वा इवोपभृतः क्वचिदपि साक्षाद्धोमसाधनत्वमस्ति। तस्मादुपसर्जनत्वं तस्या युक्तम्॥

१८. तं३.लं.हो– °विवक्षिताम्। १९. त्रि.लं.हो– उद्भूता। २५

४५. शृं– दर्शयितुं। ४६. हो१– वदनीयमि°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवायुवमित्याह देवान् ह्येषाऽवति विश्ववारामित्याह विश्वꣳ ह्येषाऽवतीडामहै देवाꣳ ईडेन्यान् नमस्याम नमस्यान्

देवायुवमिति देव - युवम्। इति। आह। देवान्। हि। एषा। अवति।
विश्ववारामिति विश्व - वाराम्। इति। आह। विश्वम्। हि। एषा। अवति। ईडामहै।
५ देवान्। ईडेन्यान्। नमस्याम। नमस्यान्।

स्यात्। यद्यपि गुणभूतत्वादुपभृतः [२०]स्वातन्त्र्येण ग्रहणं नास्ति तथाऽपि तुल्यप्रतिपत्ती स्याताम्। नैष दोषः। द्वे इति द्विवचनान्तस्यैव प्रतिषेधो विवक्षितः। [२१-]इवशब्देन हि शब्दप्रतिपन्नयोः[-२१] द्वयोः समत्वं प्रतिद्योत्यते। तस्माद्धोमसाधनभूता जुहूरेव [२२]उपभृता गृह्यते॥

देवान् ह्येषेति॥ देवानात्मन इच्छति रक्षितुमेवेति भावः। विश्वं हीति। विश्वकाल-
१० प्रतिपत्तित्वात् [v]विश्वम् इयं रक्षति। मनुष्या वा इत्यादि। मनुष्यादयोऽपि देवताः। तत्र मनुष्यात्मिकाः [v]ईडेन्याः स्तुत्याः। औणादिक एन्यप्रत्ययः। पित्रात्मिका [v]नमस्याः। "नमो-वरिवश्चित्रङः क्यच्" (पा ३·१·१९), तदन्तादचो यत्। [२३]देवतात्मिका [v]यज्ञिया यज्ञाहा

देवायुवमिति॥ [४७]देवमिश्रेण देवरक्षणं [४८]विघ्ननिवारणेन विश्वरक्षणमभिप्रेतमित्येतद्दर्शयति-'देवायुवमित्याह देवान् ह्येषाऽवति विश्ववारामित्याह विश्वꣳ ह्येषाऽवति' इति॥

१५ **ईडामहा इति॥ ईडेन्यादिशब्दैः विवक्षितम् [४९]अर्थं दर्शयति-"ईडामहै देवाꣳ ईडेन्यान् नमस्याम नमस्यान् यजाम यज्ञियानित्याह मनुष्या वा ईडेन्याः पितरो नमस्या देवा यज्ञिया देवता एव तद्यथाभागं यजति' इति। 'देवताः [v]यजति' इत्येतदुपलक्षणम्। मनुष्यान् स्तौति पितॄन्नमस्यती-त्येतदपि द्रष्टव्यम्। एवं च सति यस्य मनुष्यादेर्यो भागः स्तुत्यादिरूप उपचरितस्तं भागमनतिक्रम्या-नुष्ठितवान् भवति॥**

२० २०. तं३-स्वतन्त्रं; लं.हो१-स्वातन्त्र्य°। २१-२१. त्रि-इवशब्दे तत्तच्छाब्द्यं प्रति°; पं२.लं. हो-इवशब्दे तभ(?) शाब्द्यं प्रति°; तं३-इवशब्देन हि शाब्द्यं प्रति। २२. मै४-उद्भूता। २३. तं३.लं. हो-देवात्मिका।

४७. क.हा- देवमिश्रेण ४८. शृं-विश्वविघ्न°। ४९. आ- 'अर्थं' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रवरादिमन्त्रव्याख्यानम्]

यजाम यज्ञियानित्याह मनुष्या वा ईडेन्याः पितरो नमस्या देवा यज्ञिया देवता एव (६) तद्यथाभागं यजति ॥ ९ ॥

[विप्रानुमदित इत्याह चनास्मै होतोपभृद्देवता एव त्रीणि च ।]

यजाम । यज्ञियान् । इति । आह । मनुष्याः । वै । ईडेन्याः । पितरः । नमस्याः । देवाः । यज्ञियाः । देवताः । एव । तत् । यथाभागमिति यथा - भागम् । यजति ॥ ९ ॥ ५

[शब्रा १.४.२.२-१७; ५.२.१-३]

यष्टव्याः । " यज्ञर्विग्भ्यां घखञौ " (पा ५.१.७१) यथाभागमिति । या देवता यस्यां प्रतिपतौ तत्तदनतिक्रमेण तां [v]यजति [vv]पूजयति ॥

इति द्वितीये पञ्चमे नवमोऽनुवाकः ॥

[50]अत्र मीमांसा ॥ दशमाध्यायस्य चतुर्थपादे चिन्तितम्— १०

" चातुर्मास्यातिदिष्टेषु निगमेष्वाज्यपानिति ।
विक्रियेत न वाऽऽघ्येऽपि किं स्याद्ध्याज्यपानिति ॥
दधिपानिति वा यद्वेत्येवं स्यात् पृषदाज्यपान् ।
द्रव्यद्वयोक्तेराद्यः स्याद्धविमात्रहविष्ट्वतः ॥
द्वितीयः स्यात् तृतीयोऽस्तु द्रव्यान्तरविधानतः । १५
गुणो दध्ना चित्रताऽऽज्ये ततो विक्रियते नहि " ॥ (जैन्या १०.४.४०-४२) ॥

चातुर्मास्येषु चोदकेनाऽऽवाहनस्वाहाकारायाड्जोषणनिगमा अतिदिष्टाः । तत्राऽऽज्यपशब्दः प्रयुक्तः – " देवाꣳ आज्यपाꣳ आवह " (तैब्रा ३.५.२), " स्वाहा देवाꣳ आज्यपान् ", " अयाड्देवानामाज्यपानां प्रिया धामानि " (तैब्रा ३.५.७), " देवा आज्यपा आज्यमजुषन्त " (तैब्रा ३.५.१८) इति ॥ सोऽयमाज्यपशब्दो विक्रियते न वेति संशयः । [51]तत्र विकारः [52]अपि त्रिविधः । तत्र ' दध्याज्यपान् ' इत्याद्यस्तावत् प्राप्नोति । कुतः ? " अथ पृषदाज्यं गृह्णाति । द्वयं [53]वा इदं [54]सर्पिश्चैव दधि च " (शब्रा ३.८.४.७) इति [55]द्रव्यद्वयस्योक्तत्वात् । [56]आज्यस्योपस्तरणाभिघारणार्थत्वेन हविःशेषत्वाद्धविष्ट्वं नास्तीति दध्येव हविः । ततो ' दधिपान् ' इति द्वितीयः पक्षः । दध्याज्यमेलनेन [57]पृषदाज्यनामकं द्रव्यान्तरम् उत्पद्यते[57] [58]तेन च अनूयाजा इज्यन्ते, ततः पृषदाज्यपानिति तृतीयः पक्षः । पृषत्वं नाम चित्रता, सा च आज्यगतो गुणः । स च दधिमेलनेन[58] निष्पद्यते । तस्मादाज्यस्यैव [59]द्रव्यत्वात् आज्यशब्दोपेता एव निगमाः पठितव्याः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः ॥

२४. तं३.मै.लं– पूरयति ।

५०. आ– अथ । ५१. क.शृं.हो१– ' तत्र ' नास्ति; अ.इ.उ.जो.ना.पा– तत्रापि । ५२. ड– ' अपि ' नास्ति । ५३. अ.इ.उ.जो.ना.पा.हा– वाव । ५४. आ– ' एव ' नास्ति । ५५. ड. हो१– द्रष्टव्यं द्वय° । ५६. अ.इ.उ.जो.पा.हा– °भिघारेण; ड.शृं.हो१–°भिघारणत्वेन । ५७–५७. आ.क– निष्पद्यते पृषदाज्यं द्रव्यान्तरम् । ५८–५८. आ.क – तदेव हविरिति पृषदाज्यपानिति तृतीयः पक्षः । दधिमेलनादाज्ये पृषत्ता गुणो । ५९. आ.क– हविष्ट्वमिति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रीꣳस्तृचाननु ब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात् पुरुषा ब्राह्मणो वैश्यः शूद्रस्तानेवास्मा अनुकान् करोति पञ्चदशानु ब्रूयाद्राजन्यस्य पञ्चदशो वै राजन्यः स्व एवैनꣳ स्तोमे प्रति ष्ठापयति त्रिष्टुभा परि दध्यादिन्द्रियं वै त्रिष्टुगिन्द्रियकामः खलु

त्रीन्। तृचान्। अन्विति। ब्रूयात्। राजन्यस्य। त्रयः। वै। अन्ये। राजन्यात्। पुरुषाः। ब्राह्मणः। वैश्यः। शूद्रः। तान्। एव। अस्मै। अनुकानित्यनु-कान्। करोति। पञ्चदशेति पञ्च-दश। अन्विति। ब्रूयात्। राजन्यस्य। पञ्चदश इति पञ्च-दशः। वै। राजन्यः। स्वे। एव। एनम्। स्तोमे। प्रतीति। स्थापयति। त्रिष्टुभा। परीति। दध्यात्। इन्द्रियम्। वै। त्रिष्टुक्। इन्द्रियकाम इतीन्द्रिय-कामः। खलु।

पुनरपि सामिधेनीरेवाधिकृत्योच्यते– '[१-]त्रींस्तृचानिति ॥ नवेत्यवचनादावृत्तौ नवर्चः[-१]। आद्यास्तिस्रः तिसृभिरुक्ता इत्येके। त्रित्वान्वयात् ब्राह्मणादीन् [२]अस्य [v]अनुकान्[-२] कमितृन्[३] [v]करोति। "अनुकाभिक°" (पा ५·२·७४) इति निपात्यते ॥

पञ्चदशो वा इति ॥ प्रजापतेरुरोबाहुप्रभवत्वाद्द्वयोः। पूर्वेण सहास्य विकल्पः ॥

व्याख्याता नवमे स्पष्टं प्रवरा [१]निविदादयः ॥

अथ दशमे नैमित्तिक्यः काम्याश्च सामिधेन्य उच्यन्ते ॥

त्रीनिति ॥ तत्र राजन्यं निमित्तीकृत्य विधत्ते– 'त्रीꣳस्तृचाननु ब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात् पुरुषा ब्राह्मणो वैश्यः शूद्रस्तानेवास्मा अनुकान् करोति' इति ॥ "प्र वो वाजाः" (तैब्रा ३·५·२) [२-]इत्येषा त्रिरावृत्ता[-२]। "अग्न आयाहि" (तैब्रा ३·५·२) [३]इत्येकस्तृचः। "त्वं वरुण" (तैब्रा ३·५·२) [४]इत्येका परिधानीया त्रिरावृत्ता। एवं त्रयस्तृचाः। तेन तृचानां त्रित्वेन [५]राजन्यव्यतिरिक्तान् ब्राह्मणादींस्त्रीन् वर्णान् राजन्यस्यानुकूलान् [६]करोति ॥

पञ्चदशेति ॥ पक्षान्तरं विधत्ते– 'पञ्चदशानु ब्रूयाद्राजन्यस्य पञ्चदशो वै राजन्यः स्व एवैनꣳ स्तोमे प्रति ष्ठापयति' इति ॥ प्रजापतेरुरसो बाहुभ्यां च [६-]पञ्चदशस्तोमस्य राजन्यस्य च[-६] उत्पन्नत्वादसौ स्तोमो राजन्यस्य स्वकीयः। यद्यपि "पञ्चदश सामिधेनीरन्वाह" (तैसं २·५·८) इति वर्णत्रयसाधारणवचनेनैवायं पक्षः प्राप्तस्तथापि 'त्रीꣳस्तृचान्' इत्यनेन विशेषवचनेन [८]नित्यबाधप्राप्तौ विकल्पार्थं 'पञ्चदश' इति प्रतिप्रसवो [९]विधीयते ॥

१–१. तं३– लं.हो१– त्रींस्तृचानि न(ने)वत्येकवचनादावृत्तौ एव नवत्यर्चः। २–२. लं.हो– अस्य; तं३– यस्यानुकान्। ३ तं३– 'कमितृन्' नास्ति।

१. आ– निगदादयः। २–२. आ.क– इत्येका त्रिरावृत्तत्वात्। ३. ड.शृं– इत्यादिक एक°। ४. ड– इत्येषा। ५. शृं हो१– क्षयियव्यति°। ६. ड– राजन्यपञ्चदशस्तोमयोः। ७. अ.जो.ना.पा.हा – °रणबलात्तेनैवायं। ८. शृं– नित्यवदूबाधप्राप्तौ; अ.इ.उ.जो.ना.पा.हा – नित्यवद्बाधकप्राप्तौ। ९. शृं– अभिधीयते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वै राजन्यो यजते त्रिष्टुभैवास्मा इन्द्रियं परि गृह्णाति यदि कामयेत (१) ब्रह्मवर्चसमस्तिवति गायत्रिया परि दध्याद्ब्रह्मवर्चसं वै गायत्री ब्रह्मवर्चसमेव भवति सप्तदशानु ब्रूयाद्वैश्यस्य सप्तदशो वै वैश्यः स्व एवैनꣳ स्तोमे प्रति ष्ठापयति जगत्या परि दध्याज्जागता वै पशवः

वै। राजन्यः। यजते। त्रिष्टुभा। एव। अस्मै। इन्द्रियम्। परीति। गृह्णाति। यदि। कामयेत ५
(१)। ब्रह्मवर्चसमिति ब्रह्म - वर्चसम्। अस्तु। इति। गायत्रिया। परीति। दध्यात्। ब्रह्मवर्चसमिति ब्रह्म - वर्चसम्। वै। गायत्री। ब्रह्मवर्चसमिति ब्रह्म - वर्चसम्। एव। भवति। सप्तदशेति सप्त - दश। अन्विति। ब्रूयात्। वैश्यस्य। सप्तदश इति सप्त - दशः। वै। वैश्यः। स्वे। एव। एनम्। स्तोमे। प्रतीति। स्थापयति। जगत्या। परीति। दध्यात्। जागताः। वै। पशवः।

त्रिष्टुभेति ॥ "त्वं वरुण उत" (तैब्रा ३·५·२) इति ॥ इन्द्रियं वा इति । १०
तद्धेतुत्वात्ताच्छब्द्यम् ॥

गायत्रियेति ॥ "आजुहोत" (तैब्रा ३·५·२) [१]इत्येतया। "*-पृथुपाजाः", "तꣳ सबाधः" (तैब्रा ३·६·१) इत्येते धाय्यास्थाने निधेये ॥

सप्तदशेति ॥ द्वयोरपि मध्यदेशप्रभवत्वात् प्रजापतेः।

त्रिष्टुभेति ॥ 'त्वं वरुण' इत्येतां परिधानीयां विधत्ते– 'त्रिष्टुभा परि दध्यादिन्द्रियं वै १५
त्रिष्टुगिन्द्रियकामः खलु वै राजन्यो यजते त्रिष्टुभैवास्मा इन्द्रियं परि गृह्णाति' इति। त्रिष्टुभ इन्द्रेण सहोत्पन्नत्वात् तत्संबन्धीन्द्रियरूपत्वम्। [२]राजन्यः च युयुत्सुत्वादिन्द्रियसामर्थ्यकामः ॥

यदीति ॥ राजन्यस्य नित्यां परिधानीयां विधाय [३]काम्यां विधत्ते–'यदि कामयेत ब्रह्मवर्चसमस्तिवति गायत्रिया परि दध्यात् ब्रह्मवर्चसं वै गायत्री ब्रह्मवर्चसमेव भवति' इति ॥ "आजुहोत दुवस्यत" २०
(तैब्रा ३·५·२) इत्येषा गायत्री। "तत् सवितुः" (तैसं १·५·६) इत्यस्या गायत्र्या उपदेशेन ब्रह्मवर्चसनिष्पत्तेः तस्य गायत्रीरूपत्वम् ॥

सप्तदशेति ॥ वैश्यं निमित्तीकृत्य विधत्ते– 'सप्तदशानु ब्रूयाद्वैश्यस्य सप्तदशो वै वैश्यः स्व एवैनꣳ स्तोमे प्रति ष्ठापयति' इति ॥ "समिध्यमानो अध्वरे", "समिद्धो अग्न आहुत" (तैब्रा ३·५·२) इत्यनयोर्मध्ये "पृथुपाजा अमर्त्यः", "तꣳ सबाधो यतस्रुचः" (तैब्रा ३·६·१, ऋसं ३·२७·५-६) इत्येतयोर्धाय्ययोः प्रक्षेपेण सप्तदशसंख्यानिष्पत्तिः। प्रजापतेर्मध्यदेशात् [११]वैश्यसप्तदशस्तोमयोः उत्पन्नत्वात् [१२]सप्तदशस्तोमस्तदीयः ॥ २५

४. लं.हो– इत्येकया; तं३– इत्येके। *–* लं– 'पृथुपाजा... इत्येतया' इत्ययं भागः नास्ति।

१०. ड.शृं.हो१–काम्यां परिधानीयां। ११. आ.क– सप्तदशस्तोमवैश्ययोः। १२.शृं– असौ स्तोम°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Mādhuban Trust, Delhi

पशुकामः खलु वै वैश्यो यजते जगत्यैवास्मै पशून् परि गृह्णात्येकविंशतिमनु ब्रूयात् प्रतिष्ठाकामस्यैकविंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्यै (२) चतुर्विंशतिमनु

पशुकाम इति पशु-कामः। खलु। वै। वैश्यः। यजते। जगत्या। एव। अस्मै। पशून्। परीति। गृह्णाति। एकविंशतिमित्येक-विंशतिम्। अन्विति। ब्रूयात्। प्रतिष्ठाकामस्येति प्रतिष्ठा-कामस्य। एकविंश इत्येक-विंशः। स्तोमानाम्। प्रतिष्ठेति प्रति-स्था। प्रतिष्ठित्या इति प्रति-स्थित्यै (२)। चतुर्विंशतिमिति चतुः-विंशतिम्। अन्विति।

जगत्येति। "जनस्य गोपाः" (तैसं ४·४·४) इत्येतया*। "जगतीशब्द उत्सादिः (पा ४·१·८६)॥

एकविंशतिमिति॥ पञ्चदशत्वान्वयात् प्रथमोत्तमावृत्तिवत् एतासामेवावृत्त्या एकविंशत्याद्यभिमतसंख्यापूरणमिति केचित्। "युक्ष्वा हि" (तैसं २·६·११) [५]इत्यादि नव सामिधेनीति केचित्[५]। स्तोमानां प्रतिष्ठेति। त्रिवृत्पञ्चदशसप्तदशानां प्रधानस्तोमानां, तत्र अनुगतत्वात्॥

चतुर्विंशतिमित्यादि॥ गतम्॥

जगत्येति॥ वैश्यस्य "समिध्यमानो अमृतस्य राजसि" (ऋ ५·२८·२) इत्येतां परिधानीयां विधत्ते- 'जगत्या परि दध्यात् जागता वै पशवः पशुकामः खलु वै वैश्यो यजते जगत्यैवास्मै पशून् परि गृह्णाति' इति॥ जगत्यनुष्ठानलब्धत्वात् पशूनां जागतत्वम्। वैश्यस्य क्षीरदध्यादिविक्रयाय पशुकामत्वं प्रसिद्धम्॥

एकविंशतिमिति॥ [११]नैमित्तिकीः विधाय [१४]काम्याः विधत्ते- "एकविंशतिमनु ब्रूयात् प्रतिष्ठाकामस्यैकविंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्यै' इति॥ अत्र संख्यापूरणं संप्रदायविद्भिरेवमुक्तम्- 'एकविंशत्यादिषु प्रथमाया उत्तरे द्वे ईडे अग्निमित्यादिके। अथाग्न आयाहीत्यादि। अथ त्वामग्ने पुष्करादधीति त्रयस्तृचाः। अग्निमग्निमित्येकादश। पृथुपाजा इत्यष्टौ। [१५]अष्टाचत्वारिंशत्पक्षस्य दाशतय्यास्तिस्र आगमयितव्याः। एकविंशत्यादिषु कार्येषु एतासां [१६]यथार्थमागमः' इति। अस्यायमर्थः-यदा सामिधेनीवृद्धिरपेक्षिता [१७]तदानीम् आम्नातायाः "प्र वो वाजाः" (तैब्रा ३·५·२) इत्यस्या उपरि "ईडे अग्निम्" (तैब्रा २·४·२) इत्यादिकं द्वयं प्रक्षेपणीयम्। तत् ऊर्ध्वम् 'अग्न आ याहि' इत्यादिकं यथाम्नातं पठितम्। तत्र [१८]समिध्यमानसमिद्धवत्योः* मध्ये "त्वामग्ने" (ऋ ६·१६·१३) इत्यादिना[१९] उदाहृताः प्रक्षेपणीयाः। यावतीनां प्रक्षेपेण

५-५. मै४-°धेनी केचिदित्यन्ये; तै३.लं.हो-°धेनी केचिदन्ये।

१३. आ.क- नैमित्तिकीं। १४. आ.क- काम्यां। १५. अ.आ- °रिंशत्यक्षरस्य। १६. अ. इ.उ.जो.ना.पा.हा- यथार्थमागमयितव्याः। १७. आ.क- तदा। १८. अ.इ.उ.जो.पा.शृं.हा- सामिध्यमानेद्धवत्योः। * ['समिध्यमानो अध्वरे' (तैब्रा ३·५·२) इत्येषा समिध्यमानवती, 'समिद्धो अग्न आहुत' (तैब्रा ३·५·२) इत्येषा च समिद्धवती द्रष्टव्या।]। १९. आ.क.ड- इत्यादिकाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नैमित्तिकीनां काम्यानां च सामिधेनीनां विधानम्]

ब्रूयाद्ब्रह्मवर्चसकामस्य चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैवास्मै ब्रह्मवर्चसमव रुन्द्धे त्रिꣳशतमनु ब्रूयादन्नकामस्य त्रिꣳशदक्षरा विराडन्नं विराड्-विराजैवास्मा अन्नाद्यमव रुन्द्धे द्वात्रिꣳशतमनु ब्रूयात् प्रतिष्ठाकामस्य द्वात्रिꣳशदक्षराऽनुष्टुगनुष्टुप् छन्दसां प्रतिष्ठा प्रतिष्ठित्यै

ब्रूयात् । ब्रह्मवर्चसकामस्येति ब्रह्मवर्चस - कामस्य । चतुर्विꣳशत्यक्षरेति चतुर्विꣳशति - अक्षरा । गायत्री । गायत्री । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । गायत्रिया । एव । अस्मै । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । अवेति । रुन्द्धे । त्रिꣳशतम् । अन्विति । ब्रूयात् । अन्नकामस्येत्यन्न - कामस्य । त्रिꣳशदक्षरेति त्रिꣳशत् - अक्षरा । विराडिति वि - राट् । अन्नम् । विराडिति वि - राट् । विराजेति वि - राजा । एव । अस्मै । अन्नाद्यमित्यन्न - अद्यम् । अवेति । रुन्द्धे । द्वात्रिꣳशतम् । अन्विति । ब्रूयात् । प्रतिष्ठाकामस्येति प्रतिष्ठा - कामस्य । द्वात्रिꣳशदक्षरेति द्वात्रिꣳशत् - अक्षरा । अनुष्टुगित्यनु - स्तुक् । अनुष्टुबित्यनु - स्तुप् । छन्दसाम् । प्रतिष्ठेति प्रति - स्था । प्रतिष्ठित्या इति प्रति - स्थित्यै ।

त्रिꣳशदक्षरा विराडिति ॥ त्रिभिः दशकैः विराडिति ॥
छन्दसां प्रतिष्ठेति ॥ " वाग्वा अनुष्टुप् " (तैसं ५.१.३) इति तस्याः सर्ववाङ्मयत्वात् ॥

[20]अभीष्टसंख्या पूर्यते [21]-तत्र तावतीनां-[21] [22]प्रक्षेप इति । मीमांसकास्तु (मीसू ५.३.४-६) [23]धाय्यासंज्ञ-कानामेव [24]समिध्यमानसमिद्धवत्योर्मध्ये प्रक्षेपः, इतरासां त्वन्ते [25]-प्रक्षेप इत्याहुः-[25] । तत्रापि परिधानीयाया [26]उत्तमायाः प्रागेवेत्ययं विशेषो द्रष्टव्यः । त्रिवृत्पञ्चदशसप्तदशानां संख्या चतुर्थ एकविंशस्तोमेऽन्तर्भूतेति स स्तोम इतरेषां स्तोमानां प्रतिष्ठा ॥

चतुर्विꣳशतिमिति ॥ फलान्तराय विधत्ते–' चतुर्विꣳशतिमनु ब्रूयाद्ब्रह्मवर्चसकामस्य चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैवास्मै ब्रह्मवर्चसमव रुन्द्धे ' इति ॥

त्रिꣳशतमिति ॥ पुनरपि फलान्तराय विधत्ते– ' त्रिꣳशतमनु ब्रूयादन्नकामस्य त्रिꣳशदक्षरा विराडन्नं विराड्विराजैवास्मा अन्नाद्यमव रुन्द्धे ' इति ॥ दशाक्षरैस्त्रिभिः पादैर्विराजस्त्रिंशदक्षरत्वम् । तच्छन्दोनुष्ठानेनान्नस्य [27]लभ्यमानत्वात् तस्य छन्दसोऽन्नत्वम् ॥

द्वात्रिꣳशतमिति ॥ पुनः फलान्तराय विधत्ते– " द्वात्रिꣳशतमनु ब्रूयात् प्रतिष्ठाकामस्य द्वात्रिꣳशदक्षराऽनुष्टुगनुष्टुप् छन्दसां प्रतिष्ठा प्रतिष्ठित्यै " इति ॥ अन्यत्र " वाग्वा अनुष्टुक् " (तैसं ५.१.३) इति [28]श्रवणाद्वाग्रूपत्वमनुष्टुभः । वाचि सर्वेषां छन्दसामन्तर्भावादनुष्टुबितरच्छन्दसां प्रतिष्ठा ॥

२०. आ.क– संख्या । २१. आ.क– तत्प्रमाणवतीनां; ड.हो१ तत्प्रभवन्तीनाम् । २२. ड–प्रक्षेपग । २३. क.ड - याज्यासं° । २४. अ.इ.उ.जो.पा.शृं.हा– समिध्यमानेद्धवत्योर्मध्ये । २५. आ.क– प्रक्षेपमाहुः । २६. ड.हो१– ' उत्तमायाः ' नास्ति । २७. आ.क–लभ्यत्वात्; हा– लक्ष्यत्वात् । २८. ड.शृं– अनुष्टुभो वाग्रूपत्वश्रयणात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षट्त्रिꣳशतमनु ब्रूयात् पशुकामस्य षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशून(३)व रुन्द्धे चतुश्चत्वारिꣳशतमनु ब्रूयादिन्द्रियकामस्य चतुश्चत्वारिꣳशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप् त्रिष्टुभैवास्मा इन्द्रियमव रुन्द्धेऽष्टाचत्वारिꣳशतमनु ब्रूयात् पशुकामस्याष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्द्धे

षट्त्रिꣳशतमिति षट्-त्रिꣳशतम्। अन्विति। ब्रूयात्। पशुकामस्येति पशु-कामस्य। षट्त्रिꣳशदक्षरेति षट्त्रिꣳशत्-अक्षरा। बृहती। बार्हताः। पशवः। बृहत्या। एव। अस्मै। पशून् (३)। अवेति। रुन्द्धे। चतुश्चत्वारिꣳशतमिति चतुः—चत्वारिꣳशतम्। अन्विति। ब्रूयात्। इन्द्रियकामस्येतीन्द्रिय-कामस्य। चतुश्चत्वारिꣳशदक्षरेति चतुश्चत्वारिꣳशत्-अक्षरा। त्रिष्टुक्। इन्द्रियम्। त्रिष्टुप्। त्रिष्टुभा। एव। अस्मै। इन्द्रियम्। अवेति। रुन्द्धे। अष्टाचत्वारिꣳशतमित्यष्टा-चत्वारिꣳशतम्। अन्विति। ब्रूयात्। पशुकामस्येति पशु-कामस्य। अष्टाचत्वारिꣳशदक्षरेत्यष्टाचत्वारिꣳशत्-अक्षरा। जगती। जागताः। पशवः। जगत्या। एव। अस्मै। पशून्। अवेति। रुन्द्धे।

बृहतीशब्दोऽप्युत्सादिः (पा ४·१·८६)। बृहत्याः पशव्यत्वात् बार्हतत्वं पशूनाम्॥

इन्द्रियं त्रिष्टुविति॥ इन्द्रियत्रिष्टुभोः समानप्रभवत्वात्॥

जगत्या इति॥ जगत्याः पशव्यत्वात्॥

षट्त्रिꣳशतमिति॥ पुनः [२९]फलान्तराय विधत्ते– 'षट्त्रिꣳशतमनु ब्रूयात् पशुकामस्य षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनव रुन्द्धे' इति। पशूनां बृहतीछन्दसोऽनुष्ठानेन लभ्यत्वात् बार्हतत्वम्॥

चतुश्चत्वारिꣳशतमिति॥ फलान्तराय विधत्ते– 'चतुश्चत्वारिꣳशतमनु ब्रूयादिन्द्रियकामस्य चतुश्चत्वारिꣳशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप् त्रिष्टुभैवास्मा इन्द्रियमव रुन्द्धे' इति॥

अष्टाचत्वारिꣳशतमिति॥ पुनः फलान्तराय विधत्ते– 'अष्टाचत्वारिꣳशतमनु ब्रूयात् पशुकामस्याष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्द्धे' इति॥

२९. क– फलान्तरं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नैमित्तिकीनां काम्यानां च सामिधेनीनां विधानम्]

सर्वाणि छन्दाꣳस्यनु ब्रूयाद्बहुयाजिनः सर्वाणि वा एतस्य छन्दाꣳस्यवरुद्धानि यो बहुयाज्यपरिमितमनु ब्रूयादपरिमितस्यावरुद्ध्यै ॥ (१०) ॥

[कामयेत प्रतिष्ठित्यै पशून्सप्तर्चत्वारिꣳशच्च ।]

सर्वाणि । छन्दाꣳसि । अन्विति । ब्रूयात् । बहुयाजिन इति बहु-याजिनः । सर्वाणि । वै । एतस्य । छन्दाꣳसि । अवरुद्धानीत्यव - रुद्धानि । यः । बहुयाजीति बहु - याजी । अपरिमितमित्यपरि - मितम् । अन्विति । ब्रूयात् । अपरिमितस्येत्यपरि - मितस्य । अवरुद्ध्या इत्यव - रुद्ध्यै ॥ १० ॥

[शब्रा १.३.५.१०]

बहुयाजिन इति ॥ सोमयाजी बहुयाजी, तस्य [V]सर्वाणि गायत्र्यादीनि जगत्यन्तानि [V]छन्दांसि [V]अवरुद्धानि ।

अपरिमितमिति । नवाद्यष्टाचत्वारिंशदन्तोक्तसंख्यापरिच्छेदरहितम् अपरिच्छिन्नस्य फलस्याप्त्यै भवति ॥

इति द्वितीये पञ्चमे दशमोऽनुवाकः ॥

सर्वाणीति ॥ सोमयाजिनं [३०]निमित्तीकृत्य विधत्ते– 'सर्वाणि छन्दाꣳस्यनु ब्रूयाद्बहुयाजिनः सर्वाणि वा एतस्य छन्दाꣳस्यवरुद्धानि यो बहुयाजी' इति ॥ [३१]बहुभिर्दीक्षणीयादिभिरिष्टिभिरग्नीषोमीयादिपशुभिरैन्द्रवायवादिग्रहैश्च यजत इति बहुयाजी । एतस्य [V]बहुयाजिनः सवनत्रये [३२]गायत्रीत्रिष्टुब्जगतीरूपाणि [३३V]सर्वाणि [V]छन्दाꣳसि [V]अवरुद्धानि भवन्ति । तस्मात् सोमयाजी यदा दर्शपूर्णमासावनुतिष्ठति तदा तस्य त्रीणि छन्दांस्यनुब्रूयात् । "समिध्यमानः प्रथमो नु धर्मः" (तैब्रा १.२.१) इत्येषा त्रिष्टुप् । "त्वामग्ने प्र दिव आहुतं घृतेन" (तैब्रा १.२.१) इत्येषा जगती । एतदुभयं समिद्धवत्याः पूर्वं पठनीयम् ॥

अपरिमितमिति ॥ [३४]तस्य सोमयाजिनः "त्रीꣳस्तृचान्" (तैसं २.५.१०) इत्यनुवाके 'अष्टाचत्वारिꣳशतमनुब्रूयात्' इत्यन्ते यः संख्याविशेषः तत्र स्वेच्छैव नियामिका, न तु वाचनिको नियमोऽस्तीत्येतद्विधत्ते – 'अपरिमितमनु ब्रूयादपरिमितस्यावरुद्ध्यै' इति । [V]अपरिमितस्य [V]अधिकस्य फलस्येत्यर्थः ॥

अत्र मीमांसा ॥ तृतीयाध्यायस्य षष्ठपादे चिन्तितम्—

"सामिधेनीः सप्तदश प्रकृतौ विकृतावुत ।
पूर्ववत् प्रकृतौ पाञ्चदश्येनैतत् [३५]विकल्पते ॥
विकृतौ साप्तदश्यं स्यात् प्रकृतौ प्रक्रियाबलात् ।
पाञ्चदश्यावरुद्धत्वादाकाङ्क्षाया निवृत्तितः" ॥ (जैन्या ३.६.३-४) ॥

३०. आ.हा– अधिकृत्य । ३१. अ.उ.जो.ना.पा– °दिभिरैन्द्रवायवादिग्रहैश्च; इ– दीक्षणीयादिभिरैन्द्रवायवादिग्रहैश्च । ३२. आ.क– गायत्र्युष्णिगनुष्टुब्जगती° । ३३. हा– 'सर्वाणि' नास्ति । ३४. ड– तस्यास्य । ३५. क.शृं– विकल्प्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अनारभ्य श्रूयते– "सप्तदश सामिधेनीरनु ब्रूयात्" (द्र. तैसं २·५·१०; ६·३·७) इति। "प्र वो वाजा अभिद्यवः" (तैब्रा ३·५·२) इत्याद्याः अग्निसमिन्धनार्था ऋचः सामिधेन्यः। तासां साप्तदश्यं पूर्वन्यायेन प्रकृतिगतम्। यदि प्रकृतौ "पञ्चदश सामिधेनीरन्वाह" (तैसं २·५·८) इति विधिः स्यात् तर्हि[३६] [३७]पाञ्चदश्यसाप्तदश्ये [३८]विकल्पेयाताम् इति प्राप्ते ब्रूमः–विकृतावेव साप्तदश्यं निविशते। प्रकृतौ पाञ्चदश्ये-
५ नावरुद्धानां सामिधेनीनां संख्याकाङ्क्षाया अभावात्। न च [३९]पाञ्चदश्यसाप्तदश्ययोः समानबलत्वादव-रोधाभाव इति शङ्कनीयम्। पाञ्चदश्ये प्रकरणानुग्रहस्याधिकत्वात्। तस्मात् [४०]मित्रविन्दाध्वरकल्पादिविकृतौ [४१]साप्तदश्यमवतिष्ठते। न चात्र पूर्वन्यायोऽस्ति। साप्तदश्यस्य चोदकप्राप्त्यभावेन पुनर्विधानदोषाभावात्॥

तत्रैवान्यच्चिन्तितम्—

"साप्तदश्यं तु वैश्यस्य विकृतौ प्रकृतावुत।
१० पूर्ववच्चेन्न संकोचान्नित्ये नैमित्तिकोक्तितः॥
गोदोहनेन प्रणयेत् [४२]कामीत्येतदुदाहरत्।
भाष्यकारस्तदप्यस्तु न्यायस्यात्र समत्वतः" ॥ (जैन्या ३·६·५-६)॥

"सप्तदशानु ब्रूयाद्वैश्यस्य" (तैसं २·५·१०) इति विहितं [४३]वैश्यनिमित्तकं साप्तदश्यं पूर्वन्यायेन विकृतिगामीति चेत्। मैवम्। नैमित्तिकेनानेन [४४-४५]वचनेन प्रकृतिगतस्य नित्यस्य पाञ्चदश्यस्य वैश्यव्यति-
१५ रिक्तविषयतया[४४] संकोचनीयत्वात्। नित्यं सामान्यरूपतया सावकाशत्वेन च दुर्बलं, नैमित्तिकं तु विशेष-रूपत्वनिरवकाशत्वाभ्यां प्रबलम्। तस्मात् वैश्यनिमित्तकं साप्तदश्यं प्रकृतावेवतिष्ठते। अत्र भाष्यकारोऽ-न्यदुदाजहार – "चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्य" (द्र. आपश्रौ १·१६·२) इति। तत्र प्रकृतेश्चमसेनावरुद्धत्वाद्गोदोहनं विकृताविति पूर्वः पक्षः। कामनानिमित्तेन गोदोहनेन नित्यस्य चमसस्य निष्कामविषयतया संकोचनीयत्वात् प्रकृतावेव गोदोहनमिति [४५]सिद्धान्तः॥

२० दशमाध्यायस्याष्टमपादे चिन्तितम्—

"सामिधेनीसाप्तदश्यं वैमृधादावपूर्वगीः।
संहृतिर्वोपकारस्य क्लृप्त्याऽऽद्योऽस्वाज्यभागवत्॥
सामिधेन्यश्चोदकाप्ताः साप्तदश्यं तु वैमृधे।
पुनर्वाक्येन संहार्यमनारभ्योक्तिचोदितम्" ॥ (जैन्या १०·८·१७-१८)॥

२५ अनारभ्य किंचिदाम्नायते– "सप्तदश सामिधेनीरनु ब्रूयात्" (तैसं २·५·१०; ३·६·७) इति। तथा वैमृधेऽध्वरकल्पायां पशौ [४६]चातुर्मास्येषु मित्रविन्दायामाग्रयणेष्ट्यादौ च पुनः [४७]साप्तदश्यं विहितम्। यद्यप्यनारभ्याधीतानां प्रकृतिगामित्वं न्याय्यं तथाऽपि [४८]श्रुतेन पाञ्चदश्येनावरुद्धत्वाद्विकृतिष्वेतन्निविशते। तथा सति वैमृधादिविकृतिष्वनारभ्यवादप्राप्ताः सप्तदश सामिधेन्यः प्राकरणिकेन विधिना पुनर्विधीयमाना गृहमेधीयाज्यभागवत् क्लृप्तोपकारकत्वेनेतिकर्तव्यताकाङ्क्षां पूरयन्त्यश्चोदकं लोपयन्त्यो वैमृधादेरपूर्वकर्मतां
३० गमयन्ति। साप्तदश्यं त्वनारभ्यवादप्राप्तमनूद्यत इति प्राप्ते ब्रूमः– वैमृधादिषु सामिधेन्य आज्यभागवन्न

---

३६. अ.इ.उ.जो.ना.पा.हा– 'तर्हि' नास्ति। ३७. आ– पाञ्चदश्यं साप्तदश्यं च। ३८. क.ड.शृं–विकल्प्येयाताम्। ३९. क.ड.शृं.हो१–°दश्यवाक्ययोः। ४०. अ.इ.उ.जो.ना.पा.हा– अध्वर°। ४१. ड–सप्तदश्यमेव तिष्ठते। ४२. शृं–°हरन्। ४३. आ.क–°निमित्तं। ४४–४४. ड–प्रकृतिगतस्य पाञ्चदशस्य वैश्यस्य वा अतिरिक्तविषयतया; अ.इ.उ.जो.ना.पा– °दश्यस्य वैश्यव्यतिरिक्ततया। ४५. ड– राद्धान्तः।
३५ ४६. आ.क– 'चातुर्मास्येषु' नास्ति। ४७. अ.इ.उ.जो.ना.पा.हा– 'साप्तदश्यं' नास्ति। ४८. अ.इ. उ.जो.पा.हा– 'श्रुतेन' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नैमित्तिकीनां काम्यानां च सामिधेनीनां विधानम्]

विधीयन्ते, किं तु चोदकप्राप्तास्ता अनूद्य साप्तदश्यं विधीयते । [४९]तत्र साप्तदश्यं वैमृधादिप्रकरणेष्वाम्नातैः विधिभिः कासुचिदेव विकृतिषु प्राप्तम्, अनारभ्यवादेन [५०]तु सर्वासु विकृतिषु । तत्रानारभ्यवादो विलम्बते । प्रथमं विधेयस्य साप्तदश्यस्य सामिधेनीसंबन्धमवबोध्य तत्संबन्धान्यथानुपपत्त्या [५१]क्रतुप्रवेशं परिकल्प्य प्रकृतौ [५२]पाञ्चदश्यपराहतत्वेन विकृतिषु सर्वासु [५३]निवेशः क्रियत इति विलम्बः । प्राकरणिकैः विधिभिः सामिधेनीसंबन्ध एव बोधनीयः । क्रतौ तद्विशेषे च [५४]प्रवेशो न [५५]कल्पनीयः । [५६]प्रत्यक्षप्रकरणपाठेनैव ५
तत्सिद्धेः । तत्र साप्तदश्यस्य [५७]वैमृधादिविकृतिविशेषसंबन्धे सहसा प्रतिपन्ने सति [५८]तद्विरोधात् सर्वविकृति-संबन्धो[५८] न कल्पयितुं शक्यः । अनारभ्यवादस्तु वैमृधादिषु प्राप्तस्य नित्यानुवादोऽस्तु । यद्वा– प्रकरण-विधिर्वैमृधादिषु साप्तदश्यस्य प्रापकः । अनारभ्यवादस्तु चोदकप्राप्तस्य पाञ्चदश्यस्य बाधकः । सर्वथाऽपि चतुर्धाकरणवदुपसंहारो न त्वाज्यभागवदपूर्वं कर्म ॥

तत्रैव पञ्चमपादे चिन्तितम्— १०

" सामिधेनीविवृद्धौ किमागमोऽभ्यस्यतामुत ।
आगमः पूर्ववन्नैवमभ्यासप्रकृतित्वतः ॥
तत्राप्याद्यन्तयोर्यावत् [५९]पूर्त्यभ्यासो यथोक्त वा ।
[६०]अभ्यस्याऽऽगमतः पूर्तिः पूरणार्थत्वतोऽग्रिमः ॥
त्रित्वं न पूरणायोक्तमन्यथाऽप्यत्र पूरणात् । १५
विवक्षितमबाधित्वा भवेत् पूरणमागमात् " ॥ (जैन्या १०.५.१०-१२) ॥

दर्शपूर्णमासयोः पञ्चदश सामिधेनीर्विधाय काम्या तद्वृद्धिर्विधीयते– " एकविंशतिमनु ब्रूयात् प्रतिष्ठाकामस्य " (तैसं २.५.१०) इत्यादिना । यथा बहिष्पवमाने ऋगागमस्तथा [६१]अत्रापीति प्राप्ते ब्रूमः । एकादशभिः पठिताभिः [६२]ऋग्भिः [६३]पञ्चदशसंख्याया अपूर्तावृगन्तरागमनेन तत्पूरणं [६४]न कृतं,[६४] किं तु तत्पूरणायाभ्यासो विहितः – " त्रिः प्रथमामन्वाह त्रिरुत्तमाम् " (तैसं २.५.७) इति । अतः २०
काम्यानामप्यभ्यासेन पूरणं युक्तम् । अभ्यासपक्षेऽपि यावत्कृत्वोऽभ्यासे सत्येकविंशतिसंख्या पूर्यते तावत्कृत्वः प्रथमोत्तमे अभ्यसनीये । कुतः ? विहितस्य त्रिरभ्यासस्य पूरणार्थत्वदर्शनात् । नैवम् । न हि त्रित्वं पूरणार्थं विहितम् । प्रथमाया द्विरभ्यासेनोत्तमायाश्चतुरभ्यासेनापि[६५] [६६]पञ्चदशसंख्यायाः पूरणात् । अतो विवक्षितं त्रित्वम् । तथा सति [६७]तदबाधाय [६८]प्रथमोत्तमे [६९]त्रिरेवाभ्यस्य षण्णामृचामागमेनैकविंशतिसंख्या पूरणीया ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये २५
द्वितीयकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः ॥

---

४९. ड– अत्र । ५०. अ.इ.उ.जो.ना.पा.हा – 'तु' नास्ति । ५१. ड – क्रमप्रवेशं; हा– क्रतुसंबन्धं । ५२. अ.इ.उ.पा.हा– पाञ्चदश्यं परा° । ५३. आ.हा– प्रवेशः । ५४. हा– 'प्रवेशः' नास्ति । ५५. आ.क.ड – बोधनीयः । ५६. आ.हा – °प्रकरणेनैव । ५७. अ.इ.उ.जो.पा.हा– °विकृतिसंबन्धे । ५८–५८. आ.क.ड– तद्विरोधी विकृति° । ५९. ड.हो१–पूर्वाभ्यासो; शृं–पूर्त्याभ्यासो । ३०
६०. अ.इ.उ.जो. पा.हा– अन्यस्यागमतः । ६१. हा– 'अत्र' नास्ति । ६२. आ.क– 'ऋग्भिः' नास्ति । ६३. ड– °संख्या । ६४–६४. ड– विकृतम्; शृं– न विकृतम् । ६५. आ– 'अपि' नास्ति । ६६. आ.क– °संख्या° । ६७. अ.इ.उ.जो.पा.हा– तदभ्यासाय; शृं तदवधाय (?); ६८. ड– सप्रथमोत्तमे । ६९. आ.क– त्रिरभ्यस्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुप व्ययते देवलक्ष्ममेव तत्

निवीतमिति नि-वीतम्। मनुष्याणाम्। प्राचीनावीतमिति प्राचीन-आवीतम्। पितॄणाम्। उपवीतमित्युप-वीतम्। देवानाम्। उपेति। व्ययते। देवलक्ष्ममिति देव-लक्ष्मम्। एव। तत्।

निवीतमित्यादि॥ स्वाध्यायविधौ (तैआ २·१) उपवीतादीनां लक्षणं भविष्यति। अत्र तु तत एव प्राप्तत्वादर्थवादः। उक्तं च–"निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात्" (मीसू ३·४·१) इत्यत्र। उभावपि बाहू न्यग्भूतौ [1]वीयेते तत् [v]निवीतं [v]मनुष्याणां [1]सर्वकार्येषु [3]प्रशस्तम्। प्राचीनो दक्षिणो [4]बाहुरावीयते अधस्तात् क्रियते यत्र तत् [v]प्राचीनावीतं पितृकर्मणि प्रशस्तम्। यज्ञसाधनभूतो दक्षिणो बाहुः [v]उपवीतं [*]समन्ताच्छाद्यते यत्र तद्यज्ञोपवीतम्। यथोक्तं– "दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति" (तैआ २·१) इति। तत्र 'सत्यभामा भामा' इतिवत् पदैकदेशो [5]लुप्यते। [6]गतार्थत्वादप्रयोगो लोपः। एतद्देवकर्मणि प्रशस्तम्[*]। तस्माद्धोता सामिधेनीरनुब्रुवन् [6-v]उपव्ययते उपवीतं[6-v] करोति। देवानाम् एव तेन लक्षणं कृतं भवति। "अनसन्तान्नपुंसकात्" (पा ५·४·१०३) इत्यच् समासान्तः।

[1]नैमित्तिक्यः सामिधेन्यः काम्याश्च दशमे श्रुताः॥
अथैकादशे सामिधेनीषु होतुर्नियमविशेषोऽध्वर्योः [2]आधारविधिश्चाभिधास्ये॥

निवीतमिति॥ तत्राऽऽदौ तावद्यागकर्तृणामुपवीतं विधातुं प्रस्तौति–'निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानाम्' इति॥ यत्रोभावपि बाहू न्यग्भूतौ सन्तौ ब्रह्मसूत्रेण वस्त्रेण वा [1]वीयेते संवृतावाच्छादितौ क्रियेते तत् [v]निवीतम्। तच्च [v]मनुष्याणां कार्येषु प्रशस्तम्। तस्मात् ऋषितर्पणं निवीतयुक्तैः [v]शिष्टैरनुष्ठीयते। प्राचीनो दक्षिणो बाहुराधीयतेऽधस्तात् क्रियते यत्र तत् [v]प्राचीनावीतम्। तच्च [v]पितॄणां कर्मणि प्रशस्तम्। अत एव शिष्टाः प्राचीनावीतयुक्ताः [v]पिण्डदानं [6]कुर्वन्ति। उपवीतस्य लक्षणं स्वाध्यायब्राह्मणे समाम्नातम्–"दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतम्" (तैआ. २·१) इति। तच्च [v] देवानां कर्मणि प्रशस्तम्। अत एव शिष्टाः स्वाध्यायादिकं तथैवाऽऽचरन्ति॥

उपेति॥ इदानीं विधत्ते 'उप व्ययते देवलक्ष्ममेव तत् कुरुते' इति॥ [v]तत् तेनोपवीतेन [v]देवलक्ष्मम् [v]एव देवचिह्नमेव कृतं भवति॥

१. तं३.हो–भूयेते। २. तं३.मै.मै४.लं–स्वं मनुष्यकार्येषु। ३. मै४–प्रसक्तम्। ४. तं३–°राधीयते। *–* [लं–'समन्ताच्छाद्यते ..... प्रशस्तम्' इत्ययं भागो नास्ति।]। ५. हो–हतार्थत्वादप्रत्ययोगो (?)। ६–६. लं.हो–'उपव्ययते उपवीतं' नास्ति।

१. ड–नैमित्तिकाः। २. आ.हा.–°विशेषश्चाभिधीयते; क–आधारादिविशेषश्चाभिधीयते; हो१–आधारादि विधिश्चाभिधास्यते। ३. हा–वीते। ४. आ.क–पुरुषैर°। ५. शृं–पिण्डदानादिकं। ६. अ.आ.इ.क.जो.पा.हा–कुर्वन्तीति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुरुते तिष्ठन्वाह तिष्ठन् ह्याश्रुततरं वदति तिष्ठन्वाह सुवर्गस्य लोकस्याभिजित्या आसीनो यजत्यस्मिन्नेव लोके प्रति तिष्ठति यत् क्रौञ्चमन्वाहाऽऽसुरं तद्यन्मन्द्रं मानुषं तद्यदन्तरा तत् सदेवमन्तराऽनूच्यꣳ सदेवत्वाय

कुरुते । तिष्ठन् । अन्विति । आह । तिष्ठन् । हि । आश्रुततरमित्याश्रुत - तरम् । वदति । तिष्ठन् । अन्विति । आह । सुवर्गस्येति सुवः– गस्य । लोकस्य । अभिजित्या इत्यभि - जित्यै । आसीनः । यजति । अस्मिन् । एव । लोके । प्रतीति । तिष्ठति । यत् । क्रौञ्चम् । अन्वाहेत्यनु - आह । आसुरम् । तत् । यत् । मन्द्रम् । मानुषम् । तत् । यत् । अन्तरा । तत् । सदेवमिति स - देवम् । अन्तरा । अनूच्यमित्यनु - उच्यम् । सदेवत्वायेति सदेव - त्वाय ।

तिष्ठन्नित्यादि ॥ लोके हि योऽतिशयेन [७]आश्रुतं भवति प्रतिश्रुतमिच्छति स [५]तिष्ठन् वदन् दृश्यते । तस्मात् [५]तिष्ठन् अनुब्रूयात् । किं च– [५]सुवर्गस्य [५]लोकस्य अभिजयाय भवति, प्रत्यासत्त्या, आभिमुख्याद्वा । [८]आसित्वा यागे[८] [५]अस्मिन् [५]लोके प्रतिष्ठित्यै भवति, एतल्लोकप्रत्यासत्त्या अविचलत्वाच्च ॥

[९]क्रौञ्चम् ॥ [५]क्रौञ्चम् इव[९] स्वरः शुष्कः, मन्द्रः गभीरः, तद्द्वयोः [५]अन्तरा मध्यमस्वरोऽभिधीयते । [५]सदेवं देवसहितं तस्मान्मन्द्रक्रौञ्चयोः [५]अन्तरा मध्ये [५]अनूच्यं मध्यस्थेन स्वरेणानुब्रूयात् । छान्दसः क्यच् ॥

तिष्ठन्निति ॥ यागकर्तृणामुपवीतं विधाय होतुः सामिधेन्याद्यनुवचनकाले स्थितिं विधत्ते– ' तिष्ठन्नन्वाह तिष्ठन् ह्याश्रुततरं वदति ' इति ॥ आसीनो नानुब्रुयात् किं तु [५]तिष्ठन् एव ब्रूयात् । तस्मात् [५]तिष्ठन् [७]मनुष्यः आ समन्तादतिशयेन श्रुतं यथा भवति तथा वदितुं प्रभवति । तस्मात् तिष्ठन्ननुब्रूयात् ॥

तिष्ठन्निति ॥ तदेवानूद्य प्रशंसति–' तिष्ठन्नन्वाह सुवर्गस्य लोकस्याभिजित्यै ' इति ॥ [८]आसनादुत्थितस्य प्रत्यासन्नः स्वर्गः । तस्मात् तस्य [५]अभिजित्यै संपद्यते ॥

आसीन इति ॥ याज्याकाल उपवेशनं विधत्ते–'आसीनो यजत्यस्मिन्नेव लोके प्रति तिष्ठति ' इति ॥ [५]यजति याज्यां पठेदित्यर्थः। आसीनस्य चलनाभावादत्र प्रतिष्ठा ॥

यदिति ॥ अत्युच्चध्वनिम् अतिनीचध्वनिं चापवदन् मध्यमध्वनिं विधत्ते– ' यत् क्रौञ्चमन्वाहाऽऽसुरं तद्यन्मन्द्रं मानुषं तद्यदन्तरा तत् सदेवमन्तराऽनूच्यꣳ सदेवत्वाय ' इति ॥ यथा क्रौञ्चाख्यः [९]पक्षी परुषं[९] [१०]उच्चध्वनिं करोति [११]तत्सदृशे सति [५]आसुरं भवेत् । मनुष्यास्तूपविश्य मन्द्रस्वरेण संभाषन्ते अतः सोऽपि वर्ज्यः । [१२]मध्यमस्वनस्य देवप्रियत्वात् [१३]तथैवानुवचनं कार्यम् ॥

७. लं.हो– अश्रुतम्; मै– आश्रोतुं । ८–८. त्रि- अधीनत्वायोगे; मै४– आसीनेन यागे । ९–९. हो–क्रौञ्चः कुञ्चमिव ।

७. शृं– पुरुषः । ८. शृं– आसीनात् । ९–९. आ– पक्षिविशेषः । १०. ना–उच्चैर्ध्वनिं । ११. क.ड.शृं– तत्सादृश्ये । १२. आ.क.ड.शृं.हो१–मध्यमध्वनेः; जो– मध्यस्वरं; अ.इ.उ.पा- मध्यस्वने । १३. क–तदेवा° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[सामिधेनीषु होतुर्नियमविशेषः

विद्वाꣳसो वै (१) पुरा होतारोऽभूवन् तस्माद्विधृता अध्वानोऽभूवन्न पन्थानः समरुक्षन्नन्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्योऽथान्वाहाध्वनां विधृत्यै पथामसꣳरोहायाथो भूतं चैव

विद्वाꣳसः। वै (१)। पुरा। होतारः। अभूवन्। तस्मात्। विधृता इति वि-धृताः। अध्वानः। अभूवन्। न। पन्थानः। समिति। अरुक्षन्। अन्तर्वेदीत्यन्तः–वेदि। अन्यः। पादः। भवति। बहिर्वेदीति बहिः–वेदि। अन्यः। अथ। अन्विति। आह। अध्वनाम्। विधृत्या इति वि-धृत्यै। पथाम्। असꣳरोहायेत्यसं-रोहाय। अथो इति। भूतम्। च। एव।

विद्वांस इत्यादि॥ पूर्वं [V]विद्वांसः अध्वरज्ञाः [१०V]होतारः [V]अभूवन्। [V]समरुक्षन् अन्योन्यं समारूढाः [११-V]न [V]अभूवन्[-११]। "शल इगुपधादनिटः क्सः" (पा ३·१·४५)। तत्कथमिदानीं तैर्होत्रादिभिः कर्तव्यमित्याह– अन्तर्वेदीत्यादि। [V]अन्तर्वेदि [१२]दक्षिणः [V]पादः अवस्थाप्यः, इतरः [१३V]बहिर्वेदि नातिदूरे [१४]अवस्थाप्यः। [V]अथ अनन्तरमेवमवस्थापितपादद्वयोऽनुब्रूयात्; [V]अध्वनाम् असंकीर्णत्वाय [V]असंरोहाय च भवति। अन्यः पन्था अन्यस्मिन् समारूढो न भवति। मार्गमोहश्च न भवतीत्यर्थः॥

अथो इत्यादि॥ अन्तर्वेदि [V]भूतम् इष्टसाधनत्वेन परिनिष्पन्नत्वात्, बहिर्वेदि [V]भविष्यत् [१५]अतथाभावात्। अन्तर्वेदि [V]परिमितम् इतरत् [V]अपरिमितम्। अन्तर्वेदि ग्राम्याः पशवो यज्ञ-

विद्वाꣳस इति॥ अपरं कंचिद्विशेषं विधत्ते–'विद्वाꣳसो वै पुरा होतारोऽभूवन् तस्माद्विधृता अध्वानोऽभूवन्न पन्थानः समरुक्षन्नन्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्योऽथान्वाहाध्वनां विधृत्यै पथामसꣳरोहाय' इति॥ मूढः कश्चिद्धोता वेदेर्बहिरेव पादद्वयमवस्थाप्यानुब्रूते, तस्य पादद्वयस्थापनात् मार्गः संकीर्णो भवति। अपरस्तु मूढः पादद्वयं वेदिमध्य एव प्रक्षिप्यानुब्रूते। [१४-स]तु मार्गं न[-१४] जानाति। तदिदं दोषद्वयं [V]विद्वाꣳसः केचित् कुशलाः [V]पुरा यज्ञेषु [V]होतारः [V]अभूवन्। ते च दक्षिणं पादं बहिर्न प्रक्षिपन्ति। तेन तेषाम् [V]अध्वानः विस्तीर्णत्वेन धृता भवन्ति। वादपादमन्तर्न प्रक्षिपन्ति, किं तु बहिरेव स्थापयन्ति। तेन बहिःस्थापनेन [V]पन्थानः तान् विदुषः पुरुषान् [V]न एव [V]समरुक्षन् संरोहं न कृतवन्तः। अन्यो मार्गोऽन्यत्र च गच्छन्तीत्येतादृशो मार्गभ्रंशो मार्गकृतः संरोहः। सोऽप्येषां नाऽऽसीत्। तस्मात् पुरातनविद्वांस इवायमपि दक्षिणं पादं वेदेरन्तः प्रक्षिपेत्। वामपादं बहिः प्रक्षिपेत्। ततोऽनुब्रूयात्। एवं च सति [V]अध्वनां विस्तीर्णत्वेन धारणं भवति। पथिविषये संमोहश्च न भवति॥

अथो इति॥ परस्परविलक्षणं पादविन्यासं बहुधा प्रशंसति–'अथो भूतं चैव भविष्यच्चाव रुन्द्धेऽथो परिमितं चैवापरिमितं चाव रुन्द्धेऽथो ग्राम्याꣳश्चैव पशूनारण्याꣳश्चाव रुन्द्धे अथो देवलोकं

१०. पं२– अध्वानः। ११–११. त्रि– अभूवन्; तं३.लं– नाभवन्। १२. तं३.त्रि.मै.लं.हो– दक्षिणतः। १३. तं३.त्रि.लं.हो– 'बहिर्वेदि' इत्यस्यानन्तरम् 'इति'। १४. तं३.लं.हो– स्थाप्यः। १५. हो– तथाभावात्।

१४–१४. ड–न तु बहिर्मार्गं च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भविष्यच्चाव रुन्द्धेऽथो परिमितं चैवापरिमितं चाव रुन्द्धेऽथो ग्राम्याश्चैव पशूनारण्याश्चाव रुन्द्धेऽथो (२) देवलोकं चैव मनुष्यलोकं चाभि जयति देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्त्स प्रजापतिस्तूष्णीमाघारमाऽघारयत् ततो वै देवा यज्ञमन्वपश्यन् यत् तूष्णीमाघारमाघारयति यज्ञस्यानुख्यात्या

भविष्यत्। च। अवेति। रुन्द्धे। अथो इति। परिमितमिति परि-मितम्। च। एव। अपरिमितमित्यपरि-मितम्। च। अवेति। रुन्द्धे। अथो इति। ग्राम्यान्। च। एव। पशून्। आरण्यान्। च। अवेति। रुन्द्धे। अथो इति (२)। देवलोकमिति देव-लोकम्। च। एव। मनुष्यलोकमिति मनुष्य-लोकम्। च। अभीति। जयति। देवाः। वै। सामिधेनीरिति साम्-इधेनीः। अनूच्येत्यनु-उच्य। यज्ञम्। न। अन्विति। अपश्यन्। सः। प्रजापतिरिति प्रजा-पतिः। तूष्णीम्। आघारमित्या-घारम्। एति। अघारयत्। ततः। वै। देवाः। यज्ञम्। अन्विति। अपश्यन्। यत्। तूष्णीम्। आघारमित्या-घारम्। आघारयतीत्या-घारयति। यज्ञस्य। अनुख्यात्या इत्यनु-ख्यात्यै।

साधनत्वात्। बहिरारण्याः विपर्ययत्वात्। अत्र [१६]गोश्वाजाविपुरुषगर्दभोष्ट्रा ग्राम्याः पशवः। *-द्विखुरश्वापदपक्षिसरीसृपहस्तिमर्कटनादेया आरण्याः। अन्तर्वेदि देवलोकः, बहिर्वेदि अन्यः ॥

देवा वै सामिधेनीरनूच्येत्यादि। समाप्तं हौत्रम्॥ अतःपरं दार्शपौर्णमासिकमाध्वर्यवम्-*। प्राजापत्यमेव काण्डम्। [१७]सामिधेन्यनुवचनानन्तरं यज्ञप्रयोगं [v]देवाः [v]न [v]अनु [v]अपश्यन् अनन्तरं कर्तव्यं नाजानन्। स [१८]इत्यादि। [v]प्रजापतिः उत्तरं परिधिसंधिम् अन्ववहृत्य दक्षिणाप्राञ्चम् [v]आघारं [v]तूष्णीम् [v]आघारयत् आज्यमक्षारयत्। [v]यज्ञस्य अनुक्रमेण ख्यात्यै भवति ॥

चैव मनुष्यलोकं चाभि जयति ' इति॥ चतुर्ष्वप्येतेषु पर्यायेषु प्रथमेनान्तःपादप्रशंसा द्वितीयेन बहिष्पादप्रशंसेति द्रष्टव्यम्॥ तदेवं सामिधेनीषु विशेषनियमा हौत्राः समापिताः॥

देवा इति॥ अथ [१५-]आध्वर्यवं स्रौवमाघारं[-१५] विधत्ते– ' देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्त्स प्रजापतिस्तूष्णीमाघारमा घारयत् ततो वै देवा यज्ञमन्वपश्यन् यत् तूष्णीमाघारमाघारयति यज्ञस्यानुख्यात्यै ' इति॥ पूर्वे [v]देवाः [v]सामिधेनीः [v]अनूच्य तत्रत्येषु नियमविशेषेषु व्यापृतमनस्काः सन्त उपरितनयज्ञगतं कर्तव्यविशेषं कंचिदपि [v]न एव स्मृतवन्तः। ततः [१५v]सः [v]प्रजापतिः मन्त्रं कमप्यनुच्चार्य [v]तूष्णीम् एव ऋजुम् [v]आघारम् अनुष्ठितवान्। तावता कालेन [v]देवाः सामिधेनीषु

---

१६. तं३.लं.हो – गोऽजावि°। *–* [लं–' °हस्तिमर्कटनादेया ... माध्वर्यवम् ' इत्ययं भागो नास्ति।] १७–१७. लं हो– सामिधेन्यनुवाककाण्डद्वयानन्तरम्। १८. तं३–' इत्यादि ' नास्ति।

१५–१५. आ–आध्वर्यवस्रौवाघारं; क–आध्वर्यवमाघारं। १६. आ.क– ' सः ' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथो सामिधेनीरेवाभ्यनक्त्यलूक्षो भवति य एवं वेदाथो तर्पयत्येवैनास्तृप्यति प्रजया पशुभि(३)र्य एवं वेद यदेकयाऽऽघारयेदेकां प्रीणीयाद्यद्द्वाभ्यां द्वे प्रीणीयाद्-

अथो इति। सामिधेनीरिति साम्-इधेनीः। एव। अभीति। अनक्ति। अलूक्षः। भवति। यः। एवम्। वेद। अथो इति। तर्पयति। एव। एनाः। तृप्यति। प्रजयेति प्र-जया। पशुभिरिति पशु-भिः (३)। यः। एवम्। वेद। यत्। एकया। आघारयेदित्या-घारयेत्। एकाम्। प्रीणीयात्। यत्। द्वाभ्याम्। द्वे इति। प्रीणीयात्।

अथो इत्यादि ॥ सामिधेनीभिर्हुतानां समिधामियमभ्यक्तिः क्रियते [१९]अञ्जनस्थानीयत्वात्। यथोक्तम्– " अभ्यञ्जनं वाव स्त्रिया अन्नम् " (तैसं २·५·१) इति। [V]एवं विद्वान् [V]अलूक्षः [V]भवति। लूक्षो दुर्गतः। लुब्ध इत्येके। अभ्यञ्जनादिसमृद्धो भवति। तर्पयत्येवेति। अग्नौ प्रक्षेपं विस्मृत्य यथा तृप्ता एव भवन्ति तथा करोत्यनेन ॥

यदेकयेत्यादि ॥ यदि [V]एकया [२०-]वाचा मन्त्रात्मिकया[-२०] [V]आघारयेत् [V]एकाम् एव सामिधेनीं [२१V]प्रीणीयात्। [V]द्वाभ्याम् [V]द्वे। यदिति। [V]तिसृभिः [V]तत् [V]अतिरेचयेत्। आघारमात्रं

[१९]विक्षिप्तं चित्तं समाधायैकाग्रेण मनसा [१८]यज्ञगतं कर्तव्यविशेषमनुस्मृतवन्तः। अतोऽत्रापि [r]तूष्णीम् अनुष्ठितः प्रथमाघारोऽनन्तरभाविनो यज्ञकर्तव्यस्यानुस्मरणाय भवति। यद्यपि पौरोडाशिककाण्डे– " वेदेनोपयत्य स्रुवेण प्राजापत्यमाघारमाघारयति " (तैब्रा ३·३·७) इति अयमाघारो विहितः, तथाऽपि तूष्णींभावादयो गुणविशेषा न विहिता इति नास्ति [१९]पुनरुक्तिः ॥

अथो इति ॥ तमेवाऽऽघारं प्रशंसति– ' अथो सामिधेनीरेवाभ्यनक्ति ' इति ॥ न केवलमनन्तरभावियज्ञकर्तव्यप्रतिभानमाघारस्य प्रयोजनं, किं तु वह्नौ प्रक्षिप्तानां सामिधेनीकाष्ठानामभ्यञ्जनमप्येकं प्रयोजनम् ॥

अलूक्ष इति ॥ एतद्वेदनं प्रशंसति– ' अलूक्षो भवति य एवं वेद ' इति ॥ उक्ताभ्यञ्जनाभिज्ञः स्वयम् अरूक्षः पारुष्यरहितः स्नेहोपेतः [r]भवति ॥

अथो इति ॥ आघारमेव पुनः प्रशंसति– ' अथो तर्पयत्येवैनाः ' इति ॥ किं चानेनाऽऽघारेण [r]एनाः सामिधेन्यभिमानिदेवताः [r]तर्पयति ॥

तृप्यतीति ॥ एतदीयतृप्तिवेदनं प्रशंसति– ' तृप्यति प्रजया पशुभिर्य एवं वेद ' इति ॥

यदिति ॥ यदुक्तं सूत्रकारेण– " स्रुवेण ध्रुवाया आज्यमादाय वेदेनोपयम्याऽऽसीन उत्तरं परिधिसंधिमन्ववहृत्य प्रजापतिं मनसा ध्यायन् दक्षिणाप्राञ्चमृजुꣳ संततं ज्योतिष्मत्याघारमाघारयन् सर्वाणीध्मकाष्ठानि सꣳस्पर्शयति " (आपश्रौ २·१२·७) इति; वेदेनोपयम्य स्रुवस्याधस्ताद्वेदं धारयित्वोत्तरं

१९. तं३.लं.हो–अन्तस्था°। २०–२०. लं.हो– मन्त्रवाचात्मिकया। २१. लं.हो–वृणीयात् (?)।

१७. ड– क्षिप्रं। १८. आ.क– यज्ञगत°। १९. अ.इ.उ.जो.ना.पा.हा–पौनरुक्तिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यत् तिसृभिरति तद्रेचयेन्मनसाऽऽ घारयति मनसा ह्यनाप्तमाप्यते तिर्यञ्चमा घारयत्य-छम्बट्कारं वाक् च मनश्चाऽऽर्तीयेतामहं देवेभ्यो हव्यं वहामीति वागब्रवीदहं देवेभ्य

यत्। तिसृभिरिति तिसृ - भिः। अतीति। तत्। रेचयेत्। मनसा। एति। घारयति। मनसा। हि। अनाप्तम्। आप्यते। तिर्यञ्चम्। एति। घारयति। अछम्बट्कारमित्यछम्बट् - कारम्। वाक्। च। मनः। च। आर्तीयेताम्। अहम्। देवेभ्यः। हव्यम्। वहामि। इति। वाक्। ५
अब्रवीत्। अहम्। देवेभ्यः। इति।

तिसृभिः क्रियते इत्यतिरेकोऽयम्। तस्मात् गत्यभावात् [v]मनसा तूष्णीम् [v]आघारयति। एवं [v]हि [v]अनाप्तम् आप्तुमयोग्यं ह्याप्तं भवति॥

तिर्यञ्चमिति॥ [२२]सर्वाग्निकोणदण्डवत् धारकत्वात् तिरश्चीन आघारोऽग्नेरनार्तत्वाय भवति॥

वाक् चेत्यादि॥ ऋतिः सौत्रो धातुः घृणायां वर्तते। तस्माल्लुङ्, "ऋतेरीयङ्" (पा ३· १० १·२९), "आडजादीनाम्" (पा ६·४·७२)। [v]वाक् [v]च [v]मनः [v]च देवेषु [v]आर्तीयेताम् आदरातिशयमकुरुताम्। [v]अहम् एव [v]देवेभ्यः [v]हव्यं वहानि [v]इति [v]वाक् [v]अब्रवीत्। [v]मनः च

परिधिसंधिमन्ववहृत्य वायवीये संधौ स्रवयुक्तहस्तमन्तः प्रसार्य ज्योतिष्मति वह्नौ घृतं क्षारयंस्तद्घृतं सर्वसामिधेनीकाष्टस्पृष्टं कुर्यादित्यर्थः। तत्र मनसा प्रजापतेर्यत् ध्यानं तदेतद्विधत्ते– 'यदेकयाऽऽघारयेदेकां प्रीणीयाद्यद्द्वाभ्यां द्वे प्रीणीयाद्यत् तिसृभिरति तद्रेचयेन्मनसाऽऽघारयति मनसा ह्यनाप्तमाप्यते' इति॥ यद्येकामृचं पठित्वा [r]आघारयेत् तदानीमेकैव सामिधेनी तृप्ता भवेत्। [r]द्वाभ्याम् ऋग्भ्यां द्वे एव तृप्ते भवेताम्। त्रिप्रभृतिभिर्ऋग्भिराघारं यदि कुर्यात् तेनायमाघारः सर्वाणि कर्माण्यतिरिक्तवान् भवति। एकस्य हि कर्मण एकैव ऋक् प्राप्ता। तथा सति बहुभिरनुष्ठानमतिरेकः। तस्य सर्वस्य दोषस्य परिहाराय [r]मनसा एवाऽऽघारयेत् मनसोऽप्रतिहतगतित्वात्। यद्वागादिभिर्न प्राप्तं तत् सर्वं [r]मनसा प्राप्तुं शक्यते॥

तिर्यञ्चमिति॥ 'दक्षिणाप्राञ्चम्' इत्युदाहृते सूत्रे वायवीं दिशमारभ्याऽऽग्नेय्यां समापनमुक्तम्। २० स एव सूत्रकार आघारयोः पुनरपि द्वे पक्षान्तरे दर्शितवान्। "ऋजू प्राञ्चौ होतव्यौ तिर्यञ्चौ वा" (आपश्रौ २·१२·८) इति। तत्र तिर्यक्पक्षं विधत्ते– 'तिर्यञ्चमा घारयत्यछम्बट्कारम्' इति॥ दक्षिणां दिशमारभ्योत्तरस्यां समापनं तिर्यक्त्वम्। [२०-]प्रतीचीमारभ्य प्राच्यां[-२०] समापने सत्येकस्या एव समिध उपरि घृतं पतेत्। तथा सति समिदन्तराणाम् [२१]अस्पर्शात् छम्बट्कारो वैयर्थ्यं भवेत्। तस्मात् [v]अछम्बट्-कारं यथा भवति तथा होतव्यम्। तिर्यक्त्वे सति सर्वसमित्संस्पर्शाद्वैयर्थ्यं न भवति॥ २५

वागिति॥ 'मनसाऽऽघारयति' इति यद्विहितं तदेव पुनः प्रशंसति– 'वाक् च मनश्चाऽऽर्ती-येतामहं देवेभ्यो हव्यं वहामीति वागब्रवीदहं देवेभ्य इति मनस्तौ प्रजापतिं प्रश्नमैताꣳ सोब्रवीत् प्रजापतिर्दूतीरेव त्वं मनसोऽसि यद्धि मनसा ध्यायति तद्वाचा वदतीति तत्खलु तुभ्यं न वाचा जुहवानि-त्यब्रवीत् तस्मात् मनसा प्रजापतये जुह्वति मन इव हि प्रजापतिः प्रजापतेराप्त्यै' इति॥ [२२]आर्तिरादरातिशयः तामिच्छेताम्। सैवाऽऽर्तिः स्पष्टीक्रियते– 'अहं देवेभ्यो हव्यं वहामि' इति वाक्येन। ततो वाक् च ३०

२२. मै.मै४–सर्वगतिको दण्डवत्।

२०–२०. अ.इ.उ.जो.ना.पा.हा–प्रतीच्यामारभ्य; क.हो१–प्रतीच्यामारभ्य प्राच्यां। २१. शृं–अस्पर्शात् आघारे। २२. आ.क–आर्तिरतिशयः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति मनस्तौ प्रजापतिं प्रश्नमैताꣳ सोऽब्रवीत् (४) प्रजापतिर्दूतीरेव त्वं मनसोऽसि यद्धि मनसा ध्यायति तद्वाचा वदतीति तत् खलु तुभ्यं न वाचा जुहवन्नित्यब्रवीत् तस्मान्मनसा प्रजापतये जुह्वति मन इव हि प्रजापतिः प्रजापतेराप्त्यै

मनः। तौ। प्रजापतिमिति प्रजा - पतिम्। प्रश्नम्। ऐताम्। सः। अब्रवीत् (४)। प्रजापतिरिति प्रजा - पतिः। दूतीः। एव। त्वम्। मनसः। असि। यत्। हि। मनसा। ध्यायति। तत्। वाचा। वदति। इति। तत्। खलु। तुभ्यम्। न। वाचा। जुहवन्। इति। अब्रवीत्। तस्मात्। मनसा। प्रजापतय इति प्रजा - पतये। जुह्वति। मनः। इव। हि। प्रजापतिरिति प्रजा - पतिः। प्रजापतेरिति प्रजा - पतेः। आप्त्यै।

[V]अहम् एव वहानि [V]इति अब्रवीत्। अथ [V]तौ तथा श्रद्धातिशयेन विप्रतिपद्यमानौ वाङ्मनसाख्यौ पदार्थौ पुत्रौ वा प्रजापतेः। लिङ्गव्यत्ययेन वा "नपुंसकमनपुंसकेन°" (पा १·२·६९) इति बाध्यते। [V]प्रजापतिं [V]प्रश्नम् [V]ऐताम् प्रष्टव्यत्वेनागच्छताम्॥

सोऽब्रवीदित्यादि॥ "सुपां सुलुक्°" (पा ७·१·३९) इति हल्ङ्यादिलोपापवादः सादेशः। वाचम् [V]अब्रवीत् [V]प्रजापतिः—[२३]मनसा ध्यातस्य [२३]बहिः [२४]ख्यापयित्रीति [२५]दूतस्थानीया [V]एव [V]त्वम् [V]असि। तस्मान्मन एव हविर्वोढुमर्हतीति। अथ वाक् प्रजापतिम् [२६V]अब्रवीत् तर्हि केचिदपि [V]तुभ्यं [V]न [V]वाचा मन्त्रेण [V]जुहवन् जुहुयुः। [V]तस्मात् वाचः शापात् [V]प्रजापतये [V]मनसा एव [V]जुह्वति इति। [२७]लेटि तस्यार्धधातुकत्वेन ङित्वाभावाद्गुणः, अन्त्यादेशश्च, द्विर्विकरणत्वेन शबपि मध्येऽवतिष्ठते। मन इव हीति। [२८]व्यापकत्वेन [२९]प्रजापतितुल्यत्वेन मनसा होमः [V]प्रजापतेः [V]आप्त्यै भवति॥

मनश्चेत्येतौ हविर्वहननिर्णयाय [V]प्रश्नं कर्तुं [V]प्रजापतिं प्राप्नुताम्। [V]सः [V]प्रजापतिः वाचम् [V]अब्रवीत्– हे वाक्, [V]त्वं [V]मनसः [V]दूतीः [V]एव [V]असि दासीभूतैवासि न तु स्वतन्त्रा। तत्कथमित्युच्यते– यस्मालोके पुरुषः [V]यत् पूर्वं [V]मनसा [V]ध्यायति [V]तत् पश्चात् [V]वाचा [V]वदति तस्मात् वाचो दूतीत्वमेवेति। अनन्तरं क्रुद्धा वाक् [V]अब्रवीत्– हे प्रजापते, यद्यहं दूती तर्हि [V]तुभ्यं कोऽपि [V]वाचा मा जुहोत्विति। [३३V]तस्मात् आधारं [V]प्रजापतये [V]मनसा [V]जुह्वति। यथा [V]मनः संकल्पेन कार्यं साधयति तथा [V]प्रजापतिः अपि। अतः सादृश्यान्मनसा होमः [V]प्रजापतेः [V]आप्त्यै भवति॥

२३–२३. मै– मनस्याध्यातस्य; तं३– तस्याध्यातस्य। २४. त्रि.हो– ख्यापयन्तीति। २५. त्रि.हो– तत्स्थानीया। २६. लं.हो– 'अब्रवीत्' इत्यस्यानन्तरम् 'इति'। २७. हो– लोटि। २८. हो–व्यापित्वेन। २९. लं– 'प्रजापतितुल्यत्वेन' नास्ति।

---

२३. ड.श्रं–तस्मात्कारणात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामिधेनीषु होतुर्नियमविशेषः]

परिधीन्त्सं मार्ष्टि पुनात्येवैनान् त्रिर्मध्यमं त्रयो वै प्राणाः प्राणानेवाभि जयति त्रिर्दक्षिणार्ध्यं त्रय(५)इमे लोका इमानेव लोकानभि जयति त्रिरुत्तरार्ध्यं त्रयो वै देवयानाः पन्थानस्तानेवाभि जयति त्रिरुप वाजयति त्रयो वै देवलोका देवलोकानेवाभि जयति द्वादश सं पद्यन्ते द्वादश मासाः संवत्सरः संवत्सरमेव प्रीणात्यथो

परिधीनिति परि-धीन्। समिति। मार्ष्टि। पुनाति। एव। एनान्। त्रिः। मध्यमम्। त्रयः। वै। प्राणा इति प्र-अनाः। प्राणानिति प्र-अनान्। एव। अभीति। जयति। त्रिः। दक्षिणार्ध्यमिति दक्षिण-अर्ध्यम्। त्रयः (५)। इमे। लोकाः। इमान्। एव। लोकान्। अभीति। जयति। त्रिः। उत्तरार्ध्यमित्युत्तर-अर्ध्यम्। त्रयः। वै। देवयाना इति देव-यानाः। पन्थानः। तान्। एव। अभीति। जयति। त्रिः। उपेति। वाजयति। त्रयः। वै। देवलोका इति देव-लोकाः। देवलोकानिति देव-लोकान्। एव। अभीति। जयति। द्वादश। समिति। पद्यन्ते। द्वादश। मासाः। संवत्सर इति सं-वत्सरः। संवत्सरमिति सं-वत्सरम्। एव। प्रीणाति। अथो इति।

परिधीनित्यादि ॥ गतम्। मध्यमादीनां प्राणादिजयहेतुत्वं यथाकथंचिदुत्प्रेक्ष्यम्। केचिदाहुः—देहमध्यस्थप्राणादिस्थानीया मध्यमा। दक्षिणभूगोलस्य प्रकाशत्वेन लोकत्वात् दक्षिणा लोकस्थानीया। उत्तरगोलस्याप्रकाशत्वात् देवपथतुल्या उत्तरा इति। [३०]"दिक्पूर्वपदाट्टच्च" (पा ४·३·६) इति अर्धान्तात्[३०] यत्प्रत्ययः।

त्रिरुप वाजयतीति ॥ अग्निं [३१V]त्रिः विधूनयति। [३२]देवलोकस्थानीयस्याग्नेः उपवाजनेन लोकत्रयावाप्तिः। सत्यलोकान्तास्त्रयो देवलोकाः। वातेर्णिजन्तस्य "वो विधूनने जुक्" (पा ७·३·३८) इति जुगागमः।

परिधीनिति ॥ यदुक्तं सूत्रकारेण— "इध्मसंनहनैः सह स्फ्यैर्ऋते स्फ्यैर्वाऽऽग्नीध्रोऽनुपरिक्रामं परिधीन् यथापरिधितमन्वग्रं त्रिस्त्रिः संमृज्य" (आपश्रौ २·१३·१) इति, तदेतत् संमार्जनं स्फ्येन सहितैरिध्मसंनहनदर्भैः कर्तव्यमिति विधत्ते— 'परिधीन्त्सं मार्ष्टि पुनात्येवैनान्' इति ॥

त्रिरिति ॥ क्रमेणैकैकस्य परिधेः संमार्जनावृत्तिं विधत्ते— 'त्रिर्मध्यमं त्रयो वै प्राणाः प्राणानेवाभि जयति त्रिर्दक्षिणार्ध्यं त्रय इमे लोका इमानेव लोकानभि जयति त्रिरुत्तरार्ध्यं त्रयो वै देवयानाः पन्थानस्तानेवाभि जयति' इति ॥ प्राणापानव्याना इति त्रित्वम्, लोकत्रित्वं प्रसिद्धम्, स्वर्गलोक-यमलोकब्रह्मलोकविषयाः [२५]त्रयः [२५]पन्थानः। तत्र यमलोकविषयस्य परिहारो जयः, इतरयोः प्राप्तिर्जयः। त्रित्वसाम्यात् तज्जय इति स्तूयते ॥

त्रिरिति ॥ यदुक्तं सूत्रकारेण— "वेदेनाग्निं त्रिरुपवाज्य" (आपश्रौ २·१२·७) इति, तदेतद्विधत्ते— 'त्रिरुप वाजयति त्रयो वै देवलोका देवलोकानेवाभि जयति' इति ॥ देवलोकानां त्रित्वं तदभिजयश्च [२५]मार्गत्रित्वतज्जयवद्व्याख्येयम् ॥

३०–३०. लं.हो – दिक्पूर्वपदाच्चेति अजान्तात् (?); तं३ – दिक्पूर्वपदाच्चेति अर्धान्तात्।
३१. तं३–त्रिभिः। ३२. लं– °स्थानीयाग्नेः।
२४. क.शृं.हो१– मार्गत्रयवद्व्याख्येयम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संवत्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्या आधारमा धारयति तिर इव (६) वै सुवर्गो लोकः सुवर्गमेवास्मै लोकं प्र रोचयत्यृजुमा धारयत्यृजुरिव हि प्राणः संततमा धारयति प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै

संवत्सरमिति सं-वत्सरम्। एव। अस्मै। उपेति। दधाति। सुवर्गस्येति सुवः-गस्य। लोकस्य। समष्ट्या इति सम्-अष्ट्यै। आधारमित्या-धारम्। एति। धारयति। तिरः। इव (६)। वै। सुवर्ग इति सुवः-गः। लोकः। सुवर्गमिति सुवः-गम्। एव। अस्मै। लोकम्। प्रेति। रोचयति। ऋजुम्। एति। धारयति। ऋजुः। इव। हि। प्राण इति प्र-अनः। संततमिति सं-ततम्। एति। धारयति। प्राणानामिति प्र-अनानाम्। अन्नाद्यस्येत्यन्न-अद्यस्य। संतत्या इति सं-तत्यै। अथो इति। रक्षसाम्। अपहत्या इत्यप-हत्यै।

१० द्वादशत्वान्वयात् द्वादशमासात्मकः [V]संवत्सरः [V]अत्र संपादितो भवति। स च स्वर्गावाप्तिहेतुरिति॥

आधारमित्यादि॥ [३३]धारां तिरश्चीनत्वेन तिरोभूतात्मानं स्वर्गम् [V]अस्मै [V]प्र [V]रोचयति दीपयति वा। ऋजुरिति। अकुटिलधाराम् [V]आधारयति। [V]प्राणानाम् [V]अन्नाद्यस्य अविच्छेदाय भवति। [३४V]रक्षसाम् [V]अपहत्यै भवति॥

१५ **द्वादशेति॥** त्रिषु परिधिषु वह्नौ च [२५]येयं प्रत्येकं त्रिः क्रियावृत्तिस्तामेकीकृत्य प्रशंसति- 'द्वादश सं पद्यन्ते द्वादश मासाः संवत्सरः, संवत्सरमेव प्रीणात्यथो संवत्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्यै इति॥ न केवलं संवत्सरदेवतायाः प्रीतिः किंतु तत् [V]संवत्सरं [२१]यजमानार्थं कर्मानुष्ठानकालत्वेन संपादयति। तच्च स्वर्गलोकप्राप्त्यै भवति॥

आधारमिति॥ पूर्वत्र विहितं तिर्यञ्चमाधारमनूद्य प्रशंसति- 'आधारमा धारयति तिर इव
२० वै सुवर्गो लोकः सुवर्गमेवास्मै लोकं प्र रोचयति' इति॥ प्राङ्मुखेन यजमानेन दृश्यमानः स्वर्गः [V]लोकः दक्षिणोत्तरायामेन प्रतीयमानत्वात् [V]तिरः [V]इव भवति। अतस्तिर्यगाधारेण यजमानाय [२७]स्वर्गमुत्पादितवान् भवति। अथवा स्रुच्याधारस्य द्वितीयस्यायं विधिर्द्रष्टव्यः॥

ऋजुमिति॥ आधारे गुणान्तरद्वयं विधत्ते- 'ऋजुमा धारयत्यृजुरिव हि प्राणः संततमा धारयति प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै' इति॥ दक्षिणां दिशमारभ्योत्तरदिगवसानपर्यन्त-
२५ माधारधारायाः वक्रत्वं यथा न भवति, यथा च विच्छेदो न भवति तथा कुर्यात्। प्राणवायुश्च हृदयमारभ्य मुखे निःसरन् वामदक्षिणपार्श्वयोः [२८]अप्रवेशेन [V]ऋजुः [V]एव भवति संततश्च भवति। अतः प्राणस्यान्नस्य च [V]संतत्यै संपद्यते। किं च सांतत्येन [V]रक्षसाम् अवकाशाभावादपहतिर्भवति॥

३३. लं.हो- धारायाम्। ३४. लं- स च रक्षसाम्।

२५. ड- या। २६. अ.इ.उ.पा.हो१- यजमानार्थ°। २७. शृं- स्वर्गे रुचिमुत्पादितवान्;
३० अ.इ.उ.जो.ना.पा.हा- स्वर्गतिमुत्पादित°। २८. शृं.हो१- अप्रवेशात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामिधेनीषु होतुर्नियमविशेषः]

यं कामयेत प्रमायुकः स्यादिति जिह्मं तस्याऽऽ घारयेत् प्राणमेवास्माज्जिह्मं नयति ताजक् प्र मीयते शिरो वा एतद्यज्ञस्य यदाघार आत्मा ध्रुवा(७)ऽऽघारमाघार्यं ध्रुवाꣳ समनक्त्यात्मन्नेव यज्ञस्य शिरः प्रति दधात्यग्निर्देवानां दूत आसीद्-

यम्। कामयेत। प्रमायुक इति प्र-मायुकः। स्यात्। इति। जिह्मम्। तस्य। एति। घारयेत्। प्राणमिति प्र-अनम्। एव। अस्मात्। जिह्मम्। नयति। ताजक्। प्रेति। मीयते। शिरः। वै। एतत्। यज्ञस्य। यत्। आघार इत्या-घारः। आत्मा। ध्रुवा (७)। आघारमित्या-घारम्। आघार्यमित्या-घार्यं। ध्रुवाम्। समिति। अनक्ति। आत्मन्। एव। यज्ञस्य। शिरः। प्रतीति। दधाति। अग्निः। देवानाम्। दूतः। आसीत्।

यमित्यादि ॥ गतम्। [v]जिह्मं कुटिलम्।

शिरो वा इत्यादि ॥ आघारशेषेण ध्रुवादिसमञ्जनादात्मनि [v]यज्ञस्य [v]शिरः [३५]प्रतिहितं भवति ॥

अग्निर्देवानामित्यादि ॥ अध्वर्युप्रवरविधिः। दैव्यः इति वक्ष्यमाणत्वान्मानुषोऽग्निर्गृह्यते। स च ब्राह्मण एषः [v]देवानां यागे हविषो वोढा [v]आसीत्; [v]दैव्यः [v]अग्निः [v]असुराणाम् आसीत्।

यमिति ॥ ऋजुत्वस्य नित्यप्रयोगाङ्गत्वात् काम्यत्वेन वक्रत्वं विधत्ते– 'यं कामयेत प्रमायुकः स्यादिति जिह्मं तस्याऽऽ घारयेत् प्राणमेवास्माज्जिह्मं नयति ताजक् प्र मीयते' इति ॥ [v]यं यजमानमुद्दिश्य मरणं [v]कामयेत [v]तस्य [v]जिह्मं वक्रं यथा भवति तथा [v]आघारयेत्। तेन वक्रत्वेन [v]अस्मात् यजमानात् [v]प्राणं वामादिपार्श्वनाडीषु प्रविश्य वक्रत्वं प्रापयति। तेन श्वासोपरोधेन तदानीमेवासौ म्रियते ॥

शिर इति ॥ आघारशेषेण [२९]ध्रुवायामञ्जनं विधत्ते– 'शिरो वा एतद्यज्ञस्य यदाघार आत्मा ध्रुवाऽऽघारमाघार्यं ध्रुवाꣳ समनक्त्यात्मन्नेव यज्ञस्य शिरः प्रति दधाति' इति ॥ स्वात्मस्थानीयायां ध्रुवायां यज्ञशिरःस्थानीयस्याऽऽघारस्य प्रक्षेपे सति स्वस्मिन्नेव यज्ञशिरः स्थापितवान् भवति। ननु परिधि-संमार्जनादयः पौरोडाशिककाण्डेऽपि (द्र. तैसं २·६·६) विहिताः। बाढम्। [३०]तर्हि अनुक्रमेण मन्त्राणां व्याख्यायमानत्वात् '[३१]भुवनम्' (तैसं १·१·१२) इत्यादिमन्त्रव्याख्यानावसरे (तैब्रा ३·३·७) युक्ता एतद्विषयः। इह तु तदनुवादेन प्रत्यभिज्ञाप्य तेषु [३२]ऋजुत्वादयो [३३]गुणा विधीयन्ते। ततो नास्ति पुनरुक्त-दोषः। अत एवोक्तानुवादकत्वादनुब्राह्मणमेतदिति संप्रदायविदः ॥

अग्निरिति ॥ यदुक्तं सूत्रकारेण– "[३४]ऊर्ध्वञ्जुमासीनं होतारं वृणीतेऽग्निर्देवो होता देवान् यक्षद्-विद्वाꣳश्चिकित्वान्मनुष्वद्भरतवदमुवदमुवदिति यथार्षेयो यजमानः" (आपश्रौ २·१६·५) इति; "इत ऊर्ध्वान-ध्वर्युर्वृणीतेऽमुतोऽर्वाचो होता" (आपश्रौ २·१६·९) इति च। अस्यायमर्थः–यजमानस्य यादृशान्यार्षेयाणि तादृशानि होतारं प्रत्यमुवदमुवदिति [३५]तत्तन्नामनिर्देशपुरःसरं प्रयोक्तव्यानि। तदिदमध्वर्युकर्तृकं होतृविषयं

३५. तं२– 'प्रतिहितं' नास्ति।

२९. हा– ध्रुवाया अञ्जनं। ३०. आ.क.शृं– तत्र हि। ३१. क.ड.शृं.हो१ – भुवनमसि। ३२. ड– ऋजुत्वादि। ३३. क.ड.शृं.हो१–गुणविशेषाः। ३४. आ.क– उर्ध्वस्तिष्ठन्। ३५. आ.क– तत्तन्नामपुरःसरं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[सामधेनीषु होतुर्नियमविशेषः

दैव्योऽसुराणां तौ प्रजापतिं प्रश्नमैताꣳ स प्रजापतिर्ब्राह्मणमब्रवीदेतद्वि ब्रूहीत्या श्रावयेतीदं देवाः शृणुतेति वाव तदब्रवीदग्निर्देवो होतेति य एव देवानां तमवृणीत ततो देवा (८) अभवन् पराऽसुरा यस्यैवं विदुषः प्रवरं प्रवृणते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति

दैव्यः। असुराणाम्। तौ। प्रजापतिमिति प्रजा-पतिम्। प्रश्नम्। ऐताम्। सः। प्रजापतिरिति प्रजा-पतिः। ब्राह्मणम्। अब्रवीत्। एतत्। वीति। ब्रूहि। इति। एति। श्रावय। इति। इदम्। देवाः। शृणुत। इति। वाव। तत्। अब्रवीत्। अग्निः। देवः। होता। इति। यः। एव। देवानाम्। तम्। अवृणीत। ततः। देवाः (८)। अभवन्। परेति। असुराः। यस्य। एवम्। विदुषः। प्रवरमिति प्र-वरम्। प्रवृणत इति प्र-वृणते। भवति। आत्मना। परेति। अस्य। भ्रातृव्यः। भवति।

"देवाद्यञौ" (द्र. पा ४·१·८५ वा ३) इति यञ्। [V]तौ [V]प्रजापतिं [V]प्रश्नम् [V]ऐतां प्रष्टव्यत्वेनागच्छताम् कतरो नो [३५]हविषा यष्टुमर्हतीति। अथ [V]सः [V]प्रजापतिः [V]ब्राह्मणं मानुषमग्निं दूत्ये स्थापयितुकामः [V]अब्रवीत् [V]आ [V]श्रावय [V]इति, यदिदमध्वर्युणा त्वां प्रत्युच्यते, [V]एतत् [V]वि [V]ब्रूहि आचक्षत्वेति। सः अपि [V]इदं [३७V]देवाः [V]शृणुत [V]इति, देवेभ्य आवेदनार्थं [V]वाव इति, [V]तत् [V]अब्रवीत्। ततः '[V]अग्निः [V]देवः [V]होता' इत्यादिना वाक्येन [V]यः [३८-V]एव दूतो[३८] ब्राह्मणात्माऽग्निः [V]तम् एव [V]अवृणीत— अयम् अग्निः देवः होता ब्राह्मणात्मा देवान् यष्टुमर्हति विद्वान् आश्रावणादितत्त्वज्ञः। [३९]चिकित्वा(न्) महाज्ञानः, मनुरिव [४०]भरत इव जमदग्निरिवोर्व इव [४१]अप्नवान इव च्यवन इव भृगुरिवेति। [४२]एवमिति। ऊर्ध्वानृषीन् प्रवृणानो होतारं वृणीते॥ ततो देवा इत्यादि॥ गतम्॥

वरणम्। सामिधेनीप्रस्तावे तु—"आर्षेयं वृणीते" (तैसं २·५·८) इति होतृकर्तृकमग्निविषयं वरणमुक्तम्। तयोरयं विशेषः। अर्वाञ्चमारभ्येत ऊर्ध्वानुत्तरोत्तरानध्वर्युर्वृणीते। होता तूत्तममारभ्य [३९]अधस्तनान् वृणीते। तद्यथा—भार्गवच्यावनाप्नवानौर्वजामदग्न्य इत्येवं होतृकर्तृकं पूर्वमुदाहृतम्। अध्वर्युकर्तृके तु—'मनुष्वद्भरतवत्' इत्यन्तं मन्त्रं पठित्वा—'जमदग्निवदूर्ववदाप्नवानवच्च्यवनवद्भृगुवत्' इति प्रयोक्तव्यम् इति। तदिदमध्वर्युकर्तृकं होतृविषयं वरणं विधत्ते—'अग्निर्देवानां दूत आसीद्दैव्योऽसुराणां तौ प्रजापतिं प्रश्नमैताꣳ स प्रजापतिर्ब्राह्मणमब्रवीदेतद्विब्रूहीत्या श्रावयेतीदं देवाः शृणुतेति वाव तदब्रवीदग्निर्देवो होतेति य एव देवानां तमवृणीत ततो देवा अभवन् पराऽसुरा यस्यैवं विदुषः प्रवरं प्रवृणते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति' इति। द्विविधो ह्यग्निर्मानुषो दैव्यश्चेति[३७]। भूलोके वर्तमानो होमसाधनभूतो मानुषः [V]अग्निः। स च [V]देवानां हविर्वहनेन तदीयः [V]दूतः [V]आसीत्। दिवि वर्तमानो [३८V]दैव्यः। स चान्यत्रापि

३६. तं३.त्रि.मै.लं.हो— हवींषि। ३७. लं.हो— देवानाम्। ३८–३८. मै४— एवंभूतो। ३९. हो— कित्वा(?)। ४०. मै— भारतः। ४१. तं३.त्रि.लं.हो— आप्नवानः; मै— अप्नुवानः। ४२. तं३.त्रि.लं.हो— एवमितर°; मै४ एवमितः।

३६. ड—अधस्तात्; शृं—अधरान्। ३७. ड— 'इति' नास्ति। ३८. ड— दैव्योऽग्निः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामिधेनीषु होतुर्नियमविशेषः]

यद्ब्राह्मणश्चाब्राह्मणश्च प्रश्नमेयातां ब्राह्मणायाधि ब्रूयाद्यद्ब्राह्मणायाध्याहाऽऽत्मनेऽध्याह यद्ब्राह्मणं पराहाऽऽत्मानं पराऽऽह तस्माद्ब्राह्मणो न परोच्यः ॥ ११ ॥

[वा आरण्याश्चार्व रुन्द्धेऽथो पशुभिः सोऽब्रवीद्दक्षिणाध्यै त्रयं इव ध्रुवा देवाश्चत्वारिंशच्च ।]

यत्। ब्राह्मणः। च। अब्राह्मणः। च। प्रश्नम्। एयाताम्इत्या - इयाताम्। ब्राह्मणाय। अधीति। ब्रूयात्। यत्। ब्राह्मणाय। अध्याहेत्यधि - आह। आत्मने। अधीति। आह। यत्। ब्राह्मणम्। ५
पराहेति परा - आह। आत्मानम्। परेति। आह। तस्मात्। ब्राह्मणः।
न। परोच्य इति परा - उच्यः ॥ ११ ॥
[शब्रा १.४.२.१८, १९; १.५.८-११]

यद्ब्राह्मणश्चेत्यादि ॥ ब्राह्मणाब्राह्मणयोः प्रश्नार्थमागतयोः [४३v]ब्राह्मणाय अधिकं-[४३] पक्षपातेन [v]ब्रूयात्। गतमन्यत्। अनादरेण वचनं [v]परोच्यः इति। छान्दसः क्यच् ॥ १०

इति द्वितीये पञ्चमे एकादशोऽनुवाकः।

श्रूयते – "[३९]दिवि नाको नामाग्निः। तस्य विप्रुषो भागधेयम्" (तैब्रा ३.२.३) इति। स च [r]असुराणां हितमाचरंस्तदीयो दूत आसीत्। [v]तौ उभावावयोः कस्य दौत्यमुचितमिति [r]प्रश्नम् अभिलक्ष्य [v]प्रजापतिं प्राप्नुताम्। तत्र योऽयं मानुषोऽग्निः स ब्राह्मणः। ब्रह्मणि वेदे विहितं कर्म साधयितुं प्रवृत्तत्वात्। दैव्यस्त्वसुराणां [४०]कर्म साधयितुं प्रवृत्तत्वादासुर इत्युच्यते न [४१]तु ब्राह्मण इति। तयोर्मध्ये [r]ब्राह्मणम् अग्निं [४२]प्रति १५
[r]प्रजापतिः [r]अब्रवीत्। हे मानुषाग्ने, त्वमेव दूत्यमर्हसि। तस्मात् त्वमेव यागे वक्तव्यम् [r]एतत् सर्वं [v]ब्रूहि [r]इति। किं तत्सर्वमिति तदुच्यते। होतारं प्रत्यध्वर्युः [r]आ [r]श्रावय [r]इति प्रयुङ्क्ते। तस्य प्रयोगस्याभिप्रायः कथ्यते–हे [v]देवाः [v]इदं यजमानसंबन्धि हविर्दानं [r]शृणुत [r]इति एतमर्थमेव 'होतर्ब्रूहि' इत्यभिप्रेत्य [४३]तदाश्रवणवाक्यं हे होतः, त्वां प्रत्यध्वर्युः [r]अब्रवीत्। तस्मात् त्वमेव याज्यापाठमुखेन देवानां श्रवणं यथा भवति तथा हौत्रमेतत् सर्वं त्वमेव ब्रूहीति। आसुरं प्रत्यध्वर्युणा 'आ श्रावय' इत्यनुक्तत्वादसौ याज्यादिकं मा २०
ब्रवीदित्यभिप्रायः। [४४-]यस्मात् प्रजापतिः ब्राह्मणरूपस्य अग्नेरेव दूतत्वं संपादितवान् तस्मात् तादृशाग्निप्रतिपादनेन 'अग्निर्देवो होता' इति मन्त्रेण अध्वर्युर्होतारं वृणीते इति शेषः। एतन्मन्त्रपाठेन [r]देवानां यः दूतः [r]तम् एव वृतवान् भवति। [r]प्रवरं यथोक्तं 'जमदग्निवत्' इत्यादिकं प्रकृष्टं वरणं [v]प्रवृणते अनुतिष्ठति ॥

यदिति ॥ ब्राह्मणाग्निवरणं-[४४] प्रशंसति–'यद्ब्राह्मणश्चाब्राह्मणश्च प्रश्नमेयातां ब्राह्मणायाधि ब्रूयाद्यद्ब्राह्मणायाध्याहाऽऽत्मनेऽध्याह यद्ब्राह्मणं पराहाऽऽत्मानं पराऽऽह तस्माद्ब्राह्मणो न परोच्यः' इति॥ यदि २५
लोके ब्राह्मणाब्राह्मणौ विवदमानावहमेवाधिक इति [४५]अग्निविषयं [r]प्रश्नं कर्तुं कंचिदभिज्ञं प्रत्यागच्छेतां तदानीं

४३–४३. मै४– ब्राह्मणापाक्षिकं।

३९. क.हा– दिवा। ४०. शृं– अपि कार्यं। ४१. आ– 'तु' नास्ति। ४२. ड– 'प्रति' नास्ति। ४३. हो१– तदाश्रयणवाच्य। ४४–४४. आ.क– यस्मात्प्रजापतिर्ब्राह्मणाग्निवरणं कृतवांस्तस्मादेवा उत्कृष्टा अभवन्। पराभूता असुराः। प्रशंसति; ने– तस्मात् प्रजापतिः ब्रह्मणाग्नेरेव वरणं। ३०
४५. अ.इ.उ.पा– दिधिषुं यं प्रति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोऽभिज्ञो ब्राह्मणस्यैवाऽऽधिक्यं [र]ब्रूयात्। तेन वक्तुः स्वस्यैवाऽऽधिक्यं संपादितं भवति। ब्राह्मणस्य पराभववचने स्वस्यैव पराभव उक्तो भवति। [र]तस्मात् कदाचिदपि [र]ब्राह्मणः पराभवविषयः [र]न कर्तव्यः। सोऽयं प्रासङ्गिकः [४६]पुरुषार्थो विधिर्द्रष्टव्यः ॥

अत्र मीमांसा ॥ तृतीयाध्यायस्य चतुर्थपादे चिन्तितम् –

" निवीतं तु मनुष्याणां [४७]विधिर्वैषोऽर्थवादकः।
अपूर्वत्वात् प्रकरणात् [४८]नुः [४९]क्रतोर्वा विधीयते ॥
प्राप्तं निवीतं मर्त्येषु प्रायेणैतस्य दर्शनात्।
उपवीतविधावेकवाक्यत्वादर्थवादता " ॥ (जैन्या ३·४·१-२) ॥

[५०]दर्शपूर्णमासयोः श्रूयते – " निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत् कुरुते " (तैसं २·५·११) इति। तत्र निवीतस्य पूर्वं [५१]मानान्तरेणाप्राप्तत्वात् विधेयत्वमभ्युपेतव्यम्। तच्च निवीतं 'मनुष्याणाम्' [५२-]इति षष्ठया-[५२] पुरुषार्थत्वेन विधीयत इत्येकः [५३]पूर्वपक्षः। अस्मिन् पक्षे मनुष्यसंबन्धो द्विविधः– सुवर्णधारणवत् सर्वपुरुषसंबन्धः इत्येकः प्रकारः। उपवीतप्राचीनावीतयोः क्रतुप्रवेशरहितयोः स्वतन्त्रदैविकपैतृककर्मणोरपि दर्शनात् तत्साहचर्येण स्वतन्त्र [५४]आचार्यातिथ्यादिमनुष्यविषये कर्मणि निवीतमित्यपरः प्रकारः। प्रकरणबलाद्यागधर्म इति द्वितीयः पूर्वपक्षः। [५५]अस्मिन् पक्षे मनुष्यग्रहणं कर्तृसंबन्धानुवादः। षष्ठीश्रुतिप्रकरणयोरविरोधाद्दुभयावलम्बनेन क्रतुसंबन्धिमनुष्यधर्म इति पक्षान्तरमुदेति। तच्च द्विविधं, लोहितोष्णीषादिवदृत्विग्धर्म इत्येकः प्रकारः। क्रतावेव यन्मनुष्यप्रधानं कर्मान्वाहार्यदानादि तद्धर्मत्वे सति [५६]उपवीतप्राचीनावीतसाहचर्यमप्यनुगृह्यत इत्यपरः [५७]प्रकारः। सर्वथा निवीतं नार्थवाद इत्येवं प्राप्ते ब्रूमः। अत्र प्रतीयमानं निवीतादिकं वासोविषयं न तु त्रिवृत्सूत्रविषयम्। " अजिनं वासो वा दक्षिणत उपवीय " (तैआ २·१) इत्यनेन सदृशत्वात्। वस्त्रस्य च निवीतं सौकर्याय प्राप्तम्। [५८]अत्र [५९]प्राचीनावीतोपवीतयोरवश्यमेकस्मिन् पार्श्वे वस्त्रमधः पतेत्। अतः प्राप्तेऽर्थे 'मनुष्याणाम्' इति षष्ठीश्रुतिर्न विधायिका। न च प्रकरणात् क्रत्वङ्गत्वेन विधिः। वाक्यभेदप्रसङ्गात्। उपवीतं तावद्विधीयते। अन्यथा 'देवलक्ष्ममेव तत्कुरुते' इति प्रशंसावैयर्थ्यापत्तेः। तस्मिंश्चोपवीतविधावर्थवादत्वेन निवीतप्राचीनावीतयोरेकवाक्यत्वसंभवे पृथक्विधानमयुक्तम्। निवीतप्राचीनावीते मनुष्यपितृविषयत्वाद्दैविके कर्मण्ययोग्ये, उपवीतं तु योग्यमिति व्यतिरेकमुखेन(ण) स्तावकं निवीतम्। तस्मादर्थवादः। उपव्ययत इत्यस्य तु विधित्वं प्रथमकाण्डस्याऽऽद्यानुवाके चिन्तितम् ॥

---

४६. श्रृ.हो१– पुरुषार्थ°। ४७. अ.इ.उ.जो.ना.पा.हा–विधिर्वैषोऽनुवादकः। ४८. क– 'नुः' नास्ति। ४९. क–क्रतोर्वापि। ५०. ड– °मासप्रकरणे। ५१. हो१– आम्नायमन्तरेणा°। ५२–५२. ड– 'इति षष्ठया' नास्ति। ५३. क.ड– पूर्वः पक्षः। ५४. अ.इ.उ.जो.ना.पा.हा– आचार्यादि°। ५५. अ.इ.उ.जो.ना.पा.हा– तस्मिन्। ५६. क.जो.ना.हा– उपवीतसाह°; अ.इ.उ.पा– निवीतप्राचीना°। ५७. क.ड– 'प्रकारः' नास्ति। ५८. ड– 'अत्र' नास्ति। ५९ ना– उपवीतप्राचीना°; अ.इ.उ.जो.पा.हा– प्राचीनावीतयो°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामिधेनीषु होतुर्नियमविशेषः]

तृतीयाध्यायस्यैव प्रथमपादे चिन्तितम्–

" उपव्ययत इत्यस्य सामिधेन्यङ्गताऽथवा ।
दर्शाङ्गता प्रक्रियैषाऽवान्तराऽतोऽस्त्विहाग्रिमः ॥
लिङ्गादग्नेरङ्गभूतैर्निवित्संज्ञकमन्त्रकैः ।
विच्छेदे सति दर्शाङ्गं महाप्रकरणोक्तितः " ॥ (जैन्या ३.१.२५-२६) ॥ ५

दर्शपूर्णमासप्रकरणे " विश्वरूपो वै त्वाष्ट्रः " (तैसं २.५) इत्यस्मिन् प्रपाठके सप्तमाष्टमयोरनुवाकयोः सामिधेनीब्राह्मणमाम्नातम् । नवमे निवित्संज्ञकानाम् - ' अग्ने महाꣳ असि ब्राह्मण भारत " [६०]-इत्यादीनां मन्त्राणां-[६०] ब्राह्मणम् । दशमे काम्याः सामिधेनीपक्षाः । एकादशे तूपवीतमेवं विहितम्- " निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत्कुरुते " इति । तत्र पूर्वन्यायेन सामिधेनीप्रकरणस्यावान्तरस्य [६१]अङ्गीकारात् [६२]सामिधेन्यङ्गत्वमुपवीतस्येति चेत् । न । निविद्- १०
ब्राह्मणेन सामिधेनीप्रकरणस्य [६३]विच्छेदितत्वात् । न च निविदामपि [६४]सामिधेन्यङ्गतया [६५]तत्प्रकरणपाठात् अविच्छेदकत्वमिति वाच्यम् । लिङ्गेन निविदामग्न्यङ्गत्वावगतत्वात् । आहुत्यधिकरणभूतमग्निं संबोध्य ' महाꣳ असि ' इत्यादिभिर्निविद्वाक्यैरग्नेरुत्साहजननाय तद्गुणा [६६]आवेद्यन्ते । अत एव निर्वचनमेवं श्रूयते " निविद्भिर्न्यवेदयन् । तन्निविदां निवित्त्वम् " (तैब्रा २.२.८) इति । ननु [६७]सम्यगिध्यतेऽग्नियाभिर्ऋग्भिस्ताः सामिधेन्य इति व्युत्पत्त्या ता अप्यत्र ज्वलनद्वारेणाग्न्यर्था एवेति चेत् । [६८]सन्तु नाम । नैतावता परस्पर- १५
मङ्गाङ्गिभावः । ननु विच्छिद्यतां सामिधेनीप्रकरणं, निवित्प्रकरणेनोपवीतस्य निविदङ्गत्वं स्यादिति चेत् । न । पूर्वोत्तरानुवाकयोर्निविदामश्रवणेन प्रकरणाभावात् । संनिधिना तदङ्गत्वमिति चेत् । न । काम्यसामिधेनीभिः व्यवहितत्वात् । न च काम्यसामिधेन्यङ्गता शङ्कनीया, संनिधितः प्रकरणस्य प्रबलत्वात् । तस्मादिह प्रयाजन्यायाभावात् महाप्रकरणेन दर्शपूर्णमासाङ्गमुपवीतम् ॥

तत्रैव चतुर्थपादे चिन्तितम् – २०

" [६९]-सर्वार्थमुत दर्शार्थमुपव्ययत-[६९] इत्यदः ।
[७०]-सर्वार्थमग्निहोत्रे स्यादुपवीतीति-[७०] लिङ्गतः ॥

६०–६०. ड–इत्यादिकं । ६१. आ.क–स्वीकारात् । ६२. ड– सामिधेन्यङ्गमुपवीतमिति । ६३. आ.क– विच्छिन्नत्वात् । ६४. अ.इ.उ.पा– सामिधेन्यङ्गत्वेन । ६५. शृं.हा.हो१–°प्रकरणापाठात् । ६६. ड– संबोध्यन्ते । ६७. अ.इ.जो.पा.हा– °ग्निकार्याणि स ऋग्भिताः । ६८. आ.क– भवतु । ६९–६९. ड– सर्वार्थमुपवीतार्थमुप° । ७०–७०. शृं– सर्वार्थमग्निहोत्रस्थाः उप° । २५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[७१]दर्शाद्यर्थं प्रकरणाल्लिङ्गे स्यात् सिद्धिरन्यथा ।
दोहं मृताग्निहोत्रस्य स्तोतुमेतदनूदितम् " ॥ (जैन्या ३·४·३-४) ॥

" यज्ञोपवीती हि देवेभ्यो दोहयति " इत्येवमग्निहोत्रे यज्ञोपवीतस्य सिद्धवदनुवादेन लिङ्गेन सर्वकर्मार्थमुपवीतमिति चेत् । न । लिङ्गस्यान्यथोपपत्तेः । मृताग्निहोत्रं तस्मिन् दिनेऽन्येन हूयते । तत्र " प्राचीनावीती दोहयेत् " (आपश्रौ ९·११·८) इति विधाय तस्य स्तुतये ' यज्ञोपवीती ' इत्याद्यनूदितम् । अतो [७२]लिङ्गाभासेन बाधासंभवात् [७३]प्रकरणाद्दर्शपूर्णमासाङ्गमुपवीतम् ॥

द्वादशाध्यायस्य तृतीयपादे चिन्तितम्-

" ऋजुत्वादय आधारे विकल्पन्ते न वाऽग्रिमः ।
एकार्थत्वाददृष्टार्थभेदात् संभवतोऽन्तिमः " ॥ (जैन्या १२·३·४) ॥

दर्शपूर्णमासयोराम्नायते- " ऋजुमा धारयति " " संततमा धारयति " " आधारमा धारयति " (तैसं २·५·११) इति । तेषामृजुत्वादीनामाधारोपकारद्वारा कार्यस्यैकत्वात् [७४]विकल्प इति चेत् । न । दृष्टद्वारभेदाभावेऽप्यदृष्टद्वारभेदात् [७५]सहानुष्ठातुं संभवाच्च न विकल्पः ॥

तत्रैवान्यच्चिन्तितम्-

" आधारे मन्त्रसाहित्यं धारा वा [७६]संततोऽग्रिमः ।
कर्मैकत्वान्नाऽऽज्यधारानैरन्तर्यस्य संभवात् " ॥ (जैन्या १२·३·१३) ॥

" संततमा धारयति " (तैसं २·५·११) इत्यत्र पूर्ववदाहुतिनैरन्तर्यं न संभवति । आहुतेरेकत्वात् । अतो मन्त्रकर्मसाहित्यस्यैव संततशब्दार्थत्वात् मन्त्रादौ कर्मोपक्रम इति चेत् । मैवम् । [७७]क्षार्यमाणाज्यबिन्दुनैरन्तर्यस्य संततशब्दार्थत्वसंभवात् । न च प्रयाजाद्याहुतिष्वपि [७८-]नैरन्तर्यमस्तीति शङ्कनीयम्[-७८] । तत्र [७९-]विच्छिद्य विच्छिद्य[-७९] बिन्दुपातेऽपि कर्मवैकल्याभावात् । अत्र तु न तथेति [८०]वैषम्यम् । तथा सत्याधाराय [८१-]यावदाज्यं होतव्यं[-८१] [८२-]तत्सर्वं शनैरविच्छेदेनाऽऽहवनीये[-८२] पातयेदिति संततशब्दार्थः । यदि मन्त्रकर्मणोः सहोपक्रमः स्यात् तदानीमनेन मन्त्रेणेति तृतीयाश्रुत्युक्तं पूर्वकालवर्तित्वलक्षणं मन्त्रस्य [८३]करणत्वं हीयेत । तस्मात् पूर्ववन्मन्त्रान्ते कर्मसंनिपातः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः ॥

---

७१. अ.इ.उ.पा- दर्शार्थत्वं । ७२. अ.इ.उ.जो.पा- लिङ्गाभावेन । ७३. अ.इ.उ.जो.ना.पा.हा-दर्शपूर्णमासाङ्गमुपवीतं प्रकरणात् । ७४. हा- विकल्पते । ७५. आ.क-सहानुष्ठान° । ७६. अ.इ.उ.पा- सन्धितोऽग्रिमः । ७७. जो.ना.हा-धार्यमाणस्याज्यस्य बिन्दुनैरन्तर्यस्य; अ.इ.उ.क.पा.हा- धार्यमाणस्य आज्यस्य बिन्दुनैरन्तर्यस्य । ७८-७८. क.जो.ना.हा- नैरन्तर्यमस्तीति शङ्क्यं; इ-एतन्नियतमस्तीति शङ्कनीयम्; अ.उ.पा- एतन्नियतमस्त्विति शङ्कनीयम् । ७९-७९. अ.इ.ड.ना.पा.हो१- विच्छिद्य । ८०. क.जो.ना.हा- कर्मवैषम्यम् । ८१. आ.क.ड.जो.हा- यदाज्यं जुह्वा गृहीतं । ८२-८२. अ.इ.उ.पा- तत्संतैराहवनीयेऽविच्छेदेन । ८३. ड- कारणत्वं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आयुष्ट॒ आयुर्दा अग्न॒ आ प्या॑यस्व॒

आयुः । ते । आयुर्दा इत्यायुः– दाः । अग्ने । एति । प्यायस्व ।

अथ [१]पौरोडाशिकमध्ये याज्याकाण्डं वैश्वदेवम् । " अग्निं वा एतस्य शरीरं गच्छति " तैसं २·३·११) इत्यादेः पञ्चहविषो यागस्याग्नेयस्य पुरोऽनुवाक्या– ' आयुष्टे विश्वतो दधत् ' इत्यनुष्टुप् ॥ इतःप्रभृति चतुर्दशानां मन्त्राणां प्रतीकग्रहणम् । इयं " त्वमग्ने रुद्रः " (तैसं १· ३·१४) इत्यत्र व्याख्याता । [v]अयं [v]वरेण्यः [२-v]अग्निः [v]ते तुभ्यं[-२] विश्वम् [v]आयुः दधातु । गतोऽपि [v]प्राणः [v]पुनः त्वामागच्छतु । [३-]त्वदीयं रोगमहं[-३] [v]परासुवामि नाशयामीति ॥

तत्रैव याज्या– ' आयुर्दा अग्ने [४]हविषः ' इति त्रिष्टुप् ॥ इयमपि तत्रैव व्याख्याता (तैसं १·३·१४) । हे [५v]अग्ने अन्नस्य [v६]हविषः [v]जुषाणः सेवमानः घृतारम्भः [७]घृतस्योदकस्य योनिः त्वमस्य [v]आयुर्दाः भवेति । किं च– [v]घृतं मधुरसं [v]चारु [v]गव्यं [v]पीत्वा [v]इमं यजमानं [v]पिता [v]पुत्रम् [v]इव अभिरक्षत्विति ॥

अथ सौम्यस्य पुरोऽनुवाक्या– ' आ प्यायस्व समेतु ते ' इति गायत्री ॥ इयं चाग्निकाण्डे " मा नो हिंसीत् " (तैसं ४·२·७) इत्यत्र व्याख्यास्यते यत्राम्नायते । हे [v]सोम, [v]आप्यायस्व वर्धस्व, त्वत्प्रसादात् [v]विश्वतः वृष्ण्यं शुक्रं [v]समेतु समागच्छतु । [v]भव [८]च [v]वाजस्य अन्नस्य [v]संगथे संगमनायैवेति ॥

होतुर्नियम आधारश्चोक्तमेकादशे द्वयम् ॥

अथ द्वादशे [१]काम्येष्टियाज्यानुवाक्या उच्यन्ते ।

**आयुरिति ॥ अतीते तृतीयप्रपाठक [२]इदमाम्नातम् – " यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपाल[४] सौम्यं चरुं वारुणं दशकपाल[५] सारस्वतं चरुमाग्नावैष्णवमेकादशकपालम् " (तैसं २·३·११) इति ॥ तथा " यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणाञ्चतुष्कपालान् निर्वपेत् " (तैसं २·३·१२) [३]इति; " यद्यपरं प्रतिग्राही स्यात् सौर्यमेककपालमनु निर्वपेत् " (तैसं २·३·१२) इति [४]च । एतेषु सप्तसु हविःषु क्रमेण [५]याज्यानुवाक्याप्रतीकानि दर्शयति– ' आयुष्ट आयुर्दा अग्न आ प्यायस्व सं तेऽव ते हेड उदुत्तमं प्र णो देव्या नो दिवोऽग्नाविष्णू अग्नाविष्णू इमं मे वरुण तत्त्वा यामि ' इति ॥ तत्राऽऽग्नेयस्य ' आयुष्टे विश्वतोऽदधत् ' इति पुरोनुवाक्या । ' आयुर्दा अग्ने हविषो जुषाणः ' इति याज्या । [६]तदुभयं " त्वमग्ने रुद्रः " (तैसं १·३·१४) इत्यनुवाके व्याख्यातम् । सौम्यस्य तु ' आ प्यायस्व समेतु ते ' इति पुरोनुवाक्या । ' सं ते पयाꣳसि समु यन्तु वाजाः '

१. हो– पुरोडाशिक° (१)। २–२. तं३.लं– अस्मभ्यम्। ३–३. तं३.मै – त्वयि यक्ष्मरोगम्; पं२– त्वदीयमहं रोगं। ४. तं३– हविषो जुषाणः। ५. तं३– 'अग्ने' नास्ति। ६. हो– हविषा। ७–७. हो– 'उदकस्य' नास्ति। ८–८. हो– 'च' नास्ति।

१. अ.इ.उ.ड.पा.शृं– °याज्याः। २. ड– एवमा°। ३. अ.इ.उ.क.जो.पा.शृं.हा– इति च। ४. अ.इ.उ.क.जो.ना.पा.हा– 'च' नास्ति। ५. शृं– याज्याप्रतीकानि। ६. ना. एतदुभयं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सं ते ऽवं ते हेड उदुत्तमं प्र णो देव्या

समिति । ते । अवेति । ते । हेडः । उदिति । उत्तममित्युत्-तमम् । प्रेति । नः । देवी ।

तत्रैव याज्या– 'सं ते पयांसि' इति त्रिष्टुप् ॥ इयमपि तत्रैवाम्नायते (तैसं ४·२·७)। हे [V]सोम, अभिमातीनां पाप्मनामभिभवितुस्तव प्रसादात् [V]पयाꣳसि च [V]वाजाः च [V]वृष्णियानि च [V]संयन्तु इमं संगच्छन्तु । त्वं च [V]आप्यायमानः [V]दिवि द्युलोके अस्यामृतत्वाय [V]उत्तमानि [V]श्रवांसि अन्नानि [V]धिष्व स्थापयेति ॥

अथ वारुणस्य पुरोऽनुवाक्या– 'अव ते हेडः' इति त्रिष्टुप् ॥ इयं "वैश्वानरो नः" (तैसं १·५·१.१) इत्यत्र व्याख्याता । हे [V]वरुण, [V]नमोभिः नमस्कारैरन्नैर्वा [१V]यज्ञैः च [V]हविर्भिः च हविष्मद्भिर्वा यज्ञैः तव [V]हेडः क्रोधम् [V]अवेमहे [१०]अपनयामः । हे [V]असुर प्राणप्रद [११]प्रकृष्टचेतस्क राजन्, [V]अस्मभ्यम् अस्मदर्थं [V]क्षयन् निवसन् अस्माकं [V]कृतानि पापानि [V]शिश्रथः श्लथयेति ॥

तत्रैव याज्या– 'उदुत्तमम्' इति त्रिष्टुप् ॥ इयमपि तत्रैव व्याख्याता (तैसं १·५·११)। हे [V]वरुण, [V]उत्तमम् उत्तमफलप्राप्तिहेतुम् [१२]ऊर्ध्वकर्मणं वा [V]पाशं कर्मपाशम् अस्मत्तः [१३V]उच्छ्रथाय ऊर्ध्वमुत्क्षिप्य उत्कृष्य नाशय । [१४V]अधमं [१५]निकृष्टफलप्राप्तिहेतुम् [१६]अधःपतनहेतुं वा कर्मपाशम् [V]अव श्रथय अधस्तादपकृष्य नाशय । [V]मध्यमं पाशं [V]वि श्रथय विष्वङ् नाना विकृष्य नाशय । [V]अथ एवं त्वया कृते [V]वयम् [V]अनागसः [१७]क्षालितसर्वकर्माणः [V]तव [V]व्रते कर्मणि उपासनात्मनि [V]स्याम [V]अदितये अखण्डितैश्वर्याय, हे [V]आदित्य, देवानामादिभूत अदितेर्वा[१८]' अपत्येति ॥

अथ सारस्वतस्य पुरोऽनुवाक्या–'प्र णो देवी' इति [१९]गायत्री ॥ "अग्नाविष्णू महि" (तैसं १·८·२२) इत्यत्र व्याख्याता । [V]सरस्वती [V]देवी वाजवतीभिः क्रियाभिः तद्वती, धियाम् [V]अवित्री अस्मान् वाजैरन्नैः [२०V]प्रावतु इति प्रकर्षेण रक्षत्विति ॥

इति याज्या । एतदुभयं चतुर्थकाण्डे "मा नो हिꣳसीत्" (तैसं ४·२·७) इत्यनुवाके व्याख्यास्यते। वारुणदशकपालस्य 'अव ते हेडः' इति पुरोनुवाक्या। 'उदुत्तमम्' इति याज्या। एतच्चोभयं– "वैश्वानरो न" (तैसं १·५·११) इत्यनुवाके व्याख्यातम् । सारस्वतस्य– 'प्र णो देवी' [°]इत्यनुवाक्या।

९. हो– यज्ञः । १०. तं३.मै.मै४– अवनयामः । ११. हो– प्राचेतस । १२. हो– ऊर्ध्वकर्षण । १३. तं३– उच्छ्रथ (?)। १४. पं२– अवमम् । १५. हो– °प्राप्तिहेतुत्वम् । १६. हो– °पतनहेतुत्वम् । १७. हो– क्षालितः सर्वकर्मणः । १८. हो– 'वा' नास्ति । १९. तं३.मै४.लं.हो– 'गायत्री' इत्यस्यानन्तरम् 'इयम्' । २०. हो– प्रावन्विति (?)

७. ड.शृं– इति पुरोनुवाक्या ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

नो दिवो ऽग्नाविष्णू अग्नाविष्णू इमं मे वरुण तत् त्वा

एति। नः। दिवः। अग्नाविष्णू इत्यग्ना - विष्णू। अग्नाविष्णू इत्यग्ना - विष्णू। इमम्। मे। वरुण। तत्। त्वा। यामि।

तत्रैव याज्या— 'आ नो दिवः' इति त्रिष्टुप्॥ इयमपि तत्रैव (तैसं १·८·२२) व्याख्याता। यजमानस्य वाजनीया [v]देवी [v]सरस्वती [v]दिवः विप्रकृष्टाद्वा देशात् [v]बृहतः वा [v]पर्वतात् विषमादेशादागच्छतु। अस्माकमिमं [v]यज्ञम् अस्माकमाह्वानं सेवमाना [v]घृताची घृताञ्चना उदकाञ्चना वा [v]उशती कामयमाना अस्मत्स्तोत्रं हविर्वा [v]शग्मां शक्तां [v]वाचं [v]शृणोतु इति॥

अथाग्नाविष्णवस्य [२१]याज्या— 'अग्नाविष्णू' इति त्रिष्टुप्॥ [२२]इयमपि तत्रैव व्याख्याता (तैसं १·८·२२)। हे [v]अग्नाविष्णू, युवयोः [v]तत् [v]महित्वं माहात्म्यं, महान्तौ युवां [v]घृतस्य [v]गुह्यानि नामानि पुरोडाशादीनि [v]वीतं खादतम्। यज्ञगृहे शोभनानि स्तोत्राणि वर्धयन्ति। युवयोः [v]जिह्वा प्रत्येकं [v]घृतम् उच्छ्रितं पिबति॥

-तत्रैव याज्या— 'अग्नाविष्णू' इति त्रिष्टुप्॥ तत्रैव व्याख्याता- (तैसं १·८·२२)॥

"यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणाञ्चतुष्कपालान्निर्वपेत्" (तैसं २·३·१२) इत्यस्याः पुरोऽनुवाक्या— 'इमं मे वरुण श्रुधी हवम्' इति गायत्री॥ "इन्द्रं वो विश्वतस्परीन्द्रं नरः" इत्यत्र व्याख्याता (तैसं २·१·११)। हे [v]वरुण, [v]इमं [v]मे [v]हवम् आह्वानं [v]श्रुधि शृणु। [v]अद्या अस्मिन् कर्मणि मां [v]मृडय। [v]त्वाम् अहम् [v]अवस्युः [२३]रक्षणार्थी [v]आचके आभिमुख्येन [२४]भजे॥

तत्रैव याज्या— 'तत् त्वा यामि ब्रह्मणा वन्दमानः' इति त्रिष्टुप्॥ इयमपि तत्रैव व्याख्याता (तैसं २·१·११)। हे [v]वरुण, अहं [v]ब्रह्मणा मन्त्रेण हविषा त्वां [v]वन्दमानः स्तुवन् अहं त्वामभियाचे, [v]यजमानः अपि [v]तत् एव [v]हविर्भिः [v]आशास्ते, त्वमपि तत् [v]अहेडमानः अक्रुध्यन् [v]इह कर्मणि बुद्ध्यस्व। किं पुनः तत्? हे [v]वरुण, उरु [२५]शंसमान अस्माकम् [v]आयुः [v]मा [v]प्रमोषीः इति॥

'आ नो दिवो बृहतः' इति याज्या। आग्नावैष्णवस्य 'अग्नाविष्णू महि तद्वाम्' इति पुरोनुवाक्या। 'अग्नाविष्णू महि धाम' इति याज्या। चतुष्टयमप्येतत् प्रथमकाण्डस्य [८]अष्टमप्रपाठकस्य अन्त्यानुवाके (तैसं १·८·२२) व्याख्यातम्। वारुणचतुष्कपालस्य 'इमं मे वरुण' इति पुरोनुवाक्या। 'तत् त्वा यामि' इति याज्या। एतच्चोभयमस्मिन्नेव काण्डे प्रथमप्रपाठकस्यान्त्यानुवाके (तैसं २·१·११) व्याख्यातम्।

२१. मै४–पुरोनुवाक्या। २२. मै–'इयमपि' नास्ति। *–* [लं–तत्रैव याज्या...व्याख्याता' अयं भागः नास्ति।] २३. मै४– रक्षणाय। २४. हो– भजत। २५. पं२– शंस नः।

८. क.हा– 'अष्टमप्रपाठकस्य' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

याम्यु॑ दु॒ त्यं॑ चि॒त्रम्॑ ॥
अपां॑ नपा॒दा ह्यस्था॒दुप॑स्थं जि॒ह्मानामू॒र्ध्वो वि॒द्युतं॑ वसा॒नः ।
तस्य॒ ज्येष्ठं॑ महि॒मानं॑ वहन्तीर्हिर॒ण्यव॑र्णाः॒ परि॑ यन्ति य॒ह्वीः ॥

उदि॑ति । उ । त्यम् । चि॒त्रम् ॥
अ॒पाम् । नपा॑त् । एति॑ । हि । अस्था॑त् । उप॑स्थमित्युप - स्थ॒म् ।
जि॒ह्मना॑म् । ऊ॒र्ध्वः । वि॒द्युत॒मिति॑ वि - द्युत॑म् । वसा॑नः ।
तस्य॑ । ज्येष्ठ॑म् । म॒हि॒मान॑म् । वह॑न्तीः ।
हिर॑ण्यवर्णा॒ इति॒ हिर॑ण्य - व॒र्णाः॒ । परी॑ति । य॒न्ति॒ । य॒ह्वीः ॥

"यद्यपरं प्रतिग्राही स्यात् सौर्यमेककपालमनु निर्वपेत्" (तैसं २·३·१२) इत्यस्याः पुरोनुवाक्या—'उदु त्यं जातवेदसम्' इति गायत्री ॥ इयं ग्रहप्रश्ने व्याख्याता (तैसं १·४·४३)। [v]त्यं तम् इमं [v]जातवेदसं जातानां वेदितारं [v-v]सूर्यं [v]देवं [v-v]केतवः रश्मयः [v]उद्वहन्ति; सर्वस्य लोकस्य दर्शनार्थमिति ॥

तत्रैव याज्या—'चित्रं देवानाम्' इति त्रिष्टुप् ॥ इयमपि तत्रैव व्याख्याता (तैसं १·४·४३)। [v]देवानाम् अनीकस्थानीयं [v-v]मित्रादीनां चक्षुःस्थानीयम्[v-v] उदेति। अयं [v]जगतः [v]तस्थुषः [v]च [v]आत्मा [v]सूर्यः [v]द्यावापृथिवी [v]अन्तरिक्षम् आपूरयति तेजसेति ॥

"अपोनप्त्रीयं चरुं पुनरेत्य" (तैसं २·३·१२) इत्यस्य पुरोऽनुवाक्या—'अपां नपात्' इति त्रिष्टुप् ॥ [v]अपां [v]नपात् चतुर्थोऽग्निः; [v]उपस्थम् अन्तरिक्षं मेघं वा अपामुपस्थानम्

सौर्यस्य 'उदु त्यं जातवेदसम्' इति पुरोनुवाक्या। 'चित्रं देवानाम्' इति याज्या। एतच्चोभयं पूर्वकाण्डस्य चतुर्थप्रपाठके (तैसं १·४·४३) व्याख्यातम् ॥

अपामिति ॥ अथ "अपोनप्त्रीयं चरुं पुनरेत्य निर्वपेत्" (तैसं २·३·१२) इत्यस्य पुरोनुवाक्यामाह—'अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः। तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः' इति। [v]अपाम् उदकानां [v]नपात् अविनाशयिता तथाविधनामकः कश्चिद्देवः [v]उपस्थं [v]स्वस्योपवेशनस्थानम् [v]आस्थात् आतिष्ठति प्राप्नोतीत्यर्थः। कीदृशो देवः? [v]जिह्मानाम् [v]ऊर्ध्वः आवर्तरूपेण कुटिलगतीनामुदकानामुपरि [v]स्थितः। [v]विद्युतं [v]वसानः मेघमण्डलमध्य उपविष्टत्वाद्विद्युदेव तस्याऽऽच्छादकं वस्त्रम्। आपश्च तं देवं [v]परियन्ति परितो व्याप्य वर्तन्ते। कीदृश्य आपः? [v]तस्य देवस्य [v]ज्येष्ठं प्रशस्तं [v]महिमानं माहात्म्यं [v]वहन्तीः धारयन्त्यः। बहुलवृष्ट्या स्वकीयस्य स्वामिनस्तस्य देवस्य माहात्म्यं ख्यापयन्त्य इत्यर्थः। [v]हिरण्यवर्णाः बहूनां विद्युतां मध्ये वर्तमानत्वात् हेमवर्णत्वम्। [v]यह्वीः महत्यः ॥

२६–२६. हो – सूर्यदेवम्। २७. हो– केतवे। २८–२८. लं.हो – 'मित्रादीनां चक्षुःस्थानीयम्' नास्ति।

९. अ– स्वस्योपवेशनं, इ.उ.जो.पा.हा– स्वस्योपवेशनं। १०. आ.क– वर्तमानः। ११. ड, हा– 'परियन्ति' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सम्(१)न्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिꣳ शुचयो दीदिवाꣳसमपां नपातं परि तस्थुरापः ॥

समिति (१)। अन्याः। यन्ति। उपेति। यन्ति। अन्याः। समानम्। ऊर्वम्। नद्यः। पृणन्ति।
तम्। उ। शुचिम्। शुचयः। दीदिवाꣳसम्। अपाम्। नपातम्। परीति। तस्थुः। आपः॥

[२९-आस्थात् आतिष्ठति-२९] हि। "हि च" (पा ८·१·३४) इति निघाताभावः। [V]जिह्मानां ५
कुटिलगतीनाम् अपाम् [V]ऊर्ध्वः उपरिवर्ती। [V]विद्युतं [V]वसानः विद्युद्रूपेणात्मानं छादयन् तासा-
मुपस्थमातिष्ठति। [V]हि [३०]यस्मादेवं तस्मात् ता आपः [V]तस्य अग्नेः अपां [३१]नपात् [V]ज्येष्ठं प्रशस्तं
[V]महिमानं [३२-]माहात्म्यं [V]वहन्तीः-[३२] वहन्त्यः ख्यापयन्त्यः, अनेन हि मेघं भित्त्वा वयं प्रवर्तिता
इति कृतज्ञतामिव दर्शयन्त्यः [V]हिरण्यवर्णाः तेजोरूपा एव भासमानाः [३३-V]यह्वीः यह्वयः-[३३]
महत्यः [३४]तमग्निं [V]परि [V]यन्ति [३५]परिगच्छन्ति परित [३६]इवासते ॥ १०

तत्रैव याज्या– 'समन्या यन्ति' इति त्रिष्टुप् ॥ [V]अन्याः आपः [V]संयन्ति संगच्छन्ते
एकीभूताः प्रवहन्ति, [V]अन्याः [V]उपयन्ति परितः संगता इव [३७]भूत्वा मध्येन प्रवहन्ति। ततः सर्वा
अपि [V]समानं [V]नद्यः भूत्वा और्वम् और्वस्याग्नेराधारं महान्तम् आपगाः [V]पृणन्ति पूरयन्ति। पृण
प्रीणने। [V]अथ [V]तं तत्रस्थम् और्वं [V]शुचिं शुद्धं [V]दीदिवांसं मध्ये दीप्यमानम्। [३८]दीदितिः दीप्तिकर्मा
छान्दसः, क्वसौ "वस्वेकाजाद्घसाम्" (पा ७·२·६७) इति नियमादिडभावः। ईदृशम् [V]अपां १५

समिति ॥ तत्रैव याज्यामाह– 'समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति। तमू शुचिꣳ शुचयो दीदिवाꣳसमपां नपातं परि तस्थुरापः' इति। [V]अन्याः काश्चिदापः [V]सं [V]यन्ति परस्परं संगताः प्रवाहरूपेण गच्छन्ति। ताभ्यः [१२V]अन्याः काश्चित् [V]उप [V]यन्ति प्रवाहमन्तरेण [१३]प्रविष्टा इव तिष्ठन्ति। ऊर्वो वडवाग्नेराधारः समुद्रः। स च वहन्तीषु स्थिरासु चाप्सु समानः। न तावदयं प्रवहन्ती- २०
नामपां प्रवेशेन वर्धते स्वयम्। नापि तासामभावे सति स्थिराभिरद्भिः [१४]अपक्षीयते। तादृशं समुद्रं [V]नद्यः
[V]पृणन्ति स्वप्रवेशेन प्रीणयन्ति। [V]तम् [V]उ [१५V]ऊर्वं [V]शुचयः [V]आपः परितो व्याप्य [V]तस्थुः स्थिताः।
कीदृशम्? [V]शुचिं शोधयितारं [V]दीदिवांसं वडवाग्निजनकत्वेन दीप्यमानम् [V]अपां [V]नपातम् अविनाश-
यितारम् ॥

२९–२९. हो–आस्थात् तिष्ठति। ३०. मै–यदेवम्। ३१. मै–नपादः। ३२–३२. हो–माहात्म्य-
प्रवहन्तीः। ३३–३३. हो– बह्वीः बह्वयः। ३४. हो– तमग्निः। ३५. हो– परिगच्छति। ३६. १५
पं२– उपासते। ३७. मै– त्वां। ३८. मै४.लं–देदितिः (?)।

१२. अ.इ.जो.पा.हा– अद्भ्यः। १३. क– उपरिष्टात्; ड.शृं– उपविष्टाः। १४. आ.क.ड–
परिक्षीयते। १५. आ– 'ऊर्वम्' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।
स शुक्रेण शिक्वना रेवदग्निर्दीदायानिध्मो घृतनिर्णिगप्सु ॥

तम् । अस्मेराः । युवतयः । युवानम् । मर्मृज्यमानाः । परीति । यन्ति । आपः ।
सः । शुक्रेण । शिक्वना । रेवत् । अग्निः ।
दीदाय । अनिध्मः । घृतनिर्णिगिति घृत - निर्णिक् । अप्स्वित्यप् - सु ॥

[V]नपातं [V]शुचयः [V]आपः परितः सर्वतोऽप्युप [V]तस्थुः तिष्ठन्ति । छान्दसो लिट् । "एकान्याभ्यां समर्थाभ्याम्" (पा ८·१·६५) इति प्रथमस्य [३५]आयन्तीत्यस्य आख्यातस्य निघाताभावः । उ [३६]इत्यवधारणे पादपूरणे वा । "अन्येषामपि दृश्यते" (पा ६·३·१३७) इति [३७]सांहितिको दीर्घः ॥

अथात्रैव [३८]याज्या विकल्प्यते – 'तमस्मेराः' इति त्रिष्टुप् ॥ [V]तम् अग्निम् अपां नपातं [V]मर्मृज्यमानाः अत्यर्थमलंकुर्वाणाः । [३९]मृजू शौचालङ्कारयोः । [V]अस्मेराः विदग्धाः [V]युवतयः [V]युवानं युवराजमिव [V]आपः [V]परियन्ति परितः सेवन्ते । यद्वा– [४०]नित्यतरुणमग्निं नित्यतरुण्यः आपः परियन्ति । [V]सः च [V]अग्निः तासु [V]अप्सु मध्ये [V]शुक्रेण निर्मलेन [V]शिक्वना रोचिषा इत्थंभूतः [V]रेवत् रेवान् महाधनः राजेव । छान्दसो लिङ्व्यत्ययः । सलिलव्यतिरिक्तेन काष्ठादीन्धनरहितः [V]दीदाय दीप्यते । छान्दसो लिट्, छान्दसो [४१]द्विर्वचनाभावः, दीधिङो वा वर्णव्यत्ययः । तेन जक्षित्यादिना अभ्यस्तत्वात् द्विर्वचनाभावः (पा ६·१·६) । [V]घृतनिर्णिक्, घृतेनोदकेन [४२-४३]वा एषणीयः[-४३], घृतनिर्णेजनमस्येति बहुव्रीहिः । यद्वा– तेजोरूपमानः । एवं महानुभावोऽयम् [४४]अस्मान् प्रतिग्रहदोषापनयेन शोधयत्विति ॥

तमिति ॥ तत्रैव विकल्पितां याज्यामाह – 'तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः । स शुक्रेण शिक्वना रेवदग्निर्दीदायानिध्मो घृतनिर्णिगप्सु' इति । [V]तम् अपां नपातम् [V]आपः [V]परि [V]यन्ति । कीदृशं तम्? [V]युवानं सर्वदा यौवनोपेतम् । कीदृश्य आपः? [V]अस्मेराः विडम्बनारूपेण [१६]स्मयेन रहिता अनुकूला इत्यर्थः । [V]युवतयः सर्वदा यौवनोपेताः । [V]मर्मृज्यमानाः तत्संयोगेन शोध्यमानाः । [V]सः अपां नपात् अग्निः [V]अनिध्मः काष्ठरहितोऽपि [V]अप्सु [V]दीदाय दीप्यते । कीदृशः? [V]शुक्रेण [V]शिक्वना युक्तः शुद्धेन प्रकाशेन युक्तः, [V]रेवत् धनवान्, [V]घृतनिर्णिक् विलापनेन घृतं निर्णेनेक्ति निःशेषेण शोधयतीति घृतनिर्णिक् ॥

३९. मै– आघ्रेडितस्य । ४०–४०. मै.लं– 'इति' नास्ति । ४१. हो– स्यादकादिति (?) । ४२. हो– 'याज्या' इत्यस्यानन्तम् 'इति' । ४३. हो– अजू(?) । ४४–४४. हो– नित्यमग्निमरुतमग्निं । ४५. हो– द्विवचना° । ४६–४६. हो– आर्ष्णीयः । ४७. हो– अस्मिन् ।

१६. आ.क– स्मय° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

इन्द्रावरुणयोरहꣳ सम्राजोरव आ वृणे । ता नो मृडात ईदृशे ॥
इन्द्रावरुणा युवमध्वरायं नो (२) विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ॥

इन्द्रावरुणयोरितीन्द्रा - वरुणयोः । अहम् । सम्राजोरिति सम् - राजोः । अवः । एति । वृणे ।
ता । नः । मृडातः । ईदृशे ॥ ५
इन्द्रावरुणेतीन्द्रा - वरुणा । युवम् । अध्वराय । नः (२) ।
विशे । जनाय । महि । शर्म । यच्छतम् ।
दीर्घप्रयज्युमिति दीर्घ - प्रयज्युम् । अतीति । यः । वनुष्यति । वयम् । जयेम । पृतनासु । दूढ्यः ॥

" यः पाप्मना गृहीतः स्यात् तस्मा एतामैन्द्रावरुणीं पयस्यां निर्वपेत् " (तैसं २·३·१३) इत्यस्याः पुरोऽनुवाक्या– ' इन्द्रावरुणयोरहम् ' इति गायत्री ॥ [v]इन्द्रावरुणयोः [v]सम्राजोः [w]सम्यक् दीप्यमानयोः [vw]अवः रक्षणं यादृशं तदीयं रक्षणं तत् [v]अहम् [v]आ [v]वृणे आभिमुख्येन याचे । [v]ता तौ च [v]नः अस्मान् [v]मृडातः सुखयेताम् । [v]ईदृशे विशिष्टे रक्षणे स्थित्वा मृडयताम् । [x]लेट्यागमः ॥ १०

तत्रैव याज्या – ' इन्द्रावरुणा युवम् ' इति जगती ॥ हे [v]इन्द्रावरुणा इन्द्रावरुणौ । "सुपां सुलुक्°" (पा ७·१·३९) इत्यादिनाऽऽकारः । [v]युवं युवाम् [v]नः अस्मभ्यं [v]महि महत् [v]शर्म सुखं पापयक्ष्माभावप्रभवं [v]यच्छतं दत्तम् । [v]अध्वराय यज्ञाय [y]दर्शपूर्णमासादि- १५

इन्द्रावरुणयोरिति ॥ " यः पाप्मना गृहीतः स्यात् तस्मा एतामैन्द्रावरुणीं पयस्यां निर्वपेत् " (तैसं २·३·१३) इत्यस्याः पुरोनुवाक्यामाह– ' इन्द्रावरुणयोरहꣳ सम्राजोरव आ वृणे । ता नो मृडात ईदृशे ' इति ॥ [v]सम्राजोः सम्यग्दीप्यमानयोः [v]इन्द्रावरुणयोः [v]अवः रक्षणम् [v]अहम् [v]आवृणे सर्वतः प्रार्थये । तौ चेन्द्रावरुणौ [v]ईदृशे रक्षणे [z]वृतौ [v]नः अस्मान् [v]मृडातः सर्वदा सुखयताम् ॥ २०

इन्द्रावरुणा इति ॥ तत्रैव याज्यामाह – ' इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् । दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ' इति ॥ हे इन्द्रावरुणौ, [v]युवं [v]नः अस्मभ्यं [v]महि [v]शर्म महत्सुखम् [a]आपन्निवारणरूपं [v]यच्छतम् । किमर्थम् ? [v]अध्वराय [b]यागानुष्ठानाय [v]विशे प्रजासमृद्धये [v]जनाय परिवारकजनसिद्धये च । [c-v]यः पाप्मा[-c] [v]दीर्घप्रयज्युम् [v]अति अस्मदीयं दीर्घकालभावियागप्रयोगमतिलङ्घ्य [v]नः अस्मान् [v]वनुष्यति [d]पीडयति । [v]वयं तु युवयोः [e]अनुग्रहवशात् [v]पृतनासु पापकृतासु पीडासु [v]दूढ्यः दृढतरा अपीडिताः सन्तः तं पाप्मानं [v]जयेम ॥ २५

४८. लं–संगत°। ४९. हो– अपः। ५०. मै– लेट्यागमः ; हो– लोट् अडागमः। ५१. हो– °निर्वहणः।

१७. ड.हो१– वृत्तौ; क.शृं.हा– प्रवृत्तौ। १८. ड.हो१–पापनिवा°। १९. ड.हो१– यागानुष्ठानसिद्धये। २०–२०. ड.' यः पाप्मा ' नास्ति। २१. ड.हो१–वेदयति। २२. ड– अनुग्रहात्। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आ नो मित्रावरुणा॒ प्र बा॒हवा॒॑ ॥

एति । नः । मित्रावरुणेति मित्रा - वरुणा । प्रेति । बाहवा ॥

यज्ञनिर्वहणं [५२-]यथा भवेत्[-५१], [V]विशे च यथा पुत्रादिका प्रजा मां [५३-]न निवर्तते[-५३], [V]जनाय चान्यस्मै सुहृदादये स [५४-]यथा मां[-५४] न त्यजेत् । यदुक्तमध्वराद्यर्थमिति तदेव प्रकटीकरोति–
५ दीर्घप्रयज्युः, दीर्घकालं यावज्जीवं प्रकर्षेणानतिपत्त्या कर्तव्यो दर्शपूर्णमासादियज्ञो दीर्घप्रयज्युः । यजेः औणादिको युप्रत्ययः, दासीभारादिः द्रष्टव्यः (पा ६·२·४२) । वचनव्यत्ययो वा । दीर्घकालकर्तव्या दर्शपूर्णमासादयः प्रकृष्टा यागा येषां तानस्मानतिकम्य [V]यः [V]वनुष्यति अभिभवति पापयक्ष्मा । वनेरुसिप्रत्ययान्तात् क्यचि षत्वम् । तं तावत् [V]वयं [V]जयेम न तेन वयं [५५]जीयेमहि । किं च [V]पृतनासु संग्रामेषु [V]दूढ्यः दुर्धियश्च जयेमेत्येव । कैश्चिद्दुर्बुद्धिभिः न
१० वयं [५६]जयेमहि । पृषोदरादित्वादभीष्टस्वररूपसिद्धिः (पा ६·३·१०९) ॥

' आ नो मित्रावरुणा ', ' प्र बाहवा सिसृतम् ' इति द्वे गायत्रीत्रिष्टुभौ व्याख्यातेः " अग्नाविष्णू महि " (तैसं १·८·२२) इत्यत्र । अनयोश्चात्र प्रतीकग्रहणम् । तयोः क्वचित् मैत्रावरुणे (द्र. तैसं ५·७·६) विनियोगः द्रष्टव्यः, [५७]प्रायश्चित्ततया वा । [५८-]तत्र प्रथमा[-५८]–हे मित्रावरुणौ, अस्माकं [V]गव्यूतिं [V]घृतैः [V]उक्षतम् । हे शोभनकर्माणौ, मधुरसेन लोकानुक्षतामिति ॥
१५ द्वितीया– ' प्र बाहवा ' इति ॥ बाहुबलवन्तौ युवाम् अस्मान् जीवयितुमागच्छतम् । आगत्य च अस्माकं [V]गव्यूतिं [V]घृतेन सर्वतः [V]उक्षतम् । हे युवानौ नित्यतरुणौ, अस्मान् जनेषु [V]श्रवयतम् आख्यापयतम् । इमानि च महाह्वानानि [५९]शृणुतामिति ॥

अथ ' त्वं नो अग्ने ', ' स त्वं नो अग्ने ' इति गायत्रीत्रिष्टुभौ ॥ क्वचिदाग्निवारुणे विनियोगो द्रष्टव्यः, प्रायश्चित्ते वा । तत्र प्रथमा – हे [V]अग्ने, [V]विद्वान् सर्वार्थसाधनो [६०]वा यज्ञे
२० सः [V]त्वं[-६०] [V]देवस्य [V]वरुणस्य [V]हेडः, क्रोधः अनादरो वा [६१]पाशग्रहणादिकः, [V]नः अस्माकम्

एति ॥ पञ्चमकाण्डे मैत्रावरुण्यामिक्षा विहिता – " यथा वै हविः स्कन्दत्येवं वा एष स्कन्दति योऽग्निं चित्वा स्त्रियमुपैति मैत्रावरुण्याऽऽमिक्षया यजेत " (तैसं ५·७·६) इति, तत्र याज्यानुवाक्ययोः प्रतीके दर्शयति – ' आ नो मित्रावरुणा प्र बाहवा ' इति । ' आ नो मित्रावरुणा ' [२३]इति पुरोनुवाक्या । ' प्र बाहवा ' [२४]इति याज्या । एतदुभयम् " अग्ना विष्णू महि तद्वाम् " (तैसं १·८·२२) इत्यनुवाके व्याख्यातम् ॥

५२–५२. हो– चेत् मा । ५३. हो– निर्वर्तित° । ५४–५४. हो– यथामन्यत् (?) । ५५. लं. हो– जीवेमहि । ५६. हो– जीवेमहि; मै– जीयेमहि । ५७. मै– प्रायश्चित्ते । ५८–५८. लं.हो– ' तत्र प्रथमा ' नास्ति । ५९. तं३.मै४.लं– ' शृणुतमिति ' इत्यस्यानन्तरं ' द्वितीया ' । ६०–६०. लं.हो– यज्ञसत्वम् । ६१. मै४– पापग्रहणादिकम् ।

२३. क– घृतैः इति; ड.शृं– घृतैः इत्येषा । २४. ड.शृं– सिसृतमित्येषा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत् ॥
स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणꣳ (३) रराणो वीहि मृडीकꣳ सुहवो न एधि ॥

त्वम् । नः । अग्ने । वरुणस्य । विद्वान् । देवस्य । हेडः । अवेति । यासिसीष्ठाः । ५
यजिष्ठः । वह्नितम इति वह्नि - तमः । शोशुचानः । विश्वा । द्वेषाꣳसि । प्रेति । मुमुग्धि । अस्मत् ॥
सः । त्वम् । नः । अग्ने । अवमः । भव । ऊती । नेदिष्ठः । अस्याः । उषसः । व्युष्टाविति वि - उष्टौ ।
अवेति । यक्ष्व । नः । वरुणम् (३) । रराणः ।
वीहि । मृडीकम् । सुहव इति सु - हवः । नः । एधि ॥

अस्मत्संबन्धि [V]अव [V]यासिसीष्ठाः अपनय । अवपूर्वात् यासेर्यन्तादाशीर्लिङि इडादावपि १०
णिलोपश्छान्दसः । " छन्दस्युभयथा " (पा. ३·४·११७) इति लिङ्वा, सार्वधातुकत्वा-
दिडभावो डित्वं च । किंच– [V]यजिष्ठः यष्टृतमः । यष्टृशब्दात् " तुरिष्ठेमेयःसु " (पा ५·३·५९)
इतीष्ठन्प्रत्ययः । " तुरिष्ठेमेयःसु " (पा ६·४·१५४) इति तृशब्दस्य लोपः । [V]वह्नितमः
हविषां वोढृतमः [V]शोशुचानः अतिशयेन दीप्यमानः । " अभ्यस्तानामादिः " (पा ६·१·१८९)
इत्याद्युदात्तत्वम् । ईदृशः त्वं विश्वानि वरुणव्यतिरिक्तान्यपि [६२]द्वेष्टॄणि वा रक्षःप्रभृतीनि [V]अस्मत् १५
अस्मत्तः [V]प्रमुमुग्धि प्रकर्षेण मोचय । " बहुलं छन्दसि " (पा २·४·७६) इति शपः श्लुः ॥

अथ द्वितीया– हे [V]अग्ने, [V]सः [V]त्वम् [V]नः अस्माकम् [V]अवमः अविता [V]भव ऊत्या
गमनेन । यद्वा–ऊत्या रक्षणेन अवमः अर्वाचीनः प्रत्यासन्नो भव । [V]अस्याः [V]उषसः ([V]व्युष्टौ) रात्रे-
रवसाने प्रातरेव अस्माकं [V]नेदिष्ठः अन्तिकतमः अस्मिन् दिवसे प्रातरेव अस्मत्पार्श्वमागतः त्वमिदानीं

**त्वमिति ॥ [२५]पुनराधेयप्रकरण आम्नातम् – " वीरहा वा एष देवानां योऽग्निमुद्वासयते तस्य २०
वरुण एवर्णयादाग्निवारुणमेकादशकपालमनुनिर्वपेत् " (तैसं १·५·२) इति । अत्र पुरोनुवाक्यामाह - ' त्वं
नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र
मुमुग्ध्यस्मत् ' इति ॥ हे [V]अग्ने, [V]त्वं [V]नः अस्माकं भक्तिं [V]विद्वान् सन् [V]वरुणस्य [V]देवस्य [V]हेडः अस्मद्विषयं
क्रोधम् [V]अव [V]यासिसीष्ठाः अपनय । [V]यजिष्ठः यष्टृतमोऽतिशयेन यागनिष्पादकः । [V]वह्नितमः अतिशयेन
देवहविर्वोढा । [V]शोशुचानः अत्यन्तं दीप्यमानः । [V]विश्वा [V]द्वेषाꣳसि सर्वान् विरोधिकृतान् द्वेषान् [V]अस्मत् २५
[V]प्रमुमुग्धि अस्मत्तः प्रमोचय ॥**

**स इति ॥ तत्रैव याज्यामाह – ' स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि ' इति ॥ हे [V]अग्ने, [V]सः [V]त्वं [V]नः अस्माकम्**

६२. मै४– द्वेषांसि ।

२५. ड– पुनराधानप्रकरणे यत् । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रप्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥

प्रप्रेति प्र-प्र । अयम् । अग्निः । भरतस्य । शृण्वे । वीति । यत् । सूर्यः । न । रोचते । बृहत् । भाः । अभीति । यः । पुरुम् । पृतनासु । तस्थौ । दीदाय । दैव्यः । अतिथिः । शिवः । नः ॥

५ [६३]रक्षणेनापि प्रत्यासन्नतरो भवेति । " अन्तिकबाढयोर्नेदसाधौ " (पा ५·३·६३) । किं च– [v]रराणः अस्मदीये परिचरणे रममाण अस्माकं [v]वरुणं [६४]वारकं वरुणप्रवर्तितं वा पापरोगादिकम् [v]अवयक्ष्व नाशय । " बहुलं छन्दसि " (पा २·४·७३) इति शपो लुक् । रातेः शानचि अन्त्यलोपः छान्दसः, पूर्वपदाद्युदात्तत्वम् । तदर्थं [v]वीहि भुङ्क्ष्व [v]मृडीकं [६५]सुखहेतुमिदं हविः । किं च– [v]नः अस्माकं [v]सुहवः शोभनाह्वानश्च [v]एधि भव । आह्वानप्रयोजनस्य सद्यःसंपत्तिः
१० शोभनत्वम् । " आद्युदात्तं द्व्यच्छन्दसि " (पा ६·२·११९) इत्युत्तरपदाद्युदात्तत्वम् ॥

" यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवतेऽग्नये प्रतीकवते " (तैसं २·४·१) [६६-]इत्यस्यां त्रिहविष्कायाम्[-६६] ' अग्नये [६७-]प्रवते ' इत्यस्य[-६७] पुरोऽनुवाक्या– ' प्रप्र ' इति त्रिष्टुप् ॥ " प्रसमुपोदः पादपूरणे " (पा ८·१·६) इति द्विर्वचनम् । [v]अयम् [v]अग्निः [v]भरतस्य यजमानस्य [६८]भरणात् भरतः ।

१५ [v]ऊत्या रक्षणेन [v]अवमः [v]भव रक्षको भव । कीदृशस्त्वम्? [v]अस्याः [v]उषसः [v]व्युष्टौ [v]नेदिष्टः अद्यतनस्योषःकालस्योपरितने प्रातःकालेऽत्यन्तं प्रत्यासन्नः [v]नः अस्माकं [v]वरुणं वरुणेन कृतमभीष्टनिवारकं पापादिकम् [v]अव [v]यक्ष्व [२१]विनाशय । [v]रराणः रममाणः सन् [v]मृडीकं सुखसाधनमस्मदीयं हविः [v]वीहि भक्षय । ततः [v]नः [v]अस्माकं [v]सुहवः [v]एधि सुखेनाऽऽह्वातुं शक्यो भव ॥

प्रप्रेति ॥ " यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेताग्नये प्रवते पुरोडाशमष्टाकपालं
२० **निर्वपेदग्नये विबाधवतेऽग्नये प्रतीकवते " (तैसं २·४·१) इत्यत्र [२७]प्रवतोऽग्नेर्हविषि पुरोनुवाक्यामाह – ' प्रप्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद्भाः । अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ' इति ॥ [v]अयम् [v]अग्निः [v]भरतस्य हविर्भरणवतो यजमानस्याऽऽह्वानं [v]प्रप्र [v]शृण्वे अतिप्रकर्षेण शृणोतु । [v]यत् योऽग्निः [v]सूर्यः [v]न सूर्य इव [v]भाः भासमानः सन् [v]बृहत् [v]रोचते अत्यन्तं दीप्यते । [v]यः अग्निः [v]पृतनासु संग्रामेषु [v]पूरुं [२८]जयपूर्तिम् [v]अभि [v]तस्थौ सर्वतः करोति सोऽग्निः [v]नः**
२५ **अस्माकम् [v]अतिथिः [२९]दीदाय भवतु अतिथिरिवेह समागच्छतु । कीदृशोऽग्निः? [v]दैव्यः देवेभ्यो हितः शिवः [३०]परममङ्गलरूपः ॥**

६३. मै– तत्क्षणेनापि । ६४. हो– वारक° । ६५. मै४– °हेतुरिदं । ६६–६६. मै४.हो– इत्यस्याः त्रिहविष्कायाः । ६७–६७. तं३.लं.हो– व्रतपतये । ६८. तं३– भरणत्वात् ।

२६. आ.क– नाशय । २७. आ.क– °हैविषः । २८. अ.इ.उ.जो.ना.पा.हा– जयपूर्णम् ।
३० २९. ड– ' दीदाय ' नास्ति । ३०. आ.क.ड– °मङ्गलभूतः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु ।
धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् (४) ॥

प्रेति । ते । यक्षि । प्रेति । ते । इयर्मि । मन्म । भुवः । यथा । वन्द्यः । नः । हवेषु । धन्वन् । इव । प्रपेति प्र - पा । असि । त्वम् । अग्ने । इयक्षवे । पूरवे । प्रत्न । राजन् (४) ॥

औणादिकोऽतच्त्रत्ययः । [v]प्र [v]शृण्वे प्रकर्षेण शृणोतु । आह्वानप्रयोजनं शीघ्रं करोत्वित्यर्थः ५
लिटि " लोपस्त आत्मनेपदेषु " (पा ७·१·४१) इति तलोपः । अग्निर्विशेष्यते– [v]यत् यः। अग्निः [v]सूर्यः इव [v]बृहत् [v]विरोचते अत्यर्थं दीप्यते । [६९v]भाः भासनशीलः । " भ्राजभास° " (पा ३·२·१७७) इति क्विप् । [v]यः च अग्निः [v]पृतनासु संग्रामेषु [v]पूरुम् आप्यायमानं शत्रुम् । पॄ आप्यायने, औणादिक उप्रत्ययः । पूरुं महान्तमपि शत्रुम् [v]अभि [v]तस्थौ अभितिष्ठति । अधितिष्ठति आक्रामति । किं च– योऽस्माकम् [v]अतिथिः भूत्वा [v]दीदाय दीप्यते । १०
छान्दसो लिट्, अतिथिः विशेष्यते– [v]दैव्यः दिवि भवः । " देवाद्यञञौ " (पा ४·१·८५ वा ३)। [v]शिवः कल्याणगमनः । यद्वा– सोऽस्माकमस्त्विति सामर्थ्याल्लभ्यते ॥

तत्रैव याज्या– ' प्र ते यक्षि ' इति त्रिष्टुप् ॥ ' इयक्षवे ' इति चतुर्थपादादिः । हे [v]अग्ने, त्वां [v]प्र [v]यक्षि प्रकर्षेण यजे । छान्दसो लिट् । [v]ते तव [v]मन्म मननमनुध्यानं [v]प्र [v]इयर्मि प्रकर्षेण गच्छामि । [७०v]यद्वा–ते त्वदीयं मन्म मननीयं प्रकर्षेण संपादयामि । ऋ गतौ, शपः श्लुः । १५
" अर्तिपिपर्त्योश्च " (पा ७·४·७७) इत्यभ्यासस्येत्वम्, " अभ्यासस्यासवर्णे " (पा ६·४·७८) इतीयङ् । मन्यतेरौणादिको मनिन् प्रत्ययः । [v]यथा [v]त्वम् अस्माकं [v]हवेषु यज्ञेषु पुनःपुनः [v]वन्द्यः स्तुत्यः [v]भुवः भवेः, यथा ते [७१v]श्रद्धैव पुनःपुनरस्मान् पुनातु धनकामादिना, तथा वयं मन्तव्याः इति। " ईडवन्द° " (पा ६·१·२१४) इत्याद्युदात्तत्वम् । भवतेर्लेट्, शपो लुकि

प्रेति ॥ तत्रैव याज्यामाह–' प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु । धन्वन्निव २०
प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् ' इति ॥ हे [v]अग्ने, [r]ते त्वदर्थं [r]प्र [r]यक्षि प्रकर्षेण [११r]यजे, [r]ते त्वदीयं [v]मन्म मननं मानसमनुग्रहविशेषं प्रकर्षेण [r]इयर्मि [१२]प्राप्नोमि । [r]नः अस्माकं [r]हवेषु यागेषु [r]वन्द्यः नमस्कार्यः [१३r]यथा [r]भुवः येन प्रकारेण भवसि तेन प्रकारेणानुग्रहमियर्मीति पूर्वत्राऽन्वयः । हेऽग्ने, [r]त्वम् [r]इयक्षवे यष्टुमिच्छते [r]पूरवे हविः पूरयित्रे यजमानाय [१४r]श्रेयः दातुं [r]धन्वन् [r]प्रपा [r]इव [v]असि मरुभूमौ शीतलपानीयपूर्णशालेवासि । हे [r]प्रत्न पुरातन, हे [r]राजन् दीप्यमान । एतदुभयं [१५r]वह्निविशेषणम् ॥ २५

६९. लं.हो– 'भाः' नास्ति। ७०. तं३.लं.हो– यदा। ७१. तं३.त्रि.मै.मै४.लंहो– श्रद्धयैव।

३१. क.ड.हो१– यजेति; श्रृं– यजतेति; हा–यजति। ३२. आ– व्याप्नोमि। ३३. अ.इ.उ.जो.ना.पा.हा.हो१– 'यथा' नास्ति। ३४. आ.क– प्रियम्। ३५. अ.उ.जो.पा.हा– वायुवि°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि पाजसा॑ वि ज्योति॑षा ॥

वीति॑ । पाज॑सा । वीति॑ । ज्योति॑षा ॥

अडागमे " भूसुवोस्तिङि " (पा ७·३·८८) इति गुणाभावः । पादादित्वान्न निहन्यते । कः पुनः तव विशेषः इति चेदिदमुच्यते– हे अग्ने, [v]धन्वन् निर्जले प्रदेशे [v]प्रपा [v]इव शीतलपानीयपूर्ण-
५ शालेव [v]असि भक्तानां सकलक्लेशनिवृत्तिहेतुत्वात् । तस्य [v]इयक्षवे इयक्षा यष्टुमिच्छा [७२]यजन-कार्येच्छा । छान्दस आदिवर्णलोपः । [v]पूरवे महात्मने पूरयित्रे वा हविषां हे [v]प्रत्न पुराण [v]राजन् दीप्यमान सर्वदा राजनशील ॥

" अग्नये विबाधवते " (तैसं २·४·१) इत्यस्य पुरोऽनुवाक्या–'वि पाजसा' इति त्रिष्टुप् ॥ इयमग्निकाण्डे व्याख्यास्यते यत्राम्नायते (तैसं ४·१·५) । प्रतीकग्रहणं त्वस्याः । [v]पृथुना
१० [v]पाजसा बलेन [v]शोशुचानः दीप्यमानस्त्वं [v]द्विषः [v]बाधस्व रक्षांसि च [v]अमीवाः रोगांश्च । तव [v]सुशर्मणः शोभनशरणस्य शोभनसुखस्य वा [v]बृहतः महात्मनः [v]शर्मणि [v]अहं [v]स्याम् । सदा वर्षीय (?) [v]अग्नेः [v]अङ्गनादिगुणयुक्तस्य [७३v]सुहवस्य शोभनाह्वानस्य [v]प्रणीतौ परिचरणे वर्तमान इति ॥

तत्रैव याज्या–'वि ज्योतिषा' इति त्रिष्टुप् ॥ इयं तु " कृणुष्व पाजः " (तैसं १·२·१४) इत्यत्र व्याख्याता । प्रतीकं गृह्यते अस्याः । अयमेव [v]अग्निः [v]बृहता [v]ज्योतिषा [v]विभाति, [v]विश्वानि च [v]महित्वा माहात्म्यानि [v]आविष्कृणुते आविष्कृणुतां वा । किंच– [v]अदेवीः अदेवनशीलाः [v]दुरेवाः दुःखेन एतव्याः [७७]काममायाः [v]प्रसहते प्रकर्षेण अभिभवति अभिभवतु वा । अपि च– रक्षसां च विनाशाय आत्मीये [v]शृङ्गे शृङ्गस्थानीये ज्वाले [v]शिशीते तीक्ष्णीकुरुते कुरुतां वा । एवं महानुभावोऽयमस्माकं भ्रातृव्यं विनाशयत्विति ॥

२० " अग्नये प्रतीकवते " (तैसं २·४·१) [७५]इत्यस्य पुरोऽनुवाक्या–'स त्वम्' इति गायत्री । हे [v]अग्ने, [v]सः [v]त्वं [v]प्रतीकेन ज्वालाया [७६]उपक्रमणमात्रेण [७७v]प्रत्योष प्रतिमुखं प्रत्येकं वा [v]यातुधान्यः [७८]यातुधानीः यातुधानजातीः [७८] क्षयेषु यज्ञगृहेषु । " क्षयो निवासे " (पा ६·१·

वीति ॥ अथ विबाधवतोऽग्नेर्हविषि याज्यापुरोनुवाक्ये प्रतीकेन दर्शयति – 'वि पाजसा वि ज्योतिषा' इति ॥ 'वि पाजसा पृथुना शोशुचानः' इत्येषा पुरोनुवाक्या । सेयं चतुर्थकाण्डस्य प्रथमप्रपाठके
२५ **(तैसं ४·१·५) व्याख्यास्यते । 'वि ज्योतिषा बृहता' इति याज्या " कृणुष्व पाजः " (तैसं १·२·१४) [३१]इत्यनुवाके व्याख्याता ॥**

---

७२. तं३.लं.हो– यजमान°। ७३. मै–सुहवनस्य। ७४. तं३.लं– कामायाः। ७५. मै–इत्यस्याः। ७६. मै४– उपक्रममा°। ७७. तं३.लं.हो– प्रत्योषम्। ७८–७८. लं.हो– यातुधान्यजातीयः।

३६. ड– इत्यस्मिन्ननु°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः । उरुक्षयेषु दीद्यत् ॥
तꣳ सुप्रतीकꣳ सुदृशꣳ स्वञ्चमविद्वाꣳसो विदुष्टरꣳ सपेम ।
स यक्षद्विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् ॥

सः । त्वम् । अग्ने । प्रतीकेन । प्रतीति । ओष । यातुधान्य इति यातु - धान्यः ।
उरुक्षयेष्वित्युरु - क्षयेषु । दीद्यत् ॥ ५
तम् । सुप्रतीकमिति सु - प्रतीकम् । सुदृशमिति सु - दृशम् । स्वञ्चम् ।
अविद्वाꣳसः । विदुष्टरमिति विदुः -- तरम् । सपेम ।
सः । यक्षत् । विश्वा । वयुनानि । विद्वान् । प्रेति । हव्यम् । अग्निः । अमृतेषु । वोचत् ॥

---

२०१) इत्याद्युदात्तत्वम् । *-उरु महत् [v]दीद्यत् जाज्वल्यमानः । [w]दीद्यतिः छान्दसः । [x]अभ्यस्त-संज्ञिकत्वान्नुमभावः । " अभ्यस्तानामादिः " (पा ६.१.१८९) इत्याद्युदात्तत्वम् ॥ १०

तत्रैव याज्या–' तं सुप्रतीकम् ' इति त्रिष्टुप् ॥ [v]तम् अग्निम् [v]सुप्रतीकं [z1]शोभनज्वालम् शोभनोपक्रमं वा । कृदुत्तरपदाद्युदात्तत्वम् -* । [v]सुदृशं सुष्ठु द्रष्टारम् अभिमतानाम् । क्विपि कृदुत्तर-पदप्रकृतिस्वरत्वम् । शोभनदृष्टिं वा । " नञ्सुभ्याम् " (पा ६.२.१७२) इत्युत्तरपदान्तोदात्तत्वम् । [z2-v]स्वञ्चं शोभनगतिं -[z2] [v]विदुष्टरं विद्वत्तमम् । अयस्मयादित्वेन (पा १.४.२०) भत्वात्

स इति ॥ अथ प्रतीकवतोऽग्नेर्हविषि पुरोनुवाक्यामाह – ' स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः । उरुक्षयेषु दीद्यत् ' इति ॥ हे [v]अग्ने, [v]सः [v]त्वं [v]प्रतीकेन कर्मप्रारम्भमात्रेण [v]यातुधान्यः राक्षसजातीः सर्वाः [v]प्रत्योष प्रत्येकं दह । कीदृशस्त्वम् ? [v]उरुक्षयेषु विस्तीर्णेषु यागगृहेषु [v]दीद्यत् दीप्यमानः ॥

तमिति ॥ तत्रैव याज्यामाह– ' तꣳ सुप्रतीकꣳ सुदृशꣳ स्वञ्चमविद्वाꣳसो विदुष्टरꣳ सपेम । स यक्षद्विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् ' इति ॥ वयं [v]तम् अग्निं [v]सपेम समवेताः प्राप्ता भूयास्म । कीदृशमग्निम् ? [v]सुप्रतीकं शोभनोपक्रमम् अस्मास्वनुग्रहस्तेन [y0]सुष्ठूपक्रान्तं [v]सुदृशं [y1]शोभनेन कटाक्षेणास्मान् पश्यन्तं [v]स्वञ्चम् अस्मदीये कर्मणि सुष्ठु [y2]आगच्छन्तं, [v]विदुष्टरं अतिशयेन भक्तचित्तवेदिनम् । यद्यपि वयम् [v]अविद्वांसः त्वदीयं महिमानं न जानीमस्तथाऽपि [y3]भक्त्या तं प्राप्ता स्मः । [v]सः अग्निः [v]यक्षत् यष्टुमिच्छतां पुरुषाणां [v]विश्वा [v]वयुनानि सर्वानभिप्रायविशेषान् [v]विद्वान् जानन् अवतिष्ठति । अतः सः [v]अग्निः अस्मदीयं [v]हव्यं [v]प्र [v]वोचत् प्रकर्षेण ब्रवीतु ॥

– [तं३. लं ' उरुमहत् ... कृदुत्तरपदाद्युदात्तत्वम् ' इत्ययं भागः नास्ति ।]। ७९. मै४–दीदेतिः । ८०. मै४–°संज्ञाक° । ८१. मै– शोभनावयवम् । ८२–८२. तं३.लं.हो– स्वं शोभनगतं विदुष्टरगतिं ।

---

३७. ड– सुष्ठु प्रक्रान्तं । ३८. आ.क.ड– शोभन° । ३९. ड– गच्छन्तं । ४०. आ.क.ड– ' भक्त्या ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अꣳहोमुचे॒ विवेष॒ यन्मा॒

अꣳहोमुच इत्यꣳहः- मुचे। विवेष। यत्। मा।

द्वयोरसंप्रसारणम्। [v]सपेम परिचरेम, भजेम वा। षप समवाये। [v]सः च [v]अग्निः विश्वानि [v]वयुनानि ज्ञानानि [v]यक्षत्। लेटि "सिब्बहुलं लेटि" (पा ३·१·३४) इति सिप्। सर्वार्थसाधनो वा यज्ञः, मदीयं च [v]हव्यम् [v]अमृतेषु देवेषु [v]प्रवोचत् प्रब्रवीतु। देवसदसि व्यापयतु [८३]प्रापयतु वा। छान्दसे लुङि "वच उम्" (पा ७·४·२०) इति उमागमः। "बहुलं छन्दस्यमाङ्योगेऽपि" (पा ६·४·७५) इत्यडभावः॥

"यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेतेन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावते" (तैसं २·४·२) इत्यस्यास्त्रिहविष्कायाः क्रमेण याज्यानुवाक्याः- 'अꣳहोमुचे' इत्याद्याः षड्चः। आसां प्रतीकग्रहणम्। अत्र तृतीयाऽनुष्टुप्, पञ्चमी गायत्री, अन्यास्त्रिष्टुभः। सर्वाश्चैताः "इन्द्रं वो विश्वतस्परि" (तैसं १·६·१२) इत्यत्र व्याख्याताः। "इन्द्रायाꣳहोमुचे" (तैसं २·४·२) [८४]इत्यस्य पुरोनुवाक्या-अंहसां मोचयित्रे इन्द्राय [v]ओषिष्टदाव्ने दावेन [८५]दग्धृतमस्याऽऽदित्यस्यापां दापयित्रे, तस्मै वा [८६]वृष्ट्यर्थमपां दात्रे, [v]सुमतिं शोभनां [v]मनीषां [v]प्रभरेम प्रकर्षेण स्वीकुर्मः। [v]गृणानाः स्तुवन्तो वयम्। त्वं च तया स्तुत्या तुष्टः [v]इदं [v]हव्यं [v]प्रतिगृभाय। हे [v]इन्द्र, [v]यजमानस्य [v]कामाः मनोरथाः [v]सत्याः अमोघा भवन्तु॥

अथ याज्या-'विवेष' इति॥ [v]यत् यस्मान्मां [v]धिषणा तादृशी बुद्धिः [v]विवेष व्याप्तवती तस्मादहं [v]जजान जातवानस्मि नो चेदजातसम एव स्याम्। [८७]धिषणा विशेष्यते-[v]पार्यात् पारे-भवादन्त्यात् [v]अꣳहः पुरा पूर्वं यावन्मरणात् [v]इन्द्रं [v]स्तवै स्तुत्या तोषयामीति इयं धिषणा मां [८८]विवेष। पुनश्च धिषणा विशेष्यते- यस्यां सत्याम् [v]अंहसः पापात् [v]पीपरत् पारयति उत्तारयति पुरुषम्। [v]यथा अंहस उत्तारितानस्मान् [v]उभये उभयकुलप्रभवा अपि हवन्ते आह्वयन्ति मां रक्ष मां

अꣳहोमुच इति॥ अथ "यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेतेन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावते" (तैसं २·४·२) इत्येतेषु त्रिषु हविःषु याज्यापुरोनुवाक्ययोः प्रतीकानि दर्शयति- 'अꣳहोमुचे विवेष यन्मा वि न इन्द्रेन्द्र क्षत्रमिन्द्रियाणि शतक्रतोऽनु ते दायि' इति॥ 'अꣳहोमुचे प्र भरेम' इत्येषा प्रथमस्य हविषः पुरोनुवाक्या। 'विवेष यन्मा' इति

८३. तं३.मै.लं.हो-'प्रापयतु' नास्ति। ८४. लं.हो-'इत्यस्य' नास्ति। ८५. लं.हो-'दग्धृतमस्य' नास्ति। ८६. लं.हो-इष्टयर्थ°। ८७. तं३.लं.हो-'धिषणा' नास्ति। ८८. तं३.लं-विवेश।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काम्येष्टियाज्यापुरोनुवाक्याः]

वि न इन्द्रे ꣳन्द्र क्षत्रमिं ꣳन्द्रियाणिं शतक्रतो ꣳडनु ते दायि ꣳ ॥ १२ ॥

[यह्वीः समंध्वरायं नो वरुणꣳ राजꣳश्चतुश्चत्वारिꣳशच्च ।]

वीतिं । नः । इन्द्र । इन्द्रं । क्षत्रम् । इन्द्रियाणिं । शतक्रतो इतिं शत - क्रतो । अन्वितिं । ते । दायि ॥ १२ ॥

रक्षेति, नदीमध्ये [V]नावा आयान्तं नाविकम् [८९]-उभयतः स्थिता-[८९] यथा आह्वयन्ति—भो भो मामुत्तारय मामुत्तारयेति ॥ ५

अथ " इन्द्राय वैमृधाय " (तैसं २·४·२) [९०]इत्यस्य पुरोनुवाक्या— ' वि न इन्द्र ' इति ॥ हे [V]इन्द्र, [V]नः अस्माकं [V]मृधः योद्धॄन् [V]विजहि विविधं मारय । किं च— [V]पृतन्यतः संग्रामं कर्तुमिच्छतः पुरुषान् नीचान् न्यग्भूतान् [V]यच्छ उपरमय । किं च [V]यः [V]अस्मान् [V]अभिदासति उपक्षपयति [V]तम् [V]अधस्पदम् एव [V]कृधि अस्मत्पादयोः पतितं प्रणतं पतितशिरस्कं कुरु ॥ १०

तत्रैव याज्या—' इन्द्र ' इति ॥ हे [V]इन्द्र, [V]वामं वननीयं [V]क्षत्रम् [V]ओजः [V]अभ्यजायथाः अभिलक्ष्य [९१]जातोऽसि । हे [V]चर्षणीनां मनुष्याणां [V]वृषभ कामानां वर्षितः, तादृशस्त्वम् अस्मांश्च [V]अमित्रयन्तं शत्रुभावमिच्छन्तं [V]जनम् [V]अपानुदः । किं [९२]च [V]देवेभ्यः हविःप्रदानादि-व्यवहारिभ्यो यजमानेभ्यः [९३V]उरुं विस्तीर्णं [V]लोकं स्थानम् [V]अकृणोः कुरु । [V]उ इत्यवधारणे ॥

अथ " इन्द्रायेन्द्रियावते " (तैसं २·४·२) इत्यस्य पुरोनुवाक्या—' इन्द्रियाणि ' इति ॥ १५ हे [V]इन्द्र [V]शतक्रतो, यानि तव [V]इन्द्रियाणि वीर्याणि [V]पञ्चसु [V]जनेषु निषादपञ्चमेषु [९४]ब्राह्मणादिषु, देवमनुष्यपितृरक्षोगन्धर्वेषु वा त्वया दत्तानि तिष्ठन्ति [V]तानि अहम् [V]आवृणे आभिमुख्येन याचे । तव प्रसादात् मदभिमतान्यपि साधयन्त्विति ॥

याज्या । ' वि न इन्द्र मृधः ' इति द्वितीयस्य हविषः पुरोनुवाक्या । ' इन्द्र क्षत्रममि वामम् ' [९१]इति याज्या । ' इन्द्रियाणि शतक्रतो ' इति तृतीयस्य हविषः पुरोनुवाक्या । ' अनु ते दायि महे ' [९२]इत्येषा २० याज्या । तदेतत् [९३]ऋचां षट्कं [९४]प्रथमकाण्डे [९५]षष्ठप्रपाठके अन्त्यानुवाके (तैसं १·६·१२) व्याख्यातम् ॥

८९–८९. तं३.लं.हो– उभयस्थितौ । ९०. लं.हो– ' इत्यस्य ' नास्ति । ९१. तं३.लं.हो– ' असि ' नास्ति । ९२. मै४– वा । ९३. मै४– उरु । ९४. लं.हो– ब्राह्मणादि° ।

४१. ड– इत्येषा । ४२. ड– इति । ४३. आ.क– ' ऋचाम् ' नास्ति । ४४. ड– °काण्डस्य । ४५. ड.शृं– °प्रपाठकस्य । २५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[विश्वरूपस्त्वष्टेन्द्रं वृत्रं ब्रह्मवादिनः स त्वै नासोमयाज्येष वै देवरथो देवा वै नर्चि नायज्ञोऽग्नेर् महान् त्रीन् निवीतमायुष्टे द्वादश ।] [विश्वरूपो नैनꣳ शीतरूरावध वसु पूर्वेद्युर्वाजा इत्यग्नेर् महान्निवीतमन्या यन्ति चतुःसप्ततिः ।] [विश्वरूपोऽनु ते दायि ।]

[मैसं ... ; कासं ...]

अथ याज्या—'अनु ते' इति ॥ हे [V]इन्द्र, [V]यजत्र यष्टव्य [V]ते तुभ्यं [V]दायि दीयते। देवेभिः ऋत्विग्भिः सामर्थ्याद्धविः कृत्स्नमपि तुभ्यमेव दीयते त्वत्प्रधानत्वात् [१५]देवानाम्। यद्वा—तुभ्यमेव दायि दीयतां सत्त्रेषु सर्तव्येषु यज्ञेषु सर्वैरपि। देवान्तरेभ्य इन्द्रस्य विशेषानाचष्टे— [V]महे महते [V]इन्द्रियाय वीर्याय महता इन्द्रियेण तद्वानयमिति कृत्वा। [V]अनु [V]वृत्रहत्ये वृत्रं हतवानयमिति कृत्वा। [V]अनु [V]क्षत्रं धनवानयमिति कृत्वा। [V]अनु [V]सहः बलवानयमिति कृत्वा। [V]नृषहये सर्वेषां नृणामभिभवितेति कृत्वा। सर्वत्र लक्षणे अनोः कर्मप्रवचनीयत्वम् (पा १·४·९०)॥

इति श्रीभट्टभास्करमिश्रविरचिते ज्ञानयज्ञाख्ये यजुर्वेदभाष्ये
द्वितीये काण्डे पञ्चमे प्रश्ने द्वादशोऽनुवाकः ॥ समाप्तश्च प्रपाठकः ॥

अत्र विनियोगसंग्रहः—

ज्योगामयाविनो ह्यायुरायुर्दाऽऽग्नेयके तथा ।
[४५-४६]आप्या सं ते च सौम्ये स्यादवोदुत्तेति-[४६] वारुणे ॥
[४७-४७]सारस्वते प्र णो ह्या नोऽग्नाऽग्नावैष्णवे-[४७] भवेत् ।
इमं तत्त्वाऽश्वदानीष्टौ उदु चित्रं [४८]तु सौर्यके ॥
अपां [४९]त्रयमपोनप्त्र इन्द्रावेत्यैन्द्रवारुणे ।
मैत्रावरुण आमिक्षायागे त्वा नः प्र वेति च ॥
पुनराधेयके त्वाग्निवारुणे त्वं न इत्युभे ।
प्रेप्रेति प्रवदाग्नेये विद्वयं बाधसंयुते ॥
स त्वं प्रतीकसंयुक्ते अꣳहवित्यैन्द्र्यागके ।
वीन्द्रेति वैमृधे हीन्द्रियाऽनु ते [५०]त्विन्द्रियावते ॥
[५१]पञ्चमान्त्यानुवाकेऽस्मिन् [५२]पञ्चत्रिंशदुदीरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञा-
परिपालकेन [५३-५३]माधवाचार्येण विरचिते[५३] वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे पञ्चमः प्रपाठकः ।

९५. लं—देवतायाम्।

४६-४६. ड—आप्याया सं ते चरौ सौम्ये स्यापोदुत्तेत्ति वारुणे। ४७-४७. ड. सारस्वते प्र णस्त्वा नो ह्यनाग्नावैष्णवो; शृं—सारस्वते प्रणस्त्वा नो ह्यनाग्नावैष्णवे। ४८. ड—च। ४९. आ.क-न समपो°। ५०. शृं—हीन्द्रिया°। ५१. आ.क—मन्त्रा ह्यस्मिन्ननुवाके। ५२. हो१—मन्त्रास्त्रिंशदु°। ५३-५३. क.शृं—सायणाचार्यविरचिते माधवीये।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(अथ द्वितीयकाण्डे षष्ठः प्रपाठकः)

अथ [1]दार्शपूर्णमासिकमाध्वर्यवं 'समिधो यजति' इत्यादयः षडनुवाकाः। प्राजापत्यं काण्डम्। तत्रादौ प्रयाजा विधीयन्ते। समिदादयः प्रयाजदेवता अग्निविशेषा आविष्टलिङ्गवचनाः। एषां च यागेन वसन्तादृतुधर्मे प्रवृत्तिर्यथायथं भवति। [2]वसन्तादृतुधर्मप्रवर्तनेन

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। ५
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥ १॥
हौत्रमाध्वर्यवं चाऽऽधारान्तं पञ्चम ईरितम्।
प्रयाजाद्यवशिष्टं तु वक्ति षष्ठे प्रपाठके॥ २॥

तत्र प्रथमानुवाके प्रयाजा विधातव्याः। तेषां मन्त्रास्तु मन्त्रकाण्डे पञ्चमानुवाक एवमाम्नाताः– "समिधो अग्न आज्यस्य वियन्तु। तनूनपादग्न आज्यस्य वेतु। इडो अग्न आज्यस्य वियन्तु। बर्हिरग्न १०
आज्यस्य वेतु। स्वाहाऽग्निम्। स्वाहा सोमम्। स्वाहाऽग्निम्। स्वाहा प्रजापतिम्। स्वाहाऽग्नीषोमौ। स्वाहेन्द्राग्नी। स्वाहेन्द्रम्। स्वाहा महेन्द्रम्। स्वाहा देवाꣳ आज्यपान्। स्वाहाऽग्निꣳ होत्राज्जुषाणाः। अग्न आज्यस्य वियन्तु" (तैब्रा ३.५.५) इति॥ एतेषां मन्त्राणां विनियोगं बौधायनो [1]दर्शयति– "समिधो अग्न आज्यस्य वियन्त्विति [2]प्रथमं, तनूनपादग्न आज्यस्य वेत्विति द्वितीयम्" इत्यादि॥ हेऽग्ने, समिध्यमानास्तव मूर्तय आज्यस्य वियन्तु हूयमानमिदमाज्यमश्नन्तु। तनूं [3]यष्टुः शरीरं न १५
पातयति न विनाशयति किंतु पालयतीति तनूनपात्। हेऽग्ने, [4]द्वितीया तनूनपात् [5]तव मूर्तिराज्यं पिबतु। हेऽग्ने, इड ईड्याः स्तुत्याः [6]-तव मूर्तयः-[7] आज्यं पिबन्तु। बृंहणाद्बर्हिः। हेऽग्ने, फलं बृंहयन्ती [8]तव मूर्तिराज्यं पिबतु। अग्निं [9]प्रथमाज्यभागदेवं प्रति [10]-स्वाहा हुतं-[11] भविष्यति। एवं द्वितीयाज्यभागदेवं [12]सोमं प्रति स्वाहा [13]हुतमस्त्विति भविष्यति [14]इत्यादिकं क्रमेण द्रष्टव्यम्। आवाहननिगदे या देवताः क्रमेण निर्दिष्टास्ता एवास्मिन् स्वाहाकारनिगदेऽपि निर्दिश्यन्त [15]इत्यवगन्तव्यम्। होत्रात्, होमनिमित्तं २०
[16]स्विष्टकरणार्थमित्यर्थः। हेऽग्ने, [17]एते सर्वे देवाः [18]जुषाणाः प्रीयमाणा इदानीं त्वन्मुखेनाऽऽज्यं पिबन्तु॥

---

१. तं३.लं– दर्शं°। २. लं– वसन्तमृतु°।

---

१. ड.ड१.श्रृं– 'दर्शयति' इत्यस्यानन्तरं– 'अथ प्रयाजानां प्रथमं यजति' इति। २. ड१– 'प्रथमं' नास्ति। ३. आ.क–'यष्टुः' नास्ति। ४. ड१–त्वदीया। ५. ड१–'तव' नास्ति। ६–६. ड.श्रृं– त्वन्मूर्तयः। ७. ड.ड१.श्रृं– त्वदीया। ८. अ.इ.उ. जो.ना.पा– प्रथममाज्य°। ९–९. ड१– स्वाहा स्वाहुतम्, ड– स्वाहुतम्–। १०. आ.हा– 'सोमं' नास्ति। ११. ड.ड१ 'अस्त्विति' नास्ति। १२. आ.क.ड– इति। १३. आ.क– इत्यवधेयम्। १४. ड१.श्रृं– स्विष्टत्वकर°। १५. इ.उ.जो.ना पा.हा– तत्ते दत्तं। १६. आ.क– 'जुषाणाः' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हरिः ॐ ॥

समिधो यजति वसन्तमेवर्तूनामव रुन्द्धे तनूनपातं यजति ग्रीष्ममेवाव रुन्द्ध इडो यजति वर्षा एवाव रुन्द्धे बर्हिर्यजति शरदमेवाव रुन्द्धे स्वाहाकारं यजति हेमन्तमेवाव रुन्द्धे तस्मात् स्वाहाकृता हेमन् पशवोऽव सीदन्ति

५ समिध इति सम्-इधः। यजति। वसन्तम्। एव। ऋतूनाम्। अवेति। रुन्द्धे। तनूनपातमिति तनू-नपातम्। यजति। ग्रीष्मम्। एव। अवेति। रुन्द्धे। इडः। यजति। वर्षाः। एव। अवेति। रुन्द्धे। बर्हिः। यजति। शरदम्। एव। अवेति। रुन्द्धे। स्वाहाकारमिति स्वाहा-कारम्। यजति। हेमन्तम्। एव। अवेति। रुन्द्धे। तस्मात्। स्वाहाकृता इति स्वाहा-कृताः। हेमन्। पशवः। अवेति। सीदन्ति।

१० लोकस्याधारा [1]एते। एताश्च एतैः प्रीणयति। भावानां [2]समिन्धयितारः समिधः। अग्नेरियं संज्ञा। वसन्ते हि भावाः समुज्ज्वला भवन्ति। तनूनामवयविनां न पातयिता प्रायशोऽवयवानां पातयिता तनूनपात्, भावानां संकोचयिता। ग्रीष्मे हि सर्वे भावाः संकोचं व्रजन्ति॥ [3]इडः वृष्ट्वा इषोऽन्नस्य उत्पादयित्र्यः। अन्त्यविकारश्छान्दसः। यद्वा—[4]इडन्नम्। "तत्करोति" (पा ३·१·२६ वा ५) इति णिचि इष्ठवद्भावे [5]टिलोपे क्विपि णिलोपः। वर्षासु हि सर्वसस्याभिवृद्धिः।

१५ बृंहणाल्लोकस्य बर्हिः। *[6]शरदि हि सर्वैः सस्यैः लोकः समृद्धो भवति। स्वाहुतमिव दग्धं करोतीति स्वाहाकारो हिमाग्निः। हेमन्ते हि सर्वं जगत् हिमाग्निना दग्धमिव भवति। तदेवाह—[7]तस्मात्* स्वाहाकारेण हिमाग्निना दग्धाः हेमन्ते [7]पशवः द्विपादश्चतुष्पादश्च [7]अवसीदन्ति विनश्यन्ति। इयमपि स्तुत्यर्थमेव ऋतुधर्मप्रवृत्तिः कीर्त्यते॥

समिध इति॥ तैरेतैर्मन्त्रकाण्डोक्तैर्मन्त्रैः साध्यान् [9]प्रयाजान विधत्ते— 'समिधो यजति वसन्तमेवर्तूनामव रुन्द्धे तनूनपातं यजति ग्रीष्ममेवाव रुन्द्ध इडो यजति वर्षा एवाव रुन्द्धे बर्हिर्यजति शरदमेवाव रुन्द्धे स्वाहाकारं यजति हेमन्तमेवाव रुन्द्धे तस्मात् स्वाहाकृता हेमन् पशवोऽव सीदन्ति' इति॥ अत्र समिदादिशब्दैर्यागविशेषनामान्युच्यन्ते। "ऋतवो वै प्रयाजाः" (मैसं १·४·१२) इत्येवम् ऋतुत्वेन [8]स्तुतत्वात् तैः प्रयाजैः क्रमेण वसन्ताद्यवरोध उच्यते। यस्मात् स्वाहाकारयागेन(ण) हेमन्तावरोधस्तस्मात् [7]हेमन् हेमन्ते [7]पशवः [7]अवसीदन्ति, द्विपादश्चतुष्पादश्च हिमेन पीड्यन्ते, [9]तेन तत्र दृष्टान्तः— 'स्वाहाकृताः' इति, स्वाहाकारेण प्रक्षिप्ताः समिधो यथा दाहेन पीड्यन्ते तद्वदित्यर्थः। तादृश उग्रोऽपि हेमन्तोऽस्याधीनो भवतीति यागस्तुतिः॥

३. हो- 'एते' नास्ति। ४. तं३.हो- समिन्धयन्तः। ५. तं३.हो- 'इडः' नास्ति। ६. तं३.हो- इडः अन्नम्। ७. हो- 'टिलोपे' नास्ति। *-* [तं३.लं.हो- 'शरदि हि सर्वैः... तस्मात्' इति नास्ति।]।

१७. ड-'प्रयाजान्' नास्ति। १८. आ.क- स्तूयमानत्वात्। १९. ड.ड१- 'तेन' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समिधो यजत्युषस एव देवतानामव रुन्द्धे तनूनपातं यजति यज्ञमेवाव रुन्द्ध (१) इडो यजति पशूनेवाव रुन्द्धे बर्हिर्यजति प्रजामेवाव रुन्द्धे समानयत उपभृतस्तेजो वा आज्यं प्रजा बर्हिः प्रजास्वेव तेजो दधाति स्वाहाकारं यजति वाचमेवाव रुन्द्धे

समिध इति सम्-इधः। यजति। उषसः। एव। देवतानाम्। अवेति। रुन्द्धे। तनूनपातमिति तनू-नपातम्। यजति। यज्ञम्। एव। अवेति। रुन्द्धे (१)। इडः। यजति। पशून्। एव। अवेति। रुन्द्धे। बर्हिः। यजति। प्रजामिति प्र-जाम्। एव। अवेति। रुन्द्धे। समानयत इति सम्-आनयते। उपभृत इत्युप-भृतः। तेजः। वै। आज्यम्। प्रजा इति प्र-जाः। बर्हिः। प्रजास्विति प्र-जासु। एव। तेजः। दधाति। स्वाहाकारमिति स्वाहा-कारम्। यजति। वाचम्। एव। अवेति। रुन्द्धे।

पुनरपि फलान्तरवत्तया प्रयाजाः स्तूयन्ते– उषस इति ॥ समिद्धत्वान्वयात् [८v]देवतानां योग्या उषसः [v]उदयान् लभन्ते। तनुमतां मनुष्याणामवनहेतोरग्निविशेषात् यज्ञलाभः। इडः पशव इति। पशुलाभहेतुरिडायागः। बर्हिरिति। [९]प्रजालाभहेतुर्बर्हिर्यागः ॥

समानयत इति ॥ त्रीन् प्रयाजानिष्ट्वा अर्धमौपभृतस्य जुह्वामानीय चतुर्थपञ्चमौ यजति। तेजो वा इति। [१०]पुनराज्याधानेन प्रजानां तेजःसमृद्धिः क्रियते ॥

"स्वैव ते वागित्यब्रवीत्" (तैब्रा २·१·२) इति स्वाहाकारेण वागवरोधः।

समिध इति ॥ पुनरपि [२०]विधीननूद्य प्रशंसति– 'समिधो यजत्युषस एव देवतानामव रुन्द्धे तनूनपातं यजति यज्ञमेवाव रुन्द्धे इडो यजति पशूनेवाव रुन्द्धे बर्हिर्यजति प्रजामेवाव रुन्द्धे' इति ॥ समिच्छब्देन [२१]दीप्तिसूचनादुषसोऽवरोधः। तनूनपाच्छब्देनाविनाशसूचनात् कृत्स्नयज्ञावरोधः। इट्शब्देनेष्यमाणक्षीरादिसूचनात् [२२]पश्ववरोधः। "प्रजा बर्हिः" (तैसं २·६·१; मैसं ३·८·६) इति श्रुत्यन्तरात् बर्हिर्यागेन(ण) प्रजावरोधः ॥

समानयतेति ॥ चतुर्थप्रयाजार्थमौपभृतस्याऽऽज्यस्य जुह्वामानयनं विधत्ते– 'समानयत उपभृतस्तेजो वा आज्यं प्रजा बर्हिः प्रजास्वेव तेजो दधाति' इति ॥ [v]उपभृतः सकाशाज्जुह्वामर्धमाज्यं सम्यगानयेत्। बर्हिर्यागस्य प्रजारूपत्वादाज्यस्य तेजस्त्वात् [९]प्रजासु [९]तेजः स्थापितं भवति ॥

स्वाहाकारमिति ॥ पञ्चमप्रयाजमवशिष्टं प्रशंसति– 'स्वाहाकारं यजति वाचमेवाव रुन्द्धे' इति ॥ अस्मिन् प्रयाजे स्वाहाशब्दानामग्न्यादिशब्दानां च बहूनामुच्यमानत्वात् तेन वागवरोधः ॥

---

८. तं२.मै.लं.हो–देवानाम्। ९. तं३.लं–प्रजालाभ इति हेतु°। १०. पं२.मै४–पुनराज्यानयनेन।

---

२०. आ.क– विधानान्तरेण। २१. अ.आ.इ.उ.जो.पा– समित्स्तुतिसूच°। २२. अ.इ.उ.जो.ना.पा– पश्वनुरोधः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्द्धे समिधो यजत्य-
स्मिन्नेव लोके प्रति तिष्ठति तनूनपातं यजति (२) यज्ञ एवान्तरिक्षे प्रति तिष्ठतीडो
यजति पशुष्वेव प्रति तिष्ठति बर्हिर्यजति य एव देवयानाः पन्थानस्तेष्वेव प्रति
तिष्ठति स्वाहाकारं यजति सुवर्ग एव लोके प्रति तिष्ठत्येतावन्तो वै देवलोकास्तेष्वेव
५ यथापूर्वं प्रति तिष्ठति

दश। समिति। पद्यन्ते। दशाक्षरेति दश - अक्षरा। विराडिति वि - राट्। अन्नम्। विराडिति वि - राट्। विराजेति वि - राजा। एव। अन्नाद्यमित्यन्न - अद्यम्। अवेति। रुन्द्धे। समिध इति सम् - इधः। यजति। अस्मिन्। एव। लोके। प्रतीति। तिष्ठति। तनूनपातमिति तनू - नपातम्। यजति (२)। यज्ञे। एव। अन्तरिक्षे। प्रतीति। तिष्ठति। इडः। यजति। पशुषु। एव।
१० प्रतीति। तिष्ठति। बर्हिः। यजति। ये। एव। देवयाना इति देव - यानाः। पन्थानः। तेषु। एव। प्रतीति। तिष्ठति। स्वाहाकारमिति स्वाहा - कारम्। यजति। सुवर्ग इति सुवः—गे। एव। लोके। प्रतीति। तिष्ठति। एतावन्तः। वै। देवलोका इति देव - लोकाः। तेषु। एव। यथापूर्वमिति यथा - पूर्वम्। प्रतीति। तिष्ठति।

दशेति। एवं फलभेदेन प्रयाजानां द्विप्रकारत्वात् [११]दशत्वमुपचर्यते। यद्वा— जुह्वां
१५ पञ्चगृहीतेन औपभृतस्यार्धं पञ्चगृहीतमानीयत इति दशग्रहणं जुह्वाः संपद्यते इति। तत्र दशत्वान्वयात् विराड्लक्षणान्नलाभः॥

इदानीं पञ्चविधायाः [१२]प्रतिष्ठाया हेतुत्वं प्रयाजानामाह— अस्मिन्निति॥ प्रथमत्वात् प्रकाशितत्वाच्च [v]अस्मिन् मनुष्यलोके प्रथमे प्रतिष्ठितो भवति। [१३]यज्ञादिसर्वपरिस्पन्दाश्रये [v]अन्तरिक्षे द्वितीयेन [v]प्रतितिष्ठति। इड्यागेन [v]पशुषु [१४-]प्रतिष्ठां गन्ता-[१४], बर्हिषः बृंहकत्वात्

---

२० **दशेति॥** [२३]पूर्वोक्ताः वसन्ताद्यवरोधाः पञ्च, इदानीमुक्ता उषःकालाद्यवरोधाः पञ्च इति दशसंख्याद्वारा यागान् प्रशंसति— 'दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्द्धे' इति॥

समिध इति॥ पुनरपि [२४]तत्तल्लोकप्रतिष्ठामुखेन प्रशंसति— 'समिधो यजत्यस्मिन्नेव लोके प्रति तिष्ठति तनूनपातं यजति यज्ञ एवान्तरिक्षे प्रति तिष्ठतीडो यजति पशुष्वेव प्रति तिष्ठति बर्हिर्यजति य
२५ एव देवयानाः पन्थानस्तेष्वेव प्रति तिष्ठति स्वाहाकारं यजति सुवर्ग एव लोके प्रति तिष्ठत्येतावन्तो वै

---

११. लं— दशमु°। १२. तं३. लं—प्रतिष्ठा°। १३. तं३.लं— यज्ञसर्व°। १४.—१४. पं२— प्रतिष्ठा कृता; त्रि.लं.हो— प्रतिष्ठा गता; मै४—प्रतिष्ठा गत्या; तं३—प्रतिष्ठां गतः।

---

२३. आ.क. पूर्वोक्त°। २४. शृं— तल्लोक°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवासुरा एषु लोकेष्वस्पर्धन्त ते देवाः प्रयाजैरेभ्यो लोकेभ्योऽसुरान् प्राणुदन्त तत् प्रयाजानां (३) प्रयाजत्वं यस्यैवं विदुषः प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भ्रातृव्यान् नुदतेऽभिक्रामं जुहोत्यभिजित्यै

देवासुरा इति देव-असुराः । एषु । लोकेषु । अस्पर्धन्त । ते । देवाः । प्रयाजैरिति प्र-याजैः । एभ्यः । लोकेभ्यः । असुरान् । प्रेति । अनुदन्त । तत् । प्रयाजानामिति प्र-याजानाम् (३) । ५
प्रयाजत्वमिति प्रयाज-त्वम् । यस्य । एवम् । विदुषः । प्रयाजा इति प्र-याजाः । इज्यन्ते ।
प्रेति । एभ्यः । लोकेभ्यः । भ्रातृव्यान् । नुदते । अभिक्राममित्यभि-क्रामम् । जुहोति ।
अभिजित्या इत्यभि-जित्यै ।

सर्वदेवयानपथप्रतिष्ठाहेतुत्वम् । स्वाहुतत्वस्याग्न्यादितृप्तिहेतुत्वात् स्वाहाकारेण स्वर्गे [v]प्रतितिष्ठति । देवलोका इति । सुखहेतुत्वात् [१५]देवलोकत्वमेषाम् । यथापूर्वमिति । यथाक्रमं [१६]प्रयाजादीनां क्रमात् । १०

देवासुरा इत्यादि ॥ प्रथमत इज्यन्ते इति प्रयाजाः भ्रातृव्यप्रणोदनफलाः । यद्वा–प्रस्थानादिवत् धात्वर्थनिवृत्तौ प्रशब्दः । [१७-]प्रेज्यन्ते प्र वा बाध्यन्ते[-१७] एभिरिति प्रयाजाः । " प्रयाजानुयाजौ यज्ञाङ्गे " (पा ७.३.६२) इति कुत्वाभावः । थाथादिना उत्तरपदान्तोदात्तत्वम् (पा ६.२.१४४) । अभिक्राममिति । [१८]अभिक्रम्याभिक्रम्य आभिमुख्येनाक्रम्य ॥

देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठति ' इति ॥ समिद्यागस्य प्राथम्यात् तेन [v]अस्मिन् प्रथमलोके प्रतिष्ठा । १५
" प्रच्युतो वा एषोऽऽस्माल्लोकादगतो देवलोकं [२५-]यो दीक्षितः[-२५] " (तैसं ६·१·१) इत्युक्तत्वात् दीक्षादिरूपः [v]यज्ञः [२६]लोकद्वयमध्यवर्त्यन्तरिक्षरूपस्तस्मिन् [v]अन्तरिक्षे द्वितीयत्वसाम्यात् तनूनपाद्यागेन प्रतिष्ठा । इड्यागस्य पशुसंबन्धः पूर्वमेवोक्तः । बर्हिःशब्देन देवयानमार्गसाधनस्य यज्ञस्य सूचनात् तद्यागेन त्रिष्वपि पूर्वोक्तेषु [२७]देवयानमार्गेषु प्रतिष्ठा । स्वाहाकारयागस्योत्तमत्वात् तेन स्वर्गप्रतिष्ठा । भूलोकमारभ्य [२८]स्वर्गपर्यन्ताः यथोक्ताः [v]एतावन्तः एव देवानां पूज्यानामपेक्षिता लोकाः [v]तेषु सर्वेषु यथाक्रममेवैतैः २०
प्रतिष्ठितो भवति ॥

देवासुरा इति ॥ इदानीं नामनिर्वचनेन प्रशंसति–' देवासुरा एषु लोकेष्वस्पर्धन्त ते देवाः प्रयाजैरेभ्यो लोकेभ्योऽसुरान् प्राणुदन्त तत् प्रयाजानां प्रयाजत्वं यस्यैवं विदुषः प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भ्रातृव्यान् नुदते ' इति ॥ अस्माकमेवैते लोका भवेयुरित्युभयेषां परस्परं स्पर्धा । [२९]प्रणुद्यन्ते विरोधिनो [३०]यैर्यागैस्ते यागाः प्रयाजाः ॥ २५

१५. तं३.लं.हो– देवलोकमेषाम् । १६. तं३.त्रि.लं.हो– प्रयाजानाम् । १७.–१७. त्रि– प्रयुज्यन्ते प्र वा बाध्यन्ते; पं– प्रयुज्यते प्रबाध्यन्ते; मै४– प्रेक्ष्यन्ते प्रबाध्यन्ते; हो– प्रयुज्यन्त प्रबाध्यन्ते । १८. तं३– अभिमतमिति अभिक्रम्याभिक्रम्य; लं– अभितमतिक्रम्य अभिक्रम्य ।

२५–२५. आ.हा–' यो दीक्षितः ' नास्ति । २६. आ– लोकद्वयवर्त्य° । २७. अ. इ.उ.जो.ना. पा.हा– देवमार्गेषु । २८. आ.क.ड– स्वर्गान्ताः । २९. आ.क–प्राणुदन्त । ३०. हो१– एभिर्या° । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यो वै प्रयाजानां मिथुनं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते समिधो बह्वीरिव यजति तनूनपातमेकमिव मिथुनं तदिडो बह्वीरिव यजति बर्हिरेकमिव मिथुनं तदेतद्वै प्रयाजानां मिथुनं य एवं वेद प्र (४) प्रजया पशुभिर्मिथुनैर्जायते देवानां वा अनिष्टा देवता

५ यः। वै। प्रयाजानामिति प्र-याजानाम्। मिथुनम्। वेद। प्रेति। प्रजयेति प्र-जया। पशुभिरिति पशु-भिः। मिथुनैः। जायते। समिध इति सम्-इधः। बह्वीः। इव। यजति। तनूनपातमिति तनू-नपातम्। एकम्। इव। मिथुनम्। तत्। इडः। बह्वीः। इव। यजति। बर्हिः। एकम्। इव। मिथुनम्। तत्। एतत्। वै। प्रयाजानामिति प्र-याजानाम्। मिथुनम्। यः। एवम्। वेद। प्रेति (४)। प्रजयेति प्र-जया। पशुभिरिति पशु-भिः। मिथुनैः। जायते।
१० देवानाम्। वै। अनिष्टाः। देवताः।

मिथुनमिति ॥ [१९]स्त्रीपुसंयोर्युगलम्। बह्वीरिति। स्त्रीत्वं बहुत्वं चाविवक्षितम्, 'एकमिव' इत्यत्रापि पुंस्त्वमेकत्वं च। लिङ्गवचनविशेषयोरग्नौ [२०]अपारमार्थ्यमिवशब्देन द्योत्यते। एवमिडा-बर्हिषोर्वेदितव्यम् ॥

देवानां [२१]वा इत्यादि ॥ पूर्वं [v]देवानां यागेन प्रयाजदेवताः [v]अनिष्टाः [v]आसन्। [v]अथ
१५ तादृशं [v]यज्ञम् [v]असुराः हन्तुमैच्छन्। अथ तत् ज्ञात्वा [v]देवाः [v]गायत्रीम् अष्टाक्षरां [२२v]व्यौहन्

अभिक्राममिति ॥ यदुक्तं सूत्रकारेण– "यं कामयेतामितरं वसीयान्त्स्यादित्यभिक्रामं तस्य जुहुयात्" (आपश्रौ २·१७·५) इति। अभितरम् [३१]अभिमुखतरम् उत्तरोत्तरवृद्ध्येत्यर्थः; तदेतत् सूत्रोक्तम् [३२]अभिक्रमणं विधत्ते– 'अभिक्रामं जुहोत्यभिजित्यै' इति ॥ [३३]अभिक्रम्याभिक्रम्यादूरे स्थित्वा प्रथमं हुत्वा पादं पुरतः प्रक्षिप्य द्वितीयं जुहुयात्। [३४]एवमुत्तरत्र। तदेतदभिक्रमणम् ॥

२० **य इति ॥** स्त्रीलिङ्गबहुवचननिर्देशं लिङ्गान्तरैकवचननिर्देशं च सह प्रशंसति– 'यो वै प्रयाजानां मिथुनं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते समिधो बह्वीरिव यजति तनूनपातमेकमिव मिथुनं तदिडो बह्वीरिव यजति बर्हिरेकमिव मिथुनं तदेतद्वै प्रयाजानां मिथुनं य एवं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते' इति ॥ एकस्य पुरुषस्य [३५]बह्व्यः स्त्रियो[३५] लोके भवन्ति, तत्साम्यादत्र [३६]मिथुनत्वोपचारः। मूर्तिबहुत्वेऽपि देवतैक्यात् बह्वीरिवेत्युपमोक्तिः ॥

२५ १९. त्रि.पं२.लं.हो–स्त्रीपुंसो°। २०. प२– अपरमार्थत्वमिव°; त्रि.लं.हो–अपरमार्थमित°; मै४– अपरमार्थत्वादिव°। २१. हो– च। २२–२२. लं.हो– व्यूहन्।

३१. आ– 'अभिमुखतरम्' नास्ति। ३२. ड– अभिक्रमम्। ३३. इ– 'अभिक्रम्याभिक्रम्यादूरे' नास्ति; ड१.शृं.हो१– अभिक्रम्याभिक्रम्य दूरे; अ.उ.जो.ना.पा.हा– अभिक्रम्यादूरे। ३४. अ.उ.जो.ना.पा.हा– 'एवमुत्तरत्र' नास्ति। ३५–३५. अ.इ.उ.जो.ना.पा.हा– बहुस्त्रियो; ड–सहस्रस्त्रियो।
३० ३६. उ.हो१– मिथुनत्वोक्तिप्रचारः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आसन्नथासुरा यज्ञमजिघाꣳसन् ते देवा गायत्रीं व्यौहन् पञ्चाक्षराणि प्राचीनानि त्रीणि प्रतीचीनानि ततो वर्म यज्ञायाभवद्वर्म यजमानाय यत् प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यज्ञाय क्रियते वर्म यजमानाय भ्रातृव्याभिभूत्यै तस्माद्वरूथं पुरस्ताद्वर्षीयः पश्चाद्ध्रसीयो

आसन्। अथ। असुराः। यज्ञम्। अजिघाꣳसन्। ते। देवाः। गायत्रीम्। वीति। औहन्। पञ्च। अक्षराणि। प्राचीनानि। त्रीणि। प्रतीचीनानि। ततः। वर्म। यज्ञाय। अभवत्। वर्म। यजमानाय। यत्। प्रयाजानूयाजा इति प्रयाज - अनूयाजाः। इज्यन्ते। वर्म। एव। तत्। यज्ञाय। क्रियते। वर्म। यजमानाय। भ्रातृव्याभिभूत्या इति भ्रातृव्य - अभिभूत्यै। तस्मात्। वरूथम्। पुरस्तात्। वर्षीयः। पश्चात्। हसीयः।

व्यूहद्वयं कृतवन्तः। [V]पञ्च [V]अक्षराणि यज्ञस्य [V]प्राचीनानि पुरस्तात् स्थितान्येको व्यूहः। [V]त्रीणि अक्षराणि [V]प्रतीचीनानि पश्चात् स्थितान्यन्यो व्यूहः। [V]ततः स तथा [२३]व्यूढाष्टाक्षरा गायत्री मध्यस्थस्य यज्ञस्य यजमानस्य च [२४]रक्षाकवचत्वेन संपन्ना॥

यदित्यादि॥ गतम्। वरूथमिति। रक्षकं सेनाबलादिकं [V]पुरस्तात् [V]वर्षीयः वृद्धतरः। "प्रियस्थिर°" (पा ६.४.१५७) इत्यादिना वर्षादेशः। [V]पश्चात् [V]ह्सीयः ह्स्वतरः। "स्थूलदूर°" (पा ६.४.१५६) इत्यादिना यणादिलोपः॥

देवानामिति॥ कवचरूपत्वं सैन्यसादृश्यं च संपाद्य प्रशंसति–'देवानां वा अनिष्टा देवता आसन्नथासुरा यज्ञमजिघाꣳसन् ते देवा गायत्रीं व्यौहन् पञ्चाक्षराणि प्राचीनानि त्रीणि प्रतीचीनानि ततो वर्म यज्ञायाभवद्वर्म यजमानाय यत् प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यज्ञाय क्रियते वर्म यजमानाय भ्रातृव्याभिभूत्यै तस्माद्वरूथं पुरस्ताद्वर्षीयः पश्चाद्ध्रसीयः' इति॥ पुरा देवा यदा यज्ञं कुर्वन्ति तदानीमाज्यभागादिदेवताः [V]अनिष्टाः [V]आसन्। [२७]तत्तदिज्यायाः प्रागेव तस्मिन्नवसरे समागत्य [V]असुराः [V]यज्ञं हनिष्याम इत्यैच्छन्। [२८]अतस्तदिज्याप्रतिबद्धाः तत्प्रतीकारत्वेन [V]देवाः [२९]अष्टाक्षरे गायत्रीपादे व्यूहद्वयं कृतवन्तः। तत्राक्षरपञ्चकस्य व्यूहो [३०]यज्ञानुष्ठानात् प्राचीनो रक्षकः। अक्षरत्रयव्यूहः [३१]तु प्रतीचीनो रक्षकः। ततो व्यूहद्वयं यज्ञस्य [३२]कवचस्थानीयम् [V]अभवत्, [३३]तथा यजमानस्यापि। अतः पञ्चाक्षररूपत्वेन पञ्च प्रयाजाः पूर्वम् [V]इज्यन्ते। [३४]त्र्यक्षररूपत्वेन त्रयोऽनूयाजाः पश्चादिज्यन्ते। तदुभयं [३५]कवचवत् यज्ञयजमानयोरुभयतो [३६]रक्षकम्। तेन रक्षणेन [V]भ्रातृव्यस्य अभिभूतिर्भवति। यस्मादत्र प्राचीनान्यक्षराणि बहूनि प्रतीचीनान्यल्पानि

---

२३. तं३.लं– व्यूढाक्षरा। २४. लं–रक्षाकवचनत्वेन

---

३७. ड१.शृं– कुतस्तदिज्यायाः। ३८. ड.उ१– °प्रतिबन्धात्। ३९. क–अष्टाक्षर°। ४०. नो.हा– यज्ञानुष्ठान°; ना– यज्ञानुष्ठाने। ४१. आ.क.हो१– 'तु' नास्ति। ४२. आ.क– कवचमाच्छादनाय। ४३. ड.ड१– तदा। ४४. उ१–अक्षरत्रयरूपत्वेन। ४५. आ.क– कवचम्। ४६. आ.क– रक्षणम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवा वै पुरा रक्षोभ्य (५) इति स्वाहाकारेण प्रयाजेषु यज्ञꣳ सꣳस्थाप्यमपश्यन् तꣳ स्वाहाकारेण प्रयाजेषु समस्थापयन् वि वा एतद्यज्ञं छिन्दन्ति यत् स्वाहाकारेण प्रयाजेषु सꣳस्थापयन्ति प्रयाजानिष्ट्वा हवीꣳष्यभि धारयति यज्ञस्य संतत्या अथो हविरेवाकरथो यथापूर्वमेति

५ देवाः । वै । पुरा । रक्षोभ्य इति रक्षः– भ्यः (५)। इति । स्वाहाकारेणेति स्वाहा - कारेण। प्रयाजेष्विति प्र - याजेषु । यज्ञम् । सꣳस्थाप्यमिति सं - स्थाप्यम् । अपश्यन् । तम्। स्वाहाकारेणेति स्वाहा - कारेण । प्रयाजेष्विति प्र - याजेषु । समिति । अस्थापयन् । वीति । वै । एतत् । यज्ञम् । छिन्दन्ति । यत् । स्वाहाकारेणेति स्वाहा - कारेण । प्रयाजेष्विति प्र - याजेषु । सꣳस्थापयन्तीति सं - स्थापयन्ति । प्रयाजानिति प्र - याजान् । इष्ट्वा । हवीꣳषि । अभीति । १० धारयति । यज्ञस्य । संतत्या इति सं - तत्यै । अथो इति । हविः । एव । अकरः । अथो इति । यथापूर्वमिति यथा - पूर्वम् । उपेति । एति ।

देवा वा इत्यादि ॥ हविषोऽभिधारणविधिः । रक्षसां प्रवृत्तेः [v]पुरा एव यागः समाप्यः इति मन्यमानाः [v]देवाः [v]प्रयाजेषु कृतेषु तदन्ते [v]स्वाहाकारेण पञ्चमेन प्रयाजेन [v]संस्थाप्यम् [v]अपश्यन् इत्थमेव इदं कर्तव्यमिति निश्चितवन्तः। [१५]ततस्तदनुरूपमेव कृतवन्तः। ननु किं [१६]प्रयाजेभ्य १५ ऊर्ध्वमेव लुप्तो देवानां यागः? न ब्रूमः प्रयाजान्तो याग इति, किं तु– स्वाहाकारेण सर्वो यज्ञो यथा संतिष्ठते तादृशं प्रयोगं कृतवन्तो देवा इत्युच्यते । स च प्रयाजानन्तरं [v]स्वाहाकारेण विच्छिन्नं हविषामभिधारणम्। [१७]तदेव प्रतिपादयति–'वि वा एतत्' इत्यादि । यदि प्रयाजान्तो यज्ञः संस्थाप्यते विच्छेद एवायं यज्ञस्य क्रियते, न पुनः सर्वोऽयं यज्ञः संस्थाप्यते । तस्मात् [v]प्रयाजान् [v]इष्ट्वा अनुपूर्वं [v]हवींꣳषि [v]अभिधारयति [v]यज्ञस्य अविच्छेदाय। देवा अपि तथा

२० [v]तस्मात् लोकेऽपि युद्धार्थं गच्छन्त्यां सेनायां [v]पुरस्तात् [v]वरूथं जनसंघः परकीयसैन्यस्य भयोत्पादनाय भूयान् [१७]विनिष्पाद्यते, पृष्ठभागे त्वल्पीयान् ॥

देवा इति ॥ प्रयाजशेषेण हविरभिधारणं विधत्ते–'देवा वै पुरा रक्षोभ्य इति स्वाहाकारेण प्रयाजेषु यज्ञꣳ सꣳस्थाप्यमपश्यन् तꣳ स्वाहाकारेण प्रयाजेषु समस्थापयन् वि वा एतद्यज्ञं छिन्दन्ति यत् स्वाहाकारेण प्रयाजेषु सꣳस्थापयन्ति प्रयाजानिष्ट्वा हवीꣳष्यभि धारयति यज्ञस्य संतत्या अथो हविरेवाकरथो यथापूर्वमेति' इति ॥ [v]देवाः कदाचिद्यागं कुर्वन्तो [१८]यज्ञोपघातिनां रक्षसामागमनात् [v]पुरा [१९]स्वाहाकारनामधेयेन २५ मुपैति

२५–२५. तं३.पं२.लं– तस्मादनुरूपमेव; मै४– ततस्त्वदनुरूपमेवा । २६. लं.हो– प्रयोगेण। २७. हो– तदेवम्।

४७. क.ड.हो१– अभिनिष्पाद्यते। ४८. ड.ड१.शृं.हो१–यज्ञविघातिनाम्। ४९. ड–स्वाहाकाराभिधानेन; ड१– स्वाहाकाराभिधान°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पिता वै प्रयाजाः प्रजाऽनूयाजा यत् प्रयाजानिष्ट्वा हवीꣳष्यभिधारयति पितैव तत् पुत्रेण साधारणं (६) कुरुते तस्मादाहुर्यश्चैवं वेद यश्च न कथा पुत्रस्य केवलं

पिता । वै । प्रयाजा इति प्र-याजाः । प्रजेति प्र-जा । अनूयाजा इत्यनु-याजा । यत् । प्रयाजानिति प्र-याजान् । इष्ट्वा । हवीꣳषि । अभिधारयतीत्यभि-धारयति । पिता । एव । तत् । पुत्रेण । साधारणम् (६) । कुरुते । तस्मात् । आहुः । यः । च । एवम् । वेद । यः । च । न । कथा । पुत्रस्य । केवलम् ।

अकुर्वन्निति । [V]अथो अपि च हविष्ट्वमेव हविषामनेनाभिधारणेन [V]अकः करोति । छान्दसे लुङि "मन्त्रे घस°" (पा २·४·८०) इत्यादिना लेर्लुक् । [V]अथो अपि च [V]यथापूर्वम् अनुक्रमेण पदार्थान् [V]उपैति । [२८-२९]इदं कृतमिदं कृतमिदानीं[२८-२९] कर्तव्यमिति बुद्ध्या उपसंप्राप्नोति ॥

पिता वा इत्यादि ॥ पूर्वमुत्पन्नत्वात् प्राधान्याच्च पितृस्थानीयाः [V]प्रयाजाः । विपर्ययात् प्रजास्थानीयाः [V]अनूयाजाः । [२९]तस्मात् प्रयाजशेषेण हविषामभिधारणेन [V]पिता स्वयम् [V]एव आत्मीयं धनं [V]पुत्रेण [V]साधारणं [V]कुरुते । सह ध्रियत इति साधारणम् । "आग्नीध्रसाधारणादञ् वक्तव्यः" (पा ५·४·३६ वा ५) इति अञ्प्रत्ययः ॥

तस्मादित्यादि ॥ [V]यः [V]च [V]एवम् वेदार्थं [V]वेद जानाति [३०-V]यः [V]च [V]न जानाति[३०], ते सर्वेऽपि [V]कथा केन हेतुना [V]पुत्रस्य स्वं [V]केवलं पुत्रस्यैव स्वं, [V]कथा च [V]पितुः स्वं

पञ्चमप्रयाजेन यज्ञः समापनीय इति विचार्य तथैव समापयन् । [५०]तदेतदयुक्तं यज्ञविच्छेदप्रसङ्गात् । अतः [V]प्रयाजान् [V]इष्ट्वा तच्छेषेणाऽऽज्येन वेद्यामासादितानां हविषामभिधारणे सति यज्ञः संततो भवति । [५१-V]अथो पुरोडाशादिद्रव्यस्य हविष्ट्वं कृतं भवति । [५२-५३]किं च[५२-५३] [V]यथापूर्वम् उत्तरम् [V]उपैति प्रयाजा यथा निर्विघ्नेनानुष्ठितास्तथैवाऽऽज्यभागाद्यनुष्ठानमपि निर्विघ्नेन प्राप्नोतीत्यर्थः ॥

पितेति ॥ प्रकारान्तरेणाभिधारणं प्रशंसति– 'पिता वै प्रयाजाः प्रजाऽनूयाजा यत् प्रयाजानिष्ट्वा हवीꣳष्यभिधारयति पितैव तत्पुत्रेण साधारणं कुरुते' इति ॥ प्रथमभावित्वात् प्रयाजानां पितृत्वं, पश्चाद्भावित्वादनूयाजानां पुत्रत्वम् । अनूयाजार्थं [५४]च हविरुपभृति [५५]संगृहीतमस्ति । पुरोडाशादिहविरभिधारणवेलायामौपभृतमपि हविः प्रयाजशेषेण [V]अभिधारयति । तथा सति [५५]पितृस्थानीयानां प्रयाजानां संबन्धि यदवशिष्टमाज्यद्रव्यं तत्पुत्रस्थानीयानामनूयाजानामपि [V]साधारणं कृतं भवति ॥

तस्मादिति ॥ इममेवार्थं लौकिकोदाहरणेन विस्पष्टयति– 'तस्मादाहुर्यश्चैवं वेद यश्च न कथा पुत्रस्य केवलं कथा साधारणं पितुरिति' इति ॥ लोके हि बालेन पुत्रेण [५६]यदुपार्जितं तद्द्रव्यं स पुत्र

२८.–२८. हो– इदं कृतकर्तव्यमिदानीं; लं–इदं कृतकर्तव्यकृत इदानीं; तं३– इदं कृतं कर्तव्यं कृतमिदानीं। २९. मै.मै४–अस्मात्; त्रि.लं.हो– अस्मान्। ३०–३०. तं३.मै–'यः च न जानाति' नास्ति।

५०. आ–तदयुक्तम्। ५१. क.ड.शृं.हो– किं च तस्य। ५२–५२. अ.इ.उ.जो.पा.हा–कल्पः। ५३. क.ड.हो१–'च' नास्ति। ५४. आ.क–गृंहीत°। ५५. आ– पितृस्थानीयम्। ५६. ड– यद्द्रव्यमुपार्जित° ; ड१ यद्द्रव्यमुपार्ज्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कथा साधारणं पितुरित्यस्कन्नमेव तद्यत् प्रयाजेष्विष्टेषु स्कन्दति गायत्र्येव तेन गर्भं धत्ते सा प्रजां पशून् यजमानाय प्र जनयति ॥ १ ॥

[यजति यज्ञमेवावं रुन्द्धे तनूनपातं यजति प्रयाजानामेवं वेद प्र रक्षोभ्यः साधारणं पञ्चत्रिꣳशच्च ।]

कथा । साधारणम् । पितुः । इति । अस्कन्नम् । एव । तत् । यत् । प्रयाजेष्विति प्र-याजेषु । इष्टेषु । स्कन्दति । गायत्री । एव । तेन । गर्भम् । धत्ते । सा । प्रजामिति प्र-जाम् । पशून् । यजमानाय । प्रेति । जनयति ॥ १ ॥

[मैसं ४·१०·३; कासं २०·१५; शब्रा १·५·३·४; २·२·३]

[v]साधारणं पुत्रस्यापि स्वम् [v]इति जिज्ञासवो वक्तारो भवन्ति। एवं विद्वांस्तु हेतुमत्र जानातीति भावः। "था हेतौ च°" (पा ५·३·२६) इति थाप्रत्ययः। श्लोकार्धमिदं पुरातनं ब्राह्मणदर्शितम्। अन्यार्थस्यानूयाजशेषस्याभावात् पुत्रधनस्यासाधारण्यम् ॥

किं [v]चेत्याह– 'अस्कन्नम्' इत्यादि ॥ प्रथमत एव इष्टप्रायत्वात्। तस्मात् प्रयाजाः कार्या इति। अपि चेत्याह– गायत्र्येवेत्यादि। प्रयाजानूयाजात्मकेन यागाष्टकेनाष्टाक्षरा [v]गायत्री [v]गर्भं [v]धत्ते [v]सा कालेन यजमानाय [v]प्रजां पुत्रादिकां [v]पशून् च गवादीन् [v]यजमानाय [v]प्रजनयति प्रसूते। तस्मात् प्रयाजा अनूयाजाश्च कर्तव्या इति ॥

इति द्वितीये षष्ठे प्रथमोऽनुवाकः ॥

उत्तरकाले स्वजीवनार्थमसाधारणत्वेन संगृह्य गुप्तं करोति न तु पित्रे प्रयच्छति [५७]नापि भ्रातृभ्यः। पित्रा तु [५८]यदुपार्जितं तत्पितुर्बालपुत्रस्य तद्भ्रातॄणां च साधारणं भवति। तेन हि द्रव्येण सर्वेऽपि जीवन्ति। तथा सति लौकिकः कश्चित् पुरुषो वेदमधीत्य [५९]प्रयाजानूयाजवृत्तान्तं जानाति। अन्यस्त्वध्ययनरहितः [v]न जानाति। तादृशानामुभयविधानां सभायामुपविष्टा अनभिज्ञाः पप्रच्छुः केन हेतुना [v]पुत्रस्य द्रव्यं [v]केवलम् असाधारणं संपन्नम्। पितृद्रव्यं तु केन हेतुना [v]साधारणं संपन्नम् [v]इति। तस्य च प्रश्नस्याभिज्ञाः [६०-]प्रयाजानूयाजवृत्तान्तेनोत्तरं [६१-]ददुरिति शेषः[-६१]। प्रयाजानामाज्यं साधारणं, तच्छेषेणेज्यमानत्वात्[-६०]। अनूयाजानाम् [६२]आज्यं त्वसाधारणम्। तच्छेषस्यान्यत्र विनियोगाभावात्। एवं लौकिकयोः पितापुत्रयोरपि द्रष्टव्यम् ॥

अस्कन्नामिति ॥ पुनः प्रकारान्तरेणाभिधारणं प्रशंसति– 'अस्कन्नमेव तद्यत् प्रयाजेष्विष्टेषु स्कन्दति' इति। यागार्थस्य द्रव्यस्य यागात् प्रागेवान्यत्र पतनं विनाशो भवति। अत्र तु [v]इष्टेषु [v]प्रयाजेषु

३१. लं– साधारणं किंचेत्यादि। ३२. हो–चेत्यादि। ३३–३३. लं.हो–'गर्भं धत्ते' नास्ति।

५७. आ.क– न तु। ५८. आ.क– यदुपार्ज्यते। ५९. अ.इ.उ.जो.पा.हा–°नूयाजकृतं तज्जानाति। ६०–६०. अ.उ.पा– प्रयाजानूयाजातेनात्तदुरितशेषं प्रयाजानामाज्यं साधारणम्; जो.हा– प्रयाजानूयाजार्थमात्रं (त्तं) यदुर्वरितं शेषं तत्प्रयाजानामाज्यं साधारणं तच्छेषे(ण)इज्यमानात्। ६१–६१. हो१– ददुरित्याद्याहर्तव्यम्, ड.शृं– ददुरित्यध्याहर्तव्यम्। ६२. आ.क– 'आज्यं' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रयाजविधिः]

[६३]पश्चादन्येषु हविःषु शेषः प्रक्षिप्यते[६३] । तस्मादेतत् [ङ]अस्कन्नम् अविनष्टम् [ङ]एव। [६४]शङ्कितस्कन्दनदोषस्य परिहार एवात्र [६५]प्रशंसेति ॥

गायत्रीति ॥ पुनरपि प्रकारान्तरेण प्रशंसति– ' गायत्र्येव तेन गर्भं धत्ते सा प्रजां पशून् यजमानाय प्र जनयति ' इति ॥ [६६]एकतः गायत्र्याः पञ्चाक्षररूपाः प्रयाजाः, अन्यतो गायत्र्यास्त्र्यक्षररूपा अनुयाजाः। मध्ये यदभिधारणं [ङ]तेन [ङ]गायत्री [ङ]एव स्वोदरे [ङ]गर्भं धृतवती भवति। तेन च [ङ]सा गायत्री यजमानार्थं [ङ]प्रजां [ङ]पशून् उत्पादयति ॥ ५

अत्र मीमांसा ॥ द्वितीयाध्यायस्य द्वितीयपादे चिन्तितम्–

" समिधो यजतीत्यादावेकत्वमुत भिन्नता।
धातुप्रत्यययोरैक्यादेकत्वं[६७] [६८]भिन्नता कुतः ॥
अभ्यासात् कर्मभेदोऽत्र नामत्वान्न विधिर्गुणे। १०
विधित्वं [६९]श्रुतितो भाति संनिधेरनुवादता " ॥ (जैन्या २·२·४-५) ॥

दर्शपूर्णमासयोः श्रूयते – " समिधो यजति ", " तनूनपातं यजति ", " इडो यजति ", " बर्हिर्यजति ", " स्वाहाकारं यजति " (तैसं २·६·१) इति। [७०]तत्र पञ्चकृत्वः श्रूयमाणे यजतिपदे पूर्वोक्तेषु यजतिददातीत्यादिपदेष्विव धातुभेदो नास्ति, येन भावनाभेद आशङ्क्येत। तस्मात् [७१]आख्यातैक्यप्रयुक्तं भावनैक्यम् [७२]अनिवार्यमिति चेत्। मैवम्। [७३]यजतिपदाभ्यासेन कर्मभेदावगमात्। [७४]कर्मैकत्वेऽभ्यासो १५ निरर्थकः स्यात्। अथोच्येत– ' समिधो यजति ' इत्यनेन [७५]प्रथमश्रुतेन वाक्येन[७५] विहितं समिन्नामकं यागमुपरितनैश्चतुर्भिर्यजतिपदैरनूद्य तनूनपादादयो देवतारूपा द्रव्यरूपा वा गुणाश्चत्वारो विकल्पिता विधीयन्ते। ततोऽनुवादार्थत्वान्नाभ्यासवैयर्थ्यमिति। तन्न। तनूनपादादिशब्दानां यागनामत्वेन [७६]गुणविधित्वाभावात्। [७७]न तावदत्र[७७] देवताविधिः, चतुर्थीतद्धितयोरश्रवणात्। नापि द्रव्यविधिः। तृतीयान्तत्वाभावात्। ततः ' अग्निहोत्रं जुहोति ' इत्यादाविव [७८]द्वितीयान्तानां युक्तं नामत्वम्। यत् तु[७८] चतुर्णाम् २० उपरितनानां यजतिपदानामनुवादत्वमिति[७९], तदसत्; तेषां विधायकत्वात्। यथा ' समिधो यजति ' इत्यत्र यजतिपदे विधित्वं श्रुत्या प्रतीयते तथाऽन्येष्वपि चतुर्षु पदेषु विधित्वं श्रौतम्। अनुवादत्वं तु पुरोवादरूपस्य ' समिधो यजति ' इत्यस्य संनिधानादवगम्यते। संनिधिश्च श्रुतेर्दुर्बलः। [८०]विधित्वे च पूर्ववाक्यविहितस्य [८१]समिन्नामकस्य यागस्य पुनर्विधानायोगात् तनूनपादादिनामकानि यागान्तराणि विधीयन्ते। नन्वेवं [८२]सति संज्ञाभेदात्[८२] कर्मभेदः संपद्यते, न त्वभ्यासात्। तथा सति [८१]वक्ष्यमाणाधिकरणेन संकीर्येत। मैवम्। २५

६३–६३. अ.उ.ना.पा.हा– अन्येषु हविःषु पश्चाच्छेषः प्रक्षिपति; इ.जो– हविःषु पश्चाच्छेषः प्रक्षिपति। ६४. अ.उ.जो.ना.पा.हा– °स्कन्नदोषस्य; इ–स्कन्ददोषस्य। ६५. ड१.शृं– प्रशंसा। ६६. अ.इ.उ.जो.पा.हा–प्रकृतौ। ६७. आ.क.जो.ना– °देकत्वे; हो१–°देकत्र। ६८. ड.हो१– अभिन्नता। ६९. अ.इ.उ.जो.पा.हा– न श्रुतौ। ७०. अ.इ.उ.ड१.जो.ना.पा.शृं.हा·हो१– 'तत्र' नास्ति। ७१. अ·पा–आवृत्तिप्रयुक्तं, उ–आवृतिप्रयुक्तं, हो१–आवृत्यैक्यप्रयुक्तं। ७२· ड.हो१–अनुपेयम्। ७३. यजतिददात्यभ्यासेन। ७४. अ.इ.उ.पा– कर्मैकत्वादभ्यासो; ड.हो१– कर्मैकत्वाभ्यासो। ७५–७५. अ.इ.उ.पा– प्रथमवाक्येन। ७६. अ.इ.ड.ड१.शृं.हो– गुणविशेषत्वाभावात्। ७७–७७. ड– न तावत्; हा–तावदत्र न। ७८–७८. अ.इ.उ.पा– युक्तं द्वितीयान्तामेषां भवतु। ७९. क.ड.जो.ना.शृं.हा– 'इति' नास्ति। ८०. अ.इ.उ.पा.हा–विधित्वं; हो१–विधित्वेन। ८१. अ.इ.उ.पा–संनिधानकृतस्य। ८२–८२. अ.इ.उ.पा–ध्वनिकृतसंज्ञाभेदात्; हो१-संज्ञाभेदात्। ८३. अ.इ.पा–वक्ष्यमाणविधिकरणेन; उ–'वक्ष्यमाणाधिकरणेन' नास्ति; ड– वक्ष्यमाणम् अधिकरणेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैषम्यात्। 'अथैष ज्योतिः' इत्यस्मिन् वक्ष्यमाणोदाहरणे यागावगमात् प्रागेव [84]संज्ञात्वावगमात् संज्ञायाः कर्मभेदहेतुत्वम्। इह तु [85]विधायकैर्यजतिपदैर्यागेष्ववगतेषु भेदे चाभ्यासादवगते भिन्नानां यागानां समित्संज्ञाया अन्याः संज्ञा अपेक्षिता इति तनूनपादादीनां संज्ञात्वं पश्चादवगम्यते। तस्मादभ्यास एवात्र यागभेदहेतुः॥

[86]नवमाध्यायस्य द्वितीयपादे चिन्तितम्–

" देवता यजयो वा स्युः प्रयाजे समिदादयः।
विष्ण्वादिवद्देवतात्वं न [87]चतुर्थ्याद्यभावतः " ॥ (जैन्या ९·२·२८)॥

दर्शपूर्णमासयोः [88]प्रयाजपञ्चकमाख्यातम्– " समिधो यजति " (तैसं २·६·१) इत्यादिना। तत्र यथा–' विष्णुं यजति ' ' वरुणं यजति ' इत्यादौ द्वितीयानिर्दिष्टा विष्ण्वादयो देवतास्तथा समिदादीनां देवतात्वम्। ततो यागैर्देवताः संस्क्रियन्त इति दृष्टार्थत्वलाभ इति चेत्। मैवम्। सर्वत्र चतुर्थ्या तद्धितेन वा देवता निर्दिश्यते। [89]तद्यथा– " यदग्नये सायं जुहुयात् " (तैब्रा २·१·२), " आग्नेयोऽष्टाकपालः " (तैसं ७·५·२१) इति। [90]न चात्र समिदादिषु [91] चतुर्थीतद्धितौ विद्येते। [92]तादर्थ्यप्रतीतौ देवता भवति। न च द्वितीयया तादर्थ्यं प्रतीयते। किं त्वीप्सिततमत्वम्। [93]तच्च कर्मनामत्वादुपपद्यते। " अग्निहोत्रं जुहोति " (मैसं १·५·१२) इत्यादौ तद्दर्शनात्। यथा 'पाकं पचति' इत्युक्ते पचिक्रियायाः कर्तव्यता प्रतीयते, तथा 'समिधो यजति' इत्युक्ते समिद्यागः कर्तव्य इत्यर्थो भवति। 'विष्णुं यजति' इत्यादौ [94]तादर्थ्यमुपचर्यते। प्रयाजमन्त्रेषु " समिधो अग्न आज्यस्य वियन्तु " (तैब्रा ३·५·५) इत्यादिषु समिदादिशब्दैर्बहुवचनैकवचनान्तैर्देवता निर्दिष्टाः। तदेव निमित्तीकृत्य तादृशैरेव शब्दैरिह यागा अभिधीयन्ते। " समिधो यजति ", तनूनपातं यजति ", " इडो यजति ", " बर्हिर्यजति ", " स्वाहाकारं यजति " (तैसं २·६·१) इति। तस्मान्नात्र देवतासंस्कारविधिः। किं तु यागाः केवला विधीयन्ते। तेषां च श्रुत्यादिभिः कार्यविशेषानवगमात् प्रकरणेनाऽऽरादुपकारकत्वम्। पञ्चमप्रयाजस्य तु [95]यक्ष्यमाणाज्यभागादिदेवतासंस्कारकत्वं दशमेऽभिधास्यते (जैन्या १०·१·१३-१४)॥

[96]दशमाध्यायस्य प्रथमपादे चिन्तितम्–

" अन्त्यः प्रयाज आरात् किमुपकार्युत संस्कृतिः।
स्वाहाकारेति [97]देवोक्तेर्मातृवत् मन्त्रवर्णनात्॥
आद्यो मैवं चतुर्थ्यादेरभावाद्यागमात्रके।
विधित्सया च [98]सौर्यादावर्थोऽन्यादिनिवर्तनम् " ॥ (जैन्या १०·१·१३-१४)॥

---

८४. ड१ – संज्ञावगमात्। ८५. हो१ – विधायकैक्यमिति पदार्थेष्ववगतेषु; अ.उ.ड१.पा–°र्थैजतिपदार्थे (ष्व) वगतेषु। ८६. शृं– नवमस्य। ८७. अ.इ.उ.पा–चतुर्थ्यां विधीयते। ८८. ड१–°कमाम्नातं। ८९. अ.इ.उ.पा– यथा। ९०–९०. अ.इ.उ.जो.ना.पा.हा– अत्र च न। ९१. अ.इ.उ.पा–°प्रतीता। ९२. ड१.शृं–तत्र। ९३. ड१– °मुपपद्यते। ९४. क.जो.ना.हा – वक्ष्यमाणा°; इ.उ.पा– यक्ष्यमाण देवतासंस्कारकत्वं; ड१ शृं.हो१– वक्ष्यमाणदेवतासंस्कारकत्वम्। ९५. शृं–दशमस्य। ९६. अ.इ.उ.जो.पा.हा–मन्त्रोक्ते°। ९७. अ इ.उ.जो.ना.पा.शृं.हो– °न्यादेर्निवर्तनम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दर्शपूर्णमासेष्टौ पञ्चमप्रयाज एवमाम्नायते– " स्वाहाकारं यजति " (तैसं २·६·१) इति। स किमिष्टेरारादुपकारक उताऽऽज्यभागादिषु यक्ष्यमाणानामग्न्यादिदेवतानां संस्कार इति संशयः। तत्र स्वाहाकारशब्देन देवतोच्यते। यागस्य तदाकाङ्क्षणात्। न च प्रत्यक्षवचनमुपेक्ष्य मन्त्रवर्णदेवताकल्पनमुचितम्। नन्वेवं सति विधिमन्त्रयोर्वैयधिकरण्यं प्रसज्येत। विधिना हि [९८]स्वाहाकाराख्या देवता विहिता। [९९]मन्त्रे तु[९९] यक्ष्यमाणाज्यभागदेवता [१००]अग्न्यादयः प्रतीयन्ते। " स्वाहाऽग्निम्। स्वाहा सोमम्। स्वाहाऽग्निम्। स्वाहा प्रजापतिम्। स्वाहाऽग्नीषोमौ " (तैब्रा ३·५·५) इत्यादिको हि [१०१]तन्मन्त्रः पठितः[१०१]। नायं दोषः, मातृशब्दवन्मान्त्रवर्णिकाग्न्यादिशब्दानामनेकार्थत्वसंभवात्। यथा मातृशब्दः प्रस्थादिना धान्यस्य मातारं जननीं चाऽऽचष्टे तथाऽग्न्यादिशब्दः [१०२]स्वाहाकाराख्यदेवतामाचक्षताम्। न च स्वाहाकाराख्यदेवतैव संस्क्रियतामिति वाच्यम्। संस्कृतायास्तस्या अन्यत्रोपयोगाभावात्। तस्मादिष्टेरारादुपकारक इत्याद्यः पक्षोऽभ्युपगन्तव्यः। मैवम्। चतुर्थ्या तद्धितेन वा सर्वत्र देवता विधीयते। न चात्र तौ विद्येते। किं चायं विधिर्देवतायागावुभौ विधत्ते देवताविशिष्टं यागं वा देवतमात्रं वा यागमात्रं वा। [१०३]नाऽऽद्यः, वाक्यभेदापत्तेः[१०३]। न द्वितीयो [१०४]गौरवप्रसङ्गात्। न तृतीयः, अप्राप्तस्य यागस्यानुवाद्यत्वे सति तदनुवादेन देवताविध्ययोगात्। तस्माच्चतुर्थः पक्षः परिशिष्यते। तत्र हि द्वितीयान्तस्वाहाकारशब्दः ' पौर्णमासीं यजते ' इत्यादाविव कर्मनामधेयं भविष्यति। तस्मादाज्यभागादिदेवतासंस्कार उत्तमः [१०५]प्रयाजः। एवं च सति सौर्यादिविकृतिभूतमप्रयाजमन्त्रे प्रधानदेवतावाच्यग्न्यादिपदपरित्यागो बाधविचारान्तर्गतस्याधिकरणस्य फलं भविष्यति। यत् तु पञ्चमाध्याये प्रयाजानामनुष्ठानक्रमे, पाठक्रमः प्रमाणमिति चिन्तितं तदस्माभिः " इषे त्वोर्जे त्वा " (तैसं १·१·१), " यज्ञस्य घोषदसि " (तैसं १·१·२) इत्यनयोरनुवाकयोः पौर्वापर्ये पाठ एव प्रमाणमित्यभिप्रेत्य तत्रैवोदाहृतम्॥

तृतीयाध्यायस्य तृतीयपादे चिन्तितम्—

" न क्रत्वङ्गं प्रयाजादि क्रत्वङ्गं वा न चाङ्गता।
प्रक्रियाया [१०६]असानत्वान्नैराकाङ्क्ष्येण वाक्ययोः॥
प्रयाजादेः [१०७]फलेऽपेक्षा कथंभावेऽपि च क्रतोः।
तेन [१०८]प्रकरणाम्नानं [१०९]तस्मादङ्गाङ्गिता तयोः " ॥ (जैन्या ३·३·९-१०)॥

सार्धपादद्वये [११०]यानि विनियोजकत्वेनोक्तानि[११०] श्रुतिलिङ्गवाक्यानि तेभ्योऽतिरिक्तं प्रकरणनामकं किंचित् प्रमाणं न वेदे पश्यामः। न [१११]हि [११२]पदतत्सामर्थ्यान्वयैरसंसृष्टः कश्चिद्वेदभागः क्वचित् केनचिदाम्नायते। एकवाक्यतामापन्नो वाक्यसमूहः प्रकरणम् इति चेत्। न। वाक्ययोः सतोः पश्चादेक-

९८. ड– स्वाहाकारस्य। ९९–९९. अ.उ.जो.ना.पा.हा.हो१–मन्त्रेषु; इ–' मन्त्रे तु ' नास्ति। १००. क.जो.ना.हा– अग्न्यादिदेवताः। १०१–१०१. आ.ड१– मन्त्रः पठितः; उ–तन्मन्त्रः। १०२. शृं– °देवतामन्त्राक्षरता°। १०३–१०३. अ.इ.उ.पा–न वाक्यभेदप्रसङ्गात्; आ.हो१ नाद्यः वाक्यभेदप्रसङ्गात्। १०४. अ.आ.इ.उ.पा– गौरवापत्तेः। १०५. अ.इ.उ.जो.पा.हा– ' प्रयाजः ' नास्ति। १०६. अ.इ.उ.जो.पा. समानत्वा°। १०७. आ.क–फलापेक्षा। १०८. शृं– प्रकरणाम्नानात्; ड१-प्रकरणाम्नातम्। १०९. अ.इ.उ.पा–तस्मात् क्रत्वङ्गता। ११०–११० आ.क–विनियोजकत्वेनोक्तानि यानि; अ.इ.उ.ड१ पा.शृं.– विनियोजकत्वेनोक्तानि; ड– विनियोजकद्वयेनोक्तानि स्त्रीलिङ्गवाक्यानि। १११ ड–च। ११२. ड१–°सामर्थ्यान्वये न संसृष्टः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वाक्यताया अभावात्। न हि– "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत", "समिधो यजति" इत्यनयोर्वाक्ययोः परस्पराकाङ्क्षाऽस्ति, [११३]-येन वाक्यैकता-[११३] कल्प्येत। तस्मात् प्रयाजादीनां न दर्शपूर्णमासाङ्गत्वमिति प्राप्ते ब्रूमः- प्रयाजादयः फलहेतवः, [११४]पुरुषप्रवृत्तिरूपत्वात् [११५]सेवादिवत्। दर्शपूर्णमासौ [११६]उपकरणैरुपकार्यौ, करणत्वात्, प्रदीपोपकृतचक्षुर्वत्। तथा सति किं प्रयाजादेः फलं, किं वा दर्शपूर्णमासयोः [११७]उपकरणमित्याकाङ्क्षायां संपन्नं [११८]वाक्यैकवाक्यतारूपं प्रकरणं, तेन च प्रयाजादीनामङ्गत्वं प्रतीयते॥

तृतीयाध्यायस्य प्रथमपादे चिन्तितम्–

"अभिक्रामं जुहोतीति युक्तं कर्त्राऽखिलस्य तत्।
किं [११९]वा प्रयाजमात्रस्य कृत्स्नकर्तृयुतं भवेत्॥
[१२०]प्रयाजाभिक्रमणयोः क्रियात्वादुभयोरपि।
मिथः संबन्धराहित्यान्नैवं तेऽपि समत्वतः॥
कर्तृयोगाददोषश्चेत् [१२१]-समानेयं समाहितिः-[१२१]॥
ततः प्रयाजसांनिध्यात् तत्कर्त्रैवास्य संयुतिः"॥ (जैन्या ३·१·२०-२२)॥

दर्शपूर्णमासयोः प्रयाजसमीपे श्रूयते– "अभिक्रामं जुहोति" (तैसं २·६·१) इति। तत्र होमकाले यदेतदाहवनीयस्याऽभिमुख्येन संचरणं तत् कृत्स्नदर्शपूर्णमासकर्त्रा संबध्यते। न तु प्रयाजमात्रकर्त्रा। [१२२]कुतः? अभिक्रमणस्य क्रियारूपस्य [१२३]-कारकत्वाभावेन प्रयाजक्रियया-[१२३] संबन्धासंभवादिति चेत्। [१२४]नैवम्। क्रियारूपत्वादेव दर्शपूर्णमासक्रियया संबन्धासंभवात्। अथोच्येत, अभिक्रमणं कर्तृकारकेण साक्षात् संबध्यते, तद्द्वारा कृत्स्नदर्शपूर्णमासकर्मणा संबध्यत इति तदेतत् समाधानं प्रयाजसंबन्धेऽपि समानम्। अतः संनिधिबलात् प्रयाजकर्त्रा संबध्यते॥

[१२५]चतुर्थाध्यास्य प्रथमपादे चिन्तितम्–

"अभिघार्यं प्रयाजानां शेषेण हविरत्र किम्।
शेषधारणतत्पात्रे कार्ये नो वाऽभिघारणम्॥
नान्यथा तेन ते कार्ये न कार्ये प्रतिपत्तितः।
प्राजापत्यवपायाश्च न कोऽप्यर्थोऽभिघारणात्"॥ (जैन्या ४·१·२८-२९)॥

प्रकृतौ श्रुतं– "प्रयाजशेषेण हवीꣳष्यभिघारयति" (हिश्रौ २·२·३२) इति। तदेतत् [१२६]विकृतावतिदिष्टम्। विकृतयश्च वाजपेयगताः पशवः। ते च द्विविधाः– क्रतुपशवः, [१२७]प्राजापत्याः पशवश्चेति। "आग्नेयं पशुमालभेत" (तैब्रा १·३·४) इत्यादिना विहिताः क्रतुपशवः। इतरे तु– "सप्तदश

११३–११३. ड१.शृं–येनैकवाक्यता। ११४. ड.हो१– °प्रवृत्तिहेतुरूपत्वात्। ११५. हो१–नीवारादिवत्। ११६. अ.इ.उ.ना.पा – °करणोपकार्यौ। ११७ अ.इ.उ.पा – उपकारं कर्तुमुपकरणमित्याकाङ्क्षायाः। ११८. अ.इ.उ.पा– °वाक्यत्वरूपं; जो.ना.हा– °वाक्यस्वरूपं। ११९. हो१–तु। १२०. अ.इ.उ.पा–°क्रमणे। १२१–१२१. अ. इ.उ.पा– समामपि समाहितः, ड१–समानेऽपि समाहितः, जो.शृं.हा– समानेयं समाहितः। १२२. अ.इ.उ.जो.पा.हा– 'कुतः' नास्ति। १२३–१२३. इ.उ.पा–करणत्वाभावेन प्रयोगे क्रियया; ड – कारणत्वाभावेन प्रयाजक्रियया; अ – 'कारकत्वाभावेन प्रयाजक्रियया' नास्ति। १२४. अ.इ.उ.पा– 'मैवं' नास्ति। १२५. ड– चतुर्थस्य। १२६. शृं– °वतिदिष्टे; अ.इ.उ.पा– °वतिदिश्यते। १२७. ड.ड१– प्राजापत्य°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राजापत्यान् पशूनालभते" (तैब्रा १.३.४) इति विहिताः। ते चोभयविधाः पशवः प्रातःसवने सहैवोपक्रम्यन्ते। ततः सर्वेषामर्थे सकृदेव प्रयाजा अनुष्ठीयन्ते। तत्र क्रतुपशूनां प्रातःसवन एवाऽऽलब्धव्यत्वात् [१२८]तदा यज्ञहविषां[१२८] प्रयाजशेषेणाभिधारणं [१२९]निर्विघ्नमेव [१३०]सिध्यति। प्राजापत्यपशूनां तु पर्यग्निकरणपर्यन्तमेव तदानीमनुष्ठानम्। आलम्भस्तु माध्यन्दिने सवने, तत्कालविशेषस्य "ब्रह्मसाम्न्यालभते" (द्र. आपश्रौ १८.६.७) इति विधानात्। तेषां च [१३१]प्राजापत्यानां हविषामभिधारणार्थं[१३१] प्रातःकालीनः प्रयाजशेषो धारयितव्यः। न चात्र जुह्वां तद्धारणं संभवति। क्रतुपश्वनुष्ठाने जुह्वा व्यापृतत्वात्। अतः पात्रान्तरं संपाद्य तस्मिन्नयं शेषो धारयितव्यः। अन्यथा प्राजापत्यहविषां [१३२]प्रयाजशेषेणाभिधारणासिद्धेः। तस्मात् शेषधारणतत्पात्रे संपादनीये इति प्राप्ते ब्रूमः—ते [१३३]उभे न कर्तव्ये। कुतः? अभिधारणस्य शेषप्रतिपत्तिरूपत्वेन हविःसंस्कारकत्वाभावात्। [१३४]न हि दृष्टेऽर्थे संभवति[१३४] अदृष्टोऽर्थः संस्कारः [१३५]कल्पयितुं युक्तः। दृष्टं च जुह्वा रिक्तीकरणम्। अन्यथा प्रयाजशेषोपेतायां जुह्वामाज्यभागार्थतया गृह्यमाणं संकीर्येत। ततो रिक्तीकरणरूपप्रतिपत्त्यर्थमेव प्रकृतौ शेषेणाभिधारणम्। अस्तु वा [१३६]तत्र हविःसंस्कारोऽपि। [१३७]तथाऽपि प्राजापत्यवपायामभिधारणं व्यर्थम्। रूक्षत्वनिवारणाय ह्यभिधार्यते। न च प्राजापत्यवपायां रूक्षताऽस्ति। ब्रह्मसाम्नैव तद्रूक्षताया निवारितत्वात्[१३७]। अत एव श्रूयते– "शम्या वा एतर्हि वपा [१३८]यर्ह्यनभिघृता [१३९]ब्रह्म वै[१३९] ब्रह्मसाम यद्ब्रह्मसाम्न्यालभते [१४०]तेनाशम्यास्तेनाभिघृताः" इति। शम्या रूक्षा इत्यर्थः। तस्माच्छेषधारणतत्पात्रे न कर्तव्ये॥

तत्रैवान्यच्चिन्तितम्–

"चतुर्थस्य प्रयाजस्य होमायौपभृतं घृतम्।
[१४१]जुह्वामानयतीत्यौपभृतं [१४२]नैषा प्रयोजयेत्॥
[१४३]प्रयोजयेदुताऽऽनीतिः प्रयाजाद्यखिलार्थता।
श्रुतौपभृत [१४४]आज्येऽतो जौहवेन विकल्पनात्॥
[१४५]न प्रयोजकता[१४५] मैवं त्रितयार्थं हि जौहवम्।
अतिहायेड इत्युक्तेश्चतुर्थे सा प्रयोजयेत्" ॥ (जैन्या ४.१.३०-३२)॥

दर्शपूर्णमासयोः श्रूयते– "अतिहायेडो बर्हिः प्रति समानयते जुह्वामौपभृतम्" इति। [१४६]अस्यायमर्थः– पञ्चानां प्रयाजानां मध्ये तृतीयः प्रयाज इट्शब्देन बहुवचनान्तेनाभिधीयते। तं तृतीयं प्रयाजमतिक्रम्य बर्हिर्नामकं चतुर्थं प्रयाजं होतुमुपभृत्संज्ञकायां स्रुचि स्थितं [१४७]घृतं जुह्वामानेतव्यमिति[१४६]। तदेतदानयनमुपभृत्याज्यग्रहणस्य[१४८] न प्रयोजकम्। तथा हि– जुहूपभृद्ध्रुवासु तिसृषु स्रुक्ष्वाज्यग्रहणप्रकारस्तद्विनियोगश्चैवमाम्नायते– "चतुर्जुह्वां गृह्णाति। अष्टावुपभृति। चतुर्ध्रुवायाम्।

१२८. आ.क.ड.ड– तदीयहविषां। १२९. अ.इ.उ.जो.पा.हा– संस्कारार्थत्वं। १३०. ड– 'सिध्यति' नास्ति। १३१–१३१. अ.आ.उ.पा–प्राजापत्यपशूनाभि°; जो.ना.हा–प्राजापत्यपशूनां हवि°; हो१– प्राजापत्यानामभि°; ड–प्राजापत्यानामभिधारणार्थः; इ–'प्राजा ... धारणार्थं' नास्ति। १३२. श्रृ– प्रयाजशेषाभि°। १३३. अ.इ.उ.पा– इह। १३४–१३४. क.ड.ड१– दृष्टे प्रतिपादने सति; श्रृ.हो१– दृष्टिप्रतिपादने सति। १३५. क.ड.ड१.हो१– 'कल्पयितुं' नास्ति। १३६. अ.इ.उ.ड.पा.हो१– अत्र। १३७–१३७. अ.इ.उ.पा– तथाऽपि...निवारितत्वात्' नास्ति; ड– प्राजापत्यवपाया अभिधारणं रूक्षत्व°। १३८. अ.इ.उ.जो.पा.हा–वर्त्मन(?)भिघृता। १३९–१३९. ड१– ब्रह्मैव। १४०. अ.इ.उ.जो.ना.पा– तेन शम्या°; ड– ते सा शम्या°। १४१. ड.हो१– °मानयत्यर्धोप°। १४२. जो.हा– नैव। १४३. हा– प्रयोजयेत् या नीतिः; ड.हो१–प्रयोजयेदुपानीतिः। १४४. क.जो.ना.हा– आज्येन। १४५–१४५. हा– नाप्रयो°। १४६–१४६. अ.इ.पा.हो१– 'अस्यायमर्थः ... नेतव्यमिति' नास्ति। १४७. जो.ना.हा–'घृतं' नास्ति। १४८. अ.इ.उ.जो.ना.पा.हा– °त्याज्यस्य ग्रहणस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यज्जुह्वां गृह्णाति। प्रयाजेभ्यस्तत्। यदुपभृति प्रयाजानूयाजेभ्यस्तत्। सर्वस्मै वा एतद्यज्ञाय गृह्यते। यद्ध्रुवायामाज्यम्" (तैब्रा ३·३·५) इति। तत्र जौहवं केवलं प्रयाजार्थम्, [१४९]औपभृतं तु प्रयाजानूयाजार्थमिति प्रयाजेषु जौहवम् औपभृतं चोभयं [१५०]विकल्पते। तथा सति यदा जौहवेन प्रयाजा इज्यन्ते तदानीमौपभृतस्याऽऽनयनमेव नास्ति, कुत आनयनस्य प्रयोजकत्वम्। यदा त्वौपभृतेन प्रयाजहोमस्तदानीम् औपभृतस्यार्धं [१५१]प्रयाजार्थमितरदनूयाजार्थम्। तयोः [१५२]प्रयाजसाधनमर्धं प्रथमप्रयाजकाल एव जुह्वामानीतम् इति न तस्य चतुर्थप्रयाजं प्रति समानयनं विधीयते। [१५३]यत्त्वनूयाजार्थमितरदर्धमुपभृत्यवशिष्टं तन्मध्ये किंचिच्चतुर्थप्रयाजं प्रति समानेतव्यम्। तत्त्वनूयाजैरेव प्रयुक्तमिति न तस्याऽऽनयनं प्रयोजकमिति प्राप्ते ब्रूमः– यज्जौहवं तत् प्रयाजत्रितयार्थं यदौपभृतं तदेवावशिष्टप्रयाजद्वयार्थमनूयाजार्थं चेत्येवं वाक्यद्वयस्य व्यवस्थायां [१५४]संभवन्त्यामष्टदोषग्रस्तो विकल्पो नाऽऽश्रयितुं शक्यः। यदा जौहवस्वीकारस्तदानीम् [१५५]औपभृतवाक्यस्य प्राप्तं प्रामाण्यं परित्यज्येत, अप्राप्तमप्रामाण्यं स्वीक्रियेत, पुनरपि कदाचिदौपभृतस्वीकारे त्यक्तं प्रामाण्यं स्वीक्रियेत, स्वीकृतमप्रामाण्यं [१५६]परित्यज्येतेत्यौपभृतवाक्ये चत्वारो दोषाः। जौहववाक्येप्येवं चत्वार इत्यष्टौ दोषाः। यथोक्तव्यवस्था [१५७]च "अतिहायेडः" इति वाक्यादध्यवसीयते। तथा सत्यौपभृतस्यानूयाजा यथा प्रयोजकास्तथैव [१५८]चतुर्थपञ्चमप्रयाजनिष्पादकम् आनयनमपि प्रयोजकमेव॥

पञ्चमाध्यायस्य द्वितीयपादे चिन्तितम्–

"प्रयाजानूयाजसिद्ध्यै पात्रैक्यमुत भिन्नता।
एकोपभृद्द्वयोरर्थे [१५९]दृष्टाऽतो विकृतौ तथा॥
विकृतौ [१६०]पात्रभेदोऽस्तु [१६१]शुद्धाज्यपृषदाज्ययोः।
[१६२]-एकपात्रे ग्रहाशक्तेर्द्रव्यैक्यं-[१६२] प्रकृतौ द्वयोः"॥ (जैन्या ५·२·१३-१४)॥

अग्नीषोमीयपशौ प्रयाजानूयाजसाधनं द्रव्यं [१६३]धारयितुमेकमेव पात्रं कर्तव्यम्। कुतः? प्रकृताबुभयार्थस्याऽऽज्यस्यैकयैवोपभृता धृतत्वेन विकृतावपि तदतिदेशादिति प्राप्ते ब्रूमः– प्रकृतिवत् [१६४]-केवलेन आज्येन-[१६४] प्रयाजा इज्यन्ते। अनूयाजास्तु पृषदाज्येन यष्टव्याः। "पृषदाज्येनानूयाजान् यजति" इति तद्विधानात्। पृषदाज्यं नाम दधिमिश्रमाज्यम्। नहि शुद्धमिश्रयोरेकेन पात्रेण धारणं संभवति। तस्मात् पृथक्पात्रम्॥

यत् तु [१६५]चतुर्थस्य प्रथमपादे (जैन्या ४·१·३३-३४) चिन्तितं–जुह्वामाज्यग्रहणं प्रयाजत्रयार्थम् उपभृत्याज्यग्रहणमनूयाजार्थं चेति; [१६६]-यदप्यन्यत् तत्रैव-[१६६] चिन्तितम्– उपभृति [१६७]चतुर्गृहीतद्वयादष्टसंख्येति (जैन्या ४·१·३५-३६) [१६८]तदुभयमस्माभिराज्यग्रहणविधायके "प्रत्युष्टꣳ रक्षः" (तैसं १·१·१०) इत्यनुवाके प्रदर्शितम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे षष्ठप्रपाठके प्रथमोऽनुवाकः॥

---

१४९. ड– उपभृति। १५०. क.ड१.श्रृ.हो१–विकल्प्यते। १५१. ड१.– पञ्चमप्रया°। १५२. अ.इ.उ.पा– °साधनत्वमर्थे; जो.हा– °साधनत्वमर्धं। १५३. अ.उ.जो.पा.हा– °मितरदर्धं तु परिशिष्टं; इ–°मितरदर्धे तु परिशिष्टं; ना– °मितरदर्धमुपभृतिपरिशिष्टं। १५४. अ.आ.उ.ड.जो.ना.पा– °दोषदुष्टो;। १५५. जो.ना.हा– °वाक्य°। १५६. क.जो.ना.हा– त्यजेतेत्यौ°। १५७, हा– वा। १५८. आ.हा– चतुर्थोत्तम°। १५९. अ.इ.उ.क.ड.पा– दृष्टान्तो; हो१–दृष्टान्तौ। १६०. अ.इ.उ.पा–°भेदस्तु; ड.ड१–भेदास्तु। १६१. ड.हो१–सिद्धाज्य°। १६२–१६२. इ.उ.जो.पा.हा – एकपात्रग्रहेऽशक्ते°; ड१–एकपात्रग्रहाशक्ति°; ड–एकपात्रे ग्रहेऽशक्ते°। १६३. अ.उ.पा–पूरयितुमेकमेव; इ–पूरयितुमेव। १६४–१६४. आ– केवलाज्येन। १६५. ड.ड१– चतुर्थाध्यायस्य। १६६–१६६. हो१–यदन्यत् तत्रैव; आ.क– यदप्यत्रैव। अ.इ.उ.जो.पा.हा – यदप्यन्यत्रैव; ना – यदप्यन्यत्रैवं, ड१ – यद्यप्यन्यत्रैव। १६७. अ.इ.उ.जो.पा– चतुर्थद्वयादष्टसंख्येति; हो१– चतुर्ग्रहद्वयादष्टसंख्योति। १६८. ड– °ग्रहणप्रतिपादके।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आद्यानुवाके विस्पष्टं प्रयाजाः पञ्च वर्णिताः ।
अनुवाके द्वितीयेऽस्मिन् वक्तव्यावाज्यभागकौ ॥

[1]तन्मन्त्रास्तन्मन्त्रकाण्डे (तैब्रा ३·५·६) समाम्नाताः ॥

कल्पः– " यदा जानात्यग्नयेऽनुब्रूहीति तदाऽऽग्नेयस्याऽऽज्यभागस्य पुरोनुवाक्यामन्वाहाग्निर्वृत्राणि जङ्घनादिति पौर्णमास्यामग्निः प्रत्नेन जन्मनेत्यमावास्यायां यदा जानात्यग्निं यजेति तज्जुषाणेन यजति जुषाणो अग्निराज्यस्य वेत्विति यदा जानाति [2]सोमायानुब्रूहीति तत्सोमस्य पुरोनुवाक्यामन्वाह त्वꣳ सोमासि सत्पतिरिति पौर्णमास्यां सोम गीर्भिष्ट्वा वयमित्यमावास्यायां यदा जानाति सोमं यजेति [3]तज्जुषाणेनैव यजति जुषाणः सोम आज्यस्य हविषो वेत्विति " (द्र. आश्वश्रौ १·५·२९) इति ॥

तत्र प्रथमस्याऽऽग्नेयस्य पाठस्तु– " अग्निर्वृत्राणि जङ्घनत् । द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः । जुषाणो अग्निराज्यस्य वेतु " (तैब्रा ३·५·६) इति । अयमग्निरस्माननुगृह्णात्विति शेषः[3] । कीदृशोऽग्निः ? वृत्राणि कर्मानुष्ठाननिवारकाणि पापानि जङ्घनदतिशयेन [4]हतवान् । विपन्यया विशिष्टया अस्मत्कृतया स्तुत्या द्रविणस्युरस्मदर्थं द्रविणेच्छुः समिद्धः सम्यक् [5]ज्वालितः शुक्रः शोचमान आहुतः समन्तादस्माभिराकारितोऽनेनाऽऽज्येनाऽऽहुतो वा । जुषाणः प्रीयमाणोऽयमग्निराज्यस्य वेतु [6]अस्माभिः दत्तमिदमाज्यमश्नातु ॥

प्रथमस्य सौम्यस्य पाठस्तु– " त्वꣳ सोमासि सत्पतिः । त्वꣳ राजोत वृत्रहा । त्वं भद्रो असि क्रतुः । जुषाणः सोम आज्यस्य हविषो वेतु " (तैब्रा ३·५·६) इति ॥ हे [7]सोम, त्वं सतां [8]सम्यगनुष्ठितानां कर्मणां पतिरसि । किं च, त्वं राजासि दीप्तिमान्, अपि च [8-]त्वं वृत्रहा[-8] पापघाती । किं च, त्वं भद्रः फलप्रदत्वेन [9]मङ्गलः क्रतुरसि, तस्य क्रतोः निष्पादकत्वात् । तादृशः सोमः [10]प्रीयमाणः इदमाज्यं हविरश्नातु ॥

द्वितीयस्याग्नेयस्य पाठस्तु– " अग्निः प्रत्नेन जन्मना । शुम्भानस्तनुवꣳ स्वाम् । कविर्विप्रेण वावृधे । जुषाणो अग्निराज्यस्य वेतु " (तैब्रा ३·५·६) इति । अयमग्निः प्रत्नेन पुरातनेन स्वजन्मना स्वां तनुवं स्वतनुं शुम्भानः [11]शोभयन् कविर्विपश्चित् पण्डितः पराभिप्रायज्ञः विप्रेण [12-]ऋत्विजा कृतां[-12] स्तुतिं ज्ञात्वा वावृधे वृद्धिं प्राप्तः । [13]सोऽयमग्निरिदमाज्यमश्नातु ॥

द्वितीयस्य सौम्यस्य पाठस्तु– " सोम गीर्भिष्ट्वा वयम् । वर्धयामो वचोविदः । सुमृडीको न आविश । जुषाणः सोम आज्यस्य हविषो वेतु " (तैब्रा ३·५·६) इति । हे सोम, वचोविदो वाक्यतात्पर्याभिज्ञा वयं गीर्भिः स्तुतिरूपाभिर्वाग्भिः वर्धयामः । त्वं तु सुमृडीकः सम्यक् सुखयन् नः अस्मानाविश । तादृशः सोम आज्यं हविरश्नातु ॥

१. ड.ड१– तन्मन्त्रास्तु मन्त्र° । २. अ.इ.उ.पा– सोमस्यानु° । ३. अ.इ.उ.जो.पा.हा– जुषाणे° । ४. अ.इ.उ.जो.पा.ना.हा– हृतवान् । ५. ड.ड१.हो१– प्रज्वालितः । ६. ड१.शृं.हो१– अस्मद्° । ७. आ.क–सद्भिरनु°; हो१– सम्यगनुष्ठानानाम् । ८–८. आ.क– 'त्वं वृत्रहा' नास्ति । ९. आ.क– मङ्गलरूपः । १०. आ.क– 'प्रीयमाणः' नास्ति । ११. आ.क– शोधयन् । १२–१२. हो१– द्विजकृतां । १३. आ.क– जुषाण इत्यादि पूर्ववत्; ड१– सोऽयमाज्यमश्नातु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चक्षुषी वा एते यज्ञस्य यदाज्यभागौ यदाज्यभागौ यजति चक्षुषी एव तद्यज्ञस्य प्रति दधाति पूर्वार्धे जुहोति तस्मात् पूर्वार्धे चक्षुषी प्रबाहुग्जुहोति तस्मात् प्रबाहुक् चक्षुषी देवलोकं वा अग्निना यजमानोऽनु पश्यति पितृलोकꣳ सोमेनोत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमायैवमिव हीमौ लोकावनयोर्लोकयोरनुख्यात्यै

चक्षुषी इति। वै। एते इति। यज्ञस्य। यत्। आज्यभागाविति आज्य - भागौ। यत्। आज्यभागाविति आज्य - भागौ। यजति। चक्षुषी इति। एव। तत्। यज्ञस्य। प्रतीति। दधाति। पूर्वार्ध इति पूर्व - अर्धे। जुहोति। तस्मात्। पूर्वार्ध इति पूर्व - अर्धे। चक्षुषी इति। प्रबाहुगिति प्र - बाहुक्। जुहोति। तस्मात्। प्रबाहुगिति प्र - बाहुक्। चक्षुषी इति। देवलोकमिति देव - लोकम्। वै। अग्निना। यजमानः। अन्विति। पश्यति। पितृलोकमिति पितृ - लोकम्। सोमेन। उत्तरार्ध इत्युत्तर - अर्धे। अग्नये। जुहोति। दक्षिणार्ध इति दक्षिण - अर्धे। सोमाय। एवम्। इव। हि। इमौ। लोकौ। अनयोः। लोकयोः। अनुख्यात्या इत्यनु - ख्यात्यै।

चक्षुषी वा इत्यादि॥ आज्यभागयोर्विधिः। [१-आज्यं भागो-१] ययोः तौ [v]आज्यभागौ अग्नीषोमीयौ तयोश्चक्षुःस्थानीययोः यागेन [v]यज्ञस्य [v]चक्षुषी [v]प्रतिदधाति प्रतिमुखं स्थापयति॥

प्रबाहुगिति॥ देशतः [२]प्रमाणतश्च सममित्यर्थः॥

देवलोकं वा इत्यादि॥ गतम्। अनुक्रमेण ख्यानमनुख्यातिः। "तादौ च" (पा ६·२·५०) इति गतेः प्रकृतिस्वरत्वम्॥

चक्षुषी इति॥ मन्त्रकाण्डोक्तैस्तैरेतैः साध्यावाज्यभागौ विधत्ते– 'चक्षुषी वा एते यज्ञस्य यदाज्यभागौ यदाज्यभागौ यजति चक्षुषी एव तद्यज्ञस्य प्रति दधाति' इति॥ याजमानब्राह्मणे "अग्नीषोमाभ्यां वै यज्ञश्चक्षुष्मान्" (तैसं १·६·११) इति [v]श्रुतत्वात् आज्यभागयोर्यज्ञचक्षुष्ट्वम्॥

पूर्वार्ध इति॥ आहवनीयस्य [v]"पूर्वार्धभागं होमदेशत्वेन विधत्ते– 'पूर्वार्धे जुहोति तस्मात् पूर्वार्धे चक्षुषी' इति॥ लोकेऽपि शिरसः पूर्वभागे चक्षुषी तिष्ठतो न तु पृष्ठभागे॥

प्रबाहुगिति॥ उभयोराहुत्योः [v]"पङ्क्तिवक्रत्वं परिमाणवैषम्यं च वारयितुं साम्यं विधत्ते– 'प्रबाहुक् जुहोति तस्मात् प्रबाहुक् चक्षुषी' इति॥ [v]प्रबाहुक् समं यथा भवति तथा जुहुयात् इत्यर्थः॥

देवलोकमिति॥ एकस्यां पङ्क्तावुत्तरदक्षिणदेशं क्रमेण विधत्ते– 'देवलोकं वा अग्निना यजमानोऽनु पश्यति पितृलोकꣳ सोमेनोत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमायैवमिव हीमौ लोकावनयोर्लोकयोरनुख्यात्यै' इति॥ देवलोक उत्तरदेशस्थः, पितृलोको दक्षिणदेशस्थः। अतस्तथाविधेन होमेन तयोरनुख्यातिरभिज्ञानं भवति॥

१–१. तंत्र.मै– आज्यं भागम्; लं.हो– आज्यभागो। २. मै– प्रमाणतश्च ते।

१४. आ.क– उक्तत्वात्। १५. क.ड.ड१.शृं.हो१– पूर्वभागम्। १६. आ.हा– पङ्क्तिरूपत्वम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

राजानौ वा एतौ देवतानां (१) यदग्नीषोमावन्तरा देवता इज्येते देवतानां विधृत्यै तस्माद्राज्ञा मनुष्या विधृता ब्रह्मवादिनो वदन्ति किं तद्यज्ञे यजमानः कुरुते येनान्यतोदतश्च पशून् दाधारोभयतोदतश्चेत्यृचमनूच्याऽऽज्यभागस्य जुषाणेन यजति

राजानौ । वै । एतौ । देवतानाम् (१) । यत् । अग्नीषोमावित्यग्नी-सोमौ । अन्तरा । देवताः । इज्येते इति । देवतानाम् । विधृत्या इति वि-धृत्यै । तस्मात् । राज्ञा । मनुष्याः । विधृता इति वि-धृताः । ब्रह्मवादिन इति ब्रह्म-वादिनः । वदन्ति । किम् । तत् । यज्ञे । यजमानः । कुरुते । येन । अन्यतोदत इत्यन्यतः– दतः । च । पशून् । दाधार । उभयतोदत इत्युभयतः-दतः । च । इति । ऋचम् । अनूच्येत्यनु-उच्य । आज्यभागस्येत्याज्य-भागस्य । जुषाणेन । यजति ।

राजानावित्यादि ॥ देवानां मध्ये राजनशीलौ । अन्तरेति । देवानां मध्ये [v]इज्येते । " अन्तरान्तरेण " (पा २.३.४) इति द्वितीया । [3]प्रयाजप्रधानदेवतापेक्षमन्तरात्वमेतयोः ॥

ब्रह्मवादिन इत्यादि ॥ अन्यतरपार्श्वस्थदन्ता अश्वादयः । " छन्दसि च " (पा ५.४.१४२) इति दतृभावः । ' दाधार ' इति छान्दसो लिट्, तुजादित्वादभ्यासस्य दीर्घत्वम् (पा ६·१·७) । ऋचमिति । " अग्निर्वृत्राणि " (तैब्रा ३·५·६) इत्यादिकां पुरोनुवाक्याम् । जुषाणेनेति । " जुषाणो अग्निराज्यस्य " (तैब्रा ३·५·६) इत्यादियजुषा याज्यया । ऋचमिति । " अग्निर्मूधा " (तैब्रा ३·५·७) इत्यादिकां पुरोनुवाक्याम् । ऋचेति । " भुवो यज्ञस्य " (तैब्रा ३·५·७) इत्यादिकया याज्यया ॥

राजानाविति ॥ उभयोराज्यभागयोर्मध्यदेशं [17]प्रधानयागस्थानत्वेन विधत्ते– ' राजानौ वा एतौ देवतानां यदग्नीषोमावन्तरा देवता इज्येते देवतानां विधृत्यै तस्माद्राज्ञा मनुष्या विधृताः ' इति ॥ इज्येते इत्यत्र [18]बहुवचनव्यत्ययो द्रष्टव्यः । प्रधानदेवता हि तयोर्मध्य इज्यन्ते । अत एवाऽऽथर्वणिका आमनन्ति– " यदा लेलायते [19]ह्यर्चिः समिद्धे हव्यवाहने । तदाज्यभागावन्तरेणाऽऽहुतीः प्रतिपादयेत् " (मुंउ १·२·२) इति । एवं च सत्युभयतोऽवस्थिताभ्यां राजभ्यां मध्येऽवस्थिताः प्रधानदेवता [20]विशेषेण धृता भवन्ति[20] । अथवाऽत्र देवताशब्देन [21]अवान्तरदेवता विवक्षिताः । ता अन्तरेण तासां मध्ये राजानावग्नीषोमाविज्येते । ताश्च देवताः [22]परितोऽवस्थिताः [23]भृत्यवदेतौ राजानौ विशेषेण धारयन्ति । अथवा राजभ्यां ताभ्यामन्या देवता जीवितप्रदानेनैव पोषिता भवन्ति । यस्मादेवं तस्माल्लोकेऽपि मनुष्याः सर्वे राज्ञा विधृता [24]वर्तन्ते ॥

ब्रह्मवादिन इति ॥ इत्थमाज्यभागौ निरूप्य तदीये याज्यानुवाक्ये उपरितनस्याऽऽग्नेयस्य प्रधानस्य हविषो याज्यानुवाक्ये च क्रमेण विधत्ते– ' ब्रह्मवादिनो वदन्ति किं तद्यज्ञे यजमानः कुरुते

३. लं.हो–प्रयाजदेवता°।

१७. अ.इ.उ.जो.ना.पा.हा – प्रधानस्थानत्वेन । १८. ड.ड१.शृं – बहुवचनत्वेन व्यत्ययो । १९. अ.इ.उ.जो.पा.हा– ह्यग्निः । २०–२०. अ.उ.जो.पा.हा– विधृता भवन्ति विशेषेणेति; ना– भवन्ति विशेषेणेति । २१. क.ड.१.ना.हो१– अङ्गान्तर° । २२. अ.इ.उ.जो.ना.पा– परितो वर्तन्ते । २३. अ.इ.उ.ड.ड१.जो.पा.शृं.हा.हो१–सेवकभृत्य°; क- सेव्यभृत्य° । २४. ड१– वर्धन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तेनान्यतोदतो दाधारर्चमनूच्य हविष ऋचा यजति तेनोभयतोदतो दाधार मूर्धन्वती पुरोऽनुवाक्या भवति मूर्धानमेवैनꣳ समानानां करोति (२) नियुत्वत्या यजति भ्रातृव्यस्यैव पशून् नि युवते

तेन। अन्यतोदत इत्यन्यतः - दतः। दाधार। ऋचम्। अनूच्येत्यनु - उच्य। हविषः। ऋचा। यजति। तेन। उभयतोदत इत्युभयतः - दतः। दाधार। मूर्धन्वतीति मूर्धन् - वती। पुरोनुवाक्येति पुरः- अनुवाक्या। भवति। मूर्धानम्। एव। एनम्। समानानाम्। करोति (२)। नियुत्वत्येति नि - युत्वत्या। यजति. भ्रातृव्यस्य। एव। पशून्। नीति। युवते।

मूर्धन्वतीति॥ मूर्धशब्दयुक्ता पुरोऋक्। "हस्वनुड्भ्याम्°" (पा ६.१.१७६) इति मतुप उदात्तत्वम्॥

नियुत्वत्येति॥ नियुच्छब्दवत्या। "तसौ मत्वर्थे" (पा १.४.१९) इति भत्वम्। नि युवत इति। भ्रातृव्यं नितरां पृथक्करोति। यौतेः व्यत्ययेन शः, आत्मनेपदं च॥

येनान्यतोदतश्च पशून् दाधारोभयतोदतश्चेत्यृचमनूच्याऽऽज्यभागस्य जुषाणेन यजति तेनान्यतोदतो दाधारर्चमनूच्य हविष ऋचा यजति तेनोभयतोदतो दाधार' इति॥ अन्यतोऽधोभाग एव दन्ता येषां [२५]गवादीनां तेऽन्यतोदतः, एतान् पशून् येन[२५] यज्ञाङ्गेन यजमानो दाधार प्राप्नोति तद्यज्ञाङ्गं किं नाम यजमानः कुरुते। उभयत [२६]ऊर्ध्वाधोभागयोर्दन्ता येषामश्वादीनां त उभयतोदत(न्त)स्तान् येन प्राप्नोति तदपि किम्? इत्येवं ब्रह्मवादिषु [२७-]कैश्चिदनभिज्ञैः पृष्टाः इतरेऽभिज्ञाः[-२७] उत्तरमवदन्। आज्यभागस्य होमकाले पुरोनुवाक्यारूपेण कांचिदृचं पठित्वा याज्यारूपेण जुषाण इत्यादियजुषा यागं करोति। तेनाधोभागे संपूर्णाया ऋचः पाठेन अधोभागस्थदन्तयुक्तान् [२८]पशूनाप्नोति। [२९]प्रधानस्याऽऽग्नेयस्य हविषो होमे पुरोनुवाक्यामप्यृचमेव पठित्वा याज्ययाप्यृचैव [३०]यजति। [३१]तेनाधऊर्ध्वभाविन्योः [३२]ऋचोः संपूर्णत्वेन भागद्वयेऽपि दन्तयुक्तानश्वादीन् प्राप्नोति तत्राऽऽज्यभागविषया पुरोनुवाक्या यजुश्चेत्युभयं [३३]पूर्वमेवोदाहृतं व्याख्यातं च। आग्नेयविषये च याज्यानुवाक्ये वक्ष्येते। तस्मादीदृशमेवोभयत्र [३४]कर्तव्यम् इति विधिः पर्यवस्यति॥

मूर्धन्वतीति॥ [३५]आग्नेययागस्य याज्यानुवाक्ये सामान्येन [३६-]विधाय विशेषाकारेण[-३६] विधत्ते- 'मूर्धन्वती पुरोनुवाक्या भवति मूर्धानमेवैनꣳ समानानां करोति। नियुत्वत्या यजति भ्रातृव्यस्यैव पशून्नि युवते' इति॥ मूर्धच्छब्दो यस्यामृच्यस्ति सा [४]मूर्धन्वती, तया [४]समानानां मध्ये यजमानं [४]मूर्धानं मूर्धवदुत्कृष्टं [४]करोति। नियुच्छब्दो यस्यामृच्यस्ति सा नियुत्वती, तया [३७]वैरिणां [४]पशून् नितरां वि योजयति।

२५-२५. आ.क- ते गवादयोऽन्यतोदतस्तान् पशून् येन; शृं- गवादीनां तेऽन्यतोदतः तान् पशूनेव; ड१- गवादीनां तेऽन्यतोदन्ताः तान् पशून्। २६. आ.क-ऊर्ध्वाधरयोः। २७-२७. आ.क- एके विज्ञाः पृष्टाः। इतरे विज्ञाः। २८. ड१- पशून् प्राप्नोति। २९. ड१- प्रधानस्य त्वाग्नेय°; शृं- प्रधानस्य त्वस्याग्नेय°। ३०. अ.इ.उ.जो.ना.पा.शृं- यजते; हो१-यजेत। ३१. अ.आ.इ.उ.जो.पा.हा- °ऊर्ध्वभावयोः; क.ना- °ऊर्ध्वभागयोः। ३२. हा.- ऋत्वोः। ३३. आ.क-पूर्वमेवोक्तं। ३४. आ.क -वक्तव्यमिति। ३५. ड.ड१-आग्नेयस्य यागस्य। ३६-३६. अ.इ.जो.पा.हा-विधिविशेषाकारेण। ३७. ड- वैरिणः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

केशिनꣳ ह दार्भ्य केशी सात्यकामिरुवाच सप्तपदां ते शक्करीꣳ श्वो यज्ञे प्रयोक्तासे

केशिनम्। ह। दार्भ्यम्। केशी। सात्यकामिरिति सात्य-कामिः। उवाच। सप्तपदामिति सप्त-पदाम्। ते। शक्करीम्। श्वः। यज्ञे। प्रयोक्तासु इति प्र-योक्तासे।

केशिनमित्यादि ॥ दर्भस्यापत्यं केशिनामानं सत्यकामस्यापत्यं केशिनामा [v]उवाच। दर्भशब्दात् गर्गादियञः (पा ४·१·१०५) उदात्तनिवृत्तिस्वरेण उदात्तत्वम्। [५]सप्तपदा- ५
मिति। त्रिपदा पुरोनुवाक्या चतुष्पदा [५]याज्या त्रिष्टुप्। अनयोः समष्टिः सप्तपदा। [v]शक्वरीं सर्वार्थसाधनभूतां वक्ष्यमाणवीर्यवतीं तव [v]यज्ञे [v]श्वः [६v]प्रयोक्तासे। तथा महावीर्या सा ज्ञातव्येति विशेषमभिधित्सुः सात्यकामिरुवाचेति। "न लुट्" (पा ८·१·२९) इति

एते याज्यानुवाक्ये मन्त्रकाण्डे (तैब्रा ३·५·७) समाम्नाते। तयोर्विनियोगं बौधायनो दर्शयति– "अथ हविषामग्निर्मूर्धा भुवो यज्ञस्येत्याग्नेयस्य पुरोडाशस्य" इति ॥ १०

तत्र प्रथमायाः पाठस्तु– "अग्निर्मूर्धा दिवः ककुत्। पतिः पृथिव्या अयम्। अपाꣳ रेताꣳसि जिन्वति" (तैब्रा ३·५·७) इति। अयमग्निरादित्यरूपेण दिवो द्युलोकस्य ककुदुच्छ्रितो मूर्धा द्युलोकस्य शिरःस्थानीयः, पृथिव्याः [३८]पतिर्दाहपाकादिकारित्वेन पालकोऽप्ययं, किं चापां रेतांसि उदककार्याणि स्थावरजङ्गमात्मकानि शरीराणि जाठराग्निरूपेण जिन्वति प्रीणयति ॥

द्वितीयस्याः पाठस्तु– "भुवो यज्ञस्य रजसश्च नेता। यत्रा नियुद्भिः सचसे शिवाभिः। दिवि १५
मूर्धानं दधिषे सुवर्षाम्। जिह्वामग्ने चकृषे हव्यवाहम्" (तैब्रा ३·५·७) इति। अयमग्निर्भूलोकस्य तत्रानुष्ठेयस्य यज्ञस्य तस्मिन् यज्ञे प्रवर्तकस्य रजोगुणस्य च नेता [३९]निर्वाहकः। तादृश हेऽग्ने, यत्र यस्यां दिवि सूर्यरूपो भूत्वा [४०]नियुद्भी रथे नितरां[४०] योज्यमानाभिः [४१]शिवाभिरुत्तमाभिरश्वजातिभिः सचसे समवैषि [४२]तस्यां दिवि मूर्धानं शिरोवदुन्नतस्थितिं दधिषे धारयसि। कीदृशं मूर्धानम्? सुवर्षां सुवः [४३]स्वर्गलोके [४४]स्यति सर्वदा तिष्ठतीति सुवर्षास्तं सुवर्षां, [४५]सोमपाशब्दवत् [४६]पुंलिङ्गोऽयम्। हेऽग्ने, त्वमस्मिन् यज्ञे २०
हव्यवाहं हविषः प्रापिकां जिह्वां ज्वालां चकृषे करोषि ॥

केशिनमिति ॥ तदिदं याज्यानुवाक्यायुगलमनेकप्रकारेण प्रशंसति– 'केशिनꣳ ह दार्भ्य केशी सात्यकामिरुवाच सप्तपदां ते शक्करीꣳ श्वो यज्ञे प्रयोक्तासे यस्यै वीर्येण प्र जातान् भ्रातृव्यान् नुदते प्रति जनिष्यमाणान् यस्यै वीर्येणोभयोर्लोकयोर्ज्योतिर्धत्ते यस्यै वीर्येण पूर्वार्धेनानड्वान् भुनक्ति जघनार्धेन धेनुरिति' इति ॥ दर्भनाम्नः पुत्रः कश्चित् केशी, [४७]सत्यकामस्य पुत्रोऽपरः केशी, तयोः [r]दार्भ्यं प्रति २५

४. तं३.लं.हो– 'सप्तपदामिति' इत्यस्यानन्तरं 'त्रिष्टुप्'। ५. लं.हो– इति। ६. लं– प्रवर्गे योक्ता।

३८. अ.आ.उ.ड.जो.पा.हा– °दार्हकारित्वेन। ३९. आ.हा– प्रवर्तको निर्वाहकः। ४०–४०. अ.इ.उ.जो.ना.पा.हा– नियुद्भिरश्वैर्नितरां; ड.हो१– नियुद्भिर्नितराम्। ४१. अ.इ.उ.जो.पा.हा– शिवाभिरश्वजातिभिरुत्तमाभिः। ४२. क– तस्मात्। ४३. ड.ड१– स्वर्गे। ४४. ड–अवस्यति। ४५. ३० आ.क– सोमपावत्। ४६. आ.क.ड१– पुंलिङ्गोऽयं शब्दः। ४७. अ.आ.इ.उ.जो.पा– सत्यकाम°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यस्यै वीर्येण प्र जातान् भ्रातृव्यान् नुदते प्रति जनिष्यमाणान् यस्यै वीर्येणोभयोर्-लोकयोर्ज्योतिर्धत्ते यस्यै वीर्येण पूर्वार्धेनानड्वान् भुनक्ति जघनार्धेन धेनुरिति पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवति जातानेव भ्रातृव्यान् प्र णुदत

यस्यै। वीयण। प्रेति। जातान्। भ्रातृव्यान्। नुदते। प्रतीति। जनिष्यमाणान्। यस्यै। वीर्येण। उभयोः। लोकयोः। ज्योतिः। धत्ते। यस्यै। वीर्येण। पूर्वार्धेनेति पूर्व-अर्धेन। अनड्वान्। भुनक्ति। जघनार्धेनेति जघन-अर्धेन। धेनुः। इति। पुरस्ताल्लक्ष्मेति पुरस्तात्-लक्ष्मा। पुरोनुवाक्येति पुरः-अनुवाक्या। भवति। जातान्। एव। भ्रातृव्यान्। प्रेति। नुदते।

निघाताभावः। वीर्यफलानि स्वयमेव इदानीं दर्शयति- 'यस्यै' इत्यादि। पुरोनुवाक्या प्राथम्याज्जातानां शत्रूणां, प्रतिनोदः उत्पत्तिनिरोधः। उभयोरिति। अस्मिश्चामुष्मिंश्च पूर्वोत्तरभावादुभयोः। पूर्वार्धेनेति। [V]अनड्वान् वाहनादिना पूर्वार्धेन प्रजाः [V]भुनक्ति रक्षति। [V]धेनुः क्षीरस्रवणादिना [V]जघनार्धेन प्रजाः भुनक्ति। पूर्वोत्तरत्वात् अनयोः॥

अथेदानीं स्वयमेव वीर्यविशेषमनयोर्दर्शयितुमाह- 'पुरस्ताल्लक्ष्मा' इति॥ लक्षणं यष्टव्यदेवतानामधेयम्। पूर्वस्मिन्नर्धर्चे लक्ष्म यस्याः सा तथोक्ता। यथा- "अग्निर्मूर्धा"

---

[r]सात्यकामिः ब्रूते-हे दार्भ्य, [r]श्वः [४८]प्रयोक्ष्यमाणे [r]ते त्वदीये [r]यज्ञे सप्तभिः [४९]पादैरुपेतां शक्करीछन्दस्कामृचं [५०]प्रयोक्ष्यसे। सा च [५१]ऋगत्यन्तवीर्यवती। "अग्निर्मूर्धा" इत्यादयस्त्रयः पादाः। "भुवो यज्ञस्य" इत्यादयश्चत्वारः पादाः। तदुभयं मिलित्वा सप्तपदा शक्करी भवति। शक्तिरस्या अस्तीति शक्करी। [५२-]सा च शक्तिरेवं द्रष्टव्या[-५२] यस्याः शक्र्याः सामर्थ्येन पूर्वमुत्पन्नान् भ्रातृव्यान् [r]प्रणुदते निराकरोति। [r]जनिष्यमाणान् च यथा [५३-]नोत्पत्स्यन्ते [५४]तथा [५५r]प्रतिनुदते प्रतिबध्नातीत्यर्थः[-५३]। किं च, तदीयेन [r]वीर्येण [५६]भूर्लोकस्वर्गलोकयोः [५७r]ज्योतिरुत्कर्षं पुरुषः [r]धत्ते। किं च तदीयेन [r]वीर्येण बलीवर्दो लाङ्गलशकटवाहिना स्कन्धरूपेण पूर्वभागेन स्वामिनं पालयति। [r]धेनुः च क्षीरप्रदेनोधसाऽपरभागेन(ण) स्वामिनं पालयति, तथाविधेयं शक्करी॥

पुरस्ताल्लक्ष्मेति॥ याज्यानुवाक्ययोर्लक्षणं दर्शयति- 'पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवति जातानेव भ्रातृव्यान् प्र णुदत उपरिष्टाल्लक्ष्मा याज्या जनिष्यमाणानेव प्रति नुदते' इति॥ मन्त्रप्रतिपाद्याया देवताया नामधेयं लक्ष्म, [५८]तद्यस्यामृचि पूर्वार्धे विद्यते सा [r]पुरोनुवाक्या। तन्नाम [५९]यस्याम् उत्तरार्धे [६०]विद्यते सा [r]याज्या। तद्यथा- 'अग्निर्मूर्धा' इति पूर्वार्धेऽग्निशब्दः। "जिह्वामग्ने चकृषे हव्य-

---

४८. आ.क - प्रयोज्यमाने। ४९. आ.क - पदैरु°। ५०. अ.इ.उ.ड.जो.पा.हा.हो१- प्रयोज्यसे (?)। ५१. ड.ड१.शृं-अत्यन्त°; अ.इ.उ.जो.ना.पा.हा-ऋक् तवार्थवती। ५२-५२. जो.हा-शक्तिरेव वैरिणो; ड.ड१.शृं-शक्तिरेवं द्रष्टव्या। ५३-५३. ड-नोत्पत्तिस्तथा प्रतिबध्नाति। ५४. आ.हा-तथा करोति। ५५. ड१.हो१- 'प्रतिनुदते' नास्ति। ५६. ना - °स्वर्लोकयोः; ड१ - भूलोकस्थयोः। ५७. अ.इ.उ.जो.ना.पा.हा- ज्योतिरुत्कर्षतां। ५८. ड- 'तत्' नास्ति। ५९. ड.ड१- यस्यामृचि। ६०. ड- 'विद्यते' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपरिष्टाल्लक्ष्मा (३) याज्या जनिष्यमाणानेव प्रति नुदते पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवत्यस्मिन्नेव लोके ज्योतिर्धत्त उपरिष्टाल्लक्ष्मा याज्याऽमुष्मिन्नेव लोके ज्योतिर्धत्ते ज्योतिष्मन्तावस्मा इमौ लोकौ भवतो य एवं वेद पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवति तस्मात् पूर्वार्धेनानड्वान् भुनक्त्युपरिष्टाल्लक्ष्मा याज्या तस्माज्जघनार्धेन धेनुर्य एवं वेद भुङ्क्त एनमेतौ ५

उपरिष्टाल्लक्ष्मेत्युपरिष्टात्-लक्ष्मा (३)। याज्या। जनिष्यमाणान्। एव। प्रतीति। नुदते। पुरस्ताल्लक्ष्मेति पुरस्तात्-लक्ष्मा। पुरोनुवाक्येति पुरः– अनुवाक्या। भवति। अस्मिन्। एव। लोके। ज्योतिः। धत्ते। उपरिष्टाल्लक्ष्मेत्युपरिष्टात्-लक्ष्मा। याज्या। अमुष्मिन्। एव। लोके। ज्योतिः। धत्ते। ज्योतिष्मन्तौ। अस्मै। इमौ। लोकौ। भवतः। यः। एवम्। वेद। पुरस्ताल्लक्ष्मेति पुरस्तात्-लक्ष्मा। पुरोनुवाक्येति पुरः– अनुवाक्या। भवति। तस्मात्। पूर्वार्धेनेति पूर्व-अर्धेन। १०
अनड्वान्। भुनक्ति। उपरिष्टाल्लक्ष्मेत्युपरिष्टात्-लक्ष्मा। याज्या। तस्मात्।
जघनार्धेनेति जघन–अर्धेन। धेनुः। यः। एवम्। वेद। भुङ्क्तः। एनम्। एतौ।

(तैब्रा ३·५·७) इत्यादि। उत्तरस्मिन् अर्धर्चे लक्ष्मवती [v]उपरिष्टाल्लक्ष्मा, यथा– " जिह्वामग्ने चकृषे " (तैब्रा ३·५·७) इति। [७]-उभयत्रापि " मनः " (पा ४·१·११) इति-[७] ङीप्प्रतिषेधः। गतमन्यत्॥ १५

अस्मा इति॥ यजमानार्थं, [v]य [v]एवं [v]वेद तस्मै च [v]इमौ [v]लोकौ [v]ज्योतिष्मन्तौ [v]भवतः। [८]भुङ्क्त इति। [९]एवंवेदितारम् [v]एतौ अनड्वान् धेनुश्च [v]भुङ्क्तः, यथायथं संरक्षतः। एष च एषा च एतौ। " पुमान् स्त्रिया " (पा १·२·६७) इति पुंसः शेषः॥

वाहम् " इत्युत्तरार्धेऽग्निशब्दः। पूर्वार्धगतेन लक्षणेन [६१]-पूर्वोत्पन्नभ्रातृव्यान् निराकरोति-[६१]। उत्तरार्धगतेन लक्ष्मणा जनिष्यमाणवैरिप्रतिबन्धः॥ २०

पुरस्ताल्लक्ष्मेति॥ तदेव पूर्वोत्तरार्धगतं लक्ष्मद्वयमनूद्य पुनरपि द्वेधा प्रशंसति– 'पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवत्यस्मिन्नेव लोके ज्योतिर्धत्त उपरिष्टाल्लक्ष्मा याज्याऽमुष्मिन्नेव लोके ज्योतिर्धत्ते ज्योतिष्मन्तावस्मा इमौ लोकौ भवतो य एवं वेद पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवति तस्मात् पूर्वार्धेनानड्वान् भुनक्त्युपरिष्टाल्लक्ष्मा याज्या तस्माज्जघनार्धेन धेनुर्य एवं वेद भुङ्क्त एनमेतौ' इति॥ अस्य लोकस्य पूर्वभावित्वात् पूर्वभाविना [६१]लक्ष्मणा [v]ज्योतिः भवति। स्वर्गस्य उपरिवर्तित्वात् उपरिवर्तिना लक्ष्मणा [v]ज्योतिः। २५

७–७. लं– 'उभयत्रापि मन इति' नास्ति। ८. लं.हो– उक्तः। ९–९. हो– एवंवेदितारौ।

६१–६१. क.ड.ड१.हो१– °भ्रातृव्यनिराकरणम्। ६२. आ.हा– लक्षणेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वज्र आज्यं वज्र आज्यभागौ (४) वज्रौ वषट्कारश्चिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरत्यछम्बट्कारमपगूर्य वषट् करोति स्तृत्यै गायत्री पुरोनुवाक्या भवति त्रिष्टुग्याज्या ब्रह्मन्नेव क्षत्रमन्वारम्भयति तस्माद्ब्राह्मणो मुख्यो मुख्यो भवति य एवं वेद

५ वज्रः। आज्यम्। वज्रः। आज्यभागावित्याज्य - भागौ (४)। वज्रः। वषट्कार इति वषट् - कारः। त्रिवृतमिति त्रि - वृतम्। एव। वज्रम्। संभृत्येति सं - भृत्य। भ्रातृव्याय। प्रेति। हरति। अछम्बट्कारमित्यछम्बट् - कारम्। अपगूर्येत्यप - गूर्य। वषट्। करोति। स्तृत्यै। गायत्री। पुरोनुवाक्येति पुरः-- अनुवाक्या। भवति। त्रिष्टुक्। याज्या। ब्रह्मन्। एव। क्षत्रम्। अन्वारम्भयतीत्यनु - आरम्भयति। तस्मात्। ब्राह्मणः। मुख्यः। मुख्यः। भवति। यः। एवम्। वेद।

१० वज्र आज्यमित्यादि॥ [१०-]त्रिगुणेनैव वज्रेण[-१०] भ्रातृव्यस्य रक्षःप्रभृतेः प्रहरणं यज्ञस्य अछम्बट्कारायानार्तत्वाय भवति। "ये यजामहे" (तैसं १·६·११) इत्यपगूरणयुक्तो वषट्कारश्च भ्रातृव्याणां [v]स्तृत्यै छादनाय [११]विनाशाय भवति। ह्रस्वान्तं धात्वन्तरं द्रष्टव्यम्॥

ब्रह्मन्नेवेति॥ गायत्र्याः प्राथम्यात् त्रिष्टुभश्च चरमभावात् गायत्रत्रैष्टुभयोर्ब्रह्मक्षत्रयोः प्राधान्यं [१२-]गुणभावश्च भवति[-१२]। [v]एवं वेदिता च [v]मुख्यः [v]भवति॥

१५ वेदितुरपि तदेव फलम्। एवमनड्वाहो [६३-]धेन्वाश्च पूर्वोत्तरार्धसाम्यं योज्यम्[-६३]। एतस्योभयस्य वेदितारम् [r]एतौ [६५]धेन्वनड्वाहौ स्वस्वोपकारेण पालयतः॥

वज्रेति॥ अथ याज्यान्ते [६५]प्रयोज्यस्य [६६]वषट्कारस्य विधिमर्थवादेनोन्नयति- 'वज्र आज्यं वज्र आज्यभागौ वज्रौ वषट्कारश्चिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरत्यछम्बट्कारम्' इति॥ तानूनप्त्रब्राह्मणे - "घृतं (खलु) वै देवा वज्रं कृत्वा सोममघ्नन्" (तैसं ६·२·२) इत्युक्तत्वादाज्यस्य २० वज्रत्वम्॥ "वृत्राणि जङ्घनत्" (तैब्रा ३·५·६) इति मन्त्राम्नानादाज्यभागयोर्वज्रत्वम्। "वषट्कारो वै गायत्रियै शिरोऽच्छिनत्" (तैसं २·१·७) इत्युक्तत्वात् वषट्कारस्य वज्रत्वम्। तदेतत्त्रयम् आज्यभागाख्यकर्मणि मिलित्वा त्रिगुणो वज्रः संपद्यते। तादृशेन भ्रातृव्यस्य प्रहरणे सति [६७]छम्बटकारः वैयर्थ्यं तस्य प्रहारस्य न भवति॥

अपगूर्येति॥ [६८]तस्य वषट्कारस्योच्चध्वनिं विधत्ते- 'अपगूर्य वषट् करोति स्तृत्यै' इति॥ २५ [r]अपगूर्य उच्चैर्ध्वनिं कृत्वेत्यर्थः॥ स च ध्वनिर्भ्रातृव्यस्य हिंसायै संपद्यते। अयं च वषट्कारविधिराग्नेयादियाज्यास्वपि समानो द्रष्टव्यः। "वषट्कारोऽन्त्यः सर्वत्र" (आश्रश्रौ १·५·५) इत्याश्वलायनवचनात्॥

१०-१०. लं- त्रिगुणेने(!)वज्र°; हो- त्रिगुणे वज्र°। ११. लं- 'विनाशाय' नास्ति। १२-१२. तं.मै.लं.हो- गुणभावं च करोति।

६३-६३. जो.हा- धेन्वोश्च साम्ये यः; ना- धेन्वोश्च साम्यं योज्यं; अ.उ-धेन्वोश्च यः; इ.पा- ३० धेन्वोश्च स्वाम्ययोः यः; ड- एवं न तु हि धेन्वां च पूर्वोत्तरार्धसाम्यं योज्यम्। ६४. आ.क- धेन्वनड्वाहौ। ६५. ड. योक्तव्यस्य; ड१.- प्रयोक्तव्यस्य। ६६. जो.ना.पा.हा-अर्धवषट्कारस्य; इ- अर्धं वषट्कारस्य। ६७. आ.क.जो.हा.हो१- वषट्कारेण; अ.उ.पा- वषट्कारे। ६८. क- 'तस्य' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रैवैनं पुरोनुवाक्ययाऽऽह प्र णयति याज्यया गमयति वषट्कारेणैवैनं पुरोनुवाक्यया दत्ते प्र यच्छति याज्यया प्रति (५) वषट्कारेण स्थापयति

प्रेति। एव। एनम्। पुरोनुवाक्ययेति पुरः– अनुवाक्यया। आह। प्रेति। नयति। याज्यया। गमयति। वषट्कारेणेति वषट्-कारेण। एति। एव। एनम्। पुरोनुवाक्ययेति पुरः– अनुवाक्यया। दत्ते। प्रेति। यच्छति। याज्यया। प्रतीति (५)। वषट्कारेणेति वषट्-कारेण। स्थापयति। ५

प्रैवैनमित्यादि ॥ [१२V]एनं यजमानं [V]पुरोनुवाक्यया [V]प्राह हविर्व्याजेन यजमानमेव प्रकृष्टं करोति ब्रवीति, [V]याज्यया एनं [V]प्रणयति प्रकृष्टफलं प्रापयितुं नयति, [V]वषट्कारेण तत्फलं [V]गमयति प्रापयतीति ॥

अथान्यथा रूपयति – एवैनमिति ॥ [V]पुरोनुवाक्यया [V]एनम् [V]आदत्ते देवेषु स्थापयितुं गृह्णाति। [V]याज्यया देवेभ्यः [V]प्र [V]यच्छति। [V]वषट्कारेण देवेषु [V]स्थापयतीति ॥ १०

गायत्रीति ॥ [६९V]पुनरप्याग्नेयस्य याज्यानुवाक्ये [७०•]छन्दोद्वारा प्रशंसति– 'गायत्री पुरोनुवाक्या भवति। त्रिष्टुग्याज्या ब्रह्मन्नेव क्षत्रमन्वारम्भयति तस्माद्ब्राह्मणो मुख्यः" इति ॥ "अग्निर्मूर्धा" इति [V]गायत्री। सा च ब्राह्मणेन सहोत्पन्नत्वात् ब्रह्मस्वरूपा। "भुवो यज्ञस्य" इति [V]त्रिष्टुप्। सा च क्षत्रेण सहोत्पन्नत्वात् [७१V]क्षत्ररूपा। तथा सति गायत्रीत्रिष्टुभोः पौर्वापर्येण [७२•]ब्राह्मणम् [V]अनु-[७२]पश्चात् [७३]क्षत्रियं प्रवर्तितवान् भवति। यस्माद्ब्राह्मणः पूर्वं प्रवृत्तः [V]तस्मात् [७४-V]मुख्यः भवति। मुखे भवतीति व्युत्पत्तेः-[७४] ॥ १५

मुख्य इति ॥ तद्वेदनं प्रशंसति– 'मुख्यो भवति य एवं वेद' इति ॥

प्रेति ॥ पुनरपि पुरोनुवाक्यादित्रयं प्रदेयदेवतासमीपप्राप्तिद्वारेण प्रशंसति– 'प्रैवैनं पुरोनुवाक्ययाऽऽह प्र णयति याज्यया गमयति वषट्कारेण' इति ॥ पुरोनुवाक्यापाठेन हविषो दातारम् [७५-V]एनं यजमानं-[७५] देवानामग्रे प्रकर्षेण कथितवान् भवति। [V]याज्यया तं मार्गेण [V]नयति। [V]वषट्कारेण देवान् प्रापयति ॥ २०

एति ॥ पुनरपि तस्य प्रापितस्य यजमानस्य प्रतिष्ठापनद्वारेण प्रशंसति– 'ऐवैनं पुरोनुवाक्यया दत्ते प्र यच्छति याज्यया प्रति वषट्कारेण स्थापयति' इति ॥ [V]एनं यजमानं त्रिभिर्मन्त्रैः क्रमात् हस्तेन गृहीत्वा देवेभ्यः प्रदाय तत्रोपवेशयति ॥

१२. मै४.लं.हो–एवम्। २५

६९. ड१–पुनराग्नेयस्य। ७०. ड.ड१– छन्दोद्वारेण। ७१. ड.ड१– क्षत्रस्वरूपा। ७२–७२. ड– मुखे। ७३. आ.क– क्षत्रियः। ७४–७४. ड१– मुखे भव इति व्युत्पत्त्या मुख्यः। ७५–७५. आ.क-एव।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रिपदा पुरोनुवाक्या भवति त्रय इमे लोका एष्वेव लोकेषु प्रति तिष्ठति चतुष्पदा याज्या चतुष्पद एव पशूनव रुन्द्धे द्व्यक्षरो वषट्कारो द्विपाद्यजमानः पशुष्वेवोपरिष्टात् प्रति तिष्ठति गायत्री पुरोनुवाक्या भवति त्रिष्टुग्याज्यैषा वै सप्तपदा शक्करी यद्वा एतया देवा अशिक्षन् तदशक्नुवन् य एवं वेद शक्नोत्येव (६) यच्छिक्षति ॥ २ ॥

[देवतानां करोत्युपरिष्टाल्लक्ष्माऽऽज्यभागौ प्रति शक्नोत्येव द्वे च ।]

त्रिपदेति त्रि - पदा । पुरोनुवाक्येति पुरः–अनुवाक्या । भवति । त्रयः । इमे । लोकाः । एषु । एव । लोकेषु । प्रतीति । तिष्ठति । चतुष्पदेति चतुः–पदा । याज्या । चतुष्पद इति चतुः–पदः । एव । पशून् । अवेति । रुन्द्धे । द्व्यक्षर इति द्वि - अक्षरः । वषट्कार इति वषट् - कारः । द्विपादिति द्वि - पात् । यजमानः । पशुषु । एव । उपरिष्टात् । प्रतीति । तिष्ठति । गायत्री । पुरोनुवाक्येति पुरः– अनुवाक्या । भवति । त्रिष्टुक् । याज्या । एषा । वै । सप्तपदेति सप्त - पदा । शक्करी । यत् । वै । एतया । देवाः । अशिक्षन् । तत् । अशक्नुवन् । यः । एवम् । वेद । शक्नोति । एव । यत् । शिक्षति ॥ २ ॥

[मैसं ४·१०·१,३; कासं २०·१५; शब्रा १·६·३; ७·२]

यथे[त्रिपदे]त्यादि ॥ गतम् ॥

[१४]एतयेति ॥ गायत्रीत्रिष्टुप्समष्टिरूपया यत् [१५]कर्तुमैच्छन् [v]तत् [v]अशक्नुवन् एव [v]देवाः । [v]एवं वेदिताऽपि [v]यत् च कार्यमिच्छति तत् [v]शक्नोति एव साधयितुम् । शकेः "सनि मीमा॰" (पा ७·४·५४) इत्यादिना इस् अभ्यासलोपश्च ॥

इति द्वितीये षष्ठे द्वितीयोऽनुवाकः ॥

त्रिपदेति ॥ पादसंख्यामक्षरसंख्यां च प्रशंसति– 'त्रिपदा पुरोनुवाक्या भवति त्रय इमे लोका एष्वेव लोकेषु प्रति तिष्ठति चतुष्पदा याज्या चतुष्पद एव पशूनव रुन्द्धे द्व्यक्षरो वषट्कारो द्विपाद्यजमानः पशुष्वेवोपरिष्टात् प्रति तिष्ठति' इति ॥ पशुषु प्राप्तेषु सत्सु पश्चादेव ब्राह्मणभोजनादौ क्षीरादिकं दातुं तत्पङ्क्तौ द्वाभ्यां पादाभ्यां [७६]स्थिरस्तिष्ठति ॥

गायत्रीति ॥ पूर्वमुक्तं 'सप्तपदां ते शक्करीम्' इति, तत्र पादोदाहरणेन प्रशंसति– 'गायत्री पुरोनुवाक्या भवति त्रिष्टुग्याज्यैषा वै सप्तपदा शक्करी यद्वा एतया देवा अशिक्षन् तदशक्नुवन् य एवं वेद शक्नोत्येव यच्छिक्षति' इति ॥ [v]देवाः यत्कार्यमुद्दिश्य [v]अशिक्षन् शक्ता भवामेत्यैच्छन् । यद्वा–[७७]परस्परमेवं कार्यं कर्तव्यमिति शिक्षितवन्त एतया शक्र्या [७८]ते तत्कार्यं कर्तुं शक्ता अभवन् । एतद्वेदिताऽपि [७९-]यत्कार्यं कर्तुं शक्तिमिच्छति-[७९] [८०-]तस्मिन् कार्ये-[८०] [८१-]शक्तो भवत्येव-[८१] ॥

१४. लं– एषेति । १५. लं– शक्तुम्

७६. ड – स्थिरं तिष्ठति । ७७. – आ.क.ड१ – परस्परमिदं । ७८. ड.ड१ – 'ते' नास्ति । ७९–७९. हो१ – यत्कार्यशक्तिमिच्छते; ड१शृं–'यत्कार्यमुद्दिश्य शक्तिमिच्छति, ड– यत्कार्य-शक्तिमिच्छति । ८०–८०. आ.क– तत्कार्ये । ८१–८१. ड – शक्नोत्येव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदेवमाग्नेयस्य याज्यापुरोनुवाक्ययोर्विधानेन लक्षणेन प्रशंसया च प्राजापत्योपांशुयाजादीनां याज्यानुवाक्याः सर्वा मन्त्रकाण्डाम्नाता [८२]व्याख्याता द्रष्टव्याः। [८३-]ताः वयम् आम्नातक्रमेण[-८३] उदाहृत्याक्षरार्थं वर्णयामः॥

कल्पः— "प्रजापते स वेदेति यस्य प्राजापत्य उपांशुयाजो भवति" इति। पाठस्तु— "प्रजापते न त्वदेतान्यन्यः। विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु। वयꣳ स्याम पतयो रयीणाम्। स वेद पुत्रः पितरꣳ स मातरम्। स सूनुर्भुवत् स भुवत् पुनर्मघः। स द्यामौर्णोदन्तरिक्षꣳ स सुवः। स विश्वा भुवो अभवत् स आऽभवत्" (तैब्रा ३·५·७) इति। हे प्रजापते, त्वदन्यः कोऽपि पुरुष उत्पन्नानि तान्येतानि विश्वानि न परि बभूव [८४]परिभवितुं [८५-]न समर्थोऽभूत्[-८५]। परिभवः सृष्टेरप्युपलक्षणम्। सृष्टिसंहारयोरशक्त इत्यर्थः। अतस्ते तव वयं यत्कामा जुहुमस्तत्फलम् [८६]अस्माकमस्तु। वयं [८७]धनपतयः स्याम। "द्यौः पिता। पृथिवी माता। प्रजापतिर्बन्धुः" (तैब्रा ३·७·५) इति मन्त्रवर्णाद्ब्रह्माण्डमध्ये [८८]सप्तलोके वर्तमानस्य प्रजापतेरण्डस्योपरितनं [८९]कपालं द्यौः पिता। अधस्तनकपालरूपा पृथिवी माता। स पुत्रः प्रजापतिस्तं पितरं तां च मातरं वेत्ति। अभिज्ञः स प्रजापतिः [९०]सूनुर्भवति, [९१]तयोर्मातापित्रोः पुत्रो भवति। अत एव [९२]तयोर्वैदनं [९३]एतस्योपपन्नमेव। मघशब्दो धनवाची। पुनः पुनर्यजमानाय दातव्यं धनं यस्य [९४]असौ पुनर्मघः। [९५]तादृशोऽयं प्रजापतिः भुवद्भवति। किं च स प्रजापतिः [९६]सर्वस्यापि विराड्रूपं धृत्वा द्याम् उपरितनकपालमौर्णोदाच्छादितवान्। [९७]तथाऽन्तरिक्षं स्वर्गं च स और्णोत्। किं च स एव विश्वा भुव इमं लोकमारभ्याधस्तनाः पूर्वा भूमीरभवत् [९८]प्राप्तवान् आच्छादितवानित्यर्थः। किं च सत्यलोके समागत्य चतुर्मुखत्वेन रूपान्तरेण [९९]परिमितोऽभवत्॥

कल्पः— "[१००]तथाऽग्नीषोमा सवेदसा युवमेतानीत्यग्नीषोमीयस्य पुरोडाशस्य" इति। पाठस्तु— 'अग्नीषोमा सवेदसा। सहूती वनतं गिरः। सं देवत्रा बभूवथुः। युवमेतानि दिवि रोचनानि। अग्निश्च सोम सक्रतू अधत्तम्। युवꣳ सिन्धूꣳरभिशस्तेरवद्यात्। अग्नीषोमावमुञ्चतं गृभीतान्" (तैब्रा ३·५·७) इति। हेऽग्नीषोमौ, गिरोऽस्मदीयाः स्तुतीर्वनतं भजतम्। कीदृशौ? सवेदसा समानज्ञानयुक्तौ, सहूती समानाह्वानयुक्तौ, देवत्रा देवेषु मध्ये संबभूवथुः। युवां संभूयैव[१०१] स्थितौ न कदाचिदप्यन्योन्यवियुक्तावित्यर्थः। हे सोम, त्वमग्निश्चेत्येतौ युवां सक्रतू समानसंकल्पौ सन्तौ दिव्येतानि रोचनानि नक्षत्राण्यधत्तमस्थापयतम्। हेऽग्नीषोमौ, युवां गृहीतान् सिन्धून् [१०२]रथ्योदकादिनिमित्तेन अपूतत्वापवादेन पङ्कादिरूपेणावद्येन दोषेण च गृहीताः सर्वा नदीरभिशस्तेस्तस्मादपवादादवद्यात् [१०३]पङ्कादिदुष्टदोषाच्च-अमुञ्चतं मौचितवन्तौ। यद्यप्येतत् सर्वमीश्वरकृतं तथाऽपि [१०४]तद्रूपत्वेनैतौ स्तूयेते॥

---

८२. ड – समाख्याताः। ८३-८३. अ.इ.उ.जो.पा.हा – अस्मदीयक्रमेण; आ.क.हो१– ताः स्वयमाम्नातक्रमेण; शृं– तान् स्वयं क्रमेण। ८४. अ.इ.उ.जो.ना.पा.हा– परिभावितुं। ८५. ड.ड१– समर्थो नाऽभूत्। ८६. अ.इ.उ.जो.ना.पा.हा– अविकृतमस्तु। ८७. ड.ड१.शृं– धनानां पतयः। ८८. आ.क– सत्यलोके। ८९. ड.ड१– कपालरूपा। ९०. ड१– सूनुर्भुवत्। ९१. अ.इ.उ.पा–तयो°। ९२. ड– तयोर्धनं। ९३. आ.क– तस्यो°; ड.ड१– °पपन्नम्। ९४. आ.क– सः। ९५. अ.इ.उ.जो.ना.पा.हा– तादृशो यः। ९६. अ.इ.उ.जो.पा.हा– सर्वस्यापि। ९७. ड१– तदा। ९८. ड१– प्राप्नोत्। ९९. क– आ परितो°; हा– आ परिमितो°। १००. शृं– अथा°। १०१. ड– 'एव' नास्ति। १०२. हो१ – नद्योदकादि°। १०३. हो१ – °दिदोषदुष्टाच्च°; ड. ड१.शृं– °दिदृष्टदोषाच्च। १०४. शृं– °त्वेन तौ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कल्प :- " इन्द्राग्नी रोचना दिवः श्रथद्वृत्रमित्यैन्द्राग्नस्य " इति ॥ पाठस्तु- " इन्द्राग्नी रोचना दिवः । परि वाजेषु भूषथः । तद्वां चेति प्र वीर्यम् । श्रथद्वृत्रमुत सनोति वाजम् । इन्द्रा यो अग्नी सहुरी सपर्यात् । इरज्यन्ता वसव्यस्य भूरेः । सहस्तमा सहसा वाजयन्ता " (तैब्रा ३·५·७) इति । हे इन्द्राग्नी, दिवस्परि [१०५]स्वर्गस्योपरि रोचना दीप्यमानौ युवां वाजेषु यजमानसंबन्धिषवन्नेषु निमित्तभूतेषु भूषथो दातारौ भवितुमिच्छथः । तत् [१०६]भवदीयं [१०७]बुभूषत्वं वां युवयोर्वीर्यं सामर्थ्यं प्रचेति प्रचेतयति प्रकर्षेण ज्ञापयतीत्यर्थः । ' इन्द्रा यो अग्नी ' (तैब्रा ३·५·७) इत्यत्र समस्तं पदं विच्छिद्य मध्ये ' यः ' इति [१०८]पदमाम्नातम् । तथा [१०९]सति हे इन्द्राग्नीति संबोधनं [११०]द्रष्टव्यम् । यो यजमानो वृत्रं विरोधिनं [१११]पाप्मानं श्रथन्निराकरोति, उत [११२-]अपि च-[११२] वाजं हविर्लक्षणमन्नं सनोति ददाति, [११३-]हुरिः कौटिल्यं, तेन सह वर्तमानौ सहुरी-[११३], यजमानस्य श्रद्धाराहित्यादिच्छिद्रान्वेषणेन कुटिलावपि युवां [११४-]सपर्यात् अप्रमत्तो-[११४] यो यजमानः परिचरति, तादृशं यजमानं [११५]युवाम् अनुगृह्णीतमिति शेषः । कीदृशौ युवाम् ? इरज्यन्ता अनुग्रहेण [११६]भक्तचित्तं [११७]रञ्जयन्तौ, भूरेर्बहुलस्य वसव्यस्य धनसमूहस्य, दातारावित्ति शेषः । सहस्तमा अतिशयेन सहिष्णू । सहसा बलवन्तौ । वाजयन्ता वाजं हविर्लक्षणमन्नं यन्तौ प्राप्नुवन्तौ ।

कल्पः- " एन्द्र सानसिꣳ रयिं प्रससाहिषे पुरुहूत शत्रूनित्यैन्द्रस्य यद्वैन्द्रं सांनाय्यम् " इति ॥ पाठस्तु- " एन्द्र सानसिꣳ रयिम् । सजित्वानꣳ सदासहम् । वर्षिष्ठमूतये भर । प्र ससाहिषे पुरुहूत शत्रून् । ज्येष्ठस्ते शुष्म इह रातिरस्तु । इन्द्राऽऽभर दक्षिणेना वसूनि । पतिः सिन्धूनामसि रेवतीनाम् " (तैब्रा ३·५·७) इति । हे इन्द्र, रयिं धनमूतये [११८]अस्मद्रक्षणार्थम् [११९-]आभर आनय-[११९] । कीदृशं धनम् ? सानसिं सनसो दानस्य संबन्धिनं बहुभ्यो दातुं पर्याप्तमित्यर्थः । सजित्वानं जित्वभिः [१२०]जयशीलैः पुत्रादिभिरुपेतम् । सदासहं सर्वदा विरोधिनां सोढारं [१२१]तत्तिरस्कारक्षममित्यर्थः । वर्षिष्ठमतिशयेन प्रवृद्धम् । हे पुरुहूत, पुरुषु बहुषु यज्ञेष्वाहूयमान, शत्रून् प्रकर्षेण ससाहिषे सर्वदा सहसे [१२२]तिरस्कुरुषे इत्यर्थः । ते शुष्मो ज्येष्ठस्तव बलं [१२३]प्रशस्तमित्यर्थः । इहास्मिन् कर्मणि रातिरस्तु फलदानमस्तु । हे इन्द्र, दक्षिणेन हस्तेन वसूनि धनानि [१२४]आभर समानय । [१२५]सिन्धूनां समुद्रसमानानां रेवतीनां [१२६]धनवतीनां प्रजानां पतिरसि ॥

कल्पः-" यद्यु वै माहेन्द्रं महाꣳ इन्द्रो य ओजसा महाꣳ इन्द्रो नृवदा चर्षणिप्रा इति माहेन्द्रस्य " इति । पाठस्तु- " महाꣳ इन्द्रो य ओजसा । पर्जन्यो वृष्टिमाꣳ इव । स्तौमैर्वत्सस्य

---

१०५. अ.इ.उ.पा- विश्वस्योपरि । १०६. आ.क.ड- तदीयं । १०७. अ.इ.उ.जो.ना.पा.हा- विभूषत्वं । १०८. ड-एतत्पद°; ड१- एवमा° । १०९. आ- च । ११०. आ.क- ' द्रष्टव्यम् ' नास्ति । १११. ड१-पार्श्वम् । ११२-११२. आ.क- ' अपि च ' नास्ति । ११३. आ.हा- सहुरी कौटिल्येन सह विद्यमानौ हुरिः कौटिल्यं; क- हुरि...सह विद्यमानौ सहुरी । ११४-११४. हो१- सपर्यात् समन्तात् ; अ.इ.उ.जो.ना.पा.हा- सपर्यादपि च अप्रमत्तो । ११५. आ.क- युवामेव । ११६. ड.ड१- भक्तिचित्तं । ११७. अ.इ.उ.जो.पा.हा.हो१- रक्षयन्तौ । ११८ ड.ड१- अस्मद्रक्षार्थम् । ११९-११९. आ.क- आभराऽऽहराऽऽनय । १२०. ना- जयनशीलैः । १२१. आ- तिरस्कार° । १२२. ड.ड१.शृं. हो१- तिरस्करोषि । १२३. ड.ड१.हो१ - ' इत्यर्थः ' नास्ति । १२४. ड - आहर । १२५. आ-क - सिन्धूनां धनवाहिनीनाम् । १२६. आ.क. धनवतीनां ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वावृधे। महाꣳ इन्द्रो नृवदा चर्षणिप्राः। उत द्विबर्हा अमिनः सहोभिः। अस्मद्रियग्वावृधे वीर्याय। उरुः पृथुः सुकृतः कर्तृभिर्भूत्" (तैब्रा ३·५·७) इति। वृष्टिमान् पर्जन्य इव य इन्द्र ओजसा बलेन महान् सः इन्द्रो वत्सस्थानीयस्य यजमानस्य स्तोमैः [१२७]स्तोत्रैर्वावृधे वर्धताम्। अयं महानिन्द्रो नृवत् मनुष्यवत् आ चर्षणिप्राः, चर्षणीन् मनुष्यान् प्रति [१२८]तदभीष्टभोगैः पूरयतीति [१२९]चर्षणिप्राः। यथा राजामात्यादिमनुष्यः सेवकानभीष्टभोगैरापूरयति तद्वत्। अपि च अयं द्वयोः प्रकृतिविकृतिरूपयोर्यागयोः [१३०]बर्हो [१३१]वृद्धिः यस्येति द्विबर्हाः। अमिन उपमारहितः [१३२]सहोभिर्युक्तो [१३३]बलवान्। अस्मद्रियगस्मत्सदृशो वावृधे वृद्धिं प्राप्तः। यथा वयमस्यानुग्रहाद्वृद्धिं प्राप्तास्तथाऽयमप्यस्मदीयैर्हविर्भिः [१३४]विवृद्धः। एतदेव प्रपञ्च्यते वीर्याय सामर्थ्यसिद्धये। कर्तृभिर्यजमानैरयं सुकृतोऽभूत् सुष्ठु वर्धितोऽभूत्। कीदृशी तस्याभिवृद्धिः? उरुर्यशसा विपुलः। पृथुर्बलेन [१३५]विस्तीर्णः॥ ५

कल्पः— "अथ स्विष्टकृतः पिप्रीहि देवानिति पुरोनुवाक्यामनूच्य ये यजामहेऽग्निꣳ [१३६]स्विष्टकृतमयाडग्निरग्नेरित्युक्त्वा [१३७]यथादेवतं निगदमुक्त्वा जातवेदा जुषताꣳ हविरग्ने [१३८]यदद्य विशो अध्वरस्येत्यृचमनूच्य [१३९]यजति" (द्र. आश्वश्रौ १·६·२-५) इति। तत्र पुरोनुवाक्यायाः पाठस्तु—"पिप्रीहि देवाꣳ उशतो यविष्ठ। विद्वाꣳ ऋतूꣳरृतुपते यजेह। ये दैव्या ऋत्विजस्तेभिरग्ने। त्वꣳ होतृणामस्याऽऽयजिष्ठः" (तैब्रा ३·५·७) इति। [१३९] हे यविष्ठ युवतम [१४०]अग्ने, उशतः कामयमानान् देवान् पिप्रीहि अतिशयेन प्रीणय। हे ऋतुपते सूर्यात्मना कालपरिपालकाग्ने, त्वमृतून् [१४१]यागकालविशेषान् विद्वान् जानन् वर्तसे। तस्मादिहोचिते काले यज। देवेषु भवा ये दैव्या ऋत्विजः सन्ति, "अग्निर्होता। अश्विनाऽध्वर्यू। त्वष्टाऽग्नीत्" (तैआ ३·३) इत्यादिनाऽऽम्नातास्तेभिः दैव्यैः सह त्वमस्य यजमानस्य संबन्धिनां होतृणामृत्विजां मध्य आयजिष्ठः सर्वतो यष्टृतमोऽसि॥ १० १५

निगदपाठस्तु— "अग्निꣳ स्विष्टकृतम्। अयाडग्निरग्नेः प्रिया धामानि। अयाट् सोमस्य प्रिया धामानि। अयाडग्नेः प्रिया धामानि। अयाट् प्रजापतेः प्रिया धामानि। अयाडग्नीषोमयोः प्रिया धामानि। अयाडिन्द्राग्नियोः प्रिया धामानि। अयाडिन्द्रस्य प्रिया धामानि। अयाण्महेन्द्रस्य प्रिया धामानि। अयाड्देवानामाज्यपानां प्रिया धामानि। यक्षदग्नेर्होतुः प्रिया धामानि। यक्षत् स्वं महिमानम्। आयजतामेज्या इषः। कृणोतु सो अध्वरा जातवेदाः। जुषताꣳ हविः" (तैब्रा ३·५·७) इति॥ स्विष्टकृतमग्निम्। 'ये यजामहे' इति शेषः पूरणीयः। ये वयं होतारः स्मस्ते वयं स्विष्टकृतमग्निं यजामहे। प्रथमाज्यभागदेवस्याग्नेर्यानि प्रियस्थानानि तेषु सर्वेषु दैव्यहोतृरूपोऽग्निरयाट् इष्टवान्। एवम् 'अयाट् सोमस्य' इत्यादिषु। २०

---

१२७. ड१— 'स्तोत्रैः' नास्ति। १२८. आ— तदभीष्टदानैर्भोगैः। १२९. ड— 'चर्षणिप्राः' नास्ति। १३०. ड— 'बर्हो' नास्ति। १३१. ड— विवृद्धिः। १३२— ड.ड१.शृं.हो१— सहोभिर्बलैर्युक्तः। १३३. ड.ड१— 'बलवान्' नास्ति। १३४. ड— वृद्धः। १३५. ड.ड१.हो१— विस्तृतः। १३६. क.ड.शृं.हो१— °ग्नेरिति; ड१— °मयाडग्निरिति। १३७. आ.हा— यथादैवतं। १३८–१३८. ड१. शृं—यदद्ये त्यृचं संधाय। १३९. आ— हेऽग्ने। १४०. आ— 'अग्ने' नास्ति। १४१. ड.ड१.शृं.हो१— कालविशेषान्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योज्यम्। देवानामानुपूर्वी चाऽऽवाहननिगदवद्व्याख्येया। होतुरग्नेर्होमस्य स्विष्टकृत्त्वसंपादकस्याग्नेः [१४२]प्रिया धामानि यानि सन्ति तेषु दैव्यो होता यक्षद्यजतु। उक्तानां सर्वेषां देवानां स्वकीयो महिमा योऽस्ति तमुद्दिश्य दैव्यो होता [१४३]यक्षद्यजतु। आयजतामाभिमुख्येन यागं कुर्वतां यजमानानामेज्या आभिमुख्येन यष्टव्या इष अभीष्टा या देवताः सन्ति ताः सर्वा अध्वरा अस्मिन् यज्ञे स जातवेदाः स्विष्टकृत् सोऽग्निः कृणोतु स्विष्टाः करोतु। तदर्थमयं स्विष्टकृदग्निरिदं हविः जुषताम्॥

याज्यायाः पाठस्तु- 'अग्ने यदद्य विशो अध्वरस्य होतः। पावक शोचे वेष्टूवꣳ हि यज्वा। ऋता यजासि महिना वि यद्भूः। हव्या वह यविष्ठ या ते अद्य' (तैब्रा ३·५·७) इति। स्विष्टकृदग्ने विशः प्रविष्टस्यानुष्ठितस्याध्वरस्य संबन्धि यद्धविरस्ति तदद्य वेः, [१४४]वेरित्यशनार्थः, अशान भक्षय। होतर्होमकर्तः पावक शोधक शोचे दीप्यमान। तान्येतान्यग्निविशेषणानि। हि [१४५]यस्मात् त्वं यज्वा यागस्य कर्ता तस्मात् ऋता ऋते अस्मदीये यज्ञे महिना महिम्ना देवान् यजासि प्रीणयसि। यद्यस्मात् कारणाद्विभूर्विशिष्टो भवसि तस्मात् कारणात् हे यविष्ठ युवतम, अद्य ते तव या हव्या यानि हव्यान्यस्माभिर्दीयन्ते तानि सर्वाणि वह स्वीकुरु॥

[१४६-]ता एता-[१४६] उदाहृताः सर्वा याज्यानुवाक्याः [१४७]आग्नेययाज्यालक्षणादिकथनादेव [१४८-]अवगन्तुं शक्या-[१४८] इति मत्वा ब्राह्मणेन न पृथग्व्याख्याताः॥

अत्र मीमांसा॥ दशमाध्यायस्य प्रथमपादे चिन्तितम्-

"[१४९-]आज्यभागो य आग्नेयः किं मुख्याग्नेः स-[१४९] संस्कृतिः।
आरादुतोपकारी स्यात् पूर्वन्यायेन संस्कृतिः॥
निगदेऽग्नेर्द्विरुक्तत्वात् [१५०]विधावेकपदोक्तितः।
उपकारी [१५१]ततः सोऽग्निः सौर्यादौ न निवर्तते"॥ (जैन्या १०·१·१५-१६)॥

दर्शपूर्णमासयोः [१५२]आम्नायते- 'आज्यभागावग्नीषोमाभ्यां यजति' इति। तयोः प्रथम आग्नेयो द्वितीयः सौम्यः। तत्र सौम्यस्य नास्ति संदेहः। प्रधानदेवतासु [१५३]केवलस्य सोमस्य अभावात्। अग्निस्तु केवल [१५४]आग्नेयपुरोडाशे विद्यते। तस्मादाग्नेय आज्यभागः पुरोडाशदेवताया अग्नेः [१५५]किं संस्कार, उत इष्टेरादुपकारक इति संदिह्यते। तत्र [१५६]यथोत्तमप्रयाजो मन्त्रोक्तानां यक्ष्यमाणदेवतानां

---

१४२. आ-प्रिय°। १४३. हा-यक्षद्यजन्तु। १४४. अ.आ.उ.ड.ड१.पा.श्रु.हो१-'वेरित्यशनार्थः' नास्ति। १४५. क.ना.जो.हा- यस्मात् कारणात्। १४६-१४६. आ.क- तावता। १४७. आ. क.ड-°याज्यानुवाक्यादि°। १४८-१४८. आ.क-अवगन्तव्याः। १४९-१४९. इ.पा-आज्यभागे य आग्नेयः किमु लक्षणस्याग्नेः सः; उ- आज्यभागे य आग्नेयः लक्षणस्याग्नेः; अ- आज्यभागे य आग्नेयः लक्षणस्याग्नेः सः। १५०. अ.इ.उ.पा- उभावेक°। १५१. अ.इ.उ.पा.हो१- तेन। १५२. आ.क श्रूयते। १५३. हा- केवल°। १५४. अ इ.पा- आग्नेयेन पुरोडाशेन। १५५. अ.इ.उ.जो.ना.पा.हा-'किं' नास्ति। १५६. अ.उ.पा- उत्तमप्रयाज°; इ- प्रथमोत्तमप्रयाज°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संस्कारस्तथा प्रथमाज्यभागोऽपि 'अग्निमग्न आवह' इति [१५७]निगदोक्तस्य प्रधानयागदेवतारूपस्याग्नेः-[१५७] संस्कार इति पूर्वः पक्षः। अत्रोच्यते – निगदस्तावदेवं पठ्यते – "अग्निमग्न आवह। सोममावह। अग्निमावह" (तैब्रा ३·५·३) इति। [१५८]अस्यायमर्थः– [१५९-]हेऽग्न आहुत्यधिकरणीभूत-[१५९] [१६०]हविर्ग्राहिण [१६१]आज्यभागद्वयाष्टाकपालपुरोडाशदेवतारूपान् '[१६२-]अग्निः सोमोऽग्निः-[१६२]' इत्येतांस्त्रीनिहेष्टावावहेति। तत्र [१६३]पुरोडाशदेवतारूपादग्नेः प्रथमाज्यभागदेवतारूपोऽग्निः [१६४]भिन्नः [१६५]इत्यवगम्यते। अन्यथाऽऽवाह्यस्याग्नेः [१६६]एकत्वे द्विरुक्तिवैयर्थ्यात्। अतः प्रथमाज्यभाग इज्यमानस्याग्नेः पुरोडाशदेवतात्वाभावात् तत्संस्कारत्वमयुक्तम्। किं चाऽऽज्यभागविधौ '[१६७]अग्नीषोमाभ्यां यजति' इति देवताद्वयं [१६८]समस्तैनैकेन पदेनोच्यते। तत्र यथा [१६९]सोमस्य यागं प्रति गुणत्वं भवताऽभ्युपगतं तथाऽग्नेरप्यभ्युपगन्तव्यम्। [१७०]तत्तु संस्कारपक्षे विरुद्धं, [१७१]संस्कार्यत्वेन प्राधान्यावश्यंभावात्। तस्मात् [१७२]संस्कारपक्षासंभवात् प्रथमाज्यभागो द्वितीयाज्यभागवदिष्टेरारादुपकारकः। एवं च सति सौर्ययागेऽपि[१७३] [१७४]प्रथमाज्यभागेऽग्निर्न निवर्तत इति बाधापवादो [१७५]विचारफलं भविष्यति॥

तत्रैव [१७६]चतुर्थपादे चिन्तितम्—

"अन्वाहेत्यर्थकर्म स्यात् संस्कारो [१७७]वाऽर्थकर्मता।
शस्त्रवत् [१७८]कार्यताज्ञानात् दृष्टार्थत्वेन संस्कृतिः"॥ (जैन्या १०·४·३३)॥

"तिष्ठन् याज्यामन्वाहाऽऽसीनः पुरोनुवाक्याम्" (द्र. आपश्रौ २४·१३·१०) इति दर्शपूर्णमासयोः [१७९]आम्नातम्। तदेतच्छस्त्रादिवदर्थकर्म स्यात्। यथा स्तौति शंसतीत्यत्र कर्तव्यताप्रतीतेः स्तोत्रशस्त्रयोरर्थकर्मत्वं तथाऽनुवचनस्यापि। नैवम्। [१८०]चोदितदेवतास्मरणसंस्कारस्य दृष्टप्रयोजनत्वात्॥ तस्मिन् सत्यदृष्टस्य कल्पयितुमशक्यत्वात्। ननु मन्त्रसामर्थ्यादेव [१८१]देवतास्मरणसिद्धेः 'अन्वाह' इति तद्विधानं व्यर्थम्। एवं तर्हि [१८२]प्राप्तमनुवचननूद्य 'तिष्ठन्नासीनः' इति स्थानासनगुणौ [१८३]विधीयेयाताम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे षष्ठप्रपाठके द्वितीयोऽनुवाकः॥ २॥

१५७–१५७. अ.इ.उ.पा– निगदस्य प्रधानयागस्याग्नेः। १५८. ड१– तस्या°। १५९–१५९. ड.ड१–आहुत्यधिकरणभूताग्ने। १६०. अ.इ.उ.पा– हविर्ग्रहणाय; जो.ना.हा– हविर्ग्राहिणं। १६१. जो.हा–°देवतारूपिणं; शृं–°देवरूपान्। १६२–१६२. हा– अग्निं सोममग्निं। १६३. अ.इ.उ.पा–°देवताग्नेः; जो.ना.हा– °देवतारूपाग्नेः। १६४. ड१– अन्यः। १६५. ड१–इति गम्यते। १६६. ड१– एकस्य। १६७. आ.शृं.हा– अग्नीषोमाभ्यामाज्यभागौ। १६८. ड१– °नैकैक°। १६९. अ.इ.उ.जो.पा.हा– सौम्यस्य। १७०. ड२– तच्च। १७१. आ.क– संस्कारत्वे; ड– संस्कार्यत्वे। १७२. अ.इ.उ.पा– संस्कारत्वासंभवात्। १७३. अ.जो.ना.पा.हा– 'अपि' नास्ति। १७४. अ.इ.पा– °भागोऽग्निर्न, हो१– °भागे न। १७५. अ.इ.जो.पा.हा– विचारभावं। १७६. शृं– अन्यत्। १७७. ड.हा.हो१– नार्थ°। १७८. अ.इ.उ.पा.शृं.हो१– कार्यताभावात्, ड१– कार्यताभानात्। १७९. ड.शृं– श्रुतम्। १८०. अ.इ.उ.पा– °देवतास्मरणस्य। १८१. ड– 'एव' नास्ति। १८२. आ.क.जो.हा– प्रागनु°। १८३. अ– विधीयतां; इ.उ.जो.ना.पा.हा– विधीयेतां।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशत् स आत्मन्नाज्यमधत्त तं देवा अब्रुवन्नेष वाव यज्ञो यदाज्यमप्येव नोऽत्रास्त्विति सोऽब्रवीद्यजान् व आज्यभागावुप स्तृणानभि घारयानिति तस्माद्यजन्त्याज्यभागावुप स्तृणन्त्यभि घारयन्ति

प्रजापतिरिति प्रजा-पतिः। देवेभ्यः। यज्ञान्। व्यादिशदिति वि-आदिशत्। सः। आत्मन्। आज्यम्। अधत्त। तम्। देवाः। अब्रुवन्। एषः। वाव। यज्ञः। यत्। आज्यम्। अपीति। एव। नः। अत्र। अस्तु। इति। सः। अब्रवीत्। यजान्। वः। आज्यभागाविति आज्य-भागौ। उपेति। स्तृणान्। अभीति। घारयान्। इति। तस्मात्। यजन्ति। आज्यभागाविति आज्य-भागौ। उपेति। स्तृणन्ति। अभीति। घारयन्ति।

प्रजापतिर्देवेभ्य इत्यादि ॥ [1]यजनसाधनानि हवींषि यज्ञाः, तान् [V]देवेभ्यः विविधमादिश्य [V]आज्यम् आत्मन्येव [V]अधत्त, आज्यव्यतिरिक्तमेव देवेभ्यो ददौ। [2V]तं [V]देवाः प्रजापतिम् [V]अब्रुवन् [V]आज्यम् एव यज्ञसाधनं, तस्मात् [V]अत्र आज्ये अस्माकमपि भागित्वमस्तु [V]एव। यद्वा- अत्रापि भागित्वमस्माकम् [V]अस्तु [V]इति। ततः प्रजापतिः आज्यभागौ उपस्तरणाभिघारणे च देवेभ्यो दत्वा अन्यत् सर्वमात्मार्थं वृतवानिति। सर्वत्र लेटयाडागमः। तस्मादित्यादि। देवानां तृप्त्यर्थम् ॥

आज्यभागौ च याज्यानुवाक्या उक्ता द्वितीयके ॥

तृतीयानुवाके प्रधानभूत आग्नेयपुरोडाशो [1]विधातव्यः।

प्रजापतिरिति ॥ तत्राऽऽदौ तावदुपस्तरणाभिघारणे विधत्ते- "प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशत्। स आत्मन्नाज्यमधत्त तं देवा अब्रुवन्नेष वाव यज्ञो यदाज्यमप्येव नोऽत्रास्त्विति सोऽब्रवीद्यजान व आज्यभागावुप स्तृणानभि घारयानिति तस्माद्यजन्त्याज्यभागावुप स्तृणन्त्यभि घारयन्ति" इति। तवेदं [2]तवेदमित्येवं यज्ञसाधनद्रव्याणि [V]देवेभ्यः विभज्य दत्त्वा आत्मनि आज्यद्रव्यं [V]प्रजापतिः स्थापितवान्। [V]तं प्रजापतिं [V]देवाः [3]एवम् [V]अब्रुवन्-[V]आज्यम् इति यः [4V]एष [5]एव [V]यज्ञः नाम, [6]सर्वेषु [7-]यज्ञियेषु द्रव्येषु घृतस्यैव[-7] सारत्वात्। तस्मादस्माकम् [V]अपि अस्मिन्नाज्ये कियानपि भागः [V]अस्तु [V]इति। ततः [8V]सः प्रजापतिस्तान् देवानेवम् [V]अब्रवीत्-हे देवाः, युष्मानुद्दिश्य यष्टार [V]आज्यभागौ यजन्तु। प्रधाने च हविषि [9-]अधस्तादुपस्तरणमुपर्यभिघारणं कुर्वन्त्विति[-9]। [V]उप [V]स्तृणान् उपस्तृणन्तु। [V]अभि [V]घारयान् अभिघारयन्त्वित्यर्थः। यस्मादेवं [V]तस्मात् [V]आज्यभागौ आज्येन यजेयुः। प्रधानहविषोऽधस्तादुपस्तृणीयुरुपरिष्टात् चाभिघारयेयुः ॥

---

१. लं.हो- यजमान°। २. त्रि.हो-ते।

---

१. आ. क- अभिधातव्यः। २. आ. क- तवेदमिति। ३. ड१- 'एवम्' नास्ति। ४. इ. 'एषः' नास्ति। ५. अ.उ.जो.ना.पा.हा- 'एव' नास्ति। ६. ड- स्वेषु। ७-७. ड.शृं.हो१- यज्ञियद्रव्यैष्वाज्यस्यैव। ८. ड- 'सः' नास्ति। ९-९. ड.शृं.हो१- अधस्तादुपस्तृणन्तु उपरि अभिघारयन्त्विति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मवादिनो वदन्ति कस्मात् सत्याद्यातयामान्यन्यानि हवीꣳष्ययातयाममाज्यमिति प्राजापत्यमि(१)ति ब्रूयादयातयामा हि देवानां प्रजापतिरिति छन्दाꣳसि देवेभ्योऽपाक्रामन्न वोऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुरवत्तमधारयन्

ब्रह्मवादिन इति ब्रह्म-वादिनः। वदन्ति। कस्मात्। सत्यात्। यातयामानीति यात-यामानि। अन्यानि। हवीꣳषि। अयातयाममित्ययात-यामम्। आज्यम्। इति। प्राजापत्यमिति प्राजा-पत्यम् (१)। इति। ब्रूयात्। अयातयामेत्ययात-यामा। हि। देवानाम्। प्रजापतिरिति प्रजा-पतिः। इति। छन्दाꣳसि। देवेभ्यः। अपेति। अक्रामन्। न। वः। अभागानि। हव्यम्। वक्ष्यामः। इति। तेभ्यः। एतत्। चतुरवत्तमिति चतुः-अवत्तम्। अधारयन्।

ब्रह्मवादिन इत्यादि ॥ [v]यातयामानि गच्छता कालेन गतसाराणि। [v]देवानां मध्ये [v]प्रजापतिः [v]अयातयामा, गतेऽपि महति काले अगतसारत्वात्। अन्येषां च मन्वन्तरावधि-कालस्थत्वात् ॥

छन्दाꣳसीत्यादि ॥ पुरोनुवाक्यादिचतुष्टयार्थेन चतुर्गृहीतेन छन्दसां तृप्तिः। गायत्री-त्रिष्टुब्जगत्यनुष्टुभां प्रधानछन्दसां ग्रहणमित्येके ॥

ब्रह्मवादिन इति ॥ तदेतदुपस्तरणादिसाधनमाज्यं प्रशंसति– " ब्रह्मवादिनो वदन्ति कस्मात् सत्याद्यातयामान्यन्यानि हवीꣳष्ययातयाममाज्यमिति प्राजापत्यमिति ब्रूयादयातयामा हि देवानां प्रजापतिरिति " ॥ [v]अन्यानि पुरोडाशचर्वादीनि हवींषि [10]द्वित्रैर्दिवसैः [v]यातयामानि गतसाराणि भवन्ति। [v]आज्यं तु ससारमेव तिष्ठति न तु स्वादिमानं परित्यजति, तत् [11][v]कस्मात् [v]इति [r]ब्रह्मवादिनः परस्परं पप्रच्छुः। तत्र कश्चित् बुद्धिमान् ब्रह्मवादी [v]प्राजापत्यम् एतदाज्यम् [r]इति [r]ब्रूयात्। इन्द्राग्न्यादयो देवाः कल्पे कल्पे विनश्वरत्वात् गतसारास्तेषां मध्ये [r]प्रजापतिः तु [12]जगदीश्वरत्वात् पुनः पुनस्तादृशान् [13]-कल्पान् सृजन्-[13] उपसंहरंश्च यथापूर्वमेव तिष्ठतीत्यगतसारस्तदीयत्वादाज्यमपि सर्वदा ससारम् [r]इति ॥

छन्दाꣳसीति ॥ अत्र हविष उपस्तरणाभिघारणाभ्यां सह चतुरवदानं विधत्ते–' छन्दाꣳसि देवेभ्यो-ऽपाक्रामन्न वोऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुरवत्तमधारयन् पुरोनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुरवत्तं जुहोति छन्दाꣳस्येव तत्प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति " इति ॥ पुरोनुवाक्यादिमन्त्रगतानि यानि गायत्र्यादीनि [r]छन्दाꣳसि तानि हविर्भाग्भ्यः [14][v]देवेभ्यः विमुखानि सन्ति [v]अपाक्रामन् वयं भागरहितानि भूत्वा युष्माकं हव्यानि [r]न [v]वक्ष्यामः [r]इति वदन्ति निर्गतानि। अत्र छन्दःशब्देन तदभिमानिदेवता [15]उच्यन्ते। ततो हविर्भाजो देवाः [r]तेभ्यः [15]-छन्दोभ्यो देवताभूतेभ्यो-[15]

१०. ड.शृं– द्वित्रैर्दिनैर्यात°। ११. ड.ड१.शृं– कस्मात् कारणादिति। १२. ड.ड१.शृं– जगदीश्वरः। १३–१३. आ.क– उत्पादयन्; हो१– सृजन्; शृं– कालान् सृजन्। १४. क.ड.हा. हो१– देवताभ्यः। १५. ड.ड१.शृं– विवक्ष्यन्ते। १६–१६. ड.ड१–शृं– छन्दोदेवेभ्यः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुरोनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुरवत्तं जुहोति छन्दाꣳस्येव तत् प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्त्यङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायन् तदृषयो यज्ञवास्त्वभ्यवायन् ते(२)ऽपश्यन् पुरोडाशं कूर्मं भूतꣳ सर्पन्तं तमब्रुवन्निन्द्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्वेति स नाध्रियत तमब्रुवन्नग्नये ध्रियस्वेति सोऽग्नयेऽधियत यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति सुवर्गस्य लोकस्याभिजित्यै

पुरोनुवाक्याया इति पुरः– अनुवाक्यायै। याज्यायै। देवतायै। वषट्कारायेति वषट्-काराय। यत्। चतुरवत्तमिति चतुः– अवत्तम्। जुहोति। छन्दाꣳसि। एव। तत्। प्रीणाति। तानि। अस्य। प्रीतानि। देवेभ्यः। हव्यम्। वहन्ति। अङ्गिरसः। वै। इतः। उत्तमा इत्युत्-तमाः। सुवर्गमिति सुवः– गम्। लोकम्। आयन्। तत्। ऋषयः। यज्ञवास्त्विति यज्ञ-वास्तु। अभ्यवायन्नित्यभि-अवायन्। ते (२)। अपश्यन्। पुरोडाशम्। कूर्मम्। भूतम्। सर्पन्तम्। तम्। अब्रुवन्। इन्द्राय। ध्रियस्व। बृहस्पतये। ध्रियस्व। विश्वेभ्यः। देवेभ्यः। ध्रियस्व। इति। सः। न। अध्रियत। तम्। अब्रुवन्। अग्नये। ध्रियस्व। इति। सः। अग्नये। अधियत। यत्। आग्नेयः। अष्टाकपाल इत्यष्टा-कपालः। अमावास्यायामित्यमा-वास्यायाम्। च। पौर्णमास्यामिति पौर्ण-मास्याम्। च। अच्युतः। भवति। सुवर्गस्येति सुवः– गस्य। लोकस्य। अभिजित्या इत्यभि-जित्यै।

अङ्गिरसो वा इत्यादि॥ आग्नेयस्याष्टाकपालस्य विधिः। गतेष्वङ्गिरःसु तेषां ᵛयज्ञवास्तु अभ्यागताः ᵛऋषयः कूर्मरूपिणं ᵛसर्पन्तं च्यवमानं स्वर्गादवपतन्तं ᵛपुरोडाशम् ᵛअपश्यन्। तमित्यादि। ᵛध्रियस्व अवतिष्ठस्व। अच्युत इति। आग्नेयस्याच्युतत्वात् स्वर्गस्याभिजयः॥

भागत्वेन ᵛचतुरवत्तं दत्तवन्तः। तत्र [१७]पुरोनुवाक्यादिशब्दाभिधेयाः [१८-१८]छन्दोभिमानिन्यः। आहुत्याधारभूतोऽग्निर्देवताशब्देनोच्यते[१८]। यस्मादेवं [१९]तस्मादेतच्छन्दसां प्रीत्यै ᵛचतुरवत्तं जुहुयात्। तेन ᵛप्रीतानि छन्दांसि हविर्भागभ्यः ᵛदेवेभ्यः ᵛहव्यं ᵛवहन्ति॥

अङ्गिरस इति॥ अथाऽऽग्नेयं पुरोडाशं विधत्ते– 'अङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायन् तदृषयो यज्ञवास्त्वभ्यवायन् तेऽपश्यन् पुरोडाशं कूर्मं भूतꣳ सर्पन्तं तमब्रुवन्निन्द्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्वेति स नाध्रियत तमब्रुवन्नग्नये ध्रियस्वेति सोऽग्नयेऽधियत यदाग्नेयोऽष्टाकपालोमावास्यायां च पौर्णमास्यां चाच्युतो भवति सुवर्गस्य लोकस्याभिजित्यै" इति॥ अङ्गिरो नामका ऋषय

---

१७. ड– °वाक्याशब्दा°। १८–१८. ड.ड१. हो – छन्दोभिमानिन्याहुत्याधारभूताग्निदेवता या इत्यनेन विवक्ष्यते; शृं– छन्दोभिमानिन्यः आहुत्याधारभूतोऽग्निः देवताया इत्यनेन शब्देन विवक्ष्यते। १९. अ.इ.उ.जो.पा.हा– °छन्दसः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तमब्रुवन् कथाऽहास्था इत्यनुपाक्तोऽभूवमित्यब्रवीद्यथाऽक्षोऽनुपाक्तोऽवार्छत्येवमवाऽऽरमित्युपरिष्टादभ्यज्याधस्तादुपानक्ति सुवर्गस्य लोकस्य समष्टयै सर्वाणि कपालान्यभि प्रथयति तावतः पुरोडाशान्मुष्मिँल्लोकेऽभि जयति

तम्। अब्रुवन्। कथा। अहास्थाः। इति। अनुपाक्त इत्यनुप-अक्तः। अभूवम्। इति। अब्रवीत्। यथा। अक्षः। अनुपाक्त इत्यनुप-अक्तः (३)। अवार्छतीत्यव-ऋच्छति। एवम्। अवेति। आरम्। इति। उपरिष्टात्। अभ्यज्येत्यभि-अज्य। अधस्तात्। उपेति। अनक्ति। सुवर्गस्येति सुवः-गस्य। लोकस्य। समष्टया इति सम्-अष्टयै। सर्वाणि। कपालानि। अभीति। प्रथयति। तावतः। पुरोडाशान्। अमुष्मिन्। लोके। अभीति। जयति।

तमित्यादि ॥ अभ्यज्यमानोऽपाञ्जनहेतुः। केन हेतुना त्वम् [v]अहास्थाः यज्ञसकाशात् प्रच्युतोऽसि। अवार्छतीति। अवपत्तिः। अवाच्छतेः पाघ्रादिना (पा ७·३·७८) ऋच्छादेशः। "उपसर्गादति धातौ" (पा ६·१·९१) इति वृद्धिः। अवारमिति। "सर्तिशास्त्यर्तिभ्यश्च" (पा ३·१·५६) इत्यङ् ॥

अभि प्रथयतीति ॥ [v]सर्वाणि [v]कपालानि [३v]अभि व्याप्नोति तथा पृथूकरोति। तावत इति। [४v]यावन्ति कपालनि [v]अभिप्रथयति तावत्संख्यान् [v]पुरोडाशान् [v]अमुष्मिन् [v]लोके इष्टसाधनत्वेन प्राप्नोति ॥

[v]इतः भूलोकात् [v]उत्तमाः उद्गततमाः त्वरया निर्गताः स्वर्गं प्राप्ताः। तत्र स्वर्गे [२०]ते [v]ऋषयः [v]यज्ञवास्तु यज्ञभूमिमभिलक्ष्य समागताः। तस्यां भूमौ पुरोडाशाभिमानी देवः स्वशरीरमन्तर्धाय [२१]कूर्मशरीरी भूत्वा प्रकर्षेण [२२]पलायते। [v]तं दृष्ट्वा ते ऋषयः [v]अब्रुवन्–इन्द्रादीनां मध्येऽन्यतमस्मै(माय) [२३]त्वा दास्यामस्त्वं [v]ध्रियस्व त्वमवतिष्ठस्वेति। ततः [v]सः पुरोडाशः [v]न अतिष्ठत्। अग्न्यर्थं तिष्ठेत्युक्ते स्थितवान्। अतो दिनद्वयेऽपि [v]अष्टाकपालः पुरोडाशः [v]आग्नेयः [v]अच्युतः कर्तव्यः। तेन स्वर्गाभिजयो भवतीति ॥

तमिति ॥ [२४]अथ कपालेभ्य उद्वासितस्य पुरोडाशस्याभ्यञ्जनोपाञ्जनरूपमलंकरणं विधत्ते–'तमब्रुवन् कथाऽहास्था इत्यनुपाक्तोऽभूवमित्यब्रवीद्यथाऽक्षोऽनुपाक्तोऽवार्छत्येवमवाऽऽरमित्युपरिष्टादभ्यज्याधस्तादुपानक्ति सुवर्गस्य लोकस्य समष्टयै' इति ॥ [v]तं पुरोडाशं ते ऋषयः [v]अब्रुवन्। केन हेतुना त्वम् [v]अहास्थाः [२५]यज्ञदेशं [२६]परित्यक्तवानसि। ततः पुरोडाशः [v]अब्रवीत्– [v]अनुपाक्तः [v]अभूवम् [२७]अञ्जनकृतालंकरणरहितः अभूवम्, तस्मात् त्यक्तवानस्मि। [v]यथा लोके शकटस्य [v]अक्षः अञ्जनरहितः [v]अवार्छति विनश्यति, [v]एवम् अहमप्यञ्जनरहितः [v]अवाऽऽरं विनष्टोऽस्मि [v]इति। तस्मात् पुरोडाशम् [v]उपरिष्टात् [v]अधस्तात् चाज्येनालं कुर्यात्। तेन स्वर्गस्य सम्यक् [२८]अष्टिः प्राप्तिः[२८] भवति ॥

३. पं२– यथा; हो–'अभि' नास्ति। ४. हो–'यावन्ति' इत्यस्यानन्तरम् 'इति'।

२०. ड१– 'ते' नास्ति। २१. ड१– कर्मशरीरः। २२. आ.क– पलायत हा– पलायन्त; ड.हो१– पलायन्तं। २३. ड.ड१– त्वाम्। २४. अ.इ.उ.जो.ना.पा.हा– अष्टा°। २५. ड.हो१–देशं। २६. अ.इ.उ.जो.ना.पा.हा– परित्यज्यागतवानसि। २७. ड१– °कृतालङ्कारहितः। २८–२८. आ. ड.हो.हो१– व्याप्तिः; ड१– अवाप्तिः, क– प्राप्तिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यो विदग्धः स नैर्ऋतो योऽशृतः स रौद्रो यः शृतः स सदेवस्तस्माद्विदहता शृतंकृत्यः सदेवत्वाय भस्मनाऽभि वासयति तस्मान्माꣳसेनास्थि छन्नं वेदेनाभि वासयति तस्मात् (४) केशैः शिरश्छन्नं

यः । विदग्ध इति वि - दग्धः । सः । नैर्ऋत इति नैः - ऋतः । यः । अशृतः । सः । रौद्रः । यः । शृतः । सः । सदेव इति स - देवः । तस्मात् । अविदहतेत्यवि - दहता । शृतंकृत्य इति शृतं - कृत्यः । सदेवत्वायेति सदेव - त्वाय । भस्मना । अभीति । वासयति । तस्मात् । माꣳसेन । अस्थि । छन्नम् । वेदेन । अभीति । वासयति । तस्मात् (४) । केशैः । शिरः । छन्नम् ।

[V]विदग्धः विरूपो दग्धः, अतिदग्धो वा । [V]अशृतः अपक्वः । [V]शृतः सुष्ठु पक्वः [V]सदेवः देवयोग्यः । शृतंकृत्य इति । सुष्ठु पक्तव्यः । शृतमिति [५]तु मकारान्तो निपातः । "विभाषा कृवृषोः" (पा ३·१·१२०) इति क्यप् ॥

अभितश्छादनमभिवासनम् ॥

सर्वाणीति ॥ अथोद्वासनात् पुरा कपालेषु स्थापितस्य हस्तेन [२१]प्रसारणं विधत्ते– 'सर्वाणि कपालान्यभि प्रथयति तावतः पुरोडाशानमुष्मिँल्लोकेऽभि जयति' इति । यावन्ति कपालानि स्थापितानि [३०]तावन्ति [V]सर्वाणि यथा [३१]व्याप्नोति तथा प्रसारयेत् । तथा सति [३२-]कपालसंख्यया संख्यातान् बहून्[-३२] [V]पुरोडाशान् [३३]इष्टसाधनत्वेन स्वर्गे प्राप्नोति ॥

य इति ॥ पाके सौकर्यविशेषं विधत्ते– 'यो विदग्धः स नैर्ऋतः योऽशृतः स रौद्रो यः शृतः स सदेवस्तस्मादविदहता शृतंकृत्यः सदेवत्वाय' इति ॥ विपरीतत्वेन दग्धः [V]विदग्धः, क्वचित् [३४-]पक्वः क्वचिदपक्व[-३४] इति वाऽऽमभावेन विपरीतत्वम्, तादृशो राक्षसप्रियः । [V]अशृतः अपक्वो रुद्रस्य प्रियः । सुष्ठु पक्वो देवप्रियः । तस्माद्विपरीतदाहमकुर्वता [३५-]पुरुषेण पुरोडाशः[-३५] [V]शृतंकृत्यः सम्यक् पक्वो यथा भवति तथा कर्तव्यः । तथा सति देवप्रियो भवति ॥

भस्मनेति ॥ यदुक्तं सूत्रकारेण– "सं ब्रह्मणा पृच्यस्वेति वेदेन पुरोडाशे साङ्गारं भस्माध्यूहति" (आपश्रौ १·२५·१२) इति, तदेतद्विधत्ते– 'भस्मनाऽभि वासयति तस्मान्माꣳसेनास्थि छन्नं वेदेनाभि वासयति तस्मात् केशैः शिरश्छन्नम्' इति । [३६]पक्वस्य कठिनस्य पुरोडाशस्योपरि [V]भस्मना आच्छादनमस्थ उपरि मांसाच्छादनमिव भवति । [३७]आच्छादनकाले [३८]वेदगतदर्भनाडीसंस्पर्शेन [३९]केशच्छन्नशिर इव

५. हो– 'तु' नास्ति ।

२९. हो– प्रथनम्, हा– प्रसरणं, अ.इ.उ.जो.पा– प्रत्यासरणं । ३०. ड.ड१– तानि । ३१. आ.क.ड१– श्नुं– अभिव्याप्नोति । ३२–३२. आ.श्नुं– कपालसंख्यान्; अ.इ.उ.जो.पा.हा– कपालसंख्या बहून्; क.ड.ना.हो१–कपालसंख्याकान् बहून् । ३३. आ.क.ना– निर्वृतिसाध°; अ.इ.उ.जो.पा.हा–निर्वृत्यसाध° । ३४–३४. ड.ड१.श्नुं.हो१–पाकः क्वचिदपाकः । ३५–३५. आ.हा– पुरोडाशः; ड.श्नुं– पुरुषेण । ३६. ड१–'पक्वस्य' नास्ति । ३७. ड.ड१–छादन° । ३८. अ.इ.उ.जो.ना.पा.हा– °सस्पर्शनं; °संपर्केण । ३९. आ.ड.हो१– केशच्छन्नं शिरः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रच्युतं वा एतदस्माल्लोकादगतं देवलोकं यच्छृतꣳ हविरनभिघारितमभिघार्योद्वासयति देवत्रैवैनद्गमयति यद्येकं कपालं नश्येदेको मासः संवत्सरस्यानवेतः स्यादथ यजमानः प्र मीयेत यद्द्वे नश्येतां द्वौ मासौ संवत्सरस्यानवेतौ स्यातामथ यजमानः प्र मीयेत संख्यायोद्वासयति यजमानस्य (५) गोपीथाय

प्रच्युतमिति प्र - च्युतम्। वै। एतत्। अस्मात्। लोकात्। अगतम्। देवलोकमिति देव - लोकम्। यत्। शृतम्। हविः। अनभिघारितमित्यनभि - घारितम्। अभिघार्येत्यभि - घार्य। उदिति। वासयति। देवत्रेति देव - त्रा। एव। एनत्। गमयति। यदि। एकम्। कपालम्। नश्येत्। एकः। मासः। संवत्सरस्येति सं - वत्सरस्य। अनवेत इत्यनव - इतः। स्यात्। अथ। यजमानः। प्रेति। मीयेत। यत्। द्वे इति। नश्येताम्। द्वौ। मासौ। संवत्सरस्येति सं - वत्सरस्य। अनवेतावित्यनव - इतौ। स्याताम्। अथ। यजमानः। प्रेति। मीयेत। संख्यायेति सं - ख्याय। उदिति। वासयति। यजमानस्य (५)। गोपीथाय।

प्रच्युतमित्यादि ॥ गतम्। देवत्रेति। " देवमनुष्य° " (पा ५.४.५६) इत्यादिना द्वितीयान्तात् त्राप्रत्ययः ॥

यद्येकमित्यादि ॥ कपालानां [६]संख्ययोद्वासनविधिः। [७]अनवेतः अनवगतः अन्यून इति यावत्। [७][७]संख्यया उद्वासनं [७]यजमानस्य रक्षार्थम् ॥

भवति। पौरोडाशिककाण्डे विद्यमानस्यापि [४०]अस्य विधेरत्रोपन्यासः [४१]प्रत्यभिज्ञानार्थः। यद्वा— [४२-]ब्राह्मणयोः उभयोः[-४२] शाखाभेदमभिप्रेत्येयमीदृशी पुनरुक्तिः परिहर्तव्या ॥

प्रच्युतमिति ॥ पूर्वमवदानकालेऽभिघारणं विहितमिदानीमुद्वासनकालीनमभिघारणं विधत्ते— 'प्रच्युतं वा एतदस्माल्लोकादगतं देवलोकं यच्छृतꣳ हविरनभिघारितमभिघार्योद्वासयति देवत्रैवैनद्गमयति' इति ॥ हविषो मन्त्रेण पाके सति लौकिकत्वमपेतमिति [ए]अस्मात् [ए]लोकात् प्रच्युतिः। अभिघारणाभावे शास्त्रीयत्वमसंपूर्णमिति स्वर्गाप्राप्तिः। तस्माच्छास्त्रीयत्वसंपूर्त्यर्थमाज्येन [ए]अभिघार्य पश्चादुद्वासयेत्। तथा सति देवेषु [ए]एनत् हविः प्रापितं भवति ॥

यदीति ॥ कपालानामुद्वासनकाले गणनां विधत्ते— 'यद्येकं कपालं नश्येदेको मासः संवत्सरस्यानवेतः स्यादथ यजमानः प्र मीयेत यद्द्वे नश्येतां द्वौ मासौ संवत्सरस्यानवेतौ स्यातामथ यजमानः प्र मीयेत संख्यायोद्वासयति यजमानस्य गोपीथाय' इति ॥ एककपालनाशेन [ए]मासः एको न्यूनो भवेत्। ततो [ए]यजमानः [४३]म्रियेत। तथा [४४]द्विकपालनाशेनापि। अतः [ए]यजमानस्य रक्षणाय गणयेत् ॥

---

६. तं३.त्रि.पं२,मै४.लं–संख्यायो°। ७. तं३.त्रि.पं२.लं.ह्रो– संख्यायो°।

---

४०. आ.क– 'अस्य' नास्ति। ४१. ड.ड१– °भिज्ञार्थः। ४२–४२. ह्रो१– ब्राह्मणयोरिह; आ.क.ड– ब्राह्मणयोः। ४३. आ.ड.ड१.पा.शृं.ह्रो१– म्रियते। ४४. क.ड.ड१.ना.शृं ह्रो१– °नाशेऽपि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदि नश्येदाश्विनं द्विकपालं निर्वपेद्द्यावापृथिव्यमेककपालमश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोति द्यावापृथिव्य एककपालो भवत्यनयोर्वा एतन्नश्यति यन्नश्यत्यनयोरेवैनद्विन्दति प्रतिष्ठित्यै ॥ ३ ॥

[प्राजापत्यं तेऽक्षोऽनुपाक्तो वेदेनाभि वासयति तस्माद्यजमानस्य द्वात्रिंशच्च ।]

यदि । नश्येत् । आश्विनम् । द्विकपालमिति द्वि - कपालम् । निरिति । वपेत् । द्यावापृथिव्यमिति द्यावा-पृथिव्यम् । एककपालमित्येक-कपालम् । अश्विनौ । वै । देवानाम् । भिषजौ । ताभ्याम् । एव । अस्मै । भेषजम् । करोति । द्यावापृथिव्य इति द्यावा - पृथिव्यः । एककपाल इत्येक - कपालः । भवति । अनयोः । वै । एतत् । नश्यति । यत् । नश्यति । अनयोः । एव । एनत् । विन्दति । प्रतिष्ठित्या इति प्रति - स्थित्यै ॥ ३ ॥

[कासं ३१·७; शब्रा १·६·१·२०-२·३; २·२·१६]

प्रमादाद्विनाशे अश्विनादिविधिः । गतमन्यत् । इष्टयन्तभाविनोऽपि हविःश्रपणान्ते प्रासङ्गिकमुद्वासनस्यामननम् ॥

इति द्वितीये षष्ठे तृतीयोऽनुवाकः ॥

यदीति ॥ अथ [४५-४५]प्रमादादिना नाशे[४५-४५] प्रायश्चितं विधत्ते– 'यदि नश्येदाश्विनं द्विकपालं निर्वपेद्द्याव्यापृथिव्यमेककपालमश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोति द्यावापृथिव्य एककपालो भवत्यनयोर्वा एतन्नश्यति यन्नश्यत्यनयोरेवैनद्विन्दति प्रतिष्ठित्यै" इति ॥ स्पष्टोऽर्थः ॥

अत्र मीमांसा । [४६]प्रथमाध्यायस्य चतुर्थपादे चिन्तितम्—

"यदाग्नेयोऽष्टाकपाल इति नाम गुणोऽथवा ।
नामाग्निहोत्रवन्नैवं नामत्वे देवता न हि ॥
मन्त्रो हि नेह प्रत्यक्षस्तद्धितादेवताविधिः ।
देवद्रव्यविशिष्टस्य विधानादेकवाक्यता" ॥ (जैन्या १·४·१९-२०) ॥

दर्शपूर्णमासयोः श्रूयते– "यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति" (तैसं २·६·३) इति । तत्र यथाऽग्निहोत्रशब्दः 'अग्नये होत्रमत्र' इत्यमुमर्थं निमित्तीकृत्य कर्मनामधेयं तथाऽऽग्नेयशब्दोऽप्यग्निसंबन्धं निमित्तीकृत्य कर्मनाम स्यादिति चेत् । नैवम् । नामत्वे देवताराहित्यप्रसङ्गात् । अग्निहोत्रे तु– 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति इति सायं जुहोति' (द्र.मैसं १·८·१, शब्रा २·३·१-३०) इत्यनेन [४७]वचनेन विहितो मन्त्रः [४८]प्रत्यक्ष इति मान्त्रवर्णिकी देवता लभ्यते । इह तु न तादृशो मन्त्रोऽस्ति । आग्नेयशब्दस्तु देवतां विधातुं शक्नोति । अग्निर्देवताऽस्येत्यस्मिन्नर्थे तद्धितस्योत्पन्नत्वात् । न च द्रव्यदेवतयोरुभयोर्गुणयोर्विधानाद्वाक्यभेद इति [४९]शङ्कनीयम् । कर्मणोऽप्राप्तत्वेन [५०]द्रव्यदेवतारूपगुणद्वयविशिष्टस्य कर्मणो [५१-५१]एकेन वाक्येन विधानात्[५१-५१] । तस्मादाग्नेयशब्देन देवतागुणो विधीयते ॥

तृतीयाध्यस्य चतुर्थपादे चिन्तितम्—

"यागे हविर्यजेत् कृत्स्नं कोऽप्यंशः शिष्यतेऽथवा ।
देवार्थत्वाद्यजेत् सर्वं शिष्यते द्विरवत्ततः ॥" (जैन्या ३·४·३४) ॥

४१-४५. ड.ड१.शृं–प्रमादात् विनाशे । ४६. हा– प्रथमस्य । ४७. हो१– 'वचनेन' नास्ति । ४८. क.जो.ना.हा–प्रत्यक्षविहितः । ४९. आ.हा– वाच्यम् । ५०. क.ड.ड१.शृं.हो१–गुणद्वयविशिष्टस्य । ५१-५१. आ–विधानादेकवाक्यत्वोपपत्तेः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

"आग्नेयोऽष्टाकपालः" (तैसं २·६·३) इत्यत्र कृत्स्नोऽपि पुरोडाशोऽग्नये त्यक्तव्यः, तद्धितेन [५२]कृत्स्नस्याग्निदेवतासंबन्धावगतेः [५३]त्यागमन्तरेण तदनुपपत्तेरिति। चेत्। [५४]न। 'द्विर्हविषोऽवद्यति' (द्र. शब्रा १·६·१-२१) इत्यवदानद्वयं श्रूयते। अवदेयं चाङ्गुष्टपर्वमात्रम्। तथा च [५५]कल्पसूत्रकारः— "आग्नेयस्य [५६]पुरोडाशस्य मध्यादङ्गुष्टपर्वमात्रमवदानं तिरश्चीनमवद्यति" (आपश्रौ २·१८·१०) इति। [५७]तत्र हविषः [५८]सकाशादङ्गुष्टपर्वद्वयमात्रं [५९]खण्डयित्वा त्यक्तव्यम्। इतरच्छेषणीयम्। देवतासंबन्धः [६०]चांशद्वाराऽप्युपपद्यते॥ ५

[६१]दशमाध्यायस्याष्टमपादे चिन्तितम्—

"चतुर्द्विर्वा [६२-]पुरोडाशेऽवदानं होम्यतोक्तितः[-६२]।
चतुर्मैवं सहाऽऽज्येन सिद्धस्यान्नानुवादतः॥" (जैन्या १०·८·२३)॥

दर्शपूर्णमासयोराम्नायते— "चतुरवत्तं जुहोति" इति। तत्र किं [६३]पुरोडाशद्रव्यगतस्यावदानस्य चतुःसंख्या। किं वा तत्र द्विसंख्या, चतुष्ट्वं [६४]तूपस्तरणाभिघारणार्थाभ्याम् [६५]आज्यावदानाभ्यां सह संपद्यत इति संशयः। तत्र चतुरवत्तस्य द्वितीयाविभक्त्या होमकर्मत्वम् [६६]उच्यते। न चोपस्तरणाद्यर्थस्य [६७]आज्यस्य होमकर्मत्वमस्ति, तस्मात् [६८-]पुरोडाशावदानस्यैव चतुर्वारत्वमिति प्राप्ते ब्रूमः—न तावदत्र होमानुवादेन चतुरवत्तत्वं विधीयते। होमस्याप्राप्तत्वात्। नाऽपि विशिष्टविधिः, गौरवप्रसङ्गात्। होममात्रविधाने तु चतुरवत्तत्वम् अनुवाद्यम्। तच्चाज्येन सहितस्यैव युक्तम्। 'द्विर्हविषोऽवद्यति' इति विधिना पुरोडाशावदाने द्वित्वस्यैव प्राप्तत्वात्। तस्मात् द्विरवदानम्[-६८]॥ १०, १५

पञ्चमाध्यायस्य चतुर्थपादे [६९]चिन्तितम्—

"अवदानादिसांनाय्ये पूर्वमाग्नेयकेऽथ वा।
धर्मप्रवृत्तिक्रमतः सांनाय्ये पूर्वतोचिता॥
[७०]प्रदानं [७१]पूर्वमाग्नेयेऽवदानं [७२]च [७३]तथोचितम्।
अङ्गानां मुख्यतन्त्रत्वात् मुख्यक्रमबलत्वतः"॥ (जैन्या ५·४·३-४)॥ २०

दर्शपूर्णमासयोः सांनाय्यधर्मा वत्सापाकरणदोहनादयः प्रथममाम्नाताः पुरोडाशधर्मा निर्वापावघातादयः पश्चादाम्नाताः। [७४]ततश्च [७५]तेनैव पाठक्रमेण धर्मानुष्ठानं प्रवृत्तम्। [७६]ततः [७७]प्रावृत्तिक्रक्रमेणावदानमपि सांनाय्ये पूर्वमेव कर्तव्यमिति प्राप्ते ब्रूमः— याज्यानुवाक्यादिमन्त्रबलादाग्नेये पूर्वं प्रदानमित्युक्तम्। तच्च प्रदानं फलप्रत्यासत्त्या मुख्यम्, अवदानं तु तदङ्गम्। तथा सति मुख्यस्य क्रममनुसृत्यावदानमप्याग्नेये पूर्वं कर्तव्यम्। मुख्यक्रमो हि प्रावृत्तिक्रक्रमात् प्रबलः। प्रावृत्तिके हि क्रमे सांनाय्ये पूर्वमेवावदान- २५

---

५२. श्रृं– कृत्स्नाग्नि°। ५३. हो१– तत्र याग°। ५४. ड१– मैवम्; ड.श्रृं– नैवम्। ५५. आ.क – सूत्रकारः। ५६. अ.आ.इ.क.पा हा – पुरोडाश°। ५७. ड१ – ततः। ५८. आ.क – °पर्वमात्रद्वयं। ५९. आ.क – त्रोटयित्वा। ६०. ड.ड१.श्रृं – °द्वारेणाऽप्युप°। ६१. हा – दशमस्या°। ६२-६२. जो– °दाने होमतोक्तितः; ना– °दानं हौम्यतोक्तितः; क.हा– °दानं होमतोक्तितः हो१– °दानं होष्यतोक्तितः। ६३. आ– °स्यावत्तस्य; हो१ पुरोडाशछद्मगत°। ६४. आ.क– °धारणाभ्याम्। ६५. आ.हा– °वत्ताभ्यां। ६६. ड१– अस्ति। ६७. आ.क– 'आज्यस्य' नास्ति। ६८-६८. आ.क– पुरोडाशावदाने चतुःसंख्येति प्राप्ते ब्रूमः उपस्तरणाभिघारणाभ्यामवदानाभ्यां प्रसिद्धं चतुरवत्तमनूद्य होमस्य विधानाद्धविषो मध्यात् पूर्वार्धादिति द्विरवदानस्यैव प्राप्तिः। तस्मात् द्विर्हविषोऽवदानम्। ६९. आ– 'चिन्तितम्' नास्ति। ७०. हो१– प्रधानं। ७१. अ.इ.उ.पा– °माग्नेयावदानं; हो१– °माग्नेये त्ववदानं। ७२. अ.इ.उ.क.ड१.जो.ना.पा.श्रृं.हा– तु। ७३. अ.इ.उ.जो.पा.हा– यथोचितं। ७४. ड.ड१.श्रृं.हो१– 'ततश्च' नास्ति। ७५. अ.इ.उ.जो.पा.हा – 'एव' नास्ति। ७६. अ.इ.उ.जो.पा.हा– कर्मतः। ७७. अ.इ.उ.जो.पा. हा– प्रवृत्ति°। ३०, ३५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मभिधारणमासादनं[७८] च कृत्वा [७९]प्रदानमकृत्वैवाऽऽग्नेयेऽवदानादीनि कर्तव्यानि । तथा सति सांनाय्ये अनुष्ठितानि अवदानादीन्यङ्गानि [८०]मुख्यप्रदानाद्विप्रकृष्यन्ते । मुख्यक्रमाश्रयणे तु आग्नेये प्रथममवदानादिप्रदानान्तं कृत्वा पश्चात् सांनाय्ये तदनुष्ठीयते । तत्र [८१]नास्त्यङ्गाङ्गिविप्रकर्षः । नन्ववदानादिप्रदानान्त एकः पदार्थ इत्युक्तम् । तत्र कुतः क्रमविचारः । एवं तर्हि कृत्वाचिन्ताऽस्तु । अथवा [८२]स्विष्टकृदवदानादिविषयेयं चिन्ताऽस्तु ॥

द्वितीयपादे चिन्तितम्—

" अवदानेऽनुसमयो होमान्ते वाऽवदानके ।
पदार्थत्वं विधेयत्वात् तेनानुसमयस्ततः ॥
[८३]अवद्यतिः प्रदानान्तोऽवदानस्य [८४]तदर्थतः ।
अतोऽनुसमयस्तत्र होमान्तान्न तु केवलात् " ॥ (जैन्या ५·२·६-७) ॥

दर्शपूर्णमासयोः ' द्विर्हविषोऽवद्यति ' (द्र. शब्रा १·६·१·२१) इत्येकेन विधिना विहितत्वात् द्विसंख्या विशिष्टमवदानमेकः पदार्थः । ततस्तेनावदानमात्रेणानुसमयः [८५]कर्तव्यः । आग्नेयस्य द्विरवदानं कृत्वा तद्धोमात् प्रागेवाग्नीषोमीयस्य द्विरवदानमिति प्राप्ते ब्रूमः–अवदानं तु होमपर्यन्तमेकः पदार्थः । होमस्यावदानमन्तरेण अनुपपत्तेर्होमविधिनैवाक्षिप्तं [८६]होमार्थमवदानम् । अत एव ' चतुरवत्तं जुहोति ' (तैसं २·६·३) इत्येकेन विधिना [८७]सावदानक एको[८७] होमपदार्थो विहितः । उपस्तरणाभिघारणाभ्यां [८८]सह यच्चतुरवत्तं तस्मिन् हविर्विषयम् अवदानद्वित्वं विधातुं ' द्विर्हविषोऽवद्यति ' इत्युच्यते । ततो होमान्तस्यावदानस्यैकपदार्थत्वादाग्नेयमवदाय [८९]हुत्वा पश्चादग्नीषोमीयावदानमित्यनुसमयः ॥

[९०]षष्ठाध्यायस्य चतुर्थपादे चिन्तितम्—

अवत्तनाशे तच्छेषात् पुरोडाशादवद्यति ।
यजेदाज्येन [९१]वाऽऽद्योऽत्र मध्यपूर्वार्धसंभवात् ॥
कृत्स्नस्य मध्यपूर्वार्धे ये [९२]शेषस्थे न ते ततः[९२] ।
हविर्नाशादाज्यविधिः सुतरां सर्वनाशने " ॥ (जैन्या ६·४·१-२) ॥

दर्शपूर्णमासयोः पुरोडाशावदाने श्रूयते–' [९३]मध्यादवद्यति पूर्वार्धादवद्यति ' (द्र. आपश्रौ २·१८·१०) इति । तत्र यद्यवत्तं नश्येत् तदानीमवशिष्टात् पुरोडाशात् पुनरप्यवदातव्यम् । कुतः? अवदानापादानयोर्मध्यपूर्वार्धयोः शिष्टेऽपि संभवादिति चेत् । मैवम् । कृत्स्नपुरोडाशगते मध्यपूर्वार्धे अपादानत्वेन श्रूयते । न त्ववशिष्टभागगते[९४] मध्यपूर्वार्धे । ततो मुख्यहविषो नाशादाज्यं प्रतिनिधाय यष्टव्यम् । अत एव श्रूयते– " यस्य सर्वाणि हवीꣳषि [९५]नश्येयुर्दुष्येयुरपहरेयुर्वाऽऽज्येनैता देवताः परिसंख्याय यजेत " (द्र. ऐब्रा ७·४) इति । तत्र सर्वशब्दस्य निमित्तविशेषणत्वेन अविवक्षितत्वान्नाशमात्रे [९५]सर्वत्राऽऽज्यस्य विधिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे षष्ठप्रपाठके तृतीयोऽनुवाकः ॥

७८. आ.क – पूर्वमवदान°। ७९. अ.इ.उ.पा– °मकृत्वा वाग्नेये°; जो.ना.हा – °मकृत्वा चाग्नेयेऽव°; ड.हो१– °मकृत्वैवाग्नेयाव°। ८० हो१– मुख्यात् प्रदा°। ८१. ड.हो१– नास्त्यङ्गविप्रकर्षः। ८२. आ.क– विषयैव। ८३. हो१– अवद्यतेः; उ– ' अवद्यतिः ' नास्ति, अ.इ.पा– अवघातः। ८४. ना– तदर्थता। ८५. ड१.शृं.हो१ – कार्यः। ८६. ड.ड१.शृं – होमार्थादव°। ८७–८७. हो१– अवदानक्रमेण। ८८. अ.इ.उ.जो.ना.पा.हा– ' सह ' नास्ति। ८९. ड१– ' हुत्वा ' नास्ति। ९०. शृं.हा– षष्ठस्य। ९१. हो१– वाऽन्यत्र। ९२–९२. अ.इ.उ.पा– शेषास्ते न चान्ततः; ड.हो१– शेषास्ते न ते ततः। ९३–९३. अ– मध्यात् पूर्वार्धसत्त्वात् ततोऽवदाय यष्टव्यमिति चेन्न। कृत्स्नस्य मध्यपूर्वार्धस्यादृतत्वेन श्रूयते न त्ववयवस्यावशिष्टभागगते; उ.पा– मध्यात् पूर्वार्धादिति। तत्रावत्तनाशेऽपि मध्यपूर्वार्धसत्त्वात्। ततोऽवदाय यष्टव्यमिति चेन्न कृत्स्नस्य मध्यपूर्वार्धस्यादृतत्वेन श्रूयते न त्ववयवस्यावशिष्टभागगते। ९४. क.ड१– °ज्येन ताः। ९५. हा– हविषः सर्वत्रा°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवस्य त्वा सवितुः प्रसव इति स्फ्यमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै शतभृष्टिरसि वानस्पत्यो द्विषतो वध इत्याह वज्रमेव तत् सꣳ श्यति भ्रातृव्याय प्रहरिष्यन्त्स्तम्बयजुर्हर-

देवस्य । त्वा । सवितुः । प्रसव इति प्र-सवे । इति । स्फ्यम् । एति । दत्ते । प्रसूत्या इति प्र-सूत्यै । अश्विनोः । बाहुभ्यामिति बाहु-भ्याम् । इति । आह । अश्विनौ । हि । देवानाम् । अध्वर्यू इति । आस्ताम् । पूष्णः । हस्ताभ्याम् । इति । आह । यत्यै । शतभृष्टिरिति शत-भृष्टिः । असि । वानस्पत्यः । द्विषतः । वधः । इति । आह । वज्रम् । एव । तत् । समिति । श्यति । भ्रातृव्याय । प्रहरिष्यन्निति प्र-हरिष्यन् । स्तम्बयजुरिति स्तम्ब-यजुः । हरति । ५

देवस्य त्वेत्यादि ॥ वेदिविधिः । प्रसूतिः सवितुरनुज्ञा । अपि च यतत्वाय प्रयत्यै वा ॥

शतभृष्टिरसीति ॥ स्फ्याभिमन्त्रणम् । शतपरिपाको वनस्पतिविकासो द्विषतां वधहेतुरिति वचनेन ᵛवज्रम् ᵛएव ᵛभ्रातृव्याय प्रहर्तुं सम्यक् निशितं करोति ॥ १०

स्तम्बयजुरिति मन्त्रेण तृणपुरीषहरणस्येयं संज्ञा । एतावतीत्यादि । वेदिव्यतिरिक्त-पृथिव्यभावप्रतिपादनेन सर्वस्याः पृथिव्या वेदित्वं वेदिस्तुल्यर्थम् । दृष्टं च "सा वा इयं सर्वैव वेदिः" (तैसं ६·२·४) इति । ᵛतस्याः तादृश्या वेदेः ᵛएतावतः सर्वपृथिवीप्रमाणात्

तृतीये प्रोक्त आग्नेयः पुरोडाशो दिनद्वये ॥ १५

अथ चतुर्थेऽनुवाके वेदिर्विधातव्या ।

देवस्येति ॥ तस्याश्च वेदेः साधनभूतस्य स्फ्यस्य मन्त्रेणाऽऽदानं विधत्ते–"देवस्य त्वा सवितुः प्रसव इति स्फ्यमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै" इति ॥ [१-]आध्वर्यवे मन्त्रकाण्डे 'आददे' (तैसं १·१·९) इत्येकमेव पदं मन्त्रत्वेन आम्नातम् । तच्च मन्त्रस्वरूपं 'देवस्य त्वा' इत्यादिना शेषेण पूरितम्[-1] ॥ २०

शतभृष्टिरिति ॥ यदुक्तं सूत्रकारेण – "शतभृष्टिरसि वानस्पत्यो द्विषतो वध इति पुरस्तात् प्रत्यञ्चमुत्करे स्फ्यमुदस्यति द्वेष्यं मनसा ध्यायन्" (आपश्रौ २·३·१३) इति, [२]तत्रोक्तमेतं मन्त्रमुत्पाद्य तात्पर्यं दर्शयति– "शतभृष्टिरसि वानस्पत्यो द्विषतो वध इत्याह वज्रमेव तत् सꣳश्यति भ्रातृव्याय प्रहरिष्यन्" इति ॥ हे स्फ्य, त्वं ᵛशतभृष्टिः ᵛअसि । शतसंख्याका भृष्टिः शत्रूणां संतापरूपं भर्जनं [३]यस्यासौ शतभृष्टिः । वनस्पतेर्विकारः ᵛवानस्पत्यः । ᵛद्विषतः द्वेषं कुर्वतो वैरिणो ᵛवधः वधहेतुरसि । अनेन [४]मन्त्रपाठेन भ्रातृव्यार्थं [५]ᵛवज्रं प्रहर्तुमिच्छन् सम्यक् तीक्ष्णीकरोति । यद्यपि स्फ्यस्यानेन मन्त्रेणोत्करे प्रक्षेपो [६]वेदिनिर्माणादूर्ध्वभावी तथाऽप्यादानप्रसङ्गेन बुद्धिस्थत्वादिदानीमेवोक्तम् ॥ २५

१–१. आ.क. आध्वर्यवशेषेण पठितम्; हो–आध्वर्यवशेषेण पूरितम्; ड१–आध्वर्यवे शेषेण पूरितम् । २. अ.इ.जो.पा.हा–तत्रोक्तमेकं । ३. आ.क–यस्य सः । ४. आ.क–मन्त्रेण । ५. अ.इ.उ.जो.पा.हा –वज्रं च । ६. ड–वेदेर्नि° । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव भ्रातृव्यं निर्भजति (१) तस्मान्नाभागं निर्भजन्ति त्रिर्हरति त्रय इमे लोका एभ्य एवैनं लोकेभ्यो निर्भजति तूष्णीं चतुर्थꣳ हरत्यपरिमितादेवैनं निर्भजत्युद्धन्ति यदेवास्या अमेध्यं

एतावती । वै । पृथिवी । यावती । वेदिः । तस्याः । एतावतः । एव । भ्रातृव्यम् । निरिति । भजति (१) । तस्मात् । न । अभागम् । निरिति । भजन्ति । त्रिः । हरति । त्रयः । इमे । लोकाः । एभ्यः । एव । एनम् । लोकेभ्यः । निरिति । भजति । तूष्णीम् । चतुर्थम् । हरति । अपरिमितादित्यपरि-मितात् । एव । एनम् । निरिति । भजति । उदिति । हन्ति । यत् । एव । अस्याः । अमेध्यम् ।

अवकाशात् [v]भ्रातृव्यं भागवन्तं शत्रुं [v]निर्भजति [1]निर्भागं कृत्वा विप्रवासयति । [v]तस्मात् अद्यत्वेऽपि [v]अभागम् एकार्थाभिलाषरहितं [2-v]न अभागं[-2] [1]निर्भजन्ति निर्वासयन्ति विषयस्य नियन्तारः ॥

त्रिर्हरति इत्यादि । गतम् । [v]अपरिमितात् लोकत्रयाभ्यधिकादपि ॥

उद्धन्तीत्यादि ॥ मेधं नार्हतीति [v]अमेध्यम् । "दण्डादिभ्यो यः" (पा ५·१·६६) "यजतोश्चातदर्थे" (पा ६·२·१५६) इत्युत्तरपदान्तोदात्तत्वम् ।

स्तम्बयजुरिति ॥ [v]वेदिस्थानात् सतृणस्य पांसोर्मन्त्रेणान्यत्र हरणं विधत्ते– 'स्तम्बयजुर्हरत्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव भ्रातृव्यं निर्भजति तस्मान्नाभागं निर्भजन्ति' इति ॥ यजुषा मन्त्रेण हरणीयः पांसुसहितः स्तम्बः स्तम्बयजुः, तस्य हरणं कुर्यात् । "पृथिवि देवयजनि" (तैसं १·१·९) [८-]इति त्रिभिः[-८] [७]आध्वर्यवोक्तैः वेदिस्थाने स्थापितं दर्भं छित्वा पांसुसहितम् [१०-]उत्करे निनयेत्[-१०] । तत्प्रकारः सर्वोऽपि पैरोडाशिककाण्डे [११-]एव स्पष्टमभिहितः[-११] । [v]वेदिः [v]यावती विद्यते [१३-v]एतावती एवोपयुक्ता[-१३] [v]पृथिवी । [v]तस्याः पृथिव्याः [v]एतावतः प्रदेशादनेन स्तम्बयजुर्हरणेन [v]भ्रातृव्यं निःसारितवानेव भवति । यस्मात् अत्र [१३-]भ्रातृव्यो भागार्थीति[-१३] कृत्वा निःसार्यते [v]तस्मात् [१४-v]लोके [v]अभागं भागाभिलाषरहितम् अविरोधित्वात् [v]न निःसारयन्ति ॥

त्रिरिति ॥ उक्तस्य स्तम्बयजुर्हरणस्याऽऽवृत्तिं विधत्ते– 'त्रिर्हरति त्रय इमे लोका एभ्य एवैनं लोकेभ्यो निर्भजति' इति ॥

१. मै–निभागम् । २–२. त्रि.पं२.मै४.लं.हो– भागादिकम् ।

७. अ.इ.उ.ड.जो·पा.शृं.हा–वेदिस्थाने । ८–८. क.ड.ड१.हो१–इत्यादिभिः । ९. ड.ड१.शृं.हो१–अध्वर्युकाण्डोक्तैर्मन्त्रैः । १०–१०. क.ड.हो१–उत्करदेशं नयेत्; ड१.शृं–उत्करदेशे नयेत् । ११–११. ड.ड१–विस्पष्ट° । १२–१२. तावद्वीर्योपयुक्ता । १३–१३. अ.इ.जो.पा–भ्रातृव्यं यागाद्धानिं । १४. ड.ड१.शृं.हो१–लोकेऽपि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वेदिः]

तदप हन्त्युद्धन्ति तस्मादोषधयः परा भवन्ति मूलं छिनत्ति भ्रातृव्यस्यैव मूलं छिनत्ति पितृदेवत्याऽतिखातेयतीं खनति प्रजापतिना (२) यज्ञमुखेन संमितामा प्रतिष्ठायै खनति

तत्। अपेति। हन्ति। उदिति। हन्ति। तस्मात्। ओषधयः। परेति। भवन्ति। मूलम्। छिनत्ति। भ्रातृव्यस्य। एव। मूलम्। छिनत्ति। पितृदेवत्येति पितृ-देवत्या। अतिखातेत्यति-खाता। इयतीम्। खनति। प्रजापतिनेति प्रजा-पतिना (२)। यज्ञमुखेनेति यज्ञ-मुखेन। संमितामिति सं-मिताम्। एति। प्रतिष्ठाया इति प्रति-स्थायै। खनति।

[v]पराभवन्ति पुनःपुनर्विनश्यन्ति स्थानस्योद्धननादल्पेनैव कालेन च्यवन्ते। मूलमित्यादि। [v]अतिखाता प्रतिष्ठामतीत्य खाता। इयती प्रादेशमात्री। 'यज्ञमुखं वै प्रजापतिः' इति प्राजापत्येन प्रादेशेन परिच्छिन्ना भवति। आ प्रतिष्ठाया इति। "चतुरङ्गुले ह्योषधयः प्रति तिष्ठन्ति" (तैब्रा ३·२·९) इति यावच्चतुरङ्गुलं [v]खनति॥

तूष्णीमिति ॥ चतुर्थे पर्याये त्वमन्त्रकं हरणं विधत्ते– 'तूष्णीं चतुर्थ[१५] हरत्यपरिमितादेवैनं निर्भजति' इति। त्रिरावृत्यैव लोकत्रयान्निःसारितत्वात् चतुर्थेन हरणेन लोकत्रयबहिर्भूतात् सर्वस्मादपि देशान्निःसारितो भवति॥

उद्धन्तीति ॥ वेदिस्थाने स्थितस्योपरितनमृद्भागस्य [१५]अपसारणं विधत्ते– 'उद्धन्ति यदेवास्या अमेध्यं तदप हन्ति' इति॥ उपरिभागस्योच्छिष्टादिस्पर्शसंभवात् [१६]मेधानर्हत्वम्॥

उद्धन्तीति ॥ विहितमुद्धननमनूद्य प्रशंसति– 'उद्धन्ति तस्मादोषधयः परा भवन्ति' इति॥ [v]तस्मात् उद्धननात् [१७]तत्रोत्पन्नास्तृणादयः पराकृता विनाशिता [v]भवन्ति॥

मूलमिति ॥ तत्रत्यानामोषधीनां यानि मूलानि पुनःप्ररोहाय भूमौ स्थितानि तेषां छेदनं विधत्ते– 'मूलं छिनत्ति भ्रातृव्यस्यैव मूलं छिनत्ति' इति॥ पुनःप्ररूढानाम् [१८]अन्तःस्तृणानां [१९]दर्भास्तरणहविःसादनविरोधित्वाद्भ्रातृव्यत्वम्॥

पितृदेवत्येति ॥ चुबुकमारभ्य [२०]केशपर्यन्तं यजमानस्य यन्मुखपरिमाणं तद्धस्तेन प्रदर्श्य तत्परिमितं खननं विधत्ते– 'पितृदेवत्याऽतिखातेयतीं खनति प्रजापतिना यज्ञमुखेन संमिताम्' इति॥ प्रादेशपरिमाणमतिक्रम्य खनने पैतृकी वेदिः स्यात्। यज्ञस्य यज्ञानुष्ठातुर्यजमानस्य मुखं यज्ञमुखं, तच्च प्रजापतिस्वरूपं यागद्वारा प्रजापालकत्वात्। तेन मुखेन [v]संमितां कृतवान् भवति॥

एति ॥ पक्षान्तरं विधत्ते– 'आ प्रतिष्ठायै खनति यजमानमेव प्रतिष्ठां गमयति' इति॥ अनायासेनापनेतुं शक्याः पांसवोऽप्रतिष्ठाः। या त्वधस्ताद्दृढा भूमिः सा प्रतिष्ठा, [२१]तत्पर्यन्तं खननेन यजमानः प्रतिष्ठां प्रापितो भवति॥

१५. ड–अपहरणम्। १६. ड–मेध्यानर्हत्वम्। १७. क–अत्रोत्पन्ना°। १८. क–तृणानां। १९. क.ड.ड१.हो१–°हविरासादनादिविरो°। २०. आ–'केशपर्यन्तं' नास्ति। २१. ड१–तत्पर्यन्तं तेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजमानमेव प्रतिष्ठां गमयति दक्षिणतो वर्षीयसीं करोति देवयजनस्यैव रूपमकः पुरीषवतीं करोति प्रजा वै पशवः पुरीषं प्रजयैवैनं पशुभिः पुरीषवन्तं करोत्युत्तरं परिग्राहं परि गृह्णात्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव भ्रातृव्यं निर्भज्याऽऽत्मन उत्तरं परिग्राहं परि गृह्णाति

५ यजमानम् । एव । प्रतिष्ठामिति प्रति - स्थाम् । गमयति । दक्षिणतः । वर्षीयसीम् । करोति । देवयजनस्येति देव - यजनस्य । एव । रूपम् । अकः । पुरीषवतीमिति पुरीष - वतीम् । करोति । प्रजेति प्र - जा । वै । पशवः । पुरीषम् । प्रजयेति प्र - जया । एव । एनम् । पशुभिरिति पशु - भिः । पुरीषवन्तमिति पुरीष - वन्तम् । करोति । उत्तरमित्युत् - तरम् । परिग्राहमिति परि - ग्राहम् । परीति । गृह्णाति । एतावती । वै । पृथिवी । यावती । वेदिः । तस्याः । एतावतः ।
१० एव । भ्रातृव्यम् । निर्भज्येति निः - भज्य । आत्मने । उत्तरमित्युत् - तरम् ।
परिग्राहमिति परि - ग्राहम् । परीति । गृह्णाति ।

वर्षीयसीमिति ॥ प्रवृद्धतराम् । प्रियस्थिरादिना (पा ६·४·१५७) वर्षादेशः । एवं [v]देवयजनस्य [v]रूपम् [३v]अकः करोति । छान्दसे लुङि " मन्त्रे घसं " (पा·२·४·८०) इति च्लेर्लुक् । पुरीषवतीमिति । [४v]पूरिका मृत् पुरीषम्, प्रजासाधनत्वात् ताच्छब्द्यम् ॥

१५ उत्तरमित्यादि ॥ वेद्याः [v]उत्तरं [v]परिग्राहं करोतीत्यर्थः । " परौ यज्ञे " (पा ३·३·४७) इति घञ् । एतावतीत्यादि गतम् ॥

दक्षिणत इति ॥ दक्षिणभागस्यौन्नत्यं विधत्ते– ' दक्षिणतो वर्षीयसीं करोति देवयजनस्यैव रूपमकः ' इति । दक्षिणभागस्य निम्नत्वे पितृयजनस्य रूपं स्यात् ।

पुरीषवतीमिति ॥ मार्दवकारिपांसुयुक्तत्वं विधत्ते– ' पुरीषवतीं करोति प्रजा वै पशवः पुरीषं
२० प्रजयैवैनं पशुभिः पुरीषवन्तं करोति ' इति ॥ यस्यां भूमौ प्रजापशुसंचारबाहुल्यं तस्यां पांसुबाहुल्यात् प्रजादीनां [२२]पुरीषत्वम् । यजमानोऽपि प्रजादिभिः पुरीषवान् भवति ॥

उत्तरमिति ॥ वेदिनिर्माणात् पूर्वं " वसवस्त्वा " (तैसं १·१·९) इत्यादिभिर्मन्त्रैः वेदिसीमनिर्देशः पूर्वपरिग्रहः । निर्माणात् ऊर्ध्वम् " ऋतमसि " (तैसं १·१·९) इत्यादिभिर्मन्त्रैस्तन्निर्देश उत्तरपरिग्रहस्तमिमं विधत्ते–' उत्तरं परिग्राहं परि गृह्णात्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव
२५ भ्रातृव्यं निर्भज्याऽऽत्मन उत्तरं परिग्राहं परि गृह्णाति ' इति ॥ पूर्वपरिग्रहेणैव वेदिमर्यादायां सिद्धायामपि पुनरुत्तरपरिग्रहः [v]आत्मने [२३]स्वकीयत्वाय भवति ॥

क्रूरमिति ॥ मन्त्रकाण्डोक्तेन मन्त्रेण समीकरणं विधत्ते– " क्रूरमिव वा एतत् करोति यद्वेदिं करोति धा असि स्वधा असीति योयुप्यते शान्त्यै " इति ॥ खननेन निम्नोन्नतभावापादनं [v]क्रूरं, समीकरणेन

३. लं.–' अकः ' नास्ति ॥ ४. लं–पुरीषका ।

३० २२. हो१–पुरीषवत्वम् । २३. ड–स्वीयत्वाय ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वेदिः]

क्रूरमिव वा (३) एतत् करोति यद्वेदिं करोति धा असि स्वधा असीति योयुप्यते शान्त्यै प्रोक्षणीरा सादयत्यापो वै रक्षोघ्नी रक्षसामपहत्यै स्फ्यस्य वर्त्मन्त्सादयति यज्ञस्य संतत्यै यं द्विष्यात् तं ध्यायेच्छुचैवैनमर्पयति ॥४॥

[भजति प्रजापतिनेव वै त्रयस्त्रिंशच्च ।]

क्रूरम् । इव । वै (३) । एतत् । करोति । यत् । वेदिम् । करोति । धाः । असि । स्वधेति स्व-धा । असि । इति । योयुप्यते । शान्त्यै । प्रोक्षणीरिति प्र-उक्षणीः । एति । सादयति । आपः । वै । रक्षोघ्नीरिति रक्षः-घ्नीः । रक्षसाम् । अपहत्या इत्यप-हत्यै । स्फ्यस्य । वर्त्मन् । सादयति । यज्ञस्य । संतत्या इति सं-तत्यै । यम् । द्विष्यात् । तम् । ध्यायेत् । शुचा । एव । एनम् । अर्पयति ॥ ४ ॥

[मैसं ४.१.१०; कासं २५.४; ३१.८; कपिसं ३९.१, ४७.८; शब्रा १.२.४.४-५; द्र. तैब्रा ३.२.९]

क्रूरमिति । हिंसारूपत्वात् । [५]योयुप्यते समीकरोति । [५]युप विमोहने । शान्त्या इति समीकरणानाख्यानं तुल्यत्वापादनात्, 'धा असि' इत्यादिस्तुतेश्च ॥ प्रोक्षणीरा सादयतीति[५] ॥ गतम् । [६]अर्पयति । "अर्तिह्री°" (पा ७.३.३६) इत्यादिना पुक् ॥

इति द्वितीये षष्ठे चतुर्थोऽनुवाकः ॥

तच्छान्तिर्भवति । हे वेदे, [१]धाः [१]असि धारयित्र्यसि । [२४]तदेतद्विशेष्यते- [१]स्वधा इति । तव स्वरूपं बर्हिरादिकं [२५]धारयतीत्यर्थः ॥

प्रोक्षणीरिति ॥ यदुक्तं सूत्रकारेण-"प्रोक्षणीरभिपूर्योदञ्चं स्फ्यमपोह्य दक्षिणेन स्फ्यमसंस्पृष्टा उपनिनीय स्फ्यस्य वर्त्मन्त्सादयति" (आपश्रौ २.३.१२) इति, तदेतद्विधत्ते- 'प्रोक्षणीरा सादयत्यापो वै रक्षोघ्नी रक्षसामपहत्यै स्फ्यस्य वर्त्मन्त्सादयति यज्ञस्य संतत्यै' इति ॥ [२६]अर्घ्यविधिप्रस्तावे- "तानि ह वा एतानि रक्षांस्यभिमन्त्रितेनाम्भसा शाम्यन्ति" (तैआ २.२.१) इति [२७]श्रुतत्वादपां रक्षोघ्नत्वम् । स्फ्यरेखाया अविच्छिन्नत्वात् तत्र सादनं [१]यज्ञस्य अविच्छेदाय भवति ॥

यमिति ॥ सादनकाले द्वेष्यस्य पाप्मनोऽद्भिर्विनाशध्यानं विधत्ते- 'यं द्विष्यात् तं ध्यायेच्छुचैवैनमर्पयति' इति ॥ [२८]संयोजयतीत्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

५-५. तंब्रा.लं.हो- 'युप विमोहने ..... णीरा सादयति' नास्ति। ६. मैसं- 'अर्पयति' इत्यस्यानन्तरं 'प्रापयति'।

२४. ड.ड१-तदेव विशिष्यते। २५. ड-'धारयतीत्यर्थः' नास्ति; इ.क.जो.ना.हा-धारयित्र्यसीत्यर्थः। २६. ड१-अर्घ्यविधानप्रसङ्गे; ड.शृं.हो१-अस्य विधानप्रसङ्गे। २७. आ.क.ड-श्रुतत्वादेषां। २८. आ.क-योज°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मवादिनो वदन्त्यद्भिर्हवीꣳषि प्रौक्षीः केनाप इति ब्रह्मणेति ब्रूयादद्भिर्ह्येव हवीꣳषि प्रोक्षति ब्रह्मणाऽप इध्माबर्हिः प्रोक्षति मेध्यमेवैनत् करोति वेदिं प्रोक्षत्यूक्षा वा एषाऽलोमकाऽमेध्या यद्वेदिर्मेध्यामेवैनां करोति

ब्रह्मवादिन इति ब्रह्म-वादिनः। वदन्ति। अद्भिरित्यत्-भिः। हवीꣳषि। प्रेति। औक्षीः। केन। अपः। इति। ब्रह्मणा। इति। ब्रूयात्। अद्भिरित्यत्-भिः। हि। एव। हवीꣳषि। प्रोक्षतीति प्र-उक्षति। ब्रह्मणा। अपः। इध्माबर्हिरितीध्मा-बर्हिः। प्रेति। उक्षति। मेध्यम्। एव। एनत्। करोति। वेदिम्। प्रेति। उक्षति। ऊक्षा। वै। एषा। अलोमका। अमेध्या। यत्। वेदिः। मेध्याम्। एव। एनाम्।

ब्रह्मवादिन इत्यादि॥ अध्वर्युः पर्यनुयुज्यते। ब्रह्मणेति। "प्रोक्षिताः स्थ" (तैसं १·१·५) इति मन्त्रेण। कीदृशमिदं ब्रह्मणा अपां प्रोक्षणम्? अप्रोक्षणमेवेदमुक्तं भवति; मन्त्रोच्चारणमात्रमेव क्रियते इत्यत आह– अद्भिर्ह्येवेत्यादि। यस्मात् vअद्भिः हविषां प्रोक्षणद्वारेण मेध्यत्वं क्रियत 'इति vब्रह्मणा अपि तदपामिति। तस्मात् vब्रह्मणा vइति उत्तरं vब्रूयात् इति॥

इध्माबर्हिरित्यादि॥ छान्दसं पूर्वोत्तरयोर्युगपत् प्रकृतिस्वरत्वम्। ऊक्षा वा एषेति। vऊक्षा तृणादिरहिता स्थली vएषा vवेदिः मूलादिच्छेदनेन ऊक्षा vअलोमका उत्तलोमा vअमेध्या, तस्मात् प्रोक्षणेन vमेध्याम् vएव vएनां vकरोति। 'पावकादित्वादित्वाभावः (द्र. पाभा ७·३·४५ वा२)॥

चतुर्थे वेदिनिर्माणमशेषेण 'प्रकीर्तितम्॥

अथ 'पञ्चमे तस्यां वेद्यां बर्हिर्विषयप्रयोगो 'विधीयते॥

ब्रह्मवादिन इति॥ तत्र बर्हिषः प्रोक्षणं विधातुं प्रस्तौति– 'ब्रह्मवादिनो वदन्त्यद्भिर्हवीꣳषि प्रौक्षीः केनाप इति ब्रह्मणेति ब्रूयादद्भिर्ह्येव हवीꣳषि प्रोक्षति ब्रह्मणाऽपः' इति॥ हेऽध्वर्यो, शुद्ध्यर्थं vहवीꣳषि त्वम् vअक्षिः vप्रौक्षीः प्रोक्षितवानसि। vकेन अन्येन शुद्धेन vद्रव्येणेमा vअपः प्रोक्षितवानसि vइति ब्रह्मवादिभिः पृष्टेऽध्वर्युः vब्रह्मणा मन्त्रेण vइति उत्तरं vब्रूयात्, यस्मादेतदुभयं प्रोक्षणं तथैव वर्तते। अत एव मन्त्रव्याख्याने श्रूयते– "प्रोक्षिताः स्थेत्याह। तेनाऽपः प्रोक्षिताः" (तैब्रा ३·२·५) इति। तेन मन्त्रोच्चारणेनेत्यर्थः॥

इध्माबर्हिरिति॥ इदानीं विधत्ते– 'इध्माबर्हिः प्रोक्षति मेध्यमेवैनत् करोति' इति॥ vएनत् इध्मा (ध्मं) बर्हिश्चेत्युभयम्॥

१. तं३.लं-तम्। २. [संभावितोऽयं पाठः]; तं.त्रि-वावकाश (१)-त्वादित्वाभावः; मै-वावकाश [क्षिपकादि] त्वादित्वाभावः; मै४-पावकादित्वादुत्वाभावः, हो-पावकात्वादित्वाभावः; लं-वावकात्वादित्वाभावः।

१. आ.क-प्रपञ्चितम्। २. अ.इ.उ.जो.ना.पा.हा-'पञ्चमे' नास्ति। ३. आ.क-अभिधीयते। ४. ड-द्रव्येणेह।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेति बर्हिरासाद्य प्रो(१)क्षत्येभ्य एवैनल्लोकेभ्यः प्रोक्षति क्रूरमिव वा एतत् करोति यत् खनत्यपो नि नयति शान्त्यै पुरस्तात् प्रस्तरं गृह्णाति मुख्यमेवैनं करोतीयन्तं गृह्णाति प्रजापतिना यज्ञमुखेन संमितं बर्हिः स्तृणाति प्रजा वै बर्हिः पृथिवी वेदिः

करोति । दिवे । त्वा । अन्तरिक्षाय । त्वा । पृथिव्यै । त्वा । इति । बर्हिः । आसाद्येत्या-साद्य । प्रेति (१)। उक्षति । एभ्यः । एव । एनत् । लोकेभ्यः । प्रेति । उक्षति । क्रूरम् । इव । वै । एतत् । करोति । यत् । खनति । अपः । नीति । नयति । शान्त्यै । पुरस्तात् । प्रस्तरमिति प्र-स्तरम् । गृह्णाति । मुख्यम् । एव । एनम् । करोति । इयन्तम् । गृह्णाति । प्रजापतिनेति प्रजा-पतिना । यज्ञमुखेनेति यज्ञ-मुखेन । संमितमिति सं-मितम् । बर्हिः । स्तृणाति । प्रजा इति प्र-जाः । वै । बर्हिः । पृथिवी । वेदिः ।

दिवे त्वेत्यग्रादारभ्य प्रोक्षणम् ॥ क्रूरमिवेत्यादि । गतम् ॥

वेदिमिति ॥ [५-५]इध्मादिवत् वेदेरप्यद्भिः[५] प्रोक्षणं विधत्ते– 'वेदिं प्रोक्षत्यूक्षा वा एषाऽलोमकाऽमेध्या यद्वेदिर्मेध्यामेवैनां करोति' इति ॥ लोमरहितत्वात् [६]ऋक्षा परुषा सती यागयोग्या न भवति। तस्माद्योग्यत्वाय प्रोक्षणम् ॥

दिव इति ॥ यदुक्तं सूत्रकारेण – "अन्तर्वेदि पुरोग्रन्थि [७]बर्हिरासाद्य दिवे त्वेत्यग्रं प्रोक्षत्यन्तरिक्षाय त्वेति मध्यं पृथिव्यै त्वेति मूलम्" (आपश्रौ २.८.१) इति, तदेतद्विधत्ते – 'दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेति बर्हिरासाद्य प्रोक्षत्येभ्य एवैनल्लोकेभ्यः प्रोक्षति' इति। 'दिवे त्वा' (तैसं १.१.११) इत्यादिमन्त्रास्तत्काण्ड एव व्याख्याताः ॥

क्रूरमिति ॥ यदुक्तं सूत्रकारेण– "प्रोक्षणीशेषं स्वधा पितृभ्य इति दक्षिणायै श्रोणेरोत्तरस्याः संततं [८]निनीय" (आपश्रौ २.८.३) इति, तदेतद्विधत्ते– 'क्रूरमिव वा एतत् करोति यत् खनत्यपो नि नयति शान्त्यै' इति ॥

पुरस्तादिति ॥ प्रस्तरस्य धारणं विधत्ते– 'पुरस्तात् प्रस्तरं गृह्णाति मुख्यमेवैनं करोति' इति। [९]वेदेः पूर्वभागे ब्रह्मा यजमानो वा [९]प्रस्तरं धारयेत्। तच्च सूत्रे [९]अभिहितम्– "ब्रह्मा प्रस्तरं धारयति यजमानो वा" (आपश्रौ २.८.६) इति ॥

इयन्तमिति ॥ धारणाय [१०]मुखसमानमौन्नत्यं [११]हस्तेनाभिनीय विधत्ते – 'इयन्तं गृह्णाति प्रजापतिना यज्ञमुखेन संमितम्' इति ॥ वेदिखननवद्व्याख्येयम् ॥

बर्हिरिति ॥ [१२]वेद्यां स्तरणं विधत्ते– 'बर्हिः स्तृणाति प्रजा वै बर्हिः पृथिवी वेदिः प्रजा एव पृथिव्यां प्रति ष्ठापयति' इति ॥

५–५. अ.इ.जो.पा.हा–इध्माबर्हिर्वेदेश्चाद्भिः; आ.क–इध्माबर्हिःप्रोक्षणवद्वेदेरद्भिः। ६. ड–'बर्हिः' नास्ति। ७. आ.क.ड.हो१–निनयेत्। ८. आ.क–वेदि°। ९. ड१–विहितम्। १०. ड–°समानमानत्वम्। ११. ड१–°भिधीय; ड–°भिनियमम्। १२.–वेद्या°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजा एव पृथिव्यां प्रतिष्ठापयत्यनतिदृश्नꣳ स्तृणाति प्रजयैवैनं पशुभिरनतिदृश्नं करोत्यु(२)त्तरं बर्हिषः प्रस्तरꣳ सादयति प्रजा वै बर्हिर्यजमानः प्रस्तरो यजमानमेवायजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरोऽन्तर्दधाति व्यावृत्त्या अनक्ति हविष्कृतमेवैनꣳ सुवर्गं लोकं गमयति

---

५ प्रजा इति प्र-जाः। एव। पृथिव्याम्। प्रतीति। स्थापयति। अनतिदृश्नमित्यनति-दृश्नम्। स्तृणाति। प्रजयेति प्र-जया। एव। एनम्। पशुभिरिति पशु-भिः। अनतिदृश्नमित्यनति-दृश्नम्। करोति (२)। उत्तरमित्युत्-तरम्। बर्हिषः। प्रस्तरमिति प्र-स्तरम्। सादयति। प्रजा इति प्र-जाः। वै। बर्हिः। यजमानः। प्रस्तर इति प्र-स्तरः। यजमानम्। एव। अयजमानात्। उत्तरमित्युत्-तरम्। करोति। तस्मात्। यजमानः। अयजमानात्।
१० उत्तर इत्युत्-तरः। अन्तः। दधाति। व्यावृत्त्या इति वि-आवृत्त्यै। अनक्ति। हविष्कृतमिति हविः-कृतम्। एव। एनम्। सुवर्गमिति सुवः-गम्। लोकम्। गमयति।

अनतिदृश्नमिति ॥ अनतिविरलम्।

उत्तरं बर्हिष इत्यादि ॥ गतम्।

अनतिदृश्नमिति ॥ स्तरणे नीरन्ध्रत्वं विधत्ते– 'अनतिदृश्नꣳ स्तृणाति प्रजयैवैनं पशुभिरनति-
१५ दृश्नं करोति' इति ॥ अतिशयेन भूमेर्दर्शनमतिदृश्नं तद्यथा न भवति तथा स्तृणीयात्। तेन [१३]यजमानं [१४]प्रजया [१४]पशुभिः च सर्वतो वेष्टितत्वादनतिस्पष्टं [१४-१४]द्रष्टुमयोग्यं करोति[१४-१४] ॥

उत्तरमिति ॥ स्तीर्णस्य बर्हिष उपरि प्रस्तरसादनं विधत्ते – 'उत्तरं बर्हिषः प्रस्तरꣳ सादयति प्रजा वै बर्हिर्यजमानः प्रस्तरो यजमानमेवायजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरः' इति ॥ स्तरणार्थस्य बर्हिष [१५]उपसर्जनत्वात् प्रजात्वम्। प्रस्तरस्य [१६]प्रधानत्वात् यजमानत्वम् ॥

२० **अन्तरिति** ॥ अधस्तादास्तीर्णस्य बर्हिष उपरिष्टात् साद्यमानस्य [१७]च प्रस्तरस्य मध्ये [१८-१८]तिर्यक्तया द्वाभ्यां[१८-१८] दर्भाभ्यां व्यवधानं विधत्ते– 'अन्तर्दधाति व्यावृत्त्यै' इति। तदेतदन्तर्धानं मन्त्र-काण्डोक्तेन "विशो यन्त्रे स्थः" (तैसं १·१·११) [१९]इत्यनेन मन्त्रेण क्रियते ॥

अनक्तीति ॥ प्रस्तरस्याऽऽसादनप्रसङ्गेन बुद्धिस्थान् प्रहरणकालीनान् विशेषान् विधित्सुरादौ प्रस्तरस्य घृतेनाञ्जनं विधत्ते– 'अनक्ति हविष्कृतमेवैनꣳ सुवर्गं लोकं गमयति' इति ॥ प्रस्तरस्य
२५ दर्भमुष्टेः [२०]आसादनीयद्रव्यत्वेन स्वरूपतो हविष्ट्वाभावेऽप्यञ्जनेन हविष्ट्वं कृतं [२१]भवतीति [२२]तादृशम् [२२]एनं प्रस्तरं स्वर्गप्राप्तियोग्यं करोति ॥

---

१३. ड.शृं–यजमानः। १४–१४. ड.ड१.शृं–द्रष्टुमयोग्यो भवति। १५. आ.क–अधःस्थितत्वात्। १६. आ.क–प्रधानभूतत्वात्। १७. आ.क–'च' नास्ति। १८–१८. ड.ड१–तिर्यग्भ्याम्। १९. आ.क–इति। २०. आ.क–अनदनीय°। २१. ड१–'इति' नास्ति। २२. ड१–तादृशमिमम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बर्हिःप्रयोगः]

त्रेधाऽनक्ति त्रय इमे लोका एभ्य एवैनं लोकेभ्योऽनक्ति न प्रति शृणाति यत् प्रतिशृणीयादनूर्ध्वभावुकं यजमानस्य स्यादुपरीव प्र हरत्यु(३)परीव हि सुवर्गो लोको नि यच्छति वृष्टिमेवास्मै नि यच्छति नात्यग्रं प्र हरेद्यदत्यग्रं प्रहरेदत्यासारिण्यध्वर्योर्नाशुका स्यान्-

त्रेधा । अनक्ति । त्रयः । इमे । लोकाः । एभ्यः । एव । एनम् । लोकेभ्यः । अनक्ति । न । प्रतीति । शृणाति । यत् । प्रतिशृणीयादिति प्रति-शृणीयात् । अनूर्ध्वभावुकमित्यनूर्ध्व-भावुकम् । यजमानस्य । स्यात् । उपरि । इव । प्रेति । हरति (३) । उपरि । इव । हि । सुवर्ग इति सुवः-गः । लोकः । नीति । यच्छति । वृष्टिम् । एव । अस्मै । नीति । यच्छति । न । अत्यग्रमित्यति-अग्रम् । प्रेति । हरेत् । यत् । अत्यग्रमित्यति-अग्रम् । प्रहरेदिति प्र-हरेत् । अत्यासारिणीत्यति-आसारिणी । अध्वर्योः । नाशुका । स्यात् । ५ १०

[V]अनक्ति— प्रहरणकाले स्रुक्षु ॥

न प्रति शृणातीति— नाकृष्य पुनः प्रक्षिपति । [V]अनूर्ध्वभावुकम् अनूर्ध्वलोके प्रभवम् । छान्दस उकञ् ॥

उपरीत्यादि ॥ गतम् । [V]नियच्छति न्यञ्चं पातयति । अत्यग्रमिति । अग्रात्ययेन [V]न [V]प्रहरेत् । अत्यासारिणीति । [V]अत्यासारशीला [V]अध्वर्योः नाशहेतुः वृष्टिः [V]स्यात् । १५

त्रेधेति ॥ यदुक्तं सूत्रकारेण " स्रुक्षु प्रस्तरमनक्त्यक्तꣳ रिहाणा इति जुह्वामग्रं प्रजां योनिमित्युपभृति मध्यमाप्यायन्तामाप ओषधय इति ध्रुवायां मूलमेवं त्रिः " (आपश्रौ ३.५.९–३.६.१) इति, तदेतद्विधत्ते – ' त्रेधाऽनक्ति त्रय इमे लोका एभ्य एवैनं लोकेभ्योऽनक्ति ' इति ॥

नेति ॥ प्रस्तरस्य प्रहरणे हेयोपादेयौ प्रकारौ विधत्ते– ' न प्रतिशृणाति यत् प्रतिशृणीयादनूर्ध्वभावुकं यजमानस्य स्यादुपरीव प्र हरत्युपरीव हि सुवर्गो लोकः ' इति ॥ अङ्गारेषु [२३-]आकर्षणेन प्रक्षेपः[-२३] प्रतिशरणं, तं [V]न कुर्यात् । यदि कुर्यात् [r]यजमानस्य [r]अनूर्ध्वभावुकं [r]स्यात्, स्वर्गप्राप्तिसाधनं न भवेदित्यर्थः । तस्माद्वस्तमुन्नतं कृत्वा प्रस्तरमग्नेः [r]उपरि एव प्रहरेत् स्वर्गलोकस्य [r]उपरि एव वर्तमानत्वात् तत्प्राप्तिसाधनं भवति ॥ २० २५

नीति ॥ प्रस्तरयुक्तस्य हस्तस्याधोमुखत्वं विधत्ते– ' नि यच्छति वृष्टिमेवास्मै नि यच्छति ' इति ॥ हस्तो न्यग्भूतो यथा भवति तथा कुर्यात् । तेन यजमानार्थं [r]वृष्टिम् [r]एव न्यग्भूतां करोति ॥

नेति ॥ प्रस्तराग्रस्य [२४]आहवनीयातिक्रमं निषेधति– ' नात्यग्रं प्र हरेद्यदत्यग्रं प्रहरेदत्यासारिण्यध्वर्योर्नाशुका स्यात् ' इति ॥ अतिक्रान्तमग्रं यस्य [२५]तत् [r]अत्यग्रम् । तद्यथा भवति तथा [r]न [r]प्रहरेत्, किं तु प्रस्तराग्रम् [२६-]आहवनीयाभ्यन्तर एव अन्तर्भावयेत्[-२६] । अत्यग्रप्रहरणे हि वृष्टिः [r]अत्यासारिणी [२७]सती ३०

२३–२३. आ.क–क्षुण्णेषु प्रतिक्षेपः । २४. ड.ड१–°यातिक्रमणम् । २५. ड–एतत् । २६–२६. आ.क–आहवनीयस्योत्तरत एव नयेत ; हो१–आहवनीयान्तर एवान्तर्धापयेत् ; ड–आहवनीयान्तरत एवान्तर्धापयेत् । २७. आ–भवति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न पुरस्तात् प्रत्यस्येद्यत् पुरस्तात् प्रत्यस्येत् सुवर्गाल्लोकाद्यजमानं प्रति नुदेत् प्राञ्चं प्र हरति यजमानमेव सुवर्गं लोकं गमयति न विष्वञ्चं वि युयाद्यद्विष्वञ्चं वियुयात् (४) स्त्र्यस्य जायेतोर्ध्वमुद्यौत्यूर्ध्वमिव हि पुꣳसः पुमानेवास्य जायते

न । पुरस्तात् । प्रतीति । अस्येत् । यत् । पुरस्तात् । प्रत्यस्येदिति प्रति - अस्येत् । सुवर्गादिति सुवः - गात् । लोकात् । यजमानम् । प्रतीति । नुदेत् । प्राञ्चम् । प्रेति । हरति । यजमानम् । एव । सुवर्गमिति सुवः - गम् । लोकम् । गमयति । न । विष्वञ्चम् । वीति । युयात् । यत् । विष्वञ्चम् । वियुयादिति वि - युयात् (४) । स्त्री । अस्य । जायेत । ऊर्ध्वम् । उदिति । यौति । ऊर्ध्वम् । इव । हि । पुꣳसः । पुमान् । एव । अस्य । जायते ।

न पुरस्तादिति । [v]पुरस्तात् प्रतीचीनं [v]न प्रक्षिपेत् । " पराङिव हि सुवर्गः " (तैसं ६·३·४) इति [v]पुरस्तात् [3]प्रत्यसनेन यजमानः [v]स्वर्गात् प्रतिनिवर्तितो भवति । प्राञ्चमित्यादि । गतम् । न विष्वञ्चमिति । विषूचीनाग्रं [v]न विश्लेषयेत् । स्त्र्यस्येति । विषूचीनत्वात् स्त्रीव्यञ्जनस्य । ऊर्ध्वमेवेति । पुंव्यञ्जनस्योर्ध्वत्वात् ॥

तस्य [r]अध्वर्योः विनाशनशीला [r]स्यात् । अत्याधिक्येन वर्षणमतिसारिणीत्वं तेन सस्यानि फलितुमयोग्यानि भवन्ति, सोऽयमध्वर्योर्नाशः । अथवा व्याधिविशेषेणाध्वर्युर्नश्येत् ॥

नेति ॥ पूर्वस्यां दिशि प्रस्तरस्य मूलं [२८]पश्चिमायामग्रम् इत्येवंविधं [२९]प्रहरणं निषेधति – ' न पुरस्तात् प्रत्यस्येद्यत् पुरस्तात् प्रत्यस्येत् सुवर्गाल्लोकाद्यजमानं प्रतिनुदेत् ' इति ॥

प्राञ्चमिति ॥ पश्चिमाग्रत्वं निषिध्य प्रागग्रत्वं विधत्ते – प्राञ्चं प्रहरति यजमानमेव सुवर्गं लोकं गमयति ' इति ॥

नेति ॥ प्रस्तरगतानां [३०]दर्भाग्राणां सर्वतो [३१]विश्लेषणं निषेधति- ' न विष्वञ्चं वि युयाद्यद्-विष्वञ्चं वियुयात् स्त्र्यस्य जायेत ' इति ॥ [r]विष्वञ्चं [३२]नानादिग्गताग्रं यथा भवति तथा [r]न [r]वियुयात् न विश्लेषयेत् । [३३]तद्विश्लेषणे यजमानस्य [३४]स्त्र्यपत्यमेव [r]जायेत । स्त्रीव्यञ्जनस्य विश्लिष्टरूपत्वात् ॥

ऊर्ध्वमिति ॥ दर्भाग्राणां समूहरूपेणैकीभावं विधत्ते – ' ऊर्ध्वमुद्यौत्यूर्ध्वमिव हि पुꣳसः पुमानेवास्य जायते ' इति ॥ [r]ऊर्ध्वं [३५]दण्डाकारेणैकाग्रं यथा भवति तथा [r]उद्यौति उत्कर्षेण मिश्रयेत् । [३६][r]पुंसः व्यञ्जनमूर्ध्वाकारं भवति, [३७]अतोऽस्य [r]पुमान् [r]एव [r]जायते । सोऽयमाग्नीध्रस्य व्यापारः । तथा च सूत्रकार आह – " त्रिरञ्जलिनाऽऽग्नीध्रोऽविष्वञ्चं प्रस्तरमूर्ध्वमुद्यौति " (आपश्रौ ३·७·३) इति ॥

३. हो–प्रत्यासनेन ।

२८. ड.ड१.शृं.हो१–पश्चिमायां दिश्यग्रं; क.ना–पश्चिमस्यामग्रं; अ.इ.जो.पा.हा–पश्चिमस्याग्र°; उ–पश्चिमस्यग्र°(?)। २९. ड१–'प्रहरणं' नास्ति। ३०. अ.इ.उ.जो.ना.पा.हा–अग्राणां; हो१–दर्भाणां। ३१. अ.इ.उ.जो.ना.पा.हा–विशेषमिश्रणं। ३२. ड१.शृं–नानादिग्गताग्रं; ड–नानादिग्गमनम्। ३३. हो१–तद्विश्लेषणेन। ३४. ड१–'एव' नास्ति। ३५. ड१–°रेणैकाग्र्यम्। ३६. आ.क–पुंसां। ३७. आ.क–ततोऽस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यत् स्फ्येन वोपवेषेण वा योयुप्येत स्तृतिरेवास्य सा हस्तेन योयुप्यते यजमानस्य गोपीथाय ब्रह्मवादिनो वदन्ति किं यज्ञस्य यजमान इति प्रस्तर इति तस्य क्व सुवर्गो लोक इत्याहवनीय इति ब्रूयाद्यत् प्रस्तरमाहवनीये प्रहरति यजमानमेव (५) सुवर्गं लोकं गमयति

यत्। स्फ्येन। वा। उपवेषेणेत्युप - वेषेण। वा। योयुप्येत। स्तृतिः। एव। अस्य। सा। ५
हस्तेन। योयुप्यते। यजमानस्य। गोपीथाय। ब्रह्मवादिन इति ब्रह्म - वादिनः। वदन्ति। किम्।
यज्ञस्य। यजमानः। इति। प्रस्तर इति प्र - स्तरः। इति। तस्य। क्व। सुवर्ग इति सुवः - गः।
लोकः। इति। आहवनीय इत्या - हवनीयः। इति। ब्रूयात्। यत्। प्रस्तरमिति प्र - स्तरम्।
आहवनीय इत्या - हवनीये। प्रहरतीति प्र - हरति। यजमानम्। एव (५)।
सुवर्गमिति सुवः - गम्। लोकम्। गमयति। १०

यदिति ॥ [V]योयुप्येत विह्वलीक्रियेत। [V]स्तृतिः छादनं स्फ्याद्युपादानेन हस्तादितिरोधानात् [४-]हिंसा वा[-४] स्तृतिः वज्रस्थानीयस्फ्यादिस्पर्शनात्। ह्रस्वान्तधात्वन्तरमिदम्। हस्तेनेत्यादि। गतम्। [V]गोपीथाय रक्षणाय भवति ॥

ब्रह्मवादिन इत्यादि ॥ यज्ञसंबन्धि [V]किम् अङ्गं [V]यजमानः यजमानस्थानीयम् [V]इति [V]ब्रह्मवादिनः पृच्छन्ति। तत्र [V]प्रस्तरः यजमानः [V]इति उत्तरं ब्रूयात्। [V]तस्य यजमानस्य [V]स्वर्गो [V]लोकः १५
सर्वाभिमतसिद्धिः [V]क्व [V]इति पुनः पृच्छन्ति ब्रह्मवादिनः। तत्रापि [V]आहवनीयः [V]इति [५]प्रति [V]ब्रूयात्। यदित्यादि। गतम् ॥

यदिति ॥ [३८]तस्मिन्नेकीकरणे साधनान्तरं निषिध्य हस्तं विधत्ते– "यत् स्फ्येन वोपवेषेण वा योयुप्येत स्तृतिरेवास्य सा हस्तेन योयुप्यते यजमानस्य गोपीथाय" इति ॥ योयुपनं [३९]विश्लिष्टभूतस्य एकीकरणम्। अथवा [४०]प्रस्तरस्य सम्यग्दाहायोत्क्षेपणं, तद्यदि [V]स्फ्येन [४१V]वा [V]उपवेषेण [V]वा क्रियेत [V]सा इयं २०
यजमानस्य हिंसा। [V]हस्तेन [४२]एव योयुपनं रक्षायै भवति ॥

ब्रह्मवादिन इति ॥ प्रस्तरप्रहरणस्याऽऽधारत्वेनाऽऽहवनीयं विधत्ते– 'ब्रह्मवादिनो वदन्ति किं यज्ञस्य यजमान इति प्रस्तर इति तस्य क्व सुवर्गो लोक इत्याहवनीय इति ब्रूयाद्यत् प्रस्तरमाहवनीये प्रहरति यजमानमेव सुवर्गं लोकं गमयति' इति ॥ [V]यज्ञस्य संबन्धि [V]किम् अङ्गं यजमानस्थानीयम् [V]इति ब्रह्मवादिभिः [४३]पृष्टो बुद्धिमान् [V]प्रस्तरः [V]इति उत्तरं ब्रूयात् ॥ २५

४–४. तं.३.त्रि.मै.लं.हो–हिंसया। ५. मै.मै४–प्रब्रूयात्।

---

३८. ड.हो१–तस्मिन् प्रहरणे। ३९–शृं–विशिष्टस्य; ड.ड१–विश्लिष्टस्य। ४०. क.ड.ड१.शृं.हो१–प्रस्तरमूलस्य। ४१. आ.क–'वा' नास्ति। ४२. ड.ड१–'एव' नास्ति। ४३. आ.क.हो१–पृष्टे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि वा एतद्यजमानो लिशते यत् प्रस्तरं योयुप्यन्ते बर्हिरनु प्र हरति शान्त्या अनारम्भण इव वा एतर्ह्यध्वर्युः स ईश्वरो वेपनो भवितोर्ध्रुवाऽसीतीमामभि मृशतीयं वै ध्रुवाऽस्यामेव प्रति तिष्ठति

वीति । वै । एतत् । यजमानः । लिशते । यत् । प्रस्तरमिति प्र - स्तरम् । योयुप्यन्ते । बर्हिः । अनु । प्रेति । हरति । शान्त्यै । अनारम्भण इत्यना - रम्भणः । इव । वै । एतर्हि । अध्वर्युः । सः । ईश्वरः । वेपनः । भवितोः । ध्रुवा । असि । इति । इमाम् । अभीति । मृशति । इयम् । वै । ध्रुवा । अस्याम् । एव । प्रतीति । तिष्ठति ।

वि वा एतदिति ॥ प्रस्तरस्य यजमानत्वान् तस्य विश्लथनेन [v]यजमानः [६v]विलिशते विबाध्यते । लिश अल्पीभावे, तौदादिकः । तत्र [७]बर्हिरनुप्रहरणेन स्वस्य परिहृतत्वात् तच्छान्तिः सुखं यजमानस्य ॥

अनारम्भण इत्येत्यादि ॥ अध्वरस्य नेतृत्वाच्चलितत्वादप्रतिष्ठितत्वं वेपनत्वम् ॥

वीति ॥ सुक्षु प्रस्तरस्याञ्जनं कृत्वा तत्रैकं तृणं [४४]पृथक्कृत्य [४५]प्रज्ञातमवस्थापयेत् । तस्येदानीम् अग्नौ प्रहरणं विधत्ते–'वि वा एतद्यजमानो लिशते यत् प्रस्तरं योयुप्यन्ते बर्हिरनु प्र हरति शान्त्यै' इति । प्रस्तरमूलमुक्षिपन्तीति [r]यत् एतेन [r]यजमानः [v]विलिशते विशेषेणाल्पीभवति रोगेण कृशो भवतीत्यर्थः ॥ प्रज्ञाततत्वेन स्थापितस्य बर्हिषोऽनुप्रहरणे तस्याल्पीभावस्य [४९]शान्तिर्भवति ॥ तदेतद्बर्हिष्प्रहरणं सूत्रकारेण स्पष्टीकृतम्– "आयुषे त्वेत्यक्तस्य तृणमपादाय प्रज्ञातं निधाय" (आपश्रौ ३·६·५) इति; "[४७]अथैनमाहाऽऽग्नीध्रोऽनुप्रहरेति । यत् प्रस्तरात् तृणमपात्तं तदनुप्रहरति" (आपश्रौ ३·७·४–५) इति [४८]च ॥

अनारम्भण इति ॥ मन्त्रकाण्डे पठितेन मन्त्रेण भूमिस्पर्शनं विधत्ते – 'अनारम्भण इव वा एतर्ह्यध्वर्युः स ईश्वरो वेपनो भवितोर्ध्रुवाऽसीतीमामभि मृशतीयं वै ध्रुवाऽस्यामेव प्रति तिष्ठति न वेपनो भवति' इति ॥ [r]एतर्हि प्रस्तरप्रहरणादूर्ध्वं प्रस्तररूपस्य यजमानस्य [४९]स्वर्गेऽवस्थितत्वात् [r]अध्वर्युः [r]अनारम्भणः [r]इव निरालम्बन इव भवति । [r]सः च [r]वेपनः [r]भवितोः [r]ईश्वरः [५०]पालकस्वामिराहित्यभयेन सर्वदा कम्पनशीलो भवितुं समर्थो भवति, निरन्तरं [५१-]भीतः कम्पनः[-५१] इत्यर्थः । 'ध्रुवाऽसीति' मन्त्रेण [५२-]भूमिस्पर्शे सति[-५२] लब्धप्रतिष्ठो न कम्पते ॥

---

६. तै३.मै.मै–४ लिशते; त्रि–विशते । ७. लं.हो–अनुप्रकर्षणेन ।

४४. ड–प्रकृष्य । ४५. आ.क–प्रज्ञातं स्थापयेत् । ४६. ड–°भवतीति । ४७. उ.जौ.ना.पा. हा–अथैनमाग्नीध्रो° । ४८. ड–'वा' । ४९. ड–स्वर्गतत्वात्; ड१–स्वर्गे गतत्वात् । ५०. आ.क –पालनस्वामि° । ५१–५१. आ.क–भवति कम्पमानः । ५२. आ.क–भूमिस्पर्शनेन ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न वेपनो भवत्यगा३नग्नीदित्याह यद्ब्रूयादगन्नग्निरित्य(६)ग्नावग्निं गमयेन्निर्यजमानꣳ सुवर्गाल्लोकाद्भ्रंजेदगन्नित्येव ब्रूयाद्यजमानमेव सुवर्गं लोकं गमयति ॥ ५ ॥

[आसाद्य प्राऽनतिदृश्यं करोति हरति वियुयाद्यजमानमेवाग्निरिति सप्तदश च]

न । वेपनः । भवति । अगा३न् । अग्नीदित्यग्नि - इत् । इति । आह । यत् । ब्रूयात् । अगन् । अग्निः । इति । अग्नौ । अग्निम् । गमयेत् । निरिति । यजमानम् । सुवर्गादिति सुवः - गात् । ५
लोकात् । भ्रंजेत् । अगन् । इति । एव । ब्रूयात् । यजमानम् । एव ।
सुवर्गमिति सुवः - गम् । लोकम् । गमयति ॥ ५ ॥

[मैसं ३·८·५,६; कासं २५·५; कपिसं ३१·२; शब्रा १·३·३·२–१०, ८·३·११–२०]

[c-c]अगानग्नीदिति ॥ हे [v]अग्नीत् किम् [v]अगात्[c-c] अगमत् प्रस्तरम् [v]इति पृच्छत्यध्वर्युराग्नीध्रम् । गमेर्लुङि " मन्त्रे घस° " (पा २·४·८०) इति च्लेर्लुक् । " मो नो धातोः " (पा ८·२·६४) । १०
प्रश्ने उदात्तप्लुतः । तस्यासिद्धत्वादट उदात्तत्वेन समावेशः । अग्नीदिति आमन्त्रितानुदात्तत्वम् (पा ८·१·१९) । अथाऽऽग्नीध्रो यदि प्रतिब्रूयात् [c-v]अगन् [v]अग्निः[c-c] प्रस्तरजन्मा । यद्वा– अग्निः प्रस्तरं परिगतवान् [v]इति । तदा प्रस्तराग्निम् [v]अग्नौ प्रवेशयेत् । ततश्च [v]यजमानं स्वर्गात् [v]लोकात् [v]निर्भजेत्, तस्मात् [v]अगन् [v]इति [v]एव [v]ब्रूयात् विनैवाग्निशब्दम् । [v]यजमानं स्वर्गं [v]गमयति ॥
इति द्वितीये षष्ठे पञ्चमोऽनुवाकः ॥ १५

**अगानिति ॥ यदुक्तं सूत्रकारेण– " [५३]अथैनमाहाऽऽनीध्रः संवदस्वेति । अगानग्नीदित्यध्वर्युः । अगन्नित्याग्नीध्रः " (आपश्रौ ३·७·८–९) इति; अनयोः प्रश्नोत्तरमन्त्रयोः [५४]उत्तरमन्त्रस्य शाखान्तर-पाठनिराकरणपूर्वकं मन्त्रद्वयोच्चारणं विधते – ' अगा३नग्नीदित्याह यद्ब्रूयादगन्नग्निरित्यग्नावग्निं गमयेन्निर्यजमानꣳ सुवर्गाल्लोकाद्भ्रंजेदगन्नित्येव ब्रूयाद्यजमानमेव सुवर्गं लोकं गमयति ' इति ॥ हे [r]अग्नीत्, [५५r]अगान् हे आग्नीध्र, किं यजमानः स्वर्गं [५५]लोकं गतवान् ? प्रश्नद्योतनार्थेयं प्लुतिः । ' अगन्नग्निः ' इत्येषः २०
शाखान्तरगतो मन्त्रपाठस्तस्मिन् पाठे वह्निः स्वर्गगत इत्यर्थो भवति, [५६]तच्चायुक्तम् । आहवनीयोऽत्र स्वर्गत्वेन विवक्षितः । तस्मिन् स्वर्गरूपे [r]अग्नौ [५७r]तम् [r]अग्निम् एव प्रापितवान् भवति । [v]यजमानं स्वर्गात् [r]लोकात् [५७]निःसारितवान् भवति । तस्मात् ' अग्निः ' इत्येतत्पदं मन्त्रे परित्यज्य ' [r]अगन् ' [r]इति एतावत् [v]एव [v]ब्रूयात् । तेन यजमानः स्वर्गं [r]लोकं गतवानित्यर्थो लभ्यते ॥**

**इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये २५
द्वितीयकाण्डे षष्ठप्रपाठके पञ्चमोऽनुवाकः ॥**

८–८. तं३–अगानग्नीदिति अगाह्यग्नीतीति (?) हे अग्ने तत्किमाहान्यत्; लं–अगाह्य (?) तदिति हे अग्ने तत् किमाहान्यत् । ९–९. लं.हो–अथाग्निः ।

५३. अ.इ.उ.ड१.जो.पा.हा–अथैनमाग्नीध्रः । ५४. क.ड.हो१–' उत्तरमन्त्रस्य ' नास्ति । ५५. आ.क–' अगान् ' नास्ति । ५६. आ.क– ' लोकं ' नास्ति । ५७. अ.आ.उ.क.जो.ना.हा–तत्त्वयुक्तम्; ३० इ–तन्न युक्तम् । ५८. अ.इ.उ.जो.ना.ना.पा.हा–तत् । ५९. ड.हा.हो१–निरासितवान् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थं वाव स्य आर्तिमाऽरिष्यतीति स निलायत सोऽपः प्राविशत् तं देवताः प्रैषमैच्छन् तं मत्स्यः प्राब्रवीत् तमशपद्धियाधिया त्वा वध्यासुर्यो मा प्रावोच इति तस्मान्मत्स्यं धियाधिया घ्नन्ति शप्तो (१) हि

अग्नेः । त्रयः । ज्यायाꣳसः । भ्रातरः । आसन् । ते । देवेभ्यः । हव्यम् । वहन्तः । प्रेति । अमीयन्त । सः । अग्निः । अबिभेत् । इत्थम् । वाव । स्यः । आर्तिम् । एति । अरिष्यति । इति । सः । निलायत । सः । अपः । प्रेति । अविशत् । तम् । देवताः । प्रैषमिति प्र - एषम् । ऐच्छन् । तम् । मत्स्यः । प्रेति । अब्रवीत् । तम् । अशपत् । धियाधियेति धिया - धिया । त्वा । वध्यासुः । यः । मा । प्रेति । अवोचः । इति । तस्मात् । मत्स्यम् । धियाधियेति धिया - धिया । घ्नन्ति । शप्तः (१) । हि ।

अग्नेस्त्रय इत्यादि ॥ गतम् । इत्थं वाव स्य इति । आत्मानमेव स एष इति निर्दिशति । [V]सः [V]निलायत निरगच्छत् । " उपसर्गस्यायतौ " (पा ८·२·१९) इति लत्वम् । सोऽपः प्राविशदित्यादि । [1]गतम् । अप्सु प्रविष्टमदृश्यतां गतम् । [V]प्रैषम् इष्टविषये प्रेषितुम् [V]ऐच्छन् [V]देवताः, तदर्थं तम् अन्विच्छन्ति स्मेति यावत् । छान्दसो णमुल् । अथाप्सु स्थितः कश्चित् [V]मत्स्यः [V]तम् अग्निं [V]प्राब्रवीत् - इह [2]वसतीति । अथाग्निर्मत्स्यम् [V]अशपत् [V]यः त्वम् मामदृश्यं देवताभ्यः [V]प्रावोचः [V]तं त्वां सर्वेऽपि [V]धियाधिया कर्मणा जालग्रहणादिना व्यापारेण [3V]वध्यासुः पुरुष-व्यापारेणैव तव प्राणवियोगोऽस्त्विति । बुद्धियोगो वा धीरित्युच्यते । [V]तस्मात् शप्तत्वादद्यापि तथैव [4]म्रियते मत्स्यः ॥

प्रयोगो बर्हिषः स्पष्टं पञ्चमे प्रतिपादितः ॥

अथ षष्ठेऽनुवाक उपांशुयाजस्विष्टकृतौ वक्तव्यौ ।

अग्नेरिति ॥ तत्राऽऽदौ तावत् परिधीनां परिधानं विधातुं प्रस्तौति – ' अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् । ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थं वाव स्य आर्तिमाऽरिष्यतीति स निलायत सोऽपः प्राविशत् तं देवताः प्रैषमैच्छन् तं मत्स्यः प्राब्रवीत् तमशपद्धियाधिया त्वा वध्यासुर्यो मा प्रावोच इति तस्मान्मत्स्यं धियाधिया घ्नन्ति शप्तो हि तमन्वविन्दन् तमब्रुवन्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात् तन्मे भ्रातृणां भागधेयमसदिति तस्माद्यद्-गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति ' इति ॥ यथा [V]भ्रातरः [V]त्रयः [1-]हविः [V]वहन्तः[-1] मृताः [V]इत्थम् एव [2V]स्यः [V]आर्तिम् [V]आऽरिष्यति [V]इति यो [3]हविर्वहति स मरणं [4]प्राप्नोतीति

१. मै–' गतम् ' नास्ति । २. लं–वसन्तीति । ३. लं हो–' वध्यासुः ' नास्ति । ४. तं३. त्रि.मै.लं.हो–क्रियते ।

१–१. क.ड.ड१.शृं.हो१–हविर्वहनेन । २. ड.हा.हो१–सः । ३. ड.शृं.हो१–' हविः ' नास्ति । ४. ड.ड१.शृं–प्राप्स्यतीति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तमन्वविन्दन् तमब्रुवन्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात् तन्मे भ्रातृणां भागधेयमसदिति तस्माद्यद्गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति परिधीन् परि दधाति रक्षसामपहत्यै

तम् । अन्विति । अविन्दन् । तम् । अब्रुवन् । उपेति । नः । एति । वर्तस्व । हव्यम् । नः । वह । इति । सः । अब्रवीत् । वरम् । वृणै । यत् । एव । गृहीतस्य । अहुतस्य । बहिःपरिधीति बहिः - परिधि । स्कन्दात् । तत् । मे । भ्रातृणाम् । भागधेयमिति भाग - धेयम् । असत् । इति । तस्मात् । यत् । गृहीतस्य । अहुतस्य । बहिःपरिधीति बहिः - परिधि । स्कन्दति । तेषाम् । तत् । भागधेयमिति भाग - धेयम् । तान् । एव । तेन । प्रीणाति । परिधीनिति परि - धीन् । परीति । दधाति । रक्षसाम् । अपहत्या इत्यप - हत्यै ।

तमन्वविन्दन्नित्यादि ॥ गतम् । स्कन्दादिति । लेट्याडागमः । असदित्यडागमः । [v]तस्मात् परिधानं कर्तव्यं, [v]रक्षसां च [v]अपहत्यै भवति ॥

भीतः [v]अग्निः [r]निलायत यथा देवैर्न ज्ञायते तथा निलीनोऽभूत्। निलीय चोदकमध्ये [v]प्राविशत्। [r]तम् उद्दिश्य [५v]देवताः प्रकर्षेणान्वेषणं कर्तुम् [v]ऐच्छन्। तदा जलस्थितः [v]मत्स्यः तत्र स्थितमग्निं देवानामग्रे [r]अब्रवीत्। ततोऽग्निः [r]तं मत्स्यमेवम् [r]अशपत् – हे मत्स्य, [r]यः त्वं देवानामग्रे मामेवं ज्ञापितवानसि पिशुनो भूत्वा प्राब्रवीः, तादृशं त्वां [६]जालधारिणः कैवर्ताः [७v]धियाधिया [v]वध्यासुः, तेन तेन [८]जालादिना साधनेन; [९]यद्वा–यदा यदा हन्तुं धीर्भवति तदा तदा रात्रावहनि वा वधं [१०]कुर्वन्त्विति । यस्मादेवं [v]शप्तः [v]तस्मात् [v]मत्स्यं तदा तदा [v]घ्नन्ति । [११]मत्स्यमुखात् [१२]विज्ञातवन्तो देवाः [r]तम् अग्निं [१३]प्रति [१४]अस्मत्समीपं समागच्छ, [r]हव्यं चास्मदीयं [r]वह [v]इति [१५v]अब्रुवन्। [१६]तदा [v]सः अग्निः [१७v]वरम् अवृणीत [१८]स्रुचि [r]गृहीतस्य-[१८] हविषः संबन्धि [v]यत् [v]एव द्रव्यं होमात् पुरा परिधिभ्यो बहिः प्रच्यवेत [r]तत् अस्मदीयानां [v]भ्रातृणां [v]भागधेयम् अस्तु [v]इति । ततस्तथैव देवैर्वरो दत्तः । [१९-r]तेन स्कन्नेन-[१९] [r]तान् अग्निभ्रातॄन् यजमानः [२०v]प्रीणाति ॥

परिधीनिति ॥ [२१]इदानीं विधत्ते– 'परिधीन् परिदधाति रक्षसामपहत्यै' इति ॥ यस्मात् परिधिभ्यो बहिर्देशोऽग्नेर्भ्रातॄणामुपयुक्तस्तस्मात् [r]परिधीन् [२२]अग्नेः परितः स्थापयेत् । तत् [२३]तु [r]रक्षसाम् अपघाताय भवति ॥

५. शृं.देवाः; आ.ड–'देवताः' नास्ति। ६. हो१–जलचारिणः; अ.इ.उ.जो.पा.हा–जले धारणार्थाः; ना–जाले धारिणः। ७. ड१–धिया बुद्धया। ८. अ.इ.उ.जो.ना.पा.हा–कालादिना ९. हो१–'यद्वा' नास्ति। १०. अ.इ.उ.जो.ना.पा.हा–'इति' नास्ति। ११. आ.क.ना–मत्स्यमुखेन; अ.इ.उ.जो.पा.हा–अन्यमुखेन। १२. आ.क–विज्ञाते वह्नौ। १३. हा–'प्रति' नास्ति। १४. आ.क–अस्मत्समीपे। १५. आ–उक्ते। १६. आ–'तदा' नास्ति; क–तथा। १७. क.–वरमवृणोत्। १८–१८. क–विगृहीतस्य। १९. अ.इ.उ.पा–स्कन्नेन; जो.हा–स्कन्दनेन; ना–अतः स्कन्नेन। २०. आ.क–प्रीणयति। २१. ड.शृं.हो–'इदानीं' नास्ति। २२. ड.ड१.हो१–वह्नेः। २३. ड१–च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सꣳ स्पर्शयति (२) रक्षसामनन्ववचाराय न पुरस्तात् परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षाꣳस्यपहन्त्यूर्ध्वे समिधावा दधात्युपरिष्टादेव रक्षाꣳस्यप हन्ति यजुषाऽन्यां तूष्णीमन्यां मिथुनत्वाय द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै

समिति। स्पर्शयति (२)। रक्षसाम्। अनन्ववचारायेत्यननु - अवचाराय। न। पुरस्तात्। परीति। दधाति। आदित्यः। हि। एव। उद्यन्नित्युत् - यन्। पुरस्तात्। रक्षाꣳसि। अपहन्तीत्यप - हन्ति। ऊर्ध्वे इति। समिधाविति सम् - इधौ। एति। दधाति। उपरिष्टात्। एव। रक्षाꣳसि। अपेति। हन्ति। यजुषा। अन्याम्। तूष्णीम्। अन्याम्। मिथुनत्वायेति मिथुन - त्वाय। द्वे इति। एति। दधाति। द्विपादिति द्वि - पात्। यजमानः। प्रतिष्ठित्या इति प्रति - स्थित्यै।

संस्पर्शयतीत्यादि ॥ गतम् ॥

ऊर्ध्वे इत्यादि ॥ आधारविधिः। यजुषेति। " वीतिहोत्रं त्वा कवे " (तैसं १·१·११) इति [५]दक्षिणाम्। यजुर्वेदाम्नानात् गायत्र्येव यजुरित्युच्यते। तेन विभिन्नलिङ्गद्वयसंयोगान्मिथुनत्वम्[६] ॥

समिति ॥ पश्चिमदिशि स्थापितस्य मध्यमपरिधेर्दक्षिणोत्तरपरिधिभ्यां संस्पर्शनं विधत्ते – 'सꣳ स्पर्शयति रक्षसामनन्ववचाराय' इति ॥ [२५]परिधीनां [२५]समीचीने स्पर्शे सति [1]रक्षसां प्रवेष्टुं छिद्राभावादग्निसमीपे संचारो न भवति ॥

नेति ॥ दिक्त्रयदृष्टान्तेन पूर्वस्यामपि दिशि प्रसक्तं परिधिं वारयति – 'न पुरस्तात् परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षाꣳस्यपहन्ति' इति ॥ रक्षसामपघातः परिधेः प्रयोजनं, तच्चाऽऽदित्योदयेनैव सिद्ध्यति ॥

ऊर्ध्वे इति ॥ आग्नेय्यामैशान्यां चाऽऽधारसमिधोः स्थापनं विधत्ते – 'ऊर्ध्वे समिधावा दधात्युपरिष्टादेव रक्षाꣳस्यप हन्ति' इति ॥ दक्षिणोत्तरपरिध्योरग्रदेशे [२६]स्थापनीये ते-[२६] [1]ऊर्ध्वे। तेन स्थापनेन दिक्चतुष्टय इवोर्ध्वदेशेऽपि रक्षसामपघातो भवति ॥

यजुषेति ॥ तयोर्दक्षिणसमिधः स्थापने मन्त्रकाण्डाम्नातं 'वीतिहोत्रं त्वा कवे' (तैसं १·१·११) इति मन्त्रं विधत्ते – 'यजुषाऽन्यां तूष्णीमन्यां मिथुनत्वाय' इति ॥ स्त्रीपुरुषयोरिव समन्त्रकामन्त्रकयोः परस्परं वैलक्षण्यात् मिथुनत्वम् ॥

द्वे इति ॥ समिधो द्वित्वं प्रशंसति – 'द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै' इति ॥

---

५. लं.हो–दक्षिणा। ६. मै४–'मिथुनत्वम्' इत्यस्यानन्तरं 'द्वे इत्यादि गतम्'।

---

२४. ड.ड१.शृं.हो१–'परिधीनां' नास्ति। २५. अ.इ.उ.जो.ना.पा.हा–'समीचीने' नास्ति। २६. ड१.शृं–स्थापनीयत्वात्; क–स्थापनीये इति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मवादिनो वदन्ति स त्वै यजेत यो यज्ञस्याऽऽर्त्या वसीयान्त्स्यादिति भूपतये स्वाहा भुवनपतये स्वाहा भूतानां (३) पतये स्वाहेति स्कन्नमनु मन्त्रयेत यज्ञस्यैव तदार्त्या यजमानो वसीयान् भवति भूयसीर्हि देवताः प्रीणाति जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपाꣳशुयाजमन्तरा यजत्यजामित्वायाथो

ब्रह्मवादिन इति ब्रह्म-वादिनः । वदन्ति । सः । तु । वै । यजेत । यः । यज्ञस्य । आर्त्या । वसीयान् । स्यात् । इति । भूपतय इति भू-पतये । स्वाहा । भुवनपतय इति भुवन-पतये । स्वाहा । भूतानाम् (३) । पतये । स्वाहा । इति । स्कन्नम् । अन्विति । मन्त्रयेत । यज्ञस्य । एव । तत् । आर्त्या । यजमानः । वसीयान् । भवति । भूयसीः । हि । देवताः । प्रीणाति । जामि । वै । एतत् । यज्ञस्य । क्रियते । यत् । अन्वञ्चौ । पुरोडाशौ । उपाꣳशुयाजमित्युपाꣳशु-याजम् । अन्तरा ।

ब्रह्मवादिन इत्यादि ॥ अनार्तावस्थायां वसुमत्तरोऽस्त्विति [v]यः कामयेत । गतमन्यत् । भूयसीरिति । अनार्तावस्थाया बहुतरा इति तेनार्तत्वमेव वरमिति ॥

[v]जामि आलस्यजनकम् । [v]अन्वञ्चौ अनुपूर्वौ अन्येनाव्यवहितौ यद्भवतः [v]पुरोडाशौ तस्मादाज्यहविरुपांशुयाजः पौर्णमास्यां मध्ये भवति पुरोडाशयोः प्रधानमेव । पुरोडाशाज्यहविषोः द्वयस्य विभिन्नरूपत्वात् मिथुनत्वम् ॥

ब्रह्मवादिन इति ॥ प्रायश्चित्तरूपेण स्कन्नानुमन्त्रणं विधते – 'ब्रह्मवादिनो वदन्ति स त्वै यजेत यो यज्ञस्याऽऽर्त्या वसीयान्त्स्यादिति भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेति स्कन्नमनु मन्त्रयेत यज्ञस्यैव तदार्त्या यजमानो वसीयान् भवति भूयसीर्हि देवताः प्रीणाति' इति ॥ हविषः स्कन्दने सति [v]यज्ञस्य विनाशेन [v]यः यजमानो विनाशाभिमुखो [३७]भवति [v]सः कथं तत्परिहारेण वसुमत्तरो भवेत् [v]इति [३८]ब्रह्मवादिभिः पृष्टो बुद्धिमानुत्तरं ब्रूते – त्रिभिरेतैर्मन्त्रैः [v]स्कन्नम् [v]अनुमन्त्रयेत इति । भूपत्यादयो देवताविशेषा अग्निभ्रातरो वा, तेभ्यः '[३९v]स्वाहा' इति यदनुमन्त्रणं तेन [v]यज्ञस्य [४०-v]अपि [v]आर्त्या[-४०] विनाशं [४१]प्राप्य [v]यजमानः वसुमत्तरः [v]भवति । यस्मादयं भूपत्यादिकाः [v]भूयसीः [v]देवताः प्रीणयति तस्माद्युक्तं तस्य वसुमत्तरत्वम् ॥

जामीति । अथोपांशुयाजं विधत्ते – 'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपाꣳशु-याजमन्तरा यजत्यजामित्वायाथो मिथुनत्वाय' इति ॥ [v]यत् [v]अन्वञ्चौ [४२]अनुक्रमगतावाग्नेयाग्नीषोमीय-पुरोडाशौ स्यातामेतेन [v]यज्ञस्य [v]जामि [४३]आलस्यं [v]क्रियते । अत आलस्यपरिहाराय तयोः पुरोडाशयोर्मध्ये [v]उपांशुयाजं यजेत् । किं च पुरोडाशद्रव्यकः [४४-याग]ः एकः आज्यद्रव्यकः याग[-४४] अपर इति मिथुनत्वम् ॥

२७. अ.इ.उ.पा.हो१–'भवति' नास्ति । २८. आ–प्रश्नवा° । २९–२९. ड.ड१.शृं–स्वाहुतामिति । ३०–३०. ड.ड१.शृं–अनार्त्या । ३१. क.ड१.शृं.हो१–अप्राप्य । ३२. ड१–अनुक्रमणगता° । ३३. आ–आलस्याय । ३४–३४. आ–एको याग आज्यद्रव्यकः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मिथुनत्वायाग्निरमुष्मिँल्लोक आसीद्यमोऽस्मिन् ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यन्नाद्येन देवा अग्निमु (४)पामन्त्रयन्त राज्येन पितरो यमं तस्मादग्निर्देवानामन्नादो यमः पितॄणाꣳ राजा य एवं वेद प्र राज्यमन्नाद्यमाप्नोति तस्मा एतद्भागधेयं प्रायच्छन् यदग्नये स्विष्टकृतेऽवद्यन्ति यदग्नये स्विष्टकृतेऽवद्यति भागधेयेनैव तद्रुद्रꣳ समर्धयति

यजति । अजामित्वायेत्यजामि - त्वाय । अथो इति । मिथुनत्वायेति मिथुन - त्वाय । अग्निः । अमुष्मिन् । लोके । आसीत् । यमः । अस्मिन् । ते । देवाः । अब्रुवन् । एति । इत । इमौ । वि । परीति । ऊहाम । इति । अन्नाद्येनेत्यन्न - अद्येन । देवाः । अग्निम् (४) । उपामन्त्रयन्तेत्युप - अमन्त्रयन्त । राज्येन । पितरः । यमम् । तस्मात् । अग्निः । देवानाम् । अन्नाद इत्यन्न - अदः । यमः । पितॄणाम् । राजा । यः । एवम् । वेद । प्रेति । राज्यम् । अन्नाद्यमित्यन्न - अद्यम् । आप्नोति । तस्मै । एतत् । भागधेयमिति भाग - धेयम् । प्रेति । अयच्छन् । यत् । अग्नये । स्विष्टकृत इति स्विष्ट - कृते । अवद्यन्तीत्यव - द्यन्ति । यत् । अग्नये । स्विष्टकृत इति स्विष्ट - कृते । अवद्यतीत्यव - द्यति । भागधेयेनेति भाग - धेयेन । एव । तत् । रुद्रम् । समिति । अर्धयति ।

अग्निरमुष्मिन् लोके इत्यादि ॥ [V]अमुष्मिन् पितृलोके । व्याख्यातमन्यत् । अन्नाद्येनेति । [V]गतम् । एवंवेदिता [V]राज्यम् [V]अन्नाद्यं च [V]प्राप्नोति ॥

तस्मा एतदित्यादि ॥ शोभनमिष्टं करोतीति स्विष्टकृन्नामा [8]प्रकृतादग्नेः प्रशस्तो योऽन्योऽग्निः तस्मात् तदीयेनैवावदानेन [V]रुद्रम् [V]एव भागसमृद्धं करोति, तस्य रुद्रात्मकत्वात् ॥

अग्निरिति ॥ अथ स्विष्टकृतं विधत्ते- ' अग्निरमुष्मिँल्लोक आसीद्यमोऽस्मिन् ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यन्नाद्येन देवा अग्निमुपामन्त्रयन्त राज्येन पितरो यमं तस्मादग्निर्देवानामन्नादो यमः पितॄणाꣳ राजा य एवं वेद प्र राज्यमन्नाद्यमाप्नोति तस्मा एतद्भागधेयं प्रायच्छन् यदग्नये स्विष्टकृतेऽवद्यन्ति यदग्नये स्विष्टकृतेऽवद्यति भागधेयेनैव तद्रुद्रꣳ समर्धयति ' इति । पुरा कदाचित् [V]अग्निः स्वर्गे स्थितः, [V]यमः तु भूलोके, तदा मनुष्याणां पाकादिनिष्पादनाभावात् पितॄणां राजाभावाच्चाग्नियमयोर्विपरिवर्तनं [35]कर्तुमिच्छन्तः [V]देवाः आगच्छतेति परस्परमाहूय [V]अन्नाद्येन उत्कोचेन [36-V]तम् [V]अग्निं-[36] भूलोके [37]समागन्तुमुपच्छन्दितवन्तः । [V]पितरः तु [V]राज्येन उत्कोचेन [V]यमं स्वर्गलोके [38]गन्तुं प्रलोभितवन्तः । यस्मादेवं [V]तस्मात् [V]देवानां मध्ये [39-V]अग्निः [V]अन्नादः-[39] बह्वन्नभक्षकोऽभूत् । [V]यमः च [V]पितॄणां [V]राजा अभूत् । [V]यः एतदुभयं [V]वेद स [40]प्रकृष्टराज्यम् [V]अन्नाद्यं च [V]प्राप्नोति । ततः देवाः [V]तस्मै अग्नये भागं दत्तवन्तः । कोऽसौ भागः ? यजमानाः [V]अग्नये [V]स्विष्टकृते [V]यत् हविः [V]अवद्यन्ति सोऽस्य भागः । तस्मादग्नये स्विष्टकृतेऽवद्येत् । तथा सति [41-V]तत् [V]अग्नये दत्तेन-[41] भागेन [V]रुद्रं क्रूरमग्निं समृद्धं करोति ॥

७. हो-गदितम् । ८. हो-' प्रकृतादग्नेः ' - नास्ति ।

३५. आ-कर्तुमिच्छावन्तः । ३६-३६. वह्निम् । ३७. अ.इ.उ.जो.ना.पा.हा-समानेतुमिच्छितवन्तः । ३८. ना.हा-नेतुं । ३९-३९. ड१.हो१-वह्निः । ४०. ड१.शृं.हो१-प्रभूतराज्यम् । ४१-४१. क-तदग्नये देवैर्दत्तेन; ड१.शृं.हो१-देवैर्दत्तेन ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपांशुयाजस्विष्टकृतौ]

सकृत्सकृदव द्यति सकृदिव हि रुद्र उत्तरार्धादव द्यत्येषा वै रुद्रस्य (५) दिक् स्वायामेव दिशि रुद्रं निरवदयते द्विरभि घारयति चतुरवत्तस्याऽऽप्त्यै पशवो वै पूर्वा आहुतय एष रुद्रो यदग्निर्यत् पूर्वा आहुतीरभि जुहुयाद्रुद्राय पशूनपि दध्यादपशुर्यजमानः स्यादतिहाय पूर्वा आहुतीर्जुहोति पशूनां गोपीथाय ॥(६)॥

[शप्तः स्पर्शयति भूतानामग्निꣳ रुद्रस्य सप्तत्रिꣳशच्च ।]

सकृत्सकृदिति सकृत्-सकृत् । अवेति । द्यति । सकृत् । इव । हि । रुद्रः । उत्तरार्धादित्युत्तर-अर्धात् । अवेति । द्यति । एषा । वै । रुद्रस्य (५) । दिक् । स्वायाम् । एव । दिशि । रुद्रम् । निरवदयत इति निः-अवदयते । द्विः । अभीति । धारयति । चतुरवत्तस्येति चतुः-अवत्तस्य । आप्त्यै । पशवः । वै । पूर्वाः । आहुतय इत्या-हुतयः । एषः । रुद्रः । यत् । अग्निः । यत् । पूर्वाः । आहुतीरित्या-हुतीः । अभीति । जुहुयात् । रुद्राय । पशून् । अपीति । दध्यात् । अपशुः । यजमानः । स्यात् । अतिहायेत्यति-हाय । पूर्वाः । आहुतीरित्या-हुतीः । जुहोति । पशूनाम् । गोपीथाय ॥ (६) ॥

[मैसं ३·८·६; कासं २५·७, कपिसं ३९·५; शब्रा १·२·३·१; ३·३·१३–१७; ६·३·२७, २८; ७·३·२०]

सकृत्सकृदिति ॥ एकवारमेकवारं सर्वेषु । "एकस्य सकृच्च" (५·४·१९) इति निपात्यते । सकृदिवेति । [9]अनावृत्त्यादिसामान्यत्वात् तुल्योत्कृष्टरहिते पदे स्थितत्वात् । एषेति । उद्गततरा उत्तरा, [10]अण्डावरणैरप्यनावृतत्वात् । [11]निरवदयते इति निष्कृष्य देवतान्तरेभ्यो व्यावृत्तं भागेन तर्पयति । द्विरित्यादि । गतम् ॥

पशवो वा इत्यादि ॥ अभिहोम उपरि होमः । अतिहाय होमः अतिलङ्घ्य होमः ॥

इति द्वितीये षष्ठे षष्ठोऽनुवाकः ॥

सकृत्सकृदिति ॥ यदुक्तं सूत्रकारेण – "सर्वेषां [42]हविषां उत्तरार्धात् [43] सकृत्सकृत् [44]स्विष्टकृतेऽवद्यति" (आपश्रौ २·२०·३) इति, तदेतद्विधते – 'सकृत्सकृदव द्यति सकृदिव हि रुद्र उत्तरार्धादव द्यत्येषा वै रुद्रस्य दिक् स्वायामेव दिशि रुद्रं निरवदयते' इति । 'एक एव रुद्रः' (तैसं १·८·६) इति श्रुत्यन्तरात् सकृदवदानसदृशः [45]रुद्रः । येयमैशानी [45]सैव [46]एषा [46]रुद्रस्य [46]दिक् । सा चोत्तरभागवर्तिनी । [46]तस्मात् [46]उत्तरार्धात् अवदानेन स्वकीयायामेव [46]दिशि [46]रुद्रं निःशेषेण तोषयति ॥

द्विरिति ॥ इतरहविषामिव सकृदभिघारणं प्राप्तमपवदति– 'द्विरभिघारयति चतुरवत्तस्याऽऽप्त्यै' इति ॥ उपस्तरणमेकं हविरवदानं द्वितीयं [47]-[47]द्विः अभिघारणं चान्तत इति चतुरवत्तं संपद्यते[47]-[47] ॥

९. त्रि–अनाघृत्ति°; लं–अनावृत्तादि°; मै४–अनावृत्तात्मादि°; पं२–°सामान्यात् । १०. मै४–सान्द्राचरणैः ।

४२. इ.ना–'हविषां' नास्ति । ४३. हा–सकृत् । ४४. आ–अवद्यति स्विष्टकृते । ४५. ड१.हो१–सा । ४६. इ.क.जो.ना.हा–°दुत्तरार्धावदानेन । ४७–४७. क.ड.ड१.शृं.हो१–ततो द्विरभिघारणेन चतुरवत्तसंपत्तिः । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पशव इति ॥ यदुक्तं सूत्रकारेण – "उत्तरार्धपूर्वार्धे जुहोति । [४८]असंसक्ताभिरितराभिराहुतिभिः" (आपश्रौ २·२०·६) इति तदेतद्विधत्ते– 'पशवो वै पूर्वा आहुतय एष रुद्रो यदग्निर्यत् पूर्वा आहुतीरभि जुहुयाद्रुद्राय पशूनपि दध्यादपशुर्यजमानः स्यादतिहाय पूर्वा आहुतीर्जुहोति पशूनां गोपीथाय' इति ॥ [र]पूर्वाः पुरोडाशाद्याहुतयः [४९]पशुस्वरूपाः पशुवदिष्टार्थप्रापकत्वात् । अयं तु [र]अग्निः क्रूरत्वात् [र]रुद्रः । यदि [र]पूर्वाः [र]आहुतीः [र]अभि संबध्य तासामुपरि [र]जुहुयात् तदा [र]पशून् [५०]सर्वान् घातुकाय [र]रुद्राय प्रयच्छेत् । ततो [५१][र]यजमानः [र]अपशुः [र]स्यात् । तस्मात् [र]पूर्वाः [र]आहुतीः परित्यज्य दूरे जुहुयात् । [५२-]स च[-५२] होमः [र]पशूनां [५३]रक्षायै भवति ॥

अत्र मीमांसा ॥ द्वितीयाध्यायस्य द्वितीयपादे चिन्तितम् –

"उपांशुयाजमित्येषोऽनुवादोऽन्याथवा विधिः ।
विष्ण्वादिवाक्ये विस्पष्टविधेरस्यानुवादता ।
जामित्वोक्तेरन्तराल उपांशुगुणके विधौ ।
सत्यर्थवादो [५४-]विष्ण्वादिस्तद्रूपं ध्रौवमन्त्रतः[-५४]" ॥ (जैन्या २·२·११–१२) ॥

[५५-]दर्शपूर्णमासयोः श्रूयते[-५५]–"जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपाꣳशुयाजमन्तरा यजति" (तैसं २·६·६) इति, "विष्णुरुपांशु यष्टव्योऽजामित्वाय प्राजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वाय" इति [च] । तत्र विष्ण्वादिवाक्येषु विहितस्य यागत्रयसमुदायस्यानुवादो, '[५५-]जामि वा एतत्' इति वाक्यमिति चेत्, न [-५६] आग्नेयाग्नीषोमीयपुरोडाशद्वयनैरन्तर्यकृतस्य[५७] जामित्वदोषस्य वाक्योपक्रम उपन्यासात् पुरोडाशयोरन्तराले किंचिद्विधित्सितम् । न ह्यन्तरालगुणविशिष्टं विधेयं विष्ण्वादिवाक्येषु प्रतीयते । [५८-]पूर्ववाक्ये तु तत्प्रतीयते[-५८] इति विधायकं तद्वाक्यम् । न चात्र 'यजति' इति [५९]वर्तमाननिर्देशः शङ्कनीयः । पञ्चमलकारस्याऽऽश्रयणात्[६०] । [६१]अन्तरालकालवत् उपांशुत्वगुणस्यापि विशेषणत्वात् तद्विशिष्टकर्मण [६२]उपांशुयाजनामकत्वम् । सत्येवं गुणद्वयविशिष्टकर्मण्याद्येन वाक्येन विहिते [६३]विष्ण्वादिवाक्यत्रयमर्थवादः स्यात् । न चात्र विहितयागानुवादेन देवताविधिः शङ्कनीयः । समाधातव्येन जामित्वदोषेणोपक्रमादजामित्वेन समाधानेनोपसंहाराच्च । [६४-]'जामि वा' इत्यादेः[-६४] 'अजामित्वाय' इत्यन्तस्य [६५]सर्वस्य [६६]महावाक्यस्यैकवाक्यत्वप्रतीतेः । न खल्वेकस्मिन् वाक्ये विधेयबाहुल्यं संभवति । न चात्र विधित्सितस्योपांशुयाजस्य [६७]द्रव्याभावः । [६८]ध्रौवस्यैव [६९]तद्द्रव्यत्वात् । [७०-]नापि देवताया असंभवः[-७०] । [७१]नानाशाखासूपांशुयाजक्रमे पठितैर्वैष्णवप्राजापत्याग्नीषोमीयमन्त्रैर्विकल्पेन देवतात्रयस्य प्रतीयमानत्वात् । तस्मात् [७२]यजतीत्येतद्विधायकम् ॥

---

४८. आ–असंसृष्टाभि° । ४९. ना–'पशुस्वरूपाः' नास्ति । ५०. ड.१हो१–'सर्वान्' नास्ति । ५१. हा–'यजमानः' नास्ति । ५२–५२. आ–एवं । ५३. आ–संरक्षणाय । ५४–५४. ड.हो–°स्तद्रूपज्ञानमन्त्रतः । ५५–५५. क–इदमाम्नायते । ५६–५६. अ–'जामि वा ...चेत् न' नास्ति; ड१.शृं–इति चेन्मैवम्, क.जो.ना.हा.हो१–इति चेत् न' । ५७. अ.इ.उ.पा.–°नैरन्तर्यस्य । ५८–५८. अ.इ.उ.पा–'पूर्ववाक्ये तु तत्प्रतीयते' नास्ति । ५९. ना.शृं–वर्तमानापदेशः; इ.उ.ड१.जो.पा.हा–वर्तमानादेशः । ६०. जो– °श्रवणात् । ६१. ड१.हो१–°पांशुगुणस्यापि; अ.इ.उ.पा–अन्तरालकाले उपांशुत्वस्यापि; क.जो.हा–अन्तरालकाले उपांशुत्वगुणस्यापि । ६२. ड.हो१–°नामकत्वे । ६३. आ.ड–°वाक्यमर्थवादः स्यात् । ६४–६४. ड–जामित्वादेः । ६५. ड–'सर्वस्य' नास्ति । ६६. ड१–°वाक्यस्यैकत्व° । ६७. ड१.शृं–द्रव्याभावात् । ६८. ड.ड१.शृं–ध्रौवस्य । ६९. आ–द्रव्यत्वात् । ७०–७०. अ.इ.पा.जो.ना.हा–नैव देवताया अप्यसंभवः; ड१.शृं–नापि देवताया अभावः । ७१. हो१–°याजे क्रम° । ७२. अ.इ.उ.पा–जामीत्ये° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[७३]दशमस्याष्टमे चिन्तितम् –

" उपांशुयाजे यत्किंचिद्द्रव्यमाज्यमुताग्रिमः ।
विशेषानुक्तितो मैवं ध्रौवाज्यस्य विधानतः " ॥ (जैन्या १०·८·२९) ॥

" उपांशुयाजमन्तरा यजति " (तैसं २·६·६) इत्यत्र द्रव्यविशेषस्यानुक्तत्वादैच्छिकं द्रव्यमिति चेत् । [७४]न । आज्यस्य श्रुतत्वात् । " तावब्रूतामग्नीषोमावाज्यस्यैव[७५] तावुपांशु पौर्णमास्यां यजन् " इति श्रुतम् । न [७६]चैवमप्यनियतं यत्किंचिदाज्यं स्यादिति हि शङ्कनीयम् । ध्रौवस्य विहितत्वात् । " सर्वस्मै वा एतद्यज्ञाय गृह्यते । यद्ध्रुवायामाज्यम् " (तैब्रा ३·२·५) इति विहितम् । विध्यश्रवणेऽपि ध्रौवाज्यस्य सप्रयोजनत्वाय विपरिणामः कर्तव्यः ॥

तत्रैवान्यच्चिन्तितम् –

" तत्र यः कोऽपि देवः स्यात् तान्त्रिको वाऽग्रिमो भवेत् । १०
अविशेषात् प्रकरणात् [७७]तान्त्रिकोऽत्र नियम्यते " ॥ (जैन्या १०·८·३०) ॥

[७८]-तत्रोपांशुयाजे या काचिद्देवता स्यात् । " विष्णुरुपांशु यष्टव्यः " (द्र.आश्रश्रौ १·३·१२) इत्यादेरर्थवादत्वेनाविधायकत्वात्, अन्यस्य च देवताविधेरदर्शनात्, यागेन देवतामात्रस्यैव कल्पनाच्च । मैवम्[-७८] । उपांशुयाजस्य [७९]दर्शपूर्णमासप्रकरणपठितत्वात् दर्शपूर्णमासतन्त्रमध्यपठित एव कश्चिद्देवः प्रत्यासत्योपांशुयाजे नियम्यते ॥ १५

तत्रैवान्यच्चिन्तितम् —

" कोऽपि देवस्तान्त्रिकेषु नियतो वा [८०]तदाऽपि किम् ।
प्रजापतिरुताग्निः स्यादग्नीषोमावुताथ[८१] वा ॥
विष्णुर्यद्वाऽग्निमुत्सृज्य विकल्प्यं देवतात्रयम् ।
[८२]कोऽप्यत्रानियमान्मैवमुपांशुत्वादियन्त्रणात् ॥ २०
प्रजापतिरुपांशुत्वान्न तूष्णींभावयोगतः ।
[८३]-अग्निर्मुख्यत्वतो मैवं तद्याज्यादेरपाठतः[-८३] ॥
अग्नीषोमौ [८४]-तदुक्तेर्नो तत्र कालविधानतः[-८४] ।
[८५]विष्णुर्याज्यादितस्तन्न प्राजापत्योक्तिबाधनात् ॥
याज्यात्रैविध्यतः प्राप्ता विकल्प्यन्तेऽत्र देवताः । २५
[८६]विधिशेषेऽर्थवादेऽपि प्राप्तं त्रयमनूद्यते " ॥ (जैन्या १०·८·३१–३५) ॥

तान्त्रिकदेवेषु नियामकाभावाद्यः कोऽपीति चेत् । न । वक्ष्यमाणानामुपांशुत्वादीनां नियामकत्वात् ।

---

७३. आ.क.–दशमाध्यायस्यान्तिमपादे; ड.ड१–दशमाध्यायस्याष्टमपादे । ७४. ड.ड१.शृं–मैवम् । ७५. इ.उ.जो.ना.पा.हा–'एव' नास्ति । ७६. हो१–चैवमत्र नियतम् । ७७. ड१–तान्त्रिकोऽथ । ७८–७८. अ.इ.उ.ड.ड१.पा.शृं.हो१–'तत्रोपांशुयाजे.....मैवम्' नास्ति । ७९. ड१–'दर्शपूर्णमासपठि- ३० तत्वात्' नास्ति । ८०. ड.ड१–तथाऽपि । ८१. आ.क.–°वुतापि । ८२. अ.इ.उ.पा–°नियमान्नैव° । ८३–८३. अ.इ.उ.पा–अग्नेर्मुख्यत्वतो मैवं तु याज्यादेव पाठितेः; ड१–अग्निर्मुख्यवतो मैवं तद्याज्यादेव पाठतः । ८४–८४. अ.इ.उ.पा–तदुक्तेस्तौ भिन्नकालविधानतः । ८५. अ.इ.उ.पा–°र्याज्यादितन्त्रेण । ८६. अ.इ. उ.जो.पा.हा–°शेषार्थवादोऽपि; क.ड.ड१.शृं.हो१–°शेषार्थवादेऽपि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'यत्किंचित् प्राजापत्यं यज्ञे [८७]क्रियते, उपांश्वेव[८८] तत् क्रियते' इति [८९]वचनादुपांशुत्वधर्मसाम्येन प्रजापतिर्देवतेति चेन्न। "प्रजापतिं मनसा ध्यायेत्" (द्र.तैसं २·५·११) इति विधेस्तूष्णींभावस्यैव प्रजापतिधर्मत्वात्। प्रथमयागदेवत्वेन मुख्यत्वादग्निर्देवतेति चेत्। न। [९१]तदुपांशुयाजक्रमेऽग्निविषययाज्याद्य-पाठात्। 'तावब्रूताम्' इत्यादिपूर्वोदाहृतवाक्यादग्नीषोमौ देवतेति चेन्न। तस्य वाक्यस्य [९०]पौर्णमासी-कालविधायकत्वात्। कस्यांचिच्छाखायामुपांशुयाजक्रमे वैष्णवयाज्यापुरोनुवाक्ययोः पाठाद्विष्णुर्देवतेति चेन्न। तथा सति [९२]शाखान्तरप्रोक्तयोः [९३]प्राजापत्ययाज्यापुरोनुवाक्ययोर्बाधः [९४]प्रसज्येत। [९५]तस्मान्नानाशाखासु [९६]पठिताभ्यां [९७]विष्णुप्रजापत्यग्नीषोमविषयाभ्यां याज्यापुरोनुवाक्याभ्यां प्राप्तास्तिस्रो देवता [९७]विकल्पन्ते। अत [९८]एवोपांशुयाजविधिशेषेऽर्थवादेऽप्येतदेव प्राप्तं देवतात्रयमनूद्यते – 'विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वाय' इति। तस्मात् [९९]देवताविकल्पः सिद्धान्तः॥

तत्रैवान्यच्चिन्तितम् –

"[१००]दर्शादर्शावस्य कालो दर्श एवान्य एव वा।
द्विपुरोडाशसांनिध्यादाद्यो [१०१]-दर्श प्रकृत्य तु-[१०१]॥
[१०२]विष्णुयाज्योक्तितः [१०३]पक्षो मध्यमः पूर्णमाविधेः।
स एव कालो याज्याया उत्कर्षः पूर्णमादिने"॥ (जैन्या १०·८·३६-३७)॥

"जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपाꣳशुयाजमन्तरा यजत्यजामित्वाय" (तैसं २·६·६) इति पुरोडाशयोर्मध्ये [१०४]असौ यागो विहितः। पुरोडाशौ च पौर्णमास्यामाग्नेयाग्नीषोमीयौ। अमावास्यायामाग्नेयैन्द्राग्नौ। ततो द्विपुरोडाशसंनिधेः समानत्वादर्शः पूर्णिमा चेत्युभयमपि तस्योपांशुयाजस्य काल इत्याद्यः पक्षः। अमावास्यां प्रकृत्य याज्याकाण्ड आग्नेययाज्याया ऊर्ध्वमैन्द्राग्नयाज्याया अधस्तात् वैष्णवयाज्यायाः पाठात् प्रकरणस्य संनिधितः प्रबलत्वादर्श एव काल इति मध्यमः पक्षः। "तावब्रूतामग्नी-षोमावाज्यस्यैव[१०५] तावुपांशु पौर्णमास्यां यजन्" इति पौर्णमास्यास्तत्कालत्वेन विधानाद्वाचनिकस्य[१०६] च विधेः प्रबलत्वात् पौर्णमास्येव कालः। तथा सति वैष्णवयाज्या प्रकरणादुत्कृष्यताम्॥

तत्रैवान्यच्चिन्तितम् –

"पुरोडाशैक्ययुक्तायां पौर्णमास्यामयं न हि।
स्याद्वा नास्त्यन्तरेत्युक्तेः [१०७]-लक्ष्ये कालेऽस्ति-[१०७] शङ्खवत्"॥ (जैन्या १०·८·३८)॥

सोमात् प्रागग्नीषोमीयपुरोडाशरहिता, केवलाग्नेयपुरोडाशयुक्ता पौर्णमासी भवति। 'स

८७–८७. अ.इ.उ.पा– श्रूयते उपांशु च, हो१– क्रियेत उपांश्वेव। ८८. इ–°पांशुत्वं साम्येन; अ.उ.ड.ड१.पा.शृं.हो१– °पांशुत्वसाम्येन। ८९. ना–उपांशु°। ९०. अ.इ.पा– पौर्णमासकाल°। ९१. हा–शाखान्तरे प्रोक्त। ९२. ड१–प्राजापत्ययोः याज्या°; अ.इ.ना.पा.हा–°याज्यानु°; जो–°याज्यावाक्य°। ९३. ड–प्रसज्यते। ९४. ड१–तस्मिन्नानाशाखानु°। ९५. अ.इ.पा–पाठात् ताभ्यां। ९६. अ.इ.ड.जो.ना.पा.हा–विष्णुप्राजा°; ड.हो१.शृं–विष्णुप्राजापत्यग्नीषोमविषय°। ९७. ड. ड१–विकल्प्यन्ते। ९८. हा–°शेषेऽप्यर्थ°। ९९. अ.इ.जो.ना.पा.हा–देवताविषयः। १००. आ.क–दर्शादिर्वा तस्य। १०१-१०१. आ.क.जो.ना–दर्शेऽग्नितोऽग्रतः; अ.इ.पा.–दर्शे प्रकृत्य तु; हा–दर्शाऽग्नितो-ऽग्रतः। १०२. अ.इ.जो.पा.हा–°वाक्योक्तितः। १०३. अ.क.जो.ना हा–युक्तो। १०४ ड१–सः। १०५. अ.जो.ना.पा–°वाज्यस्य; हो१–°वाज्यभागस्यैव। १०६. ड१–'च' नास्ति। १०७-१०७. हो१–लक्ष्यकालोऽस्ति; शृं–लक्ष्ये कालोऽस्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमेनेष्ट्वाऽग्नीषोमीयो भवति ' इति वाक्येनाग्नीषोमयोः [१०८]सोमयागोत्तरकालीनत्वावगमात् [१०९]तस्यामयमुपांशुयाजो [११०]यागो नास्ति। कुतः? ' उपांशुयाजमन्तरा यजति इति [१११]पुरोडाशद्वयान्तरालवर्त्तस्य गुणत्वेन विधानादिति प्राप्ते ब्रूमः – किं [११२]यागे पुरोडाशावन्तरालकालस्य विशेषणभूतावुतोपलक्षणीभूतौ। नाऽऽद्यः, [११३]अन्तरालकालवत् तद्विशेषणयोः [११४]पुरोडाशयोरपि उपांशुयाजगुणत्वप्रसङ्गात्। न चैतद्युक्तम्। उपांशुयाजवत् तयोरपि स्वातन्त्र्येणैव[११५] फलान्वयात्। द्वितीये तु शङ्खन्यायेन [११६]उपलक्षकस्याग्नीषोमीयपुरोडाशस्याभावेऽप्युपलक्षिते काले यागोऽस्ति। यथा शङ्खध्वनिवेलायां राजसेवार्थं प्रतिदिनमागन्तव्यमित्युक्ते कस्मिंश्चिद्दिने तं[११७] शङ्खं श्रुत्वा पुरुषस्याभावेनोपलक्षकस्य ध्वनेरभावेऽप्युपलक्षिते तस्मिन् काले [११८]सेवकाः समागच्छन्ति[११८]। तथाऽत्रापि द्रष्टव्यम्। यदि तत्र [११९]कालोपलक्षकमन्यदेव [१२०]व्यापारान्तरं सूर्यगत्यादिकं संभाव्येत [१२१]तर्ह्यत्रापि संभवत्येवाऽऽग्नेयपुरोडाश उपलक्षकः। तस्मादेकपुरोडाशायामपि पौर्णमास्याम् [१२२]अस्ति [१२३]उपांशुयाजः॥ १०

तृतीयाध्यायस्य पञ्चमपादे चिन्तितम्–

" उपांशुयाजद्रव्येण शेषकार्यं भवेन्न [१२४]वा।
[१२५]भवेद्धविर्भ्यः सर्वेभ्य इत्युक्त्या प्रापितत्वतः॥
उक्ताज्यद्रव्यशेषस्तु [१२६]भाव्युपस्तरणादिकृत्।
अतो न [१२७]प्रतिपत्यर्हः शेषकार्यं ततः कथम्" ॥ (जैन्या ३·५·१–२)॥ १५

ध्रौवादाज्यादुपांशुयाजार्थमवदाने कृते तच्छेषेण ध्रौवेण स्विष्टकृदादिकं शेषकार्यं कर्तव्यम्। कुतः? "[१२८]तद्यत् सर्वेभ्यो हविर्भ्यः [१२९]समवद्यति" (द्र.आपश्रौ २·२०·३) इति वाक्येन प्रापितत्वादिति चेत्। मैवम्। कृतार्थद्रव्यशेषो ह्युपयोगापेक्षः प्रतिपत्तिमर्हति[१३०], ध्रौवं त्वाज्यं न कृतार्थम्। तेन कर्तव्यानां भविष्यतामुपस्तरणादीनां सद्भावात्। तस्मान्न तेन शेषकार्यं भवति॥

[१३१]चतुर्थाध्यायस्य प्रथमपादे चिन्तितम्– २०

" स्विष्टकृत् संस्कृतौ क्षीण उतापूर्वोपयोग्यपि।
प्रयोजनैक्यमेकस्मिन् युक्तं [१३२]कर्मण्यतः क्षयः[१३२]॥
मन्त्रेण देवसंस्कारः [१३३]प्रक्षेपाद्द्रव्यसंस्कृतिः।
[१३४]त्यागादपूर्वमुत्सन्नं प्रधानापूर्वगं च तत्" ॥ (जैन्या ४·१·१५-१६)॥

योऽयं स्विष्टकृद्यागः सोऽयमुपयुक्तहविःशेषसंस्कार इत्यविवादम्। तत्र संस्कारस्य दृष्टप्रयोजनत्वेनावश्यंभावे सति तावतैवोपक्षीणः स्विष्टकृद्यागो नापूर्वस्योपकरोति। न ह्येकस्मिन् कर्मणि प्रयोजनद्वयं २५

---

१०८. आ.क–सोमोत्तर°; श्रृं.हो१–कालत्वावगमात्। १०९. क.हो१–तस्मादुपांशुयाजो। ११०. क.ड.श्रृं.हो१– यागो ', नास्ति। १११. अ.इ.ड१.पा.हो१–°रालत्वस्य; श्रृं–रालस्य। ११२. ड. ड१.श्रृं– ' यागे ' नास्ति। ११३. आ.क–अन्तरालवत्। ११४. आ.क–' पुरोडाशयोः ' नास्ति। ११५. अ.इ.जो.ना.पा.हा–' एव ' नास्ति। ११६. अ इ.जो.ना.पा.हा–उपलक्षणस्याग्नी°। ११७. आ.क–' तं ' नास्ति। ११८-११८. आ.क–सेवकः समागच्छति; हो१–' सेवकाः ' नास्ति। ११९. अ.इ.क.ड१.जो. पा.श्रृं.हा.हो१–°लक्षकत्वमन्यदेव। १२०. आ.जो.हा–व्यापार°। १२१. अ.इ.ड.पा.हो१–तथात्रापि। १२२. हा–अस्तु; अ.इ.ड.पा.हो१– ' अस्ति ' नास्ति। १२३. ड.हो१–उपांशुयाजः कर्तव्यः। १२४. ड–च। १२५. अ.इ.पा–भवेत् ध्रुवार्थः। १२६. अ–°स्तरणादितः। १२७. ड.हो१–प्रतिपत्यर्थम्। १२८. अ.इ.पा–तच्च। १२९. अ.इ.जो.पा.हा–संभवति। १३०. ड१.श्रृं–°मर्हतीति। १३१. ड–चतुर्थस्याध्यायस्य। १३१–१३२. आ–कर्मण्यतः क्षयी; ड–कर्मण्यपक्षयः; हो१–कर्मण्युपक्षयः; क–कर्मण्यतः क्षयः। १३३. अ.इ.उ.पा.जो.हा–प्रक्षेपो द्रव्यसंस्कृतिः। १३४. अ.ह.उ.पा–यागाद°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युक्तमिति प्राप्ते ब्रूमः- कर्मण एकत्वेऽप्यंशभेदात् प्रयोजनभेदो न विरुध्यते। मन्त्रपाठो द्रव्यप्रक्षेपो देवतोद्देशेन त्यागश्चेति त्रयोंऽशाः। तत्र त्यागेन परमापूर्वोपयुक्तमवान्तरापूर्वमुत्पद्यते। तस्मात् स्विष्टकृत् उभयार्थः। [१३५]एवमन्त्यप्रयाजपशुपुरोडाशावप्युदाहार्यौ।

[१३६]तत्रैवान्यच्चिन्तितम्-

" प्रयोजकः स्विष्टकृत् किं पुरोडाशोत्तरार्धयोः।
यद्वा [१३७]-प्रयुक्तोपजीवी स्यादाद्यः -[१३७] स्वस्य सिद्धये॥
उत्तरार्धेतिशब्दस्य प्रकृताकाङ्क्षणे सति।
[१३८]अग्न्याद्यर्थं पुरोडाशमुपजीव्यैष [१३९]वर्तताम्" ॥ (जैन्या ४·१·२६-२७)॥

दर्शपूर्णमासयोः श्रूयते- " उत्तरार्धात् स्विष्टकृते समवद्यति " (द्र.आपश्रौ २·२०·३)इति। सोऽयं स्विष्टकृद्यागः कस्यचित् [१४०]नूतनस्य पुरोडाशस्य तदुत्तरार्धस्य [१४१]च प्रयोजकः। तदुभयाभावे [१४२]स्वसिद्धय-भावादिति चेत्। मैवम्। उत्तरशब्दोऽर्धशब्दश्च सर्वनामत्वाद्भागवाचित्वाच्च प्रकृतं कंचिद्भागिनमाकाङ्क्षतः। [१४३]अग्न्यादिदेवतार्थः पुरोडाशः प्रकृतो भागवांश्च। तस्मात् तमेवोपजीव्य स्विष्टकृद्यागः प्रवर्तते न त्वन्यस्य प्रयोजकः॥

तृतीयाध्यायस्य चतुर्थपादे चिन्तितम्-

" [१४४]-शेषात् स्विष्टकृदेकस्मात् सर्वेभ्यो वैकतः [१४५]क्रतौ।
[१४६]शास्त्रार्थसिद्धिः सर्वेभ्यः कार्यः [१४७]संस्कारसाम्यतः " ॥ (जैन्या ३·४·३५)॥

दर्शपूर्णमासयोः श्रूयते[-१४४]- " शेषात् स्विष्टकृते समवद्यति " इति। तत्राऽऽग्नेयादीनां त्रयाणां हविषां मध्ये यस्य कस्यचिदेकस्य हविषः शेषादवदातव्यं, तावतैव [१४८]शास्त्रानुष्ठानसिद्धेरिति चेत्। मैवम्। उपयुक्तं हविः संस्कर्तुम् [१४९]इदम् अवदीयते। संस्कारश्च सर्वेष्वपि हविःषु समानः। तस्मात् सर्वेभ्यो हविःशेषेभ्यः स्विष्टकृदनुष्ठेयः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे षष्ठप्रपाठके षष्ठोऽनुवाकः॥

---

१३५. अ.इ.उ.पा-एवमस्य प्रयोजनं। पशुपुरोडाशावप्युदाहरणं। १३६. क-अत्रै°। १३७-१३७. अ.पा-प्रयुक्तो यजतिः स्यादाद्यस्तस्य; इ-प्रयुक्तौ यजतिः स्यादाद्यत्नस्य (?), ड-प्रयुक्तोपजीवः स्यादा°; क-प्रकृतोपजीवी°। १३८. अ-अर्धाद्यर्थ°। १३९. अ-वर्तनम्; इ-वर्तते। १४०. अ.इ.उ.पा-'नूतनस्य' नास्ति। १४१. ड-'च' नास्ति। १४२. श्रृं.हो१-सिध्यभा°। १४३. अ.इ.उ.पा-°देवताकः। १४४-१४४. 'शेषात्..... श्रूयते' नास्ति। १४५. अ.क.जो.ड.ना-कृते। १४६. ड१-°सिद्धेः। १४७. ड१-संस्कार्यसाम्यतः। १४८. आ.क.ड१.श्रृं.हो१-शास्त्रार्थानु°। १४९. अ.इ.उ. जो.ना.पा.हा-'इदम्' नास्ति।

CC-0. Shri Vijoin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मनुः पृथिव्या यज्ञियमैच्छत् स घृतं निषिक्तमविन्दत् सोऽब्रवीत् कोऽस्येश्वरो यज्ञेऽपि कर्तोरिति तावब्रूतां

मनुः । पृथिव्याः । यज्ञियम् । ऐच्छत् । सः । घृतम् । निषिक्तमिति नि - सिक्तम् । अविन्दत् । सः । अब्रवीत् । कः । अस्य । ईश्वरः । यज्ञे । अपीति । कर्तोः । इति । तौ । अब्रूताम् ।

अतः परं चत्वारोऽनुवाका इष्टिहौत्रब्राह्मणम् । मनुः पृथिव्या इत्यादि ॥ इडोपाह्वानविधिः । ५
यज्ञार्हमन्विच्छत् । [v]पृथिव्याः [v]निषिक्तं [v]घृतं लब्धवान् उपलब्धवान् । [1]वृष्टिरूपाया इडायाः कार्यं

उपांशुयाजः षष्ठेऽस्मिन् स्विष्टकृच्च समीरितः ।
आध्वर्यवं समाप्याथ हौत्रशेषो निरूप्यते ॥

तत्रास्मिन् [1]सप्तमानुवाक इडोपाह्वानविधिस्तन्मन्त्रव्याख्यानं च प्रस्तूयते । मन्त्रास्तु मन्त्रकाण्ड [1]एव समाम्नाताः– " उपहूतꣳ रथंतरꣳ सह पृथिव्या । उप मा रथंन्तरꣳ सह पृथिव्या ह्वयताम् । उपहूतं १०
वामदेव्यꣳ सहान्तरिक्षेण । उप मा वामदेव्यꣳ सहान्तरिक्षेण ह्वयताम् । उपहूतं बृहत्सह दिवा । उप मा बृहत्सह दिवा ह्वयताम् । उपहूताः सप्त होत्राः । उप मा सप्त होत्रा ह्वयन्ताम् । उपहूता धेनुः सहर्षभा । उप मा धेनुः सहर्षभा ह्वयताम् । उपहूतो भक्षः सखा । उप मा भक्षः सखा ह्वयताम् । उपहूताꣳ३ हो । इडोपहूता । उपहूतेडा । उपो अस्माꣳ इडा ह्वयताम् । इडोपहूता । उपहूतेडा । मानवी घृतपदी मैत्रावरुणी । ब्रह्म देवकृतमुपहूतम् । दैव्या अध्वर्यव उपहूताः । उपहूता मनुष्याः । य इमं यज्ञमवान् । ये १५
यज्ञपतिं वर्धान् । उपहूते द्यावापृथिवी । पूर्वजे ऋतावरी । देवी देवपुत्रे । उपहूतोऽयं यजमानः । उत्तरस्यां देवयज्यायामुपहूतः । भूयसि हविष्करण उपहूतः । दिव्ये धामन्नुपहूतः । इदं मे देवा हविर्जुषन्तामिति तस्मिन्नुपहूतः । विश्वमस्य प्रियमुपहूतम् । विश्वस्य प्रियस्योपहूतस्योपहूतः" (तैब्रा ३·५·८) इति ॥

[1]एतद्विनियोगं बौधायनो दर्शयति– " उक्ता इडाया जपास्तानुपाꣳशूक्त्वोच्चैरुपह्वयत उपहूतेडेति प्रतीचीमिडोपहूतेति पराचीम् " इति । अस्यायमर्थः – गोशरीररूपाया इडाया देव्या जपा वेदे २०
स्पष्टं प्रोक्ताः – ' उपहूतꣳ रथन्तरम् ' (तैब्रा ३·५·८) [v]इत्येवमारभ्य ' उ[v]पहूताꣳ३ हो ' (तैब्रा ३·५·८) इत्येवमन्ताः । तान् मन्त्रानुपांशु जपेत् । तत ऊर्ध्वम् ' इडोपहूता ' (तैब्रा ३·५·८) इत्यादिकमुच्चैः पठेत् । उपहूतशब्दस्य [v]"प्रथमप्रयोगेणेडा प्रतीची संमुखा भवति । पश्चात्प्रयोगेण पराची विमुखा[5] इत्युच्यत इति ॥

मनुरिति ॥ [1]तानेतान् मन्त्रान् व्याचिख्यासुरादाविडाजन्मप्रकारं दर्शयति– ' मनुः पृथिव्या २५
यज्ञियमैच्छत् स घृतं निषिक्तमविन्दत् सोऽब्रवीत् कोऽस्येश्वरो यज्ञेऽपि कर्तोरिति तावब्रूतां मित्रावरुणौ गोरेवाऽऽवमीश्वरौ कर्तोः स्व इति तौ ततो गाꣳ समैरयताꣳ सा यत्रयत्र न्यक्रामत् ततो घृतमपीड्यत तस्माद्घृतपद्युच्यते तदस्यै जन्म ' इति ॥ पुरा कदाचित् [v]मनुः [v]पृथिव्याः उपरि [v]यज्ञार्हं किं द्रव्यमस्तीति

१. तं३.लं.हो–इष्टिरूपायाः ।

१. अ.इ.उ.क.ड.जो.ना.पा.हा.हो१–सप्तमेऽनु° । २. ड–एवम् । ३. ड१–एवं विनि° । ४. ३०
क–°मादयः ; ड.ड१.शृं.हो१–इत्यादयः । ५–५. आ.क–प्रथमप्रयोगेऽपीडा प्रतीचीनमुखा भवति, चरमप्रयोगे प्राचीनमुखा । ६. ड–' एतान् ' नास्ति । ७. आ.क.जो.ना.हा–यज्ञार्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मित्रावरुणौ गोरेवाऽऽवमीश्वरौ कर्तोः स्व इति तौ ततो गाꣳ समैरयताꣳ सा यत्रयत्र न्यक्रामत् ततो घृतमपीड्यत तस्माद्घृतपद्युच्यते

मित्रावरुणाविति मित्रा - वरुणौ । गोः । एव । आवम् । ईश्वरौ । कर्तोः । स्वः । इति । तौ । ततः । गाम् । समिति । ऐरयताम् । सा । यत्रयत्रेति यत्र - यत्र । न्यक्रामदिति नि - अक्रामत् । ततः । घृतम् । अपीड्यत । तस्मात् । घृतपदीति घृत - पदी । उच्यते ।

दृष्टवान् । उक्तं च "वृष्टिर्वा इडा" (तैसं १·७·२) इति । अथ [v]अब्रवीत् प्रजापतिः [v]कः [v]अस्य घृतस्य [v]यज्ञे [v]अपि साधनभावं कर्तुम् [v]ईश्वरः स्यात् । "ईश्वरे तोसुन्कसुनौ" (पा ३·४·१३) । अथ [v]मित्रावरुणौ [v]अब्रूताम्– [v]गोः [v]एव यज्ञे साधनभावं कर्तुम् [2v]आवम् [v]ईश्वरौ [3v]स्वः न कार्यभूतस्य घृतस्य [v]इति । [4]अत्रापीडायाः गोः[4] शरीरत्वादिडैव [5]गौरुच्यते । यथोक्तं– "शरीरं वा [6]अस्यैतदुपाह्वथाः" (तैसं १·७·२) इति । अथैवमुक्तवन्तौ मित्रावरुणौ [v]गां [7]गोशरीरां वृष्ट्यात्मिकामिडाम्[7] [v]समैरयतां यज्ञसाधनत्वेनागमयताम् । [v]सा च [v]यत्रयत्र [v]न्यक्रामत् [8]निर्गत्यापतत्, गोपक्षे निमित्तं (?) क्रामति स्म, [v]ततः [v]घृतम् [v]अपीड्यत उत्पद्यते । यस्मादुदकं [v]तस्मात् [9]घृतपदी इति [v]उच्यते[9] [10]वृष्टिद्वारेण घृतहेतुत्वात्, गोरूपेण वा [11]घृतस्यैव हेतुत्वात् । [v]तत् अस्या इडायाः [v]जन्म यदिहोपह्वयते । घृतं पादेषु यस्याः सा घृतपदी । "कुम्भपदीषु च" (पा ५·४·१३९) इति पादस्य लोपः, "पादोऽन्यतरस्याम्" (पा ४·१·८) इति ङीप्; "पादः पत्" (पा ६·४·१३०) इति पद्भावः । एवं मनुना प्रथममुपलब्धत्वात् इडा मानवी । पदात् घृतपीडनात् घृतपदी । मित्रावरुणाभ्यां समीरितत्वान्मैत्रावरुणी ॥

सर्वत्रान्वेषणमकरोत् । अन्विष्य च तत्र गोः पादाङ्कितेषु भूप्रदेशेषु [v]निषिक्तं [v]घृतं लब्धवान् । लब्ध्वा च देवानामग्रे [v]सः एवम् [v]अब्रवीत्– [8-v]अस्य गोपदेषु[8-v] स्थितस्य घृतस्य स्वरूपं यथा [1]लौकिकभोजनादौ उपयुक्तं तथा [10-v]यज्ञे [v]अपि उपयुक्तं कर्तुं [v]कः समर्थः [v]इति । तच्छ्रुत्वा तत्र स्थितौ [v]मित्रावरुणौ मनुं प्रति [v]अब्रूताम्– [12]किमनेन कार्यभूतेन घृतेन? तत्कारणभूतायाः [v]गोः [v]एव [13]यज्ञाङ्गभावं कर्तुमावां समर्थौ [v]स्वः [v]इति । एवमुक्त्वा [v]तौ [v]ततः ऊर्ध्वं [13]स्वर्गस्थामिडारूपां [v]गां भूमौ [v]समैरयतां समानयताम् । [v]सा च गौर्भूमौ [v]यत्रयत्र नितरां पादं प्रक्षिपवती तत्रतत्र गोपदाङ्किते [14]भूप्रदेशे [v]घृतं निष्पीडितमासीत् । [15]यस्मादस्याः

२. तं३.लं.हो–अलम् । ३. तं३.लं.हो–'स्वः' नास्ति । ४–४. तं३.–इडायागे । ५. तं३–गौरित्युच्यते । ६–६. तं३–अस्यैव तामुपाह्वयथाः । ७–७. मै४–गोशरीरात्मिकाम् । ८. त्रि–न्यगगमयत्; मै४–न्यगपतत्; लं–न्यगमपतत् (?); तं३–न्यगत्रपतत् (?) । ९–९. तं३–घृतवत्युच्यते । १०. हो–वृष्टिचारित्रेण । ११. मै–'एव' नास्ति ।

८–८. आ–अस्याः गोः पदेषु । ९. आ–°भोजनादिषु । १०. ड.ड१.शृं.हो–यज्ञेषूप° । ११. आ.हा–किं गोः । १२. ड.ड१.शृं.हो१–यज्ञाङ्गभागं । १३. आ–तामिडारूपां । १४. ड.ड१–भूदेशे । १५. ना–अवस्थितो यस्मादस्याः ; अ.इ.उ.जो.पा.हा–अवस्थितायस्मादस्याः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदस्यै जन्मोपहूतꣳ रथंतरꣳ सह पृथिव्येत्याहैष वै रथंतरमिमामेव सहान्नाद्येनोप ह्वयत उपहूतं वामदेव्यꣳ सहान्तरिक्षेणेत्याह पशवो वै वामदेव्यं पशूनेव सहान्तरिक्षेणोप ह्वयत उपहूतं बृहत् सह दिवेत्याहैरं वै बृहदिरामेव सह दिवोप ह्वयत

तत् । अस्यै । जन्म । उपहूतमित्युप - हूतम् । रथंतरमिति रथं - तरम् । सह । पृथिव्या । इति । आह (१) । इयम् । वै । रथंतरमिति रथं - तरम् । इमाम् । एव । सह । अन्नाद्येनेत्यन्न - अद्येन । उपेति । ह्वयते । उपहूतमित्युप - हूतम् । वामदेव्यमिति वाम - देव्यम् । सह । अन्तरिक्षेण । इति । आह । पशवः । वै । वामदेव्यमिति वाम् - देव्यम् । पशून् । एव । सह । अन्तरिक्षेण । उपेति । ह्वयते । उपहूतमित्युप - हूतम् । बृहत् । सह । दिवा । इति । आह । ऐरम् । वै । बृहत् । इराम् । एव । सह । दिवा । उपेति । ह्वयते ।

'उपहूतं रथन्तरम्' इत्यादिना इडोपाह्वानमन्त्रं व्याचष्टे । इयं वा इति ॥ रथन्तरं साम । दुःखतरणहेतुत्वात् [v]इयं पृथिवी [v]रथन्तरम् । अन्नाद्येनेति । पृथिवीशब्देन पृथिवीविकारोऽन्नमुच्यते । तस्मात् [v]अन्नाद्येन पृथिवीम् [v]उपह्वयते । आत्मसमीपे करोति *-विधेयां करोति । "निसमुपविभ्यो ह्वः" (पा १.३.३०) इत्यात्मनेपदम् ॥

पशवो वा इति ॥ वननीयस्वभावत्वात् ॥

ऐरमिति ॥ इरा वृष्टिः तत्र भवं सारम् [v]ऐरं तेन वृष्टिर्लक्ष्यते । दिवो वृष्टिं प्रवर्तयति ॥

पादेभ्यो घृतं निर्गतमासीत् [v]तस्मात् इयं [v]घृतपदी [v]इति प्रसिद्धाऽभूत् । [१६v]तत् एवमस्या इडाया यज्ञभूमौ [v]जन्म संपन्नम् ॥

उपहूतमिति ॥ अथ मन्त्रं व्याचष्टे– 'उपहूतꣳ रथन्तरꣳ सह पृथिव्येत्याहेयं वै रथंतरमिमामेव सहान्नाद्येनोप ह्वयते' इति ॥ यत् [v]रथंतरं साम, तत् [v]पृथिव्याः [v]सह मया [v]उपहूतं समीपे यथा तिष्ठति तथाऽऽह्वानं कृतमित्यर्थः । [१७v]एतस्मिन् मन्त्रवाक्ये[१७] रथंतरशब्देन भूमिरुपलक्ष्यते । यथा षट्सु [१८]पृष्ठस्तोत्रसामसु रथन्तरम् [१९]आद्यं तथा त्रिषु लोकेषु भूमिराद्या । मन्त्रगतेन पृथिवीशब्देन तत्कार्यमन्नाद्यमुपलक्ष्यते । तथा सति [v]अन्नाद्येन [v]सह [२०]भूमिरुपहूतेत्येषः मन्त्रवाक्यस्यार्थः । एवमुत्तरेऽपि मन्त्रा अनूद्य व्याख्यायन्ते ॥

उपहूतमिति ॥ तत्र सामविशेषवाचिना वामदेव्यशब्देन तत्सामसाध्याः पशव उपलक्ष्यन्ते, [२१]तदेतदर्शयति – 'उपहूतं वामदेव्यꣳ सहान्तरिक्षेणेत्याह पशवो वै वामदेव्यं पशूनेव सहान्तरिक्षेणोप ह्वयते' इति ॥

उपहूतमिति ॥ इराशब्दवाच्या [२२]वृष्टिस्तत्संबन्धि बृहत्सामैरं [२३]वृष्टेः [२४]बृहत्सामसाध्यत्वादित्येतमर्थं दर्शयति – 'उपहूतं बृहत् सह दिवेत्याहैरं वै बृहदिरामेव सह दिवोप ह्वयते' इति ॥

१६. आ–'तत्' नास्ति । १७–१७. आ–एतन्मन्त्रगत° । १८. आ.हा–पृष्ठस्तोत्रेषु । १९. आ–सामाऽऽद्यं । २०.आ.हा–°तेत्येवं । २१. ड.ड१–इत्येतत् । २२. क–पुष्टिस्त° । २३. क–३० पुष्टेः । २४. ड१–°साध्यता इत्येत° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपहूताः सप्त होत्रा इत्याह होत्रा एवोप ह्वयत उपहूता धेनुः (२) सहर्षभेत्याह मिथुनमेवोप ह्वयत उपहूतो भक्षः सखेत्याह सोमपीथमेवोप ह्वयत उपहूतांऽ३ हो इत्याहाऽऽत्मानमेवोप ह्वयत

उपहूता इत्युप-हूताः । सप्त । होत्राः । इति । आह । होत्राः । एव । उपेति । ह्वयते । उपहूतेत्युप
५ -हूता । धेनु (२) । सहर्षभेति सह-ऋषभा । इति । आह । मिथुनम् । एव । उपेति । ह्वयते ।
उपहूत इत्युप-हूतः । भक्षः । सखा । इति । आह । सोमपीथमिति सोम-पीथम् । एव ।
उपेति । ह्वयते । उपहूता३म् इत्युप-हूता३म् । हो इति । इति । आह । आत्मानम् ।
एव । उपेति । ह्वयते ।

[१२-होतृकान् पुनर्यागेषु प्रवर्तयन्ति-१२] ॥

१० मिथुनमिति ॥ उपलक्षणत्वात् सर्वमिथुनानां प्रजनयितारमात्मानं करोति-* ॥

सोमपीथमिति ॥ भक्ष्यत इति [v]भक्षः सोमः [v]सखा समानख्यानः तस्य पानं पुनः पुनः प्रवर्तयति ॥

आत्मानमिति ॥ [v]हो इत्यात्मोच्यते, हे आत्मन्, उपहूतः त्वमत्रोपहूत इति भावः । मम आत्मेतिवत् मेद उपचर्यते । आह्वाने प्लुतः । "अणोऽप्रगृह्यस्य" (पा ८·४·५७) इत्यनुनासिकः ।
१५ न त्वात्मनोऽभिरक्षिताऽन्यादिरुपहूयते ॥

आश्वलायनेन ये होत्रका दर्शिताः – "होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाऽऽग्नीध्रोऽच्छावाकश्च[२५]" (द्र. आश्वश्रौ ४·१·६) इति, तदुपाह्वानपरत्वं दर्शयति – 'उपहूताः सप्त होत्रा इत्याह होत्रा एवोप ह्वयते' इति ॥

उपहूतेति ॥ 'सहर्षभा' इति पदेन सूचितमर्थं दर्शयति - 'उपहूता धेनुः सहर्षभेत्याह
२० **मिथुनमेवोप ह्वयते' इति ॥**

उपहूत इति ॥ 'भक्ष्यः सखा' इत्यनेन [२७]स्वोपकारकसोमपानमुपलक्ष्यत इति दर्शयति – 'उपहूतो भक्ष्यः सखेत्याह सोमपीथमेवोप ह्वयते' इति ॥

उपहूतामिति ॥ 'हो' शब्दः [२७]प्रयोक्तृस्वरूपवाचीत्येतद्दर्शयति– 'उपहूतांऽ३ हो इत्याहाऽऽत्मानमेवोप ह्वयते' इति ॥ [२८-उपहूतशब्दे रङ्प्लुतिर्दूरादाह्वानस्य घटनेनाऽऽदरार्था-२८] ॥

---

२५ *–* लं–'विधेयां करोति ..... आत्मानं करोति' नास्ति । १२–१२. मै४–होतृकारः पुनःपुनर्यागेषु प्रवर्तयति ।

---

२५. आ–'च' नास्ति । २६. क.ड.ड१.शृं.हो१–सोपकारकं सोम° । २७. आ–प्रयुक्तः स्वरूप° । २८–२८. क–उपहूतशब्दाङ्गाप्लुतिः दूरा°; अ.इ.उ.जो.पा–°शब्दे रङ्गाप्लुतिं दूरादाह्वानस्याग्रेरादरार्था; ना–°शब्दे रङ्प्लुतिः दूरादाह्वानस्याग्रेरादरार्था; हा–°शब्दे रङ्गपूति दूरादाह्वानस्याग्रेरादरार्था ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आत्मा ह्युपहूतानां वसिष्ठ इडामुप ह्वयते पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते चतुष्पादो हि पशवो मानवीत्याह मनुर्ह्येताम (३) ग्रेऽपश्यद्घृतपदीत्याह यदेवास्यै पदाद्घृतमपीड्यत तस्मादेवमाह मैत्रावरुणीत्याह मित्रावरुणौ ह्येनाꣳ समैरयतां

आत्मा । हि । उपहूतानामित्युप - हूतानाम् । वसिष्ठः । इडाम् । उपेति । ह्वयते । पशवः । वै । इडा । पशून् । एव । उपेति । ह्वयते । चतुः । उपेति । ह्वयते । चतुष्पाद् इति चतुः - पादः । हि । पशवः । मानवी । इति । आह । मनुः । हि । एताम् (३) । अग्रे । अपश्यत् । घृतपदीति घृत - पदी । इति । आह । यत् । एव । अस्यै । पदात् । घृतम् । अपीड्यत । तस्मात् । एवम् । आह । मैत्रावरुणीति मैत्रा - वरुणी । इति । आह । मित्रावरुणाविति मित्रा - वरुणौ । हि । एनाम् । समैरयतामिति सम् - ऐरयताम् ।

तत्र आत्मन आह्वानेन कोऽर्थ आत्मनस्तत्राह– ' आत्मा हि ' इति ॥ अन्नादिषु मध्ये १०
[v]आत्मा वासयितृतमः तस्मादात्माऽप्युपह्वयते इति ॥ यद्वा– तस्मादिति । उच्चैः उपहूत इति । " दूराद्धूते च " (पा ८·२·८४) इति प्लुतस्यैवं व्याख्या ' इडामुप ह्वयते ' इति । वृष्टिरन्नं [v]पशवः देवता [v]वा इडाद्रव्याभिमानिनी, ताम् [v]उपाह्वयते । ' इडोपहूता ' इत्यस्यार्थोऽनेन व्याख्यातः, ' उपहूतेडा ' इति च, स एवार्थः । बहुकृत्वो वचनमादरार्थम् । यथोक्तम्– ' अभ्यासेन

आत्मेति ॥ आत्मन उपह्वाने प्रयोजनं दर्शयति– ' आत्मा ह्युपहूतानां वसिष्ठः ' इति ॥ १५
यस्मादिह [२९v]उपहूतानां रथंतरपृथिव्यादीनां ' भक्षः सखा ' [३०]इत्येवमन्तानामुपवासयितृतमः [v]आत्मा, [३१]तदधीनत्वादितरोपह्वानस्य, [३२]तस्मादात्मनोऽप्युपह्वानं कर्तव्यम् ॥

इडामिति ॥ ' इडोपहूता ' इत्यारभ्य ' मानवी ' इत्येतस्मात् प्राचीनस्य वाक्यसमूहस्य तात्पर्यं दर्शयति – ' इडामुप ह्वयते पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते चतुष्पादो हि पशवः ' इति ॥ इडाशब्देन गोशरीरधारिणी देवतोच्यते । तस्या उपह्वानम् ' इडोपहूता ' [३३]इत्यादिवाक्यैः कुर्यात् । २०
इडायाः पशुरूपत्वात् तदुपह्वानेन पशुप्राप्तिर्भवति । आरोहावरोहरूपयोर्वाक्ययोर्द्विरावृत्तत्वाच्चतुर्वार-मुपह्वानं संपद्यते । पशूनां [३४]चतुष्पदत्वादेतदुपपन्नम् । [३५]तयोरावृत्योः मध्ये सेयमिडाऽस्मानुपह्वयताम् इत्येतदिडादेवतायाः प्रार्थना स्वस्मिन् देवतानुग्रहार्थम् ॥

मानवीति ॥ ' मनुः पृथिव्याः ' (तैसं २·६·७) इत्यस्मिन्नुपाख्याने [३६]मानव्यादिशब्दार्थः प्रसिद्ध इत्येतद्दर्शयति– ' मानवीत्याह मनुर्ह्येतामग्रेऽपश्यत् घृतपदीत्याह यदेवास्यै पदाद्घृतमपीड्यत २५
तस्मादेवमाह मैत्रावरुणीत्याह मित्रावरुणौ ह्येनाꣳ समैरयताम् ' इति ॥

२९. आ.हा–°आहूतानां । ३०. आ–इत्यन्ताना° । ३१. क.ड१.शृं.हा.हो१–°रोपाह्वानस्य । ३२. क.हा–°प्युपाह्वानं । ३३. आ.ड–°वाक्येन । ३४. ड.ड१.शृं–चतुष्पात्त्वा° । ३५. आ–°रावृत्या । ३६. आ.क–मानवीत्यादि°; अ.इ.उ.जो.ना.पा.हा.१–मानवीति° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्म देवकृतमुपहूतमित्याह ब्रह्मैवोप ह्वयते दैव्या अध्वर्यव उपहूता उपहूता मनुष्या इत्याह देवमनुष्यानेवोप ह्वयते य इमं यज्ञमवान् ये यज्ञपतिं वर्धानित्याह (४) यज्ञाय चैव यजमानाय चाऽऽशिषमा शास्ते

ब्रह्म । देवकृतमिति देव - कृतम् । उपहूतमित्युप - हूतम् । इति । आह । ब्रह्म । एव । उपेति । ह्वयते । दैव्याः । अध्वर्यवः । उपहूता इत्युप - हूताः । उपहूता इत्युप - हूताः । मनुष्याः । इति । आह । देवमनुष्यानिति देव - मनुष्यान् । एव । उपेति । ह्वयते । ये । इमम् । यज्ञम् । अवान् । ये । यज्ञपतिमिति यज्ञ - पतिम् । वर्धान् । इति । आह (४) । यज्ञाय । च । एव । यजमानाय । च । आशिषमित्या - शिषम् । एति । शास्ते ।

भूयांसमर्थमधिगच्छति ' इति । तत्रातिप्रसङ्गनिवृत्त्यर्थं ' चतुरुप ह्वयते ' इत्युक्तम् । चतुष्पदां लाभश्चतुष्ट्वेन ' [१३]इडोपहूता ' इत्यस्याभ्यासाच्च । इत्थं मानवीत्यादि[१३] । गतम् । घृतपदीत्यादि । गतम् ॥

[v]ब्रह्म परिवृढं यज्ञाख्यं कर्म, [१४]देवेन ब्रह्मणा[१४] ऋत्विग्भिर्वा कृतम् । देवमनुष्यानिति । [१५-v]देवमनुष्यान् चाध्वरस्य नेतृत्वेन [v]उपह्वयते[१५] ॥

यज्ञाय चैवेत्यादि ॥ गतम् ॥

ब्रह्मेति ॥ पुरा देवैर्निष्पादितम् [३७]इडोपह्वानरूपं यत् [३८]परिवृढं कर्म [३९]तस्योपह्वानं दर्शयति- ' ब्रह्म देवकृतमुपहूतमित्याह ब्रह्मैवोप ह्वयते ' इति ॥

दैव्या इति ॥ " अश्विनौ हि देवानामध्वर्यू आस्ताम् " (तैसं २·६·४) इत्यादिश्रुतिषु श्रुता ये दैव्या अध्वर्यवो ये च दृश्यमाना मानुषास्तेषाम् [४०]उभयेषाम् [४१]उपह्वानं दर्शयति – ' दैव्या अध्वर्यव उपहूता उपहूता मनुष्या इत्याह देवमनुष्यानेवोप ह्वयते ' इति ॥

य इति ॥ पूर्वोक्ताः [v]दैव्या मानुषाश्च येऽध्वर्यवस्ते सर्वेऽपीमं यज्ञमवन्तु यज्ञपतिं च वर्धयन्त्वित्येवमाशीःपरतां दर्शयति – ' य इमं यज्ञमवान् ये यज्ञपतिं वर्धानित्याह यज्ञाय चैव यजमानाय चाऽऽशिषमा शास्ते ' इति ॥

१३–१३. पं२.लं–°पहूतोपहूतेडेत्यस्याह्वानाच्च ; मै४– °पहूतोपहूतेडेत्याख्यानाच्च; त्रि–°पहूतेत्यस्याह्वानाच्च; तं३.हो–°पहूतोपहूतेत्यस्याभ्यासाच्च । १४–१४. तं३.त्रि.पं२.मै४.हो–बृढो देवेन्द्रः प्र णो (?) । १५–१५. त्रि–देवांश्च मनुष्यांश्चाध्वरस्य नेतृनुपह्वयते ; पं२–देवा मनुष्याश्चाध्वरस्य नेतृत्वेनोपह्वयन्ते ; मै–देवमनुष्यांश्चाध्वरस्य नेतृनुपह्वयते ; मै४–देवा मनुष्याश्चाध्वरस्य नेतृत्वमुपह्वयते ।

३७. अ.इ.उ.जो.ना.पा.हा.हो१–इडोपाह्वानरूपं । ३८. अ.आ.इ.उ.जो.पा.हा.हो१–परिवृत्तं; क. ना–' परिवृढं ' नास्ति । ३९. अ.उ.जो.ना.पा.हा.हो१–तस्योपाह्वानं । ४०. आ–' उभयेषाम् ' नास्ति । ४१. अ.आ.इ.उ.क. जो.ना.पा.हा.–उपाह्वानं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपहूते द्यावापृथिवी इत्याह द्यावापृथिवी एवोप ह्वयते पूर्वजे ऋतावरी इत्याह पूर्वजे ह्येते ऋतावरी देवी देवपुत्रे इत्याह देवी ह्येते देवपुत्रे उपहूतोऽयं यजमान इत्याह यजमानमेवोप ह्वयत उत्तरस्यां देवयज्यायामुपहूतो

उपहूते इत्युप-हूते। द्यावापृथिवी इति द्यावा-पृथिवी। इति। आह। द्यावापृथिवी इति द्यावा-पृथिवी। एव। उपेति। ह्वयते। पूर्वजे इति पूर्व-जे। ऋतावरी इत्यृत-वरी। इति। आह। पूर्वजे इति पूर्व-जे। हि। एते इति। ऋतावरी इत्यृत वरी। देवी इति। देवपुत्रे इति देव-पुत्रे। इति। आह। देवी इति। हि। एते इति। देवपुत्रे इति देव-पुत्रे। उपहूत इत्युप-हूतः। अयम्। यजमानः। इति। आह। यजमानम्। एव। उपेति। ह्वयते। उत्तरस्यामित्युत्-तरस्याम्। देवयज्यायामिति देव-यज्यायाम्। उपहूत इत्युप-हूतः।

पूर्वजे इति॥ सर्वविकारेभ्यः पूर्वमुत्पन्ने। [v]ऋतावरी सत्यवत्यौ [१६]यज्ञवत्यौ वा तत्साधनत्वेन। मत्वर्थीये मतुपि "वनो र च" (पा ४.१.७) इति, "वा छन्दसि" (पा ६.१.१०६) इति पूर्वसवर्णदीर्घत्वम्। देवनशीले देव्यौ, देवाः पुत्राः ययोस्तौ तादृश्यौ॥

उपहूते इति॥ 'उपहूतः रथन्तरः सह पृथिव्याः' इत्यत्र यथा पृथिवीशब्दोऽन्यलक्षको नात्र तथा [४२]द्यावापृथिवीशब्दौ लक्षकौ[४२] किन्तु स्वार्थपरावित्येतद्दर्शयति–'उपहूते द्यावापृथिवी इत्याह द्यावापृथिवी एवोपह्वयते' इति॥

पूर्वजे इति॥ ते च द्यावापृथिव्यौ देवतिर्यङ्मनुष्याद्युत्पत्तेः पूर्वमेवोत्पन्ने, ऋतशब्दवाच्यो यज्ञोऽनयोर्वर्तत इति ऋतावर्यौ, नैते [४३]केवलमृत्विगादिरूपे किं तु देव्यौ, [४४-]देवाः पुत्राः[-४४] ययोस्ते [४५]देवपुत्रे इत्येतां [४६]विशेषणार्थसिद्धिं दर्शयति–'पूर्वजे ऋतावरी इत्याह पूर्वजे ह्येते ऋतावरी देवी देवपुत्रे इत्याह देवी ह्येते देवपुत्रे' इति॥

उपहूत इति॥ 'यजमानः प्रस्तरः' इत्यादिवत् [४७]अत्र यजमानशब्दो नार्थान्तरलक्षक इत्येतत् दर्शयति–'उपहूतोऽयं यजमान इत्याह यजमानमेवोप ह्वयते' इति॥

उत्तरस्यामिति॥ येषां [४८]देवयज्यादीनामर्थे यजमानोपह्वानं तानेतान् [४९-]विस्पष्टं दर्शयति[-४९] –'उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण उपहूतो दिव्यें धामन्नुपहूत इत्याह प्रजा वा उत्तरा

१६. मै.लं.हो–'यज्ञवत्यौ' नास्ति।

४२. आ.क–°शब्दार्थौ; ड–°शब्दार्थकौ; अ.इ.जो.पा.हा–°पृथिवीवाचकौ; ना–°शब्दावन्य-वाचकौ; हो१–°शब्दावनर्थकौ। ४३. क.ड.हो१–°मृगादि°। ४४–४४. अ.इ.उ.जो.पा.हा–देवोत्पन्नौ। ४५. हा–एव पुत्रे। ४६. हो१–विशेषेण°। ४७. अ.इ.जो.पा.हा–तत्र। ४८. आ.क.ना–°नामर्थं। ४९–४९. ड.हो१–विस्पष्टयति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूर्यसि हविष्करण उपहूतो दिव्ये धामन्नुपहूत (५) इत्याह प्रजा वा उत्तरा देवयज्या पशवो भूर्यो हविष्करणꣳ सुवर्गो लोको दिव्यं धामेदमसीदमसीत्येव यज्ञस्य प्रियं धामोप ह्वयते

भूर्यसि । हविष्करण इति हविः-करणे । उपहूत इत्युप-हूतः । दिव्ये । धामन् । उपहूत इत्युप-हूतः (५)। इति । आह । प्रजेति प्र-जा । वै । उत्तरेत्युत्-तरा । देवयज्येति देव-यज्या । पशवः । भूर्यः । हविष्करणमिति हविः-करणम् । सुवर्ग इति सुवः-गः । लोकः । दिव्यम् । धाम । इदम् । असि । इदम् । असि । इति । एव । यज्ञस्य । प्रियम् । धाम । उपेति । ह्वयते ।

प्रजा वा इत्यादि ॥ दर्शपूर्णमासाद्यविच्छेदः प्रजाहेतुः । इदमसीदमसीत्यादि । [v]प्रजा वा [v]पशवः स्वर्गो वा यद्यज्ञस्य प्रियं [v]धाम, तादात्म्येन यज्ञे यजमानः उपहूतो भवति ॥

देवयज्या पशवो भूयो हविष्करणꣳ सुवर्गो लोको दिव्यं धाम' इति ॥ सोमयागादिरूपाया उत्तरदेवयज्यायाः प्रजाहेतुत्वेन प्रजात्वम् । अस्यामेवेष्टौ [५०-५०]बहुहविःसंपादकस्य पशुहेतुत्वेन पशुत्वम्[५०] ॥

इदमिति ॥ 'इदं मे देवा हविर्जुषन्ताम्' इति तस्मिन्नुपहूत इत्यस्य स्पष्टार्थस्य मन्त्रवाक्यस्य विवक्षितं तात्पर्यं दर्शयति – 'इदमसीदमसीत्येव यज्ञस्य प्रियं धामोपह्वयते' इति। इदं प्रवर्तमानं मदीयं हविर्देवा [५१]जुषन्तामिति वक्तुं तस्मिन् दर्शपूर्णमासकर्मणि यजमान उपहूत इत्येतावदेव न भवति किं तु [v]इदं निरूढपशुबन्धरूपं कर्म चिकीर्षुः [v]असि, सोमयागरूपम् [v]इदं कर्म चिकीर्षुः [v]असि [v]इति एवं सर्वकर्मानुष्ठानविवक्षया [v]यज्ञस्य [v]प्रियम् इदं [v]धाम स्थानं प्रति यजमानः [v]उपह्वयते । सर्वकर्मविवक्षाद्योतनार्था वीप्सा ॥

विश्वमिति ॥ [५२]अस्य यजमानस्य यत् प्रियं तत् सर्वमुपहूतं, तस्य चोपहूतस्य [५३]सर्वस्य [५४]स्वामी यजमान उपहूत इत्यनेनोपाह्वानस्य [५५]न्यूनतां [५६]विचार्य संपूर्णता संपद्यत इत्येतद्दर्शयति– 'विश्वमस्य

५०–५०–अ.पा–व्रतहविःसंपादकस्य पशुहेतुत्वं, इ.उ.जो.हा–बहुहविःसंपादकस्य पशुहेतुत्वं; ना– बहुहविःसंपादनस्य पशुहेतुत्वम्; ड.ड१.शृं.हो१–प्रभूतहविःसंपादनस्य पशुहेतुत्वेन पशुत्वम्। ५१. ड१. शृं.हो१–सेवन्तामिति । ५२. आ.क–अन्यत्; ड१–यस्य । ५३. ड–पूर्वस्य; ड१–'सर्वस्य' नास्ति। ५४. आ.क.–प्रियस्य स्वामी । ५५. ड–हारूकतां (?)। ५६. ड१–निवार्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विश्वमस्य प्रियमुपहूतमित्याहाछम्बट्कारमेवोप ह्वयते ॥ ७ ॥

[आह धेनुरतां वर्धानित्याह धामन्नुपहूतश्चतुस्त्रिꣳशश्च ।]

विश्वम् । अस्य । प्रियम् । उपहूतमित्युप - हूतम् । इति । आह ।
अछम्बट्कारमित्यछम्बट् - कारम् । एव । उपेति । ह्वयते ॥७॥
[मैसं ४·१३·५; शब्रा १·८·१·७, १९-२३] ५

अछम्बट्कारमेवेति । बडिति सत्यनाम । तस्य छादनं [17]छम्बट्कारः किंचिदप्यपरिच्छाद्य सर्वमपि [v]अस्य यजमानस्य [v]प्रियम् उपह्वयते ॥

इति द्वितीये षष्ठे सप्तमोऽनुवाकः ॥

प्रियमुपहूतमित्याहाछम्बट्कारमेवोप ह्वयते' इति ॥ अपेक्षितस्यार्थस्य प्रच्छादनेनानुष्ठानवैयर्थ्यं[57] छम्बट्कारस्तद्यथा न भवति तथैवैनं यजमानमुपहूतवान् भवति ॥ १०

अत्र मीमांसा ॥ नवमाध्यायस्य प्रथमपादे चिन्तितम्–

"ऊह्यो यज्ञपतिर्नो वा [58]वृद्ध्यर्थोत्साहतोऽग्रिमः ।
[59]प्रत्यक्षोक्त्या कृत्स्नमन्त्र [60]इडार्थोऽनूहनं ततः" ॥ (जैन्या ९·१·२०) ॥

दर्शपूर्णमासयोः [61]-इडोपाह्वानमन्त्रे वाक्यमेतत्-[61] आम्नायते– "दैव्या अध्वर्यव उपहूताः । उपहूता मनुष्याः । य इमं यज्ञमवान् । ये यज्ञपतिं वर्धान्" (तैब्रा ३·५·८) इति । ये दैव्या अध्वर्यवो यज्ञमवन्ति ये च मनुष्या यज्ञपतिं वर्धयन्ति ते सर्वेऽप्यत्रोपहूता इत्यर्थः । अस्मिन् वाक्ये यज्ञपतेरभिवृद्धिकथनेनोत्साहजननेन[62] समवेतोऽर्थः प्रतीयते । तत इडोपह्वानमन्त्रात् [63]पृथक्कृत्याभिवृद्ध्यर्थे जपे मन्त्रवाक्यमिदं लिङ्गेन विनियुज्यताम् । तथा सति [64]सत्रे [65]यज्ञपतीनां बहुत्वात् [66]-बहुवचनान्ततया यज्ञपतिशब्द-[66] [67]ऊहनीय इति प्राप्ते ब्रूमः– प्रत्यक्षश्रुत्या [68]कृत्स्नो मन्त्र इडोपह्वाने विनियुक्तः । एकवाक्यत्वं [69]च कृत्स्नमन्त्र [70]उपलभ्यते । प्रकरणं चेदमिडायाः । अतः श्रुतिवाक्यप्रकरणैर्विरोधान्न लिङ्गविनियोगः संभवति । तदभावे [71]च यज्ञपतिवृद्धिप्रतिपादकमवान्तरवाक्यमिडाप्रतिपादकेन महावाक्येन [72]सहैकवाक्यतामापन्नमिडां प्रशंसति । प्रशंसा चैकवचनान्तेनापि[73] यज्ञपतिशब्देन सिद्ध्यतीति नास्ति सत्रे तदूहः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे षष्ठप्रपाठके सप्तमोऽनुवाकः ॥

१७. त्रि.लं.हो–छम्बट्कारम् ।

५७. ड.हो१–°वैपरीत्यम् । ५८. अ.उ.पा.–वृत्यर्थोत्साहतो हि सः । ५९. अ.इ.उ.पा–प्रत्यक्षोक्ता । ६०. आ.क.जो.ना.हा–इडार्थो नूहनं; इडा नास्त्यूहनं । ६१–६१. ड–इडोपाह्वानमन्त्रवाक्ये एतत् । ६२. अ.इ.उ.क.जो.ड१.ना.पा.हा.हो१–°जनने; ड–°जनन° । ६३. अ.इ.उ.पा–°वृत्यर्थे । ६४. ड१–तत्र । ६५. अ.इ.उ.पा–यज्ञपतीनां विवृद्ध्या । ६६–६६. शृं.हो१–बहुवचनतया शब्दः । ६७. ड.हो१–ऊह्यः । ६८. क.ड१.शृं.हा.हो१–कृत्न° । ६९. ड–'च' नास्ति । ७०. ड१–उपलक्ष्यते । ७१. ड१–चापि । ७२. आ–°वाक्यतापन्न° । ७३. ड.ड१–'अपि' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पशवो वा इडा स्वयमा दत्ते काममेवाऽऽत्मना पशूनामा दत्ते न ह्यन्यः कामं पशूनां प्रयच्छति वाचस्पतये त्वा हुतं प्राश्नामीत्याह वाचमेव भागधेयेन प्रीणाति सदसस्पतये त्वा हुतं प्राश्नामीत्याह स्वगाकृत्यै चतुरवत्तं भवति हविर्वै चतुरवत्तं

पशवः । वै । इडा । स्वयम् । एति । दत्ते । कामम् । एव । आत्मना । पशूनाम् । एति । दत्ते । न । हि । अन्यः । कामम् । पशूनाम् । प्रयच्छतीति प्र - यच्छति । वाचः । पतये । त्वा । हुतम् । प्रेति । अश्नामि । इति । आह । वाचम् । एव । भागधेयेनेति भाग - धेयेन । प्रीणाति । सदसः । पतये । त्वा । हुतम् । प्रेति । अश्नामि । इति । आह । स्वगाकृत्या इति स्वगा - कृत्यै । चतुरवत्तमिति चतुः - अवत्तम् । भवति । हविः । वै । चतुरवत्तमिति चतुः - अवत्तम् ।

पशवो वा इत्यादि ॥ इडायाः [V]स्वयम् आदानव्याजेन [V]पशूनाम् एव [V]कामं स्वयमादत्ते पशुभ्यः प्रदातुं हस्ते गृह्णाति । [V]न [V]हि [V]अन्यः [V]पशूनां [V]कामं प्रदातुमर्हतीति ॥

स्वगाकृतिः यथा [1]स्वभागकरणम् । " ऊर्यादिच्विडाचश्च " (पा १.४.६१) इति गतित्वात् " तादौ च° " (पा ६·२·५०) इति गतेः प्रकृतिस्वरत्वम् । चतुरवत्तमित्यादि ॥ गतम् (तैसं २·६·३) ॥

इडोपाह्वानमुदितमनुवाके हि सप्तमे ।
इडाप्राशित्रभक्षौ द्वावुच्येते अष्टमे पुनः ॥

पशव इति ॥ यदुक्तं सूत्रकारेण- पुरस्तात् प्रत्यङ्ङासीन इडाया होतुर्हस्तेऽवान्तरेडामवद्यति । अध्वर्युः प्रथममवदानमवद्यति[1] स्वयꣳ होतोत्तरम् " (आपश्रौ ३·२·५-६) इति, [2]तदिदं होतुरवदानं विधत्ते- ' पशवो वा इडा स्वयमादत्ते काममेवाऽऽत्मना पशूनामा दत्ते न ह्यन्यः कामं पशूनां प्रयच्छति ' इति ॥ गोरूपाया इडायाः पशुत्वेन तामिडामाददानो होता [3-V]पशूनाम् अभिलषितार्थं-[3] स्वीकृतवान् भवति । होतुः [V]अन्यः [V]न कश्चिदपि [V]पशूनाम् इडारूपाणां [V]कामं दातुं समर्थः ॥

वाचस्पतय इति ॥ इडाभागप्राशनमन्त्रावुत्पाद्य व्याचष्टे- ' वाचस्पतये त्वा हुतं प्राश्नामीत्याह वाचमेव भागधेयेन प्रीणाति सदसस्पतये त्वा हुतं प्राश्नामीत्याह स्वगाकृत्यै ' इति ॥ [4]इडोपह्वानरूपा या वाक् तस्याः पतिर्होतुर्जीवात्मा तस्मै [V]हुतं हे पुरोडाश, त्वां भक्षयामि ॥ अनेन मन्त्रोच्चारणेन भागं दत्त्वा [5-V]वाचं देवतां प्रीणयतीत्यर्थः[5] । सदसो [6]यज्ञसभायाः पतिर्होतुर्जीवात्मा तस्मै [V]हुतं त्वां भक्षयामि । अनेन तस्य पुरोडाशस्य [7]स्वोदरकृतत्वं भवति ॥

चतुरवत्तमिति ॥ होतुर्हस्ते [8]अध्वर्युणा क्रियमाणस्यावदानस्य संख्यां विधत्ते- ' चतुरवत्तं भवति हविर्वै चतुरवत्तं पशवश्चतुरवत्तम् ' इति ॥ प्रधानस्य हविषश्चतुरवत्तत्वं पूर्वमेव दर्शितं (द्र· तैसं २·६·३), [9]तत्साम्यादिदमपि [V]हविः एव भवति । चतुष्पात्त्वसंख्यासाम्यात् तस्य पशुरूपत्वम् ॥

१. लं-°कारणम् ।

१. आ.क-°दानमवदधाति; ड.शृं-°दानमादधाति । २. ड.शृं-तत्रेदं । ३-३. अ.इ.उ.जो.पा.हा-यत्प्रत्तामभिलषितां; ना-' पशूनां ' नास्ति । ४. आ-इडोपाह्वान° । ५. ड.ड१.शृं.हो१-वाग्° । ६. ड-' इत्यर्थः ' नास्ति । ७. इ.उ.जो.पा.हा-यः सभायाः । ८. क.ना-स्वोदरगतत्त्वं; हो१-स्वोदरकृतं; ड.ड१शृं-स्वोदरकृतत्वं कृतम् । ९. आ.क-' अध्वर्युणा ' नास्ति । १०. ड.हो-तस्मात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पशर्वश्चतुरवत्तं यद्धोता प्राश्नीयाद्धोता(१) ऽऽर्तिमार्च्छेद्यदग्नौ जुहुयाद्रुद्राय पशूनपि दध्यादपशुर्यजमानः स्याद्वाचस्पतये त्वा हुतं प्राश्नामीत्याह परोक्षमेवैनज्जुहोति सदसस्पतये त्वा हुतं प्राश्नामीत्याह स्वगाकृत्यै प्राश्नन्ति तीर्थ एव प्राश्नन्ति दक्षिणां ददाति तीर्थ एव दक्षिणां ददाति

पशर्वः । चतुरवत्तमिति चतुः-अवत्तम् । यत् । होता । प्राश्नीयादिति प्र-अश्नीयात् । होता (१) । आर्तिम् । एति । ऋच्छेत् । यत् । अग्नौ । जुहुयात् । रुद्राय । पशून् । अपीति । दध्यात् । अपशुः । यजमानः । स्यात् । वाचः । पतये । त्वा । हुतम् । प्रेति । अश्नामि । इति । आह । परोक्षमिति परः-अक्षम् । एव । एनत् । जुहोति । सदसः । पतये । त्वा । हुतम् । प्रेति । अश्नामि । इति । आह । स्वगाकृत्या इति स्वगा-कृत्यै । प्रेति । अश्नन्ति । तीर्थे । एव । प्रेति । अश्नन्ति । दक्षिणाम् । ददाति । तीर्थे । एव । दक्षिणाम् । ददाति ।

परोक्षमिति ॥ कोऽत्र प्राश्नाति प्रहूयत एवेदं [v]वाचस्पतये इति प्रच्छादनं परोक्षत्वम् । तेन होतुः प्राशननिमित्ताया आर्तेरप्रसङ्गः ॥

[1]प्राश्नन्तीति । सर्वेऽपि यजमानपञ्चमाः सह [v]प्राश्नन्तीति । [v]तीर्थे दुःखोत्तरणावसरे प्राशनं दक्षिणादानं च कृतं भवतीति । ऋत्विग्भ्यः पुरोडाशप्रदानं दक्षिणा ।

यदिति ॥ प्रकारान्तरेण [११-]भक्षणमन्त्रप्रशंसां दर्शयति–[-११] ' यद्धोता प्राश्नीयाद्धोताऽऽर्तिमार्च्छेद्यदग्नौ जुहुयाद्रुद्राय पशूनपि दध्यादपशुर्यजमानः स्याद्वाचस्पतये त्वा हुतं प्राश्नामीत्याह परोक्षमेवैनज्जुहोति सदसस्पतये त्वा हुतं प्राश्नामीत्याह स्वगाकृत्यै ' इति ॥ देवतारूपाया इडाया भक्षणेन [v]होता मरणं [१२]प्राप्नुयात् । प्राशनं परित्यज्य [१३v]अग्नौ तद्भागहोमे [१४]सतीडारूपगवादिपशूनग्निरूपाय क्रूराय [v]रुद्राय समर्पितवान् भवति । ततः [v]यजमानः पशुरहितः [v]स्यात् । तस्मात् ' [v]वाचस्पतये [१५v]त्वा [v]हुतम् ' इति प्रथममुक्त्वा पश्चाद्भक्षणे सति साक्षादग्नौ हुतं न भवतीति रुद्राय पशुसमर्पणं न [११]भवति, वाचस्पतिव्यवधानेन [v]परोक्षम् [v]एव हुतत्वात् । [१७]स्वयमपि साक्षादिडां न प्राश्नाति किं त्वन्यस्मै [v]हुतम् एव प्राश्नातीतीडाप्राशनप्रयुक्तो मरणदोषो न [१८]भवतीति । ईदृशस्य भक्षितस्य स्वात्मगतत्वेन स्थापनाय ' [v]सदसस्पतये ' इत्यादिकं पठनीयम् ॥

प्राश्नन्तीति ॥ यदुक्तं सूत्रकारेण–" यजमानपञ्चमा इडां [१९]प्राशथ " (आपश्रौ ३·२·११) इति, तदिदं विधत्ते– ' प्राश्नन्ति तीर्थ एव प्राश्नन्ति दक्षिणां ददाति तीर्थ एव दक्षिणां ददाति ' इति ॥ [v]तीर्थे दुःखोत्तरणावसरे प्राशनेन हि [२०]क्षुद्दुःखमुत्तीर्यते । ऋत्विग्भिः [२१]प्राशिते सति दक्षिणाऽपि दत्ता भवति । [२२]तद्दानमेतस्मिन् [२३]प्रधानयागोत्तरणावसरे ॥

०. पं२–प्राश्नन्ति; मै–प्राश्नातीति; लं–प्राश्नतेति ।

११–११. आ.क–भक्षणं प्रशंसति । १२. अ.इ.उ.°जो.पा.हा–प्राप्तवान् । १३. अ.इ.उ.जो.पा.हा–अन्यत्र । १४. ड.हो१–°रूपान्नगवादि°; ड१ – °रूपान् गवादि° । १५. अ.उ.जो.ड.ना.पा.शृं.हा–'त्वा' नास्ति । १६. ड१– भविष्यति । १७. आ.हा–तथाऽयमपि । १८. ड.ड१.शृं.हो१–भविष्यति । १९. आ.क.ड.शृं–प्राश्नन्ति । २०. आ.– 'क्षुद्' नास्ति । २१. आ.क–प्राशने । २२. ड१–तत्र दान° । २३. ड.ड१–°यागकरणावसरे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[इडाप्राशित्रभक्षौ

वि वा एतद्यज्ञं (२) छिन्दन्ति यन्मध्यतः प्राश्नन्त्यद्भिर्मार्जयन्त आपो वै सर्वा देवता देवताभिरेव यज्ञꣳ सं तन्वन्ति देवा वै यज्ञाद्रुद्रमन्तरायन्त्स यज्ञमविध्यत् तं देवा अभि समगच्छन्त कल्पतां न इदमिति तेऽब्रुवन्त्स्विष्टं वै न इदं भविष्यति यदिमꣳ राधयिष्याम इति तत्स्विष्टकृतः स्विष्टकृत्त्वं तस्याऽऽविद्धं

५ वीति। वै। एतत्। यज्ञम् (२)। छिन्दन्ति। यत्। मध्यतः। प्राश्नन्तीति प्र-अश्नन्ति। अद्भिरित्यत्-भिः। मार्जयन्ते। आपः। वै। सर्वाः। देवताः। देवताभिः। एव। यज्ञम्। समिति। तन्वन्ति। देवाः। वै। यज्ञात्। रुद्रम्। अन्तः। आयन्। सः। यज्ञम्। अविध्यत्। तम्। देवाः। अभि। समिति। अगच्छन्त। कल्पताम्। नः। इदम्। इति। ते। अब्रुवन्। स्विष्टमिति सु-इष्टम्। वै। नः। इदम्। भविष्यति। यत्। इमम्। राधयिष्यामः। इति। तत्।

१० स्विष्टकृत इति स्विष्ट-कृतः। स्विष्टकृत्त्वमिति स्विष्टकृत्-त्वम्। तस्य। आविद्धमित्या-विद्धम्।

वि वा एतदित्यादि। गतम्॥

मार्जयन्त इति॥ "मनो ज्योतिः" (तैसं १·५·३) इत्यन्तर्वेदिमार्जनम्॥

देवा वै यज्ञादिति॥ अन्तरणं विस्मरणाद्यज्ञे [३]अननुप्रवेशनम्। कल्पनं [४]कर्मणोऽविकल-संपत्तिः। अथ देवाः [५]अब्रुवन्--[५]इमं [५-५]राधयिष्यामः, तेन चैव [५]यज्ञः स्विष्टकृतं भवति [५]इति।

१५ ततः स्विष्टकृतमाराधयित्वा (?) यज्ञस्य तत् [५]आविद्धं यवमात्रं निष्कृष्य तेन प्राशित्रमकुर्वन्, [५]तस्मात्

वीति॥ यदुक्तं सूत्रकारेण- "मनो [२४]ज्योतिर्जुषतामित्यद्भिरन्तर्वेदि प्रस्तरे मार्जयित्वा" (आपश्रौ ३·३·२) इति, तदिदं विधत्ते- 'वि वा एतद्यज्ञं छिन्दन्ति यन्मध्यतः प्राश्नन्त्यद्भिर्मार्जयन्त आपो वै सर्वा देवता देवताभिरेव यज्ञꣳ सं तन्वन्ति' इति॥ "सत्यमापः सर्वा देवता [२५]आपः" (तैआ १०·२२) [२६]इति श्रुत्यन्तरादपां सर्वदेवतारूपत्वम्॥

२० **देवा इति॥ अथ प्राशित्रावदानपरिमाणं विधत्ते- 'देवा वै यज्ञाद्रुद्रमन्तरायन्त्स यज्ञमविध्यत् तं देवा अभि समगच्छन्त कल्पतां न इदमिति तेऽब्रुवन्त्स्विष्टं वै न इदं भविष्यति यदिमꣳ राधयिष्याम इति तत्स्विष्टकृतः स्विष्टकृत्त्वं तस्याऽऽविद्धं निरकृन्तन् यवेन संमितं तस्माद्यवमात्रमत्र स्येत्' इति॥ [५]देवाः पुरा [२७-]यदा यज्ञमकुर्वन्[-२७] तदा स्विष्टकृदग्निरूपं [५]रुद्रम् अन्तरितवन्तः, तेनान्तरायेण कुपितः [२८]सः रुद्रस्तदीयं [५]यज्ञम् [५]अविध्यत् विकलमकरोत्। [५]तं रुद्रं [५]देवाः आभिमुख्येन गत्वा तत् [५]इदं यज्ञानुष्ठानम्**

२५ **[२९]अस्मदर्थं [५]कल्पतां संपूर्णं भवतु [५]इति प्रार्थितवन्तः। तदानीं केचिद्बुद्धिमन्तो देवा इतरान् प्रत्येवम् [५]अब्रुवन्- [३०-]यदि वयं तं[-३०] रुद्रं हविष्प्रदानेनाऽऽराधयिष्यामस्तर्ह्यस्माकम् [५]इदं कर्म [५]स्विष्टं [५]भविष्यति [५]इति। ततो हविराराधनेन स्विष्टकरणाद्रुद्ररूपस्याग्नेः [५]स्विष्टकृत्त्वं संपन्नम्॥ ततो [३१]देवास्तमाराध्य [५]तस्य**

३. पं२-दानप्रवेशनम्। ४. पं२-कर्मणो बल°; त्रि-कर्मणो विकल्प°। ५-५. हो-पञ्च वै सयज्ञः।

२४. आ.क-ज्योतिरित्यद्भि° हा-ज्योतिरित्यन्त°। २५. ड१-'आपः' नास्ति। २६. ड१-इत्यादि। २७-२७. आ.क-यज्ञं प्रथममकुर्वन्; ड१-यज्ञमकुर्वन्। २८. आ.क-सन्। २९. आ-अस्माकम्। ३०-३०. ड.शृं.हो१-यद्येतम्; ड१-ययैतम्। ३१. अ.इ.उ. नो.पा.हा-देवतामाराध्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इडाप्राशित्रभक्षौ]

नि (३)रकृन्तन् यवेन संमितं तस्माद्यवमात्रमवं द्वेद्यज्ज्यायोऽवद्येद्रोपयेत् तद्यज्ञस्य यदुप च स्तृणीयादभि च घारयेदुभयतःसꣳश्वायि कुर्यादवदायाभि घारयति द्विः सं पद्यते द्विपाद्यजमानः प्रतिष्ठित्यै यत् तिरश्चीनमतिहरेदनभिविद्धं यज्ञस्याभि विध्येदग्रेण

निरिति (३)। अकृन्तन् । यवेन । संमितमिति सं-मितम् । तस्मात् । यवमात्रमिति यव-मात्रम् । अवेति । द्येत् । यत् । ज्यायः । अवद्येदित्यव-द्येत् । रोपयेत् । तत् । यज्ञस्य । यत् । उपेति । च । स्तृणीयात् । अभीति । च । घारयेत् । उभयतःसꣳश्वायीत्युभयतः-सꣳश्वायि । कुर्यात् । अवदायेत्यव-दायं । अभीति । घारयति । द्विः । समिति । पद्यते । द्विपादिति द्वि-पात् । यजमानः । प्रतिष्ठित्या इति प्रति-स्थित्यै । यत् । तिरश्चीनम् । अतिहरेदित्यति-हरेत् । अनभिविद्धमित्यनभि-विद्धम् । यज्ञस्य । अभीति । विध्येत् । अग्रेण ।

यदि यवमात्रात् [v]ज्यायः प्रवृद्धम् [v]अवद्येत् [v]यज्ञस्य [v]रोपयेत् विमोहयेत् । रुप विमोहने । लिङ्गं च— " मा रूरुपाम यज्ञस्य " (तैब्रा ३.७.५) इति ॥

यदित्यादि ॥ उभयपार्श्वरुग्णम् [v]उभयतःसꣳश्वायि ॥ यत् तिरश्चीनमित्यादि । गतम् ॥

संबन्धि यद्यवमात्रं पुरोडाशांशरूपम् [v]आविद्धम् आसीत् तदाविद्धमुपहतं [v]निरकृन्तन् निष्कृष्य छिन्नवन्तः। यस्मादेवं [r]तस्मात् प्राशित्रभागं [v]यवमात्रम् [r]अवद्येत् ॥

यदिति ॥ अधिकावदानं प्रतिषेधति— ' यज्ज्यायोऽवद्येद्रोपयेत् तद्यज्ञस्य ' इति ॥ [३२]अधिक-भागावदाने [v]यज्ञस्य [v]तत् अङ्गं [v]रोपयेत् मोहयेद्यज्ञप्रयोगे भ्रान्तिं जनयेदित्यर्थः । रुद्रेण कृतो योऽयं पुरोडाशस्य [३३]वेधः तस्मादेव वेधदेशादिदं [३४]प्राशित्रभागावदानमित्यर्थः [३५]-शाखान्तराम्नाते तन्मन्त्रे विस्पष्टं प्रतीयते[-३५]— " अज्यायो यवमात्रात् । आज्याधात् कृत्यतामिदम् । मा रूरुपाम यज्ञस्य । शुद्धꣳ स्विष्टमिदꣳ हविः " (तैब्रा ३.७.५) इति ॥

यदिति ॥ [३६]उपस्तरणादिचतुरवदाननिन्दापुरःसरं [३७]सकृदवदानाभिघारणे विधत्ते— ' यदुप च स्तृणीयादभि च घारयेदुभयतःसꣳश्वायि कुर्यादवदायाभि घारयति द्विः सं पद्यते द्विपाद्यजमानः प्रतिष्ठित्यै " इति ॥ [३८]यद्यवदानात् पूर्वमुपस्तरणं पश्चाच्चाभिघारणं कुर्यात् तदानीम् [३९]अवत्तस्य पुरोडाशस्योभयोः [४०]पार्श्वयोः संश्वायि [v]कुर्यात् । सम्यक्श्वाय उच्छूनत्वरूपो रोगविशेषो यस्याङ्गस्य तदङ्गं संश्वायि । सकृदवदानाभिघारणाभ्यां [४१]द्विपदो यजमानस्य प्रतिष्ठा भवति ॥

यदिति ॥ यदुक्तं सूत्रकारेण—" अग्रेणाऽऽहवनीयं [४२]ब्रह्मणे प्राशित्रं परिहरति " (आपश्रौ ३.२.९) इति, तदेतद्विधत्ते— ' यत् तिरश्चीनमतिहरेदनभिविद्धं यज्ञस्याभि विध्येदग्रेण परि हरति तीर्थेनैव परि

३२. आ.क—अधिकावदाने । ३३. हो१—भेदः । ३४. आ.क—अत्र प्राशित्रभागावदानं प्रतीयते च; ड१—प्राशित्रभागावधा(?)नमित्ययमर्थः । ३५-३५. आ.क—विस्पष्टमयमर्थः शाखान्तर आम्नायते । ३६. ड—°चतुरवदानादिनिन्दा° । ३७. इ.जो.ना.हा—°भिघारणं । ३८. ड१—यद्यवदान° । ३९. आ.क—उपात्तस्य । ४०. ड१—' पार्श्वयोः ' नास्ति । ४१. हा—द्विपक्षे; ड१—द्विपदा । ४२. क—ब्राह्मणे; अ.इ. उ.जो.ना.पा.हा—' ब्रह्मणे ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परिं हरति तीर्थेनैव परिं हरति तत् पूष्णे पर्यहरन् तत् (४) पूषा प्राश्य दतोंऽरुणत् तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि तं देवा अब्रुवन् वि वा अयमार्ध्यप्राशित्रियो वा अयमभूदिति तद्बृहस्पतये पर्यहरन्त्सोऽबिभेद्बृहस्पतिरित्थं वाव स्य आर्तिमा-

परीतिं । हरति । तीर्थेन । एव । परीतिं । हरति । तत् । पूष्णे । परीतिं । अहरन् । तत् (४)। पूषा । प्राश्येति प्र - अश्य । दतः । अरुणत् । तस्मात् । पूषा । प्रपिष्टभाग इति प्रपिष्ट - भागः । अदन्तकः । हि । तम् । देवाः । अब्रुवन् । वीति । वै । अयम् । आर्धि । अप्राशित्रिय इत्यप्र - अशित्रियः । वै । अयम् । अभूत् । इति । तत् । बृहस्पतये । परीतिं । अहरन् । सः । अबिभेत् । बृहस्पतिः । इत्थम् । वाव । स्यः । आर्तिम् । एति ।

तदित्यादि ॥ [V]तत् देवतानिष्टं प्राशित्रं देवाः [V]पूष्णे प्रथमं [V]पर्यहरन्, [V]तत् [V]प्राश्य [V]पूषा आत्मीयान् दन्तान् [V]अरुणत् [६]अभञ्जयत् । [V]तस्मात् अदन्त्वेऽप्रि [V]पूषा [V]प्रपिष्टभागः भवति, दन्तहीनत्वात् । एवमयं वृद्धाङ्गोऽप्राशित्रार्ह इति [V]देवाः [V]तं हित्वा [V]तत् [V]बृहस्पतये [V]पर्यहरन् । अथ [V]बृहस्पतिः एषोऽहमपि एतत्प्राशनेनास्तं गमिष्यामि [V]इति बिभ्यत् 'सूर्यस्य त्वा' इतीमं [V]मन्त्रं दृष्ट्वा तेन प्राशित्रम् [V]अपश्यत् । न हीति । [V]सूर्यस्य संबन्धि सर्वलोकस्य

हरति' इति ॥ वेदेरुत्तरतः स्थितोऽध्वर्युर्वैदिमध्यस्थिते पुरोडाशे प्राशित्रभागमवदायाऽऽहवनीयस्य [४३]दक्षिणभागे स्थिताय ब्रह्मणे वेदेरुपरि हस्तं प्रसार्य [V]तिरश्चीनं यथा भवति तथा यदि दद्यात् तदानीं [V]यज्ञस्य यदङ्गं रुद्रेण [V]अनभिविद्धं [४४]तदप्यभिविद्धं भवेत् । तस्मादुत्तरस्यां दिश्यवस्थितोऽध्वर्युः प्राङ्मुखो गत्वाऽऽहवनीयस्य [V]अग्रेण देशेन [४५]ब्रह्मसमीपं [४६]प्राप्य तस्मै भागं [V]परिहरति परितो नयति सम्यक् दद्यादित्यर्थः । तथा सति [V]तीर्थेन [V]एव [४७]नद्याद्यवतरणसदृशेनैव मार्गेणैवाऽऽनीतवान् भवति ॥

तदिति ॥ अत्र सूत्रकारेण–"प्राशित्रमवदीयमानं प्रेक्षते" (आपश्रौ ३·१९·५) इत्युपक्रम्यैतदुक्तं– "सूर्यस्य त्वा चक्षुषा प्रतिपश्यामीत्याहियमाणम् । सावित्रेण [४८]प्रतिगृह्य ..... अङ्गुष्ठेनोपमध्यमया [४९]चाङ्गुल्याऽऽदायाग्नेस्त्वा [५०]आस्येन प्राश्नामि ब्राह्मणस्योदरेण बृहस्पतेर्ब्रह्मणेन्द्रस्य त्वा जठरे [५१]सादयामीत्यसंम्लेत्यापिगिरति" (आपश्रौ ३·१९·६-७) इति । असंम्लेत्य [५२]दन्तैरचूर्णीकृत्य । तत्र दर्शनमन्त्रमुत्पाद्य विनियोक्तुं प्रस्तौति– 'तत् पूष्णे पर्यहरन् तत् पूषा प्राश्य दतोऽरुणत् तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि तं देवा अब्रुवन् वि वा अयमार्ध्यप्राशित्रियो वा अयमभूदिति तद्बृहस्पतये पर्यहरन्त्सोऽबिभेद्बृहस्पतिरित्थं वाव स्य आर्तिमाऽऽरिष्यतीति' इति । पुरा कदाचिद्देवाः [V]तत् प्राशित्रं [V]पूष्णे समर्पयन् । स

६. मै४–अरुधत्; मै–रुद्धात् भग्नात् ।

४३. आ–दक्षिणे भागे; अ.इ.उ.जो.ना.पा.हा– दक्षिणे मार्गे। ४४. ड१– तदभि°। ४५. अ.इ. उ.जो.ना.पा.हा–ब्रह्मणे परिहरति समीपम्। ४६. ड–'प्राप्य' नास्ति। ४७. आ.क.ड– नद्यवतरण°। ४८. ड१.शृं.हा– प्रतिगृह्येति। ४९. ड– 'चाङ्गुल्या आदाय' नास्ति; ड१– वाऽङ्गुल्याग्नेस्त्वा। ५०. अ.इ.उ.पा– 'आस्येन' नास्ति। ५१. आ.क–°त्यभिगिरति। ५२. हा.हो१ – दन्तेनाचूर्णीकृत्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऽऽरिष्यतीति स एतं मन्त्रमपश्यत् सूर्यस्य त्वा चक्षुषा प्रति पश्यामीत्यब्रवीन्न हि सूर्यस्य चक्षुः (५) किं चन हिनस्ति सोऽबिभेत् प्रतिगृह्णन्तं मा हिꣳसिष्यतीति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामीत्यब्रवीत् सवितृप्रसूत एवैनद्ब्रह्मणा देवताभिः प्रत्यगृह्णात् सोऽबिभेत् प्राश्नन्तं मा

अरिष्यति। इति। सः। एतम्। मन्त्रम्। अपश्यत्। सूर्यस्य। त्वा। चक्षुषा। प्रतीति। पश्यामि। इति। ५
अब्रवीत्। न। हि। सूर्यस्य। चक्षुः (५)। किम्। चन। हिनस्ति। सः। अबिभेत्। प्रतिगृह्णन्तमिति प्रति-गृह्णन्तम्। मा। हिꣳसिष्यति। इति। देवस्य। त्वा। सवितुः। प्रसव इति प्र-सवे। अश्विनोः। बाहुभ्यामिति बाहु-भ्याम्। पूष्णः। हस्ताभ्याम्। प्रतीति। गृह्णामि। इति। अब्रवीत्। सवितृप्रसूत इति सवितृ-प्रसूतः। एव। एनत्। ब्रह्मणा। देवताभिः। प्रतीति। अगृह्णात्। सः। अबिभेत्। प्राश्नन्तमिति प्र-अश्नन्तम्। मा। १०

चक्षुःस्थानीयं मण्डलं सर्वलोकोपजीवि [v]न [v]हि कस्यचित् हिंस्यं भवति। तस्मात् सूर्यः पश्यति नाहमिति। तं दृष्ट्वा पश्यन्न पश्यतीति न हिंस्यः। अथ 'देवस्य त्वा' (इति) मन्त्रेण सवित्राऽनुज्ञातो देवताभावेन [७]प्रतिगृह्णन् प्रतिगृह्णातीति न बाध्यः। 'अग्नेस्त्वाऽऽस्येन'

च [v]पूषा मन्त्रमन्तरेण [५३]तस्य प्राशित्रस्य [५४]दन्तैर्बलात् [५५]दंशनं कृत्वा [v]प्राश्य [५६]तदन्नदंशनोपघातेन स्वकीयान् दन्तान् पातितवान्। यस्मादेवं [v]तस्मात् [५७]पूष्णे सर्वत्र [५८]चरौ पिष्टमेव भागं कुर्यात्। ततः १५
[v]देवाः [v]तं दन्तहीनं पूषणमुद्दिश्य परस्परम् [v]अब्रुवन्– [v]अयं पूषा [v]व्यार्धि समृद्धिरहितोऽभूत् [५९]यस्मात् तस्मादयं प्राशित्रानर्हः [v]अभूत् [v]इति विचार्य [v]तत् प्राशित्रं [v]बृहस्पतये समर्पयन्। [v]सः [v]बृहस्पतिः मनस्येवम् [v]अबिभेत्। यथा पूषा प्राशित्रं प्राश्याऽऽर्तिमगमत् [६०v]इत्थम् अन्योऽपि यः प्राश्नाति सः [v]आर्तिम् [६१-v]आऽरिष्यति गमिष्यति [v]इति-[६१] ॥

स इति ॥ अथ दर्शनमन्त्रमुत्पादयति– 'स एतं मन्त्रमपश्यत् सूर्यस्य त्वा चक्षुषा प्रति २०
पश्यामीत्यब्रवीन्न हि सूर्यस्य चक्षुः किं च न हिनस्ति' इति ॥ [६२]मनुष्यचक्षुः केनापि रोगेण हिंसितं भवति। आरोग्यप्रदस्य [v]सूर्यस्य [v]चक्षुः [v]न केनापि हिंस्यते। तस्मादनेन मन्त्रेण [६३]पश्यामीत्यर्थः ॥

स इति ॥ [६४]अथ [६५]प्रतिग्रहमन्त्रमुत्पादयति – 'सोऽबिभेत् प्रतिगृह्णन्तं मा हिꣳसिष्यतीति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामीत्यब्रवीत् सवितृप्रसूत एवैनद्ब्रह्मणा

७. तं३.लं–'प्रतिगृह्णन्' नास्ति। २५

५३. अ.इ.उ.पा.हा–आत्तस्य; शृं–'तस्य' नास्ति। ५४. हा–दन्तेन। ५५. आ–दशनम्। ५६. आ.क– तदन्नं दशनेनोपपाद्य तेन; ड१.हो१ – तेन दंशनोपघातेन। ५७. आ.क– पूष्णः। ५८. आ.क–चरोः। ५९. अ.इ.उ.पा.हो१– 'यस्मात्' नास्ति। ६०. ड१.शृं–इत्थमेव। ६१–६१. ड–गमिष्यतीति; अ.इ.उ.जो.ना.पा शृं.हा–आरिष्यतीति। ६२. ड१–मनुष्यस्य चक्षुः। ६३. ड१–पश्येदित्यर्थः। ६४. अ. इ.उ.जो.ना.पा.हा–'अथ' नास्ति। ६५. ड– प्रतिग्रहणमन्त्र°। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हिꣳसिष्यतीत्यग्नेस्त्वाऽऽस्येन प्राश्नामीत्यब्रवीन्न ह्यग्नेरास्यं किं चन हिनस्ति सोऽबिभेत् (६) प्राशितं मा हिꣳसिष्यतीति ब्राह्मणस्योदरेणेत्यब्रवीन्न हि ब्राह्मणस्योदरं किं चन हिनस्ति बृहस्पतेर्ब्रह्मणेति स हि ब्रह्मिष्ठोऽप वा एतस्मात् प्राणाः क्रामन्ति यः प्राशित्रं प्राश्नात्यद्भिर्मार्जयित्वा प्राणान्त्सं मृशतेऽमृतं वै प्राणा अमृतमापः प्राणानेव यथास्थानमुप ह्वयते ॥८॥

[प्राश्नीयाद्धोता यज्ञं निरहरन् तच्चक्षुरास्यं किं चन हिनस्ति सोऽविभेच्चतुश्चत्वारिꣳशच्च ।]

हिꣳसिष्यति । इति । अग्नेः । त्वा । आस्येन । प्रेति । अश्नामि । इति । अब्रवीत् । न । हि । अग्नेः । आस्यम् । किम् । चन । हिनस्ति । सः । अबिभेत् (६) । प्राशितमिति प्र - अशितम् । मा । हिꣳसिष्यति । इति । ब्राह्मणस्य । उदरेण । इति । अब्रवीत् । न । हि । ब्राह्मणस्य । उदरम् । किम् । चन । हिनस्ति । बृहस्पतेः । ब्रह्मणा । इति । सः । हि । ब्रह्मिष्ठः । अपेति । वै । एतस्मात् । प्राणा इति प्र - अनाः । क्रामन्ति । यः । प्राशित्रमिति प्र - अशित्रम् । प्राश्नातीति प्र - अश्नाति । अद्भिरित्यत् - भिः । मार्जयित्वा । प्राणानिति प्र - अनान् । समिति । मृशते । अमृतम् । वै । प्राणा इति प्र - अनाः । अमृतम् । आपः । प्राणानिति प्र - अनान् । एव । यथास्थानमिति यथा - स्थानम् । उपेति । ह्वयते ॥८॥

[शब्रा १·८·१·१४,१५; ७·३·२]

[1]इत्यग्न्यास्यबुद्ध्या प्राश्नन् प्राश्नातीति, न बाध्यः । ब्राह्मणस्योदरेणेति । ब्राह्मणोदरधिया प्राशित्रं स्थापयन् प्राशितवानिति न हिंसितव्यः । स हीति । बृहस्पतिर्हि ब्राह्मणतरः तस्मादेवमुच्यते इति ॥

अप वा इत्यादि । गतम् ॥

इति द्वितीये षष्ठेऽष्टमोऽनुवाकः ॥

[2]देवताभिः प्रत्यगृह्णात्' इति ॥ [3]ब्रह्मणा मन्त्रेण, [4]देवताभिः [5]अश्व्यादिभिः । तादृशः प्रतिग्रहो न हिनस्ति, तस्मात् तेन मन्त्रेण प्रतिगृह्णीयात् ।

स इति ॥ अथ प्राशनमन्त्रस्य भागत्रयं क्रमेणोत्पादयति– 'सोऽबिभेत् प्राश्नन्तं मा हिꣳसिष्यतीत्यग्नेस्त्वाऽऽस्येन प्राश्नामीत्यब्रवीन्न ह्यग्नेरास्यं किं चन हिनस्ति सोऽबिभेत् प्राशितं मा हिꣳसिष्यतीति ब्राह्मणस्योदरेणेत्यब्रवीन्न हि ब्राह्मणस्य उदरं किं चन हिनस्ति बृहस्पतेर्ब्रह्मणेति स हि ब्रह्मिष्ठः' इति । प्रौढमरण्यं दहतोऽपि [6]दावाग्नेर्मुखम् [7]आस्यं शुष्ककाष्ठकण्टकादिना केनापि [8]न हिंस्यते । श्राद्धादौ परान्नं भुञ्जानस्यापि [7]ब्राह्मणस्य [8]उदरं केनापि प्रत्यवायेन हिंसितं [8]न भवति । यस्माद्बृहस्पतिः [7]ब्रह्मिष्ठः मन्त्रवित्तमः तस्मात् '[7]बृहस्पतेः [7]ब्रह्मणा' [8]इत्येवमपि मन्त्रभागं पठेत् ॥

८. त्रि–इति बुद्ध्या ।

६६. अ.इ.उ.पा.हा.हो१–अश्विन्यादिभिः । ६७. हा–दवाग्नेर्मुखम्, ड.ड१–'मुखम्' नास्ति । ६८. आ.क–इत्येतदपि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपेति ॥ यदुक्तं सूत्रकारेण– " इन्द्रस्य त्वा जठरे सादयामीति नाभिदेशमभिमृशति । वाङ्म आसन्निति यथालिङ्गमङ्गानि " (आपश्रौ ३·२०·१-२) इति, तदेतदभिमर्शनं शिरोमार्जनपूर्वकं विधत्ते– ' अप वा एतस्मात् प्राणाः क्रामन्ति यः प्राशित्रं प्राश्नात्यद्भिर्मार्जयित्वा प्राणान्त्सं मृशतेऽमृतं वै प्राणा अमृतमापः प्राणानेव यथास्थानमुप ह्वयते ' इति ॥

अत्र मीमांसा ॥ षष्ठाध्यायस्य चतुर्थपादे चिन्तितम्— ५

" इडाद्यर्थस्य नाशेऽन्यः [६९-]शेषाद्ग्राह्यो न वाऽग्रिमः[-६९] ।
शेषसत्त्वान्न [७०]शेषेऽन्यप्रतिपत्त्यवरोधनात् " ॥ (जैन्या ६·४·२) ॥

इडाभक्षणार्थं [७१-]प्राशित्रभक्षणार्थं वाऽवत्तं[-७१] यदि नश्येत् तदा शेषस्य सद्भावात् तस्माच्छेषात् पुनरवदेयमिति चेत् । [७२]न । तस्य शेषस्य [७३]अन्यथाप्रतिपत्त्या [७४]शंयुवाककालीनभक्षरूपयाऽवरुद्धत्वात् । तस्मादवत्तनाशे द्रव्याभावादिडादिकं लुप्यते । १०

तत्रैवान्यच्चिन्तितम्–

" शेषभक्षाः किमन्येषामृत्विजां वाऽन्यभक्षणम् ।
[७५]ऋत्विजां परिसंख्यानात् स्वाम्यप्राप्तौ [७६]ततोऽन्तिमः " ॥ (जैन्या ६·४·४) ॥

दर्शपूर्णमासयोर्ये प्राशित्रादिशेषभक्षास्तेषां भक्षणमृत्विग्भ्योऽन्यैः [७७]कार्यम् । कुतः ? ऋत्विजां [७८]परिसंख्यातत्वात् । ऋत्विजां कर्मकरत्वादेव [७९]भक्षप्राप्तौ सत्यां [८०]पुनरप्येवमाम्नायते – " यजमानपञ्चमा १५
इडां [८१]भक्षयन्ति " (द्र.आपश्रौ ३·२·११) इति । तदेतत् पुनराम्नातं [८२]परिसंख्यार्थम् ' यजमानसहिता ऋत्विजः प्राशित्रादिकं न भक्षयेयुः ' इत्यर्थः । तस्मादृत्विग्भ्योऽन्येषां प्राशित्रादिभक्षणमिति चेत् । मैवम् । यजमानस्य कर्मकरत्वाभावेन पूर्वमप्राप्तं भक्षणमनेन विधीयते । तस्मादपरिसंख्यातत्वात् [८३]ऋत्विजामेतत् प्राशित्रादिभक्षणम् ॥

तृतीयाध्यायस्य तृतीयपादे चिन्तितम्– २०

" प्रपिष्टभागः पूषेति प्रकृतौ विकृतावुत ।
[८४]इष्टिप्रकरणादेव प्रकृताविति युज्यते ॥
संतर्दनादिवद्वाक्याद्विकृतौ [८५]पूषसंभवात् ।
सिद्धस्य [८६]पुनरप्युक्तिरधिकस्य विवक्षया " ॥(जैन्या ३·३·४३-४४)॥

दर्शपूर्णमासप्रकरणे श्रूयते– " तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि " (तैसं २·६·८) इति। २५
तत्र दन्तरहितस्य पूष्णः पिष्टभागत्वं संतर्दनाद्यधिकरणन्यायेन [८७]प्रकरणादुत्कृष्यतया विकृतिगामीत्यवगम्यते। [८८]तथाऽप्युत्तराधिकरणेषु तस्मिन्नेव विषये विशेषं वक्तुमिह प्रस्तूयते ॥

६९–६९. अ.इ.उ.पा–शेषो वाऽन्यो न चाग्रिमः। ७०. अ.इ.उ.पा–°प्रतिपत्यन्तरोधनात्। ७१–७१. अ.इ.उ.पा–°भक्षणं चाऽवत्तं; ड.हो१ – °भक्षणार्थं चाऽवत्तम्। ७२. ड–मैवम्। ७३. अ.इ.उ. पा–°प्रतिपत्तौ। ७४. अ.इ.उ.पा– °काले भक्ष°। ७५. अ.आ.इ.उ.क.जो.ड.ड१.श्रृ.हा.हो१–इडायाः। ३०
७६. अ.इ.उ.पा– कुतोऽन्तिमः। ७७. ड.ड१–कर्तव्यम्। ७८. ड–परिसंख्यानात्; अ.इ.उ.पा–परि-संख्यां कर्तुं; हो१–परिसंख्यानार्थम्। ७९. ड–भक्षणप्राप्तौ। ८०. अ.इ.उ.जो.पा.हा–तत्रैव एवमा°। ८१. अ.इ.उ.जो.ना.पा.हा– प्राश्नन्ति। ८२. अ.इ.उ.पा–परिसंख्यां कर्तुं; ड१.श्रृं– परिसंख्याकार्यम्। ८३. आ.क– ऋत्विजामेव। ८४. ड–°देष। ८५. श्रृं– पूर्वसंभवात्। ८६. हो१–पुनरप्युक्तेर°। ८७. क.ड.ड१.हो१–°दुत्कृष्टतया। ८८. ड१ – तथाऽप्यन्तराधि°। ३५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्रैवान्यच्चिन्तितम् —

" चरौ पशौ पुरोडाशे चरावेवोत पेषणम् ।
विशेषादर्शनादेतत् सर्वेष्वपि विधीयते ॥
[८९]प्राप्तत्वान्न पुरोडाशे [९०]हृदाद्याकारनाशनात् ।
[९१-९१]न पशौ पारिशेष्येण[-९१] चरावेव हि पेषणम् " ॥ (जैन्या ३·३·४५-४६) ॥

५

" पौष्णं चरुं निर्वपेत् " (द्र.मैसं २·१·१; तैसं २·२·१) इति चरुर्विहितः । " पौष्णꣳ श्याममा लभेतान्नकामः " (तैसं २·१·६) इति पशुविधिः । ' पशुमालभ्य पुरोडाशं निर्वपति ' इत्येतच्चोदकेन पौष्णपशौ प्राप्तम् । [९२]तत्र ' यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशः ' इति न्यायेन पुरोडाशस्य पूषा देवता । तत्र [९३]पूर्वोक्तपेषणं विषयीकृत्योच्यमानाः [९४]संशयपूर्वोत्तरपक्षाः [९५]स्पष्टाः ॥

१०

तत्रैवान्यच्चिन्तितम् –

" [९६-९६]द्विदेवकेऽपि किं पिंष्यादुत पूषैकदेवके[-९६] ।
द्विदेवकेऽपि तत्पूष्णः सत्त्वात् पेषणभागिनः ॥
देवताविफलत्वेन पेषणं न प्रयोजयेत् ।
यागस्य [९७]तत्त्वे [९८]भागोक्तेर्न यागान्तरगामि तत् " ॥ (जैन्या ३·३·४७-४८) ॥

१५

[९९]राजसूये श्रूयते– " सोमापौष्णं चरुं निर्वपेदैन्द्रापौष्णं चरुम् " (द्र.तैसं १·८·८) इति । तत्र द्विदेवके चरौ पिष्टभाजः पूष्णः सत्त्वात् पेषणं पूषार्थं कर्तव्यमिति [१००]चेत् । तत्रेदं वक्तव्यम्– किं पेषणस्य देवता प्रयोजिका किं वा [१०१]यागः ? नाऽऽद्यः । यागमन्तरेण [१०२]केवलदेवता फलजनकत्वाभावेन पेषणं प्रयोक्तुं न प्रभवति । पौष्णस्य यागस्य पेषणप्रयोजकत्वे [१०१]तु तत्पेषणं द्विदेवके यागान्तरे गन्तुं नार्हति । ' [१०४-१०४]पूषा प्रपिष्टभागः ' इत्यत्र[-१०४] यागो न श्रुत इति चेत् । मैवम् । [१०५]भागशब्दान्यथानुपपत्त्या

२० यागस्य [१०६]कल्प्यत्वात् । न हि देवतात्वमन्तरेण [१०७]पिष्टद्रव्यभाक्त्वं सिध्यति । सति च देवतात्वे द्रव्यदेवतयोर्लाभाद्यागः [१०८]कल्प्यते । [१०९]तस्मादेकदेवकयागस्य पेषणप्रयोजकत्वान्न द्विदेवके यागे पेषणमस्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे षष्ठप्रपाठकेऽष्टमोऽनुवाकः ॥

---

१५ ८९. अ.इ.उ.पा–पृथक्त्वान्न । ९०. अ.इ.उ.पा– विकृतिनाशनात् । ९१–९१. अ.इ.उ.पा– पशौ न परि°; जो.ना.हा–पशौ न पारि° । ९२. अ.इ.उ.पा–' तत्र ' नास्ति । ९३. ड.ड१–पूर्वोक्तं पेषणम् । ९४. अ.इ.उ.पा–' संशय° ' नास्ति । ९५. ड.ड१–विस्पष्टाः । ९६–९६. अ.इ.उ.ड.पा– द्विदेवत्येऽपि किं न स्यादुत पूषैकदेवते; जो.ना.हा.–द्विदेवत्येऽपि किं पिष्यात् पूषैकदेवते । ९७. अ.इ. उ.जो.पा.हा–सत्त्वे । ९८. अ.इ.उ.ड१.पा.श्रं.हो१–भेदोक्तेर्न । ९९. ड– राजसूयप्रकरणे । १००. अ.उ.

३० पा–' चेत् ' नास्ति । १०१. ड.हो१–यागस्य । १०२. उ.–°देवतायाः । १०३. अ.इ.उ.ड.जो.ना.पा. हा.हो१– ' तु ' नास्ति । १०४–१०४. अ.इ.उ.पा–' पूषा प्रपिष्ट भाग इति ' नास्ति । १०५. अ.इ.उ. पा–द्रव्यस्यान्यथा°; जो.हा–भागशब्दस्य भागशब्दा° । १०६. ड–कल्प्यस्य देवता स्यात् । १०७. अ. इ.उ.पा– पिष्टभागत्वं, जो.ना.हा–पिष्टद्रव्यभागत्वम् । १०८. हो१–कर्तव्यः । १०९. हा–°देकदेवतायागस्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नीध आ दधात्यग्निमुखानेवर्तून् प्रीणाति समिधमा दधात्युत्तरासामाहुतीनां प्रतिष्ठित्या अथो समिद्वत्येव जुहोति परिधीन्त्सं मार्ष्टि पुनात्येवैनान्त्सकृत्सकृत् सं मार्ष्टि पराङिव ह्येतर्हि यज्ञश्चतुः

अग्नीध इत्यग्नि-इधे । एति । दधाति । अग्निमुखानित्यग्नि-मुखान् । एव । ऋतून् । प्रीणाति । समिधमिति सम्-इधम् । एति । दधाति । उत्तरासामित्युत्-तरासाम् । आहुतीनामित्या -हुतीनाम् । प्रतिष्ठित्या इति प्रति-स्थित्यै । अथो इति । समिद्वतीति समित्-वति । एव । जुहोति । परिधीनिति परि-धीन् । समिति । मार्ष्टि । पुनाति । एव । एनान् । सकृत्सकृदिति सकृत्-सकृत् । समिति । मार्ष्टि । पराङ् । इव । हि । एतर्हि । यज्ञः । चतुः ।

अग्नीध इति ॥ आग्नीध्रभागविधिः । [v]ऋतून् कालस्य प्रवर्तकान् अग्निसहितान् प्रीणयति । [1]फिडन्तोदात्तत्वम् (फि १) । [2]समिधमिति ॥ आनूयाजिकीन् [v]परिधीन् [v]संमार्ष्टि इत्यादि । गतम् । पराडिवेति । अपुनरावृत्तः [v]इव इदानीं [v]यज्ञः, तस्मात् संमार्जनस्य

अष्टमे स्पष्टमुदितमिडाप्राशित्रभक्षणम्[1] ।
अनूयाजाः [2]सूक्तवाको नवमे द्वयमीर्यते ॥

अग्नीध इति ॥ तत्राऽऽदौ तावदाग्नीध्रभागस्य प्रदानं विधत्ते– ' अग्नीध आ दधात्यग्निमुखानेवर्तून् प्रीणाति ' इति ॥ पौरोडाशिके [3]तु काण्डे " अग्नीधे प्रथमायाऽऽदधाति " (तैब्रा ३·३·८) इति [4-]भागप्रदानस्य प्राथम्यमुक्तम्[-4] । तस्मादाग्नीध्रेणेध्यमानस्याग्नेर्मुखत्वम् । तस्मिन्नेव काण्डे – " सकृदुपस्तीर्य द्विरादधत् । उपस्तीर्य द्विरभिधारयति " (तैब्रा ३·३·८) [5-]इत्युक्तषडवत्तविधानेन संख्यासामान्याद्वतुसंबन्धः[-5] । तस्मादग्निमुखानामृतूनां प्रीतिः ॥

समिधमिति ॥ यदुक्तं सूत्रकारेण– " अनुज्ञातो ब्रह्मणाऽऽग्नीध्रः समिधमादधात्येषा ते अग्ने समित् " (आपश्रौ ३·४·६) इति, तदेतद्विधत्ते– ' समिधमा दधात्युत्तरासामाहुतीनां प्रतिष्ठित्या अथो समिद्वत्येव जुहोति ' इति ॥ अनूयाजा उत्तरा आहुतयस्ताश्चास्यां समिधि प्रतितिष्ठन्ति । किं च, समिद्युक्त एवाग्नावनूयाजान् [v]जुहोति ॥

परिधीनिति ॥ [6]पुनःशोधनं विधत्ते– ' परिधीन्त्सं मार्ष्टि पुनात्येवैनान् ' इति ॥

सकृत्सकृदिति ॥ पूर्ववदावृत्तिं प्रसक्तां वारयति– ' सकृत्सकृत् सं मार्ष्टि पराङिव ह्येतर्हि यज्ञः' इति ॥ योऽयमाधारयोर्मध्ये पूर्वोक्तः [7-]संमार्गस्तस्य काले[-7] यज्ञः पराग्भूतो न भवति किंतु प्रत्यग्भूतः । तत

१. मै४–षडवत्तान् । २–२. तं३.मै.लं.हो–' समिधमिति.....पदान्तोदात्वम् ' नास्ति ।

१. ड–°प्राशित्रलक्षणम् । २. आ.क–सूक्तवाकाः । ३. ड१–' तु ' नास्ति । ४–४. अ.आ.इ.उ.जो.पा.हा–भागप्रदानं प्रथमस्य युक्तम् । ५–५. आ.हा–°षडवत्तसंख्या°; इ–इति षडवत्त° । ६. क.ड.ड१.शृं.हो१–' पुनः ' नास्ति । ७–७. अ.इ.जो.ना.पा.हा–' संमार्गः स्वकाले '; उ–' संमार्गस्तस्य काले ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सं पद्यते चतुष्पादः पशवः पशूनेवाव रुन्द्धे ब्रह्मन् प्र स्थास्याम इत्याहात्र वा एतर्हि यज्ञः श्रितो (१) यत्र ब्रह्मा यत्रैव यज्ञः श्रितस्तत एवैनमा रभते यद्धस्तेन प्रमीवेद्वेपनः स्याद्यच्छीर्ष्णा शीर्षक्तिमान्त्स्याद्यत् तूष्णीमासीतासंप्रत्तो

समिति । पद्यते । चतुष्पाद् इति चतुः - पादः । पशवः । पशून् । एव । अवेति । रुन्द्धे । ब्रह्मन् । प्रेति । स्थास्यामः । इति । आह । अत्र । वै । एतर्हि । यज्ञः । श्रितः (१) । यत्र । ब्रह्मा । यत्र । एव । यज्ञः । श्रितः । ततः । एव । एनम् । एति । रभते । यत् । हस्तेन । प्रमीवेदिति प्र - मीवेत् । वेपनः । स्यात् । यत् । शीर्ष्णा । शीर्षक्तिमानिति शीर्षक्ति - मान् । स्यात् । यत् । तूष्णीम् । आसीत । असंप्रत्त इत्यसं - प्रत्तः ।

आवृतिर्न युज्यते इति । बहुरिति सकृदग्निमित्यनेन सह । 'ब्रह्मन् प्रस्थास्यामः' इति संप्रैषः । एतर्हीति । अस्मिन् काले । "इदमो र्हिल्" (पा ५·३·१६), "एतेतौ रथोः" (पा ५·३·४) इत्येतादेशः । प्राशित्रपरिहरणप्रभृतिब्रह्मसकाशे यज्ञस्य स्थितत्वात् [v]ब्रह्मन् [v]प्रस्थास्यामः [v]इति । [v]ततः [v]एव आरभ्य यज्ञशेषः परिसमाप्यत इति । यद्धस्तेनेत्यादि । अथ ब्रह्मा प्रस्थानं प्रसुवन् यदि हस्तलिङ्गेन [v]प्रमीवेत् प्रस्थापयेत् वेपनशीलः [v]स्यात् चलनशीलः स्यात् । चलन-शब्दार्थादिति युच् । मीङ् गतौ । भौवादिकोऽन्तर्भावितण्यर्थः । यथा—'पश्चाद्वातं प्रति मीवति' (तैसं २·४·९) इति । यदि शिरःकम्पनादिना लिङ्गेन प्रमीवेत् [v]शीर्षक्तिमान् शिरोरोगवान् [v]स्यात् । अथ यदि [v]तूष्णीं किंचिदप्यप्रतिपद्यमानः [v]आसीत यज्ञस्य अप्रवृत्तिरेव [v]स्यात् ।

ऊर्ध्वं प्रधानयागानां [८]प्रवर्तिष्यमाणत्वात् । [९-]अनूयाजसमिध ऊर्ध्वं-[९] संमार्गकाले तु [v]यज्ञः पराग्भूतस्तत ऊर्ध्वं [१०]प्रधानयागस्य कस्याप्यभावात् ॥

चतुरिति ॥ अग्नेरपि सकृत्संमार्गमध्याहृत्यानेन सह परिधित्रयगतां संमार्गसंख्यां प्रशंसति— 'चतुः सं पद्यते चतुष्पादः पशवः पशूनेवाव रुन्द्धे' इति ॥

ब्रह्मन्निति ॥ [११-]अथानूयाजान् यष्टुं-[११] गमिष्यतोऽध्वर्योर्ब्रह्माणं प्रत्यनुज्ञापनमन्त्रमुत्पाद्य तस्य तात्पर्यं दर्शयति— 'ब्रह्मन् प्र स्थास्याम इत्याहात्र वा एतर्हि यज्ञः श्रितो यत्र ब्रह्मा यत्रैव यज्ञः श्रितस्तत एवैनमा रभते' इति ॥ यस्मिन्नाहवनीयस्य दक्षिणे देशे [v]ब्रह्मा वर्तते [v]अत्र एव एतस्मिन् काले [v]यज्ञः आश्रितस्तत्समीपे स्थित्वा होतव्यत्वात् । अतो ब्रह्मानुज्ञापनेन [v]यज्ञः यस्मिन् देश आश्रितः [१२-v]ततः [v]एव देशात्-[१२] यज्ञम् [१३]उपक्रान्तवान् भवति ॥

यदिति ॥ ब्रह्मणो [१४]वाचैवानुज्ञाप्रदानं विधत्ते— 'यद्धस्तेन प्रमीवेद्वेपनः स्याद्यच्छीर्ष्णा शीर्षक्तिमान्त्स्याद्यत् तूष्णीमासीतासंप्रत्तो यज्ञः स्यात् प्रतिष्ठेत्येव ब्रूयाद्वाचि वै यज्ञः श्रितो यत्रैव यज्ञः श्रितस्तत

८. शृं.हो१—प्रवक्ष्यमाणत्वात् । ९. ड,ड१.शृं.हो१—अनूयाजसमीपस्थ° । १०. अ.इ.उ.जो.ना.पा.हा—प्रधानस्य । ११. ड१—अनूयाजार्थम् । १२. ड—तद्यज्ञदेशात् । १३. अ.इ.उ.क.जो.पा.ना.हा—उपाकृतवान् । १४. अ.इ.उ.जो.ना.पा.हा—वाचैवाज्ञा° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यज्ञः स्यात् प्र तिष्ठेत्येव ब्रूयाद्वाचि वै यज्ञः श्रितो यत्रैव यज्ञः श्रितस्तत एवैनꣳ सं प्र यच्छति देव सवितरेतत् ते प्रा(२)ऽऽहेत्याह प्रसूत्यै बृहस्पतिर्ब्रह्मेत्याह स हि ब्रह्मिष्ठः स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहीत्याह यज्ञाय यजमानायाऽऽत्मने तेभ्य एवाऽऽशिषमा शास्तेऽनार्त्या

यज्ञः । स्यात् । प्रेति । तिष्ठ । इति । एव । ब्रूयात् । वाचि । वै । यज्ञः । श्रितः । यत्र । एव । ५
यज्ञः । श्रितः । ततः । एव । एनम् । सम् । प्रेति । यच्छति । देव । सवितः । एतत् । ते । प्रेति
(२) । आह । इति । आह । प्रसूत्या इति प्र - सूत्यै । बृहस्पतिः । ब्रह्मा । इति । आह । सः । हि ।
ब्रह्मिष्ठः । सः । यज्ञम् । पाहि । सः । यज्ञपतिमिति यज्ञ - पतिम् । पाहि । सः । माम् । पाहि ।
इति । आह । यज्ञाय । यजमानाय । आत्मने । तेभ्यः । एव ।
आशिषमित्या - शिषम् । एति । शास्ते । अनार्त्यै । १०

तस्मात् ' [v]प्रतिष्ठ ' [v]इति [v]ब्रूयात् [v]एव । [v]वाचि स्थितं यज्ञं [v]ततः आदाय [v]संप्रयच्छति । " समवप्रविभ्यः° " (पा १·३·२२) इत्यात्मनेपदाभावश्छान्दसः ॥

देव सवितः इत्यादि । गतम् ॥

स यज्ञमित्यादि । यज्ञादिभ्यः त्रिभ्यः रक्षणम् अनेन आशिषम् आशास्ते । [v]तेभ्यः [v]एव अनेन सर्वामपि [v]आशिषम् [v]आशास्ते ॥ अनार्तत्वायेति ॥ १५

एवैनꣳ सं प्र यच्छति ' इति ॥ किमयं ब्रह्मा [१५]हस्ताग्रसंचालनेन [१६]अनुजानीते किं वा शिरश्चालनेनाथवा तूष्णीम् एवाऽऽस्त आहोस्वित् ' प्रतिष्ठ ' [१७]इत्यनया वाचा ? नाऽऽद्यः । कम्पप्रसङ्गात् । यदि हस्तचालनेन [v]प्रमीवेत् प्रेरयत् तदा [१८]शरीरे वातादिजन्यः कश्चित् [१९-]कम्परूपो रोग[-१९] उत्पद्येत ॥ [२०]शिरसाऽभ्यनुज्ञानेन [v]शीर्षक्तिमान् शिरोरोगवान् भवेत् । [v]तूष्णीम् [२१]अवस्थाने [v]यज्ञः [v]असंप्रत्तः सम्यक् [२२]प्रवर्तितो न [२३]भवेत् । तस्मात् [v]प्रतिष्ठ [v]इति अनया वाचैवाभ्यनुज्ञानं परिशिष्यते । तथा सति यज्ञस्य मन्त्ररूपायां [v]वाचि [२४]आश्रितत्वात् [२५]तद्योग्यादाश्रयाद्यज्ञं [v]प्रयच्छति ॥ १०

देव इति ॥ यदुक्तं सूत्रकारेण – " ब्रह्मन् प्रस्थास्याम इत्युच्यमाने देव सवितरेतत् ते प्राह तत् प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मा स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाह्यों प्रतिष्ठेति प्रसौति " (आपश्रौ ३·२०·८) इति, सोऽयं शाखान्तर आम्नातो मन्त्रः, तस्यायमर्थः – हे सवितर्देव, यदेतत् प्रस्थास्याम [२१]इत्यनुज्ञापनं तदेतत् [२७-]ते तवाग्रे[-२७] अध्वर्युः प्राह तस्मात् त्वं प्रसुव च प्रयज च । बृहस्पतिः २५

---

१५. ड–हस्ताग्रे चालनेन; ड१–हस्ताग्रचालनेन । १६. ड–अनुजानाति । १७. आ–इत्येतया । १८. ड.हो१–' शरीरे ' नास्ति । १९–१९. आ.हा–कम्परोगः । २०. आ–°नुज्ञाने । २१. ड.ड१–आस्थाने । २२. आ.ड–प्रवृत्तः । २३. ड.ड१– भवति यज्ञम् । २४. आ–श्रितत्वात् । २५. ड.ड१–°श्रयादेव यज्ञम् । २६. शृं–इत्युच्यमानानुज्ञापनम् । २७–२७. आ–तव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आश्राव्याऽऽह देवान् यजेति ब्रह्मवादिनो वदन्तीष्टा देवता अथ कतम एते देवा इति छन्दाꣳसीति ब्रूयाद्गायत्रीं त्रिष्टुभं (३) जगतीमित्यथो खल्वाहुर्ब्राह्मणा वै छन्दाꣳसीति तानेव तद्यजति

आश्राव्येत्या - श्राव्य । आह । देवान् । यज । इति । ब्रह्मवादिन इति ब्रह्म - वादिनः । वदन्ति । इष्टाः । देवताः । अथ । कतमे । एते । देवाः । इति । छन्दाꣳसि । इति । ब्रूयात् । गायत्रीम् । त्रिष्टुभम् (३) । जगतीम् । इति । अथो इति । खलु । आहुः । ब्राह्मणाः । वै । छन्दाꣳसि । इति । तान् । एव । तत् । यजति ।

'आश्राव्य' इत्यादिरनूयाजविधिः । 'ब्रह्मवादिनः' इत्यादिभिः पर्यनुयोगः । 'छन्दाꣳसि' इत्युत्तरम् । गायत्रीमित्यादि । 'देवान् यज' इत्यनेन एकवाक्यत्वात् द्वितीया । [v]अथो अपि [v]खलु [v]आहुः पुराविदः [v]ब्राह्मणाः [v]छन्दाꣳसि [v]इति, तदधीनसिद्धित्वात् तेषाम् । तस्मात् ब्राह्मणान् [v]एव अनूयाजैः [v]यजति इति ।

एवात्र ब्रह्मा । हे बृहस्पते, स त्वं यज्ञं पाहि [२८-यज्ञपतिं मनुष्यब्रह्मरूपं-२८] मामपि पाहि । हेऽध्वर्यो, यत् त्वयोक्तं तत् ॐ तथाऽस्तु अनूयाजान् यष्टुं प्रस्थानं कुर्विति । तस्यैतस्य [२९]शाखान्तरोक्तस्य [३०]मन्त्रस्य भागान् व्याचष्टे – 'देव सवितरेतत् ते प्राऽऽहेत्याह प्रसूत्यै बृहस्पतिर्ब्रह्मेत्याह स हि ब्रह्मिष्ठः स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहीत्याह यज्ञाय यजमानायाऽऽत्मन तेभ्य एवाऽऽशिषमा शास्तेऽनार्त्यै' इति ॥

आश्राव्येति ॥ यदुक्तं सूत्रकारेण– "औपभृतं जुह्वामानीय जुहूपभृतावादाय दक्षिणा सकृदतिक्रान्तोऽग्रेणाऽऽघारसंभेदं प्रतीचस्त्रीननूयाजान् यजत्याश्रावमाश्रावं प्रत्याश्रावितेदेवान् यजेति प्रथमꣳ संप्रेष्यति यजयजेतीतरौ" (आपश्रौ ३.५.१) इति, तत्राऽऽश्रावणपूर्वकं प्रथमयागसंप्रेषं विधत्ते— 'आश्राव्याऽऽह देवान् यजेति' इति ॥

ब्रह्मवादिन इति ॥ अथ पूर्वोत्तरपक्षाभ्यामनूयाजार्थं देवतासद्भावं [३१]साधयति— 'ब्रह्मवादिनो वदन्तीष्टा देवता अथ कतम एते देवा इति छन्दाꣳसीति ब्रूयात् गायत्रीं त्रिष्टुभं जगतीमित्यथो खल्वाहुर्ब्राह्मणा वै छन्दाꣳसीति तानेव तद्यजति' इति ॥ याः [v]देवताः अग्निप्रजापत्यादयो यष्टव्यास्ताः सर्वाः पुरोडाशादिभिरेव [v]इष्टाः । [v]अथ यान् देवान् यष्टुमयमध्वर्युः प्रयतते [३२]ते [v]देवाः [v]कतमे? न खल्ववशिष्टाः [३३]केचिद्देवाः सन्तीति पूर्वः पक्षः । अत्र [३४]सिद्धान्तः– [v]छन्दांसि अवशिष्टानि [v]इति उत्तरं [v]ब्रूयात्, [v]गायत्रीं [v]त्रिष्टुभं [v]जगतीं च यष्टुमध्वर्योः [३५]यत्न इति । अपि [३६]चान्ये तत्र विशेषम् [v]आहुः– छन्दसां ब्राह्मणैरध्येतव्यत्वात् [v]ब्राह्मणाः एव छन्दोरूपा [v]इति । [३७]तस्मात् ब्राह्मणान् [v]एव अध्वर्युः [v]यजति इत्युत्तरम् । ब्राह्मणजात्यभिमानी [३८-योऽग्निः स एवानूयाजदेवतेति-३८] तात्पर्यार्थः ॥

२८. ड.हो१–यज्ञपतिः मनुष्यः तं ब्रह्मरूपम् । २९. शृं.हो१–शाखान्तर° । ३०. अ.इ.उ. जो.ना.पा.हा–'मन्त्रस्य' नास्ति । ३१. आ–दर्शयति । ३२. ड–'ते' नास्ति । ३३. ड–केचन देवाः । ३४. हो१–सिद्धान्ते; शृं.–सिद्धान्ती । ३५. ड.शृं.हो१–प्रयत्नः । ३६. हो१–वाऽन्ये । ३७. ड१.शृं. हो१–तर्हि । ३८–३८. ड–योऽयमर्थिन एवात्र देवतेति; ड१–योऽयमग्निः स एवात्र देवतेति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवानां वा इष्टा देवता आसन्नथाग्निर्नोदज्वलत् तं देवा आहुतीभिरनूयाजेष्वन्वविन्दन् यदनूयाजान् यजत्यग्निमेव तत् समिन्द्धे

देवानाम् । वै । इष्टाः । देवताः । आसन् । अथ । अग्निः । न । उदिति । अज्वलत् । तम् । देवाः । आहुतीभिरित्याहुति - भिः । अनूयाजेष्वित्यनु - याजेषु । अन्विति । अविन्दन् । यत् । अनूयाजानित्यनु - याजान् । यजति । अग्निम् । एव । तत् । समिति । इन्द्धे । ५

देवानां वा इत्यादि । गतम् ।

देवानामिति ॥ अथानूयाजान् विधत्ते– 'देवानां वा इष्टा देवता आसन्नथाग्निर्नोदज्वलत् तं देवा आहुतीभिरनूयाजेष्वन्वविन्दन् यदनूयाजान् यजत्यग्निमेव तत् समिन्द्धे' इति ॥ पुरा कदाचिद्देवा यागं कृतवन्तस्तत्राग्निप्रजापत्यादयो यदा देवैः [v]इष्टाः तदा तद्यागादूर्ध्वमाहुत्याधारभूतः [v]अग्निः [३९]प्रज्वलितः [v]न अभूत् । ततः [v]देवाः [v]अनूयाजेषु प्रविश्य [४०]निलीनं [४१]तम् अग्निमन्विष्याऽऽहुतिभिर्लब्धवन्तः । तस्मात् [v]अनूयाजान् यजेत्, तेन [v]अग्निम् [v]एव प्रज्वालितवान् भवति ॥

[४२]एषां चानूयाजानां मन्त्रास्तदीये मन्त्रकाण्ड एवाऽऽम्नाताः – "देवं बर्हिः । वसुवने वसुधेयस्य वेतु । देवो नराशꣳसः । वसुवने वसुधेयस्य वेतु । देवो अग्निः स्विष्टकृत् । सुद्रविणा मन्द्रः कविः । सत्यमन्माऽऽयजी होता । होतुर्होतुरायजीयान् । अग्ने यान् देवानयाट् । याꣳ अपिप्रेः । ये ते होत्रे अमत्सत । ताꣳ ससनुषीꣳ होत्रां देवंगमाम् । दिवि देवेषु यज्ञमेरयेयम् । स्विष्टकृच्चाग्ने होताऽभूः । वसुवने वसुधेयस्य नमोवाके वीहि" (तैब्रा ३.५.९) इति ॥ देवं द्योतनशीलं बर्हिर्नामकं यदग्निस्वरूपं तदेतद्वसुधेयस्य वेतु । [४३-]आज्यं वसुरूपं यदेतदग्नावाधेयं[-४३] तदेतत् [४४]भक्षयतु । किमर्थम् ? [४५]वसुवने [४६]वसुनो धनस्य वननं भजनं वसुवंस्तस्मै, यजमानस्य [४७]धनप्राप्त्यर्थमित्यर्थः । एवं नराशंसनामकेऽप्यग्नौ योजयितव्यम् । [४८]यस्तु स्विष्टकृन्नामकोऽग्निः सोऽयं सुद्रविणा शोभनधनः मन्द्रो हर्षणशीलः, कविर्विद्वान्, सत्यमन्मा सत्यमननः, आयजी शास्त्रीयया मर्यादया यष्टा, होता देवानामाह्वाता । होतुर्होतुरायजीयाँल्लोके यो यो होता [४९]अस्ति तस्मात् सर्वस्मादतिशयेन [५०]शास्त्रीयमर्यादामनुल्लङ्घ्य यष्टा । हेऽग्ने, ईदृशस्त्वं यान् देवानयाट् इष्टवानसि, यांश्च देवानपिप्रेः प्रीणितवानसि, ये च देवास्ते तव होत्रे होतृकृत्ये [५१-]अमत्सत यजने[-५१] अमाद्यन् हृष्टवन्तः, दिवि स्थितेषु देवेषु ससनुषीं हविर्दत्तवतीं देवंगमां देवानेव गच्छन्तीं तां होत्रां होतृक्रियामिममस्मदीयं यज्ञं [५२]प्रत्येरय [५३]आभिमुख्येन प्रापय, अस्मदीये यज्ञे सर्वदेवतुष्टिकरीं होतृक्रियां त्वमनुतिष्ठेत्यर्थः । हेऽग्ने, त्वं स्विष्टकृद्धोता चाभूर्यदस्माभिरिष्टं तच्छोभनं त्वया कृतं तादृशो होमस्य कर्ताऽभूः । अतो नमोवाके यज-

३९.–अ.इ.उ.जो.ना.पा.हा–प्रज्वालितः; ड–'प्रज्वलितः' नास्ति । ४०. ड–लीनम् । ४१. आ–'तम्' नास्ति । ४२. आ.उ–एतेषाम् । ४३–४३. अ.इ.उ.जो.ना.हा–आहूय यदेत°; शृं..हो१–आज्यवस्तुरूपं यदेत°; ड१–आज्यं वस्तुरूपं यदेत° । ४४. क.ड.हो१–भजताम् । ४५. अ.इ.उ.जो.ना.पा.हा–'वसुवने' नास्ति । ४६. ड–'वसुनः' नास्ति । ४७. ड.ड१.शृं.हो१–धनप्राप्तये । ४८. आ.क.ड–'यस्तु' नास्ति; अ.इ.उ.जो.ना.पा.हा–अग्निः । ४९. आ–तस्मात्; ड–'अस्ति' नास्ति । ५०. आ–°मर्यादानुल्लङ्घनेन । ५१–५१. हो१–यजमाने अमत्सत; शृं–यजने अमत्सत । ५२. आ.क–एरय, हा–प्रेरय । ५३. अ.इ.उ.पा–आभिमुख्ये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अनूयाजाः सूक्तवाकश्च

मानस्य नमस्कारोक्तौ सत्यां वसुवने धनस्य संभजनाय वसुधेयस्य [५४]वीहि अज्ञावाधीयमानमिदमाज्यरूपं द्रव्यं भक्षय ॥

तैरेतैर्मन्त्रकाण्डोक्तैर्मन्त्रैः [५५]साध्याः अनूयाजाः प्रपञ्चिताः ॥

अथ प्रस्तरप्रहरणाङ्गभूतः सूक्तवाको व्याख्यातव्यः । सूक्तवाकस्यानूयाजानन्तरभावित्वं बौधायनेन दर्शितम्- 'अनूयाजानां प्रथमं यजति देवं बर्हिर्वसुवने वसुधेयस्य वेत्विति देवो नराशꣳसो वसुवने वसुधेयस्य वेत्विति द्वितीयं देवो अग्निः स्विष्टकृदिति तृतीयमनवानमनूयाजान् यजतीति ब्राह्मणमुक्तमे वाऽमत्सतेति व्यनिति यदा जानाति [५६]सूक्तवाकाय सूक्ता ब्रूहीति[५६] तदा सूक्तवाकमन्वाहेदं द्यावापृथिवी इति प्रतिपद्य" इति । सोऽयं सूक्तवाकस्य प्रथमो भागो मन्त्रकाण्ड [५७]एवमाम्नातः- "इदं द्यावापृथिवी भद्रमभूत् । आधीं सूक्तवाकम् । उत नमोवाकम् । ऋध्यास्म सूक्तोच्यमग्ने। त्वꣳ सूक्तवागसि । उपश्रितो दिवः पृथिव्योः । ओमन्वती तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी स्ताम् । शंगये जीरदानू । अत्रस्नू अप्रवेदे । उरुगव्यूती अभयंकृतौ । वृष्टिद्यावा रीत्यापा । शंभुवौ मयोभुवौ । ऊर्जस्वती च पयस्वती । च सूपचरणा च स्वधिचरणा च । तयोराविदि" (तैब्रा ३.५.१०) इति ॥ हे द्यावापृथिवी, इदमीदृशं भद्रं [५८]कल्याणमभूत् । कीदृशमिति तदुच्यते । ते वयं सूक्तवाकमार्ध्म, श्रद्धालुरयं यजमानः सम्यगनेन हविर्दत्तम् [५९]इत्यादीनि वाक्यानि सूक्तानि तेषां सूक्तानां देवैर्मनुष्यैः [६०]वा वचनं[६०] वाकस्तद्यथा भवति तथा समृद्धिं गताः [६१]स्मः । अथवा "अग्निरिदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत" (तैब्रा ३.५.१०) इत्यादीनि सूक्तानि तेषां वचनमत्र यथा भवति तथा वयमृद्धिं [६२]गताः । अपि च 'नमो देवेभ्यः' इति [६३]उक्तिर्नमोवाकः, स यथा भवति तथा वयमृद्धिं प्राप्ताः । हेऽग्ने, त्वया सूक्तोच्यं यजमानः [६४]सम्यक् हविर्दत्तवानित्येतादृशं सूक्तं वक्तव्यं, तेन वयमृध्यास्म समृद्धिं प्राप्ता भूयास्म । [६५]यथा त्वं द्यावापृथिव्योरुपश्रितोऽवस्थितो [६६]भूत्वा सूक्तवागसि सूक्तं वक्तुं क्षमोऽसि । हे यजमान, तव संबन्धिन्यस्मिन् यज्ञे द्यावापृथिव्यावोमन्वती रक्षणवत्यौ स्ताम् । [६७]कीदृश्यौ द्यावापृथिव्यौ[६७] ? शंगये [६८]सुखस्य प्रापयित्र्यौ[६८] । जीरदानू [६९]वृष्ट्यादिद्वारेण जीवनप्रदात्र्यौ[६९] । अत्रस्नू भयरहिते । अप्रवेदे अस्मदीयानां दोषाणाम् [७०]अकथयित्र्यौ । उरुगव्यूती प्रभूततृणोदकयुक्तत्वेन विस्तीर्णगोप्रचारेण, अभयंकृतावस्मास्वभयस्य कर्त्र्यौ, वृष्टिद्यावा वृष्टेः प्रकाशयित्र्यौ । रीत्यापा रीतेः सन्मार्गवृत्तिप्रकारस्य प्रापयित्र्यौ, शंभुवौ रोगाद्यनिष्टशान्तेः प्रापयित्र्यौ । मयोभुवावन्नपानादिसुखस्य प्राययित्र्यौ । युवयोर्मध्ये द्यौरियमूर्जस्वती वृष्टिरूपरसवती, पृथिवीयं पयस्वती तृणोदकद्वारा [७१]बहुलगोक्षीरादियुक्ता । तथेयं द्यौः सूपचरणा [७२]देवताधिवासस्थानत्वेन सूष्ठूपचरितव्या । इयं पृथिवी [७३]स्वधिचरणा [७४]अस्माभिः सुखेनाधिश्रित्य चरितुं[७४] शक्या । तयोर्द्यावापृथिव्योराविदि आज्ञायां सत्याम्, अग्निरिदं हविरजुषतेत्यनेन वक्ष्यमाणेनान्वयः ॥

---

५४. ड१-वेत्विति । ५५. अ.आ.इ.उ.जो.पा.हा-प्रसिद्धा । ५६-५६. आ.हा-सूक्तवाकाननूक्त्या इति; क.ड.हो१-सूक्तवाकाननूक्त्वाऽनुब्रूहीति । ५७. ड१-एवं समाम्नातः । ५८. क.ड.ड१.शृं.हो१-कल्याणमस्माकमभूत् । ५९. आ.ड-इत्यादि° । ६०. शृं-वाचनम् । ६१. ड-स्म । ६२. ड-प्राप्ताः । ६३. ड१-उक्तेर्नमो° । ६४. आ-समृद्धम् । ६५. क.ड.ड१.शृं.हो१-यस्मात् । ६६. क-अभूः; ड.हो१-अभूः त्वम् । ६७-६७. आ-कीदृशे (शौ); हो१-कीदृश्यौ । ६८-६८. -अ.इ.उ.पा.हा-सुखमस्य प्रार्थयित्र्यौ । ६९. ड.ड१.शृं.हो१-चिरंजीवयित्र्यौ । ७०. हो१-अभिभवित्र्यौ । ७१. आ-बहुलक्षीरा° । ७२. ड.ड१-देवाधि° । ७३. अ.इ.उ.जो.ना.पा.हा-स्वधिचरणा भूः । ७४-७४. आ-सुखेनाश्रयितुम्, ड-सुखेनाधिश्रितम् (?) ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतदु वै नामाऽऽसुर आसीत् स एतर्हि यज्ञस्याऽऽशिषमवृङ्क्त यद्ब्रूयादेत(४) दु द्यावापृथिवी भद्रमभूदित्येतदुमेवाऽऽसुरं यज्ञस्याऽऽशिषं गमयेदिदं द्यावापृथिवी भद्रमभूदित्येव ब्रूयाद्यजमानमेव यज्ञस्याऽऽशिषं गमयत्यार्ध्मं सूक्तवाकमुत नमोवाकमित्याहेदमरात्स्मेति वावैतदाहोपाश्रितो

एतदुः । वै । नाम । आसुरः । आसीत् । सः । एतर्हि । यज्ञस्य । आशिषमित्या - शिषम् । अवृङ्क्त । यत् । ब्रूयात् । एतत् (४) । उ । द्यावापृथिवी इति द्यावा - पृथिवी । भद्रम् । अभूत् । इति । एतदुम् । एव । आसुरम् । यज्ञस्य । आशिषमित्या - शिषम् । गमयेत् । इदम् । द्यावापृथिवी इति द्यावा - पृथिवी । भद्रम् । अभूत् । इति । एव । ब्रूयात् । यजमानम् । एव । यज्ञस्य । आशिषमित्या - शिषम् । गमयति । आर्ध्मं । सूक्तवाकमिति सूक्त - वाकम् । उत । नमोवाकमिति नमः - वाकम् । इति । आह । इदम् । अरात्स्म । इति । वाव । एतत् । आह । उपाश्रित इत्युप - श्रितः । १०

'एतदुर्वै' इत्यादि सूक्तवाकविधिः । 'एतदु द्यावापृथिवी भद्रमभूत' इति शाखान्तरीयः पाठो निन्द्यते । अस्मिन् [V]एतदुः [V]नाम [V]आसुरः यज्ञफलमात्मीयमकरोत् । तस्मादेतदुशब्दम् उच्चारयन् गतमेव यज्ञफलं [V]गमयेत् । तस्मात् 'इदं द्यावापृथिवी' [V]इति ब्रुवन् अस्य कर्मणः पतिं [V]यजमानम् [V]एव यज्ञफलं प्रापयति ।

इदमरात्स्मेत्यादि । सूक्तवाकनमोवाकयोः ऋद्धया वयमिदानीं संसिद्धाः [V]इति अयमस्याभिप्राय इति दर्शयति । द्यावापृथिव्योर्हीति । तदधीनसिद्धित्वात् । आशिषमेवेति । [V]ओमवन्ती अस्मद्रक्षण-

एतद्वितिः ॥ अस्य सूक्तवाक्यस्य प्रथमवाक्यं शाखान्तरेऽन्यथा पठितम् – "एतदु द्यावापृथिवी भद्रमभूत्" इति, तदिदं दूषयित्वा स्वशाखापाठं प्रशंसति — 'एतदुवैं नामाऽसुर आसीत् स एतर्हि यज्ञस्याऽऽशिषमवृङ्क्त यद्ब्रूयादेतदु द्यावापृथिवी भद्रमभूदित्येतदुमेवाऽऽसुरं यज्ञस्याऽऽशिषं गमयेदिदं द्यावापृथिवी भद्रमभूदित्येव ब्रूयाद्यजमानमेव यज्ञस्याऽऽशिषं गमयति' इति ॥ [७५]एतदुनामा कश्चिद् [V]आसुरः [V]आसीत् । [V]सः कस्यचिद्यज्ञे[७५] एतस्मिन् सूक्तवाककाले समागत्य 'आयुरा शास्ते । सुप्रजास्त्वमा शास्ते' (तैब्रा ३·५·१०) इत्यादिकाम् [V]आशिषं यजमानसंबन्धिनीं विनाश्य [७६][V]स्वसंबन्धिनीमकरोत् । तस्मात् 'एतदु द्यावापृथिवी' [V]इति यदि होता पठेत् तदाऽऽसुरस्यैवाऽऽशीःप्राप्तिः स्यात् । ततः शाखान्तरपाठं परित्यज्य 'इदं द्यावापृथिवी भद्रम्' [V]इति [V]एव पठेत् । तथा सति यजमानस्यैवाऽऽशीः-प्राप्तिर्भवति ॥

आर्ध्मेति ॥ सूक्तवाकनमोवाकशब्दयोः क्रियाविशेषणत्वं दर्शयति – 'आर्ध्मं सूक्तवाकमुत नमोवाकमित्याहेदमरात्स्मेति वावैतदाह' इति । [V]इदं द्वयं यथा भवति तथा समृद्धिं प्राप्ताः [V]इति एव [V]एतत् मन्त्रवाक्यं ब्रूते ॥

७५–७१. ड१–एतदुनामकः कश्चिदासुरः कस्यचिद्यज्ञे; ड.शृं–एतदुनामकः कश्चिदसुरः कस्यचित् राज्ञः; शृं–एतदुनामकः कश्चिदसुरः कस्यचिद्यज्ञस्य । ७६. अ.इ.उ.पा–स्वयं संबन्धिनीम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिवः पृथिव्योरित्याह द्यावापृथिव्योर्हि यज्ञ उपश्रित ओमन्वती तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी (५) स्तामित्याहाऽऽशिषमेवैतामा शास्ते यद्ब्रूयात् सूपावसाना च स्वध्यवसाना चेति प्रमायुको यजमानः स्याद्यदा हि प्रमीयतेऽथेमामुपावस्यति सूपचरणा च स्वधिचरणा चेत्येव ब्रूयाद्वरीयसीमेवास्मै गव्यूतिमा शास्ते न प्रमायुको भवति

५ दिवः । पृथिव्योः । इति । आह । द्यावापृथिव्योरिति द्यावा - पृथिव्योः । हि । यज्ञः । उपश्रित इत्युप - श्रितः । ओमन्वती इत्योमन् - वती । ते । अस्मिन् । यज्ञे । यजमान । द्यावापृथिवी इति द्यावा - पृथिवी (५) । स्ताम् । इति । आह । आशिषमित्या - शिषम् । एव । एताम् । एति । शास्ते । यत् । ब्रूयात् । सूपावसानेति सु - उपावसाना । च । स्वध्यवसानेति सु - अध्यवसाना । च । इति । प्रमायुक इति प्र - मायुकः । यजमानः । स्यात् । यदा । हि । प्रमीयत इति १० प्र - मीयते । अथ । इमाम् । उपावस्यतीत्युप - अवस्यति । सूपचरणेति सु - उपचरणा । च । स्वधिचरणेति सु - अधिचरणा । च । इति । एव । ब्रूयात् । वरीयसीम् । एव । अस्मै । गव्यूतिम् । एति । शास्ते । न । प्रमायुक इति प्र - मायुकः । भवति ।

वत्यौ द्यावापृथिव्यौ [v]स्ताम् [v]इति [v]एताम् । यद्ब्रूयात् इत्यादि । सुष्ठु इमामुपेत्यावश्यं निलीयन्ते प्रजा इति [v]सूपावसाना पृथिवी; सुष्ठु इमामधिरुहयावसन्तीति [v]स्वध्यवसाना द्यौः । १५ व्यत्ययेनाधिकरणे "आतो युच्" (पा ३·३·१२८) । "चितः" (पा ६·१·१६३) इत्यन्तोदात्तत्त्वम् । यद्वा - भावे ल्युटि तदन्ते प्रजा इति सूपावसाना पृथिवी । अनो बहुव्रीहौ "नञ्सुभ्याम्" (पा ६·२·१७२) इत्युत्तरपदान्तोदात्तत्त्वम्[२] ॥

यदा हीत्यादि ॥ [३]मृत्युर्हि पृथिवीमुपेत्यावस्यतीति । [४]एवमिमं शाखान्तरीयं पाठं निन्दित्वा पाठान्तरं दर्शयति - 'सूपचरणा च' इत्यादि । सुष्ठु इमामुप्येत्य चरन्ति जन्तवः इति

२० **उपश्रित इति ॥ यज्ञस्याग्निरूपेण [७७]पृथिव्यां फलरूपेण दिवि चाऽऽश्रितत्वं प्रसिद्धमित्येतद्दर्शयति 'उपश्रितो दिवः पृथिव्योरित्याह द्यावापृथिव्योर्हि यज्ञ उपश्रितः' इति ॥**

ओमन्वतीति ॥ 'रक्षणवत्यौ स्ताम्' [७८]इत्येतादृगाशीरत्र विवक्षितेति दर्शयति— 'ओमन्वती तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी स्तामित्याहाऽऽशिषमेवैतामा शास्ते' इति ॥

यदिति ॥ शाखान्तरपठितम् [७९]अवसानशब्दं दूषयित्वा स्वपाठं प्रशंसति— 'यद्ब्रूयात् २५ सूपावसाना च स्वध्यवसाना चेति प्रमायुको यजमानः स्याद्यदा हि प्रमीयतेऽथेमामुपावस्यति सूपचरणा च स्वधिचरणा चेत्येव ब्रूयाद्वरीयसीमेवास्मै गव्यूतिमा शास्ते न प्रमायुको भवति' इति ॥ [v]यदा पुरुषो

३. तं३.त्रि.लं.हो—मृत्युभिः ; मै४—मृता हि । ४. मै.हो—एवमिदम् ।

७७. अ.इ.उ.पा.हो१—पृथिव्याः । ७८. हो—इत्येतादृश्येवात्र । ७९. हो—उपाव° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तयोराविद्यग्निरिदꣳ हविरजुषतेत्याह या अयाक्ष्म (६) देवतास्ता अरीरधामेति वावैतदाह

तयोः । आविदीत्या - विदि । अग्निः । इदम् । हविः । अजुषत । इति । आह । याः । अयाक्ष्म (६) । देवताः । ताः । अरीरधाम । इति । वाव । एतत् । आह ।

[V]सूपचरणा पृथिवी । सुष्ठु इमामधिरुह्य चरन्तीति [V]स्वधिचरणा द्यौः । "छन्दसि गत्यर्थेभ्यः" (पा ३·३·१२९) इति युच्, बहुव्रीहिर्वा । [V]वरीयसीम् उरुतरां [V]गव्यूतिं गवां सुखसंचारस्थानं द्यावापृथिव्यात्मकं यजमानाय [V]आशास्ते । "गोर्यूतौ छन्दसि°" (पा ६·१·७९ वा २) इत्यवादेशः । "ऊतियूति°" (पा ३·३·९७) इति क्तिनि यूतिशब्दो निपातितः । विकृतत्वान्नावगृह्यते ॥

तयोराविदीत्यादि ॥ [V]तयोः द्यावापृथिव्योः [V]आविदि आभिमुख्येन लाभे सति [V]अग्निः [V]इदं [V]हविः [V]अजुषत असेवत, आत्मीयं च [५]महत् तेजः[५] अवीवृधत अवर्धयत्, ज्यायः प्रशस्तं

म्रियते तदानीं पर्यङ्कशयनादिपरित्यागेन [V]इमां भूमिमुपेत्यावसानं गच्छति, तस्मात् [८०]तादृशस्यार्थस्य सूचके [८१]सूपावसानशब्दे प्रयुक्ते सति मरणशीलो [८२]भवेत् । [८३]भूमिविषयकेण स्वधिचरणेतिशब्देन [V]वरीयसीम् अतिबहुलां [८४][V]गव्यूतिं गोप्रचारभूमिं कामितवान् भवति ॥

सूक्तवाकस्य द्वितीयभागपाठस्तु– 'अग्निरिदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत । सोम इदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत । अग्निरिदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत । प्रजापतिरिदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत । अग्नीषोमाविदꣳ हविरजुषेताम् । अवीवृधेतां महो ज्यायोऽक्राताम् । इन्द्राग्नी इदꣳ हविरजुषेताम् । अवीवृधेतां महो ज्यायोऽक्राताम् । इन्द्र इदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत । महेन्द्र इदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत । देवा आज्यपा आज्यमजुषन्त । अवीवृधन्त महो ज्यायोऽक्रत । अग्निर्होत्रेणेदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत (तैब्रा ३·५·१०) इति । आज्यभागदेवोऽयमग्निर्दत्तमिदं[८५] हविरसेवत । सेवित्वा च यजमानं वर्धितवान् । तस्य च यजमानस्य [८६]अत्यधिकं तेजः कृतवान् । एवं सोमादिषु स्विष्टकृदग्निपर्यन्तेषु योज्यम् । [८७]देवताक्रमश्चात्राऽऽवाहननिगदवत् [८८]अवगन्तव्यः । होत्रेण होमनिमित्तेन होमस्य [८९]स्विष्टकृत्त्वं कर्तुमित्यर्थः ॥

तयोरिति ॥ तस्यैतस्य मन्त्रकाण्डाम्नातस्य [९०]सूक्तवाकमध्यभागस्य तात्पर्यं दर्शयति – 'तयोराविद्यग्निरिदꣳ हविरजुषतेत्याह या अयाक्ष्म देवतास्ता अरीरधामेति वावैतदाह' इति । पूर्वम्

५–५. मै४–महस्तेजः ।

८०. ड१–तादृशार्थस्य । ८१. हो१–उपाव° । ८२. आ–भवति । ८३. अ–भूमिविशेषेण, इ.उ.ड.पा.–भूमिविषयेण; श्रं–भूमिविषयत्वेन । ८४. ड.ड१.श्रं.–'गव्यूतिं' नास्ति । ८५. आ–'इदं' नास्ति । ८६. आ–अधिकम् । ८७. ड.हो१–देवताश्चात्रा°; अ.इ.उ.जो.ना.पा–देवताक्रमः स चात्रा° ; हा–योऽत्र देवताक्रमः स चात्रा° । ८८. आ.हा–तत्र; क–अवगन्तव्यः तत्र । ८९. ड१–स्विष्टत्वम् । ९०. ड१–सूक्तमध्यम° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चाकृत कृतवान्। यस्मादेवमग्न्यादिकाः [v]देवताः [v]अयाक्ष्म इष्टवन्तो वयं [v]ताः [v]अरीरधाम, तेजःप्रभृतिमिश्र समृद्धा वयमकार्ष्मेति एतदस्य [६]मन्त्रभागप्रतिपाद्यमिति दर्शयति॥

'आर्धं सूक्तवाकम्' इत्यनेन वयं वृद्धिं प्राप्ता इति स्वकीयैवाभिवृद्धिरुक्ता। इदानीम् 'अग्निरिदं हविरजुषत' इत्यादिभिर्देवताविषया [९१]समृद्धिरुच्यते। [v]याः [v]देवताः [९२v]अयाक्ष्म वयमिष्टवन्तः [v]ताः [v]देवताः [v]अरीरधाम यथा [९३]राद्धाः [९४]भवन्ति [९५]-तथा [v]अकार्ष्म-[९५] [v]इति एतमेवार्थम् 'अग्निरिदम्' इत्यादिमन्त्रवाक्यं ब्रूते॥

सूक्तवाकस्य चरमभाग एवमाम्नातः – "अस्यामृधद्धोत्रायां देवंगमायाम्। आशास्तेऽयं यजमानोऽसौ। आयुराशास्ते। सुप्रजास्त्वमाशास्ते। सजातवनस्यामाशास्ते। उत्तरां देवयज्यामाशास्ते। भूयो हविष्करणमाशास्ते। दिव्यं धामाऽऽशास्ते। विश्वं प्रियमाशास्ते। यदनेन हविषाऽऽशास्ते। तदृश्यात् तदध्यात्। तदस्मै देवा रासन्ताम्। तदग्निर्देवो देवेभ्यो वनते। वयमग्नेर्मानुषाः। इष्टं च वीतं च। उभे च नो द्यावापृथिवी अꣳहसस्पाताम्। इह गतिर्वामस्येदं च। नमो देवेभ्यः" (तैब्रा ३·५·१०) इति। अस्यां सूक्तवाकपाठपूर्विकायां होत्रायां [९६]प्रस्तरप्रहरणरूपायां होमक्रियायां [९७]देवंगमायां देवान् प्राप्नुवत्यां सत्यामृधद्ध्नोतु। यजमानः समृद्धिं प्राप्नोतु। असौ विष्णुरुद्रादिशर्मा यजमानः स्वस्याऽऽयुः प्रार्थयते, सुप्रजास्त्वं शोभनापत्ययुक्ततत्वं सजातवनस्यां [९८]समानजातीयैर्वननं सेव्यत्वमात्मन इच्छतीति व्युत्पत्तिम् अभिप्रेत्य [९९]-तदीयेच्छा सजातवनस्या-[९९] इत्युच्यते। [१००]उत्तरा देवयज्या कालान्तरभाविनी सेयमिष्टिः। भूयो हविष्करणं [१०१]प्रभूतसोमयागादिरूपम्। दिव्यं धाम स्वर्गस्थानम्। किं बहुना, विश्वं प्रियं [१०२]-यद्यदात्मनः प्रियं तत् सर्वमनेन प्रस्तराख्येण हविषा यत् फलमाशास्ते-[१०२] तदृश्यात् तत्फलं भुङ्क्ताम्। तच्च फलमृध्यात् समृद्धमस्य [१०३]भवतात्। तत् सर्वमस्मै यजमानायाग्न्यादयो [१०४]देवाः रासन्तां [१०५]साधयन्ताम्। [१०६]तत्फलमयमग्निर्देवो देवेभ्यः सर्वेभ्य आनीय वनते यजमानं तद्भागिनं करोति। वयं च होत्रादयो [१००]मानुषाः सन्तोऽग्नेः प्रसादात् [१०८]संभावितफलं मनुष्येभ्य आनयाम इति शेषः। किं तदेवं मानुषं च फलमिति [१०९]तदुच्यते – 'इष्टं च वीतं चेति। इष्टं यागनिमित्तं स्वर्गसाधनं पुण्यं यदस्ति तद्दैवं [११०]वीतम् अशनखाद्यादिरूपं यदस्ति [१११]तदेतन्मानुषम्। किं [११२]च एते द्यावापृथिवी उभे अपि [११३]नोऽस्मानꣳहसः [११४]-पापात् फलप्रतिबन्धकात्-[११४] पातां रक्षताम्। इहास्मिन् कर्मणि वामस्य [११५]-वननीयस्य धनस्य गतिः प्राप्तिरस्तु। इदं च हविर्देवैः स्वीक्रियतामिति शेषः। नमस्कारः सर्वेभ्यो देवेभ्योऽस्तु॥

---

६. तं३–°प्रतिपाद्यत्वमिति।

---

९१. आ–समृद्धिरुच्यते। ९२. आ–वयमयाक्ष्म। ९३. आ.क–राध्नुवन्ति समृद्धा; अ.इ.उ.जो.ना.पा.हा–राध्नोति समृद्धा; ड.हो१–राद्धान्तः समृद्धाः। ९४. अ.इ.उ.जो.ना.पा.हा–भवति। ९५–९५. उ–तदैवायक्ष्म। ९६. ड१.–°रूप°। ९७. ड–'देवंगमायां' नास्ति। ९८. ड–°वैननीयत्वम्। ९९–९९. आ–एतत्सजातवनस्या; शृं.हो१–तदीये वा सजात°। १००. अ.इ.उ.जो.ना.पा.हा–उत्तर°। १०१. ड१–प्रभूतं सोम°। १०२–१०२. आ.क–यद्यत्सर्वमात्मनोऽनेन हविषा प्रस्तराख्येण यजमानः (यत्) फलमाशास्ते। १०३. आ.ड.ड१–भवतु। १०४. आ–'देवाः' नास्ति। १०५. शृं.–साधयन्तां' नास्ति; हो१–राधयन्ताम्। १०६. आ–तत्फलमग्नि°। १०७. ड१–मनुष्याः। १०८. अ.इ.उ.पा–संभावितयज्ञं; ड.ड१.हो१–संभावितं फलं; जो.हा–संभावितयज्ञम्। १०९. ड१–'तदुच्यते' नास्ति। ११०. हो१–वीतं च खाद्या°; ड१–वीतमशनस्वास्थ्यादि°। १११. ड.ड१–तन्मानुषम्। ११२. आ–तु। ११३. ड–नोऽस्माकमꣳहसः। ११४–११४. अ.इ.उ.जो.पा.हा–पापफलप्रतिबन्धकात्; ड.ड१–फलप्रतिबन्धकात् पापात्। ११५. आ–कमनीयस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यन्न निर्दिशेत् प्रतिवेशं यज्ञस्याऽऽशीर्गच्छेदा शास्तेऽयं यजमानोऽसावित्याह निर्दिश्यैवैनꣳ सुवर्गं लोकं गमयत्यायुरा शास्ते सुप्रजास्त्वमा शास्त इत्याहाऽऽशिषमेवैतामा शास्ते सजातवनस्यामा शास्त इत्याह

यत्। न। निर्दिशेदिति निः - दिशेत्। प्रतिवेशमिति प्रति - वेशम्। यज्ञस्य। आशीरित्या - शीः। गच्छेत्। एति। शास्ते। अयम्। यजमानः। असौ। इति। आह। निर्दिश्येति निः - दिश्य। एव। एनम्। सुवर्गमिति सुवः - गम्। लोकम्। गमयति। आयुः। एति। शास्ते। सुप्रजास्त्वमिति सुप्रजाः - त्वम्। एति। शास्ते। इति। आह। आशिषमित्या - शिषम्। एव। एताम्। एति। शास्ते। सजातवनस्यामिति सजात - वनस्याम्। एति। शास्ते। इति। आह।

यन्नेति। एतन्नामा अयं यजमानः [v]आशास्ते इति यदि विशिष्टं [v]न निर्दिश्येत तदा [v]यज्ञस्य [v]आशीः आशासनीयमायुरादिकं यज्ञफलं [v]प्रतिवेशं पार्श्वस्थं यं कंचित् [v]गच्छेत्, तस्मात् [v-v]अयं भवदत्तशर्मा[-v] [v]यजमानः [v]इति [v]निर्दिश्य [v]एनम् [v]एव स्वर्गं [v]गमयति इति आयुरादि-दिव्यधामपर्यन्तं विश्वं प्रियं प्रापयतीति यावत्॥

आशिषमेवैतामिति॥ प्रसिद्धपदार्थके पदे इत्यर्थः। प्राणा वै सजाता [c]इति। समान-जन्मानः प्राणाः [v]सजाताः, तेषां [v]वननस्याशासनात्। प्राणा अनन्तरिता [c]अविनष्टा भवन्ति।

यदिति॥ मन्त्रगतेन 'असौ' इति पदेन [११६]यजमानस्य नामनिर्देशो विवक्षित [११७]इत्येतद्दर्शयति –'यन्न निर्दिशेत् प्रतिवेशं यज्ञस्याऽऽशीर्गच्छेदा शास्तेऽयं यजमानोऽसावित्याह निर्दिश्यैवैनꣳ सुवर्गं लोकं गमयति' इति॥ यद्यत्र [v]न यजमानस्य नाम [v]निर्दिशेत्, यज्ञसंबन्धिन्यायुरादिरूपा येयम् [v]आशीः सा [v]प्रतिवेशं [v]गच्छेत् यजमानप्रतिरूपकं [११८]यज्ञशालां प्रविष्टं पार्श्वस्थं यं कंचित् पुरुषं प्राप्नुयात्। [११९-v]असौ [v]इति [१२०-]नामनिर्देशे तु[-१२०] यजमानमेव स्वर्गं [१२१]प्रापयति। एतमेव नामनिर्देशमभिप्रेत्यान्यत्रा-ऽऽम्नातम्– "यर्हि होता यजमानस्य नाम गृह्णीयात् तर्हि ब्रूयादेमा [१२२-]अग्मन्नाशिषो दोहकामाः[-१२२]" (तैसं १.७.४) इति॥

आयुरिति॥ 'आशास्तेऽयं यजमानः' [१२३]इत्यस्मिन् वाक्ये यदाशासनीयं संग्रहरूपेण [१२४]विवक्षितं तदेवाऽऽयुरादिवाक्यैः प्रपञ्चितमित्येतद्दर्शयति– 'आयुरा शास्ते सुप्रजास्त्वमा शास्त इत्याहाऽऽशिषमेवैतामा शास्ते' इति॥

सजातवनस्यामिति॥ जीवात्मना सहोत्पन्नत्वात् प्राणाः सजातशब्देन विवक्षिता इत्येतत् दर्शयति– 'सजातवनस्यामा शास्त इत्याह प्राणा वै सजाताः प्राणानेव नान्तरेति' इति॥ सजातशब्दाभिधेयैः

७–७. त्रि–अयमसौ देवदत्त°। ८. तं३.लं–इत्यर्थः। ९. मै.हो–वनस्याशासनात्। १०. लं–अनेष्टाः; हो–अनिष्टा।

११६. आ–यजमान°। ११७. आ–इत्याह। ११८. ड.ड१–यज्ञशालायाम्। ११९. ड.–अत असौ। १२०–१२०. आ.ड१–नाम निर्दिशेत्। १२१. हो१–प्रापयेत्। १२२–१२२. आ.ड–अग्मन्। १२३. ड१–इति। १२४. ड–विवक्षणीयम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अनूयाजाः सूक्तवाकश्च

प्राणा वै सजाताः प्राणानेव (७) नान्तरेति तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषा इत्याहाग्निर्देवेभ्यो वनुते वयं मनुष्येभ्य इति वावैतदाहेह गतिर्वामस्येदं च नमो देवेभ्य इत्याह

प्राणा इति प्र - अनाः । वै । सजाता इति स - जाताः । प्राणानिति प्र - अनान् । एव (७) । न । अन्तः । एति । तत् । अग्निः । देवः । देवेभ्यः । वनते । वयम् । अग्नेः । मानुषाः । इति । आह । अग्निः । देवेभ्यः । वनुते । वयम् । मनुष्येभ्यः । इति । वाव । एतत् । आह । इह । गतिः । वामस्य । इदम् । च । नमः । देवेभ्यः । इति । आह ।

तदग्निर्देव इत्यादि । तदाशासनीयम् [v]अग्निः स्वयं [v]देवः सन् [v]देवेभ्यः देवसकाशात् वा [v]वनते अस्मै यजमानाय दातुमुपादत्ते दिव्यान् भोगान् अस्मादुत्पादयति। [v]वयं तु मनुष्याः सन्तः [v]मनुष्येभ्यः मानुषान् भोगान् यजमानार्थं वनुमः अग्नेरस्यैव प्रसादादित्येषोऽर्थः प्रतिपादयितुम् अत्राभिप्रेत इति दर्शयितुं [v]मनुष्येभ्यः इति पदोपस्कारेण व्याचष्टे । अथ यदि विज्ञायते - 'अग्निर्देवेभ्यो वनुते वयमग्नेः सकाशात् इति' तदा एतावति [११]प्रतिपिपादयिषिते 'देवो मनुष्यान्' इति [१२]पदद्वयोपपादनम् [१३]अकिंचित्करं स्यात् ॥

प्राणैर्वननस्य संभजनस्य प्रार्थ्यमानत्वात् प्राणानामन्तरायं न करोति। एतैश्च प्राणैरितरेऽपि[१२५] सेवका उपलक्षिताः । अतः पूर्वोक्तं मन्त्रव्याख्यानमविरुद्धम् ॥

तदिति ॥ देवसकाशान्मनुष्यसकाशाच्च [१२६]फलसंपादनम् अग्नौ होतरि [१२७]च व्यवस्थितमित्येतादृशं [१२८]मन्त्राभिप्रायं दर्शयति – 'तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषा इत्याहाग्निर्देवेभ्यो वनुते वयं मनुष्येभ्य इति वावैतदाह' इति ॥ [१२९]दिव्या मानुषाश्च [१३०]भोगाः अत्र[१३०] विवक्षिता इत्यर्थः ॥

इहेति ॥ इह कर्मणि हविर्भिरसत्कृता अपि देवा नमस्कारेण सत्कृता भवन्तीत्येतद्दर्शयति– 'इह गतिर्वामस्येदं च नमो देवेभ्य इत्याह याश्चैव देवता यजति याश्च न ताभ्य एवोभयीभ्यो नमस्करोत्यात्मनोऽनात्यै' इति ॥ [१३१]उभयविधदेवप्रसादात् स्वस्याऽऽर्तिर्न भवति[१३१] ॥

---

११. तं३.लं–प्रतिपिपादयिषतो ; हो–प्रतिपादयिष्यतः । १२. तं३.हो–°द्वयोपादानम् । १३. हो–किञ्चित्° ।

---

१२५. अ.इ.ड.जो.ना.पा.हा–'अपि' नास्ति। १२६. आ– फलम् । १२७. आ–'च नास्ति। १२८. आ–अभिप्रायम् । १२९. हो१–दैव्याः । १३०–१३०. आ.हो१–भोगाः ; क.ना–भागाः ; ड.ड१–भागा अत्र । १३१–१३१. आ–उभयविधदेवताप्रसादात् स्वस्यार्तिर्न भवेदिति; अ.जो–उभयविधदेवाः प्राप्तभागाः स्वस्यार्तिर्न भवेदिति; ना–उभयविधदेवाः प्राप्ता प्राप्तभागाः स्वस्यार्तिर्न भवेदिति; इ.उ.पा–उभयाविधदेवाः प्राप्तभागाः आदात्स्वस्यार्तिर्न भवेदिति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

याश्चैव देवता यजति याश्च न ताभ्य एवोभयीभ्यो नमस्करोत्यात्मनोऽनार्त्यै ॥९॥

[श्रितस्ते प्र त्रिष्टुभमेतद्द्यावापृथिवी या अर्याक्षम प्राणानेव षट्चत्वारिंशच्च ।]

याः । च । एव । देवताः । यजति । याः । च । न । ताभ्यः । एव । उभयीभ्यः । नमः । करोति । आत्मनः । अनार्त्यै ॥ ९ ॥

[शब्रा १.७.४; १.८.२–३] ५

याश्चैवेत्यादि । गतम् । प्रस्ताराख्यमन्नं [१४]सर्वेभ्यः देवेभ्यः[१४] क्रियते इति । अनिष्टा देवता आर्तिमस्य नोत्पादयन्ति ॥

इति द्वितीये षष्ठे नवमोऽनुवाकः ॥

अत्र मीमांसा ॥ [१३२]दशमाध्यायस्य चतुर्थपादे चिन्तितम् –

" अनूयाजोऽन्तिमो योऽसौ किमारादुपकारकः । १०
स्विष्टकृत् संस्कृतिर्वाऽऽद्योऽनूयाजान्तरसाम्यतः ॥
[१३३]स्विष्टकृत्त्वगुणस्याग्नेः प्रत्यभिज्ञार्थवत्त्वतः ।
दृष्टार्थत्वाच्च संस्कारो भवेदन्त्यप्रयाजवत् " ॥ (जैन्या १०.४.३१-३२) ॥

दर्शपूर्णमासयोस्त्रयोऽनूयाजाः [१३४]समाम्नाताः । तत्र प्रथमद्वितीयानूयाजवत् तृतीयोऽप्यारादुपकारक इति पूर्वपक्षः । अस्ति प्रधानहोमनारिष्टहोमानन्तरभावी प्राशित्रादिभक्षणात् प्राचीनः पुरोडाशादिद्रव्यकः स्विष्टकृद्धोमः । 'सर्वेषां हविषाम् उत्तरार्धात् सकृत्सकृत् स्विष्टकृतेऽवद्यति' इत्यादिना तदभिधानात् । प्राशित्रादिभक्षणोत्तरकालीनेष्वाज्यद्रव्यकेष्वनूयाजेषु तृतीये [१३५]स्विष्टकृत्त्वगुणेन प्रत्यभिज्ञाऽस्ति, " देवो अग्निः स्विष्टकृत् " (तैब्रा ३.५.९) इति [१३६]तन्मन्त्रपाठात् । सा च पूर्वस्विष्टकृद्देवतास्मरणसंस्कारे सत्यर्थवती स्यात् । प्रथमद्वितीययोस्तु नास्ति सेति वैषम्यम् । किंच, संस्कारपक्षे दृष्टार्थस्तृतीयः स्यात्– [१३७] तस्मादन्त्यप्रयाजवदन्त्योऽनूयाजः [१३८]संस्कारः[१३८] ॥ २०

तृतीयाध्यायस्य द्वितीयपादे चिन्तितम्–

' प्रस्तरं सूक्तवाकेन प्रहरेदिति [१३९]कालधीः ।
अङ्गाङ्गिता वा स्यात् कालोऽजुषतेत्याद्यनन्वयात् ॥
[१४०]प्रहृतेरिष्टदेवार्थसंस्कारत्वात् तदन्वयः ।
संपाद्यो देवताद्वारा तृतीयाश्रुतितोऽङ्गता " ॥ (जैन्या ३.२.१२-१३) ॥ २५

१४–१४. तं३.त्रि.पं२.मै४.लं.हो–सर्वाभ्यो देवताभ्यः ।

१३२–१३२. अ.इ.उ.जो.ना.पा.हा–' दशमाध्यायस्य .....संस्कारः ' नास्ति । १३३. ड.ड१. शृं.हो१– °गुणस्यात्र । १३४. ड–आम्नाताः । १३५. ड–स्विष्टकृत एव गुण° । १३६. आ.ड–मन्त्रपाठात् । १३७. क–' तस्मात् ' नास्ति । १३८. आ–स्यात् । १३९. जो.ना.हा–कालगीः ; ड१–कालविधिः । १४०. हो१–प्रहृतः परिदेवार्थ°; ड–प्रहृतेः परिदेवार्थ° । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दर्शपूर्णमासयोराम्नायते– " सूक्तंवाकेन प्रस्तरं प्रहरति " (द्र. आपश्रौ ३·६·६) इति ॥ " इदं [१४१]द्यावापृथिवी " (तैब्रा ३·५·१०) इत्यादिर्मन्त्रः[-१४१] सूक्तवाकः । तस्मिन् [१४२]मन्त्रेऽग्निः संबोध्यः[-१४२]; " त्वं सूक्तवागसि " (तैब्रा ३·५·१०) इत्याम्नात् । प्रस्तरो दर्भमुष्टिस्तस्य प्रहरणमग्नौ प्रक्षेपः । तत्र 'सूक्तवाकेन' इत्येतत्पदं कालं लक्षयति । होत्राऽस्मिन् मन्त्रे पठ्यमाने तत्पाठकालेऽध्वर्युः प्रस्तरं प्रहरेत् । न त्वत्र प्रहरणे मन्त्रोऽयं विनियोक्तुं शक्यः, पूर्वोक्तप्रैषमन्त्रवदन्वयाभावात् । " अग्निरिदं हविरजुषत । अवीवृधत महो ज्यायोऽकृत " (तैब्रा ३·५·१०) इत्यादिकं मन्त्रे पठ्यते । पुरोडाशसेवया [१४३]अभिवृद्धो अग्निः [१४४]अस्मिन् [१४५]यजमाने तेजोबाहुल्यं कृतवानिति तस्यार्थः । न चाऽसौ प्रस्तरप्रहरणेऽन्वेतुं शक्य इति प्राप्ते ब्रूमः – 'सूक्तवाकेन' इति तृतीयाश्रुत्या प्रहरणे मन्त्रो विनियुज्यते । न [१४६]चात्यन्तमन्वयाभावः । मन्त्रो ह्ययं[-१४६] पूर्वमिष्टान् अग्न्यादिदेवान् [१४७]अनुस्मारयति । प्रस्तरप्रहरणं चेष्टदेवतासंस्कारः । [१४८]अतो देवताद्वारा मन्त्रप्रहरणयोरन्वयात् मन्त्रो विनियुज्यते । ननु प्रहरणं नाम प्रक्षेपमात्रं, न तु देवतोद्देशेन प्रक्षेपः, यजिधातोरश्रवणात् । तथा सति [१४९]देवतानामन्त्राभावात् [१५०]-तद्वाराऽपि नान्वय इति चेत् । मैवम् । देवतानां सद्भावात्[-१५०] । अग्न्यादिदेवताप्रकाशकस्य सूक्तवाकस्य तृतीयाश्रुत्या [१५१]प्रस्तरप्रहरणाङ्गत्वं [१५२]बोध्यते । यदि [१५३]प्रहरणेऽग्न्यादयो देवता भवेयुस्तदा [१५४]तत्प्रकाशनेन दृष्टोऽर्थो मन्त्रस्य लभ्येत । ततो देवताप्रकल्पने तदुद्देशपूर्वकस्य [१५५]प्रक्षेपस्य यागत्वं सिध्यति । तस्माद्देवताद्वाराऽस्त्येवान्वयः ॥

[१५६]तत्रैवान्यच्चिन्तितम्–

" प्रहृतेरखिलः सूक्तवाकोऽङ्गं स्याद्विभज्य वा ।
समाख्या कृत्स्नगा तेन विभक्तस्याङ्गता न हि ॥
[१५७]दर्शपूर्णिमयोर्देवाननुसृत्य विभज्यताम् ।
आख्यां लिङ्गेन बाधित्वा भागे [१५८]-नाम निरुच्यते[-१५८] " ॥ (जैन्या ३·२·१४-१५) ॥

पूर्वोदाहृते [१५९]-मन्त्रे सूक्तवाकसमाख्या कृत्स्नमन्त्रविषया[-१५९], याज्ञिकैः कृत्स्ने तच्छब्दप्रयोगात् । ततः सर्वोऽपि प्रहरणाङ्गमिति चेत् । न । लिङ्गेन समाख्याया बाधितत्वात् । तस्मिन्मन्त्रे पूर्णमासदेवताऽऽम्नानं कस्मिंश्चिद्भागे दृश्यते–" अग्नीषोमाविदꣳ हविरजुषेताम् " इति । भागान्तरे तु दर्शदेवताऽऽम्नानम्– " इन्द्राग्नी इदꣳ [१६०]हविरजुषेताम् " इति, " इन्द्र इदꣳ हविरजुषत " इति, " महेन्द्र इदꣳ हविरजुषत "

---

१४१. ड१–द्यावापृथिवी भद्रमभूत् इत्यादिको मन्त्रः । १४२–१४२. आ.शृं–अग्निं संबोध्य । १४३. क–अतिवृद्धः । १४४. अ.इ.उ.क.ड.जो.पा.ना.हा.हो१–स्वस्मिन्; आ.ड–तस्मिन् । १४५. क. हा–यजमाने वा । १४६–१४६. अ.इ.उ.पा–°भावस्तन्मन्त्रोऽप्ययं; जो.हा–भावस्तन्मन्त्रो ह्ययं; ना–°भावः मन्त्रो ह्ययम् । १४७. अ.इ.उ.पा–स्मारयति । १४८. अ.इ.उ.ड.पा.शृं.हो१–ततः । १४९. अ.उ.पा–देवानामभावात्; इ–देवतानामभावात्; जो.ना.हा–देवतानां मन्त्राभावात्; क.हो–देवतानां मन्त्रे अभावात् । १५०–१५०. अ.उ.पा–तद्द्वारा असतामन्त्रस्यान्वयो नेति चेन्मैवं देवतानां सत्त्वात् विधिना; ना–तद्द्वाराऽपि नान्वय इति चेन्मैवं देवतानां सत्त्वात्; जो.हा–तद्द्वाराऽपि नान्वय इति चेन्मैवं देवतानां सत्त्वात् विधिना । १५१. ड.शृं–'प्रस्तर°' नास्ति । १५२. ड.हो१–सिध्यति । १५३. ना–प्रहरणमन्त्रेऽग्न्यादयो । १५४. आ–तत्प्रकाशने । १५५. अ.इ.ना.पा–प्रहरणस्य प्रक्षेपात्मना; जो.हा–प्रक्षेपात्मना; उ–'प्रक्षेपस्य' नास्ति । १५६. ड–'तत्रैवान्यच्चिन्तितम्' नास्ति । १५७. क–दर्शपूर्णमसोर्दे°; हा–दर्शपूर्णभागे देवा°; ड.ड१.शृं. हो१–दर्शपूर्णमासयोर्दे° । १५८–१५८. हा–नामभिरुच्यते । १५९–१५९. अ.इ.उ.पा–अत्र सूक्तवाके समाख्या कृत्स्नविषया । १६०. क.हा हो१–हविरजुषेताम् अवीवृधेतां महो ज्यायोऽक्राताम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(तैब्रा ३·५·१०) इति च । इन्द्राग्नीन्द्रमहेन्द्राः पुरुषभेदेन दर्शे व्यवस्थिताः । तथा सति मन्त्रलिङ्गेन [१६१]-तत्तद्भाग एव तत्तत्काले-[१६१] व्यवतिष्ठते । सूक्तवाकशब्दश्च भागे यौगिकः, सूक्तं [१६२]वक्तीति तद्-व्युत्पत्तेः । यागकाले तत्तन्मन्त्रेण सम्यगुक्तं देवं [१६३]वक्तीत्यर्थः । अत एव ब्राह्मणेन व्याख्यातम् – " अग्निरिदꣳ हविरजुषतेत्याह या अयाक्ष्म देवतास्ता अरीरधामेति वावैतदाह " (तैसं २·६·१०) इति । [१६४]अरीरधामाऽऽराधितांस्तुष्टानकुर्मेत्यर्थः । [१६५]तस्मादयं विभज्य विनियुज्यते । ५

[१६६]-तत्रैव तृतीये चिन्तितम्–-[१६६]

" [१६७]-अग्नीषोमाविदं [१६८]हव्यमजुषेतामितीरितात् ।
अपच्छिद्येदमित्यादिः सर्वशेषो भवेन्न वा ॥
प्रक्रियातो भवेन्मैवं प्रक्रियाऽन्तरिता त्रिभिः ।
वाक्यं [१६९]द्वयन्तरितं तेन भवेत् प्रकरणाद्बलि " ॥ (जैन्या ३·३·२३-२४) ॥ १०

सूक्तवाके श्रूयते– " अग्नीषोमाविदꣳ हविरजुषेताम् । अवीवृधेतां महो ज्यायोऽक्राताम् । इन्द्राग्नी इदꣳ [१७०]हविरजुषेताम् " (तैब्रा ३·५·१०) इत्यादि । तत्र देवतावाचकमग्नीषोमादिपदं [१७१]पौर्णमास्यादिकाले यथादैवतं विभज्य [१७२]प्रयोज्यमिति पूर्वपादे निर्णीतम् । यत् तु ' इदं हविः " इत्यादिकमवशिष्टं पदजातं तदग्नीषोमसन्त्रगतमप्यमावास्यायाम् [१७३]अग्नीषोमपदपरित्यागेन पठनीयम् । [१७४]एवमिन्द्राग्निमन्त्रगतमपि पौर्णमास्याम् [१७५]इन्द्राग्निपदपरित्यागेन पठनीयम् । तथा [१७६]सत्येषां १५
मन्त्रभागाणां [१७७]सर्वशेषत्वबोधको [१७८]दर्शपूर्णमासप्रकरणपाठोऽनुगृह्यत इति प्राप्ते ब्रूमः– [१७९]अग्नीषोम-मन्त्रशेषस्येन्द्राग्निपदान्वयाश्रवणात् प्रकरणेन [१८०]प्रथमं तदन्वयरूपं वाक्यं कल्पनीयम् । तेन च [१८१]वाक्येन [१८२]इन्द्रादिप्रकाशनसामर्थ्यरूपं लिङ्गं कल्प्यते । तच्च लिङ्गम् अनेन मन्त्रभागेणेन्द्राग्निविषया क्रियाऽनु-ष्ठेयेति विनियोजिकां तृतीयाश्रुतिं कल्पयति । ततः [१८३]प्रकरणविनियोगयोर्मध्ये [१८४]त्रिभिर्व्यवधानं भवति । अग्नीषोमपदान्वयरूपं तु वाक्यं श्रूयमाणत्वाल्लिङ्गश्रुतिभ्यामेव व्यवधीयते । तस्माद्वाक्येन [१८५]-प्रकरणस्य २०
बाधितत्वात् तत्तच्छेषः-[१८५] तत्र [१८६]तत्र व्यवतिष्ठते-[१८६] ॥

---

१६१. जो.हा–तत्तद्भागवत् तत्काले; ना–तत्तद्भागवान् तत्काले; क–तत्तद्भागवान् तत्तत्काले; ड१–तद्भाग एव तत्काले । १६२. अ.इ.उ.पा–वदतीति । १६३. जो.ना.हा–वदतीत्यर्थः । १६४. अ.इ.पा.–अरीरधाम आराधिता स्मेत्यर्थः । १६५. अ.इ.पा–तस्मादुभयं; उ–' तस्मादयं ' नास्ति । १६६–१६६. क.जो.ना.हा–' तत्रैव तृतीये चिन्तितम् ' नास्ति; ड१–तत्रैव तृतीयपादे चिन्तितम्; ड.ड१. २५
शृं–तत्रैव तृतीयपादे । १६७–१६७. क.जो.ना.हा–' अग्नीषोमाविदं. . . व्यवतिष्ठते ' नास्ति । १६८. ड–हविरजु°; ड१.शृं–द्रव्यम° । १६९. अ.इ.उ.पा–अन्तरितम् । १७०. ड१–हविरजुषेताम् अवीवृधेतां महो ज्यायोऽक्राताम् । १७१. अ.इ.उ.पा–°मासादिकाले । १७२. ड१–प्रयोक्तव्यम् । १७३. अ.इ.उ.पा–°षोमपदत्यागेन; शृं–°षोमीयपदपरित्यागेन । १७४. ड१–°मन्त्रमपि । १७५. शृं– इन्द्रादिपद° । १७६. ड१–अप्येषाम् । १७७. अ.इ.उ.पा–°शेषत्वबाधको । १७८. अ.इ.उ.पा–°प्रकरणयागे तु गृह्यते; ३०
शृं–प्रकरणपाठो गृह्यते; ड१–प्रकरणपाठोऽनुगृहीतः । १७९. अ.इ.उ.पा–°मन्त्रसमीप इन्द्राग्नीपदा° । १८०. अ.इ.उ.ड.ड१.पा.शृं हो१–' प्रथमं ' नास्ति । १८१. अ.इ.उ.पा.शृं.हो–' वाक्येन ' नास्ति । १८२. ड.ड१.शृं.हो–इन्द्राग्निप्रका° । १८३. आ–°विनियोजकयो° । १८४. अ.इ.उ.पा–प्रधानम् । १८५–१८५. अ.उ.ड.पा.हो१–प्रकरणं बाधित्वा तत्त°; ड१–प्रकरणं बाधित्वा तच्छेषः । १८६. ड१.शृं–तत्रैव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[१८७]-नवमाध्यायस्य प्रथमपादे-[१८७] चिन्तितम्—

"यजमानो नोहितव्य ऊह्यो वा न हि पूर्ववत्।
मन्त्रः [१८८]फलप्रधानोऽत ऊह्यः [१८९]सर्वफलित्वतः" ॥ (जैन्या ९·१·२१) ॥

दर्शपूर्णमासयोः 'सूक्तवाकेन प्रस्तरं प्रहरति' इति प्रहरणकरणत्वेन विनियुक्ते [१९०]सूक्तवाक-
५ मन्त्रे [१९१]वाक्यमेतदाम्नायते- 'अयं यजमान आयुराशास्ते' (द्र. ब्रा ३·५१०) इति। तत्र पूर्वोक्त यज्ञ-पतिशब्दवत् सत्रेषु यजमानशब्दो नोहितव्य इति चेत्। [१९२]न। वैषम्यात्। तथा हि- [१९३]-सर्वत्र प्रकरणे-[१९३] मन्त्रो द्विविधः-क्रियाप्रकाशकः फलप्रकाशकश्चेति। पूर्वोदाहृतो मन्त्र इडोपाह्वानक्रियाप्रकाशकः। "उपहूतꣳ रथन्तरꣳ सह पृथिव्या" (तैब्रा ३·५·८) [१९४]इत्यनुवाके [१९५]तदुपाह्वानमन्त्ररूपे सर्वस्मिन्नपि तदवभासात्। "इडोपहूता। उपहूतेडा। उपो अस्माꣳ इडा ह्वयताम्। इडोपहूता। उपहूतेडा।
१० ... दैव्या अध्वर्यव उपहूताः" (तैब्रा ३·५·८) इत्यादिभिरवान्तरवाक्यैरुपाह्वानक्रियाया एव प्राधान्यावभासात् [१९६]तन्मध्यपतितं त्वेकमेव यज्ञपतिवाक्यं [१९७]-वृद्धिरूपं फलं-[१९७] [१९८]गमयतीति न तस्य स्वार्थो विवक्षितः। सूक्तवाकमन्त्रस्तु फलमेव प्रकाशयति न तु प्रहरणक्रियाम्। "इदं द्यावापृथिवी भद्रमभूत्" (तैब्रा ३·५·१०) [१९९]इत्येतस्मिन्ननुवाके सूक्तवाकमन्त्रे [२००]-सर्वस्मिन्नपि फलावभासात्-[२००]। "अयं यजमानोऽसौ। आयुराशास्ते सुप्रजास्त्वमाशास्ते सजातवनस्यामाशास्त उत्तरां देवयज्यामाशास्ते [२०१]-भूयो
१५ हविष्करणमाशास्ते-[२०१]" (तैब्रा ३·५·१०) इत्यादिभिः सर्वैरप्यवान्तरवाक्यैः [२०२]फलस्यैवावभासनात्। तस्माद्विवक्षितं फलं, फलिनश्च सर्वे यजमानाः। ततः सर्वेषां फलसिद्धये यजमानशब्दो [२०३]बहुवचनान्तत्वेन [२०४]सत्रेऽप्यूहनीयः॥

[२०५]-दशमाध्यायस्य द्वितीयपादे-[२०५] चिन्तितम्-

"सूक्तवाकाशासनं स्यान्न वा [२०६]नित्यप्रवृत्तितः।
२० स्यान्नैवं फलनिर्देशात् फलेच्छाऽस्थनां न युज्यते"॥ (जैन्या १०·२·२५) ॥

"इदं द्यावापृथिवी [२०७]भद्रमभूत्" (तैब्रा ३·५·१०) इत्यादिः सूक्तवाको होत्रा पठ्यते। तत्रैवं [२०८]श्रूयते-"आशास्तेऽयं यजमानोऽसौ। आयुराशास्ते [२०९]सुप्रजास्त्वमाशास्ते" (तैब्रा ३·५·१०) इत्यादि। तत्र सूक्तवाकगतो योऽयं यजमानाशासनप्रतिपादको [२१०]मन्त्रभागस्तमस्थियज्ञे होता पठेन्न वेति संशयः।

१८७-१८७. जो.ना.शृं.हा-नवमस्य प्रथमे; अ.इ.उ.पा-द्वितीयस्य तृतीये। १८८-अ.इ.उ.पा-फलप्रधानो
२५ वा; ड.हा-फलं प्रधानोत°; ड१-फलं प्रदाय नोत। १८९. अ.इ.उ.जो.पा.हा.हो-°फलत्वतः। १९०. ड-सूक्तवाक्ये; हो१-सूक्तवाके। १९१. ड.हो१-'वाक्यम्' नास्ति। १९२. ड.ड१.शृं-मैवम्। १९३-१९३. ड-सर्वप्रकरण°; सर्वत्र करण°। १९४. ड-इत्यस्मिन्ननुवाके। १९५. अ.इ.पा-उपाह्वानरूपे। १९६. क.हा-तन्मध्ये पतितम्। १९७-१९७. इ.उ.-'वृद्धिरूपं फलं' नास्ति; क.ड१.जो.ना.शृं.हा-वृद्धिफलम्। १९८. ड-समर्पयतीति। १९९. ड१-इत्यस्मिन्न°। २००-२००. ड-सर्वस्मिन्
३० फलावभानात्। २०१-२०१. आ.क-'भूयो हविष्करणमाशास्ते' नास्ति। २०२. ड-°वभासात्। २०३. आ-°न्तत्वेन सर्वेषु। २०४. आ.क.ड१.शृं-सत्रेषूहनीयः। २०५-२०५. अ.इ.उ.जो.ना.पा.हा.शृं-दशमस्य द्वितीये। २०६. अ-स्वाम्यप्रवर्तिनः, इ.उ.पा-स्वाम्यप्रवृत्तितः। २०७. आ.हो१-'भद्रमभूत्' नास्ति। २०८. ड१-पठ्यते। २०९. आ-'सुप्रजास्त्वमाशास्ते' नास्ति। २१०. हा-मन्त्राः भागास्तमस्मिन् यज्ञे; ड.जो-मन्त्रभागास्तमस्मिन् यज्ञे; अ.इ.पा.-मन्त्रः सोऽयमस्थियज्ञे; उ-'मन्त्रभाग-
३५ स्तमस्थियज्ञे' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्थियज्ञगतायाः प्रायणीयादेरिष्टेः प्रस्तरप्रहरणमङ्गं, तस्य नित्यत्वात् [२११]तस्मिन् विनियुक्तस्य सूक्तवाक-मन्त्रस्य [२१२]नित्यप्रयुक्ततया तद्भागपाठोऽपि स्यादिति पूर्वः पक्षः। यथा 'स्वर्गकामः' इत्यत्र [२१३]कमियोगेन स्वर्गस्य साध्यताप्रतीतेः स्वर्गशब्देन फलनिर्देशः। एवमाशासनयोगादायुरादिशब्दैः फलं निर्दिश्यते फलेच्छा चास्थनां न युक्ता। तस्मात् तद्भागपाठो [२१४]बाध्यते॥

तत्रैवान्यच्चिन्तितम्– ५

"[२१५]मृतेः प्रागायुराशीर्नो स्याद्वा नो मृतिकामनात्[२१५]।
प्रागार्भवाज्जीवनार्थमायुराशासनं भवेत्" ॥ (जैन्या १०·२·२९)॥

होत्रा पठितव्ये सूक्तवाके [२१६]योऽयम् 'आयुरा शास्ते[२१६]' इति भागो यजमानविषयः स किं सर्वस्वारे यजमानमरणात् पूर्वं वर्जनीयः पठितव्यो वेति संशयः। मुमूर्षोर्यजमानस्याऽऽयुर्निरपेक्षत्वेनार्थ-लोपात् [२१७]वर्जनीयः इति पूर्वः पक्षः। [२१८]आर्भवाख्यस्य पवमानस्य स्तूयमानत्वं यजमानस्य मरणकालः। १० ततः पूर्वं जिजीविषुत्वात् [२१९]पठनीयः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे षष्ठप्रपाठके नवमोऽनुवाकः॥

---

२११. अ.इ.उ.पा– अस्मिन्। २१२. ड– प्रवृत्तया, ड१–प्रवृत्ततया। २१३. इ.उ.पा.हो१–कमियोगे; अ.ड१.शृं– कामियोगे। २१४. हो१– विरुध्यते; ड–निरुध्यते। २१५–२१५. अ– मृतेः १५ प्रागायुराशीति स्याद्वातो भृति°; पा– मृतेः प्रागायुराशीति स्याद्वा°; उ–प्रागायुराशीति स्याद्वा°; इ– 'मृतेः .....कामनात्' नास्ति। २१६–२१६. अ.इ.उ.ड.ड१.पा.शृं.हो१– योऽयमाशास्ते। २१७. अ.इ.उ. पा–बाधः। २१८. ड–आर्भव°। २१९. ड१.शृं–पठितव्यः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवा वै यज्ञस्य स्वगाकर्तारं नाविन्दन् ते शंयुं बार्हस्पत्यमब्रुवन्निमं नो यज्ञꣳ स्वगा कुर्विति सोऽब्रवीद्वरं वृणै यदेवाब्राह्मणोक्तोऽश्रद्धानो यजातै सा मे यज्ञस्याऽऽशीरसदिति तस्माद्यदब्राह्मणोक्तोऽश्रद्धानो यजते शंयुमेव तस्य

देवाः । वै । यज्ञस्य । स्वगाकर्तारमिति स्वगा-कर्तारम् । न । अविन्दन् । ते । शंयुमिति शं-युम् । बार्हस्पत्यम् । अब्रुवन् । इमम् । नः । यज्ञम् । स्वगेति स्व-गा । कुरु । इति । सः । अब्रवीत् । वरम् । वृणै । यत् । एव । अब्राह्मणोक्त इत्यब्राह्मण-उक्तः । अश्रद्दधान इत्यश्रत्-दधानः । यजातै । सा । मे । यज्ञस्य । आशीरित्या-शीः । असत् । इति । तस्मात् । यत् । अब्राह्मणोक्त इत्यब्राह्मण-उक्तः । अश्रद्दधान इत्यश्रत्-दधानः । यजते । शंयुमिति शं-युम् । एव । तस्य ।

देवा वै यज्ञस्येत्यादि ॥ [1]असंकरेण हवींषि [2]स्वस्वदेवतायै यो गमयिता स स्वगाकर्ता शंयुनामा बृहस्पतिपुत्रोऽभवत् । सः [3]देवानाम् । यदेवेत्यादि । 'यजस्व' इति [4]-ब्राह्मणेन नोक्तो यो[4] भवति यश्च श्रद्धधानो न भवति तदीयस्य [5]यज्ञस्य या [5]आशीः फलं सा ममास्तु [5]इति

अनूयाजाः सूक्तवाक्यव्याख्या नवम ईरिताः ॥

अथ दशमे शंयुवाकमन्त्रव्याख्या पत्नीसंयाजाश्च [1]वर्ण्यन्ते ।

देवा इति ॥ तत्र [2]शंयुवाकमन्त्रान् व्याख्यातुम् [3]आदौ प्रस्तौति,– 'देवा वै यज्ञस्य स्वगाकर्तारं नाविन्दन् ते शंयुं बार्हस्पत्यमब्रुवन्निमं नो यज्ञꣳ स्वगा कुर्विति सोऽब्रवीद्वरं वृणै यदेवाब्राह्मणोक्तोऽश्रद्धानो यजातै सा मे यज्ञस्याऽऽशीरसदिति तस्माद्यदब्राह्मणोक्तोऽश्रद्धानो यजते शंयुमेव तस्य बार्हस्पत्यं यज्ञस्याऽऽशीर्गच्छत्येतन्ममेत्यब्रवीत् किं मे प्रजाया इति योऽपगुरातै शतेन यातयाद्यो निहनत् सहस्रेण यातयाद्यो लोहितं करवद्यावतः प्रस्कद्य पाꣳसून्त्संगृह्णात् तावतः संवत्सरान् पितृलोकं न प्र जानादिति तस्माद्ब्राह्मणाय नापगुरेत न नि हन्यान्न लोहितं कुर्यादेतावता हैनसा भवति' इति ॥ यस्मै देवाय यत् हविः विहितं तस्य हविषः सांकर्यमन्तरेण [4]-तद्देवताप्रापणं स्वगाकरणम् । स्वस्मिन् गतिः प्राप्तिः स्वगा । तस्याः कर्तारं बुद्धिमन्तं कमपि पुरुषं [5]देवाः [5]यज्ञस्य अनुष्ठानवेलायां [5]न अपश्यन् । तदा [6]बृहस्पतिपुत्रः यः शंयुनामकः तं बुद्धिमन्तम् अवेक्ष्य प्रार्थयामासुः – अस्मदीयम् [5]इमं [5]यज्ञम् असांकर्येण तस्य तस्य देवस्य स्वगतं [5]कुरु [5]इति । तदाऽसौ [7]शंयुरुत्कोचं याचितवान्[8]–'[9]एतत्काम एतेन यज्ञेन यजेत' इत्येतादृशेन [7]विधायकेन [7]ब्राह्मणेनानुक्तः यः कश्चित् [10]-स्वेच्छयैव यजते[10] यश्चान्यः श्रद्धारहितो यजते

१. तं३.त्रि.पं२.मै४.लं.हो–असंकरणेन । २. त्रि.पं२.मै४.लं.हो–स्वं स्वं देव°; तं३–स्वस्वं देव° । ३. तं३.मै४–देवतानाम् । ४–४. मै४–ब्राह्मणेनोक्तो न; लं–ब्राह्मणेनोक्तो यो; तं३–ब्राह्मणेनोक्तो यो न ।

१. आ–वक्ष्यन्ते । २. ड१–°मन्त्रम् । ३. आ–'आदौ' नास्ति । ४–४. आ–तस्य तस्य देवस्य स्वगतं कुर्विति बृहस्पतिपुत्रं शंयुनामानं प्रति देवा अब्रुवन् । तदासौ शंयुरप्येवं चिन्तितवान्; ड–तस्य तस्य देवस्य स्वगतं कुर्विति । तथाऽसौ शंयुरप्येवं याचितवान् । ५. ड१–बृहस्पतेः पुत्रः । ६. ड१–शंयुर्वियुक्तो वरं । ७. ड–एवं कामः । ८. अ.आ.इ.उ.जो.ना.पा.हा–'विधायकेन' नास्ति । ९. अ इ.उ.जो.ना.पा.हा–°नानुज्ञातः; ड.ड१–°नानुयुक्तः । १०–१०. आ–यजेत स्वेच्छयैव; हा–यजते स्वेच्छयैव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बार्हस्पत्यं यज्ञस्याऽऽशीर्गच्छत्येतन्ममेत्यब्रवीत् किं मे प्रजाया(१) इति योऽपगुरातै शतेन यातयाद्यो निहनत् सहस्रेण यातयाद्यो लोहितं करवद्यावतः प्रस्कद्य पाꣳसून्त्संगृह्णात् तावतः संवत्सरान् पितृलोकं न प्र जानादिति

बार्हस्पत्यम् । यज्ञस्य । आशीरित्या - शीः । गच्छति । एतत् । मम । इति । अब्रवीत् । किम् । मे । प्रजाया इति प्र - जायाः (१) । इति । यः । अपगुराता इत्यप - गुरातै । शतेन । यातयात् । यः । निहनदिति नि - हनत् । सहस्रेण । यातयात् । यः । लोहितम् । करवत् । यावतः । प्रस्कद्येति प्र - स्कद्य । पाꣳसून् । संगृह्णादिति सं - गृह्णात् । तावतः । संवत्सरानिति सं - वत्सरान् । पितृलोकमिति पितृ - लोकम् । न । प्रेति । जानात् । इति ।

शंयुना वृतम् । अथ देवैस्तथाऽस्त्वित्यनुज्ञाते पुनश्च शंयुः [v]अब्रवीत् [v]एतत् मे [v]मम युष्मत्प्रसादात् संपत्स्यते, अथ [v]किं [v]मे [v]प्रजायाः युष्मत्प्रसादेन संपत्स्यते [v]इति ॥ योऽपगुराता [5]इत्यादि ॥ अपगोरणं [6]ताडनोद्योगः । वाक्पारुष्यमित्येके । ब्राह्मणाय तदपत्याय तत्कर्तारं शतनिष्कदण्डेन दुःखयेत् । गुरी उद्यमने तौदादिकः, लेटि [7]आडागमः, "वैतोऽन्यत्र" (पा ३·४·९६) इत्यैकारः । [v]यः [v]निहनत् निहन्यात् ताडयेत् । लेट्यडागमः । गतमन्यत् । [v]करवत् कुर्यात् । पूर्ववदडागमः । [v]लोहितं शरीरात् [8v]प्रस्कद्य निपत्य [v]यावतः [v]पाꣳसून् संगृह्णीयात् [9v]तावतः संवत्सरान् [v]पितृलोकं [v]न प्रजानीयात् मदपत्ये [10]लोहितस्योत्पादयिता । उभयत्र लेटि "इतश्च लोपः०" (पा ३·४·९७) इति लोपः ॥

तयोरुभयोः [11]यज्ञफलं ममास्त्विति वरः । तत आरभ्य [12]तत्फलद्वयं शंयुमेव [11]प्राप्नोति । पुनरपि शंयुरेवमुवाच – तत् [r]एतत् उभयं [r]मम संपन्नं, मदीयायाः पुत्रपौत्रादिरूपायाः [r]प्रजायाः [r]किं [14]दास्यथ [r]इति । ततो देवा अपगोरणादिकर्तुर्यातना [15]त्वत्पुत्राद्यधीना भवत्विति वरं दत्तवन्तः । [16]अपगोरणं ताडनोद्योगः । तमुद्योगं ब्राह्मणविषये यः करोति तं पुरुषं शतनिष्कदण्डेन [r]यातयात् क्लेशयेत् । [r]यः [r]निहनत् ताडयेत् तं सहस्रनिष्कदण्डेन क्लेशयेत् । [r]यः तु ब्राह्मणशरीरे [r]लोहितं ताडनेन [17]उद्गमयति तत्[17] लोहितं भूमौ पतित्वा [r]यावतः [18]परमाणून् व्याप्नोति [r]तावतः [r]संवत्सरान् [19]अयं [r]पितृलोकं [r]न प्राप्नोति, किं तु यमयातना [20]अनुभवति, तत्सर्वं [21]त्वत्प्रजाधीनमिति वरः । यस्मादुक्तरीत्या ब्राह्मणाधि-

५. तं३–इति । ६. पं.२–हननोद्योगः । ७. मै.हो–अडागमः । ८. त्रि.पं२–प्रस्कन्द्य । ९. मै–तावत् । १०. मै४–लोहितं तस्य ।

११. ड.ड१–यज्ञस्य फलं । १२. अ.इ.उ.जो.ना.पा.हा–तु फल° । १३. जो.ना–प्राप्नोतीति देवैरुक्ते । १४. आ–दास्यत । १५. आ– त्वत्पुत्राधीना; अ.इ.उ.पा.जो.ना.हा–भवत्पुत्राद्यधीना । १६. जो.ना.हा–अपगुरणं । १७–१७. आ–ग्राहयति । १८. ड१–परमाणून् गृह्णाति; शृं–परमाणून् संगृह्णाति । १९. ड–'अयम्' नास्ति । २०. अ.इ.उ.जो.ना.पा.हा–अनुभवेत् । २१. अ.इ.उ.जो.ना.पा.हा–प्रजाधीन° ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्माद्ब्राह्मणाय नार्पं गुरेत न नि हन्यान्न लोहितं कुर्यादेतावता हैनसा भवति तच्छंयोरा वृणीमह इत्याह यज्ञमेव तत् स्वगा करोति त(२)च्छंयोरा वृणीमह इत्याह शंयुमेव बार्हस्पत्यं भागधेयेन समर्धयति

तस्मात्। ब्राह्मणाय। न। अपेति। गुरेत्। न। नीति। हन्यात्। न। लोहितम्। कुर्यात्। एतावता। ह। एनसा। भवति। तत्। शंयोरिति शं-योः। एति। वृणीमहे। इति। आह। यज्ञम्। एव। तत्। स्वगेति स्व-गा। करोति। तत्(२)। शंयोरिति शं-योः। एति। वृणीमहे। इति। आह। शंयुमिति शं-युम्। एव। बार्हस्पत्यम्। भागधेयेनेति भाग-धेयेन। समिति। अर्धयति।

तस्मादित्यादि। गतम्। एतावतेति ᵛएतावता अनर्थस्य हेतुना पापेन इत्थंभूतः ᵛभवति॥

'तच्छंयोरा वृणीमहे' इत्यादि *शंयुवाकमन्त्रव्याख्यानं ¹¹सुबोधम्॥

---

१० क्षेपादौ प्रत्यवायोऽस्ति तस्मात् तत् ᵛन ᵛकुर्यात्। करणे ²²-च ᵛएतावता-²² ²³पूर्वोक्तेन पापेन युक्तो भवति॥

यस्य शंयुवाकस्य ²⁴-व्याख्यानायायं प्रस्तावः कृतस्तस्य-²⁴ शंयुवाकमन्त्रस्य विनियोगं बौधायन आह- "यदा ²⁵जानाति ²⁶शंयोर्ब्रूहीति तच्छंयुवाकमन्वाह तच्छंयोरावृणीमह ²⁷इत्याऽन्तादनुवाकस्य" इति। स चानुवाको मन्त्रकाण्डे समाम्नातः- "तच्छंयोरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी १५ स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शं नो अस्तु द्विपदे। शं चतुष्पदे" (तैब्रा ३·५·११) इति। तत्तादृशं प्रशस्तं फलं शंयोर्बार्हस्पत्यादावृणीमहे प्रार्थयामहे। किं तत्फलमिति क्रमेणोच्यते- यज्ञाय गातुं यज्ञस्य देवान् प्रति गमनमावृणीमहे। यज्ञपतये यजमानस्य गातुं देवान् प्रति गमनमावृणीमहे। नोऽस्माकं दैवी स्वस्तिर्देवनिमित्तं विघ्नोपशमनं मानुषेभ्यः ²⁸च स्वस्तिर्विघ्नोपशमनमस्तु। भेषजं सर्वपापानामौषधमिदं कर्मोर्ध्वं जिगातु ²⁹अविघ्नेन समाप्तिं प्राप्नोतु। अस्मदीयाय २० द्विपदे मनुष्याय चतुष्पदे पशवे च शं सुखमस्तु॥

तदिति॥ तस्यैतस्य मन्त्रस्य पाठं प्रशंसति- 'तच्छंयोरा वृणीमह इत्याह यज्ञमेव तत्स्वगा करोति' इति॥ ³⁰-ᵛतत् तेन-³⁰ मन्त्रपाठेनेमं ᵛयज्ञं तत्तद्देवानामसांकर्येण ³¹स्वगतं ᵛकरोति॥

तदिति॥ प्रकारान्तरेण पुनः प्रशंसति- 'तच्छंयोरा वृणीमह इत्याह शंयुमेव बार्हस्पत्यं भागधेयेन समर्धयति' इति॥ ³²मन्त्रवाक्यपाठे एवास्य दातव्यो ³³भागस्तत्तुष्टिहेतुत्वात्॥

---

२५ * [संभावितोऽयं पाठः। लिखितपुस्तकेषु, मै-मुद्रित पुस्तके-'सूक्तवाक°' इति।]। ११. तं३. लं.हो-सुबोधनम्।

---

२२. हा-चैतावत्°; ड.च-तावता। २३. आ-पूर्वोक्त°। २४-२४. अ.इ.उ.जो.ना.पा.हा-व्याख्याने पापप्रस्तावः प्रकृतस्तस्य। २५. आ-अनुजानाति। २६. क.हा-शंयोऽनुब्रूहि; ड-ड१·शृं.हो१-शंयोर्ब्रूहीति। २७. आ.ड-इत्येतदनुवाकस्य। २८. आ-'च' नास्ति। २९. ड·ड१-निर्विघ्नेन। ३० ३०-३०. आ-तत्रानेन; इ.'तत् तेन' नास्ति। ३१. अ.ना-स्वागतं; इ-'स्वगतं' नास्ति। ३२. क.ड. ड१.शृं.हो१-मन्त्रपाठे। ३३. ड१-भागस्तत्तुष्टेः हेतुत्वात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गातुं यज्ञाय गातुं यज्ञपतय इत्याहाऽऽशिषमेवैतामा शास्ते सोमं यजति रेत एव तद्दधाति त्वष्टारं यजति रेत एव हितं त्वष्टा रूपाणि वि करोति देवानां पत्नीर्यजति मिथुनत्वायाग्निं गृहपतिं यजति प्रतिष्ठित्यै जामि वा एतद्यज्ञस्य क्रियते(३) यदाज्येन प्रयाजा इज्यन्त आज्येन पत्नीसंयाजा ऋचमनूच्य पत्नीसंयाजानामृचा यजत्यजामित्वायाथो मिथुनत्वाय ५

गातुम् । यज्ञाय । गातुम् । यज्ञपतय इति यज्ञ - पतये । इति । आह । आशिषमित्या - शिषम् । एव । एताम् । एति । शास्ते । सोमम् । यजति । रेतः । एव । तत् । दधाति । त्वष्टारम् । यजति । रेतः । एव । हितम् । त्वष्टा । रूपाणि । वीति । करोति । देवानाम् । पत्नीः । यजति । मिथुनत्वायेति मिथुन - त्वाय । अग्निम् । गृहपतिमिति गृह - पतिम् । यजति । प्रतिष्ठित्या इति प्रति - स्थित्यै । जामि । वै । एतत् । यज्ञस्य । क्रियते (३) । यत् । आज्येन । प्रयाजा इति प्र - याजाः । इज्यन्ते । आज्येन । पत्नीसंयाजा इति पत्नी - संयाजाः । ऋचम् । अनूच्येत्यनु - उच्य । पत्नीसंयाजानामिति पत्नी - संयाजानाम् । ऋचा । यजति । अजामित्वायेत्यजामि - त्वाय । अथो इति । मिथुनत्वायेति मिथुन - त्वाय ।

आशिषमिति । प्रतीकग्रहणत्वादस्त्वित्यादि सर्वाऽप्याशीर्गृह्यते ॥

सोमं यजतीत्यादि । पत्नीसंयाजविधिः ॥

जामि वा इत्यादि । याज्यानुवाक्ययोः ऋक्त्वेन वैलक्षण्येन जामित्वाभावः । "आप्यायस्व, सं ते" (तैब्रा ३·५·१२) इत्यादयो याज्यानुवाक्या वेदितव्याः ॥

गातुमिति ॥ आशीःपरत्वं मन्त्रभागस्य [३४]दर्शयति– 'गातुं यज्ञाय गातुं यज्ञपतय इत्याहाऽऽशिषमेवैतामा शास्ते' इति ॥

सोममिति ॥ अथ चतुरः पत्नीसंयाजान् विधत्ते– 'सोमं यजति रेत एव तद्दधाति त्वष्टारं यजति रेत एव हितं त्वष्टा रूपाणि वि करोति देवानां पत्नीर्यजति मिथुनत्वायाग्निं गृहपतिं यजति प्रतिष्ठित्यै' इति ॥

जामीति ॥ [३५]एतेषां चतुर्णां पत्नीसंयाजानां प्रत्येकं याज्यानुवाक्ये विधत्ते– 'जामि वा एतद्यज्ञस्य क्रियते यदाज्येन प्रयाजा इज्यन्त आज्येन पत्नीसंयाजा ऋचमनूच्य पत्नीसंयाजानामृचा यजत्यजामित्वायाथो मिथुनत्वाय' इति ॥ [३१-]प्रयाजानां पत्नीसंयाजानां च[-३१] [३७-]तावद्द्रव्यकृतं वैषम्यं नास्ति,[-३७] [३८]मन्त्रकृतमपि यदि न स्यात् तदानीमालस्यं भवति, तत्परिहाराय प्रयाजेषु यजुर्भिरिष्टेषु पत्नीसंयाजा ऋग्भ्यां याज्यानुवाक्याभ्यां यष्टव्याः ॥

---

३४. क–प्रशंसति । ३५. ड–तेषाम् । ३६–३६. अ.इ.उ.जो.ना.पा.हा–प्रयाजानूयाजानां । ३७–३७. ड–द्रव्यकृतं वैषम्यं तावन्नास्ति; ड१–द्रव्यकृतं वैषम्यं तावन्नास्ते । ३८. अ.इ.उ.जो.पा.हा– इति अत्रापि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते च याज्यानुवाक्ये क्रमेण मन्त्रकाण्डे (तैब्रा ३·५·१२) समाम्नाते। तद्विनियोगं बौधायनो दर्शयति-'अथ पत्नीसंयाजानामा प्यायस्व सं त इति सौम्यस्येह त्वष्टारमग्रियं तन्नस्तुरीपमिति त्वष्टुर्देवानां पत्नीरुत ग्ना वियन्तु देवपत्नीरिति देवपत्नीनामग्निर्होता गृहपतिः स राजा वयमु त्वा गृहपते जनानामिति गृहपतेः' इति॥

तत्र सोमस्य त्वष्टुश्चान्यत्राऽऽम्नातानां मन्त्राणां प्रतीकान्याम्नायन्ते "आ प्यायस्व सं ते। इह त्वष्टारमग्रियं तन्नस्तुरीपम्" (तैब्रा ३·५·१२) इति॥ "आ प्यायस्व समेतु ते" इत्येषा सोमस्य पुरोनुवाक्या। "सं ते पयाꣳसि" इति सोमस्य याज्या। एतदुभयं चतुर्थकाण्डस्य द्वितीयप्रपाठके (तैसं ४·२·७) व्याख्यास्यते॥ "इह [३९]-त्वष्टारमग्रियम्" इत्येषा[-३९] त्वष्टुः पुरोनुवाक्या। "[४०]-तन्नस्तुरीपमध पोषयित्नु" इत्येषा[-४०] याज्या। एतच्चोभयं तृतीयकाण्डस्य प्रथमप्रपाठके (तैसं ३·१·११) व्याख्यास्यते॥

[४१]देवपत्नीनां पुरोनुवाक्यां दर्शयति- "देवानां पत्नीरुशतीरवन्तु नः। ग्रावन्तु नस्तुजये वाजसातये। याः पार्थिवासो या अपामपि व्रते। ता नो देवीः सुहवाः शर्म यच्छत" (तैब्रा ३·५·१२) इति। इन्द्राण्यादयो [४२]देवपत्न्यो याः सन्ति ता उशतीरस्माद्धितं कामयमाना अस्मानवन्तु रक्षन्तु परैरापादितमरिष्टं [४३]वारयन्त्वित्यर्थः। किं च, तुजयेऽपत्याय वाजसातये द्रव्यलाभाय नोऽस्मान् प्रकर्षेण रक्षन्तु। न केवलं दिवि स्थिता इन्द्राण्याद्याः किं तु याः पार्थिवासः पृथिव्यां स्थिता देवपत्न्यो या अप्यन्या अपां व्रते वृष्ट्युदकस्थानत्वेनोपलक्षितेऽन्तरिक्षे वर्तन्ते ता देव्यः सर्वाः सुहवाः सुखेनाऽऽह्वातुं शक्या यूयं [४४]नोऽस्मभ्यं शर्म सुखं प्रयच्छत॥

तत्रैव याज्यामाह- "उत ग्ना वियन्तु देवपत्नीः। इन्द्राण्यग्नाय्यश्विनी राट्। आ रोदसी वरुणानी शृणोतु। वियन्तु देवीर्यं ऋतुर्जनीनाम्" (तैब्रा ३·५·१२) इति। अपि च, ग्नाशछन्दोदेवता गायत्र्यादयो देवपत्न्यो [४५]वियन्त्विदं हविरश्नन्तु। ग्नाशब्दस्य छन्दोवाचित्वं पञ्चमकाण्डे समाम्नातम्- "ग्नास्त्वेत्याह छन्दाꣳसि वै ग्नाः" (तैसं ५·१·७) इति। इन्द्रस्य पत्नीन्द्राणी। अग्नेः पत्न्यग्नायी। अश्विनोः पत्न्यश्विनी। राज्ञः सोमस्य पत्नी राट्। रुद्रस्य पत्नी रोदसी। वरुणस्य पत्नी वरुणानी। एतासामेकैका विज्ञापनामस्मदीयामाशृणोतु। जनीनामिन्द्राण्यादीनां य ऋतुः कालविशेषो भोजनायोचितः तस्मिन् काले वियन्त्वश्नन्तु। सोमत्वष्ट्रोः पुरुषयोर्भुक्तवतोः [४६]सतोः पश्चाद्भुञ्जतामित्यर्थः॥

३९-३९. आ-त्वष्टारमिति। ४०-४०. आ-तन्नस्तुरीपमिति। ४१. अ.आ.इ.उ.जो.ना.पा.हा-देवपत्नी°। ४२. ड.ड१-देवानां पत्न्यो। ४३. ड.हो१-निवार°। ४४. आ-नोऽस्माकं। ४५. हा-वियन्त्विह। ४६. जो.ना-'सतोः' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नेर्गृहपतेः पुरोनुवाक्यामाह– " अग्निर्होता गृहपतिः स राजा। विश्वा वेद जनिमा जातवेदाः। देवानामुत यो मर्त्यानाम्। यजिष्ठः स प्रयजतामृतावा " (तैब्रा ३·५·१२) इति। अयमग्निर्देवानामाह्वाता गृहाणां पालकः। स च राजा दीप्यमानस्तादृशो जातवेदा देवानां विश्वा जनिमा सर्वाणि जन्मानि वेद। अपि च, यो जातवेदा मर्त्यानां जन्मानि वेद स जातवेदाः प्रयजतां प्रकर्षेण यागं कुर्वतां मध्ये यजिष्ठोऽतिशयेन यष्टृतमः। ऋतावा [४७]सत्यवान्॥ ५

तत्रैव याज्यामाह– " वयमु त्वा गृहपते जनानाम्। अग्ने अकर्म समिधा बृहन्तम्। अस्थूरि णो गार्हपत्यानि सन्तु। तिग्मेन नस्तेजसा सꣳशिशाधि " (तैब्रा ३·५·१२) इति। हे गृहपतेऽग्ने, जनानां मध्ये वयमेव त्वां समिधा [४८]संदीपनेन बृहन्तमकर्म प्रौढं कृतवन्तः। तस्माद्गार्हपत्यानि गृहपतिना संयुक्तानि कर्माणि [४९]नोऽस्माकमस्थूरि सन्तु [५०]अक्लिष्टानि भवन्तु। तिग्मेन तीक्ष्णेन वैरिभिरप्रधृष्येण तेजसा त्वमस्मान् संशिशाधि तीक्ष्णीकुरु निर्भयान् कुर्वित्यर्थः॥ १०

मन्त्रकाण्डे [५१]पत्नीसंयाजयाज्यानुवाक्याभ्याम् उपरिष्टात् इडोपाह्वानम् [५२]आज्यप्राशनं [५३]चाऽऽम्नातम्। तस्य विनियोगं बौधायनो दर्शयति– " अत्रोत्तरामिडामुपह्वयते यथासमाम्नातम् " इति। पाठस्तु– " उपहूतꣳ रथन्तरꣳ सह पृथिव्या। उप मा रथंतरꣳ सह पृथिव्या ह्वयताम्। उपहूतं वामदेव्यꣳ सहान्तरिक्षेण। उप मा वामदेव्यꣳ सहान्तरिक्षेण ह्वयताम्। उपहूतं बृहत् सह दिवा। उप मा बृहत् सह दिवा ह्वयताम्। उपहूताः सप्त होत्राः। उप मा सप्त होत्रा ह्वयन्ताम्। उपहूता धेनुः सहर्षभा। उप मा धेनुः सहर्षभा ह्वयताम्। उपहूतो भक्षः सखा। उप मा भक्षः सखा ह्वयताम्। उपहूताꣳहो। इडोपहूता। उपहूतेडा। उपो अस्माꣳ इडा ह्वयताम्। इडोपहूता। उपहूतेडा। मानवी घृतपदी मैत्रावरुणी। ब्रह्म देवकृतमुपहूतम्। दैव्या अध्वर्यव उपहूताः। उपहूता मनुष्याः। य इमं यज्ञमवान्। ये यज्ञपत्नीं वर्धान्। उपहूते द्यावापृथिवी। पूर्वजे ऋतावरी। देवी देवपुत्रे। उपहूतेयं यजमाना। इन्द्राणीवाविधवा। अदितिरिव सुपुत्रा। उत्तरस्यां देवयज्यायामुपहूता। भूयसि हविष्करण उपहूता। दिव्ये धामन्नुपहूता। इदं मे देवा हविर्जुषन्तामिति तस्मिन्नुपहूता। विश्वमस्याः प्रियमुपहूतम्। विश्वस्य प्रियस्योपहूतस्योपहूता " (तैब्रा ३·५·१३) इति। पूर्वोक्तमिडोपाह्वानं यजमानार्थम्। इदं तु पत्न्यर्थम्। अत एव तत्र तत्र स्त्रीलिङ्गप्रयोगः। ब्राह्मणे पत्नीसंयाजयाज्यानुवाक्ये विधायेडोपाह्वानमन्त्रस्य पूर्ववद्व्याख्येयत्वादसावत्रोपेक्षितः॥

---

४७. आ.शृं.हा–सत्यवाक्। ४८. क.ड.हो१–समिन्धनेन। ४९. ड१–'नोऽस्माकम्' नास्ति। ५०. क. ना–अक्षीणानि; हा–अश्लिष्टानि; अ.आ.इ.उ.पा–आश्लिष्टानि। ५१. क–°याज्यापुरोनुवाक्यानाम्, ड.ड१.शृं.हो१–°याज्यानुवाक्यानाम्। ५२. क.ड.शृं–°प्राशनाय। ५३. क.ड.ड१.शृं.हो१–'च' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पङ्क्तिप्रायणो वै यज्ञः पङ्क्त्युदयनः पञ्च प्रयाजा इज्यन्ते चत्वारः पत्नीसंयाजाः समिष्टयजुः पञ्चमं पङ्क्तिमेवानु प्रयन्ति पङ्क्तिमनूद्यन्ति ॥१०॥

[प्रजायाः करोति तत् क्रियते त्रयस्त्रिंशच्च]

पङ्क्तिप्रायण इति पङ्क्ति - प्रायणः । वै । यज्ञः । पङ्क्त्युदयन इति पङ्क्ति - उदयनः । पञ्च । प्रयाजा इति प्र - याजाः । इज्यन्ते । चत्वारः । पत्नीसंयाजा इति पत्नी - संयाजाः । समिष्टयजुरिति समिष्ट - यजुः । पञ्चमम् । पङ्क्तिम् । एव । अन्विति । प्रयन्तीति प्र - यन्ति । पङ्क्तिम् । अनु । उदिति । यन्ति ॥ १० ॥

[शब्रा १·९·१·२४–२·२५]

पङ्क्तिप्रायण इत्यादि ॥ समिष्टयजुषो विधिः । प्रायणं प्रारम्भः । उदयनं समाप्तिः । पङ्क्तिपञ्चकं प्रायणीयः उदयनीयश्च द्वयं यस्येति बहुव्रीहिः । प्रायणोदयनहेतुत्वं [१२] पङ्क्तेरनुशब्देन द्योत्यते । पङ्क्त्या हेतुना सर्वे [१३]ऋत्विग्यजमानाः समीचीनं यज्ञं प्रारभन्ते, समीचीनं समापयन्ति, [१४]उभयभाजो भवन्तीति । " चादिलोपे विभाषा "(पा८·१·६३) इति प्रथमा तिङ्विभक्तिः न निहन्यते । समासगतिनिघातावुक्तौ ॥

इति द्वितीये षष्ठे दशमोऽनुवाकः ॥

पङ्क्तिप्रायण इति ॥ अथ समिष्टयजुर्विधिमर्थवादेनोन्नयति– ' पङ्क्तिप्रायणो वै यज्ञः पङ्क्त्युदयनः पञ्च प्रयाजा इज्यन्ते चत्वारः पत्नीसंयाजाः समिष्टयजुः पञ्चमं पङ्क्तिमेवानु प्रयन्ति पङ्क्तिमनूद्यन्ति ' । इति ॥ " पञ्चाक्षरा पङ्क्तिः " (तैसं ६·१·२) इत्यन्यत्र श्रुतत्वादत्र पङ्क्तिशब्देन [५४]पञ्चसंख्या लक्ष्यते । सेयं पङ्क्तिः प्रायणे प्रारम्भे यस्य सोऽयं [५]पङ्क्तिप्रायणः । [५५]तथा पङ्क्तिरुदयने समाप्तौ यस्य सोऽयं [५]पङ्क्त्युदयनः । अत्र दर्शपूर्णमासेष्टौ प्रारम्भे [५]पञ्च [५]प्रयाजाः [५]इज्यन्ते, समाप्तौ [५]पत्नीसंयाजाः [५]चत्वारः, [५]समिष्टयजुः [५]पञ्चमम् । तथा सति [५]पङ्क्तिम् [५]एव प्रारभन्ते [५]पङ्क्तिम् एव [५५]समापयन्ति । तस्मात् ' समिष्टयजुर्जुहुयात् ' इति तात्पर्यार्थः । " देवा गातुविदः " (तैसं १·१·१३) इत्ययं मन्त्र इष्टिसंपूर्तिकारित्वात् समिष्टयजुरित्युच्यते । स च मन्त्र आध्वर्यवकाण्डे समाम्नातो व्याख्यातश्च ॥

---

१२. तैउ– पूर्वोक्तेरनुशब्देन । १३. लं– ऋत्विग्भ्यः यज° । १४. त्रि.लं– ' उभयभाजः इत्यस्यानन्तरं ' शिवा '; मै४–उदयनीयभाजः ।

---

५४. शृं–पञ्चशब्दोप°; ड.ड.१–पञ्चसंख्योप° । ५५. आ–यागः । ५६. अ.आ.इ·क.जो.पा.हा–संपादयन्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शंयुवाकः पत्नीसंयाजाश्च]

अत्र मीमांसा ॥ तृतीयाध्यायस्य चतुर्थपादे चिन्तितम्–

" विप्रायावगुरेन्नेति [५७-]क्रत्वर्थो वा-[५७] पुमर्थता ।
फलवत् क्रतुसांनिध्यात् क्रत्वर्थः पूर्वमन्त्रवत् ॥
यातना परिहारस्य निषेधफलतोचिता ॥
निषेधोऽयं पुमर्थत्वात् प्रक्रियातोऽपकृष्यताम् " ॥ (जैन्या ३·४·१८–१९) ॥ ५

दर्शपूर्णमासप्रकरणे श्रूयते– " यो ब्राह्मणायापगुरेत् तं शतेन यातयात् तस्माद्ब्राह्मणाय [५८]नापगुरेत " (द्र. तैसं २·६·१०) इति । तत्र यथा पूर्वाधिकरणे (मीसू ३·४·२०–२२ जैन्या ३·४·१७) मन्त्रपाठस्य फलरहितस्य फलवति क्रतावङ्गत्वं प्रकरणेनावगम्यते, एवमत्रापि ब्राह्मणावज्ञानिषेधस्य [५९]क्रत्वङ्गत्वमिति चेत् । [६०]मैवम् । वैषम्यात् । पूर्वत्र [६१]ह्यात्मनि प्राणापानधारणं मन्त्रोच्चारणफलं [६२-]न संभवति-[६२] [६३-]तस्य प्रागेव सिद्धत्वात्-[६३] । इह [६४]त्वपगोरणे शतसंवत्सरयातनामुपन्यस्य [६५-]अपगोरण- १०
निषेधस्य करणात्-[६५] यातनापरिहारस्य निषेधफलत्वमुचितम् । तस्मान्निषेधस्य [६६]केवलपुरुषार्थतया प्रकरणात् [६७]अपकर्षः युक्तः ॥

तत्रैव [६८]तृतीयपादे चिन्ततम्—

" संयाजयन्ति जाघन्या पत्नीरेतत्पशावुत ।
दर्शादौ तत्पशौ युक्तं जाघन्याः समवायतः ॥ १५
जाघनी नाम भागोऽसौ दर्शादौ समवैति हि ।
नोत्कृष्टव्यं न [६९]संस्कारः साधनत्वात् तृतीयया ॥ " (जैन्या ३·३·३७-३८) ॥

दर्शपूर्णमासप्रकरणे श्रूयते– " जाघन्या पत्नीः संयाजयन्ति " (आपश्रौ ३·८·१०) इति । जाघनी पशोः पुच्छम् । [७०]पत्नीशब्दोऽत्राऽऽहुतिचतुष्टयात्मकस्य कर्मणो नामधेयैकदेशः । अत एव श्रूयते " पञ्च प्रयाजा इज्यन्ते चत्वारः पत्नीसंयाजाः " (तैसं २·६·१०) [७१-]इति । तत्र तृतीयाहुतौ देवपत्नीनां-[७१] २०
देवतात्वात् तद्द्वारा कर्मनाम्नः पत्नीसंयाजशब्दस्य प्रवृत्तिः । तत्र जाघनीमुद्दिश्य पत्नीसंयाजसंस्कारो विधीयते । जाघनी च पशौ समवेता न तु दर्शपूर्णमासयोः । अतः प्रकरणादुत्कृष्य पशौ [७२]निवेश्यतामिति प्राप्ते ब्रूमः– जाघनीशब्देन पशोर्भागोऽभिधीयते । स च दर्शपूर्णमासयोः पशुयागत्वाभावेऽपि क्रयादिना संपादयितुं शक्यते । न चात्र पशौ [७३-]विद्यमानाया जाघन्याः पत्नीसंयाजैः-[७३] संस्कार्यत्वं, तृतीयया २५
साधनत्वावगमात् । तस्मान्न प्रकरणादुत्कर्षः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे षष्ठप्रपाठके दशमोऽनुवाकः ॥

५७–५७. अ.इ.उ.पा–क्रत्वर्थोऽथ; ड.ड१.शृं.–क्रत्वर्थोत । ५८. आ–नावगुरेत् । ५९. अ. आ.इ.उ.क.जो.ना.पा.हा–क्रतावश्रुतत्वादिति । ६०. ड.ड१–न । ६१. आ.क–ह्यात्म° । ६२–६२. अ.इ.उ. पा–अविदितस्य; ड.ड१–शृं.हो१–न भवति । ६३–६३. अ.इ.उ.पा–प्रागेव सिद्धत्वात्; क.जो.ना.हा– ३०
'तस्य प्रागेव सिद्धत्वात्' नास्ति । ६४. आ.ड.ड१.शृं.हो१–त्ववगोरणे । ६५–६५. आ.क.जो.ड.ड१. ना.शृं.हो१–अवगोरणनिषेधात् । ६६. अ.इ.उ.पा–°पुरुषार्थत्वेन । ६७. ड.ड१.शृं.हो१–उत्कर्षः । ६८. इ.उ.जो.ना.पा.हा–तृतीये । ६९. आ.ड.ड१.शृं.–संस्कार्य° । ७०. अ.उ.पा–°शब्दश्चाहुति° । ७१–७१. क–देवपत्नीनामिति तृतीयाहुतौ; हा–इति तत्र तृतीयाहुतौ; अ.इ.उ.पा–इति तत्र तृतीयाश्रुत्या देवपत्नीनां । ७२. क.जो.ड.ड१.जो.ना.शृं–निवेशनमिति । ७३. अ.इ.उ.पा–विद्यमानजाघन्याः । ३५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युक्ष्वा हि देवहूतमाꣳ अश्वाꣳ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥

युक्ष्व । हि । देवहूतमानिति देव - हूतमान् । अश्वान् । अग्ने । रथीः । इव ।
नीति । होता । पूर्व्यः । सदः ॥

अथ [1]संवर्गेष्टेः सप्तदशसामिधेन्योऽनभ्यस्ताः । 'युक्ष्वा हि' इत्याद्याः सर्वाः गायत्र्यः ॥ तत्र प्रथमा[2]– ['युक्ष्वा हि' इति]; हे [v]अग्ने, [v]युक्ष्व योजय । छान्दसो लुक् शपः, "द्व्यचोऽतस्तिङः" (पा ६·३·१३५) इति संहितायां दीर्घत्वम् । [v]देवहूतमान् देवानामाह्वातृतमान् [v]अश्वान् व्यापनान् ज्वालासमूहान् । उभयत्रापि "दीर्घादटि समानपादे" (पा ८·३·९) इति रुत्वम् । [v]रथीः [v]इव यथा रथी रथवान् रथे अश्वान् युङ्क्ते । "छन्दसीवनिपौ" (पा ५·२·१०९ वा २) इति मत्वर्थीय ईकारः । ततस्तथायुक्तजालस्त्वं [v]पूर्व्यः पुराणः [v]होता देवानां यष्टा [v]निषदः निषीद । लेटि व्यत्ययेन शपो लुकि अडागमः ॥

दशमे शंयुवाकश्च पत्नीसंयाजकाः [1]श्रुताः ।
या दर्शपूर्णमासाख्या सेष्टिरत्र समापिता ॥

अथैकादशे [2]संवर्गेष्टिहौत्रमन्त्रा अभिधीयन्ते[2] । ननु "सत्यं प्रपद्ये" (तैब्रा ३·५·१) इत्यादिक एको हौत्रकाण्डः । "उभा वामिन्द्राग्नी" (तैसं १·१·१४) इत्यादिरन्त्यानुवाकात्मकोऽपरः । [3]तयोर्मध्ये "युक्ष्वा हि" [4]इत्यनुवाको [5]न समाम्नातः । तत् कथमस्य हौत्रत्वम् । समाख्ययेति वदामः । यथा तयोः काण्डयोः [6]याज्ञिकानां समाख्यया हौत्रत्वं एवमस्याप्यनुवाकस्येति द्रष्टव्यम् । अत एवाऽऽपस्तम्ब आह – "अग्नये संवर्गाय पुरोडाशमष्टाकपालम्" इत्युक्तं (कृत्वा) "युक्ष्वा हि देवहूतमानिति पञ्चदश सामिधेनीरन्वाह । नित्यया परिदधाति । कुवित्सु नो गविष्टय इति याज्यानुवाक्ये । यस्याजुषद्विह्मा हि त इति संयाज्ये" (आपश्रौ १९·२५·९–१३) इति । नित्यया 'आ जुहोत दुवस्यत' (तैब्रा ३·५·२) इत्यनयेत्यर्थः ॥

युक्ष्वा इति ॥ तत्र प्रथमायाः सामिधेन्याः पाठस्तु– 'युक्ष्वा हि देवहूतमाꣳ अश्वाꣳ अग्ने रथीरिव । नि होता पूर्व्यः सदः' इति ॥ हे [v]अग्ने, त्वं [v]देवहूतमान् [v]देवानामतिशयेनाह्वातॄन् [v]युक्ष्व योजय । हिशब्दः [8]प्रसिद्धवाची । प्रसिद्धेऽस्मिन् कर्मणीत्यर्थः । योजने दृष्टान्तः – [v]रथीः [v]अश्वान् [v]इव इति । रथस्वामी यथा अश्वान् योजयति तद्वत् । किं च त्वं [v]पूर्व्यः पुरातनः [v]होता होमोत्पादको भूत्वा [v]निषदः अस्मिन् यागस्थाने निषीद ॥

१. तं३.मै.हो–संसर्गेष्टेः । २–२. तं.३.लं.हो–'तत्र प्रथमा' नास्ति ।

१. आ.क–स्थिताः । २–२. शृं.हो१– संवर्गेष्टिहौत्रमभिधीयते । ३. ड१.शृं–न तयोरुभयोः; ड–तत्र तयोरुभयोः । ४. ड.ड१.शृं–इत्याद्यनुवाकः । ५. ड१.शृं–'न' नास्ति । ६. ड.ड१.शृं–याज्ञिक° । ७. आ.क–देवानामाह्वातृतमान् देवान् । ८. आ.क–'युक्ष्व' नास्ति । ९. इ.क.जो. ना.हा–'प्रसिद्धवाची' नास्ति; हो१–प्रसिद्धार्थवाची ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत नो देव देवाꣳ अच्छा वोचो विदुष्टरः । श्रद्विश्वा वार्या कृधि ॥
त्वꣳ ह यद्यविष्ठ्य सहसः सूनवाहुत । ऋतावा यज्ञियो भुवः ॥

उत । नः । देव । देवान् । अच्छ । वोचः । विदुष्टर इति विदुः -तरः ।
श्रत् । विश्वा । वार्या । कृधि ॥
त्वम् । ह । यत् । यविष्ठ्य । सहसः । सूनो । आहुतेत्या -हुत । ४
ऋतावेत्यृत -वा । यज्ञियः । भुवः ॥

अथ द्वितीया– ' उत नः ' इति ॥ हे [v]देव दीप्तिमन्, [3]अग्ने, अस्माकं कर्माणि [v]देवान् [4v]अच्छ [v]वोचः आभिमुख्येन ब्रूहि भ्रातृव्यानभिभवितुम् । एते सम्यग्यजन्त इति । छान्दसो लिट्, " निपातस्य च " (पा ६·३·१३६) इत्यच्छेत्यस्य संहितायां दीर्घत्वम् । [v]विदुष्टरः [5]विद्वत्तरः । अयस्मयादित्वेन (पा १·४·२०) भत्वात् संप्रसारणम् । किं च विश्वानि वार्याणि १०
वरणीयानि अभिप्रेतानि भ्रातृव्यमरणादीनि [v]श्रत् [v]कृधि सत्यानि [6]कुरु । यथाभिमतसंपत्तिः सत्यम् । करोतेर्लेटि[7] छान्दसः शपो लुक् । " श्रुशृणुपृकृवृभ्यः[8] " (पा ६·४·१०२) इति धिभावः ॥

तृतीया– ' त्वम् ' इति ॥ हे [v]यविष्ठ्य युवतम । छान्दसः स्वार्थिको यत् । [v]सहसः बलस्य [v]सूनो [cv]मथनप्रभवत्वात् । हे [v]आहुत नित्यमाभिमुख्येनाहुत । " सुबामन्त्रिते[8] " (पा २·१·२) इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य पदादित्वात् षाष्ठिकमामन्त्रिताद्यु- १५
दात्तत्वं (पा ६·१·१९८); परस्य त्वाष्टमिकमामन्त्रितानुदात्तत्वम् (पा ८·१·१९) । [v]यत् यस्मात् । [v]ऋतावा सत्यवान् यज्ञवान् वा । तस्मादस्माकमपि [v]यज्ञियः यज्ञसंपादनार्हः [v]भुवः भव । त्वमेव तथा भवितुमर्हसीति । भवतेर्लेटि शपो लुकि अडागमे " भूसुवोस्तिङि " (पा ७·३·८८)

**उतेति ॥ अथ द्वितीया– ' उत नो देव देवाꣳ अच्छा वोचो विदुष्टरः । श्रद्विश्वा वार्या कृधि ' इति ॥ अपि च हे [v]देव अग्ने, त्वं [v]विदुष्टरः अतिशयेनास्मदभिप्रायं विद्वान् [v]देवान् प्रति [v]अच्छा २०
आभिमुख्येन गत्वा यजमानो हविर्दास्यतीति [v]वोचः ब्रूहि । [v]विश्वा [v]वार्या सर्वाणि वरणीयान्यस्मदभिप्रेतानि [v]श्रत् [v]कृधि श्रद्धेयानि विश्वसनीयानि यथा भवन्ति तथा कुरु ॥**

त्वमिति ॥ अथ तृतीया–' त्वꣳ ह यद्यविष्ठ्य सहसः सूनवाहुत । ऋतावा यज्ञियो भुवः ' इति ॥ हे [v]यविष्ठ्य युवतम, हे [v]सहसः [v]सूनो बलस्य पुत्र, मथनशक्त्योत्पन्नत्वात् बलपुत्रत्वम् । हे [v]आहुत देवानामाह्वातः, [v]त्वं [v]ह त्वमेव [v]यत् यस्मात् [v]ऋतावा सत्यवांस्तस्मात् [v]यज्ञियः [v]भुवः [10]यज्ञसाधको भव ॥ २५

३. लं–' अग्ने ' नास्ति । ४. तं३.त्रि.मै४.हो–अच्छा । ५. तं३–' विद्वत्तरः ' नास्ति । ६. तं३.लं.हो–कुरुत । ७. मै–°लेटि निपातस्य (?) । ८. तं३.हो–°प्रभावत्वात् ।

१०. आ.क.–°साधनो ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥
तं नेमिमृभवो यथाऽऽ नमस्व सहूतिभिः । नेदीयो यज्ञमङ्गिरः ॥

अयम् । अग्निः । सहस्रिणः । वाजस्य । शतिनः । पतिः ॥
मूर्धा । कविः । रयीणाम् ।
तम् । नेमिम् । ऋभवः । यथा । एति । नमस्व । सहूतिभिरिति सहूति - भिः ।
नेदीयः । यज्ञम् (१) । अङ्गिरः ॥

इति गुणाभावः । "हि च" (पा ८·१·३४) इति निघाताभावः । ऋतशब्दान्मत्वर्थीयो वनिप्रत्ययः । यज्ञशब्दात् "यज्ञर्त्विग्भ्याम्°" (पा ५·१·७१) इति घः ॥

चतुर्थी- 'अयम् इति' ॥ [v]अयं खलु [v]अग्निः पतिः स्वामी रयीणां [s]सर्वधनानां, तस्मादिहैव समिन्धयाम इति । अग्निरिदानीं विशेष्यते- [v]सहस्रिणः [v]शतिनः च शतप्रमाणवतः सहस्रप्रमाणवतश्च [v]वाजस्य अन्नस्य [v]पतिः स्वामी, अत एव [v]मूर्धा प्रधानभूतः [v]कविः क्रान्तदर्शनः । तस्मादयं [v]रयीणां दाताऽस्विति भावः । रयीणामित्यत्र "नामन्यतरस्याम्" (पा ६·१·१७७) इति [१०]विभक्तेरुदात्तत्वम् ॥

पञ्चमी- '[११-]तं नेमिम्' इति[-११] ॥ हे अग्ने, [v]नेदीयः अन्तिकतमः सदा अस्माकं प्रत्यासन्नः [v]अङ्गिरः [१२-]अङ्गनादिगुणयुक्त [v]तम् इमम् [v]यज्ञम् [v]आनमस्व अस्मान् प्रति प्रह्वीभूतं[-१२] कुरु । अस्मदभिमतसंपादनोन्मुखं कुरु । [v]सहूतिभिः समानाह्वानैः सहायैः सह । यद्वा — नेदीयः अन्तिकतममानमस्व । [v]यथा [v]ऋभवः देवतक्षाणः [v]नेमिं नीयमानम् आवर्तयन्ति

अयमिति ॥ अथ चतुर्थी- 'अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम्' इति ॥ [v]अयं [११]समिध्यमानः [v]अग्निः [१२-]सहस्रसंख्याकस्य शतसंख्याकस्य[-१२] च [१३-v]वाजस्य अन्नस्य[-१३] [v]पतिः अत एव [v]मूर्धा [१४]शिरोवदुत्तमः [v]कविः [१५]विद्वान् [v]रयीणां धनानां दाता भवतु ॥

तमिति ॥ अथ पञ्चमी- 'तं नेमिमृभवो यथाऽऽ नमस्व सहूतिभिः । नेदीयो यज्ञमङ्गिरः' इति ॥ हे [v]अङ्गिरः अङ्गसौष्ठवयुक्ताग्ने, समाना हूतिर्देवानामाह्वानं येषामृत्विजां [१६]ते सहूतयस्तैः [v]सहूतिभिः [१७]युक्तस्त्वं [v]तं [v]यज्ञम् अस्माकं [v]नेदीयः [१८]अत्यन्तसमीपं प्रति [v]आनमस्व आनीय वशं कुरु । तत्र दृष्टान्तः — [v]ऋभवः [१९-v]नेमिं [v]यथा इति । यथा देवतक्षाणो रथचक्रस्य नेमिमानीय स्ववशत्वेन परिभ्राम्यमाणां कुर्वन्ति [२०]तद्वत् ॥

९. हो-सर्वधातूनाम् । १०. तं३.लं.हो-विभक्त्यु° । ११-११. तं३.मै.मै४.लं.हो-तमिति । १२-१२. हो-°युक्तमिदं यजमानः स्वास्मात् प्रतिबिम्बितं ।

११. आ.क.हो-इध्यमानः । १२-१२. ड.ड१-शतसंख्यावतः सहस्रसंख्यावतः । १३-१३. ड-वाजिनोऽश्वस्य । १४. आ.क-शिरोवदुन्नतः । १५. ड.ड१.शृं.हो१-विद्वान् तादृशः । १६. अ.इ.जो.पा.हा-तांदृशोऽग्ने । १७. क-युक्तः तादृश त्वं । १८. आ.क-समीपं । १९. आ.क-'नेमिं नास्ति । २०. ड.हो१-'तद्वत्' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ॥
कमु ष्विदस्य सेनयाऽग्नेरपाकचक्षसः । पणिं गोषु स्तरामहे ॥

तस्मै । नूनम् । अभिद्यव इत्यभि - द्यवे । वाचा । विरूपेति वि - रूप । नित्यया ।
वृष्णे । चोदस्व । सुष्टुतिमिति सु - स्तुतिम् ॥
कम् । उ । स्वित् । अस्य । सेनया । अग्नेः । अपाकचक्षस इत्यपाक - चक्षसः । ५
पणिम् । गोषु । स्तरामहे ॥

तद्वद्यज्ञमानमयेति । [१३]अन्तर्भावितण्यर्थस्य व्यत्ययेनात्मनेपदम् । " यथेति [१५]पादान्ते " (फि ८५) इति यथेत्यस्य निघातः ॥

षष्ठी– ' तस्मै ' इति । [V]नूनम् इति पादपूरणे । हे अग्ने [V]विरूप नानारूप, [V]तस्मै यज्ञैराराधनीयाय [V]अभिद्यवे अभिगतदीप्तये [V]वृष्णे वर्षित्रे इन्द्राय इन्द्रार्थं [V]वाचा [V]नित्यया वैदिक्या १०
ऋगादिरूपया [V]सुष्टुतिं शोभनां स्तुतिं शोभनस्तुतिकं वा यज्ञं [V]चोदस्व प्रेरय पुनः पुनः प्रवर्तय । यद्वा—आभीक्ष्ण्यं नित्यत्वं, यथा नित्यप्रहसित इति; पुनः पुनः प्रवर्तमानया वाचा सुष्टुतिं प्रवर्तयेति । यथा पुनः पुनः स्तुवीत यजमानः तथा धनादिना समृद्धं कुर्विति । [१५]सुष्टुतिशब्देन गतिसमासे " मन्क्तिन्व्याख्यान° " (पा ६.२.१५१) इत्यादिना उत्तरपदान्तोदात्तत्वम् । बहुव्रीहौ छान्दसं षत्वम् । कश्चिदाह— तस्मै यजमानाय हविषां वर्षित्रे पुनः पुनः यज्ञं [१६]प्रवर्तयेति ॥ १५

सप्तमी– ' कमु ष्वित् ' इति ॥ [V]कम् इति प्रश्ने, [V]उ इत्यवधारणे, [V]स्वित् इति वितर्के । [V१७]अस्य [V]अग्नेः [V]अपाकचक्षसः अनल्पदर्शनस्य प्रवृद्धज्ञानस्य [V]सेनया बलसंपत्त्या कमेव

**तस्मा इति ॥ अथ षष्ठी– ' तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ' इति ॥ हे [V]विरूप विविधरूपयुक्ताग्ने, [V]अभिद्यवे सर्वतो द्योतमानाय [V]वृष्णे [२१]कामानां वर्षयित्रे तस्मै यष्टव्याय देवाय [V]नित्यया वैदिकमन्त्ररूपया [V]वाचा अस्माभिः क्रियमाणां [V]सुष्टुतिं शोभनां स्तुतिं नूनं २०
[V]चोदस्व सर्वथा प्रेरय तदग्रे कथयेत्यर्थः ॥**

**कमिति ॥ अथ सप्तमी– ' कमु ष्विदस्य सेनयाऽग्नेरपाकचक्षसः । पणिं गोषु स्तरामहे ' इति ॥ पाकोऽल्पः । चक्षो ज्ञानम् । अपाकं [२३]चक्षो [२२]यस्यासावपाकचक्षाः [२४]सर्वज्ञ इत्यर्थः । सर्वं जानतः [V]अस्य [V]अग्नेः [V]सेनया परिचारकजनेन सह [V]गोषु गवादिद्रव्यविषये [V]कम् [V]उ [V]पणिं [V]स्तरामहे [V]स्वित् कं नाम व्यवहारमाच्छादयामः । [२५-]एतदीयं परिचारकजनं[-२५] वञ्चयित्वा न कोऽपि व्यवहारोऽस्माभिः कर्तुं शक्यते । २५
तस्मात् सर्वमपि व्यवहारमस्यानुग्रहेणैव कुर्म इत्यर्थः ॥**

१३. तं३.मै.लं.हो–अन्तर्भावितस्य । १४. मै.तं३.हो–पदान्ते । १५. तं.३लं–सुष्टुशब्देन । १६. लं–प्रवर्तयति । १७. हो–' अस्य ' नास्ति ।

२१. अ.आ.इ.जो.ड.पा–काम्यानां । २२. हो१–' चक्षो ' नास्ति । २३. ड.ड१–°चक्षसः । २४. ड–सर्वज्ञस्य । २५–२५. ड–एतदीयपरिवारकजनम् । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मा नो देवानां विशः प्रस्नातीरिवोस्राः । कृशं न हासुरघ्नियाः ॥
मा नः समस्य दूढ्यः परिद्वेषसो अꣳहतिः । ऊर्मिर्न नावमा वधीत् ॥

मा । नः । देवानाम् । विशः । प्रस्नातीरिति प्र-स्नातीः । इव । उस्राः ।
कृशम् । न । हासुः । अघ्नियाः ॥
मा । नः । समस्य । दूढ्यः । परिद्वेषस इति परि-द्वेषसः । अꣳहतिः ।
ऊर्मिः । न । नावम् । एति । वधीत् ॥

उ खलु [v]पणिं [१८]सांव्यवहारिकं क्रयविक्रयादानभोगादिलक्षणं [१९-v]गोषु गवादिधनविषयेषु-[१९] [v]स्तरामहे छादयामः । [२०]न किञ्चिदपि, सर्वमपि व्यवहारं कुर्मः [२१]एव । पण व्यवहारे, औणादिकः इप्रत्ययः, [२२]स्तृणातेर्विकरणव्यत्ययेन शप्, स्खिदित्यस्य छान्दसं षत्वम् ॥

अष्टमी- 'मा नः' इति ॥ [v]देवानां हविर्व्यवहारिणां यजमानानां संबन्धिन्यः [v]विशः प्रजाः ऋत्विजो वा [v]नः अस्मान् [v]मा [v]हासुः मा त्याक्षुः, [v२३]प्रस्नातीः [२४]प्रस्नात्यः प्रस्नुताः-[२३] [v]उस्राः गाः [२५v]इव अहन्तव्याः [v]अघ्नियाः । यद्वा- अघ्निया इति गवां नाम । उस्राः क्षीरादिदानेन जगतां वासयित्र्यः । [२६]कमिव ? [v]कृशं [v]न वत्समिव, [२७]प्रस्नुतस्तन्यः हि गावो वत्सकं विशेषेण न जहति । एवम् [२८]अस्मान् मा [२९]हासिषुरिति । उभयोपमार्थायाऽपि वाक्यार्थो-पमा भवतीत्युपमैतत् ॥

नवमी- 'मा नः' इति ॥ [v]समस्य सर्वस्यापि [v]दूढ्यः द्रढीयः । पृषोदरादिः । [v]परिद्वेषसः सर्वतो द्वेषणशीलस्य भ्रातृव्यस्य [v]अꣳहतिः अभिभवः [v३०]नः अस्मान् [v]मा [v]वधीत्

मेति ॥ अथाष्टमी-'मा नो देवानां विशः प्रस्नातीरिवोस्राः । कृशं न हासुरघ्नियाः' इति ॥ [v]देवानां [३१]संबन्धिन्यः [v]विशः वाणिज्यकारिण्यः प्रजा [v]नः अस्मान् [v]मा [v]हासुः [३२]नैव परित्यक्तवत्यः । का इव ? [v]प्रस्नातीः [३३]प्रस्नुतवत्यः [v]उस्राः क्षीरादिप्रदानेन [३४]वासहेतवः [v]अघ्नियाः [v]इव गाव इव । [३५]कमिव ? [v]कृशं [v]न अल्पवयस्कं वत्समिव । यथा क्षीरपूर्णस्तनयुक्ता गावः शिशुं वत्सं न त्यजन्ति तद्वदित्यर्थः ॥

मेति ॥ अथ नवमी- 'मा नः समस्य दूढ्यः परिद्वेषसो अꣳहतिः । ऊर्मिर्न नावमा वधीत्' इति ॥ [३१v]समस्य अस्माभिः समानस्य [v]दूढ्यः दुर्धियः [v]परिद्वेषसः सर्वतो द्वेषं कुर्वतः शत्रोः [v]अꣳहतिः अस्मासु कृतो द्रोहः [v]नः अस्मान् [v]आ समन्तात् [v]मा [v]वधीत् । कां केव ? [v]नावम् [v]ऊर्मिः [v]न । यथा नद्यां गच्छन्तीं नावमूर्मिर्न [३२]विनाशयति तद्वद्वैरिकृतो द्रोहोऽस्मान् मा विनाशयतु । सर्वशब्दपर्यायो वाऽयं समशब्दः, सर्वस्य [३३]वैरिणो द्रोहो मा विनाशयतु ॥

१८. तं३.त्रि.पं२.लं.हो-संव्यवहारकम् । १९-१९. तं३-गोष्ठगवादिधनविषयम् । २०. मै४-तत् । २१. हो-एवम् । २२. मै.हो-तृणातेः; मै४.लं-स्तृणोतेः । २३-२३. लं-प्रस्नातिः प्रस्नुताः । २४. मै४-प्रस्नाताः । २५. तं३-इति । २६. तं३.मै-किमिव । २७. तं३.त्रि.मै४.लं.हो-°स्तन्याः । २८. मै.लं-माम् । २९. मै.लं.हो-हासुः । ३०. तं३.मै.लं.हो- 'नः' नास्ति ।

२६. आ.क.-संबन्धिनः । २७. उ.हो१-मैव । २८. आ-प्रस्नुताः । २९. ड१-व्यवहारहेतवः । ३०. आ-किमिव । ३१. क.जो.हा-'समस्य' नास्ति । ३२. आ.क-नाशयति । ३३. ड.शृं.हो१-द्वेषिणः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैर(२)मित्रमर्दय ॥
कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् । उरुकृदुरु णस्कृधि ॥

नमः । ते । अग्ने । ओजसे । गृणन्ति । देव । कृष्टयः । अमैः । (२) । अमित्रम् । अर्दय ॥
कुवित् । स्वित् । नः । गविष्टय इति गो - इष्टये । अग्ने । संवेषिष इति सं - वेषिषः । रयिम् ।
उरुकृदित्युरु - कृत् । उरु । नः । कृधि ॥ ५

[३१]माऽस्मानवधिषुः । [V]नावं दुर्बला [V]ऊर्मिः इव । कश्चिदाह– समस्य समानस्य [३२]दूढ्यः मत्सरिणः । समानमन्यत् ॥

दशमी– ' नमस्ते ' इति ॥ हे [V]अग्ने, [V]नमः, [V]ते तव खलु [V]ओजसे बलाय [V]कृष्टयः मनुष्याः [V]गृणन्ति शब्दयन्ति । [३३]तवैव बलं स्तुवन्ति यजमानादयः । अतः त्वम् [V]अमित्रम् अस्माकमपकारिणं शत्रुम् [V]अमैः अमनैः रोगादिभिः [३४V]अर्दय मारय । अमेरित्रप्रत्ययः (उ ६२३)। १०
अन्यत्र पचाद्यचि (पा ३·१·१३४) [३५]वृषादिः (पा ६·१·२०३) द्रष्टव्यः ॥

एकादशी– ' कुवित् सु ' इति ॥ हे[३६] [V]अग्ने, [V]नः अस्माकं [V]रयिं धनं [V]सु [V]संवेविषः सुष्ठु समन्तात् । प्रापय । [V]कुवित् इति निपातो भूयिष्ठमित्यस्यार्थे वर्तते । [३७]विष्लृ व्याप्तौ । लेटि " सिब्बहुलं लेटि " (पा ३·१·३४) इति [३८]सिप् प्रत्ययः[३९] । " लेटोऽडाटौ " (पा ३·४·९४) इत्यडागमः । [V]गविष्टये गावश्च इष्टयश्च गविष्टिः, तदर्थं तत्साधनानि कर्माणि मे स्युरिति । १५
लिङ्व्यत्ययः छान्दसः, नुमभावो [४०]वा छान्दसः । [४१]उत्तमबहुलधनं प्रापयेति । इदानीं [४२]तत्प्रापितं बहुतरं कुर्वित्याशास्ते– [V]उरुकृत् उरुणो [४२]बहुनो धनस्य कर्तुः, न हि त्वमल्पं कर्तुं जानासि ।

नम इति ॥ अथ दशमी– ' नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैरमित्रमर्दय ' इति ॥ हे [V]देव [V]अग्ने, [V]कृष्टयः मनुष्याः [V]ते तव [V]ओजसे बलाय [V]नमः [V]गृणन्ति [३४]नमस्कारवाचिनं शब्दं प्रयुञ्जते यजमानादयस्त्वदीयं बलं [३५]नमस्कुर्वन्तीत्यर्थः । अतस्त्वम् [V]अमित्रम् अस्माकमपकारिणम् [३६V]अर्दय मारय, [V]अमैः रोगादिभिः ॥ २०

कुविदिति ॥ एवं दश सामिधेनीरुक्त्वा पुरोनुवाक्यामाह– ' कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् । उरुकृदुरु णस्कृधि ' इति ॥ हे [V]अग्ने, त्वं [V]नः अस्माकं [V]रयिं धनं [V]कुवित् बाहुल्यं यथा भवति तथा सुष्ठु [V]संवेषिषः [३७]सम्यग्व्याप्तमकरोः । किमर्थम् ? [V]गविष्टये गोभिः सहितेष्टिर्गविष्टिस्तदर्थम् [V]उरुकृत् प्रभूतकारी [३८]त्वं [V]नः [३९]अस्मदीयं [४०]कर्मफलम् [V]उरु [V]कृधि प्रभूतं कुरु ॥ २५

३१. मै४.हो–अस्मान् मा वधिष्ट । ३२. तं३.मै४.लं.हो–दुर्धियः । ३३. तं३–तयैव । ३४. तं३.लं–' अर्दय ' नास्ति । ३५. त्रि–पृषोदरादिः । ३६. तं३.मै–' हे ' नास्ति । ३७. तं३.मै.लं.हो–विष । ३८–३८. तं३.मै.लं.हो–' सिप् प्रत्ययः ' नास्ति । ३९. मै–' वा ' नास्ति । ४०. मै४–उक्तं बहु धनं । ४१. तं३.मै.लं.हो–तत्प्राप्तिम् । ४२. मै४–बहु° ।

३४. ड–°वाचकं । ३५. ड१.–स्तुवन्ती° । ३६. हा–मर्दय । ३७. ड–सम्यग्व्याप्तिमकरोः । ३८. ड.ड१.शृं.हो१–' त्वं ' नास्ति । ३९. आ.क–अस्माकं । ४०. शृं–फलम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मा नो अस्मिन् महाधने परा वर्ग्भारभृद्यथा । संवर्गꣳ सꣳ रयिं जय ॥
अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छुना । वर्धा नो अमवच्छवः ॥

मा । नः । अस्मिन् । महाधन इति महा - धने । परेति । वर्क् । भारभृदिति भार - भृत् । यथा ।
संवर्गमिति सं - वर्गम् । समिति । रयिम् । जय ॥
अन्यम् । अस्मत् । भिया । इयम् । अग्ने । सिषक्तु । दुच्छुना । वर्धा । नः । अमवदित्यमं - वत् । शवः ॥

पादादित्वात् षाष्ठिकमामन्त्रिताद्युदात्तत्वम् (पा ६·१·१९८)। [V]नः अस्माकं धनम् [V]उरु [V]कृधि बहुतरं कुरु । सामर्थ्यातिशयो गम्यते। " नश्च धातुस्थोरुषुभ्यः " (पा ८·४·२७) इति नसो णत्वम्, " कः करत्करति° " (पा ८·३·५०) इति सत्वम्। करोतेर्लेट्, पूर्ववच्छपो लुक्, धिभावश्च ॥

द्वादशी– ' मा नः ' इति ॥ [४३-]उक्तं महत्तरं[-४३] धनं देहीति तत्र [V]महाधने त्वया [४४V]अस्मिन् दीयमाने इत्थं कर्तव्यम्। भारभृदिति। [V]मा [V]परावर्क् मा [४५]परानैषीः ! [V]यथा महान्तं भारं वोढुं समर्थो भारं न इति न किंचित् [४६]परावर्जयति महान्तमपि भारमानयति। एवं त्वयाऽपि कर्तव्यम्। [४७]व्रजेर्लेटि " मन्त्रे घस° " (पा २·४·८०) इति च्लेर्लुक्। किं च– [V]संवर्गम् [४८-]संवृज्य संवृज्य[-४८] देये धनराशौ पुनः पुनः समानीय महान्तं धनराशिं [V]संजय सम्यक् जित्वा आनय। वर्जेराभीक्ष्ण्ये णमुल् (पा ३·४·२२)। छान्दसो वा घमुञ् ॥

त्रयोदशी– ' अन्यम् ' इति ॥ हे [V]अग्ने, [V]अस्मत् अस्मत्तः [V]अन्यं शत्रुम् इयं [V]दुच्छुना दौर्गत्यं दुर्भिक्षं नरकादिरूपा वा पीडा [V]सिषक्तु सेवताम्। सचेर्लेटि " बहुलं छन्दसि "

मेति ॥ अथ [४१]याज्यामाह- ' मा नो अस्मिन् महाधने परा वर्ग्भारभृद्यथा । संवर्गꣳ सꣳ रयिं जय ' इति ॥ [V]नः अस्मभ्यं त्वया दत्ते [V]अस्मिन् [V]महाधने [V]मा [V]परावर्क् पराभवकारणं वर्जनं विनाशनं मा कुरु। तत्र दृष्टान्तः -- [V]भारभृत् [V]यथा इति। लोके यथा भारवाही बलीवर्दादिर्द्रव्यादिकं न नाशयति तद्वत्। किं च, [V]संवर्गं [४२-]संवृज्य संवृज्य[-४२] देये धनराशौ पुनः पुनः समानीय [V]रयिं [V]संजय प्रभूतं धनं सम्यक् प्रापय ॥

अन्यमिति ॥ तत्रैव विकल्पितां याज्यामाह- ' अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छुना। वर्धा नो अमवच्छवः ' इति ॥ हे [V]अग्ने [V]इयं [V]दुच्छुना [४३]रोगरूपा दारिद्र्यरूपाऽनेकरूपा वा पीडा [V]अस्मत्

४३–४३. मै–उत्तमं महत्तमम्। ४४. मै४–अस्मभ्यम्। ४५. मै४.लं–पराजैषीः। ४६. हो–पराजयति। ४७. [शुद्धीकृतोऽयं पाठः। मै–पुस्तके ' व्रजेर्लेटि ' इति पाठः। स चानुपयोगादाकर-ग्रन्थविरोधाच्च परिहरणीयः।]। ४८–४८. मै.हो–संवृज्य।

४१. आ–याज्या। ४२–४२. आ–संवृज्य संवृत्य; हो१–संवृत्य संवृत्य; ड१–' संवृज्य संवृज्य ' नास्ति। ४३. शृं.हो१–रोगदारिद्र्यरूपा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा ।
तं घेदग्निर्बृधाऽवति ॥

यस्य । अजुषत् । नमस्विनः । शमीम् । अदुर्मखस्येत्यदुः - मखस्य । वा ।
तम् । घ । इत् । अग्निः । बृधा । अवति ॥

(पा २·४·७६) इति शपः श्लुः ; इत्वं चाभ्यासस्य । [V]भियै भयार्थं यथाऽसौ भीतः पलायेत । [V]नः अस्माकं तु [V]शवः बलं वर्धय । [V]अमवत् [४९]अमसाधनः भ्रातृव्यक्षयो यैस्तद्वत् बलं वर्धय । " अणावकर्मकात्° " इति (पा १·३·८८) परस्मैपदम् । " छन्दस्युभयथा " (पा ३·४·११७) इति शप आर्धधातुकत्वाण्णिलोपः , " द्व्यचोऽतस्तिङः " (पा ६·३·१३५) इति संहितायां दीर्घत्वम् ॥

चतुर्दशी– ' यस्य ' इति ॥ [V]यस्य [V]नमस्विनः अन्नवतः पुरोडाशादिहविःसंपादिनो यजमानस्य [V]शमीं कर्म [V]अजुषत् सेवते प्रीतो भजते । कीदृशस्य [V]अदुर्मखस्य अविगुणयज्ञस्य, तमेवाग्निः [V]बृधा वर्धनेन [V]अवति तर्पयति । प्रवृद्धं वा रक्षति । घेदिति पादपूरणे । केचिदाहुः– नमस्विनो नमस्कारशीलस्य वा अविगुणयज्ञस्य वा कर्मेति विकल्पार्थो वाशब्द इति । घेति पादपूरणे , इदित्यवधारणे ॥

[V]अन्यं [४४V]सिषक्तु अस्मत्तो व्यतिरिक्तं वैरिणं संबध्नातु । किमर्थम् ? [V]भियै भीत्यर्थम् । यथा पीडया वैरी भीतः पलायते [४५-]तथा पीडां[-४५] प्राप्नोतु । [V]नः अस्माकं [V]शवः [V]वर्ध बलं वर्धय । [४९]किंवत् ? [V]अमवत्, [४७-]यथा वैरिणः अमः रोगो वर्धेत[-४७] तद्वत् ॥

यस्येति ॥ अथ [४८]स्विष्टकृतः [४९]पुरोनुवाक्यामाह– ' यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा । तं घेदग्निर्बृधाऽवति ' इति ॥ दुष्टोऽङ्गविकलो मखो यज्ञो दुर्मखः । न विद्यते दुर्मखो यस्य यजमानस्य सोऽयमदुर्मखः, सम्यगनुष्ठितयज्ञ इत्यर्थः, [५०]तस्य, [V]नमस्विनः भक्त्या नमस्कुर्वतः [V]यस्य यजमानस्य [V]शमीं सुखकरीमाहुतिम् [V]अजुषत् अग्निः असेवत । [V]अदुर्मखस्य सम्यगनुष्ठायिनः [V]वा यस्य यजमानस्य शमीमजुषत् [V]तं [V]घेत् [५१]तमेवोभयं नमस्कुर्वन्तं [५२]सम्यगनुतिष्ठन्तं वाऽयम् [V]अग्निः [V]बृधा धनादिवर्धनेन [V]अवति रक्षति ॥

४९. तं३.मै–आमसाधनम्; हो–अमसाधनम् ।

४४. आ.क–' सिषक्तु ' नास्ति । ४५–४५. ड.ड१.शृं.हो१–सा पीडा तं । ४६. अ.आ.इ. उ.क.जो.पा.हा–किं तत् । ४७–४७ आ–यस्य वैरिणाममो रोगो वर्धितः । ४८. आ–स्विष्टकृत्° । ४९. आ–°वाक्या । ५०. ड.ड१–' तस्य ' नास्ति । ५१. ड–°भयविधम् । ५२. ड१– ' सम्यगनुतिष्ठन्तं ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परस्या अधि (३) संवतोऽवराꣳ अभ्या तर । यत्राहमस्मि ताꣳ अव ॥
विद्मा हि ते पुरा वयमग्ने पितुर्यथाऽवसः । अधा ते सुम्नमीमहे ॥

परस्याः । अधीति (३) । संवत इति सं - वतः । अवरान् । अभि । एति । तर ।
यत्र । अहम् । अस्मि । तान् । अव ॥
विद्म । हि । ते । पुरा । वयम् । अग्ने । पितुः । यथा । अवसः ।
अध । ते । सुम्नम् । ईमहे ॥

पञ्चदशी– 'परस्याः' इति ॥ [Vपरस्याः] Vसंवतः संगतेः Vअधि उपरि परमे संश्लेषे तिष्ठन् । "उपसर्गाच्छन्दसि०" (पा ५.१·११८) इति वतिः । Vअवरान् अपकृष्टानप्यस्मान् Vअभ्यातर आभिमुख्येन, मर्यादया च तर तारय दुःखात् । वनोतेः संपदादित्वात् (पा ३·३·१०८ वा ९) क्विप् । परस्मात् संवननीयात् लोकादुपरि वर्तमानः त्वं अवरानस्मान् अभ्यातर आभिमुख्येनागच्छ । तथा कृत्वा Vयत्र Vअहम् Vअस्मि कुले ग्रामे जनपदे वा काले वा Vतान् तत्स्थानपि सर्वान् Vअव रक्ष तर्पय वा । रुत्वानुनासिकौ (पा ८·३·१,९) उक्तौ ॥

षोडशी– 'विद्म' इति ॥ हे Vअग्ने तस्मात् Vते तव Vपुरा पूर्वमेव Vवयं जानीमः । [५०]कथमिव ? Vअवसः अभिगन्तव्यः[५०] पितरमिव त्वा वयं जानीमः, [५१]क्रमागतो रक्षकः त्वमस्माकं पितुरेवं ते वयं जानीमः । पुत्रद्वेषितव्यावृत्त्यर्थमिदम् । Vअध अत एव कारणात् Vते त्वामेव Vसुम्नं सुखम् Vईमहे याचामहे । "द्व्यचोऽतस्तिङः" (पा ६·३·१३५) इति, "निपातस्य च" (पा ६·३·१३६) इति उभयत्रापि दीर्घत्वम् ॥

परस्या इति ॥ तत्रैव विकल्पितां पुरोनुवाक्यामाह– 'परस्या अधि संवतोऽवराꣳ अभ्या तर । यत्राहमस्मि ताꣳ अव' इति ॥ सम्यग्वनुते [५३]-देवान् भजते यस्यां क्रियायां-[५३] सा क्रिया संवत्, Vपरस्याः Vसंवतः Vअधि उत्कृष्टाया अस्या इष्टेरधिष्ठानम् Vअवरान् निकृष्टानप्यस्मान् Vअभ्यातर आभिमुख्येनऽऽगत्य दुःखानि [५४]नाशय । [५५]-Vयत्र येषु बन्धुषु Vअहम् Vअस्मि Vतान् बन्धूनपि [५६]-Vअव रक्ष-[५६] ॥

विद्मेति ॥ अथ स्विष्टकृतो याज्यामाह– 'विद्मा हि ते पुरा वयमग्ने पितुर्यथाऽवसः । अधा ते सुम्नमीमहे' इति ॥ हे Vअग्ने, [५७]-Vहि यस्मात् Vपुरा Vवयं Vते तव Vअवसः रक्षणं Vविद्म [५८]जानीमः । कस्येव ? Vपितुः Vयथा, [५९]-लोके पुत्रः यथा पितुः पालनं जानाति-[५९] तद्वत् । [६०]-Vअध तस्मात् कारणात् Vते Vसुम्नम् Vईमहे त्वया संपादितं सुखं प्राप्नुमः ॥

५०–५०. मै४–कस्येव पितुरिव अवसः वितच्य पुत्रः । ५१. लं.हो–अवगतः ।

५३–५३. आ.क–भजते यस्यां । ५४. ड.ड१.शृं.हो१–तारय । ५५. आ.क–'यत्र' नास्ति । ५६–५६. क.हा–आरक्ष । ५७. आ.क–'हि' नास्ति । ५८. आ–ज्ञातवन्तः; ड–जानीम । ५९–५९. आ–लोके पुरा यथा पितुं पालनं जानन्ति; ड१–पितुः पालनं जानाति । ६०. अ.इ.उ.जो.ना.पा.हा.शृं–अथ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

य उग्र इव शर्यहा तिग्मशृङ्गो न वꣳसगः । अग्ने पुरो रुरोजिथ ॥
सखायः सं वः सम्यञ्चमिषꣳ स्तोमं चाग्नये ।
वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥

यः । उग्रः । इव । शर्यहेति शर्य - हा । तिग्मशृङ्ग इति तिग्म - शृङ्गः । न । वꣳसगः ।
अग्ने । पुरः । रुरोजिथ ॥ ५
सखायः । समिति । वः । सम्यञ्चम् । इषम् । स्तोमम् । च । अग्नये ।
वर्षिष्ठाय । क्षितीनाम् । ऊर्जः । नप्त्रे । सहस्वते ॥

सप्तदशी– 'यः' इति ॥ हे [v]अग्ने [v]यः त्वम् [v]उग्रः उद्गूर्णबलतया उग्रः [v]इव भवसि। [v]शर्यहा । छान्दसः कर्तरि कृत्यः, "तत्र साधुः" (पा ४·४·९८) इति [52]वा यत्। शर्याणां हिंसकानां हन्ता शर्यहा। [v]तिग्मशृङ्गः [v]न तीक्ष्णशृङ्गः तीक्ष्णज्वालः तिग्मशृङ्ग इव। १०
[v]वꣳसगः वननीयानि वनानि गच्छति वनसंगः। वननीयेषु वनेषु सक्त इति वा [53]वंसगः। पृषोदरादित्वादिष्टस्वरूपलाभः। एवं मृगवत् सौम्यस्वभावः उग्रस्वभावश्च त्वं [v]पुरः असुराणां पुरीः मेघान् वा [v]रुरोजिथ अधक्षीः। छान्दसो हः। भ्रातृव्याणां हन्ता, वृष्टेरुत्पादनेन वा सर्वाभिमतकारी ॥

अथास्यामेवेष्टयां पुरोऽनुवाक्या– 'सखायः' इत्यनुष्टुप् ॥ हे [v]सखायः समानख्यानाः १५
ऋत्विग्यजमानाः [v]वः युष्मदर्थं युष्माकं श्रेयोऽर्थम् अस्मासु [v]अग्नये [v]वर्षिष्ठाय प्रवृद्धतमाय [v]क्षितीनां

य इति ॥ अथात्र तिस्र ऋच उपहोमार्थाः। तत्रेयं प्रथमा– 'य उग्र इव शर्यहा तिग्मशृङ्गो न वꣳसगः। अग्ने पुरो रुरोजिथ' इति ॥ हे [v]अग्ने, [v]यः त्वम् [v]उग्रः [v]इव क्रूरो राजेव [v]शर्यहा शर्याणां हिंसकानां हन्ता, [v]तिग्मशृङ्गः [v]न तीक्ष्णशृङ्गो मृग इव, [v]वꣳसगः, वंसानि [11]वनानिग च्छतीति वंसगः, [12]दावाग्निरूपो भूत्वा वनेषु [11]तिष्ठसीत्यर्थः। तादृशस्त्वं [v]पुरः [v]रुरोजिथ शत्रूणां पुराणि [17]तर्जितवानसि ॥ २०

सखाय इति ॥ अथ द्वितीया– 'सखायः सं वः सम्यञ्चमिषꣳ स्तोमं चाग्नये। वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते इति ॥ हे [v]सखायः, परस्परसख्ययुक्ता ऋत्विग्यजमानाः, [v]वः युष्माकं [v]सम्यञ्चम् [v]इषं समीचीनम् [15]अपि अभीष्टार्थम् [अग्निः] [v]संपादयतु। [66]समित्युपसर्गस्यापेक्षितः शेषः [17]अध्याहृतः। यूयं [v]च [v]अग्नये [v]स्तोमं स्तोत्रं संपादयत। [66]कीदृशायाग्नये? [v]क्षितीनां निवासहेतूनां मध्ये [v]वर्षिष्ठाय वृद्धतमाय, [v]ऊर्जः [v]नप्त्रे बलस्य [69]न [70]पातयित्रे विनाशनमकुर्वते, [v]सहस्वते स्वयमतिशयेन बलवते ॥ २५

५२. तं३.मै–'वा' नास्ति। ५३. तं३.त्रि.लं.हो–वनसङ्गः।

६१. क.हा–'वनानि' नास्ति। ६२. ड१.शृं–दावाग्निः भूत्वा। ६३. आ.शृं–तिष्ठतीत्यर्थैः। ६४. क.हा–भर्जितवान्; ड.हो१–जितवान्; ड१–भञ्जितवान्। ६५. ड.ड१–'अपि' नास्ति। ६६. ड. ड१–समित्यस्योपसर्गस्या°। ६७. ड१–उदाहृतः। ६८. ड१–तादृशायाग्नये। ६९. ड–'न' नास्ति। ७०. अ.इ.उ.क.ना.पा–घातयित्रे; ड.शृं.हो१–संपादयित्रे। ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सꣳसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।
इडस्पदे समिध्यसे स नो वसून्या भर ॥

सꣳसमिति सं - सम् । इत् । युवसे । वृषन् । अग्ने । विश्वानि । अर्यः । आ ।
इडः । पदे । समिति । इध्यसे । सः । नः । वसूनि । एति । भर ॥

---

५ निवासहेतूनां मध्ये [v]ऊर्जः [v]नप्त्रे चतुर्थाय ; यथा– 'अन्नादाहुतिः आहुतेरादित्यः आदित्यादग्निः' इति । [v]सहस्वते अतिशयेन बलवते ईदृशायास्मै[w] [v]सम्यञ्चं समीचीनम् अतिगुणं [v]स्तोमं स्तोत्रम् [v]इषम् अन्नं पुरोडाशादिकं हविः [v]च [v]समारभध्वम् कुरुत । एतत्क्रियाया अश्रुतत्वात् साकाङ्क्षत्वादुपसर्गसामर्थ्यादुत्तरस्मिंश्च मन्त्रे विशेषस्य श्रुतत्वात् । तत्रायं विवेकः – अग्नये इषं स्तोमं च [x]संहराम इत्यत्रोच्यते । सोऽग्निरस्मभ्यं विश्वानि वसूनि समाहरत्विति उत्तरत्र वक्ष्यत १० इति । प्रियस्थिरादिना (पा ६·४·१५७) वृद्धशब्दस्य वर्षादेशः ॥

अथात्रैव याज्या– 'सꣳसमित्' इत्यनुष्टुप् ॥ "प्रसमुपोदः॰" (पा ८·१·६) इति द्विर्वचनम् । हे [v]वृषन् कामानां वर्षितः [v]अग्ने, [y][v]विश्वानि वसूनि धनानि भक्तैः [v]संयुवसे संमिश्रयसि भक्तेभ्यो वा[z] दातुं राशीकरोषि । व्यत्ययेन शः, आत्मनेपदं च । यस्मात् [v]अर्यः ईश्वरः त्वम् । आकारो मर्यादायाम् । [a]मर्यादा असंकरेण यथाऽधिकारं धनानां प्रापयिता त्वमिति । १५ किं च– [v]इडः [v]पदे पृथिव्याः पदे [b]स्थाने वेद्याः[c] [v]समिध्यसे सम्यक् ज्वाल्यसे । [v]सः [d]तादृशः महानुभावस्त्वम् अस्मभ्यं [v]वसूनि [v]समाभर समाहरेति । "हृग्रहोर्भश्छन्दसि" (पा ८·२·३२ वा १) । इडन्नं तद्वती पृथिवी । मत्वर्थीयो लुप्यते, अयस्मयादित्वेन (पा १·४·२०) पदत्वाज्जश्त्वं ; "सावेकाचः॰" (पा ६·१·१६८) इति विभक्तेरुदात्तत्वम् ; "षष्ठ्याः पतिपुत्र॰" (पा ८·३·५३) इत्यादिना सत्वम् ॥

---

२० **सꣳसमिति ॥ अथ तृतीया– 'सꣳसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स नो वसून्या भर' इति ॥ हे [v]वृषन् कामानां वर्षक [v]अग्ने, [r]विश्वानि सर्वाणि फलानि [v]संसम् [r]इत् [w]संपाद्य संपाद्यैव [r]युवसे यजमानेन मिश्रयसि । [v]अर्य [v]आ ईश्वरस्त्वमागत्य [r]इडः [v]पदे पृथिवीरूपाया वेद्याः स्थाने [r]समिध्यसे सम्यग्ज्वाल्यसे । [r]सः तादृशः महानुभावो [w]त्वं [r]नः अस्मभ्यं [r]वसूनि धनानि समाभर सम्यगाहृत्य प्रयच्छ ॥**

---

[y] ५४. लं–'असौ' नास्ति। ५५. पं२–समाभराम। ५६. लं–विश्वानाम्। [z] ५७. मै.हो–'वा' नास्ति। ५८. मर्यादायाः। [a] ५९–५९. मै४–वेद्याः स्थाने। [b] ६०. तं३.मै–'तादृशः' नास्ति।

---

[w] ७१. आ-ड–'संपाद्य' नास्ति। [r] ७२. 'त्वम्' नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापते स वेद सोमापूषणेमौ देवौ ॥११॥

[यज्ञममरधि वृषन्नेकान्नविंशतिश्च ।]

प्रजापत इति प्रजा-पते । सः । वेद ।
सोमापूषणेति सोमा-पूषणा । इमौ । देवौ ॥११॥

[कासं ७·१७] ५

" यः प्रजाकामः स्यात् तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेत् " (तैसं २.४.४) इत्यस्याः पुरोऽनुवाक्या– ' प्रजापते न त्वत् ' इति त्रिष्टुप् ॥ व्याख्यातेयं – " सोमस्य त्विषिरसि " (तैसं १.८·१४) इत्यत्र । इह त्वस्याः प्रतीकं गृह्यते । हे [v]प्रजापते, [v]त्वदन्यः [v]एतानि विश्वानि [v]जातानि भुवनानि [v]परिबभूव सर्वतो व्याप्नोति । तस्माद्वयत् कामयमानाः [v]ते [v]जुहुमः वयं [v]तत् तथैवास्माकम् [v]अस्तु । [v]वयं [v]रयीणां [v]पतयः [v]स्याम इति ॥ १०

तत्रैव याज्या– ' स वेद पुत्रः ' इति जगती ॥ इयमपि– " हिरण्यगर्भः " (तैसं २·२.१२) इत्यत्र व्याख्याता । प्रतीकग्रहणमिदमस्याः । [v]सः एव प्रजापतिः [v]पुत्रः भूत्वा [v]पितरं [v]मातरं च [v]वेद [६१]पुत्रभावेन वर्तते । [v]सः एव [v]सूनुः सोता यजमानश्च भवति । [v]सः एव [v]पुनर्मघः पुनः पुनः [६२]क्रियमाणो यागश्च भवति । [v]सः एव [v]द्यां स्वर्गं च [v]और्णोत् स्वतेजसा आच्छादयति , [v]सः एव विश्वानि [६३]भूतजातानि [६४v]अभवत् , [v]आऽभवत् व्याप्नोति [v]सः १५ एवेति ॥

" यः पशुकामः स्यात् तस्मा एतं सोमापौष्णं गार्मुतं चरुं निर्वपेत् " (तैसं २·४·४) इत्यस्य पुरोऽनुवाक्या– ' सोमापूषणा जनना रयीणाम् ' इति त्रिष्टुप् ॥ इयं च व्याख्याता " अग्नाविष्णू महि " (तैसं १·८·२२) इत्यत्र । प्रतीकग्रहणमस्या अप्यत्र । सोमापूषणौ [v]रयीणां धनानां [v]जनना जनयितारौ द्यावापृथिव्योश्च [६५]जनयितारौ । [v]विश्वस्य [६६-]भूतस्य जातस्य[-६६] २०

प्रजापत इति ॥ " यः प्रजाकामः स्यात् तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेत् ", " यः पशुकामः स्यात् तस्मा एत[१९] सोमापौष्णं गार्मुतं चरुं निर्वपेत् " (तैसं २·४·४) [७३]इत्यनयोर्याज्यानुवाक्या-प्रतीकानि दर्शयति– ' प्रजापते स वेद सोमापूषेणेमौ देवौ ' इति ॥ ' प्रजापते न त्वदेतान्यन्यः ' इति प्रजार्थस्य हविषः पुरोनुवाक्या । सा च ' सोमस्य त्विषिरसि ' (तैसं १·८·१४) इत्यनुवाके व्याख्याता । ' स वेद पुत्रः पितरम् ' इत्येषा याज्या । सा च " हिरण्यगर्भ आपो ह यत् " (तैसं २·२·१२) २५ इत्यस्मिन्ननुवाके व्याख्याता । पश्वर्थस्य हविषः " सोमापूषणा [७४]जनना " इति पुरोनुवाक्या । " इमौ देवौ जायमानौ " इति याज्या । एतदुभयम् " अग्नाविष्णू महि " (तैसं १·८·२२) इत्यस्मिन्ननुवाके व्याख्यातम् ॥

६१. मै४.लं.हो–पुंभावेन । ६२. मै४–मीयमानः । ६३. लं–भूतानि जातानि । ६४. तं३–भवन्ति । ६५. तं३.हो–जननौ । ६६–६६. मै.मै४–भूतजातस्य ।

७३. ड.ड१–इत्युभयोर्याज्यापुरोनु° । ७४. ड.ड१–जनना रयीणाम् । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जातमात्रावेव [v]गोपौ [६७]पालकौ । एवं महानुभावाविमौ [v]देवाः [६८v]अकृण्वन् कृतवन्तः अमृतत्वस्य [v]नाभिं नहनभूतौ देवाः कृतवन्तः ॥

अथ तत्रैव याज्या– 'इमौ देवो जायमानौ' इति त्रिष्टुप् ॥ इयमपि तत्रैव व्याख्याता (तैसं १·८·२२) । प्रतीकमेव गृह्यते । [v]इमौ [v]देवो सोमापूषणौ [v]जायमानौ एव [v]जुषन्त, सर्वे देवाः [v]इमौ देवौ [v]तमांसि अजुष्टानि अप्रियाणि [v]गूहतां जातमात्रावेव छादितवन्तौ । [v]आभ्यां [v]पक्वम् उदकं संवत्सरव्रतम् [v]आमासु [v]उस्रियासु रश्मिषु [v]इन्द्रः वृष्ट्यर्थं [६९v]जनत् जनयति पक्वं करोति ॥

इति द्वितीये षष्ठे एकादशोऽनुवाकः ॥

अत्र विनियोगसंग्रहः –

संवर्गेष्टौ सामिधेन्यो दश तिस्रस्तु याज्यकाः ।
संयाज्यास्तिस्र उदिता उपहोमास्त्रयो मताः ॥
प्रजासवे द्वयं योज्यं गार्मुते प्रथमे भवेत् ।
सोमेमौ तद्द्वितीये स्तस्त्रयोविंशतिरीरिताः ॥ इति ॥

अत्र मीमांसा ॥ तृतीयाध्यायस्य तृतीयपादे चिन्तितम्—
"वेदत्रयोक्तधर्माणामृत्विग्भिः संगतिस्त्रिभिः ।
अनियत्या नियत्या वा नियतिर्नानिरूपणात् ॥
[७५]हौत्रत्वादिसमाख्यानं नियतेर्गमकं स्वतः ।
निर्बाधं चान्यवत् [७६]तच्च तेनात्र विनियोजकम्" ॥ (जैन्या ३·३·१५–१६) ॥

[७७]याज्यापुरोनुवाक्यापाठादयो धर्मा ऋग्वेदे प्रोक्ताः । दोहननिर्वापादयो यजुर्वेदे । [७८]आज्यस्तोत्रपृष्टस्तोत्रादयः सामवेदे । [७९]एतस्यैते धर्मा इति नियामकस्य दुर्निरूपत्वाद्येन केनाप्यृत्विजा यः कोऽपि धर्मं इच्छया संगच्छत इति चेत् । मैवम् । हौत्रमाध्वर्यवमौद्गात्रमिति समाख्यानेन नियतिर्बोध्यते । न च समाख्यानस्य बाधकं किंचित् पश्यामः । तस्मादबोधकत्वबाधितत्वयोरप्रामाण्यकारणयोरभावात् [८०]श्रुतिलिङ्गादिपञ्चकवत् प्रमाणेन[८०] समाख्यानेन धर्मा व्यवस्थाप्यन्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे षष्ठप्रपाठक एकादशोऽनुवाकः ॥

---

६७. तं३.मै४.लं.हो–गोपकौ; मै–'पालकौ' नास्ति । ६८. मै–'अकृण्वन्' नास्ति । ६९. तं३.लं.हो–'जनत्' नास्ति ।

---

७५. अ.आ.इ.उ.पा–हौत्रकादि; शृं–होतृत्त्वादि; ड१–हौत्रादित्यादि । ७६. ड–तत्र । ७७. अ.इ.उ.पा–°पाठे ये; क.हा–°पाठादयो ये; हो–°पादयोः; ड–पाठयोः; ड१–°वाक्यायागादयो । ७८. अ–आज्यस्तोत्रादयः; जो.ना.हा–आज्यस्तोत्रपृष्ठादयः । ७९. ड–अस्यैते; ड१–तस्यैवेते । ८०–८०. ड१–°पञ्चकप्रमाणख्यानेन ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उशन्तस्त्वा हवामह उशन्तः समिधीमहि ।
उशन्नुशत आ वह पितॄन् हविषे अत्तवे ॥
त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥

उशन्तः । त्वा । हवामहे । उशन्तः । समिति । इधीमहि । ५
उशन् । उशतः । एति । वह । पितॄन् । हविषे । अत्तवे ॥
त्वम् । सोम । प्रचिकित इति प्र - चिकितः । मनीषा । त्वम् । रजिष्ठम् । अन्विति । नेषि । पन्थाम् ।
तव । प्रणीतीति प्र - नीती । पितरः । नः । इन्दो इति । देवेषु । रत्नम् । अभजन्त । धीराः ॥

महापितृयज्ञे सामिधेनी एकैव त्रिरुच्यते– 'उशन्तः' इत्यनुष्टुप् ॥ [v]उशन्तः कामयमानाः [v]पितॄन् [v]त्वा [v]हवामहे आह्वयामः । तानेव कामयमानास्त्वां [v]समिधीमहि सम्यग्दीपयामः । १०
त्वमपि तान् पितॄन् [v]उशन् [v]आ [v]वह । कीदृशान्? [v]उशतः हविरत्तुं कामयमानान्, [v]हविषे [v]अत्तवे हविर्भोक्तुम् । तुमर्थे [1]तवेन् (पा ३·४·९) प्रत्ययः । कर्मणः संप्रदानत्वाच्चतुर्थी ॥

[1]सोमबर्हिषदग्निष्वात्तकव्यवाहनानां क्रमेण द्वेद्वे [1]एव पुरोऽनुवाक्ये एकैकस्य तूत्तरा याज्या सर्वास्त्रिष्टुभः । विशेषो वक्ष्यते–'त्वꣳ सोम' इति ॥ हे [v]सोम, [v]त्वं [v]प्रचिकितः प्रकर्षेण ज्ञातः । निष्ठायां

एकादशे तु कथितं संवर्गेष्ट्यादि हौत्रकम् । १५
द्वादशे [1]पितृयज्ञस्य हविषां हौत्रमुच्यते ॥१॥

उशन्त इति ॥ कल्पः – "एकां सामिधेनीं त्रिरन्वाहोशन्तस्त्वा हवामह इत्येताम्" (आपश्रौ ८·१४·१८) इति । पाठस्तु– 'उशन्तस्त्वा हवामह उशन्तः समिधीमहि । उशन्नुशत आ वह पितॄन् हविषे अत्तवे' इति ॥ हेऽग्ने, वयम् [v]उशन्तः पितॄन् कामयमानास्त्वामाह्वयामः । पुनरपि पितॄन् [v]उशन्तः [2]त्वां [v]समिधीमहि । [3]त्वमपि [4]कामयमानः कामयमानस्य [5]यजमानस्य [v]पितॄन् [1v]आवह । किमर्थम्? २०
[v]हविषे [v]अत्तवे हविर्भोक्तुम् ॥

त्वमिति ॥ कल्पः– "द्वे पुरोनुवाक्ये अन्वाहार्चमुक्त्वा प्रणौत्यपरामुक्त्वा प्रणौति । त्वꣳ सोम प्रचिकित इत्येता आम्नाता भवन्त्येका याज्या" (आपश्रौ ८·१५·१३–१६) इति । तत्र प्रथमां पुरोनुवाक्यामाह– 'त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम् । तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः' इति ॥ हे [v]सोम, [v]त्वं [v]मनीषा मनीषया [6]अस्मदीयया बुद्ध्या [v]प्रचिकितः २५
प्रकर्षेण [7]ज्ञातः । किं च, [v]त्वं [8-v]रजिष्ठं [v]पन्थाम् अन्नोदकसंपूर्णं [8]रक्षकं मार्गम् [v]अनुनेषि [9]अनुक्रमेण

१. मै–तवै । २. तं३.लं–°त्तहव्य° । ३. मै.मै४.हो–'एव' नास्ति ।

१. ड–°यज्ञस्थ° । २. आ–त्वा । ३. ड१–त्वमसि । ४. क–काम्यमानः । ५. ना–'यजमानस्य' नास्ति । ६. क.हा.आवह वद । ७. आ.ड–त्वदीयया । ८. ड१–विज्ञातः । ९–९. अ.आ. इ.उ.पा–रजिष्ठं यमन्नो; क.जो.हा–रजिष्ठं यमलोकसंपूर्त्यां; ना–रजिष्ठमन्नोदक° । १०. आ–अनुक्तमेव । ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीꣳरपोर्णु वीरेभिरश्वैर्मघवा भवा (१) नः ॥

त्वया । हि । नः । पितरः । सोम । पूर्वे । कर्माणि । चक्रुः । पवमान । धीराः ।
वन्वन् । अवातः । परिधीनिति परि-धीन् । अपेति । ऊर्णु ।
वीरेभिः । अश्वैः । मघवेति मघ-वा । भव (१) । नः ॥

छान्दसं द्विर्वचनम्, यङ्लुकि वा अभ्यासविकाराभावः, "गतिरनन्तरः" (पा ६·२·४९) इति गतेः प्रकृतिस्वरत्वम् । 'चिक' इति वा धात्वन्तरं द्रष्टव्यम् । [v]मनीषा मनीषावद्भिः । यद्वा-विशिष्टया मनीषया व्यभिचाराभावात् । "सुपां सुलुक्°" (पा ७·१·३९) इति विभक्तेराकारः । किं च [v]त्वं [v]रजिष्ठम् ऋजुतरं [v]पन्थां पन्थानम् । ऋजुशब्दादिष्ठनि "विभाषर्जो-रिछन्दसि" (पा ६·४·१६२) इति रेफः । यद्वा- [४]रजः उदकम् अतिशयेन तद्वान् रजिष्ठः । रजःशब्दात् इष्ठन् । "विन्मतोर्लुक्" (पा ५·३·६५), "टेः" (पा ६·४·१४३) इति टिलोपः । ईदृशं पन्थानम् [v]अनुनेषि अनुक्रमेण प्रापयसि । [५]नयतेर्लेटि शपो लुक् । किं च हे [v]इन्दो सोम, [v]तव [v]प्रणीती प्रणीत्या परिचरणेन पुरस्कारेण वा । "सुपां सुलुक्°" (पा ७·१·३९) इति तृतीयायाः पूर्वसवर्णदीर्घत्वम् । अस्माकं [v]पितरः पूर्वेषु [v]देवेषु [v]रत्नं रमणीयं हविरन्नम् [v]अभजन्त [v]धीराः धीमन्तः । मत्वर्थीयो रप्रत्ययः ॥

त्वया हीति ॥ हे [v]सोम, [v]नः अस्माकं [६]पूर्वे [v]पितरः [v]त्वया खलु हेतुना त्वत्प्रसादेन [v]कर्माणि ज्योतिष्टोमादीनि पितृयज्ञादीनि वा [v]चक्रुः कृतवन्तः । [v]धीराः । गतम् । हे [v]पवमान शोधक, तस्मात् कारणात् अस्माकमपि त्वं [v]वन्वन् [७]अस्मान् संभजन् [v]अवातः प्रापयसि । हे [v]इन्दो, [v]तव [११v]प्रणीती प्रणीत्या परिचरणेन [v]नः अस्माकं [v]पितरः [v]देवेषु मध्ये स्थित्वा [v]धीराः सन्तो [v]रत्नं रमणीयं हविः [v]अभजन्त ॥

त्वयेति ॥ द्वितीयां पुरोनुवाक्यामाह- 'त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः । वन्वन्नवातः परिधीꣳरपोर्णु वीरेभिरश्वैर्मघवा भवा नः' इति ॥ हे [v]पवमान शोधक [v]सोम, [v]हि यस्मात् [v]नः अस्माकं [v]पूर्वे [v]पितरः [v]त्वया अनुगृहीताः कर्माणि [v]चक्रुः, [१३]तस्मादिदानीं [v]धीराः तिष्ठन्ति । त्वमपि [v]अवातः वायुमनपेक्ष्य [१३]ज्वलनेन [१४]अस्मदीयहविः [v]वन्वन् [१५]संभक्षयन् [v]परिधीन् परिधिवत् सर्वतोऽवस्थितान् प्रतिबन्धकान् [v]अपोर्णु निराकुरु । कैः साधनैः, [v]वीरेभिः युद्धकुशलैः [v]अश्वैः । तथा [v]नः अस्मदर्थं [v]मघवा धनवान् [v]भव ॥

४. लं-रजम् (?) । ५. मै-°र्लिटि (?) । ६. लं-सोमे । ७. मै-मै४-अस्माकम् ।

११. क.हा-'प्रणीती' नास्ति । १२. आ.क-परिस्मरन्तो जन्मानि; १३. ड-ज्वलन् । १४. अस्मदीयं हविः । १५. शृं.-संभजन् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पितृयज्ञस्य हौत्रम्]

त्वꣳ सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम् ॥

त्वम् । सोम । पितृभिरिति पितृ-भिः । संविदान इति सं-विदानः ।
अन्विति । द्यावापृथिवी इति द्यावा-पृथिवी । एति । ततन्थ ।
तस्मै । ते । इन्दो इति । हविषा । विधेम । वयम् । स्याम । पतयः । रयीणाम् ॥ ५

वातरहितः स्वयमेव ज्वलन् । यद्वा - अकार [८]उपमायाम्, अयं वायुसदृशः, दीर्घकारित्वं सादृश्यम् । [९]परिधीन् परितः धारयितॄन् आत्मनः [९]प्रतिबन्धॄन् [९]अपोर्णु अपानुद प्रतिबन्धकापनोदेन शीघ्रमागच्छ । रुत्वानुनासिकावुक्तौ (पा ८·३·१-९) । [१०]वीरेभिः विक्रान्तैः [१०]अश्वैः शीघ्रमागच्छेति । ततश्चागत्य [१०]नः अस्माकं [१०]मघवा धनवान् [१०]भव । अस्मभ्यं [११]धनं दातुं हस्ते गृहाण । यद्वा–हविषा [११]धनेन तद्वान् भव । " छन्दसीवनिपौ " (पा ५·२·१०९ वा २) इति मत्वर्थीयो [१३]वनिप्प्रत्ययः । " द्व्यचोऽतस्तिङः " (पा ६·३·१३५) इति भवशब्दस्य संहितायां [१५]दीर्घत्वम् ॥ १०

त्वं सोमेति ॥ हे [१०]सोम, [१०]त्वं [१०]पितृभिः पूर्वैरास्माकीनैः [१०]संविदानः ऐकमत्यं गतः इत्थं वयमस्मै कुर्म इति [१५१०]द्यावापृथिवी [१०]अनु [१०]आततन्थ अनुक्रमेण दीप्त्या । अततेः " बभूथाततन्थ° " (पा ७·२·६४) इति निपात्यते । हे [१०]इन्दो, [१०]तस्मै [१०]तादृशाय [१०]ते तुभ्यं [१०]हविषा [१०]विधेम परिचरेम तदर्थम् आततदीप्तिर्भव । प्रयोजनं च ब्रूमः– [१०]वयं [१०]रयीणां धनानां [१०]पतयः [१०]स्याम भूयास्मेति हविषा विधेम त्वाम्, त्वं च द्यावापृथिवी दीप्त्या आततन्थ पितृभिश्च संविदानो भव इति । " समो गम्यृच्छि° " (पा १·३·२९) इति विदेरात्मनेपदम् ॥ १५

त्वमिति ॥ अथ याज्यामाह– ' त्वꣳ सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ । तस्मै त इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम् ' इति ॥ हे [१०]सोम, [१०]त्वं [१०]पितृभिः [१०]संविदानः [१५-१५]ऐकमत्यं गतः[-१५] [१०]अनु क्रमेण [१०]द्यावापृथिवी [१०]आततन्थ आतते व्याप्ते कृतवानसि । हे [१०]इन्दो [१७-हे सोम-१७], [१०]तस्मै [१०]ते तादृशाय तुभ्यं [१०]हविषा [१०]विधेम परिचरेम । त्वत्प्रसादात् [१०]वयं धनानां [१०]पतयः [१०]स्याम ॥ २०

इत्थं " सोमाय पितृमते पुरोडाशꣳ षट्कपालं [१८]निर्वपति " (तैसं १·८·५) इत्यस्यानुवाक्याद्वयं याज्या चेति मन्त्रत्रयमुक्तम् ॥ २५

---

८. तं३–उपमानम् । ९.लं–प्रबद्धान् । १०. तं३.लं–' भव ' नास्ति । ११. लं–ज्वलनम् । १२. तं३.लं–°यतेन । १३. तं३.हो–विनिप्रत्ययः । १४. मै–दीर्घः । १५ मै.मै४–द्यावापृथिव्यौ ।

---

१६. आ.क–संविदं प्राप्तः । १७. ड.शृं–' हे सोम ' नास्ति । १८. आ.क–' निर्वपति ' नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन ॥

अग्निष्वात्ता इत्यग्नि-स्वात्ताः । पितरः । एति । इह । गच्छत ।
सदःसद इति सदः-सदः । सदत । सुप्रणीतय इति सु-प्रणीतयः ॥
५ अत्त । हवीꣳषि । प्रयतानीति प्र-यतानि । बर्हिषि ।
अथ । रयिम् । सर्ववीरमिति सर्व-वीरम् । दधातन ॥

अग्निष्वात्ता इति जगती ॥ हे [v]अग्निष्वात्ताः, [v]अग्निष्वेव हवन्ते [१६]ये हविषां भोक्तारः [१७]आस्वादनिबद्धभावाः । आमन्त्रिताद्युदात्तत्वम् ([पा] ६·१·१९८) । हे [v]पितरः, [v]इह कर्मणि [v]आगच्छत, हे [v]सुप्रणीतयः सुखपरिचरणाः, [v]सदःसदः आत्मीयमात्मीयं सदनं [v]सदत सीदत ।
१० सीदतिः प्राप्तिकर्माऽयमिदानीम् । यद्वा– " सुपां सुलुक्° " (पा ७·१·३९) [१८]–इति सप्तम्या लुक् । सदःसदः[-१८] सदसिसदसि सीदत । विकरणव्यत्ययेन शः । ततश्च [v]अत्त अश्नीत [v]हवींषि पितरो बर्हिषदः । ब्राह्मणं च " ये वै यज्वानः । ते पितरो बर्हिषदः " (तैब्रा १·६·९) इति ॥

आमन्त्र्यन्ते – हे [v]बर्हिषदः [v]पितरः, [v]ऊती ऊत्या गमनेन [v]अर्वाक् [१९]अस्मान् प्रत्यभिमुखा भूत्वा । " ऊतियूति° " (पा ३·३·९७) इत्यादिना उदात्तः क्तिन्निपातितः, " सुपां
१५ सुलुक्° " (पा ७·१·३९) इति तृतीयायाः पूर्वसवर्णः, " उदात्तस्वरितयोर्यणः° " (पा ८·२·४)

अग्निष्वात्ता इति ॥ अथ " पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थम् " (तैसं १·८·५) इत्येतस्य प्रथमा पुरोनुवाक्योच्यते । यद्यपि पाठक्रमेण तृतीयमिदं हविस्तथाऽपि लिङ्गस्य बलवत्त्वात् तत्र विनियोगो द्रष्टव्यः ॥ पाठस्तु–' अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः । अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन ' इति ॥ [१९]अन्यत्र " ये वा अयज्वानो गृहमेधिनः ते [२०]पितरोऽग्निष्वात्ताः " (तैब्रा १·६·९) इति श्रुतत्वाद्यागमकृत्वैव प्रेत्य पितृलोकं [२१]प्राप्ताः अग्निष्वात्ताः, शोभना प्रणीतिरस्मत्कृता परिचर्या येषां ते सुप्रणीतयस्तथाविधा हे [v]पितरः, [v]इह [v]कर्मणि [v]आ [v]गच्छत । [v]सदःसद तत्तदात्मीयं स्थानं [v]सदत प्राप्नुत । [२२]अस्मिन् [v]बर्हिषि यज्ञे [v]प्रयतानि प्रयत्नेन संपादितानि [v]हवीꣳषि [v]अत्त भक्षयत । [v]अथ अनन्तरं [v]रयिं [२३]धनं सर्वेषु वैदिककर्मसु वीरः कुशलो यः पुत्रस्तादृशं पुत्रं च [v]दधातन संपादयत ॥ [२४]अथ द्वितीया पुरोनुवाक्या याज्या [२५]चेत्युभयं " ये अग्निष्वात्ताः " (तैब्रा २·६·१६) इत्यादिकं कौकिल्यां सौत्रामण्यामाम्नातमतस्तत्रैव व्याख्यास्यते ॥

१६. त्रि.पं२.लं.हो–हे । १७. तं३.लं–आश्वासनि° । १८–१८. तं३– ' इति... सदःसदः ' नास्ति । १९. लं–अस्मत् ।

१९. आ.क–अत्र । २०. ड–' पितरः ' नास्ति । २१. आ–गताः । २२. शृं–तस्मिन् । २३. आ–' धनम् ' नास्ति । २४. ड१–अत्र । २५. अ.आ.इ.उ.क.जो.ड१.पा.शृं.हा–चेत्युभयमाम्नातं
३० तच्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बर्हिषदः पितर ऊत्यर्वागिमा
वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाथा-
स्मभ्यꣳ(२) शं योररपो दधात ॥

बर्हिषद इति बर्हि - सदः । पितरः । ऊती । अर्वाक् । ५
इमा । वः । हव्या । चकृम । जुषध्वम् ।
ते । एति । गत । अवसा । शंतमेनेति शं - तमेन ।
अथ । अस्मभ्यमित्यस्म - भ्यम् (२) । शम् । योः । अरपः । दधात ॥

इति ततः परस्याकारस्य संहितायां स्वरितत्वम् । इमानि हव्यानि हवींषि । उभयत्र "शेश्छन्दसि°" (पा ६·१·७०) इति लोपः । युष्मदर्थं [V]चकृम कुर्मो वयम् । "अन्येषामपि दृश्यते" १०
(पा ६·३·१३७) इति संहितायां दीर्घत्वम् । तानि यूयं [V]जुषध्वं सेवध्वम् । तिङः परत्वात् न निहन्यते (द्र. पा ८·१·२८) । तदर्थं [V]ते च यूयम् [V]आगत आगच्छत । लोटि "बहुलं छन्दसि" (पा २·४·७३) इति शपो लुक् । [V]अवसा प्रीत्या [V]शंतमेन सुखतमेन मनुष्यादिप्रीतेः [V]अथ [V]अनन्तरमागत्य हवींषि च सेवित्वा [V]अस्मभ्यं [V]शं [V]योः च [V]अरपः अपापः उभय- लोकाविरुद्धं [V]दधात दत्त आपत्तापशमनं रोगाणां नाशनं यावनं भयानां पृथक्करणमागामिनो १५
निरोधः । यौतेरसुनि गुणे अवादेशाभावश्छान्दसः ॥

बर्हिषद इति ॥ अथ "पितृभ्यो बर्हिषद्भ्यो धानाः" (तैसं १·८·५) इत्यस्य प्रथमां पुरोनुवाक्यामाह— 'बर्हिषदः पितरः ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् । त आ गतावसा शंतमेनाथास्मभ्यꣳ शं योररपो दधात' इति ॥ बर्हिषि यज्ञे सीदन्तीति [२५r]बर्हिषदः । "ये वै यज्वानः । ते पितरो बर्हिषदः" (तैब्रा १·६·९) इति [२७-]अन्यत्र श्रुतत्वात्[-२७] यागं कृत्वा प्रेत्य पितृलोकं प्राप्ता बर्हिषदः । २०
तादृशा हे [r]पितरः, [r]अर्वाक् अर्वाचीनानामस्माकम् [r]ऊती रक्षा भवद्भिः कर्तव्येति शेषः । [r]वः युष्मदर्थम् [r]इमा [r]हव्या एतानि हवींषि [r]चकृम अतस्तानि [२८r]जुषध्वम् । [r]ते हविर्जुष्टवन्तः [२९-]यूयं [V]शंतमेन सुखतमेन [V]अवसा [३०]रक्षणेन [r]आगत आभिमुख्येनास्मान् [३१]प्राप्नुत । [V]अथ [३२]अनन्तरं अस्मभ्यं [V]शं सुखं [r]योः दुःखवियोगम् [r]अरपः पापराहित्यं च [V]दधात धत्त[-३२] ।

२६. आ.क–बर्हिषदः । अत्रापि । २७–२७. आ.क–उक्तत्वात् । २८. अ.आ.इ.उ.क.जो.ना.पा. २५
हा–जुषध्वमिति । २९–२९. आ.क–यूयमवसा रक्षणेन शंतमेन सुखतमेनास्मानागत तन्निमित्तमागच्छतेत्यर्थः । अथास्मभ्यं प्रथममन्ते च शं सुखं दुःखवियोगं चारपः पापराहित्यं च दधात दत्त । ३०. शृं.हो१–रक्षण- निमित्तेन । ३१. शृं.हा१–प्राप्नुवथ । ३२. ड.ड१–शृं.हो१–अनन्तरं नः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आऽहं पितॄन्त्सुविदत्राँ२ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहाऽऽगमिष्ठाः ॥

एति । अहम् । पितॄन् । सुविदत्रानिति सु - विदत्रान् । अवित्सि ।
नपातम् । च । विक्रमणमिति वि - क्रमणम् । च । विष्णोः ।
बर्हिषद इति बर्हि - सदः । ये । स्वधयेति स्व - धया । सुतस्य ।
भजन्त । पित्वः । ते । इह । आगमिष्ठा इत्या - गमिष्ठाः ॥

आऽहमिति ॥ [V]सुविदत्रान् शोभनवेदनान् सुष्ठु व(वि?)न्दन्तीति सुविदत्राः । विदेः कर्तृप्रत्ययः, कृदुत्तरपदप्रकृतिस्वरत्वम् । [V]अहं तान् [V]आऽवित्सि आभिमुख्येन लब्धवानस्मि । विन्दतेर्लुङि "लिङ्सिचावात्मनेपदेषु" (पा १·२·११) इति कित्त्वम् । किं च— [V]विष्णोः यज्ञात्मनः [V]नपातं [V]च [V]विक्रमणं [V]च आवित्सीत्येव, तेषामेव प्रसादान्नपातनमभ्रेषः कर्माङ्गानाम् । ण्यन्तात् क्विपि नञ्समासे "नभ्राण्नपात्°" [पा ६·३·७५] इति नलोपाभावो निपात्यते । विविधं संक्रमणं [२०]विक्रमणं विश्लिष्टकर्मनिष्पत्तिः । विशिष्टफलप्राप्तिहेतुत्वं वा कर्मणः । कस्मादेवमुच्यते इत्याह— [V]ये [V]बर्हिषदः पितरः [V]स्वधया अन्नेन सह [V]सुतस्य सोमस्यान्नं सोमं च [V]भजन्त अभजन्त यज्वान इति यावत् । "बहुलं छन्दस्यमाङ्योगेऽपि" (पा ६·४·७५) इत्यडभावः । [V]ते पितरः [V]इह अस्मिन् कर्मणि [V]पित्वः पिन्वन्ति [V]आगमिष्ठाः । "सुपां सुलुक्°" (पा ७·१·३९) इति सप्तम्याः स्वादेशः । अतिशयेन गन्तारः । "तुश्छन्दसि" (पा ५·३·५९) इत्यागन्तृशब्दादिष्ठन्प्रत्ययः, "तुरिष्ठेमेयःसु" (पा ६·४·१५४) इति लोपः ॥

एति ॥ अथ तत्रैव द्वितीया पुरोनुवाक्या—'आऽहं पितॄन्त्सुविदत्राँ२ अवित्सि नपातं च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहाऽऽगमिष्ठाः' इति ॥ [V]अहं यजमानः [V]सुविदत्रान् मदीयां भक्तिं सुष्ठु जानतः [V]पितॄन् अपि [V]आऽवित्सि आभिमुख्येन [३३]लब्धवानस्मि । [V]विष्णोः व्यापिनोऽस्य यज्ञस्य [V]नपातं विनाशाभावं [V]विक्रमणं विशेषेण प्रवृत्तिं [V]च लब्धवानस्मि । ये पितरः [V]बर्हिषदः [३४-]सन्ति [V]ते-[३४] [V]इह [३५]अत्र कर्मणि [V]आगमिष्ठाः अतिशयेनाऽऽगताः । [३६]आदरपूर्वकमागत्य [V]पित्वः प्रीतिं [V]भजन्तः [३७]प्राप्तवन्तः । [३८-]केन साधनेन ? [V]सुतस्य [V]स्वधया सोमसमानस्य हविषः स्वादुत्वेन-[३८] ॥

२०. तं३—'विक्रमणं' नास्ति ।

३३. हो१—आवेदिषम्, ड—अवेक्षि । ३४—३४. आ.क.तं.ड.हो१—सन्तः । ३५. ड.हो१—'अत्र' नास्ति । ३६. ड.ड१.शृं—पूर्वं समागत्य । ३७. आ.क—प्राप्नुवन्तु । ३८—३८. ड.हो२—तेन साधनेन सोमस्य स्वधया सोमसमानस्य । हविषः स्वादुत्वेन । अथ पितरः बर्हिष्येषु यागाः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु ते अवन्त्वस्मान् ॥
उदीरतामवर उत् परास उन्मध्यमाः पितरः सोम्यासः ।
असुं (३) य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥

उपहूता इत्युप - हूताः । पितरः । सोम्यासः । बर्हिष्येषु । निधिष्विति नि - धिषु । प्रियेषु । ५
ते । एति । गमन्तु । ते । इह । श्रुवन्तु । अधीति । ब्रुवन्तु । ते । अवन्तु । अस्मान् ।
उदिति । ईरताम् । अवरे । उदिति । परासः । उदिति । मध्यमाः । पितरः । सोम्यासः ।
असुम् (३) । ये । ईयुः । अवृकाः । ऋतज्ञा इत्यृत - ज्ञाः । ते । नः । अवन्तु । पितरः । हवेषु ॥

[V]उपहूताः ये [२१V]पितरः अस्मिन् कर्मणि अस्माभिरुपहूताः [V]सोम्यासः सोमार्हाः । "सोम-मर्हति°" (पा ४·४·१३७) इति यप्रत्ययः । [V]बर्हिष्येषु यागसंबन्धिषु । भवे, साधौ (पा ४·३·५३; १०
४·४·९८) वा यः । संनिधिषु निधीयन्ते इति निधयः हवींषि । "उपसर्गे घोः किः" (पा ३·३·९२), तेषु निमित्तेषु सप्तमी । [V]प्रियेषु इष्टतमेषु ये [२२]आहूताः [V]आगमन्तु आगच्छन्तु । "सर्वे विधयश्छन्दसि विकल्प्यन्ते" (परि ३५) इति छत्वाभावः । अतः [V]इह कर्मणि अस्मत्प्रयुक्ताः स्तुतीः [V]श्रुवन्तु शृण्वन्तु । "बहुलं छन्दसि" (पा २·४·७३) इति शपो लुक् । [V]अधिब्रुवन्तु [V]ते [V]अस्मान् [२३]पक्षपातेन वा अस्मान् आधिक्येन ब्रुवन्तु साधुकृतमेभिरिति । १५
[V]अवन्तु चास्मान् पितरस्ते ॥

उदीरतामिति ॥ [V]उदीरताम् उदीर्णा भवन्तु उद्गच्छन्तु । ईर गतौ, आदादिकः । "आत्मनेपदेष्वनतः" (पा ७·१·५) इत्यदादेशः । [V]अवरे [२४]अपरे अधस्तात् स्थिताः पृथिवी-

उपहूता इति ॥ [३९]**अथ तत्रैव याज्यामाह— 'उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु । त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु ते अवन्त्वस्मान्' इति ॥** [V]**सोम्यासः सोम्या अस्मदनु- २०
ग्रहपराः** [V]**पितरः** [V]**बर्हिष्येषु** [४०V]**प्रियेषु यागार्हेषु तृप्तिकरेषु** [४१V]**निधिषु निधिसदृशेषु हविःषु निमित्तभूतेषु सत्सु** [V]**उपहूताः अस्माभिराहूताः** [V]**ते पितरः** [V]**आगमन्तु आगच्छन्तु । आगत्य च** [४२V]**ते** [V]**इह अस्मिन् कर्मण्यस्माभिः प्रयुक्ताः स्तुतीः** [V]**श्रुवन्तु** [४३]**शृण्वन्तु । श्रुत्वा च** [४४V]**अधिब्रुवन्तु** [४५]**साधुतरो यजमान इत्यादरेण कथयन्तु ।** [४६-V]**तत ईदृशाः** [V]**पितरः अस्मान् अवन्तु ॥**

उदीरतामिति ॥ [४७]**अत्रैवोपहोमार्थास्तिस्र ऋचस्तासु प्रथमामाह— 'उदीरतामवर उत्परास २५
उन्मध्यमाः पितरः सोम्यासः । असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु' इति ॥ त्रिविधाः**

२१. त्रि.लं–पितर आहूताः; तं३–पितर उपहूताः । २२. मै४लं–आहुताः । २३. लं–पातेन । २४. मै–'अपरे' नास्ति ।

३९. हो–'अथ' नास्ति । ४०. आ.क.ड–'प्रियेषु' नास्ति । ४१. आ.क–'निधिषु' नास्ति । ४२. आ.क–'ते' नास्ति । ४३. आ.क–'शृण्वन्तु' नास्ति । ४४. हो१–आशीर्ब्रुवन्तु । ४५. आ.क| ३०
ड.शृं–प्राधुर्यं । ४६–४६. ड–ते तादृशाः । ४७. हो१–तत्रैवो°।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥

इदम् । पितृभ्य इति पितृ - भ्यः । नमः । अस्तु । अद्य । ये । पूर्वासः । ये । उपरासः । ईयुः ।
ये । पार्थिवे । रजसि । एति । निषत्ता इति नि - सत्ताः ।
ये । वा । नूनम् । सुवृजनास्विति सु - वृजनासु । विक्षु ॥

स्थिता वा निकृष्टा वा [v]परासः पराः उत्कृष्टाः [२५]उच्छ्रितस्थानस्थिता वा ते च [v]पितरः उदीरतां, [v]मध्यमाः च पितर उदीरतां, [v]सोम्यासः [२६]सोमार्हाः । "सोममर्हति°" (पा ४·४·१३७) इति यः । [v]ये [v]असुं प्राणं हेतुत्वेन वारकत्वेन [v]ईयुः प्राविष्टाः [v]अवृकाः बाधक-स्वभावरहिताः । कुक वृक आदाने, इगुपधलक्षणः कः (पा ३·१·१३५) । [v]ऋतज्ञाः ऋतस्य सत्यस्य यज्ञस्य वा ज्ञातारः, [v]ते तथा महानुभावाः [v]नः [v]अवन्तु रक्षन्तु प्रीणयन्तु वा [v]हवेषु आह्वानेषु अस्मान् तृप्यन्तु वा अस्मद्यज्ञेषु ॥

इदमिति ॥ [v]इदं [v]नमः [२७]अन्नं प्रणामो वा [v]पितृभ्यः अस्तु [२८v]अद्य अस्मिन् कर्मणि । केभ्यः ? [v]ये [२९-v]पूर्वासः [v]ईयुः-[२९] पूर्वमेव स्वर्गं गताः [v]ये च [v]उपरासः ईयुः उपरिभूतास्तेषां समीपभूता अन्तरिक्षस्थाः तेषां वा कुले [३०]अन्तरिक्षे स्थिताः-[३०] [v]ये च [v]पार्थिवे [v]रजसि लोके [v]आनिषत्ता आनिषण्णाः सर्वतः । "पृथिव्या आञौ" (पा ४·१·८५ वा २) इति स्वार्थिको ञः । यद्वा– पृथिवीसंबन्धिनि लोके स्थिताः । [v]नूनम् इति पादपूरणे । [v]ये [v]वा [v]सुवृजनासु

पितर उत्तमा मध्यमा अधमाश्चेति । [४८-]यथाविधि श्रौतं-[४८] [४९-]कर्मानुष्ठाय पितृत्वं-[४९] प्राप्ता उत्तमाः । [५०-]स्मार्तकर्ममात्रपरा मध्यमाः-[५०] । तत्रापि [५१]कैश्चित् [५२]संस्कारैर्विकला अधमाः । एतदेवाभिप्रेत्य "ये अग्निदग्धा येऽनग्निदग्धाः" (तैब्रा ३·१·१) इत्यादिर्मन्त्र आम्नातः । तेषु [v]अवरे निकृष्टाः [v]उदीरताम् उत्तमं हविः प्राप्नुवन्तु, [v]परासः उत्तमाः पितरः उदीरताम् । [v]मध्यमाः पितरश्च उदीरताम् । ते [५३]सर्वेऽप्यस्मद्विषये [v]सोम्यासः सोम्या अनुग्रहपराः सन्तु । [v]ये पितरः [v]अवृका वृकवदरण्यश्ववदस्मासु हिंसामकुर्वन्तः [v]ऋतज्ञाः अस्मदनुष्ठितं यज्ञं जानन्तः [v]असुम् अस्मत्प्राणम् [v]ईयुः रक्षितुं प्राप्ताः [v]ते [v]पितरः [v]हवेषु अस्मदीयाह्वानेषु [v]नः अस्मान् [v]अवन्तु ।

इदमिति ॥ अथ द्वितीया– 'इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः । ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु' इति ॥ [v]पूर्वासः यजमानोत्पत्तेः पूर्वमुत्पन्ना

२५. मै.लं–°स्थानस्थाः । २६. पं२–सोम्याः । २७. हो–'अन्नं' नास्ति । २८. हो– यदि । २९–२९. लं–पूर्ववत् । ३०–३०. लं–अन्तरिक्षस्थाः ।

४८–४८. आ.हा–यथाविधं श्रौतं, उ–यथा विविधश्रौतं, अ.इ.क.ना.पा–यथा विविधं श्रौतं; ड–यथाविधि श्रुतं, ड१–तथाविधश्रौत° । ४९–४९. ड–कर्मानुष्ठातृत्वम्, ड१–कर्मानुष्ठाय पितृत्वम् । ५०–५०. ड१–'स्मार्तकर्ममात्रपरा मध्यमाः' नास्ति । ५१. आ.क–केचित् । ५२. ड.हो१–°र्विहीनाः । ५३. आ.क–°ष्यस्मिन् विषये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।
शुचीदयन् दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥

अध । यथा । नः । पितरः । परासः । प्रत्नासः । अग्ने । ऋतम् । आशुषाणाः ।
शुचि । इत् । अयन् । दीधितिम् । उक्थशास इत्युक्थ-शासः ।
क्षाम । भिन्दन्तः । अरुणीः । अपेति । व्रन् ॥ ५

शोभनधनासु [v]विक्षु प्रजासु कर्मशीलासु निषण्णाः । यद्वा–उपरासः उपरणशीलाः निवृत्तिप्रधानाः पार्थिवे पृथिव्यां भवे रजसि कर्मणि पुण्यापुण्यात्मके व्यामिश्रे निषण्णाः सुवृजनासु शोभनधनासु कर्मशेषधनासु धार्मिकेषु अपापासु प्रजासु निषण्णाः तेभ्यः सर्वेभ्यो नमोऽस्त्विति ॥

अधेति ॥ [v]अध अत एव कर्मसामर्थ्यात् अस्माकं [v]परासः पूर्वे [v]पितरः [v]प्रत्नासः ततोऽपि पूर्वे पितरः, हे [v]अग्ने, [v]ऋतं सत्यं यज्ञं वा [v]आशुषाणाः अश्नुवानाः । अश्नोतेः छान्दसे १० लिटि रूपम्, तत्र क्वसुकानचोश्छान्दसः समावेशः । अयस्मयादित्वेन भत्वात् (पा १·४·२०) द्वयोः संप्रसारणम् (पा ६·४·१३१) । यद्वा–द्विविकरणत्वं लिटि व्यत्ययेन भवति, उप्रत्ययः । ते च [v]शुचि शुद्धं स्थानम् । [v]इत् इति अवधारणे । *[v]शुच्येव स्थानं यथा ३१[v]अयन् आगच्छन् [v]दीधितिं स्थानं तद्योगात् ताच्छब्द्यम् । [v]उक्थशासः उक्थैः स्तौत्रैः । यत्प्रत्ययः ॥

ज्येष्ठभ्रातृपितृपितामहादयः [v]ये [v]ईयुः पितृलोकं प्राप्ताः । [v]ये चान्ये [v]उपरासः ५५यजमानजननादुपर्युत्पन्नाः १५ कनिष्ठभ्रातृस्वपुत्रादय ईयुः पितृलोकं प्राप्ताः । [v]ये अप्यन्ये [v]पार्थिवे पृथिवीसंबन्धिनि [v]रजसि रजोगुण-कार्येऽस्मिन् कर्मणि ५५[v]आनिषत्ताः हविः स्वीकर्तुमागत्योपविष्टाः । [v]ये [v]वा ५६केचिदन्ये बन्धुवर्गरूपाः पितरो बहुबन्धुरूपासु [v]विक्षु प्रजासु आनिषत्ताः श्राद्धादिस्वीकारायाऽऽगत्योपविष्टाः । कीदृशीषु विक्षु ? [v]सुवृजनासु वृज्यते परित्यज्यते दारिद्र्यमनेनेति वृजनं धनं, शोभनं वृजनं यासां ताः सुवृजनास्तादृशीषु धनसमृद्धया श्राद्धादिकर्मपरास्वित्यर्थः । तेभ्यः ५७सर्वेभ्यः [v]पितृभ्यः [v]अद्य अस्मिन् कर्मणि [v]इदं [v]नमः २० [v]अस्तु अयमाहुतिप्रदानपूर्वको नमस्कारो भवतु ॥

अधेति ॥ अथ तृतीया– ' अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः । शुचीदयन् दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ' इति ॥ हे [v]अग्ने, [v]अध अधस्तादतीते काले [v]नः अस्माकं [v]पितरः [v]ऋतम् [v]आशुषाणाः यज्ञमश्नुवानाः [v]शुचि [v]इत् शुद्धमेव स्थानं यथा येन प्रकारेण [v]अयन्

– त्रि.लं.हो–' शुच्येव स्थानम् ... पितरस्तेषाम् ' नास्ति । ३१. मै४–आयन् । २५

५४. ड.ड१–श्रं.हो१–°जन्मनः उप° । ५५. आ–आनीताः । ५६. आ–ये चान्ये । ५७. आ–सर्वेभ्य उक्तेभ्यः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदग्ने (४) कव्यवाहन पितॄन् यक्ष्यृतावृधः ।
प्र च हव्यानि वक्ष्यसि देवेभ्यश्च पितृभ्य आ ॥

यत् । अग्ने (४) । कव्यवाहनेति कव्य - वाहन । पितॄन् । यक्षि । ऋतावृध इत्यृत - वृधः ।
प्रेति । च । हव्यानि । वक्ष्यसि । देवेभ्यः । च । पितृभ्य इति पितृ - भ्यः । आ ॥

५ यदिति अनुष्टुप् ॥ हे [V]अग्ने [V]कव्यवाहन हविषो वाहक, [V]यत् यस्मात् [V]पितॄन् [V]ऋतावृधः ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितॄन् [V]यक्षि यजसि । "बहुलं छन्दसि" (पा २·४·७३) इति शपो लुक् । तस्मात् त्वमेव [V]हव्यानि [V]प्रवक्ष्यसि प्रवहसि [V]देवेभ्यः च [V]पितृभ्यः च । आकारः समुच्चये । तस्मादेवं महानुभावं त्वामेव वयं यजाम इति ॥

त्वमिति ॥ हे [V]अग्ने [V]जातवेदः जातानां वेदितः प्रजावेदितः, [V]त्वम् [V]ईडितः
१० स्तुतः, अवाट् [V]हव्यानि । वहेश्छान्दसो लुङ् । ततश्च तानि [V]सुरभीणि [V]कृत्वा [V]पितृभ्यः [V]प्रादाः प्रदेहि [V]स्वधया अन्नेन सहैव । ततः [V]ते पितरः तानि प्रयतानि शुद्धानि हवींषि [V]अक्षन् अदन्तु ।

प्राप्तवन्तः [V]दीधितिं दीप्यमानां पितृरूपां देवताम् [V]उक्थशासः शस्त्रैः शंसन्तो वयमपि [५८]तथैव [५९]शुद्धमेव स्थानं प्राप्ताः स्म इति [६०]शेषः । कीदृशाः पितरः ? [V]परासः अस्मत्त उत्कृष्टाः [६१]पितृपितामहप्रपितामहादयः [V]प्रत्नासः पुरातनाः पित्रादिभ्योऽपि पूर्वभाविनः । किं च [६२-]ते पितरः-[६२] [V]क्षाम क्षयहेतुं स्वकीयं क्षुदुपद्रवं
१५ [V]भिन्दन्तः [६३]अन्नेन हविषा [६४]नाशयन्तः [V]अरुणीः तेजोरूपा [६५]दीप्साः प्राप्य [V]अपन्नन् फलप्रतिबन्धकं [६६]प्रावरणमपाकुर्वन् ॥

यदिति ॥ अस्मिन् [६७]महापितृयज्ञकर्मणि शाखान्तरेऽन्यदपि हविर्द्वयं विहितम्- 'अग्नये कव्यवाहनायैकं यमायाङ्गिरस्वते पितृमते द्वितीयम्' [६८]इति । अत एव सूत्रकार आह— "अथैकेषाम् । सोमाय पितृमत आज्यं पितृभ्यो बर्हिषद्भ्यः षट्कपालं पितृभ्योऽग्निष्वात्तेभ्यो धाना अग्नये
२० कव्यवाहनाय यमाय वा मन्थं यमायाङ्गिरस्वते पितृमते" (आपश्रौ ८·१३·१६) इति । तत्र कव्यवाहनस्य प्रथमां पुरोनुवाक्यामाह- 'यदग्ने कव्यवाहन पितॄन् यक्ष्यृतावृधः । प्र च हव्यानि वक्ष्यसि देवेभ्यश्च पितृभ्य आ' इति ॥ कव्यं वहतीति कव्यवाहनः [६९]पित्र्योऽग्निः । अत एवाऽन्यत्र श्रुतम्- "त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणाꣳ सहरक्षा असुराणाम्" (तैसं २·५·८) इति ॥ कव्यस्य [७०]पित्र्यस्य हविषो वाहक हे [V]अग्ने, [V]यत् यस्मात् कारणात् [V]ऋतावृधः यज्ञवर्धकान् [V]पितॄन् [V]यक्षि यजसि
२५ तस्मादेव कारणात् त्वं [V]देवेभ्यः [V]पितृभ्यः [V]च [V]हव्यानि [७१-V]प्र [V]च [V]वक्ष्यसि-[७१] पुनः पुनः प्रकर्षतः परमपि हविर्वहनं करिष्यसि ॥

५८. ड.हो१-'तथैव' नास्ति। ५९. आ-उच्चमेव। ६०. आ.क-'शेषः' नास्ति। ६१. आ.क.ड.ड१.शृं-पितृपितामहादयः। ६२-६२. आ.क-'ते पितरः' नास्ति। ६३. ड.ड१-अनेन। ६४. ड१-विनाशयन्तः। ६५. अ.आ.इ.उ.क.जो.ना.पा.हा-'ताः' ड.शृं-दीप्तीः। ६६. आ.क-
३० पापमपाकृण्वन्। ६७. आ-इह (न्हि?) पितृ°; ड१-ब्रह्मयज्ञपितृ°। ६८. ड.ड१-'इति' नास्ति। ६९. आ.क-पितृभ्योऽग्निः। ७०. हो१-पित्रियस्य; आ.-अस्य। ७१-७१. आ.क-प्रावक्ष्यसि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वा ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवीꣳषि ।
मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
याꣳश्च देवा वावृधुर्ये च देवान्त्स्वाहाऽन्ये स्वधयाऽन्ये मदन्ति (५) ॥

त्वम् । अग्ने । ईडितः । जातवेद इति जात - वेदः । अवाट् । हव्यानि । सुरभीणि । कृत्वा । ५
प्रेति । अदाः । पितृभ्य इति पितृ - भ्यः । स्वधयेति स्व - धया । ते । अक्षन् ।
अद्धि । त्वम् । देव । प्रयतेति प्र - यता । हवीꣳषि ।
मातली । कव्यैः । यमः । अङ्गिरोभिरित्यङ्गिरः - भिः । बृहस्पतिः । ऋक्वभिरित्यृक्व - भिः । वावृधानः ।
यान् । च । देवाः । वावृधुः । ये । च । देवान् ।
स्वाहा । अन्ये । स्वधयेति स्व - धया । अन्ये । मदन्ति (५) ॥ १०

अदेश्छान्दसो "लुङ्सनोर्घस्लृ" (पा २·४·३७) इति घस्लादेशः, "मन्त्रे घस°" (पा २·४·८०) इति च्लेर्लुक्, "घसिभसोर्हलि च" (पा ६·४·१००) इत्युपधालोपः । [v]देव, [v]त्वम् अपि तानि हवींषि [v]अद्धि भक्षय सततमस्मानुपकारिणः कुर्विति भावः ॥

वावृधान इति ॥ प्रत्येकं कव्यादिभिः संपद्यते । मातलिना तद्वानिन्द्रो मातलिः(ली) । छान्दस इनिर्वीह्यादिवद्द्रष्टव्यः (पा ५·२·११६) । [v]सः [v]कव्यैः कव्यवाहिभिः पितृभिः सह [v]वावृधानः १५ वर्धमानः । शपः श्लुः, ताच्छीलिकश्चानश् । [v]यमः पितृराजः, सः [v]अङ्गिरोभिः पितृविशेषैः सह वावृधानः । [v]बृहस्पतिः [v]ऋक्वभिः मन्त्रवद्भिः स्तुतिमद्भिर्वा पितृविशेषैः सह वावृधानः ।

त्वमिति ॥ द्वितीयां पुरोनुवाक्यामाह–'त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वा । प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवीꣳषि' इति ॥ जातं सर्वं [७१]वेत्तीति जातवेदास्तथाविध हे [v]अग्ने, [v]त्वम् [v]ईडितः यजमानेन स्तुतः संस्तदीयानि [v]हव्यानि [v]सुरभीणि सुगन्धीनि २० [v]कृत्वा [v]अवाट् वहनं कृतवानसि । कृत्वा च [v]पितृभ्यः [v]प्रादाः । [v]ते च पितरः [v]स्वधया स्वधाकारेण प्रत्तं हव्यम् [v]अक्षन् अदन्तु । हे [v]देव, [v]त्वम् अपि [v]प्रयता प्रयत्नसंपादितानि [v]हवींषि [v]अद्धि भक्षय ॥

मातलीति ॥ अथ याज्या–'मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः । याꣳश्च देवा वावृधुर्ये च देवान्त्स्वाहाऽन्ये स्वधयाऽन्ये मदन्ति' इति ॥ मातलिरिन्द्रस्य सूतस्तद्वानिन्द्रः [v]मातली । स च [v]कव्यैः कव्यभागिभः पितृभिः सह [v]वावृधानः वर्धमानो भवति । [v]यमश्च [v]अङ्गिरोभिः २५ पितृविशेषैः सह वर्धमानो भवति । [v]बृहस्पतिश्च [v]ऋक्वभिः ऋक्प्रतिपाद्यैः पितृविशेषैः सह वर्धमानो भवति । तत्र [v]देवाः [७३]इन्द्रादयः [v]यान् कव्यभागादीन् पितॄन् [v]वावृधुः वर्धयन्ति, [v]ये [v]च कव्यभागादयः पितर इन्द्रादीन् [v]देवान् वर्धयन्ति, तेषां मध्ये [७४]अन्ये इन्द्रादयः [v]स्वाहा [v]मदन्ति स्वाहाकारेण [७५]हृष्यन्ति । [v]अन्ये पितरः [v]स्वधया स्वधाकारेण [७५]हृष्यन्ति ॥

७२. आ–जगद्वेदेति । ७३. आ.क–'इन्द्रादयः' नास्ति । ७४. आ.क.ड–'अन्ये' नास्ति । ३० ७५. आ–तृप्यन्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥
अङ्गिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।
विवस्वन्तꣳ हुवे यः पिता तेऽस्मिन् यज्ञे बर्हिष्या निषद्य ॥

इमम् । यम । प्रस्तरमिति प्र - स्तरम् । एति । हि । सीद ।
अङ्गिरोभिरित्यङ्गिरः - भिः । पितृभिरिति पितृ - भिः । संविदान इति सं - विदानः ॥
एति । त्वा । मन्त्राः । कविशस्ता इति कवि - शस्ताः । वहन्तु । एना । राजन् । हविषा । मादयस्व ।
अङ्गिरोभित्यङ्गिरः - भिः । एति । गहि । यज्ञियेभिः । यम । वैरूपैः । इह । मादयस्व ।
विवस्वन्तम् । हुवे । यः । पिता । ते । अस्मिन् । यज्ञे । बर्हिषि । एति । निषद्येति नि - सद्य ॥

"छन्दसीवनिपौ" (पा ५·२·१०९ वा २) इति वनिप्प्रत्ययः, अयस्मयादित्वेन पदत्वात्कुत्वं, भत्वाज्जश्त्वाभावः । [v]यान् [v]च पितॄन् [v]देवाः [v]वावृधुः वर्धयन्ति । व्यत्ययेन परस्मैपदम्, तुजादित्वादभ्यासस्य दीर्घत्वम् (पा ६·१·७) । [v]ये [v]च पितरः [v]देवान् वावृधुरिति । ये च तत्र [v]अन्ये एके देवाः पितॄणां वर्धयितारः स्वाहाकारेण [v]मदन्ति मोदन्ताम् । अथ [v]अन्ये एके पितरः [v]स्वधया स्वधाकारेण मदन्तीत्येव । माद्यतेर्व्यत्ययेन शः ॥

इममिति ॥ हे पितृराज, [v]इमम् [v]प्रस्तरं प्रस्तीर्णमाश्रमम् [v]आसीद [v]अङ्गिरोभिः पितृविशेषैः [v]संविदानः ऐकमत्यं गच्छन् । तत आसीदन्तं त्वां कविशस्ताः कविभिर्मेधाविभिः आस्माकीनैः ऋत्विग्भिः शस्ताः [v]मन्त्राः [v]आवहन्तु प्राप्नुवन्तु । ततः [v]एना अनेन [v]हविषा [v]राजन् राजनशील, [v]मादयस्व । मद तृप्तियोगे, चौरादिकः ॥

अङ्गिरोभिरिति ॥ हे [v]यम, [v]अङ्गिरोभिः सह [v]आगहि आगच्छ । पूर्ववत् शपो लुक् । [v]यज्ञियेभिः यज्ञार्हैः [v]वैरूपैः विविधकर्मरूपसंबन्धिभिः, वैरूपसामप्रियैर्वा । यद्वा–स्वार्थिकोऽण् ।

इममिति ॥ अथाङ्गिरस्वतो यमस्य प्रथमां पुरोनुवाक्यामाह– 'इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः संविदानः । आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व' इति ॥ हे [v]यम, [v]अङ्गिरोभिः एतन्नामकैः [v]पितृभिः [v]संविदानः ऐकमत्यं [७५]प्राप्तः [v]इमं [v]प्रस्तरं प्रस्तीर्णं यज्ञविशेषम् [v]आसीद आगत्योपविश । [v]हि यस्मादुपविशसि तस्मात् [v]कविशस्ताः विद्वद्भिर्ऋत्विग्भिः प्रयुक्ताः [v]मन्त्राः त्वाम् [v]आवहन्तु । हे [v]राजन्, [v]एना अनेन [v]हविषा तुष्टः [v]मादयस्व यजमानं [७६]हर्षयस्व ॥

अङ्गिरोभिरिति ॥ अथ द्वितीयां पुरोनुवाक्यामाह– 'अङ्गिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व । विवस्वन्तꣳ हुवे यः पिता तेऽस्मिन् यज्ञे बर्हिष्या निषद्य' इति ॥ हे [v]यम, [v]वैरूपैः विविधरूपयुक्तैर्वैरूपसामप्रियैर्वा [v]यज्ञियेभिः यज्ञयोग्यैः [v]अङ्गिरोभिः सह [v]आ गहि आगच्छ । आगत्य च [v]इह [v]मादयस्व यजमानं हर्षय । [v]यः [v]ते तव [v]पिता विवस्वानस्ति तं [v]विवस्वन्तम् अस्मिन् यज्ञे [v]हुवे आह्वयामि । स च [v]बर्हिषि [v]अस्मिन् [v]यज्ञे [v]आनिषद्य आगत्योपविश्य यजमानं हर्षयतु ॥

७६. ड.ढ१.शृं.हो१– प्राप्तः । ७७. ड–हर्षय ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पितृयज्ञस्य हौत्रम्]

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे (६) स्याम ॥१२॥

[भवास्मभ्यमसुं यदग्ने मदन्ति सौमनस एकं च]

[समिधश्चक्षुषी प्रजापतिराज्यं देवस्य स्फ्यं ब्रह्मवादिनोद्भिरग्नेस्त्रयो मनुः पृथिव्याः
पशवोऽग्नीधे देवा वै यज्ञस्य युक्ष्वोशन्तस्त्वा द्वादश ।] ५

[समिधो याज्या तस्मान्नाभागꣳ हितमन्वित्याह प्रजा वा आहेत्याह युक्ष्वा हि संततिः]

[समिधः सौमनसे स्याम ।]

[वायव्यं प्रजापतिरादित्येभ्यो देवा विश्वरूपः समिधः षट् ।]

[मैसं ४·१०·६; १४·१६]

अङ्गिरसः । नः । पितरः । नवग्वाः । अथर्वाणः । भृगवः । सोम्यासः । १०
तेषाम् । वयम् । सुमताविति सु - मतौ । यज्ञियानाम् । अपीति । भद्रे । सौमनसे (६) । स्याम ॥१२॥

विरूपैः विविधरूपैः सह [V]इह कर्मणि [३२V]मादयस्व । अथ [V]यः तव [V]पिता तं [V]विविस्वन्तं [V]हुवे आह्वयामि । सः अपि [V]अस्मिन् [V]यज्ञे आगत्य [V]बर्हिषि [V]निषद्य माद्यताम् ॥

अङ्गिरस इति ॥ [V]अङ्गिरसः पितृविशेषाः अस्माकं च [V]पितरः [V]नवग्वाः अभिनवागमनाः आगमने अभिनवा इव प्रियाः । क्विपि "ऊङ् च गमादीनाम्" (पाभा ६·४·४०) १५
इत्यूकारः । आगमनमायातु उपसर्गयोः स्वस्थानविनिमयः वा बहुव्रीहौ । नवग्वा [V]अथर्वाणः च [V]भृगवः च पितृविशेषाः प्रशस्ताः [V]सोम्यासः सोमार्हाः येऽप्येवंविधा महानुभावाः पितरः । [V]तेषां* [V]यज्ञियानां यज्ञार्हाणां [V]सुमतौ शोभनायां मतौ सानुग्रहायां [V]वयं [V]स्याम भूयास्म । [V]अपि च [V]भद्रे भजनीये कल्याणे [V]सौमनसे सौमनस्यहेतुके तत्प्रदानहेतुके सर्वाभिमतसिद्धिरूपे

**अङ्गिरस इति ॥ अथ याज्यामाह– ' अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः । २०
तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ' इति ॥**

अङ्गिरोनामका अथर्वनामका भृगुनामकाश्च [V]नः अस्माकं [V]पितरः [V]नवग्वाः [७८V]अभिनवागमनयुक्ताः [७९V]तदा तदा[७९] नूतनवत् प्रीतिजनका इत्यर्थः । ते च [V]सोम्यासः, सोममर्हन्तीति[८०] सोम्याः । [V]यज्ञियानां [V]तेषां [V]सुमतौ अनुग्रहयुक्तायां [८१V]बुद्धौ [V]वयं [V]स्याम सर्वदा तिष्ठेम । [V]अपि च [V]सौमनसे सौमनस्यकारणे [V]भद्रे कल्याणे फले स्याम सर्वदा तिष्ठेम ॥ २५

---

३२. मै४–' मादयस्व ' इत्यस्यानन्तरं ' मोदयस्व ' ।

---

७८. ड.हो१–नवागमन°; ड१–अभिनवगमन° । ७९–७९. ड.हो१–तथा । ८०. आ.क–'इति' नास्ति । ८१. ड१–प्रबुद्धा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कल्याणे च [v]स्याम इति। येऽत्र अविनियुक्ता मन्त्राः ते लिङ्गेन क्वाप्यनुरूपे कर्माणि विनियोक्तव्याः ॥

इति श्रीभट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये
द्वितीये काण्डे षष्ठे प्रश्ने द्वादशोऽनुवाकः ॥

समाप्तः षष्ठः प्रपाठकः द्वितीयकाण्डश्च ॥

[३३]एष निष्पाप(व)के शाके कुशिकान्वयजन्मना।
भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रकीर्तितः[३३] ॥

अत्र विनियोगसंग्रहः –

"उशन्तः सामिधेन्येका पितृयज्ञे महत्यसौ।
त्वं सोमेत्यनुवाक्ये [८२]द्वे पितृमन्नामके तथा[८२] ॥
त्वं याज्याऽग्निष्वेति मन्थेऽनुवाक्या प्रथमा भवेत्।
बर्हिर्द्वे अनुवाक्ये [८३]तु याज्यैका बर्हिषद्यजौ ॥
उपहोमा उदीरेति [८४]त्रयस्तत्रैव यागके।
कव्यवाहनयागे तु यदग्ने तिस्र ईरिताः ॥
पुरोनुवाक्ये द्वे तत्र याज्यैका याम्ययागके।
इमं पुरोनुवाक्ये द्वे याज्यैका पूर्ववन्मता ॥
अन्तिमे ह्यनुवाकेऽस्मिन् मन्त्राः सप्तदशेरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे षष्ठप्रपाठके द्वादशोऽनुवाकः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञा-
परिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयकाण्डे षष्ठः प्रपाठकः ॥

इति [८५]श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञा-
परिपालकेन[८५] माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
द्वितीयः काण्डः समाप्तः ॥

३३–३३. मै.मै४–'एष निष्पाप(व)के शाके कुशिकान्वयजन्मना ॥ भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रकीर्तितः ॥' नास्ति।

---

८२. ड–तत्र याज्यैकाया तथा। ८३. ड–हि। ८४. आ.क–त्रयस्तत्त्रययागके। ८५. ड–श्रीमद्-दिव्ययोगेन्द्रराजादिवीरबुक्कमहीपालस्य आज्ञाधुरंधरेण।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुद्धिपत्रम्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७	८	ध्रवाः	ध्रुवाः
४०	४	इदमभद्यद्वयꣳ	इदमभूद्यद्वयꣳ
८२	३	परिज्मेति	परिज्मेति
१३३	२	स्यु(३)रितीं	स्यु(३)रितीं
१३५	१३	इति द्वे-द्वे	इति द्वे-द्वे
२०९	१	पुरोडाशं	पुरोडाशं
२६९	४	°न्द्रियावंती°	°न्द्रियावती°
४४९	३	°दक्षिणार्ध्यं	°दक्षिणार्ध्यं

टिप्पणी

१२९ तमे पृष्ठे चतुर्थपङ्क्तौ **समीयुरिन्द्रमेव** इति संहिता-पाठः; एकादश्यां पङ्क्तौ च समीयुरिति सम्-ईयुः इति पदपाठश्च मैसूरावृत्तिमाश्रित्य स्वीकृतौ। आनन्दाश्रम-मुद्रित-पुस्तके सातवळेकर संपादित-संहितापुस्तके अन्येषु लिखितपुस्तकेषु च **समियुरिन्द्रमेव** इति संहितापाठोऽस्ति वेबरमुद्रित पुस्तकेऽपि sam-iyúr इत्येव पाठोऽस्ति। कुम्भकोणम्-आवृत्तौ च समियुरिति सम् इयुः इति पदपाठः स्वीकृतो दृश्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi